॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १३

द्वितीयाध्यायस्य प्रथमपादे

असदधिकरणम् (भागः २) तः प्रथमपादान्तम्

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता
सम्पुटम् - १३
प्रथमं मुद्रणम् - ई.सन् २००७

Śrīman-Nyāyasudhā
Parimalādyupetā
Volume - 13
First Edition - 2007 A.D.

सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा, बुधवासरः
मन्त्रालयम्

Published by :

Śrī Gurusārvabhauma Saṁskṛt Vidyāpīṭham
Śrīman Madvāchārya Mūla Mahāsamsthāna
Śrī Rāghavendra Swāmy Mutt
Mantrālayam - 518 345
India.

* मुद्रकः *

धनंजयाचार्य बाळाचार्य वरखेडकरः

सुधा मुद्रणम्
शंकरपुरम्, बेंगळूरु - ५६० ००४
दूरवाणी– २६७२ ३१०७, ६५६० २८३६

SUDHA MUDRANA
Shankarpuram, Bangalore - 560 004
Phone : 2672 3107, 6560 2836

समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्यत्वाद्यमन्दबिरुदवृन्दविभूषित-
सर्वतन्त्रस्वतन्त्र-श्रीमद्वैष्णवसिद्धान्तस्थापनाचार्य-
षड्दर्शनाचार्यवर्य-नास्तिकदर्शननिराकरणधुरन्धर-
आस्तिकदर्शनमहाचार्य-
श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक-

श्रीमन्मध्वाचार्यसमलङ्कृतमूलमहासंस्थानाधिष्ठितानां

श्रीमदद्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

श्रीश्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-

श्रीरामकृष्णवेदव्यासाभिन्न-

श्रीमूलरघुपतिपादकमलयोः

समर्पितोऽयं ग्रन्थः ॥

सुजयीन्द्रकृपापूर्णसुशमीन्द्रयतीश्वरैः ।
श्रीमन्न्यायसुधाग्रन्थ अर्पितोऽयं मुदा हरेः ॥

।। श्रीमन्मूलरामो विजयते ।।

श्रीमद्धंसनामकपरमात्मसमारब्धपरम्परागत-श्रीमत्परमहंसेत्यादिबिरुदभूषित-

श्रीमदानन्दतीर्थभगवत्पादाचार्य-मूलमहासंस्थानाधीश्वर-

श्रीमद्राघवेन्द्रगुरुसार्वभौम-

वेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वर-

श्रीमत्सुयमीन्द्रतीर्थश्रीपादकरकमलसञ्जात-श्रीमत्सुजयीन्द्रतीर्थश्रीपादवरकुमारक-

श्री श्रीमत्सुशमीन्द्रतीर्थश्रीपादानाम्

तथा तेषामुत्तराधिकारिणां

श्री श्रीमत्सुयतीन्द्रतीर्थश्रीपादानाम्

अनुग्रहवचनम्

अस्मत्प्रियशिष्यान् तथैव अस्मन्मठीयान् नैकान् आस्थानविद्वज्जनान् वयम् अस्मद्गुरुवराणां श्रीमत्सुजयीन्द्रतीर्थश्रीमच्चरणानामाज्ञामनुरुध्य परिमलादि-बहुटिप्पणीभिर्युक्तां श्रीमन्न्यायसुधां संशोध्य प्रकाशयितुमादिष्टवन्तः स्मः।

अस्मदादेशमनुरुध्य ग्रन्थमिमं संशोध्य मुद्रणप्रतिमपि संशोधितवद्भ्यः प्रधानसम्पादकेभ्यः वैकुण्ठवासिभ्यः साणूरु भीमभट्टेभ्यः तथा ग्रन्थमिमं प्रकाशितवद्भ्यः श्रीगुरुसार्वभौमसंस्कृत-विद्यापीठीयेभ्यः एवं ग्रन्थसंशोधने तथा मुद्रणप्रतिसंशोधने च सहायमाचरितवद्भ्यः अस्मद्विद्यापीठा-ध्यापकेभ्यः, तथाऽन्येभ्यो विद्वद्भ्यः, एवमल्पकाले सुष्ठु मुद्रणं कृतवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः धनंजयाचार्येभ्यः तथा सर्वेभ्यः एतद्ग्रन्थाध्ययन-अध्यापनादिकर्तृभ्यः अस्मदुपास्यः श्री श्रीमद्राघवेन्द्र-तीर्थगुर्वन्तर्गत-श्रीभारतीरमण-मुख्यप्राणान्तर्गत-श्रीसीतापति-श्रीमूलरामचन्द्रदेवः इतोऽप्यतिशयित-' आयुरारोग्यैश्वर्यादीनि, ज्ञानभक्तिवैराग्यादीनि च दत्वा अनुगृह्णातु इत्याशास्महे।

इति नारायणस्मृतिः।

मन्त्रालयक्षेत्रम्,

सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा।

श्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां
श्री श्री सुजयीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

श्री श्री सुशमीन्द्रतीर्थश्रीपादानां

परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।

सम्पादकविद्वन्मण्डली

प्रधानसम्पादकाः

वैकुण्ठवासिनः श्री आचार्य साणूरु भीमभट्टाः

आस्थानविद्वांसः, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

सम्पादकाः

विद्वान् श्री कुर्डि सुशीलेन्द्राचार्याः

विद्वान् श्री कडप राघवेन्द्राचार्याः, *प्रांशुपालाः श्री गु.सं.वि., मन्त्रालयः*

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः

निर्वाहकाः

श्रीपादपुत्राः राजा एस्. राजगोपालाचार्याः

श्री श्री सुशमीन्द्रतीर्थश्रीपादानाम् आप्तकार्यदर्शिनः,
श्रीमन्मध्वाचार्यमूलमहासंस्थानम् - श्रीराघवेन्द्रस्वामिमठः,
मन्त्रालयम्

श्रीमन्न्यायसुधा - परिमळाद्युपेता

टिप्पणीनां क्रमः तथा सङ्केतनामानि

क्र.सं.	कर्तृनाम	टिप्पणीनाम	सङ्केतनाम
१	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः	बिन्दुः—
२	श्री राघवेन्द्रतीर्थाः	परिमळः	परि०—
३	श्री श्रीपादराजतीर्थाः	वाग्वज्रः	वाग्वज्रः—
४	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका	गु०दी०—
५	श्री यदुपत्याचार्याः	टिप्पणी	यादु०—
६	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः	वं०प०—
७	श्री गलगली नरसिंहाचार्याः	आनन्दः	आनन्दः—
८	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः	कं०रा०—
९	श्री श्रीनिधितीर्थाः	टिप्पणी	श्रीनिधि०—
१०	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका	वा०चं०—
११	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका	शे०चं०—
१२	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला	वा०र०—
१३	श्री सत्यव्रततीर्थाः	सुधाविवृतिः	स०व्र०—
१४	श्री कुण्डलगिरिआचार्याः	रसकूलङ्कषः	कुण्डल०—
१५	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः	स०ना०—
१६	श्री विठ्ठलभट्टाः	टिप्पणी	विठ्ठ०—
१७	श्री विष्णुतीर्थाः	रसरञ्जनी	रस०—
१८	श्री अडवी कृष्णाचार्याः	लघुरसरञ्जनी	ल०र०—
१९	श्री मन्नारी कृष्णाचार्याः	चषकः	चषकः—
२०	श्री एरी बाळाचार्याः	उपस्पर्शः	ए०बा०—
२१	श्री काशी आचार्याः	काशी टिप्पणी	काशी०—
२२	श्री गूढकर्तृकाचार्याः	गूढकर्तृका	गूढ०—
२३	श्री प्रदीपकाराः	प्रदीपः	प्रदीपः—
२४	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी	पांग्री०—
२५	श्री कलापूर सत्याधिराजाचार्याः	हुग्गि	हुग्गि०—

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः । साम्प्रत-मस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः ।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातृणामभिप्राय एव । सः श्रीमद्विजयीन्द्रतीर्थ-श्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्य-मिति एतन्मूलकतया स्पष्टीकुर्मः ।

इत्थम्

सम्पादकाः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्ट्यधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्यैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	व्याख्यानस्य नाम
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गल्गली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबाल्रू रामचन्द्रतीर्थाः	विवृतिः

९)	श्री श्रीनिधितीर्थाः	टिप्पणी
१०)	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका
११)	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला
१२)	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका
१३)	श्री कुण्डलगिरि आचार्याः	रसकूलङ्कषः
१४)	श्री सत्यव्रततीर्थाः	सुधाविवृतिः
१५)	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः
१६)	श्री विट्ठलभट्टः	टिप्पणी
१७)	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि
१८)	श्री विष्णुतीर्थाः	रसरञ्जनी
१९)	श्री अडवि कृष्णाचार्याः	लघुरसरञ्जनी
२०)	श्री मन्नारि कृष्णाचार्याः	चषकः
२१)	श्री एरी बाळाचार्याः	उपस्पर्शः
२२)	श्री काशी तिम्मण्णाचार्याः	काशी टिप्पणी
२३)	श्री गूढकर्तृकटिप्पणीकाराः	टिप्पणी
२४)	श्री प्रदीपकाराः	प्रदीपः
२५)	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी
२६)	श्री रोट्टि वेङ्कटभट्टाः	सुधाविवृतिः
२७)	श्री ताम्रपर्णी आचार्याः	टिप्पणी
२८)	श्री उमर्जी प्रह्लादकृष्णाचार्याः	उमर्जी
२९)	श्री व्यासतत्त्वज्ञतीर्थाः	कुलिशम्
३०)	श्री महेश्वरसूरिः	टिप्पणी
३१)	श्री पुट्ट तंबि आचार्याः	टिप्पणी
३२)	श्री रत्नगर्भ ओडेयर्	टिप्पणी
३३)	श्री अनन्तभट्टाः	टिप्पणी
३४)	श्री सत्यनाथाचार्याः	टिप्पणी
३५)	श्री जयवेङ्कटाचार्याः	टिप्पणी
३६)	श्री गूढकर्तृकाचार्याः	सुधासारसङ्ग्रहः
३७)	श्री गलगली गोविन्दाचार्याः	पञ्चरत्नस्तबकः

३८)	श्री श्रीमुष्णाचार्याः	पद्माधिकरणी
३९)	श्री लिङ्गेरि श्रीनिवासाचार्याः	सिद्धान्तप्रभा
४०)	श्री पाण्डुरङ्गि केशवाचार्याः	सुधावाक्यार्थविनोदः
४१)	श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः)	टिप्पणी
४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विठ्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्प-यामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य प्रधानसम्पादकेभ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, तथा

विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांग्री श्रीनिवासाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री पांग्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृति-संशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन् राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूल-रघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

***

॥ श्रीमन्मूलरामो विजयते ॥

प्रस्तावना

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्ख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविचाररसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसंबन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । तस्यास्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता कृतेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं प्रविश्य स्वगुरूणां विद्यारण्यारण्यच्छेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकीन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त जयतीर्थश्रीमच्चरणाः। तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यान्तः, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके टीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः।

महानुभावाः जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन्।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः। तद्यथा—

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम्॥

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति। एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम्। एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म। यथा—

आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं
मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम्।
शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः
व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम्॥

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्र्य अत्र प्रकाशं नीयते। महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनसमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम्। श्रीकृष्णार्पणमस्तु॥

आचार्याः साणूरु भीमभट्टाः
प्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

संपुटम् - १३

विषयानुक्रमणिका

विषयः	परिच्छेदः	पुटसंख्या
असदधिकरणम् (२-१-४) (गतसम्पुटात् अनुवर्तते)		
१-आ-२-		
ग) 'असीतौ तद्वत्प्रसङ्गादसमञ्जसम्' इति सूत्रस्य व्याख्यानम्	२३	६००१-६००३
१) अभावस्य जगत्कर्तृत्वाङ्गीकारे प्रलये ईश्वरादेः सर्वस्य अभावाभ्युपगमप्रसङ्गः	२३	६००१-६००३
घ) 'न तु दृष्टान्तभावात्' इतिसूत्रस्य द्वाभ्यां वृत्तिभ्यां व्याख्यानम्	२४-४१	६००३-६०६४
१) एकां वृत्तिमभिप्रेत्य व्याख्यानम्	२४-३९	६००३-६०५६
च) दृष्टान्तपदस्य 'प्रलये परमेश्वरादिसद्भावसाधकानुमान' वाच्यत्वम्	२४-३९	६००३-६०५६
१) जीवेश्वरसाधारणानुमानानि	२५-२८	६००४-६०१३
२) जीवसद्भावसाधकानुमानम्	२९-३९	६०१३-६०५६
ट) विविधाः अनुमानप्रयोगाः	२९	६०१३-६०१६
ठ) उक्तानुमानदूषणनिरासः	३०-३९	६०१६-६०५६
१) आश्रयासिद्धिशङ्कानिरसनम्	३०-३९	६०१६-६०५६

विषयः	परिच्छेदः	पुटसंख्या
१-आ-२-घ-१-च-२-ठ-१-त		
त) धर्माधर्मसंज्ञितादृष्टाभावशङ्कायां विकल्पत्रयं तन्निरसनञ्च	३०-३९	६०१६-६०५६
१) प्रथमविकल्पदूषणम्	३०-३१	६०१६-६०२१
२) द्वितीयतृतीयविकल्पदूषणम्	३२-३९	६०२२-६०५६
प) 'ईश्वरादिकं प्रलयेऽसद्भवितुमर्हति' इतिपरपक्षस्याप्रसिद्धविशेषता	३२-३९	६०२२-६०५६
१) 'प्रलयस्यानुमानसिद्धत्वाङ्गीकार'ासम्भवः	३३-३८	६०२३-६०५५
य) धर्मादिसाधकानुमानानामाभासत्वे प्रलयसाधकानुमानानामप्याभासत्वम्	३४-३८	६०३४-६०५५
२) प्रलयस्यागमसिद्धत्वे धर्मादिकस्याप्यागमसिद्धता	३९	६०५५-६०५६
१-आ-२-घ-२		
२) द्वितीयां वृत्तिमभिप्रेत्य व्याख्यानम्	४०-४१	६०५७-६०६४
ङ) 'तर्काप्रतिष्ठानात्' इति सूत्रस्य व्याख्यानम्	४२-४७	६०६४-६०७२
१) सूत्रोक्तपूर्वपक्षस्य व्याख्यानम्	४२-४४	६०६४-६०६७
च) आक्षेपस्यार्थः	४२	६०६४-६०६५
छ) आक्षेपस्य वैयधिकरण्यशङ्का, तत्समाधानञ्च द्विविधयोजनया	४३	६०६५-६०६६
२) सूत्रोक्तोत्तरपक्षस्य व्याख्यानम्	४३-४७	६०६५-६०७२
च) आदौ उत्सूत्रमुत्तरम्	४३-४६	६०६५-६०७१
१) आद्ययोजनानुसारेणास्योत्तरस्यार्थः	४५	६०६७-६०७०
२) द्वितीययोजनानुसारेणास्योत्तरस्यार्थः	४६	६०७०-६०७१
छ) ततः सूत्रारूढमुत्तरम्	४७	६०७१-६०७२
३) मतान्तराणां निरासः	४८-५०	६०७३-६०८२
क) 'न विलक्षणत्वात्' इत्यादिसूत्राणां व्याख्यानान्तरनिरासः	४८	६०७३-६०७७
ख) 'तर्काप्रतिष्ठानात्' इत्यंशस्य 'सिद्धान्ततयैव वर्णनपरत्व' निरासः	४९	६०७७-६०८१
ग) पुरुषमतिवैश्वरूप्यजन्मनस्तर्कस्याप्रतिष्ठितत्वम् इति मतस्य निरसनम्	५०	६०८१-६०८२

विषयः	परिच्छेदः	पुटसंख्या
४) 'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः' इति सूत्रस्य व्याख्यानम्	५१-५७	६०८२-६१०४
क) केषाञ्चिदपव्याख्यानं तद्दूषणञ्च	५१	६०८२-६०८८
ख) एतत्सूत्रस्याभिधेयकथनं तत्समर्थनञ्च	५२-५७	६०८८-६१०४
१) अभिधेयकथनम्	५२	६०८८-६०८९
२) उक्तार्थस्य समर्थनम्	५३-५७	६०८९-६१०४
च) अनुव्याख्यानोक्तजीवादीत्यादिपदे आक्षेपस्तत्समाधानञ्च	५३	६०८९-६०९६
छ) निषेध्यायां जीवादिकर्तृतायां विकल्प्य शङ्का तत्समाधानञ्च	५४	६०९६-६०९९
ज) जीवकर्तृत्ववादस्य युक्तिविरुद्धत्वे शङ्का तत्समाधानञ्च	५५-५६	६०९९-६१०३
झ) अस्मदनुमाने अकार्यत्वोपाधिशङ्का तत्समाधानञ्च	५७	६१०३-६१०४

* * *

विषयः	परिच्छेदः	पुटसंख्या
भोक्त्रधिकरणम् (२-१-५)	५८-६३	६१०५-६१२९
(१) ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य अल्पवाक्ययुतयुक्तिविरोधस्य 'श्रुतिसिद्धत्वेन प्रबल'या युक्त्या परिहारः	५८-६३	६१०५-६१२९
अ) भाष्योक्तव्याख्यानानुपपत्तिपरिहारकतया सूत्रव्याख्यानम्	५८-६०	६१०५-६१२२
१) भाष्योक्तव्याख्यानानुवादपूर्वकं तत्रानुपपत्तिप्रदर्शनसहितं तत्परिहारकानुव्याख्यानस्य निदर्शनम्	५८	६१०५-६११२
२) एतदनुव्याख्यानस्य व्याख्यानम्	५९	६११२-६११८
३) उक्तव्याख्याने अभ्यधिकाशङ्का, तत्परिहारकानुव्याख्यानव्याख्यानञ्च	६०	६११९-६१२२
आ) एतत्सूत्रीयान्यव्याख्यानदूषणम्	६१-६३	६१२२-६१२९
१) ब्रह्मपरिणामवादिनां व्याख्यानं, तद्दूषणं, तत्राभ्यधिकाशङ्कानिरसनञ्च	६१	६१२२-६१२५
२) रामानुजीयव्याख्यानं, तद्दूषणञ्च	६२-६३	६१२५-६१२९
क) तद्दूषणे अभ्यधिका शङ्का, तन्निरसनञ्च	६३	६१२६-६१२९

विषयः	परिच्छेदः	पुटसंख्या
आरम्भणाधिकरणम् (२-१-६)	६४-१०४	६१३१-६२३२
(१)ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य बाहुल्यलक्षणबलवद्युक्तिविरोधस्य परिहारः	६४-१०४	६१३१-६२३२
अ) तदनन्यत्वमित्यादिसूत्रव्याख्यानम्	६४-७६	६१३१-६१६६
१) एतत्सूत्रनिराक्रियमाणापव्याख्यानद्वयानुवादः	६४	६१३१-६१३८
२) प्रथमस्य(ब्रह्मपरिणामवादिनां) अपव्याख्यानस्य निरासः	६५-७१	६१३८-६१५१
क) 'कथं च तदनन्यता'इत्यनुव्याख्यानस्य त्रेधा व्याख्यानम्	६५-६७	६१३८-६१४३
१) प्रथमव्याख्यानम्	६५	६१३८-६१४०
२) द्वितीयव्याख्यानम्	६६	६१४१-६१४२
३) तृतीयव्याख्यानम्	६७	६१४२-६१४३
ख) 'कथं च'इत्यादि 'साधिते'इत्यन्तानुव्याख्यानस्य षोढा व्याख्यानम्	६८-७१	६१४३-६१५१
१) प्रथमव्याख्यानम्	६८	६१४३-६१४९
२) द्वितीयव्याख्यानम्	७१	६१५०-६१५१
३) द्वितीयस्य (विवर्तवादिनां) अपव्याख्यानस्य निरासः	७२-७४	६१५१-६१५९
क) 'कथञ्च तदनन्यता'इत्याद्यनुव्याख्यानस्य त्रेधा व्याख्यानम्	७२-७४	६१५१-६१५९
१) प्रथमव्याख्यानम्	७२	६१५१-६१५४
२) द्वितीयव्याख्यानम्	७३	६१५४-६१५७
३) तृतीयव्याख्यानम्	७४	६१५७-६१५९
४) एतत्सूत्रस्यार्थः	७५	६१५९-६१६३
५) विविधाक्षेपनिराकरणम्	७६	६१६३-६१६६
आ)सत्त्वाच्चावरस्य-असद्व्यपदेशादित्यादिसूत्रद्वयव्याख्यानम्	७७-८२	६१६६-६१७८
१) सत्त्वाच्चावरस्येतिसूत्रस्य द्विधा व्याख्यानम्	७७-७८	६१६६-६१६९
क) प्रथमव्याख्यानम्	७७	६१६६-६१६८
ख) द्वितीयव्याख्यानम्	७८	६१६९
२) असद्व्यपदेशादित्यादिद्वितीयसूत्रव्याख्यानम्	७९-८२	६१६९-६१७८
क) आक्षेपसिद्धान्तयोरर्थः	७९	६१६९-६१७१

विषयः	परिच्छेदः	पुटसंख्या
ख) तत्राभ्यधिकाशङ्कात्रयपरिहारः	८०-८२	६१७२-६१७८
१) प्रथमाभ्यधिकाशङ्कापरिहारः	८०	६१७२-६१७३
२) द्वितीयाभ्यधिकाशङ्कापरिहारः	८१	६१७४-६१७६
३) तृतीयाभ्यधिकाशङ्कापरिहारः	८२	६१७६-६१७८
इ) 'युक्तेः शब्दान्तराच्च' इतिसूत्रस्य व्याख्यानम्	८३-१०४	६१७८-६२३२
१) स्वमतेन व्याख्यानम्	८३-८७	६१७८-६१८६
क) अभ्यधिकाशङ्काप्रदर्शनार्थं सिद्धान्तानुवादः	८३	६१७८-६१८१
ख) अभ्यधिकाशङ्कानिरासः	८४-८५	६१८२-६१८४
१) अनुव्याख्यानयोजना	८४	६१८२-६१८३
२) तद्योजनानिष्पन्नं तात्पर्यम्	८५	६१८३-६१८४
ग) हिशब्देन शब्दान्तराच्चेति सूत्रस्य व्याख्यानान्तरोक्तिः	८६	६१८५
[illegible]', 'यथा प्राणादिः' इति सूत्रयोरनुव्याख्यानाभावे कारणोक्तिः	८७	६१८५-६१८६
२) अन्योक्तव्याख्याननिराकरणम्	८८-१०३	६१८६-६२३०
क) अन्योक्तव्याख्यानानुवादः	८८	६१८६-६१९६
ख) तन्निराकरणम् अनुव्याख्यानोक्तम्	८९-१०३	६१९६-६२३०
१) कारणात्कार्यस्यानन्यत्वनिराकरणम्	८९	६१९६-६१९८
२) स्वल्पोपन्यासस्य प्रयोजनम्	९०	६१९८-६१९९
३) 'असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि' इत्यनुव्याख्यानस्य द्वेधा व्याख्यानम्	९१-९२	६१९९-६२०४
च) प्रथमव्याख्यानम्	९१	६१९९-६[illegible]०२
छ) द्वितीयव्याख्यानम्	९२	६२०२-६२०४
४) 'अनवस्थाऽन्यथा हि स्यात्सर्वत्रोत्पत्तिनाशयोः' इत्यनुव्याख्यानस्य १३धा व्याख्यानम्	९३-१०२	६२०४-६२२३
च) प्रथमव्याख्यानम्	९३	६२०४-६२०६

विषयः	परिच्छेदः	पुटसंख्या
छ) द्वितीयव्याख्यानम्	९४	६२०६-६२०७
ज) तृतीयव्याख्यानम्	९५	६२०७-६२०९
झ) चतुर्थव्याख्यानम्	९६	६२०९-६२१०
ञ) पञ्चमव्याख्यानम्	९७	६२१०-६२१३
चच) षष्ठव्याख्यानम्	९८	६२१३-६२१४
चछ) सप्तम-अष्टम-व्याख्याने	९९	६२१४-६२१६
चज) नवम-दशम-व्याख्याने	१००	६२१६-६२१९
चझ) एकादश-द्वादशतमव्याख्याने	१०१	६२१९-६२२२
चञ) त्रयोदशतमव्याख्यानम्	१०२	६२२२-६२२३
ग) अन्योक्तव्याख्यानगत'भावे चोपलब्धेः'इत्यादिसूत्राणा-मार्जवानार्जवादिव्युत्पादनम्	१०३	६२२३-६२३०
३) एतत्सूत्रव्याख्याने अभ्यधिकाशङ्कानिरासकतया 'शक्तोऽपि', 'नित्यभेदः'इत्यनुव्याख्यानोक्तविषयस्य श्रुत्याऽपि साधनम्	१०४	६२३०-६२३२

* * *

इतरव्यपदेशाधिकरणम् (२-१-७)	१०५-१११	६२३३-६२५९
(१)एतदधिकरणीयभाष्योक्तार्थे अभ्यधिकाशङ्काप्रदर्शनम्	१०५	६२३३-६२३८
(२)तदभ्यधिकाशङ्कानिरसनम्	१०६-१११	६२३८-६२५९
अ) उपोद्घातप्रक्रियया विपर्ययपर्यवसानोपपत्तिः	१०६	६२३८-६२४०
आ) विवक्षितार्थे सूत्रयोजना	१०७-१११	६२४०-६२५९
१) तत्राभ्यधिकाशङ्काद्वयनिरासः	१०८-१०९	६२४२-६२४७
क) प्रथमाभ्यधिकाशङ्कानिरासः	१०८	६२४२-६२४३
ख) द्वितीयाभ्यधिकाशङ्कानिरासः	१०९	६२४३-६२४७
२) 'निरवयवत्वशब्दकोपो वा'इत्यापादनस्योपपादनम्	११०-१११	६२४७-६२५९
क) गूढाभिसन्धेराशङ्काया अविदिताभिप्राय इव परिहारः	११०	६२४७-६२५२
ख) पूर्वपक्षिणा स्वाभिसन्धावुद्घाटिते व्यक्ततया तत्परिहारः	१११	६२५२-६२५९

विषयः	परिच्छेदः	पुटसंख्या
श्रुतेस्तुशब्दमूलत्वाधिकरणम् (२-१-८)	११२-१२०	६२६१-६२८६
(१) तत्राभ्यधिकाशङ्काद्वयनिरासकतया पूर्वाधिकरणशेषानुव्याख्यानयोजना	११२	६२६१-६२६५
(२) उक्तार्थस्योपपादनम्	११३-११९	६२६५-६२८२
अ) परोक्तसूत्रार्थे असङ्गत्यादिमूलकानुपपत्तिप्रदर्शनम्	११३-११७	६२६५-६२७५
१) परिणामवाद्युक्तसूत्रार्थानुपपत्तिप्रदर्शनम्	११३-११६	६२६५-६२७३
क) तत्र शङ्कात्रयनिरासः	११४-११६	६२६८-६२७३
१) प्रथमशङ्कानिरासः	११४	६२६८-६२७०
२) द्वितीयशङ्कानिरासः	११५	६२७०-६२७२
३) तृतीयशङ्कानिरासः	११६	६२७२-६२७३
२) विवर्तवाद्युक्तसूत्रार्थानुपपत्तिप्रदर्शनम्	११७	६२७४-६२७५
३) उक्तासङ्गतौ शङ्काद्वयनिरासः	११८-११९	६२७५-६२८२
क) प्रथमशङ्कानिरासः	११८	६२७५-६२७८
ख) द्वितीयशङ्कानिरासः	११९	६२७९-६२८२
(३) 'विकरणत्वान्नेति चेत्तदुक्तम्' इति सूत्रस्यानारम्भणीयत्वशङ्कानिरासः	१२०	६२८३-६२८६
***		
नप्रयोजनाधिकरणम् (२-१-९)	१२१-१४०	६२८७-६३५४
(१) भाष्योक्तैतदधिकरणीयप्रयोजने अभ्यधिकाशङ्का, तन्निरासः, तदुपपादनम्, तत्समर्थनञ्च	१२१-१३८	६२८७-६३४८
अ) सा शङ्का, तन्निरासश्च द्विविधः	१२१	६२८७-६२९२
आ) तदुपपादनम्	१२२-१३०	६२९२-६३१५
१) 'लोकवत्तु' इत्यादिद्वितीयसूत्रार्थनिरूपणम्	१२२-१२८	६२९२-६३००
क) 'लोकवत्तु' इत्यादिद्वितीयसूत्रार्थे शङ्का, तन्निरसनञ्च	१२२	६२९२-६२९४
ख) तदुपपादनम्	१२३-१२४	६२९४-६२९८
१) उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासः, तदुपपादनञ्च	१२३-१२४	६२९४-६२९८

विषयः	परिच्छेदः	पुटसंख्या
च) उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासश्च	१२३	६२९४-६२९५
छ) तदुपपादनम्	१२४	६२९५-६२९६
१) तन्निरसनेऽपि पुनरवान्तरशङ्का तन्निरासश्च	१२४	६२९५-६२९६
ग) उक्तार्थे प्रमाणोदाहरणम्	१२५	६२९६-६२९७
घ) तत्समर्थनम्	१२६-१२८	६२९८-६३००
१) एतत्सूत्रीयापव्याख्याननिरासः	१२६-१२८	६२९८-६३००
च) श्रुतिविरोधः	१२६	६२९८-६३००
छ) सूत्राक्षराननुगुण्यम्	१२७-१२८	६२९९-६३००
२) द्वितीये तच्छङ्कानिरासे अभ्यधिका शङ्का, तन्निरासः, तदुपपादनञ्च	१२९-१३०	६३००-६३१५
क) तदभ्यधिका शङ्का, तन्निरासश्च	१२९	६३००-६३१३
ख) तन्निरासोपपादनम्	१३०	६३१३-६३१५
इ) उक्तार्थसमर्थनार्थं उक्तार्थोदाहृतप्रमाणीयापव्याख्यानदूषणं तद्विवरणञ्च	१३१-१३८	६३१६-६३४८
१) तदपव्याख्यानस्य दूषणम्	१३१-१३८	६३१६-६३४८
क) 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरमपव्याख्यानं तन्निरासश्च	१३१-१३८	६३१६-६३४८
१) अपव्याख्यानम्	१३१	६३१६-६३२१
२) तन्निरासः	१३१-१३८	६३१६-६३४८
च) प्रशंसान्यथानुपपत्त्या तन्निरासः	१३१	६३१६-६३२१
१) प्रशंसान्यथानुपपत्त्या तन्निरासः	१३१	६३१६-६३२१
२) कामश्रुतिभ्यश्च तन्निरासः	१३२	६३२१-६३२२
३) युक्तितस्तन्निरासः	१३३-१३४	६३२२-६३२४
४) महातात्पर्ययुक्तेश्च तन्निरासः	१३५	६३२५

विषयः	परिच्छेदः	पुटसंख्या
छ) तद्दूषणोक्तेर्विवरणम्	१३६-१३८	६३२६-६३४८
१) इच्छेतरस्यापि निषेध्यत्वम्	१३६	६३२६-६३३९
२) महातात्पर्ययुक्तेश्चेत्युक्तार्थविवरणम्	१३७-१३८	६३४०-६३४८
(२)एतदधिकरणीयशङ्कान्तरनिरासः	१३९-१४०	६३४९-६३५४
अ) फलाभावस्याप्रामाण्यप्रयोजकत्वाभावशङ्कानिरासः	१३९	६३४९-६३५१
आ) फलाभावस्य वाक्यविशेषाप्रामाण्यप्रयोजकत्वाङ्गीकारः	१४०	६३५१-६३५४

***

वैषम्यनैर्घृण्याधिकरणम् (२-१-१०)	१४१	६३५५-६३६२
(१)वैषम्यनैर्घृण्ययोर्वेदाप्रामाण्यकारणत्वाभावः	१४१	६३५५-६३६२
(२)ततोऽन्ययोर्वैषम्यनैर्घृण्ययोर्दूषणत्वाभावः	१४१	६३५५-६३६२

***

सर्वधर्मोपपत्त्यधिकरणम् (२-१-११)	१४२-१४४	६३६३-६३६९
(१)भाष्योक्तैतदधिकरणीयार्थे अभ्यधिकाशङ्का तन्निरासश्च	१४२	६३६३-६३६६
(२)पादार्थोपसंहारः	१४३	६३६६-६३६९
(३)पादान्त्यमङ्गलाचरणम्	१४४	६३६९

***

॥ श्री वेदव्यास भगवान् ॥

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥

॥ श्रीमदानन्दतीर्थभगवत्पादाचार्याः ॥

व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थिति-
व्यार्वृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे
भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥

॥ श्रीपद्मनाभतीर्थाः ॥

रमानिवासोचितवासभूमिस्सन्न्यायरत्नावलिजन्मभूमिः ।
वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद्विभूत्यै ॥

॥ श्रीनरहरितीर्थाः ॥

ससीतामूलरामार्चा कोशे गजपतेः स्थिता ।
येनानीता नमस्तस्मै श्रीमन्नृहरिभिक्षवे ॥

॥ श्रीमज्जयतीर्थाः ॥

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः ।
स स्यात् तत्त्वप्रकाशाय जयतीर्थरविर्मम ॥

॥ श्रीरघुनन्दनतीर्थाः ॥

परैरपहृता मूलरामार्चा गुर्वनुग्रहात् ।
येनानीता नमस्तस्मै रघुनन्दनभिक्षवे ॥

॥ श्रीविजयीन्द्रतीर्थाः ॥

धर्मः सत्ये च धीमानहिरिव वचसा भूसुराणां सभायां
जेता भीमैव वादे पवन इव गतौ सम्पदि श्रीरिवाढ्यः ।
धाता ज्ञाता च सर्वानहिपतिशयनं पूजयंस्तोषयंश्च
लोकैः सर्वैश्च पूज्यो भुवि मनुजवरैर्मानितोऽभून्मुनीन्द्रः ॥

॥ श्रीराघवेन्द्रतीर्थाः ॥

चित्ते चेन्मृदुता शिरीषसदृशो हय्यङ्गवीनं शिला
गाम्भीर्यं यदि यस्य सोऽन्धुरुदधिः शास्त्रेषु चेत्पाण्डिती ।
आचार्यो विबुधेशितुः कलयते विद्यार्थितामादरात्
औदार्यं यदि कल्पपादपमुखाः सम्भावयन्तेऽर्थिताम् ॥

॥ असदधिकरणम् ॥

(अनुवर्तते)

॥ अथ सूत्रोक्तसिद्धान्तांशव्याख्याने
'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्' इति सूत्रस्य व्याख्यानम् ॥
॥ अथ तत्र अभावस्य जगत्कर्तृत्वाङ्गीकारे प्रलये ईश्वरादेः सर्वस्य अभावाभ्युपगमप्रसङ्गः ॥

२३ **सु०—** एवं पूर्वपक्ष्युत्प्रेक्षितप्रमाणसमुदायलब्धस्यार्थस्य प्रमाणविरोधो दर्शितः । इदानीम् 'असत्कार्यं यथा दृष्टमि'त्यनुमानं विशेषतो निराचिकीर्षुस्तत्प्रस्तावनाय असूत्रयत् सूत्रकारः **ॐ अपीतौ तद्वत्प्रसङ्गादसमञ्जसमिति** । **असमञ्जसम्** एतद्विश्वस्याभावकर्तृकत्वमतम् । कुतः । अभावस्य (एव) जगत्कर्तृत्वाङ्गीकारे **अपीतौ** प्रलये **तद्वत्प्रसङ्गात्** अभाववत्त्वप्रसङ्गात् । ईश्वरादेः सर्वस्या(प्य)भावाभ्युपगमप्रसङ्गादिति यावत् । न हीश्वरादौ सति तत्परित्यागेनाभावस्य जगत्कर्तृत्वमवधारयितुं शक्यमिति ।

परि०— **प्रमाणसमुदायेति** । अनन्यथासिद्धनियतपूर्वभावित्वतादृशपश्चाद्भावित्व-भावत्व-कार्यत्वसकर्तृकत्वनियम-परिशेषरूपप्रमाणसमुदायेत्यर्थः । **प्रमाणेति** । निषेधैकस्वरूपत्वरूप-प्रतिपक्षरूपप्रमाणेत्यर्थः । **इत्यनुमानमिति** । ईश्वराद्यसत्त्वसाधकं भावत्वानुमानं बाधितविषयत्वादि-रूपविशेषदोषेण 'न तु दृष्टान्ताभावादि'त्यादिसूत्रद्वयेन निराचिकीर्षुः प्रस्तावनाय दोषोक्तिप्रसञ्जनाय ईश्वराद्यभावानङ्गीकारप्रसङ्गं सूत्रे न्यबध्नादित्यर्थः । भाष्यटीकयोस्तु भावत्वहेतोस्तर्कपराहत्युक्तिपर-तयैतत्सूत्रं व्याख्यातम् ।

गु०दी०— **अभाववत्त्वप्रसङ्गात्** इत्यत्र अभावत्वप्रसङ्गादिति पाठे न विद्यते भावः सत्ता यस्येत्यभावः अविद्यमानः । विमतः प्रागभावोऽपि प्रलये असन् वस्तुत्वात् ब्रह्मवदित्यनुमानसम्भवादसमञ्जसमेतन्मतमिति सूत्राक्षरयोजना ।

यादु०— **प्रमाणसमुदायेति** । भावत्वेनेश्वरादीनां प्रलयेऽभावसिद्धौ, कार्यत्वस्य सकर्तृकत्वेन नियमे स्थिते, प्रागभावस्य नियतपूर्ववर्तित्वेन कारणत्वं सिद्ध्यत्कर्तृत्वमादायैव सिद्ध्यतीत्येवं प्रागभावकर्तृत्वस्य प्रमाणसमुदायेन लब्धत्वादित्यर्थः । **प्रस्तावनायेति** । भूमिकारचनायेत्यर्थः ।

वं०प०— समुदायेति । महाप्रलयवर्ती प्रागभाव इत्यादिनोक्तमेकं, तथा महदादिकं प्रागभाव-कार्यमित्यपरम्, ईश्वरादिकं प्रलयेऽसद्भावितुर्महतीत्यन्यत् । एवं प्रमाणत्रितयेत्यर्थः । **लब्धार्थस्य** प्रागभावस्य कर्तृत्वरूपार्थस्य ।

शे०वा०— सर्वनाशेष्वित्युत्तरवाक्यानर्थक्यमाशङ्क्य 'न तु दृष्टान्तभावादि'ति सूत्रोक्तेश्वरादिसद्भाव-साधकानुमानप्रकारदर्शनार्थत्वान्न तदित्यभिप्रेत्य तत्प्रदर्शकतया तद्योजयितुं पूर्वसूत्रेणैवानुमानविरोधेन पूर्वपक्षस्य निरस्तत्वादनुमानविरोधेन तन्निरासकसूत्रेण न प्रयोजनमित्यतस्ततः प्रमेयभेदव्युत्पादनेन सूत्रस्यार्थवत्तां दर्शयितुं प्रथमसूत्रप्रमेयं तावद्दर्शयति **एवमिति** । **प्रमाणसमुदायेति** । भावत्वेनेश्वरादीनां प्रलयेऽभावसिद्धौ कार्यत्वस्य सकर्तृकत्वेन नियमे स्थिते प्रागभावस्य नियतपूर्ववृत्तित्वेन कारणत्वं सिद्ध्यत्कर्तृत्वमादायैव सिद्ध्यतीत्येवं प्रागभावकर्तृत्वस्य प्रमाणसमुदायलब्धत्वादित्यर्थः । एवं पूर्वसूत्रतात्पर्यमुक्त्वा न तु दृष्टान्तेति सूत्रतात्पर्यमाह **इदानीमिति** । **अनुमानमिति** । 'असत्कार्यं यथा दृष्टं वस्तुत्वात्कारणं तथे'त्येवंरूपमित्यर्थः । **निराचिकीर्षुरिति** । अनुमानविरोधेनेति शेषः । तथा च प्रमाणसमुदायलब्धार्थस्यानुमानविरोधाभिधायकपूर्वसूत्रेण अनुमान-विरोधेनासत्कार्यमित्येतदनुमाननिरासकैतत्सूत्रस्य न गतार्थतेति भावः । ननु प्रमाणसमुदायलब्धार्थस्य अनुमानविरोधे समुदायान्तर्गतैदनुमाननिरासोऽपि सिद्ध एवेति पुनर्निरासवैयर्थ्यमित्यत उक्तं **विशेषत इति** । नन्वेवं 'न तु दृष्टान्तभावादि'त्यनेनैव विशेषतोऽनुमाननिराससिद्धेः 'अपीतौ' इति सूत्रवैयर्थ्यमेवेत्यत अप्रसक्त-स्यानुमानस्य निषेधायोगात् तत्प्रसञ्जकतया तत्पीठिकारचनरूपत्वान्न तस्यापि वैयर्थ्यमित्याह **तत्प्रस्तावना-येति** । तत्प्रसञ्जकतया तत्पीठिकारचनरूपतामुपदर्शयितुमपेक्षितपूरणेन प्रकृतोपयोगितया व्याचष्टे **असम-ञ्जसमित्यादिना** । तदित्यसच्छब्दोक्ताभावपरामर्शः । वदिति मतुत्प्रत्ययो न तु परमत इव वतिरित्यभिप्रेत्य तत्प्रसङ्गादिति सूत्राक्षराणि योजयति **अभाववत्त्वप्रसङ्गादिति** । तदपि सावधारणमित्यभिप्रेत्याह **ईश्वरादे-रिति** । अप्रयोजकतां परिहरति **न हीति** ।

वा०र०— मतुप्प्रत्यय इति । स च भावप्रधान इति शेषः । **तदपि सावधारणं इत्यभि-प्रेत्येति** । यद्यपीश्वरादेः सर्वस्यापीति मूले समुच्चयार्थापिशब्दप्रयोगात् समुच्चयप्रतीतावपि अवधारणार्थ-समर्पकाभावेन अवधारणार्थाप्रतीतिरिति न सावधारणं इत्याहेति युक्तमिति भाति । तथापि ईश्वरादेः सर्वस्यैवाभाववत्त्वं स्यात् इत्यतः प्रतीयमानस्यैवार्थस्य एव ईश्वरादेः सर्वस्यापीत्यतोऽपि प्रतीयमानतया अवधारणार्थवत्तया सम्मतवाक्यसमाधानार्थत्वाभिप्रायेण सावधारणमित्यभिप्रेत्य वचनमित्यदोषः । 'लोके सर्व एव जनो गतः' इति सर्वोऽपि इत्यादि वाक्यस्य च समानार्थतायाः 'भवन्तः सर्व एव हि । सर्व एव महारथा' इत्यादौ च सर्वोऽपीत्येतत् समानार्थेऽवधारणप्रयोगाच्च सर्व एव परमाणव इत्यप्यनुमाने च वक्ष्यमाणे सर्वेऽपीत्यर्थाच्चेति ज्ञेयम् । साधारणं इत्यभिप्रेत्येति पाठे तु अत्रापाद्यमानाभाववत्त्वं साधारणं ईश्वरस्येव सर्वस्यापि आपादनात् अत एवोक्तं सर्वस्यापीति योज्यम् । पूर्वपक्षिणा तु जीवेश्वरादिविशेषसाधारण्येन

सर्वस्याप्यभावे आपादिते सर्वत्रापि इष्टापत्तिः आशङ्कयिष्यते । सिद्धान्तिना च घटाद्यभावस्यानिष्टत्वाभावात् ईश्वरादिनित्यपदार्थाभावस्यानिष्टत्वमाश्रित्यायं तर्कः इत्याशयेनोत्तरत्र ईश्वरादेः सत्त्वं प्रलये साधयिष्यते इति ध्येयम् ।

स०व्र०— प्रमाणसमुदायलब्धस्येति । महाप्रलयवर्तिकार्यप्रागभावो महदादिकार्यकारणं भवितुमर्हति । अन्यत्रानुपक्षीणत्वे सति नियतपूर्ववृत्तित्वात्; इत्यनेन, प्रागभावस्य कारणत्वमात्रसिद्धत्वेऽपि ईश्वरादिकं प्रलये असद्भवितुमर्हति भावत्वान्महदादिवदित्यनुमानेन, ईश्वरादीनां प्रलये असत्त्वसिद्धौ कार्यस्य सकर्तृकत्वनियमे स्थिते प्रागभावस्य नियतपूर्ववृत्तित्वेन कारणत्वं सिद्ध्यत् कर्तृत्वमेव सिद्ध्यतीत्येवं प्रमाणसमुदायलब्धस्येत्युक्तमिति भावः ।

विठ्ठल०— प्रमाणसमुदायेति । भावत्वेनेश्वरादीनां प्रलये अभावसिद्धौ कार्यस्य कर्तृत्वेन नियमे स्थितप्रागभावस्य नियतपूर्ववृत्तित्वेन कारणत्वं सिद्ध्यत्कर्तृत्वमादायैव सिद्ध्यतीत्येवं प्रागभाववक्तृत्वस्य प्रमाणसमुदायेन लब्धत्वादित्यर्थः । **प्रमाणेति** । निषेधैकस्वरूपप्रमाणविरोध इत्यर्थः । **इत्यनुमानमिति** । ईश्वराद्यसत्वसाधकं भावत्वानुमानमित्यर्थः । विशेषतो बाधितविषयत्वादिना निराचिकीर्षुः । न तु दृष्टान्ताभावादित्यादिसूत्रद्वयेन प्रस्तावाय दोषोक्तिप्रसङ्गेनेश्वराद्यभावाङ्गीकारप्रसङ्गमसूचयदित्यर्थः । भाष्यादौ तु तर्कपराहत्युक्तिपरतयैतत्सूत्रं व्याख्यातम् । अभावस्य कर्तृत्वाङ्गीकारेऽपि प्रलये ईश्वराद्यभावः कुतोऽभ्युपगमनीय इत्यत आह **न हीति** ।

॥ इति अभावस्य जगत्कर्तृत्वाङ्गीकारे प्रलये ईश्वरादेः सर्वस्य अभावाभ्युपगमप्रसङ्गः ॥

॥ इति सूत्रोक्तसिद्धान्तांशव्याख्याने 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्' इति सूत्रस्य व्याख्यानम् ॥

* * *

॥ अथ सूत्रोक्तसिद्धान्तांशव्याख्याने 'न तु दृष्टान्तभावात्' इतिसूत्रस्य द्वाभ्यां वृत्तिभ्यां व्याख्यानम् ॥

॥ अथ तत्रादौ एकां वृत्तिमभिप्रेत्य व्याख्यानम् ॥

॥ अथ तत्राप्यादौ दृष्टान्तपदस्य 'प्रलये परमेश्वरादिसद्भावसाधकानुमान' वाच्यत्वम् ॥

२४ **सु०—** ननु नेदमनिष्टम्, 'ईश्वरादिकं प्रलयेऽसद्भवितुमर्हति भावत्वात् घटवदि'त्यनुमानेनेश्वरादेः सर्वस्य प्रलयेऽभावाभ्युपगमात्, इत्यत्रोक्तं सूत्रकृता **'ॐ न तु दृष्टान्तभावात्'** इति । नैव प्रलये सर्वस्यासत्त्वमङ्गीकर्तुमुचितम्, कस्मात्, दृष्टान्तभावात् । दृष्टान्त इति तत्रावधारितव्याप्तिमूलमनुमानमुच्यते, दृष्टान्तमात्रस्य साधनबाधनानङ्गत्वात् । तथा च प्रलये परमेश्वरादिसद्भाव(स्य)साधकानुमानसम्भवादित्यर्थः ।

परि०— तुशब्द एवार्थ इत्युपेत्याह **नैव प्रलय इति** ।

श्रीनिधि०— तच्च प्रमेयरूपं न प्रमाणरूपमिति । यदर्थं प्रस्तावितं तदाह **ननु नेदमनिष्टमिति** ।

शे०वा०— नन्वत्र दृष्टान्तसद्भावमात्रस्यैवोक्तत्वेनेश्वरादिसद्भावसाधकानुमानानुक्तेः कथमीश्वरादेरसत्त्व-साधकानुमाननिरासकत्वमस्येत्यतो दृष्टान्तपदेनानुमानस्यैव ग्रहणान्नानुपपत्तिरित्यभिप्रेत्य कथमन्यवाचकेनान्य-ग्रहणमित्यतो लक्षणयेत्याशयवान् लक्षणाबीजभूतशक्यसम्बन्धं दर्शयति **तत्रावधारितेति** । मुख्यार्थानुपपत्तिं दर्शयति **दृष्टान्तमात्रस्येति** । एवं सूत्रद्वयस्य सार्थक्यमुपपाद्य सूत्रोक्तानुमानप्रकारप्रदर्शनार्थत्वान्नोत्तरभाष्य-वैयर्थ्यमित्यभिप्रेत्य तथा भाष्यं योजयति **किं तदित्यादिना** ।

वा०र०— **ईश्वरादिसद्भावेति** । प्रलये इति पूरणीयम् । एवं कथमिति उत्तरत्रापीति बोध्यम् । लक्षणयेत्यर्थः । **शक्यसम्बन्धमिति** । उपलक्षणं चैतत् । लक्ष्यार्थसम्बन्धे चेत्यपि द्रष्टव्यम् । अत एव मूले तत्रावधारितमूलपदयोः उपादानम् । अत एव वरं भजशब्दादिभ्यः इत्युत्तरसम्बन्धिटीकायां लक्षितलक्षणामूलादि-प्रदर्शनमिदमेवास्तीति ज्ञेयम् । तथा च दृष्टान्तपदेन तत्रावधारितव्याप्तिलक्षणानन्तरमपि अनुमानालाभरूपा-नुपपत्तितादवस्थ्यात् पुनः दृष्टान्तपदेनैव लक्षितव्याप्तिरूपार्थसम्बन्धितन्नानुमानलक्षणाया आश्रयणात् इत्यव-धेयम् ।

विठ्ठल०— तुशब्द एवार्थ इत्युपेत्याह **नैव प्रलयेति** ।

* * *

॥ अथ च तत्राप्यादौ जीवेश्वरसाधारणानुमानम् ॥

२५ **सु०**— किं तदनुमानमित्यत आह **भाष्यकारः सर्वनाशेष्वपीति** ।

अनु०— सर्वनाशेष्वपि सदा शिष्टत्वाद्यस्य कस्य नुः ।
नाशोऽयं विमतोऽपि स्यान्नाशत्वात्कर्तृशेषवान् ॥

अपिः अभिव्याप्तौ । **सर्वशब्दो** वर्तमानमात्रविवक्षयाऽपि स्यादित्यतः **सदा** इत्युक्तम् । तदिदं व्यभिचारपरिहारायाभिहितम् । **नुः** पुरुषस्य । **अयम्** इत्यस्यैव विवरणं **विमत** इति ।

अत्र पूर्वार्धेन व्याप्तिरुक्ता, उत्तरार्धेन प्रतिज्ञाहेतू ।

एतदुक्तं भवति । महाप्रलयलक्षणो नाशः पुरुषशेषवान्भवितुमर्हति नाशत्वात् सम्प्रतिपन्न(संमत)नाशवदिति ।

अत्र पुरुषावशेषमात्रं साध्यम्, न तु नाशकर्तुः पुरुषस्यावशिष्टता । अत एवोक्तं यस्य कस्येति । नाशस्य कर्तुरकर्तुर्वेत्यर्थः ।

तथाऽपि कर्तृशेषवानिति वदतेदमभिप्रेतम् 'प्रलये पुरुषसद्भावमात्रसाधने सति भग्नं तावत्परस्यानुमानम् । यदपि परस्याभावकर्तृकत्वं जगतोऽभिमतम् । तदप्यत एवापास्तम् । अवशिष्टस्य पुरुष(विशेष)स्यैव विश्वकर्तृत्वसम्भवेऽभावस्य तत्कल्पनाऽनवकाशात् । दृष्टानुसारिणी हि कल्पना । न हि लोके प्रागुत्पत्तेः कुलालाभावयोः सतोरभावो घटस्य कर्ता दृष्टः, किन्नाम कुलाल एव' इति ।

परि०— **अपिरभिव्यासाविति** । सर्वशब्दश्चासङ्कुचितवृत्तित्वपर इत्यर्थः । तर्हि सदेति व्यर्थमित्यत आह **सर्वशब्द इति** । कृत्स्नवर्तमानेत्यर्थः । **भग्नं ताव(त्परस्यानु)दनुमानमिति** । भावत्वेन सर्वासत्त्वसाधनस्य बाधादिति भावः । **अत एवेति** । पुरुषसद्भावमात्रसाधनादेवेत्यर्थः । तद्व्यनक्ति **अवशिष्टस्येति** ।

यादु०— **अपिरभिव्यासाविति** । सर्वशब्दस्यासङ्कुचितार्थत्वप्रकटनाय दैशिकाभिव्याप्त्यर्थकोऽपिशब्द इत्याशयः । अतः सर्वशब्देन पौनरुक्त्यमिति शङ्काऽनवकाशः । **तदिदमिति** । तद्दैशिकाभिव्याप्त्यर्थकं सर्वादिपदमिदं सदेति पदं च क्रमेण देशान्तरेऽतीतादिकालरूपकालान्तरे च व्यभिचारपरिहारायाभिहितमित्यर्थः । पौनरुक्त्यपरिहारायाह **अत्रेति** । ननु सुन्दोपसुन्दन्यायेन यत्र सर्वनाशः कर्तृनाशः तत्र व्यभिचार इत्यत आह **अत्र पुरुषेति** ।

वं०प०— **अपिरभिव्यासाविति** । तथा च सर्वशब्दस्यासङ्कुचितवृत्तित्वव्यञ्जनं प्रयोजनमिति ज्ञेयम् ।

श्रीनिधि०— सर्वशब्दस्य समुचितार्थत्वेनाप्युपपत्तेर्व्यभिचारः स्यादित्यत आह **अपिरभिव्यासाविति** । **तदिदमिति** । अपीति सदेति च अन्यथा नाशान्तरे वा अतीतादिनाशे वा व्यभिचारः स्यादिति भावः । अयमित्येकः पक्षः । विमत इत्यपर इति प्रतीयते अत आह **अयमित्यस्यैवेति** । **न तु नाशकर्तुरिति** नाशः कर्तृशेषवानित्युक्ते सन्निधानात् स्वस्येति लभ्यते । तच्चानुपपन्नम् । घटनाशकर्तुः पुरुषस्य नाशेऽपि नाशावस्थाने न व्यभिचारापातादिति भावः ।

शे०वा०— सर्वनाशेष्वपीत्यपिशब्दस्य समुच्चायकत्वायोगात् सर्वकर्माण्यपि सदा कुर्वाण:' इति गीतातात्पर्यनिर्णये एकमपि कर्म तदनादरेण न कार्यमित्यादिना आचार्यैरभिव्याप्त्यर्थतया तस्य व्याख्यानात् सर्वेऽप्यानेया इत्यादिलोकव्यवहारसिद्धत्वाच्च सर्वपदसङ्कोचप्रतीतिं निवारयितुमभिव्याप्त्यर्थतया तं व्याख्याति **अपिरभिव्याप्ताविति । वर्तमानमात्रविवक्षयाऽपीति** । यद्यपि दैशिककालिकतत्सङ्कोचनिरासोऽभिव्याप्त्यर्थकापिपदेनैव सिद्ध्यति, तथाऽपि कालिकतत्सङ्कोचनिरासकसदापदसमभिव्याहारात्, दैशिककालिकसङ्कोचनिरासकाभिव्याप्त्यर्थकस्याप्यपिशब्दस्य दैशिकव्याप्त्यर्थत्वमेवात्रार्थोऽभिमत इति न सदापदस्य वैयर्थ्यमित्यवधेयम् । किं दैशिककालिकाभिव्याप्तिप्रदर्शकापिशब्दसदाशब्दाभ्यामित्यत आह **तदिदमिति । व्यभिचारेति** । देशान्तरीयकालान्तरीयविनाशयोरिति शेषः । नाशत्वहेतोर्देशान्तरीयनाशे व्यभिचारवारणाय **अपीति** । अतीतानागतरूपकालान्तरीयनाशे व्यभिचारवारणाय च सदेत्युक्तमित्यर्थः । नुः **पुरुषस्येति** । अत्र सर्वत्र पुरुषपदं चेतनमात्रपरमिति ज्ञेयम् । **विवरणमिति** । तथा च नान्यतरवैयर्थ्यमिति भावः । एकार्थतया पूर्वोत्तरार्धयोः पौनरुक्त्यं परिहरति **अत्रेति** ।

ननु सुन्दोपसुन्दन्यायेन यत्राशेषकर्तृनाशस्तत्र सत्यपि नाशत्वे कर्तृशेषत्वाभावेन व्यभिचारान्नायं प्रतिपक्षो युक्त इत्यत आह **एतदुक्तं भवतीति** । भवेदेवं व्यभिचारित्वेन प्रतिपक्षानुपपत्तिर्यदि प्रतिपक्षानुमाने कर्तृशेषः साध्यतयाऽभिमतः स्यान्न चैतदस्ति । महाप्रलयलक्षणो नाशः पुरुषशेषवान्नाशत्वात् सम्प्रतिपन्नवदिति प्रतिपक्षप्रयोगस्याभिमतत्वेन नाशकर्त्रकर्तृसाधारणपुरुषावशेषस्यैव साध्यतयाऽभिमतत्वेन कर्तृशेषस्य तदभावादित्येकवाक्यतयेदं योज्यम् । नाशकर्त्रकर्तृसाधारणपुरुषावशेषस्य साध्यतया प्रतिपक्षप्रयोगविवक्षायां भाष्यकारीयं ज्ञापकमाह **अत एवोक्तमिति** । कथमस्य प्रकृते उपयोग इत्यत उक्तार्थज्ञापकतासिद्ध्यर्थं प्रकृतोपयोगितयोदाहृतभाष्यपदद्वयस्यार्थमाह **नाशस्येति** । तर्हि पुरुषावशेषवानित्येव भाष्यकारेणापि वक्तव्यतया कथं कर्तृशेषवानिति तदीया साध्योक्तिरित्यतस्तस्याः प्रयोजनान्तरार्थत्वेन प्रतिपक्षार्थत्वाभावान्नानुपपत्तिरित्यभिप्रेत्य प्रतिपक्षार्थत्वाभावोपपादनपूर्वकं तस्याः प्रयोजनान्तरमाह **तथाऽपीति । अभावस्य तत्कल्पनानवकाशादिति** । अभावस्य कर्तृत्वकल्पनायाः प्रलये वस्त्वन्तरानवशेषमात्रनिबन्धनत्वेन वस्त्वन्तरावशेषे निर्निबन्धनत्वेनानवकाशत्वादित्यर्थः । तत्कल्पनायां दृष्टाननुसारित्वं च दोष इत्याह **दृष्टानुसारिणी चेति** । दृष्टानुसारितामेव दर्शयति **न हीति** । इतीत्यस्यैतदुक्तं भवतीत्यनेन सम्बन्धः ।

वा०र०— **गीतातात्पर्येति** । अष्टादशाध्याये चेति शेषः । **सङ्कोचेति** । सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यादौ सङ्कोचदर्शनात् इति भावः । दर्शपूर्णमासप्रकरणे श्रुत-एतद्वाक्यगतस्य सर्वपदस्य यावत् कामपरत्वे यागान्तरवैय्यर्थ्यापातात् दशादिः तावत्साधनत्वाभावाच्च प्रकृतसर्वकामपरत्वमेवेति पूर्वमीमांसायां निर्णीतत्वात् । **सिद्ध्यतीति** । तथा चापिपदेनैव दैशिकस्येव कालिकस्यापि सङ्कोचस्य बाधसिद्धेः कालिकसङ्कोचव्यावृत्त्यर्थकं सदापदं व्यर्थमिति भावः । **अर्थोऽभिमत इति** । विशेषान्तरसन्निधाने गामानय बलीवर्दं च इत्यादौ सामान्यशब्दस्य सङ्कोचेन विशेषान्तरत्वदर्शनादिति भावः ।

स०व्र०— अपिरभिव्याप्ताविति । सर्वनाशेष्वित्यत्र सर्वशब्देन नाशानामनेकत्वसिद्धावपि नाशमात्रे पुरुषशेषत्वरूपसाध्यस्याभिव्याप्तिप्रदर्शनार्थमपिपदमिति भावः । **व्यभिचारपरिहारायेति** । अतीतानागतनाशयोः सत्यपि नाशत्वे पुरुषशेषवत्त्वाभावात् व्यभिचारः स्यात् । तत्परिहाराय सदेत्युक्तमित्यर्थः । पौनरुक्त्यपरिहारायाह **अत्रेति** । पुरुषशेषवानित्यत्र पुरुषशब्दः चेतनपरो द्रष्टव्यः । ननु सुन्दोपसुन्दन्यायेन यत्रोभयनाशः तत्र सत्यपि नाशत्वे नाशकर्तृशेषवत्वाभावेन व्यभिचारः स्यादित्यत आह **अत्र पुरुषावशेषमात्रमिति** ।

विठ्ठल०— तदिदमिति । तद्देशिककालिकव्याप्त्यर्थकं सर्वादिपदं इदं सदेतिपदं च क्रमेण देशान्तरे अतीतादिरूपकालान्तरे चाभिहितमित्यर्थः । मूले कर्तृदोषवानित्युक्तम् । अत्र तथानुक्त्वा पुरुषदोषवानिति किमर्थमुक्तमित्यत आह **अत्रेति** । मूले इत्यर्थः । **साध्यं** साध्यत्वेनाभिप्रेतम् । सुन्दोपसुन्दविनाशे व्यभिचारापत्तेरिति भावः । अत्र मूलं ज्ञापकमाह **अत एवेति** । **परस्यानुमानमिति** । ईश्वरादिकं प्रलये सद्भवितुमर्हति वस्तुत्वादित्यनुमानमित्यर्थः । **अत एवापास्तमिति** । पुरुषदोषमित्युक्तत्वादेवेत्यर्थः । कुलाल एवेतीति शब्दस्य कर्तृदोषवानिति वदतः इतीदमभिप्रेतमिति पूर्वेण सम्बन्धः । प्रलये अविशिष्टपुरुषस्यैव कर्तृत्वम् । न तु प्रलये विद्यमानभावस्येति सूचयितुं मूले पुरुषग्रहणं कृतमिति समुदायार्थः ।

२६ **सु०— अभिप्रायमजानानः कर्तृशेषवानित्युक्त्या विभ्रान्तश्चोदयति 'यत्र सुन्दोपसुन्दन्यायेनाशेषा अपि पुरुषा नष्टास्तत्र नाशत्वहेतोरनैकान्तिकता' इति, तत्राह न चेति ।**

अनु०— न चाशेषनृनाशस्तु दृष्टो दृश्योऽस्ति वा क्वचित् ।

चशब्दोऽवधारणे । अशेषनृनाशस्तु न एव क्वचिद् दृष्ट इत्यतीतनिषेधो, दृश्यो वा न एव इत्यनागतस्य, न एव अस्ति वा दृश्यमान इति वर्तमानस्य ।

इदमुक्तं भवति । अनैकान्तिकत्वं हि प्रमिते विपक्षे हेतुवृत्तौ सत्यां (हेतुवृत्त्या) वक्तव्यम्, नाप्रमिते; तथा सत्यनुमानमात्रोच्छेदप्रसङ्गात् । न चाशेषपुरुषनाशः कालत्रयेऽपि प्रमितः, येन नाशत्वस्य तत्र व्यभिचारः स्यात् । प्रमितत्वाङ्गीकारे च प्रमातुरेवोर्वरितत्वेन व्याघातश्च स्यात् । न च नाशकर्तुः पुरुषस्यावशिष्टता साध्यत्वेनेष्टा, येन सुन्दोपसुन्दादिनाशः प्रत्युदाहियेत; किन्तु पुरुष(वि)शेषवत्त्वमात्रमिति ।

परि०— विभ्रान्त इति । नाशः कर्तृशेषवानिति विभ्रान्तिमानित्यर्थः । **सुन्दोपसुन्देति** । सुन्दउपसुन्दश्चेति द्वौ पुरुषौ तिलोत्तमाख्यकामिन्यर्थे परस्परनाशं प्राप्ताविति सुप्रसिद्धं पुराणेषु ।

प्रत्युदाह्रियेतेति । अस्मदुक्तप्रमेयाभावात् तथोदाह्रियेतेत्यर्थः । इतिशब्दस्येदमुक्तं भवतीति पूर्वेणान्वयः ।

यादु०— अभिप्रायमिति । अत्र पुरुषावशेषमात्रं साध्यमित्यभिप्रायमित्यर्थः । **सुन्दोपसुन्देति** । सुन्दोपसुन्दनामानौ द्वौ दैत्यौ ब्रह्मवरतोऽन्यैरवध्यौ दृप्तौ चेरतुः । तयोर्वधार्थं ब्रह्मणा तिलोत्तमाख्या अप्सरा प्रेषिता । तां दृष्ट्वा कामसन्तप्तौ ममैवेयं ममैवेयं स्यादिति परस्परं सन्नियुध्य विनष्टौ । सोऽयं सुन्दोपसुन्दन्यायः । **प्रत्युदाह्रियेतेति** । व्यभिचारस्थलतयोदाह्रियेतेत्यर्थः ।

वं०प०— प्रत्युदाह्रियेतेति । व्यभिचारस्थलत्वेनोदाह्रियेतेत्यर्थः । **किन्त्विति** । तथा च तत्रापि सुन्दोपसुन्दयोर्नाशकर्त्रोरभावेऽपि तद्द्रष्टा यः कश्चित्पुरुष उर्वरित एवास्तीत्यर्थः ।

श्रीनिधि०— अभिप्रायमजानान इति । पुरुषावशेषमात्रं साध्यं न तु नाशकर्तुः पुरुषस्येत्यभिप्राय-मजानान इत्यर्थः ।

शे०वा०—ननु 'न चाशेषनृनाश' इत्युत्तरवाक्यमनर्थकम् । न चाशेषनृनाशस्याप्रमितत्वप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च व्यभिचाराभावोपपादनार्थं तदिति वाच्यम् । प्रापकाभावेन व्यभिचारशङ्काया एवानुदये तदभावोपपादनस्य व्यर्थत्वात् । न च सुन्दोपसुन्दन्याय एव तत्प्रापक इति वाच्यम् । तस्य कर्त्रनवशेषनाशप्रापकतया कर्त्रवशेषसाध्यताया व्यभिचारप्रापकत्वेऽपि पुरुषावशेष-नाशाप्रापकत्वेन कर्त्रकर्तृसाधारणपुरुषावशेषसाध्यतापक्षे तदप्रापकत्वेन प्रकृते च तन्मात्रावशेषस्यैव साध्यत्वेन कर्त्रवशेषस्यासाध्यतया सुन्दोपसुन्दन्यायेनापि व्यभिचारशङ्कानुदयादित्यतस्तच्छङ्कोत्थापनपूर्वकं तन्निरासाय विपक्षस्याप्रमितत्वोपपादकतयोत्तरवाक्यं सङ्गमयितुं तच्छङ्कामुपपादयति **अभिप्रायमिति** । अत्र पुरुषावशेषमात्रं साध्यं न तु नाशकर्तुः पुरुषस्यावशिष्टत्वमित्युक्ताभिप्रायमित्यर्थः । **भ्रान्त इति** । नाशकर्तुः पुरुषस्यावशेषः साध्य इति भ्रान्त इत्यर्थः । **सुन्दोपसुन्दन्यायेनेति** । सुन्दोपसुन्दावादिदैत्यौ नर्मदातीरे मोक्षार्थं तपश्चक्रतुः । तयोस्तपोविघातार्थं विधात्रा काचित्तिलोत्तमाख्या वराङ्गना प्रेषिता । तां दृष्ट्वा मोहितौ ममेयं ममेयमिति परस्परं निजघ्नतुरिति सुन्दोपसुन्दन्यायेनेत्यर्थः । **अवधारण इति** । समुच्चेयाभावेन समुच्चायकत्वासम्भवाद्विपक्षस्य सर्वथाऽप्रमितत्वस्य प्रकारान्तरेणालाभाच्चेति भावः । एकेनैव पूर्तौ किं त्रिविधोक्त्येत्यत आह **अशेषेत्यादिना** । नन्वशेषनृनाशस्यादृष्टत्वाद्युक्तिमात्रेण कथमनैकान्तिकत्वपरिहारः । न चानेन विपक्षस्याप्रमितत्वसमर्थनद्वारा प्रमिते विपक्षे हेतुवृत्त्यभावसूचनादिति वाच्यम् । प्रमिताप्रमितसाधारण्येन विपक्षे हेतुवृत्तेरेव व्यभिचारत्वेनाप्रमितत्वेऽपि विपक्षस्य तदपरिहारादित्यत आह **इदमुक्तं भवतीति** । **प्रमित इति** । प्रामाणिक इत्यर्थः । नन्वशेषपुरुष-नाशः कालत्रयेऽपि न प्रमितः प्रमित इत्यनुभवकलहो निरवधिकः, इत्यतो विशेषनियामकमाह **प्रमितत्वाङ्गीकारे चेति** । ननु माऽस्त्वशेषपुरुषनाशस्य प्रमितत्वं व्याघातात् । तथा व्याघाताभावेन सुन्दोपसुन्दन्यायेन अशेष-

कर्तृनाशस्य प्रमितत्वोपपत्तेस्तत्र हेतोर्वृत्त्या व्यभिचारो दुर्वार एवेत्यतोऽत्र पुरुषावशेषमात्रस्यैव साध्यत्वेन कर्त्रवशेषस्य तदभावान्नाशेषकर्तृनाशस्य विपक्षत्वमिति न तद्वृत्तावपि हेतोर्व्यभिचार इत्याह **न चेति** । **प्रत्युदाहियेतेति** । विपक्षतयोदाह्रियेतेत्यर्थः । इतीत्यस्येदमुक्तं भवतीति पूर्वेण सम्बन्धः ।

वा०र०— तदप्रापकत्वेनेति । व्यभिचारस्य तच्छब्देन ग्रहणम् । **एकेनैवेति** । दृष्टत्वाभाव-दृश्यत्वाभावदृश्यमानत्वाभावानां मध्ये अन्यतमेनैव इत्यर्थः । **यत्ताविति** । अशेषनृनाशस्य प्रमितत्वाभावः तावत एव सिद्ध्यतीत्याशयः । **त्रिविधेति** । विधात्रयेत्यर्थः । दृष्टत्वाभावादीनां त्रयाणाम् उक्तेति यावत् । अथवा दृष्टत्वाभावलक्षणत्रिप्रकारोपायस्योक्तेति योज्यम् । अत **एवैकेनैव** इत्यस्य एकेनोपायेनेत्यर्थः इति ज्ञेयम् । **प्रमित इत्यनुभवेति** । अत्राशेषपुरुषनाशः कालत्रयेऽपीति वर्तते । नाशोऽयं विमतोऽपीत्यव-तारवाक्ये एवमिति प्रथमतः उपस्कर्तव्यं व्याख्यानं इदानीमिति समभिहारात् पूर्वमिति लक्ष्यत इति न तत्पुराणावश्यकत्वमिति वा । अनेन प्रलय इति मूले इत्यपीत्यपिपदेन पूर्वानुमानानन्तरं सूचिततयोक्तमिति प्रतीयते । तदयुक्तम् । पूर्वं तथासूचनस्यानभिधानात् इत्यतो अपिपदस्योत्तरत्र यदसम्बन्धाश्रयणेन इत्यनु-मानमपीत्येव पर्यवसानात् पूर्वम् ।

स०व्र०— अभिप्रायमिति । अत्र पुरुषावशेषमात्रं साध्यत्वेनाभिप्रेतमित्यभिप्रायमित्यर्थः । **सुन्दोप-सुन्दन्यायेनेति** । सुन्दोपसुन्दौ आदिदैत्यौ नर्मदातीरे तपश्चेरतुः । तयोस्तपोविघातार्थं विधात्रा वराङ्गना काचित्तिलोत्तमाह्वया प्रस्थापिता । तां दृष्ट्वा कामसन्तप्तौ ममैवेयं ममैवेयमिति परस्परं (नियुध्य) नेशतुः । सोऽयं सुन्दोपसुन्दन्याय इति भावः । ननु सुन्दोपसुन्दन्यायेनाशेषनृनाशस्याप्रमितत्वेन तत्र व्यभिचारासम्भवेऽपि सुन्दोपसुन्दनाश एव व्यभिचारो भविष्यतीत्यत आह **न नाशकर्तुः पुरुषस्येति** ।

विठ्ठल०— ननु पुरुषदोषवानित्यस्य साध्यत्वेनाभिप्रेतत्वे उत्तरमूलानुत्थानं स्यात् । व्यावृत्त्या-शङ्कानुदयादित्यत उत्तरमूलसङ्गमयितुमाह **अभिप्रायमिति** । पुरुषमात्रं साध्यमित्यभिप्रायमित्यर्थः । कथमनेन अनैकान्तिकपरिहार इत्यत आह **इदमुक्तं भवतीति** । **व्याघातश्चेति** । चशब्देन प्रमितत्वे प्रमाणं समु-च्चिनोति । सुन्दोपसुन्दन्यायेन विशिष्टपुरुषनाशे व्यभिचारचोदनमसङ्गतमित्याह **न च नाशकर्तुरिति** । **प्रत्युदाहियेतेति** । अस्मदुक्तप्रमेये प्रतिपक्षतया उक्तप्रमेयाभाववत्तयेति यावत् । उदाह्रियेतेत्यर्थः ।

२७ **सु०— अनेन 'प्रलयकालः पुरुषवान् कालत्वादिदानीन्तनकालवदि'त्यप्यनुमानं सूचितम् । न च तदा कालाभावादाश्रयासिद्धिः, तथा सति तदेत्येव वक्तुमशक्यत्वात् । परकीयानुमाने च प्रलयविशेषणानुपपत्तेः ।**

परि०— परकीयानुमाने चेति । ईश्वरादिकं प्रलयेऽसत् भावत्वादित्यनुमान इत्यर्थः ।

यादु०— इत्यप्यनुमानमिति । अनेन 'चे'ति मूलं प्रकारान्तरेण योजितमिति ज्ञातव्यम् ।

वं०प०— परकीयेति । ईश्वरादिकं प्रलयेऽसद्भवितुमर्हतीत्यनुमान इत्यर्थः । **प्रलयेति ।** तल्लक्षणेत्यर्थः ।

कं०रा०— परकीयेति । ईश्वरादिकं प्रलये असद्भवितुमर्हति भावत्वादिति परोक्तानुमान इत्यर्थः ।

श्रीनिधि०— अनेनेति । 'न चाशेष नृनाश' इत्यादि वचनेनेत्यर्थः ।

शे०वा०— 'नाशोऽयं विमतोऽपि स्यान्नाशत्वात्कर्तृशेषवानि'ति प्रतिपक्षानुमाने विपक्षस्याप्रमितत्वसमर्थनद्वारा व्यभिचारपरिहारकत्वेन, तदेकवाक्यतया 'न चाशेषनृनाश' इति व्याख्यातम्, इदानीमसत्कार्यमिति ईश्वरादीनां प्रलयकालेऽभावसाधकानुमानस्य प्रतिपक्षान्तरप्रतिपादकतयाऽपीदमेव वाक्यं योजयति **अनेनेति । इत्यप्यनुमानमिति ।** इत्यनुमानमपीत्यर्थः । केचित्तु महाप्रलयलक्षणो नाशः पुरुषशेषवान्नाशत्वात्सम्प्रतिपन्नवदित्यनुमानसमुच्चयार्थमपिपदमिति मन्वाना यथास्थित एवापिशब्द इत्याहुः । आश्रयासिद्धतयाऽऽभासत्वेन असमानबलत्वान्नास्यासत्कार्यमिति प्रलये ईश्वराभावसाधकानुमाने प्रतिपक्षत्वमित्याशङ्कते **न च तदेति । तदेत्येव वक्तुमशक्यत्वादिति ।** 'सर्वैकान्यकिंयत्तदः काले दा' इति स्मरणेन तस्य कालाभिधायकत्वादित्यर्थः । तथा च तदेत्यनेन कालसत्ताया लब्धत्वात् तदा कालो नास्तीति तदभाववचनं स्वव्याहतमिति भावः । एवं स्वव्याघातेनासिद्धिशङ्कानुदयेनानाभासत्वाद्युक्तः प्रतिपक्ष इत्युक्तम् । इदानीं तु अस्तु तदा कालाभावः । न चोक्तदोषः । आश्रयासिद्ध्याऽभासत्ववदीश्वरादिकं प्रलयेऽसद्भवितुमर्हतीति परकीयानुमानस्याप्रसिद्धविशेषणत्वेनाभासतया तुल्यबलत्वानपायेन सत्प्रतिपक्षत्वाविघातत्वादित्याशयेनाह **परकीयानुमाने चेति । प्रलयविशेषणानुपपत्तेरिति ।** सकलकार्यविनाशविशिष्टकालस्यैव प्रलयत्वात् तथा च कालाभावे प्रलयस्याप्यसिद्ध्याऽप्रसिद्धविशेषणत्वं परकीयानुमानस्येति भावः ।

वा०र०— 'न चाशेषनृनाश' इत्यनेन प्रतिपाद्यव्यभिचाराभावेनानुमानस्य न केवलं अनेन पूर्वानुमाने व्यभिचाराभावः उपपादितः किन्तु अनुमानमपि सूचितमिति समुच्चयार्थत्वोपपत्तेः नापि पदार्थानुपपत्तिः इत्याशयेन व्याचष्टे **अनुमानमपीत्यर्थ इति ।** आहुरित्यनेन इयानरुचिः सूचिता । अनेन सूचितमिति पदसमभिव्याहारात् एतद्वाक्योक्तार्थेनैव सूचितार्थस्य समुच्चयाङ्गीकारे अपिपदं स्वरसं भवति । तच्चास्मदीययोजनायामेव व्यभिचाराभावोपपादनाय प्रवृत्त 'न चाशेषे'ति वाक्येन अनुमानसूचनस्य व्यभिचाराभावोपपादनेन समुच्चयाङ्गीकारात् सम्भवति । न च परयोजनायां सर्वनाशेष्वपीति पूर्ववाक्योक्तप्रतिपक्षेण समुच्चयाङ्गीकारे न केवलं पूर्ववाक्येन महाप्रलयक्षणे इत्याद्यनुमानं सूचितं, किन्तु अनेनेत्यपि अनुमानं सूचितम् । समुच्चयस्यास्वरसत्वात् । पूर्वानुमानसमुच्चयार्थत्वे वा अपिपदस्यानेनापीति सम्बन्धस्याङ्गीकारे न केवलं पूर्ववाक्येन किन्तु अनेनापीति समुच्चयस्य प्राप्त्या इत्यपीति यथाश्रुतसम्बन्धव्याख्यानस्वारस्यमेवेति । विशेषणानुपपत्तेः

इत्यत्र उत्तरमूलस्थं सकलकार्येत्यादिहेतुमनुवदन्तमपि उपपादयन् एव विशेषण इत्येतद्वाक्यतात्पर्यमाह **सकलकार्येत्यादिना** । **परकीयेति** । सूत्राद्युक्तप्रतिपक्षापेक्षयेति शेषः ।

स०व्र०— इत्यप्यनुमानमिति । महाप्रलयलक्षणे काले नाशः पुरुषशेषवान् नाशत्वात्सम्प्रतिपन्न-वदित्यनुमानसमुच्चयार्थमपिपदमित्यर्थः ।

विठ्ठल०— परकीयानुमान इति । ईश्वरादिकं प्रलये सद्भवितुमर्हति भावत्वादित्यनुमान इत्यर्थः ।

२८ **सु०— यद्यप्यत्र 'कालोऽङ्गीक्रियते न वा । आद्ये तत्रैव भावत्वहेतोर्व्यभिचारः । द्वितीये प्रलयविशेषणानुपपत्तिः, सकलकार्यविनाशविशिष्टकालस्य प्रलयत्वात् । अथ कार्यविनाश एव प्रलयस्तथापीश्वराभावस्य तेन सम्बन्धाभावादीश्वरादिकं प्रलयेऽसदिति प्रतिज्ञार्थानुपपत्तिः । देशादिद्वारा सम्बन्धाभ्युपगमे तत्रैव भावत्वस्य व्यभिचारः । प्रलय-विशेषणपरित्यागे चेश्वरादेः सर्वदाऽप्यभावः प्रतिज्ञातः स्यात् । तथा च स्फुटो दोषः' इति वक्तुं शक्यते, तथाऽपि तच्छिष्यैरेवोह्यतामिति न सूत्रभाष्यकाराभ्यामभिहितम् । सूचितं च 'अपीतौ' इति सूत्रकृता । 'लये मानं च किं भवेदि'ति भाष्यकृताऽपि ।**

परि०— यद्यपीति । तथापीति दूरस्थेनास्यान्वयः । **देशादिद्वारेति** । एकस्मिन्देशे प्रलयसत्त्वमपि नेत्यर्थः । सत्त्वेन वा कस्मिंश्चिद्भावान्तरे सत्त्वेन वा सम्बन्धाभ्युपगमे देशादावेव व्यभिचार इत्यर्थः । **स्फुटो दोष इति** । बाधो दृष्टान्ते कार्ये साध्यहीनता चेति स्फुटो दोष इत्यर्थः । **भाष्यकृतेति** । अनुभाष्यकृतेत्यर्थः । **सूचितमिति** । भावत्वेन सर्वासत्त्वसाधने अपीतौ व्यभिचारात् तदभावे च विशेषणासिद्धिरिति प्रतीतेरिति भावः । **अनुमानं** नाशत्वादित्यनुमानं, कालत्वादित्यनुमानं चेत्यर्थः ।

यादु०— देशादिद्वारेति । आदिपदेनान्यत् तत्कालीनं भावभूतं प्रागभावत्वादिकं ग्राह्यम् । तथा च तत्र कार्यनाशेश्वराद्यभावयोः सामानाधिकरण्यसम्बन्धाभ्युपगम इत्यर्थः । **तत्रैवेति** । देशादावेवेत्यर्थः । **स्फुटो दोष इति** । बाधो दृष्टान्ते साध्यवैकल्यं चेति दोषः स्फुट इत्यर्थः । **सूचितमिति** । अपीता-वित्यत्र प्रलये सर्वस्यापि भावस्याभावाभ्युपगमप्रसङ्गेऽभिहिते तत्र कालाभावस्याप्यापादनलाभेन 'लये मानं चे'त्यत्र प्रलयस्याप्रामाणिकत्वेनाभावापादने तत्कालाभावापादनस्यापि लाभेन चाप्रसिद्धविशेषणतायाः सूचित-त्वादित्यर्थः ।

वं०प०— यद्यप्यत्रेति । दोषो वक्तुं शक्यत इत्यन्वयः । **तत्रैव** काल एव । असत्त्वाभावादिति भावः । ननु कुतोऽनुपपत्तिः । न हि प्रलयः कालघटित इत्यत आह **सकलेति** । **अथेति** । तथा च प्रलयस्य कालघटितत्वाभावेन न विशेषणानुपपत्तिरित्यर्थः । **तेन** सर्वविनाशरूपप्रलयेन । **देशादीति** । तथा च सर्वनाशेनेश्वराद्यभावस्य सर्वनाशाधिकरणदेश एवेश्वराद्यभावाधिकरण इति देशादिद्वारकः सम्बन्धोऽस्तीत्यर्थः । **तत्रैव** देशादावेव ।

कं०रा०— यद्यप्यत्रेति । यद्यप्यत्र परकीयानुमाने प्रलये कालोऽङ्गीक्रियते न वेत्यादि दूषणं वक्तुं शक्यत इति सम्बन्धः । **द्वितीय इति** । प्रलये कालस्यानङ्गीकारे ईश्वरादिकं प्रलये असद्भवितुमर्हतीत्यत्र प्रलय इति विशेषणस्यानुपपत्तिः सकलकार्यनाशविशिष्टकालस्य प्रलयत्वात् तस्य च तदा कालानङ्गीकारपक्षे अभावादिति भावः । **कार्यविनाश एवेति** । तथा च कार्यविनाशस्य सत्त्वात्प्रलय इति विशेषणस्य नानुपपत्तिरिति भावः । **ईश्वराद्यभावस्येति** । ईश्वराद्यभावस्य सकलकार्यविनाशरूपप्रलयेन सम्बन्धाभावादीश्वरादिकं प्रलये असदिति प्रतिज्ञाया योऽर्थ ईश्वरादेः प्रलयनिष्ठाभावप्रतियोगित्वरूपस्तस्यानुपपत्तिरित्यर्थः । **देशादीति** । ईश्वराद्यभावस्य सकलकार्यविनाशरूपप्रलयेन देशादिद्वारा सम्बन्धस्याप्युपगमे देशादावेव भावत्वहेतोर्व्यभिचार इत्यर्थः । ननूक्तानुपपत्त्या साध्यकोटौ प्रलयविशेषणं त्यज्यत इत्यत आह **प्रलयविशेषणेति** । **तथा चेति** । ईश्वरादेः सर्वदाऽप्यभावप्रतिज्ञाने भावत्वहेतोरसदाश्रयकत्वदोषा महदादिकार्यदृष्टान्तस्य साध्यवैकल्यरूपदोषश्च स्फुट इत्यर्थः ।

श्रीनिधि०— सम्बन्धाभावादिति । संयोगसमवाययोः भावधर्मत्वात् इति भावः । **देशादिद्वारेति** । एकस्मिन्देशे विद्यमानत्वं सम्बन्ध इति भावः । अत्र यद्यपि देशनाशस्य सम्बन्धाभावादिति वक्तुं शक्यं अथापि शिष्यैरेवोह्यतामिति नोक्तम् । **स्फुटो दोष इति** । सकलप्रमाणबाधितनिरीश्वरवादापात इत्यर्थः ।

शे०वा०— सम्भावितपुरस्फूर्तिकव्यभिचाराप्रसिद्धविशेषणत्वरूपदूषणानभिधानेन प्रसक्तां सूत्रभाष्यकारयोरचातुरीं तद्दोषद्वयोपपादनपूर्वकं तदनुक्तौ निमित्तोक्त्या परिहरति **यद्यपीत्यादिना** । **तत्रैवेति** । काल एवेत्यर्थः । **अनुपपत्तिरिति** । तथा चाप्रसिद्धविशेषणतेति भावः । तामेवोपपादयति **सर्वेति** । **अथेति** । तथा च कालानङ्गीकारेऽपि कार्यविनाशरूपप्रलयस्य प्रसिद्धेर्नाप्रसिद्धविशेषणतेति भावः । **सम्बन्धाभावादिति** । संयोगसमवाययोरसम्भवादिति भावः । न कालाभावेऽपीश्वराद्यभावस्य कार्यनाशेन सम्बन्धाभावः । समानदेशत्वस्य समानकालत्वस्य वा सम्बन्धस्य सम्भवादित्यत आह **देशादिद्वारेति** । **तत्रैवेति** । देशादावेवेत्यर्थः । प्रलय इति विशेषणपरित्यागान्न प्रतिज्ञातार्थानुपपत्तिरित्यत आह **प्रलयेति** । **स्फुटो दोष इति** । महदादेः कार्यस्य प्रलयकालेऽसत्त्वस्य प्रतिवादिसम्मतत्वेऽपि सर्वथाऽसत्त्वस्यासम्मतेर्दृष्टान्तस्य साध्यवैकल्यं स्यादित्यर्थः । **सूचितं चेति** । प्रलये सर्वासत्त्वं स्यादिति वदता अपीतौ तद्वत्प्रसङ्गादित्यनेन कालस्यापि तदाऽसत्त्वमङ्गीकर्तव्यम् । अन्यथा तत्रैव भावत्वस्य व्यभिचारप्रसङ्गात् । तथा चाप्रसिद्धविशेषणत्वमिति

सूचितमित्यर्थः । **भाष्यकृतेति** । लयस्याप्रामाणिकत्वाभिधानमुखेन तत्कालाभावापादनस्यापि लाभेनाप्रसिद्ध-विशेषणतेति सूचितमिति पूर्वेण सम्बन्धः ।

वा०र०— देशादिद्वारेतीति । यद्यपि ईश्वरादेः असत्त्ववाचिना देशकाल्योरपि अभावाङ्गीकारात् न तावादाय सम्बन्धोऽङ्गीकर्तुं शक्यः इत्यपि वक्तुं शक्यं तथापि अस्य दोषस्य शिष्यैरेव समुन्नतां इत्याशयेन दूषणान्तरमुक्तमिति द्रष्टव्यम् ।

स०न्न०— तत्रैवेति । देशादावित्यर्थः । **स्फुट इति** । घटादौ स्फुटो व्यभिचार इत्यर्थः ।

विठ्ठल०— यद्यपीति । दूरस्थेनान्वयः । **देशादिद्वारेति** । एकस्मिन्देशे स्थितत्वेन वा कस्मिंश्चि-द्भावान्तरे स्थितत्वेन सम्बन्धाभ्युपगमे तत्रैव देशादावेव व्यभिचार इत्यर्थः । **स्फुट इति** । बाधादिरित्यर्थः ।

॥ इति जीवेश्वरसाधारणानुमानम् ॥

* * *

॥ अथ च तत्र जीवसद्भावसाधकानुमानम् ॥

॥ अथ तत्राप्यादौ विविधाः अनुमानप्रयोगाः ॥

२९ **सु०— तदिदं जीवेश्वरसाधारणमनुमानमुक्तम् । इदानीं प्रलये जीवसद्भावसाधक-मनुमानमाह धर्मेति ।**

अनु०— धर्माधर्माश्रयत्वेन स्वीकार्योऽपि नरो लये ॥

न केवलमुक्तानुमानेन, किन्नाम **धर्माधर्माश्रयत्वेन अपि** इति सम्बन्धः । **नरो** जीवात्मा ।

अयमत्र प्रयोगः । प्रलयकालवर्ती धर्मः साश्रयः धर्मत्वादिदानीन्तनधर्मवत् । एवमधर्ममपि पक्षीकृत्य प्रयोक्तव्यम् । न च धर्माधर्माश्रयो जीवात्मनोऽन्यः सम्भवति । एवञ्च प्रलये जीवात्मसद्भावाद्भावमात्रासत्त्वसाधनमनुपपन्नमिति ।

यद्वेश्वरसद्भावसाधनमिदम् । आश्रयशब्दस्याधिष्ठातृपरत्वात् । तत्रैवं प्रयोगः । प्रलयकालवर्तिनौ धर्माधर्मौ केनचिदधिष्ठितौ कारणत्वे सत्यचेतनत्वात् वाश्यादिवदिति ।

न चातीन्द्रिययोर्धर्माधर्मयोरधिष्ठातृत्वमीश्वरादन्यस्योपपद्यते । अतो धर्माधर्माधिष्ठातृत्वेनापि नरः परमपुरुषो लये स्वीकार्य इति ।

परि०— न च धर्माधर्माश्रयो जीवात्मनोऽन्य इति । स्वस्वामिभावरूपसम्बन्धेन जीवस्यैवाश्रयत्वादिति भावः । **अधिष्ठातृपरत्वादिति** । कार्योन्मुखकर्ता अधिष्ठाता ज्ञेयः । यथेष्टविनियोगकर्ता वाऽधिष्ठाता, नियन्ता वा इत्यर्थः । ध्वंसात्यन्ताभावादावव्यभिचाराय कारणत्वे सतीति हेतुविशेषणम् । **वा(श्या)त्स्यादिवदिति** । तक्ष्ण आयुधं वाशी, तक्ष्णा नियता यथा तथेत्यर्थः । आदिपदेन कुलिशादिग्रहः ।

गु०दी०— वाश्यादिवत् इत्यत्र वाश्यापदेन दारुसमीकरणाय कृतमायसं साधनमुच्यते । बाजीत्यपभ्रंशभाषा ।

यादु०— तदिदमिति । **तत्** विमतो नाशः पुरुषशेषवानित्यनुमानम् । **इदं** प्रलयकालः पुरुषवानित्यनुमानमित्यर्थः । **अधिष्ठातृपरत्वादिति** । कार्यविशेषजननाय यो यत्प्रेरयति स तदधिष्ठातेत्युच्यते । एवं च केनचिदधिष्ठितावित्यस्य केनचित्कार्यविशेषजननाय प्रेरितावित्यर्थो बोध्यः । **कारणत्व इति** । अत्र परमते प्रागभावत्वे न्यायमते पारिमाण्डिल्येऽस्मन्मते प्रकृतेरनन्तत्वेनाकारणीभूतप्रकृतिभागे व्यभिचारवारणाय कारणत्वे सतीति विशेषणम् । ईश्वरे व्यभिचारवारणाय विशेष्यमिति ज्ञातव्यम् । **वाश्यादिवदिति** । दारुविदारकवदित्यर्थः । वाश्या दारुविदारण इत्यभिधानात् ।

वं०प०— अधिष्ठितौ कार्योत्पादाय केनचित्प्रेर्यौ । **वाश्या** कुठारः । बालचीत्यपभ्रष्टभाषा । **कार्यं** सुखादिकारणं भोजनादि ।

कं०रा०— कारणत्वे सतीति । एतच्चाकारणे गगनपरिमाणादौ व्यभिचारनिरासाय चेतनपद उभयस्येति अदृष्टस्य तत्कारणत्वस्य चानुपलम्भादित्यर्थः ।

श्रीनिधि०— अधिष्ठातृपरत्वादिति । प्रेरकपरत्वादित्यर्थः । ईश्वरे व्यभिचारादाह **अचेतनत्वादिति** ।

शे०वा०— प्रलये जीवसद्भावसाधकानुमानप्रदर्शनार्थत्वान्नोत्तरग्रन्थवैयर्थ्यमित्यभिप्रेत्य प्रलये तत्सद्भावसाधकानुमानस्य पूर्वग्रन्थेनाप्युक्तेः किमनेनेत्यतोऽगतार्थतासिद्ध्यर्थं पूर्वोत्तरग्रन्थयोरर्थभेदमाह **तदिदमिति** । महाप्रलयलक्षणो नाशः पुरुषशेषवान्नाशत्वात्सम्मतवत्, प्रलयकालः पुरुषवान् कालत्वादित्येतदित्यर्थः । **अपीति सम्बन्ध इति** । व्यवहितत्वेऽपि योग्यत्वादित्यर्थः । अतो न तस्य वैयर्थ्यमिति भावः । नन्वत्र

पुरुषमात्रसद्भावसाधनं प्रतीयते न तु जीवसद्भावसाधनमिति नोक्तरूपेणापि पूर्वोत्तरग्रन्थयोः प्रमेयभेदसिद्धिरित्यतः पुण्यपापाश्रयत्वसमर्पकधर्माधर्माश्रयत्वेनेति पदसमभिव्याहारेण जीवेश्वरसाधारणस्यापि नरशब्दस्य जीवमात्रपरत्वस्थितेर्नानुपपत्तिरित्यभिप्रेत्य **तदनूद्य व्याचष्टे नरो जीवात्मेति** । धर्माधर्मान्यतराश्रयत्वेऽपि जीवसद्भावसिद्धेः किमुभयोपादानेनेत्यतः प्रयोगद्वयसूचनार्थं तदित्यभिप्रेत्य प्रयोगद्वयं दर्शयति **अयमत्र प्रयोग इत्यादिना** । नन्वनेन प्रलयकालवर्तिनोर्धर्माधर्मयोराश्रयः प्रलयेऽस्तीत्येव सिद्धं न तु जीव इति तत्कथमनेन जीवसिद्धिरित्यत आह **न चेति** । **अनुपपन्नमिति** । अंशबाधादिति भावः । जीवे भावत्वहेतोर्व्यभिचारित्वादिति भाव इत्यप्याहुः । नरशब्दस्येश्वरपरत्वमाश्रित्याप्याह **यद्वेति** । नन्वीश्वरस्य पुण्यपापाश्रयत्वाभावेन तत्समर्पकधर्माधर्माश्रयत्वेनेति पदविरोध इत्यत आह **आश्रयशब्दस्येति** । साक्षात्कर्तृपरत्वादित्यर्थः । यद्वा कार्यविशेषजननाय धर्माधर्मप्रेरकपरत्वादित्यर्थः । अस्मिन्पक्षे धर्मत्वाधर्मत्वयोरेव हेतुत्वायोगाद्योग्यतया हेतुविशेषं वक्तुं प्रयोगप्रकारं दर्शयति **तत्रेति** । **धर्माधर्माविति** । अत्रापि धर्मः केनचिदधिष्ठितकारणत्वे सत्यचेतनत्वादिति, अधर्मः केनचिदधिष्ठित उक्तहेतोरेवेति प्रयोगद्वयमभिप्रेतमिति न पक्षकोटावन्यतरवैयर्थ्यमिति ध्येयम् । **केनचिदधिष्ठिताविति** । केनचित्साक्षात्कृतावित्यर्थः । **कारणत्वे सतीति** । परमते प्रागभावत्वे, न्यायमते पारिमाण्डल्ये, स्वमते चापरिणतप्रकृतिभागे व्यभिचारनिरासाय उक्तं **कारणत्वे सतीति** । स्वरीत्येश्वरे, पररीत्या जीवे व्यभिचारवारणायाचेतनत्वादित्युक्तमित्यवगन्तव्यम् । वाश्यादिवदित्येवपाठः । दारुविदारकादिवदित्यर्थः । 'वाश्या दारुविदारणे' इत्यभिधानात् । यद्वा वाशीशब्दः कुठारपरः । ततश्च कुठारवदित्यर्थः । 'वाशीमेको बिभर्ति हस्त आयसीमि'ति श्रुतेः । वात्स्यादिवदिति तु लेखकदोषपतितो, मूलकोशेष्वदर्शनात् । नन्वनेन धर्माधर्मयोरधिष्ठातृपुरुषमात्रसिद्धावपि नेश्वरसिद्धिरन्यस्यापि तदधिष्ठातृकत्वसम्भवादित्यत आह **न चेति** । उक्तमर्थं मूलारूढं करोति **अत इति** ।

वा०२०— व्यवहितत्वेऽपि योग्यत्वादिति । व्यवहितत्वेऽपि योग्यत्वासम्बन्धे इत्यर्थः । **प्रतीयत इति** । नरशब्दस्य चेतनापरपर्यायपुरुषमात्रपरत्वात् इति भावः । **न तु जीव इतीति** । सिद्धमिति पूर्वेणान्वयः । **तत्कथमिति** । तथा च कथमित्यर्थः । **न तु जीव इति** । कथमनेनेति पाठे तु तत्कथमिति तत्पदार्थोऽपि योज्यः । **नन्वीश्वरस्येति** । नरशब्दस्य ईश्वरपरत्वाङ्गीकारे इति शेषः । **साक्षात्कर्त्रिति**. । साक्षात्कारपरत्वादित्यर्थः । अधिष्ठातृशब्दस्वारस्यार्थान्तरमाह **यद्वेति** । एवमुत्तरत्रापि । **परमत इति** । प्रागभावकर्तृतावादिमतेत्यर्थः । प्रागभावस्य कारणतावच्छेदकतया कारणत्वाभावादित्याशयः । न च स्वज्ञानं प्रति प्रागभावत्वादीनामपि कारणतया कारणपदेन तद्व्यावृत्त्यनुपपत्तिरिति वाच्यम् । विषयसन्निकर्षोपयुक्ततया कारणताभावस्य तत्त्वोद्योतटीकायां उक्ततया विषयकारणत्वाभावादित्याशयात् । पारिमाण्डिल्येऽपि सर्वथाकारणत्वमतेनेदम् । तस्यापि स्वज्ञानकारणतावादे तु नेदम् । अथवा प्रागभावत्वोक्तन्यायेन तत्राप्युपपादनं ज्ञेयम् । **स्वरीत्येति** । परेण ब्रह्मणः उदासीनस्वभावत्वाभ्युपगमेन कार्यानुकूलव्यापारविषयस्य कस्यचिदपि अनङ्गीकारेण कारणत्वस्य तन्मतेऽभावात् स्वरीत्येत्युक्तम् । **परेति** । अत्र परशब्दोऽपि परः जीव इति ।

तस्यावच्छिन्नचेतनतया तत्रोक्तकारणत्वसम्भवादिति भावः । यद्वेश्वरानङ्गीकारि व्यावृत्त्यर्थं स्वरीत्येति । जीवस्य स्वतन्त्रकर्तृत्ववादिमते साध्याभाव इति भावेनोक्तं परीत्येति । दारुविदारकादिवदिति पाठः । आदिपदरहितपाठस्तु अन्यथाख्यातिस्थपाठदर्शनमूलः । श्रुतेरिति । ऋग्वेदे अष्टमाष्टकश्रुतेरित्यर्थः ।

स०व्र०— कारणत्वमात्रं कुलालस्यापीति तत्र व्यभिचारपरिहारायाचेतनत्वादित्युक्तम् । वाश्यादिवदिति । वाशीशब्देन कुठारो ग्राह्यः । 'वाशीमेको विभर्ति हस्त आयसीम्' इति श्रुतौ (ऋ. ८-२९-३) अयोमये आयुधे प्रयुक्तत्वादित्यर्थः । ('वाशीमेको विभर्ति हस्त ओहितं तेन वृत्राणि जिघ्नति ? । वासीमन्तर्देवेषु निविः')

विठ्ठल०— तदिदमिति । तच्च विमतो नाशः पुरुषदोषवानित्यनुमानं इदं प्रलयकालः पुरुषदोषवानित्यनुमानमित्यर्थः । कारणत्वे सतीति । एतच्चाकारणे गगनपरिमाणादौ व्यभिचारवारणाय ईश्वरे तन्निरासायापदम् । वाश्यादिवदिति । दारविदारकवदित्यर्थः । 'वाश्य दारुविदारण' इत्यभिधानात् । ईश्वरादन्यस्येति । अन्यस्य चेतनस्य धर्माधर्मबन्धत्वादिति भावः ।

॥ इति विविधाः अनुमानप्रयोगाः ॥

* * *

॥ अथ च तत्र उक्तानुमानदूषणनिरासः ॥
॥ अथ तत्र च आश्रयासिद्धिशङ्कानिरसनम् ॥
॥ अथ तत्रापि च धर्माधर्मसंज्ञितादृष्टाभावशङ्कायां विकल्पत्रयं तन्निरसनञ्च ॥
॥ अथ तत्रापि चादौ प्रथमविकल्पदूषणम् ॥

३० सु०— ननु प्रलये भावमात्रस्यासत्त्वमभ्युपगच्छतो मम तदा धर्माधर्मावपि न स्त एवेत्याश्रयासिद्धिरिति । इदमिह वक्तव्यम् । किं धर्माधर्मसंज्ञितमदृष्टमस्ति कार्यमात्रस्य कारणं च भवतीत्यभ्युपगम्य प्रलये तदभावोऽभिधीयते, उत सदपि तदकारणमित्यभ्युपेत्य, अथ तदेव नास्तीत्यङ्गीकृत्य ।

आद्यं दूषयति अनादित्वमिति ।

अनु०— अनादित्वं विनाऽदृष्टं कथं स्यात्कारणं क्वचित् ।

अनादित्वमिव अनादित्वं प्रलये सत्त्वमित्यर्थः । क्वचित् इति सृष्टिकाले । यद्यदृष्टं प्रलये न स्यात् तदा आदिकालीनस्य कार्यस्य कारणं न स्यात्, असतः कारणत्वायोगात् । तथा च सर्वोत्पत्तिमतां निमित्तमित्यभ्युपगमो भग्न इत्यर्थः ।

'स्यादेतत् । अधुनातनकार्यमदृष्टकारणकं न त्वादिकालीनमिति ममाभ्युपगमः, तत्किमदृष्टस्य प्रलये सद्भावेने'त्यत आह अनादित्वमिति । अनादित्वं विना तत एव आदिकालीनकार्यकारणत्वं च विना अदृष्टं क्वचित् अधुनातनेऽपि कार्ये कारणं कथं स्यात् । न कथञ्चित् । 'अधुनातनं कार्यम्, अदृष्टकारणकं न, कार्यत्वात् आदिकालीनकार्यवदि'त्यनुमानसम्भवात् । न चेदिदमिव तदप्यदृष्टकार्यमेवाङ्गीकार्यमिति ।

यद्वा मा भूदादिकालीनस्य कार्यस्यादृष्टं कारणम् । तथाऽपि प्रलये तद्भावोऽङ्गीकरणीयः । कुतः । अनादित्वं प्रलये सत्त्वं, विनाऽदृष्टं क्वचित् इदानीन्तनेऽपि कार्ये कारणं कथं स्यात् । अन्तराल एवादृष्टोत्पत्त्ययोगादिति योज्यम् ।

परि०— द्वितीयतृतीयपक्षौ 'अदृष्टं कारणं नो चेदि'त्यादिना निरसिष्यन् ततः प्राक् आद्यपक्षनिरास इति भावेनाह आद्यं दूषयतीत्यादिना । अनादित्वं विनेति । प्रलये सत्त्वं विनेत्यर्थः । तत एवेति । प्रलये सत्त्वाभावादेवेत्यर्थः । तर्कं चाह न चेदिति । नादृष्टकारणकं न चेदित्यर्थः । तदपीति । सृष्टिकालीनमित्यर्थः ।

वं०प०— अदृष्टं कारणमेव न भवतीति वा नास्तीति वा कुतो निश्चेयमित्यतः प्रमाणेनानुपलम्भादित्याह उभयस्येति । अदृष्टकारणत्वस्यादृष्टस्य चेत्यर्थः । अदृष्टमेव नो चेत्सदपि तत्कारणं नो चेदिति योजनामभिप्रेत्याह यदि प्रत्यक्षेणेति । अनुपलभ्यमानः प्रत्यक्षेणेति शेषः ।

कं०रा०— आश्रयासिद्धिरिति । सदप्यदृष्टं कारणमेव न भवतीति पक्षे आश्रयीभूतादृष्टे कारणत्वे सत्यचेतनत्वादिति हेतोरसिद्धिरदृष्टमेव नास्तीति पक्षे त्वाश्रयस्यादृष्टस्यासिद्धिरित्यर्थः ।

शे०वा०— 'अनादित्वं विने'त्युत्तरमूलानर्थक्यमाशङ्क्य प्रलये धर्माधर्मरूपादृष्टसद्भावप्रतिपादनार्थत्वान्न तदित्यभिप्रेत्य किं तद्भावप्रतिपादनस्य प्रयोजनमित्यत आश्रयासिद्धिशङ्कानिरासः तत्प्रयोजनमित्याशयवान् आश्रयासिद्धिशङ्काबीजं दर्शयंस्तामुत्थापयति नन्विति । ननु प्रलये धर्माधर्मौ न स्त इति वदतोऽदृष्टमेव नास्तीति सम्प्रतिपन्नं सदपि वा न सर्वकारणमिति न त्वदृष्टस्य सत्त्वं, सर्वकार्यकारणत्वं च । तथा च तं प्रत्यदृष्टस्य

प्रलये सत्त्वाभावादादिकालीनकार्यकारणत्वाभावप्रतिपादकोत्तरग्रन्थानुपपत्तिः । न च प्रलये धर्माधर्मौ न स्त इति वदतो, यद्यप्यदृष्टमस्ति सर्वकारणं च भवति तथाऽपि प्रलये नास्तीत्येवाभिमतं न तु तदेव नास्ति सदपि वा कारणं नेतीति नोत्तरग्रन्थासङ्गतिरिति वाच्यम् । तथा सति 'लये मानं च किं भवेदि'त्युत्तरग्रन्थासामञ्जस्य-प्रसङ्गादित्यतोऽत्र विकल्पमुखेन प्रवृत्तेर्न कस्याप्यनुपपत्तिरित्यभिप्रेत्य सम्भावितविकल्पप्रदर्शनपूर्वकमाद्यपक्ष-निरासकतयोत्तरवाक्यं योजयति **इदमिहेति** । नन्वनादित्वाभावेन नादृष्टस्यादिकालीनकार्यकारणत्वाभाव आपादयितुं शक्यः । तथा सति स्वमतेऽपि अदृष्टस्यानादित्वाभावेन आदिकालीनकार्यकारणत्वाभावप्रसङ्गात् प्रलये तत्सत्त्वमात्रस्यैव तत्कारणताप्रयोजकत्वेन तदनादित्वस्य तत्राप्रयोजकत्वाच्चेत्यतोऽत्रानादित्वशब्देन प्रलयकाले सत्त्वस्य विवक्षितत्वात् स्वमते अदृष्टस्य प्रलये सत्त्वेनादिकालीनकार्यकारणत्वोपपत्तावपि परपक्षे प्रलये तस्य तदाऽसत्त्वान्न तस्य तत्कारणत्वमित्याशयेन कथमनादित्वशब्दस्य प्रलयकाले सत्त्वसमर्पकत्वमित्यतो गौण्या तत्समर्पकता दर्शयति **अनादित्वमिवेति** । इदानीन्तनकार्यसृष्टेस्तत्पूर्वमदृष्टसत्तामात्रापेक्षत्वेन प्रलयकाले सत्त्वानपेक्षत्वान्न तदभावेन तदभावापादनं सम्भवतीत्यतः क्वचित्पदं सृष्टिकालपरतया व्याचष्टे **क्वचिदितीति** । सिद्धं प्रसङ्गमाह **यदीति** । अप्रयोजकतां परिहरति **असत इति** । पूर्वमसत इत्यर्थः । नियतपूर्ववृत्तित्वरूपत्वात् तद्व्याप्तत्वाद्वा कारणत्वस्येति भावः । अदृष्टस्यादिकालीनकार्यकारणत्वाभावादिष्टापादनमेतदित्यतः किमसङ्कु-चितसर्वोत्पत्तिमन्निमित्तत्वमदृष्टस्याभ्युपगम्य इदमाशङ्क्यते किंवा सङ्कुचितकार्यकारणत्वमभ्युपगम्येति विकल्प-द्वयं मनसि निधाय आद्यपक्षमाश्रित्येष्टापत्तिं परिहरति **तथा चेति** ।

द्वितीयपक्षमाश्रित्येष्टापत्तिमाशङ्कते **स्यादेतदिति** । **तत्किमदृष्टस्येति** । अधुनातनकार्यस्य तत्पूर्वक्षणे-ऽदृष्टसद्भावमात्रेणोपपन्नतया प्रलये तस्य सत्त्वानपेक्षत्वादिति भावः । एतत्पक्षनिरासोपयोगितया वाक्यं व्याचष्टे **अनादित्वं विनेत्यादिना** । दृष्टान्तमात्रस्यासाधकत्वाद्धेतोश्चानुक्तत्वान्न कथञ्चिदित्ययुक्तमित्यतोऽभिप्रायमाह **अधुनातनेति** । तथा च अधुनातनकार्यकारणमदृष्टमित्यभ्युपगमभङ्ग इति भावः । अप्रयोजकत्वं परिहरति **न चेदिति** । अधुनातनकार्यं **नादृष्टकारणकं न चेत्** दृष्टकारणकं चेदित्यर्थः । अनेन आदिकालीनं कार्यमदृष्टकारणकं कार्यत्वादधुनातनकार्यवदित्यनुमानं सूचितं भवति । तथा च तन्निर्वाहाय प्रलयकाले सत्त्व-स्यावश्याभ्युपगमनीयत्वसिद्धेर्नाश्रयासिद्धिरिति भावः ।

एवमधुनातनकार्यस्य प्रलयेऽदृष्टसत्त्वानपेक्षत्वेऽप्यादिकालीनकार्यकारणत्वाभावे तद्दृष्टान्तेनादृष्टस्याधुना-तनकार्यकारणत्वाभावप्रसङ्गेन अधुनातनकार्यकारणमित्यभ्युपगमभङ्गापत्त्या तदुपपत्त्यर्थमेवादिकालीनकार्यकारण-त्वस्याभ्युपगमनीयत्वात् तस्य च प्रलयेऽदृष्टस्य सत्तां विनाऽनुपपत्तेः प्रलये तत्सत्त्वसिद्धिरित्यादिकालीन-कार्यकारणत्वसमर्थनद्वाराऽधुनातनकार्यकारणत्वस्याप्यदृष्टस्य प्रलयेऽदृष्टसत्त्वसाधकत्वोपपादकत्वाभिप्रायेण वाक्यं योजितम् । इदानीं त्वधुनातनकार्यकारणत्वस्याप्यदृष्टस्य प्रलये सत्त्वं विनाऽनुपपत्तेः साक्षादेव तेन तत्सिद्धि-रित्यभिप्रायेणापेक्षिताध्याहारेण वाक्यं योजयति **यद्वेति** ।

वा०र०— सुर्वकार्यकारणत्वं चेति । सम्प्रतिपन्नमिति वर्तते । तत्कथं तं प्रतीति पाठे उत्तर-ग्रन्थोपपत्तिः इत्युत्तरवाक्यपाठः । तथा च तं प्रत्येव पाठे तु उत्तरग्रन्थानुपपत्तिरिति उत्तरवाक्यस्य नञ्गर्भः पाठः । पाठद्वयेऽपि उपपत्तिशब्दः सङ्गतिपरः उत्तरग्रन्थासङ्गतिरिति वक्ष्यमाणानुसारात् इति बोध्यम् । सत्त्वाभावाच्च आदिकालीनकार्यकारणत्वाभावः तत्प्रतिपादकेति योजना । कारणत्वाभावः इत्येतत्प्रतिपादकेति यावत् । नेतीतीत्यत्राद्य इति शब्दस्याभिमतमिति पूर्वेणान्वयः । द्वितीयो हेत्वर्थकः । **उत्तरग्रन्थासामञ्जस्य इति** । अदृष्टस्य प्रत्यक्षेण सिद्धत्वात् तदभाव इति वदन्तं प्रत्येव । तथा सति प्रलयस्यापि अदृष्टत्वात् अभावः स्यात् इत्येतदर्थप्रतिपादकत्वात् तस्येति भावः । **तद्ग्राह्यत्वाद्वेति** । कारणत्वस्यातीन्द्रियशक्तिरूपत्वादिति भावः ।

स०व्र०— उत सदपीति । इदानीमदृष्टस्य सत्त्वेऽपि प्रलये तस्याभावान्न तस्य कारणत्वमिति विकल्पाभिप्रायः ।

विठ्ठल०— आपाद्यस्यानिष्टत्वाभावमाशङ्क्य तत्समाधानायापीदमेव मूलं योजयति **स्यादेतदिति** । **तत एवेति** । प्रलये सत्त्वाभावादेवेत्यर्थः । विपक्षे बाधकमप्याह **न चेति** । **अदृष्टाकारणं चेदिति** । अदृष्टकारणकं न चेदित्यर्थः । **तदपीति** । आदिकालीनकार्यमपीत्यर्थः । उत्तरमूलव्यावृत्त्या शङ्कोत्थापनाय इदमेव मूलं प्रकारान्तरेण योजयिष्यन् । अस्तु वा पूर्वतर्के आपाद्यस्यानिष्टत्वाभावः तथापि तत्साध्य-प्रलये दृष्टसद्भावोऽवश्यमङ्गीकरणीय इत्यभ्युपगमवादेन अवतारयति **यद्वेति** । कात्र कथन्तेत्यतः दोषोक्त्या योजयति ।

३१ सु०— नन्वदृष्टस्य सर्वोत्पत्तिमन्निमित्तत्वेऽपि न प्रलये सद्भावोऽभ्युपगन्तव्यः आदिकाल एवोत्पन्नस्यापि महदादिकारणत्वोपपत्तेरिति । इदमत्र वक्तव्यम् । तदादिकाले जनिमददृष्टं ततः पूर्वादृष्टादुत्पद्यते न वेति ।

आद्यमुपादत्ते पूर्वेति ।

अनु०— पूर्वादृष्टात्परादृष्टं यदि नैवोत्तरं कुतः ।

जायत इति शेषः । परिहरति नैवेति । एवं तर्हि तत् उत्तरम् आदिकाले जनिमददृष्टं नैव अस्माभिः पक्षीक्रियते किन्तु तत्कारणं प्रलयकालीनं पूर्वादृष्टमेव, इति कुत आश्रयासिद्धिरिति ।

द्वितीयमुपादत्ते पूर्वेति । नैव उत्पद्यत इति शेषः । दूषयति उत्तरमिति । तर्हि तत् उत्तरम् आदिकालीनमदृष्टं, कुतो जायते, न कुतश्चित् । सर्वोत्पत्तिमन्निमित्तस्यादृष्टस्याभावादादिकालीनादृष्टोत्पत्तिरेव न स्यादित्यर्थः ।

न ब्रूमो वयं सर्वं कार्यमदृष्टजन्यमिति, किं तर्ह्यादिकाले जनिमतो महदादिकारणादृष्टादन्यदेवातो नोक्तदोष इत्याशङ्कामुत्थाप्य दूषयति पूर्वेति । यदि परादृष्टं सृष्ट्युपक्रमे जनिमत् पूर्वादृष्टान्नैव उत्पद्यते, अपि त्वदृष्टनिरपेक्षमेव; तर्हि उत्तरं महदादिकार्यमपि कुतः अदृष्टादुत्पद्यत इत्यङ्गीकरणीयम्, अदृष्टवत्तस्याप्यदृष्टनिरपेक्षत्वसम्भवात्, अन्यथा कार्यत्वाददृष्टस्याप्यदृष्टापेक्षाऽङ्गीकार्येति ।

परि०— उपादत्ते दूषयितुमनुवदतीत्यर्थः । यदीत्यनन्तरं दोषमाह **जायत इति शेष इति** । 'एवं तर्हि तदि'ति पदत्रयं परिष्कारार्थमुपात्तम् । **नैवास्माभिः पक्षीक्रियत इति** । यद्यपि तत्पक्षीकारेणाधिष्ठातृसाधनेऽपि नाश्रयासिद्धिरीश्वरसिद्धिश्च सेत्स्यति । तथापि प्रलयकालीनमीश्वरसत्वं न सिद्ध्यतीति नैवास्माभिः पक्षीक्रियत इत्युक्तम् । 'तर्हि तदि'ति परिष्कारार्थमनुवादः । उत्तरमित्यस्यार्थ आदिकालीनमदृष्टमिति । **नोक्तदोष इति** । आदिकालीनादृष्टोत्पत्त्यभावरूपदोषो नेत्यर्थः । परादृष्टमित्यनुवादः । सृष्ट्युपक्रमे जनिमदिति व्याख्या । कुत अङ्गीकरणीयमित्यन्वयः । **अदृष्टस्यापीति** । आदिकालीनादृष्टस्यापीत्यर्थः ।

यादु०— नैवास्माभिरिति । येन प्रलये ईश्वरसिद्ध्यलाभेनासङ्गतिः स्यादिति भावः ।

श्रीनिधि०— अत्राधिष्ठिताविति कार्यानुकूल व्यापारवत्तया नियमितत्वं विवक्षितम् । तथाऽपि स घटादिकार्ये व्यभिचारादाह **वर्तमानसत्यन्तं आद्यमुपादत्त इति** । अङ्गीकरोतीत्यर्थः । **परिहरति** आश्रयासिद्धिमिति शेषः । **द्वितीयमुपादत्त इति** । दूषयितुं पक्षपरिग्रहं करोतीत्यर्थः । अत एवाह **दूषयतीति** ।

शे०वा०— ननु तथाऽपि पूर्वादृष्टात्परादृष्टमित्याद्युत्तरभाष्यमनर्थकम् । न च महदादिकारणादृष्टस्य पूर्वादृष्टादुत्पत्तिनिरासार्थं तदिति वाच्यम् । तन्निरासस्याप्यनर्थकत्वादित्यतः प्राग्व्युत्पादितमहदादिकार्यकारणत्वेन प्रलयेऽदृष्टसत्त्वस्य समर्थनेनाश्रयासिद्धिपरिहारार्थत्वादित्यभिप्रेत्य तदनुपपत्तिशङ्कामुत्थापयति **नन्विति** । **सर्वेति** । महदादीत्यर्थः । नन्वेवं परिहारग्रन्थासङ्गतिः । अदृष्टमनपेक्ष्यैवोत्पन्नस्यादृष्टस्य महदादिकारणताया अपि

परेणाभिप्रेतुं शक्यत्वेन **पूर्वादृष्टमपेक्ष्यैव** महदादिजनकादृष्टोत्पत्तिनियमाभावेन महदादिजनकादृष्टजनकप्रलय-कालीनादृष्टपक्षीकारेणाश्रयासिद्धिपरिहारायोगादित्यतोऽत्रादिकाल एवोत्पन्नस्य महदादिकारणत्वं वदतोऽदृष्ट-नैरपेक्ष्येणैव महदादिजनकोत्पत्त्यभिप्रायकत्ववत्पूर्वादृष्टापेक्षोत्पत्त्यभिप्रायकत्वस्यापि सम्भावितत्वेन निरसनीयत्वा-न्नानुपपत्तिरित्यभिप्रेत्य सम्भावितविकल्पप्रदर्शनपूर्वकमाद्यपक्षकक्षीकारतन्निरासपरतया तद्व्याख्यातुं विकल्पयति **इदमत्रेति** । नन्वत्र महदादिजनकादृष्टस्य पूर्वादृष्टादुत्पत्तेरनुक्तत्वान्नोपात्तभाष्यखण्डस्याद्यपक्षपरिग्रहत्वमित्यतो-ऽपेक्षितशेषपूरणेन तदुपपादयति **जायत इतीति** । **नन्वनेन कथमाद्यपक्षपरिहार** इत्यतस्तदुपयोगितया तदपेक्षित-पूरणेन तद्योजयति **एवं तर्हीति** । **नैवास्माभिरिति** । तदाश्रयत्वाधिष्ठातृत्वयोः प्रलये जीवेश्वरसत्त्वानापा-दकत्वादिति भावः । **पूर्वादृष्टमेवेति** । तदाश्रयत्वाधिष्ठातृत्वाभ्यां प्रलये जीवेश्वरसद्भावसिद्धेरिति भावः । **कुत आश्रयेति** । महदादिजनकस्यादिकालोत्पन्नस्यादृष्टस्य प्रलयवर्त्यदृष्टकार्यत्ववादिना प्रलयेऽदृष्टसत्त्वस्याभ्युपगत-त्वात् तदभावाभ्युपगमनिबन्धनाश्रयासिद्धेरनवकाशत्वादिति भावः ।

नन्वेवं विकल्पमुखेन योजनायां द्वितीयपक्षनिरासकोत्तरग्रन्थानुपलम्भात् तदनिरासप्रसङ्गो दोष इत्यतो वाक्यभेदविवक्षावशेनास्यैव भाष्यस्य तत्परिग्रहनिरासपरत्वान्नानुपपत्तिरित्यभिप्रेत्य तत्परिग्रहनिरासपरतयाऽपि योजयति **द्वितीयमुपादत्त इत्यादिना** । नैवेत्यन्तस्य भाष्यस्य द्वितीयपक्षपरिग्रहरूपतासिद्ध्यर्थमपेक्षितं पूरयति **नैवोत्पद्यत इति शेष इति** । नैवेत्यतःपरमुत्पद्यत इति शेष इत्यर्थः । शङ्काग्रन्थे यदीत्युक्त्यनुरोधादाह **तर्हीति** । कुत इत्यस्योत्तरत्रोत्तराभावेन प्रश्नार्थत्वासम्भवादाक्षेपार्थत्वमङ्गीकृत्य तदुपपादयति **न कुतश्चि-दित्यादिना** । **न ब्रूम इति** । येन सर्वोत्पत्तिमन्निमित्तस्यादृष्टस्याभावादादिकालीनादृष्टोत्पत्त्यनुपपत्तिरिति भावः । **अदृष्टवदिति** । महदादिकं नादृष्टकारणकं कार्यत्वान्महदादिजनकादिकालीनादृष्टवदित्यनुमानसम्भवादिति भावः । **अन्यथेति** । महदादिजनकमादिकालीनमदृष्टम् अदृष्टकारणकं कार्यत्वान्महदादिवदित्यनुमानादिति भावः ।

वा०र०— कक्षीकारतन्निरासपरतयेति । कक्षीकारपरतया तन्निरासपरतया चेत्यर्थः ।

विठ्ठल०— उक्तहेत्वसिद्धिमाशङ्क्योत्तरतया मूलं सङ्गमयति **नन्विति** । **उपादान इति** । दूषयितु-मनुवदतीत्यर्थः । उक्तशङ्कानुवादः **एवं तर्हीति** । उत्तममित्यस्यादिकालजननत्वादिव्याख्यानेनैवेत्यनन्तरं दोषमाह **अस्माभिरिति** । यदीत्यनन्तरं दोषमाह **पक्षीक्रियत इति** । तल्लब्धार्थकथनं **किन्त्विति** । ततश्च कुत इत्यतः सोपस्कारं कुत इत्येतद्योजयति **कुत इति** । एवमुत्तरत्रापि योजनाप्रकारोऽपि द्रष्टव्यः ।

॥ इति प्रथमविकल्पदूषणम् ॥

* * *

॥ अथ तत्र द्वितीयतृतीयविकल्पदूषणम् ॥
॥ अथ च तत्र 'ईश्वरादिकं प्रलयेऽसद्भवितुमर्हति' इतिपरपक्षस्याप्रसिद्धविशेषणता ॥

३२ **सु०**— 'अस्तु तर्ह्यदृष्टं कारणमेव न भवतीति द्वितीयः पक्षः, अदृष्टमेव नास्तीति तृतीयो वा; उभयस्याप्यनुपलम्भात्; तथा चाश्रयासिद्धिरपरिहार्ये'त्याशङ्क्याह **अदृष्टमिति** ।

अनु०— अदृष्टं कारणं नो चेल्लये मानं च किं भवेत् ।

यदि प्रत्यक्षेणानुपलम्भात् अदृष्टं न स्यात्, सदपि वा कारणं न स्यात् । तदा लये च किं मानं भवेत् । प्रलयोऽप्यप्रामाणिकत्वान्न स्यात् । न ह्यसावपि प्रत्यक्षेणोपलभ्यते ।

तथा चेश्वरादिकं प्रलयेऽसद्भवितुमर्हतीत्यप्रसिद्धविशेषणः पक्षः परस्यापि स्यात् ।

परि०— उभयस्यापीति । अदृष्टकारणत्वस्यादृष्टस्य चेत्यर्थः । **आश्रयासिद्धिरपरिहार्येति** । अन्त्यपक्षाभिप्रायेणैतदुक्तिः । द्वितीयपक्षे हेतौ कारणत्वे सतीति विशेषणासिद्धिर्ज्ञेया । यद्वा द्वितीयपक्षेऽपि कारणीभूतादृष्टस्यैव पक्षत्वादयं दोषः पक्षद्वयाभिप्रायेणैवेति ध्येयम् ।

यादु०— उभयस्येति । अदृष्टस्य तत्कारणत्वस्य चेत्यर्थः ।

वं०प०— अदृष्टं कारणमेव न भवतीति वा नास्तीति वा कुतो निश्चेयमित्यतः प्रमाणेनानुपलम्भादित्याह **उभयस्येति** । अदृष्टकारणत्वस्यादृष्टस्य चेत्यर्थः । अदृष्टमेव नो चेत्सदपि तत्कारणं नो चेदिति योजनामभिप्रेत्याह **यदि प्रत्यक्षेणेति** । **अनुपलभ्यमानः** प्रत्यक्षेणेति शेषः ।

शे०वा०—अदृष्टं कारणं नो चेदित्युत्तरवाक्यस्य द्वितीयपक्षमात्रनिरासपरत्वे तृतीयपक्षस्य मूलादनिरासप्रसक्त्या पक्षद्वयनिरासपरत्वेन योजयितुं द्वितीयतृतीयपक्षावाशङ्कते **अस्तु तर्हीति** । **उभयस्यापीति** । अदृष्टस्य तत्कारणत्वस्य चेत्युभयस्येत्यर्थः । **अनुपलम्भादिति** । प्रत्यक्षेणेति शेषः । पक्षद्वयनिरासपरतया भाष्यं योजयति **यदीत्यादिना** । मानं चेत्यत्र चशब्दस्य वैयर्थ्येन सम्बन्धायोगाद्भिन्नक्रमतया तमाह **लये चेति** । इष्टापत्तिं परिहरति **तथा चेति** । **अप्रसिद्धविशेषण इति** । अप्रसिद्धविशेषणविशेषण इत्यर्थः । तथा चानुमानद्वयस्याप्याभासतया समत्वात्सत्प्रतिपक्षत्वमप्रत्यूहमिति भावः ।

वा०र०— साध्यधर्मस्य विशेषणत्वेऽपि साध्यगतविशेषणस्य पक्षविशेषणत्वाभावात् तदप्रसिद्धत्वे कथं पक्षस्य अप्रसिद्धविशेषणत्वाख्यं दूषण इत्यतो मध्यमपदलोपिसमासमाश्रित्याह **अप्रसिद्धविशेषणविशेषण इति** । न विशेषणीभूतसाध्यस्याप्रसिद्धत्वमुच्यते । किन्तु विशेषणीभूतं यत्साध्यं तद्विशेषणस्यैवेति पक्षः अप्रसिद्धविशेषणकसाध्यक इत्युक्तं भवति । अप्रसिद्धं विशेषणं यस्य तथोक्तम् । तादृशं विशेषणं यस्येति बहुव्रीहिद्वयं बोध्यम् ।

स०व्र०— उभयस्यापीति । अदृष्टस्य तत्कारणत्वस्य चेत्यर्थः ।

विठ्ठल०— उभयस्येति । अदृष्टस्य तत्कारणस्य चेत्यर्थः । आश्रयासिद्धिसदृशादृष्टं कारणमेव न भवतीति पक्षे आश्रयभूतादृष्टे कारणत्वे सत्यचेतनत्वादिति हेतोरसिद्धिः । अदृष्टमेव नास्तीति पक्षे त्वाश्रयासिद्धिरित्यर्थः ।

* * *

॥ अथ तत्रादौ 'प्रलयस्यानुमानसिद्धत्वाङ्गीकार'सम्भवः ॥

३३ **सु०—** अथ मतम् । कालविप्रकर्षादनुपलभ(भ्य)मानोऽपि प्रलयोऽनुमानसिद्धत्वादङ्गीकरणीयः । तथा हि । 'विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायि(न्तानि)भिरारब्धः सन्तानत्वात् आरणेयसन्तानवत् । वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः नित्यत्वे सति तदारम्भकत्वात् प्रदीपपरमाणुवत् । सर्वे सन्तानाः कदाचित्सहोच्छिद्यन्ते सन्तानत्वात् प्रदीपसन्तानवत् । सर्व एव परमाणवः कदाचित्समग्रोपादेयप्रबन्धशून्याः आरम्भकत्वात् नष्टपवनारम्भकपरमाणुवत् । भूगोलकसन्तानः कदाचित्साकल्येनोच्छिद्यते सन्तानत्वात् दीपसन्तानवत् । इयं क्रिया स्वान्यावयविकालीनत्वानधिकरणकिञ्चित्कालीनक्रियाऽन्या क्रियात्वादन्यक्रियावदि'ति ।

एवं तर्हि धर्माधर्मावपि स्वरूपतो विप्रकृष्टत्वादनुपलभ्यमानावपि देवदत्तशरीरादिकं देवदत्तविशेषगुणजन्यं कार्यत्वे सति देवदत्तभोगहेतुत्वात् देवदत्तप्रयत्नजन्यस्रगादिवदित्याद्यनुमानेन विचित्रकार्यान्यथाऽनुपपत्त्या; 'ज्योतिष्टोमेन स्वर्गकामो यजेत', 'यो ब्राह्मणायावगुरेत्तं शतेन यातया(ये)त्' इत्यादिश्रुतसाध्यसाधनभावान्यथाऽनुपपत्त्या वा सिद्धत्वादभ्युपगन्तव्याविति समं समाधानम् ।

परि॰— विश्वसन्तानोऽयमिति । **सन्तानः** परम्परा । इदानीं हि घटपटादिकार्यजातं प्रवाहेण बहुकालीनं वर्तते । स च सन्तानः तद्धीनैरारम्भकसमवायिकारणपरमाणुभिरारब्ध इति साधने विश्वसन्तानात्पूर्वं प्रलयः सिद्ध्यतीति भावः । **आरणेयेति** । अरणिजन्यवह्निसन्तानवदित्यर्थः । स चारण्यन्तर्गतवह्न्यवयवैः सन्तानहीनैरुत्पन्न इति भावः । पूर्वतनब्रह्माण्डपरमाणुभूक्तसाध्यस्य बाधाद्वर्तमानेति ब्रह्माण्डविशेषणम् । **पूर्वमुत्पादितसजातीयेति** । पूर्वमुत्पादितसन्तानसजातीयसन्तानान्तरा इत्यर्थः । सिद्धसाधनत्वनिरासाय सन्तानवन्त इत्यनुक्त्वा सन्तानान्तरा इति प्रतिज्ञाविशेषणोक्तिः । सन्तानभेदे सिद्धे एकत्र सन्तानद्वयायोगात् पूर्वतनस्य नाशावगतेर्लयसिद्धिरिति भावः । अनित्ये तन्त्वादौ अव्यभिचाराय नित्यत्वे सतीत्युक्तिः । **सर्वे सन्ताना इति** । सर्वकार्यप्रवाहा इत्यर्थः । प्रदीपो हि प्रतिक्षणं परिमाणभेदाद्भिद्यते तत्सन्ततिः कदाचिदुच्छिद्यते यथा तथेत्यर्थः । नष्टेति पवनविशेषणम् । **इयं क्रियेति** । घटादिक्रिया काचिद् बुद्धिस्था सङ्ग्राह्या । अन्यक्रियावदिति पटादिक्रियादृष्टान्तः । साध्ये स्वपदं पक्षभूतक्रियापरम् । न तु समभिव्याहृतपरम् । **स्वान्यत्** पक्षीभूतघटादिक्रियातोऽन्यत् यदवयविकालीनं अवयविकाले वर्तमानं तत्त्वानधिकरणभूता किञ्चित्कालीना या क्रिया तदन्येत्यर्थः । उक्तविशेषणविशिष्टा क्रिया पक्षीभूतघटादिक्रिया भवति तदन्यत्वेन दृष्टान्ते साध्यानुगमः । पक्षे च स्वस्य स्वान्यत्वस्य बाधात् तादृशपरमाणुक्रियारूपक्रियान्तरान्यत्वमादायैव साध्यपर्यवसानं कार्यम् । तथा चावयविकालीनत्वरहितकिञ्चित्कालीनक्रियासिद्धौ सर्वावयविनाशयुक्तः कालः कश्चन सिद्ध्यति । स एव प्रलय इति भावः । इतिशब्दस्य इत्यनुमानसिद्धत्वादिति पूर्वेणान्वयः । **स्वरूपतो विप्रकृष्टत्वादिति** । इन्द्रियायोग्यत्वादित्यर्थः । शरीरादिकमित्यादिपदेनेन्द्रियगृहारामादिग्रहः । अंशतो बाधभागासिद्ध्योर्निरासाय पक्षे देवदत्तेत्युक्तिः । साध्ये ईश्वरगुणजन्यत्वेन सिद्धसाधनतानिरासाय । विशेषपदमुद्देश्यार्थः । स च विशेषगुणो धर्मादिरेवेति भावः । कालाकाशादावव्यभिचाराय हेतौ सत्यन्तम् । चैत्रदेहादावव्यभिचाराय विशेष्यम् । **विचित्रकार्येति** । कार्ये वैचित्र्यस्यादृष्टवैचित्र्यहेतुकत्वादिति भावः । **ज्योतिष्टोमेनेति** । ज्योतिष्टोमनामको यागः स्वर्गसाधनमिति वाक्यार्थः । तृतीया लिङुक्तसाधनत्वानुवादिनी । **अवगुरेत्** वधोद्यमं कुर्यात् । शतेन यातयात् शतयातनाख्यनरके पतेदिति ब्राह्मणावगोरणं नरकसाधनमिति वाक्यार्थः । **श्रुतेति** । आशुविनाशिनो यागावगोरणादेः कालान्तरभाविफलहेतुत्वं फलपर्यन्तस्थायिधर्माधर्मौ विना न युक्तमिति तौ कल्पयतीत्यर्थः ।

गु०दी०— **इयं क्रिया स्वान्यावयविसमानकालीनत्वानधिकरणकिञ्चित्कालीनक्रियान्या** इत्यनुमानस्यायमर्थः । **इयं क्रिया** इदानीन्तनघटक्रिया । स्वपदेन घटक्रियैवोच्यते । तदन्यत्वे सत्यवयविसमानकालीनत्वस्यानधिकरणा किञ्चित्कालीना काचित्क्रिया तदन्यत्वसाधने स्वान्यत्वे सत्यवयविसमानकालीनत्वरूपविशिष्टस्य तदनधिकरणपदेन तस्यां क्रियायामभाव उक्तः स्यात् । स च स्वान्यत्वरूपविशेषणाभावान्न वक्तुं शक्यः । तस्यां क्रियायां स्वपदेनोक्तेदानीन्तनघटक्रियान्यत्वस्य निश्चितत्वात् । अतोऽस्याः क्रियायाः ततोऽन्यत्वसाधने सन्दिग्धावयविसमानकालीनत्वाख्यविशेष्याभावमादायैव पर्यवसितः स्यात् । तथा च तस्मिन्काले सर्वप्रलयसिद्धिरिति प्रतिज्ञांशस्यार्थः । दृष्टान्ते त्विदानीन्तनघटक्रियायां स्वपदेनोक्तस्वान्यत्वस्यैवाभावोऽस्ति । न तु अवयविसमानकालीनत्वरूपविशेष्यस्य । इदानीन्तनघटक्रियायाः पटाद्यवयविसमानकालीनत्वस्यैव निश्चितत्वात् । एवं न स्वान्यत्वरूपविशेषणाभावमादायैवेदानीन्तनघटक्रियायाः साध्यखण्डपर्यवसानं वाच्यम् । ततोऽन्यत्वं क्रियामात्रे वर्तत इति न दृष्टान्तस्यापि दौर्लभ्यमिति परस्याशयः ।

यादु०— अवयवानामावापोद्धारेण विश्वसन्तानस्याधुना नाशे सति पुनरारब्धत्वादर्थान्तरमित्यत उक्तम् **दृश्यसन्तानशून्यैरिति** । दृश्यसन्तानशून्याश्च सन्तानिनः प्रलयकालीना एवेति भावः । **आरणेयेति** । अरण्युत्पन्नवह्निसन्तानवदित्यर्थः । तत्र दृश्यवह्निसन्तानशून्यः सन्तानी अण्यन्तर्गतो वह्निरिति भावः । **पूर्वमुत्पादितेति** । अत्रैकदैकत्र मूर्तद्वयावस्थानासम्भवेन पूर्वोत्पन्नकार्ये सति अस्य ब्रह्माण्डान्तरस्यारम्भासम्भवात् तल्लयो लभ्यत इति द्रष्टव्यम् । **नित्यत्वे सतीति** । एकस्यैव पटादेस्तन्त्वादिना जननात् तत्र व्यभिचारवारणाय सत्यन्तं विशेषणम् । पारिमाण्डल्ये परममहत्परिमाणादौ च व्यभिचारवारणाय विशेष्यमिति ज्ञातव्यम् । **सर्व एवेति** । पार्थिवाः पाथसीयास्तैजसा वायवीयाश्चेत्यर्थः । एवं हि कार्यद्रव्यमात्रस्य लयो लभ्यते । सर्वपदानुपादाने तु परमाणुविशेषेषु तत्कार्यविशेषशून्यतामादाय साध्यपर्यवसानसम्भवादर्थान्तरता स्यादिति द्रष्टव्यम् । अत्र स्पर्शवन्त इत्यपि पूरणीयम् । अन्यथा मनस्यंशतो बाधापत्तेः । उपादेयपदस्य स्वोपादेयद्रव्यपरत्वात् । अन्यथा बाधापत्तेः । अवान्तरप्रलये गुणादेः सत्त्वात् । अन्योपादेयवत्त्वाभावेन सिद्धसाधनतापाताच्च । शून्यपदस्यात्यन्ताभावार्थकत्वे बाधवारणाय साध्ये कदाचिदित्युक्तम् । तेन कादाचित्काभाववत्त्वं साध्यमिति लभ्यते । अत एवारम्भकत्वादिति हेतुरुक्तः, अन्यथा प्रमेयत्वाद्येव हेतुतयोच्येतेति ध्येयम् । आरम्भकत्वं च द्रव्यसमवायिकारणत्वमेव विवक्षितम् । अन्यथा मनस्युक्तसाध्याभावेन व्यभिचारापत्तेरित्यवधेयम् । **नष्टपवनेति** । नष्टा ये पवनास्तदारम्भकपरमाणुवदित्यर्थः । **इयं क्रियेति** । वर्तमानक्रियेत्यर्थः । साध्ये स्वशब्देन पक्षीभूतवर्तमानक्रियैव ग्राह्या । एवं च स्वान्यद्यदवयविकालीनं तत्त्वानधिकरणा या किञ्चित्कालीनक्रिया तदन्यत्वं साध्यमित्यर्थः । **अन्यक्रियावदिति** । अतीतानागतक्रियावदित्यर्थः । अत्र पक्षीभूतवर्तमानक्रियाया अपि किञ्चित्कालीनक्रियात्वेन तत्र तदन्यत्वसाधने बाधः, अतोऽवयविकालीनत्वानधिकरणेति किञ्चित्कालीनक्रियाविशेषणम् । एवं चावयविकालीनत्वानधिकरणा या किञ्चित्कालीनक्रिया सा प्रलयकालीना परमाणुक्रियैव । न त्वन्या । तस्याः सर्वस्या अप्यवयविकालीनत्वात् । तदन्यत्वं च पक्षे पर्यवस्यतीति

न बाधः । तावत्येवोक्तेऽप्रसिद्धिः । अवयविकालीनत्वानधिकरणप्रलयकालीनक्रियाया इदानीमसिद्ध्या दृष्टान्ते तामादाय साध्यस्य ज्ञातुमशक्यत्वात् । अतः स्वान्येत्यवयविकालीनविशेषणम् । तथा च स्वान्ययदवयविकालीनं तत्त्वानधिकरणा किञ्चित्कालीना क्रिया पक्षीभूतैव, तस्यामवयविकालीनत्वविशेष्यसत्त्वेऽपि स्वान्यत्वरूपविशेषणाभावेन विशिष्टाभावसत्त्वात् । तदन्यत्वं च दृष्टान्तीभूतातीतादिक्रियास्वस्तीति नाप्रसिद्धिः । पक्षे च न तथा साध्यपर्यवसानं बाधात् । किन्त्ववयविकालीनत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभावेन प्रलयकालीनक्रियामादायैवेति प्रलयसिद्धिरिति ज्ञातव्यम् ।

देवदत्तेति । इदं चान्यदीयशरीरेंऽशतो बाधवारणाय, साध्ये चेश्वरज्ञानादिना सिद्धसाधनवारणाय । विशेषपदमुद्देश्यसिद्ध्यर्थम् । हेतौ च कालादौ व्यभिचारवारणाय कार्यपदम् । यज्ञदत्तशरीरे व्यभिचारं वारयितुं देवदत्तपदम् । यज्ञदत्तनिर्मितस्रगादौ देवदत्तभोगहेतुभूते पक्षसमत्वान्न व्यभिचार इति द्रष्टव्यम् । अत्र यः शरीरादिजनक आत्मविशेषगुणः स एव धर्मोऽधर्मश्च । प्रयत्नादीनामेतज्जन्मीयानामेतच्छरीराद्यजनकत्वाज्जन्मान्तरीयाणां तु न द्वारं विना हेतुता सम्भवतीत्यदृष्टसिद्धिरिति भावः । **विचित्रेति** । सुखदुःखादिरूपविचित्रकार्येत्यर्थः । **श्रुतसाध्यसाधनेति** । त्रिक्षणावस्थायिनि यागे श्रुतं कालान्तरभाविस्वर्गसाधनत्वं धर्मं विनाऽनुपपन्नम्, एवं त्रिक्षणावस्थायिनि ब्राह्मणावगुरणे कालान्तरभावियातनाकारणत्वं श्रुतमधर्मं विनाऽनुपपन्नमिति धर्माधर्मौ ताभ्यां कल्प्येते इत्यर्थः ।

कं०रा०— स्वान्येति । स्वान्यत्वे सति यदवयविकालीनत्वं तस्यानधिकरणं यत्किञ्चित्कालीना या क्रिया तदन्येत्यर्थः । अत्र स्वपदं पक्षीभूतक्रियामात्रपरं न तु समभिव्याहृतपरं तथा च पक्षीभूतघटक्रियाः स्वान्यत्वरूपविशेषणाभावेन स्वान्यत्वे सत्यवयविकालीनत्वं प्रत्यनधिकरणत्वाद्यत्किञ्चित्कालीनत्वाच्च तदन्यत्वमादाय दृष्टान्तीभूतपटादिक्रियायां साध्यमस्ति पक्षे साध्यपर्यवसानदशायां तु पक्षीभूतक्रियायाः स्वान्यत्वाभावेन स्वान्यत्वविशिष्टावयविकालीनत्वं प्रत्यनधिकरणत्वेऽपि तदन्यत्वस्य पक्षे बाधितया तदाशयसाध्यपर्यवसानस्यायोगादवयविकालीनत्वरूपविशेष्याभावे तस्यान्यत्वविशिष्टावयविकालीनत्वं प्रत्यनधिकरणं यावयविमात्रनाशरूपखण्डप्रलयकालीना क्रिया तदन्यत्वमादायैव साध्यं पर्यवस्यतीति खण्डप्रलयसिद्धिरिति भावः । **देवदत्तशरीरादिकमिति** । आदिशब्देन देवदत्तप्रयत्ननिर्मितं देवदत्तस्य भोगसाधनं कार्यजातं गृह्यते । तेन देवदत्तप्रयत्नजन्यस्याप्यादिशब्दग्राह्यत्वं(?)शतत्सिद्धसाधनम(?)कार्यदेवदत्तभोगसाधनयोस्तदग्राह्यत्वे तु तत्र हेत्वसिद्धिरिति दूषणमलग्नकमिति ध्येयम् । न च वाच्यं कार्यत्वे सति देवदत्तभोगहेतुत्वरूपस्योक्तसङ्ग्राह्यतावच्छेदकस्य पक्षतावच्छेदकत्वात् तस्यैव च हेतुत्वादन्वयव्याप्तिग्रहदशायामेवानुमानफलसिद्धेः सिद्धसाधनतेति उक्तसङ्ग्राह्यतावच्छेदके देवदत्तप्रयत्नाजन्यत्वस्याधिकस्य प्रवेशेन हेतुपक्षतावच्छेदकयोर्भिन्नत्वात् कार्यत्वे सतीति एतच्च देवदत्तभोगहेतौ गगनादौ व्यभिचारनिरासाय देवदत्तप्रयत्नाजन्यदेवदत्तभोगाहेतोः कार्यवस्तुनि तन्निरासायोत्तरदलं देवदत्तप्रयत्नजन्येति एतच्च स्वर्गादिरूपदृष्टान्ते देवदत्तविशेषगुणजन्यत्वरूपसाध्योपपादनार्थं स्रगादिकं च भोगहेतुत्वेन प्रसिद्धमिति तत्र हेतुरप्यस्तीति भावः । **यो ब्राह्मणायेति** । 'यः ब्राह्मणायावज्ञां कुर्यात् तं

शतसंवत्सरेण भोग्यां यातनामनुभावयेदि'त्यर्थः । अत्र ज्योतिष्टोमेनेत्यादिना श्रुतस्य स्वसाधनभावस्यानुपपत्त्या त्वधर्मसिद्धिरिति भावः ।

श्रीनिधि॰— **वर्तमानब्रह्माण्डपरमाणव इति** । वर्तमानं यद् ब्रह्माण्डं तदारम्भकपरमाणव इत्यर्थः । **उत्पादितसजातीयेति** । उत्पादनेन सजातीयेन इत्यर्थः । **तदारम्भकत्वात्** ब्रह्माण्डारम्भकत्वात् । अत्रत्यणुके व्यभिचारवारणाय सत्यन्तं आप्य परमाणुरूपादौ व्यभिचारवारणाय विशेष्यं **उपादेयप्रबन्धेति** । **उपादेयं** कार्यम् । **प्रबन्धः** समूहः । **स्वान्यावयविकालीनत्वानधिकरणकिञ्चित्क्रियान्येति** । स्वशब्देन पक्षे दृष्टान्ते च साध्योपपादनेऽपि पक्षीभूतक्रियैव ग्राह्या । स्वान्येत्यवयवकालीनविशेषणम् । द्वन्द्वान्ते श्रूयमाण-स्त्वप्रत्ययः प्रत्येकं सम्बध्यते । एवं च स्वान्यत्वानधिकरणत्वे सति अवयवकालीनत्वानधिकरणत्वे सति किञ्चित्कालीना या क्रिया तदन्येत्यर्थः । दोहनक्रियायां दृष्टान्तभूतायां किञ्चित्कालीनपक्षभूतभोजनक्रिया-न्यत्वमस्ति । सा च क्रियावयविकालीनत्वानधिकरणं न भवति भोजनसमये कार्यस्य सत्त्वात् । किन्तु स्वान्यत्वानधिकरणम् । न हि स्वस्मिन् स्वान्यत्वमस्ति विशेषणाभावप्रयुक्तो विशिष्टाभावः । पक्षे तु किञ्चित्कालीनक्रियान्यत्वं वक्तव्यम् । तत्र च क्रियान्यत्वमुच्यते तत्र स्वान्यतानधिकरणत्वं वक्तुं न शक्यत इति विशेषणाभावेन विशिष्टाभावः । किन्नाम विशेष्याभावेनैवेति प्रलयसिद्धिः । **विप्रकृष्टत्वादिति** । व्यवहितत्वादित्यर्थः ।

शे॰वा॰— ननु माऽस्तु प्रत्यक्षं लये मानं कुसुमाञ्जलिलीलावतीकारादिभिराशङ्कितमनुमानजातं तत्र मानं भविष्यतीत्याशङ्कते **अथेति** । नन्वनुपलम्भबाधितमनुमानजातं न तत्साधनायालमित्यतो नानुपलम्भ-मात्रमसत्त्वसाधकमतिप्रसङ्गात् । किन्तु योग्यानुपलम्भ एव । ततश्च प्रलयस्य कालान्तरभावितयेदानी-मसत्त्वेनायोग्यत्वान्न तदनुपलम्भेन तदभावसिद्धिरिति नोक्तदोष इत्याशयेनाह **कालेति** । **अङ्गीकरणीय इति** । तथा च नाप्रसिद्धविशेषणतेति भावः । **विश्वसन्तानोऽक्षमिति** । कार्यकारणोभयवर्तिधर्मवत्त्वं सन्तानत्वं, तच्च द्व्यणुकाद्यन्त्यावयविपर्यन्तमविशिष्टमिति लीलावतीवर्धमानः । सन्तनोतीति सन्तान इति कार्यमात्रमुच्यत इति तर्कचन्द्रिकाकारः । दृश्यशून्यत्वं परमाणोः सदैवेति न प्रलयसिद्धिरित्यतः सन्तानेति विशेषणम् । दृष्टसन्तान-शून्याश्च समवायिनः प्रलयकालीना एवेति तत्सिद्धिरिति भावः । **आरणेयेति** । अरण्युत्पन्नवह्निसन्तान-वदित्यर्थः । तत्र दृश्यसन्तानशून्यः समवाय्यरण्यन्तर्गतो वह्निरेवेति ज्ञेयम् । **वर्तमानेति** । ब्रह्माण्डस्य आगमसिद्धत्वान्नाश्रयासिद्धिरिति ध्येयम् । **पूर्वमिति** । अत्रैकत्र युगपन्मूर्तद्वयावस्थानासम्भवेन पूर्वोत्पन्नकार्ये सत्यन्यस्य ब्रह्माण्डस्यारम्भासम्भवात् तल्लयो लभ्यत इति प्रलयसिद्धिरिति भावः । अत्र तदारम्भकत्वमात्रं पूर्वमनुत्पादितपटैस्तन्तुभिरनैकान्तिकं स्यादित्यत उक्तं **नित्यत्वे सतीति** । नित्यत्वमात्रं च व्योमादिभि-रनैकान्तिकमिति तदारम्भकत्वादित्युक्तम् । प्रदीपपरमाणूनां तैजसद्रव्यत्वेन संसर्गिद्रव्यतयाऽऽरब्धतेजोजाती-

यत्वसिद्धौ दृष्टान्तत्वम् । न चाप्रयोजकत्वम् । निरुपाधिकत्वभङ्गप्रसङ्गस्य विपक्षबाधकत्वात् । न त्वागमो विपक्षबाधकः । तस्य कार्यद्रव्यानाधारकालाबोधकत्वादिति भावः । **सर्व एव परमाणव इति** । अत्र स्पर्शवन्त इत्यपि पक्षे विशेषणं देयम् । अन्यथा मनस्यस्पर्शवत्यंशतो बाधापत्तेः । उपादेयपदस्य स्वोपादेयद्रव्यपरत्वात् । अन्यथा बाधापत्तेः । गुणादिसत्त्वादन्योपादेयशून्यत्वाभावाच्च । शून्यपदस्य कादाचित्काभावपरत्वात् । अत एवारम्भकत्वादित्येव हेतुः । अन्यथा मेयत्वादित्येव क्रियेत । आरम्भकत्वं च द्रव्यसमवायिकारणत्वमेव विवक्षितम् । अन्यथोक्तसाध्याभाववति मनःप्रभृतौ व्यभिचारप्रसङ्गादिति ध्येयम् । नन्वेककालीनसमग्रोपादेयप्रबन्धशून्यत्वं वा साध्यत्वेनाभिमतं, समग्रोपादेयप्रबन्धशून्यत्वमेव वा । नाद्यः । अप्रसिद्धविशेषणत्वात् । नान्त्यः क्रमेण साध्यसिद्धौ सिद्धसाधनात् । पवनपरमाणूनामपि पक्षत्वेनांशे सिद्धसाधनं च । अपक्षत्वे च तेषामेव कार्यद्रव्यत्वेन प्रलयासिद्धेः । तत्कथमेतदिति चेदुच्यते । अत्रैककालीना इत्यपि विशेषणमेककालावच्छेदेन परमाणुमात्रे समग्रोपादेयप्रबन्धशून्यत्वलाभाय विवक्षितम् । ततश्चैककालीना इति विशेषणात् पक्षधर्मताबलादेककालीनत्वसिद्धौ साध्यस्य सिद्ध्या युक्ता प्रलयसिद्धिः । न च एकस्य द्वयमितिवत् पक्षविशेषणतयैककालीनत्वसाध्ययोः पक्षेऽन्वयबोध एवास्त्विति वाच्यम् । प्रमाणमहिम्ना बाधकं विनैकविशेषणावच्छेदेनापरविशेषणान्वयबोधनियमेन पक्षतावच्छेदकावच्छिन्ने साध्यस्य सिद्धेरनुमानेनाकलङ्कत्वात् । न चांशतः सिद्धसाधनम् । पक्षधर्मताबललभ्योद्देश्यप्रतीत्यसिद्ध्या तदप्रसङ्गात् । न च पक्षैकदेशत्वे दृष्टान्ताभावः । साध्यवत्तया निश्चितस्यैव तथात्वात् पक्षान्यत्वस्य वैयर्थ्यात् । तथापि न तस्य पक्षत्वं साध्यसन्देहसिसाधयिषयोरभावादिति चेन्न । येन रूपेण साध्यं निश्चितं तेन रूपेण तयोरभावेऽपि सामान्येन रूपेण तयोः सम्भवेन तत्त्वोपपत्तेरिति दिक् । **नष्टपवनेति** । नष्टा ये पवनास्तदारम्भकपरमाणुवदित्यर्थः । न च तेजोवद्वायोरपि संसर्गिद्रव्यतया तेनापि द्रव्यान्तरजनने दृष्टान्तस्य साध्यवैकल्यमिति वाच्यम् । पूर्वद्रव्यनाशकालीनस्य परमाणोः साध्यवत्तानिश्चयात् । **इयं क्रियेति** । अत्र वर्तमानक्रियायाः पक्षत्वमतीतानागतक्रिययोश्च दृष्टान्तत्वम् । साध्ये च स्वपदं वर्तमानक्रियामात्रपरम् । स्वान्यद्यदवयविकालीनं, तस्य भावः स्वान्यावयविकालीनत्वम् । तदनधिकरणभूता यत्किञ्चित्कालीनक्रिया तदन्यत्वमिति साध्यार्थः । अत्र पक्षीभूतवर्तमानक्रियाया अपि किञ्चित्कालीनक्रियात्वात् तदन्यत्वसाधने बाधवारणाय अवयविकालीनत्वानधिकरणेति किञ्चित्कालीनक्रियाविशेषणम् । परमते क्रियामात्रत्वस्यावयविकालीनत्वेन अवयविकालीनत्वानधिकरणक्रियाया अप्रसिद्धेरप्रसिद्धिवारणाय स्वान्यत्वेनावयविकालीनक्रियां विशिनष्टि । एवञ्च नाप्रसिद्धिः । स्वान्यत्वरूपविशेषणाभावप्रयुक्तस्वान्यावयविकालीनत्वरूपविशिष्टाभाववत् पक्षीभूतवर्तमानक्रियान्यत्वस्य अतीतादिक्रियायां सत्त्वेन दृष्टान्ते साध्यस्य सत्त्वात् । स्वान्यत्वरूपविशेषणाभावप्रयुक्तस्वान्यावयविकालीनरूपविशिष्टाभावस्य वर्तमानक्रियामात्रनिष्ठत्वेन तदन्यत्वरूपसाध्यस्य च तत्र बाधितत्वेन हेतोः पक्षधर्मताबलादवयविकालीनत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभाववत् किञ्चित्कालीनक्रियामादायैव तदन्यत्वस्य पक्षे सिद्धिरिति प्रलयसिद्धिरिति ध्येयम् ।

देवदत्तशरीरादिकमिति । अत्र देवदत्तपदमन्यदीयशरीरे अंशतो बाधवारणाय । आद्यत्वेन चात्र शरीरं विशेषणीयम् । अन्यथा देवदत्ततरुणशरीरादौ देवदत्तप्रयत्नजन्यत्वेन सिद्धसाधनत्वप्रसङ्गात् । ईश्वरज्ञानमादायार्थान्तरं परिहर्तुं साध्ये देवदत्तपदम् । देवदत्तपरिमाणादिनाऽर्थान्तरवारणाय विशेषपदम् । न च बाधादेव नार्थान्तरमिति वाच्यम् । बाधस्फोरणायैव तदुपादानात् । वस्तुतस्तूद्देश्यसिद्ध्यर्थमेवात्र तदुपादानम् । न चैवमपि जन्मान्तरीयज्ञानजन्यसंस्कारेणार्थान्तरमिति वाच्यम् । संस्कारान्यत्वेनापि विशेषगुणस्य विशेषणात् । संस्काराजन्यत्वस्य पक्षविशेषणत्वेनाभिप्रेतत्वात् न संस्कारेणार्थान्तरमित्यपि केचित् । हेतौ च मनआदौ व्यभिचारं वारयितुं सत्यन्तम् । यज्ञदत्तशरीरादौ व्यभिचारवारणाय देवदत्तेत्याद्युत्तरभागः । देवदत्तभोगसाधनद्रव्यत्वं च तदर्थोऽभिमतः । अन्यथा आत्ममनःसंयोगादौ व्यभिचाराप्रसङ्गात् । न चैवमपि यज्ञदत्तनिर्मितस्रगादेर्देवदत्तभोगहेतुद्रव्यतया तत्र व्यभिचार इति वाच्यम् । तस्य पक्षत्वेन तदप्रसङ्गात् । देवदत्तनिर्मितेत्युपलक्षणम् । तद्भोगहेतुश्चेत्यपि द्रष्टव्यम् । तदेवमुक्तानुमानेन शरीरादिजनकतया आत्मविशेषगुणसिद्धौ प्रयत्नादिरूपस्य तस्यैतज्जन्मस्थस्याभावात् । जन्मान्तरस्य च नष्टस्य द्वारं विना हेतुत्वानिर्वाहात् । अदृष्टस्यैव तद्द्वारतया कल्पनीयत्वेनावश्यकत्वात् । अदृष्टमेव धर्माधर्मसंज्ञितं तज्जनकमेष्टव्यमित्यपूर्वसिद्धिरित्यवधेयम् । **विचित्रकार्येति** । अस्ति चेह खलु जीवानामन्योन्यं सुरासुरनरतिर्यगादिरूपवैचित्र्यम् । न चेदं निर्निमित्तं सम्भवति । न चादृष्टवैचित्र्यमपि निर्निमित्तमिति शङ्क्यम् । तत्पूर्वादृष्टवैचित्र्यादेव तदुपपत्तेः । तदपि तत्पूर्वादृष्टवैचित्र्यादेवेत्यनादिरियं परम्परेत्यदोषः । ज्योतिष्टोमेनेत्यादित्रिक्षणावस्थायिनि यागादौ श्रुतं कालान्तरभाविस्वर्गसाधनत्वं धर्मं विनाऽनुपपन्नम् । एवं त्रिक्षणावस्थायिनि ब्रह्मावगुरणे कालान्तरभावियातनाकारणत्वं श्रुतं अधर्मं विनाऽनुपपन्नमिति धर्माधर्मौ ताभ्यां कल्प्येते इत्यर्थः । अयं भावः । यजेतेत्युक्ते शब्दभावनाभाव्यत्वेन पुंप्रवृत्तिलक्षणार्थभावनाप्रतीतेः । तस्याश्च भाव्यकरणेतिकर्तव्यतारूपांशत्रयसापेक्षत्वात् समानपदोपात्तस्यापि यागस्य स्वयं क्लेशरूपत्वेन भाव्यत्वेनान्वयासम्भवात् । भिन्नपदोपात्तस्यापि स्वर्गस्य भाव्यत्वेन यागस्य च करणत्वेन प्रयाजादेरितिकर्तव्यतात्वेन सम्बन्धस्य वक्तव्यत्वात् क्षणभङ्गुरस्य यागस्य च कालान्तरभाविफलसाधनत्वानुपपत्तेः श्रुतसाध्यसाधनभावोपपत्त्यर्थं परमतेऽपूर्वकल्पनम् । ग्रन्थकृन्मते त्विष्टसाधनत्वमात्रस्यैव विध्यर्थत्वात् लिङा स्वप्रकृतियज्यर्थयागस्य स्वर्गरूपेष्टसाधनत्वमुच्यते । तच्च शक्त्याख्यमतीन्द्रियं धर्मान्तरमेव । तच्च क्वचिदन्वयव्यतिरेकाभ्यामुन्नीयते क्वचिच्छब्देन । तदाश्रयस्य च शक्तस्य कार्ये कादाचित्कत्वनियामकत्वं न व्यवहितस्य । कार्यसातत्यप्रसक्तेरित्यव्यवधानमावश्यकम् । तच्चाव्यवधानं ध्वस्तस्य यागस्य न साक्षात्सम्भवतीति व्यापारद्वारेणाव्यवधानं वक्तव्यमिति द्वारान्तरानिरूपणात् द्वारीभूतापूर्वसिद्धिरिति मन्तव्यम् ।

वा०४०— कुसुमाञ्जलिलीलावतीकारादिभिरिति । आदिपदेन .... ग्रहणम् । अत्राभिहितामिति पाठो मूलकोशानुसारी । अभिधानं च नैकप्रकारम् । कुसुमाञ्जलिकृता सर्गादावेव किं प्रमाणमिति चेत् इत्याद्याशङ्क्य विश्वसन्तानोऽयं इत्यनुमानस्य वर्तमानब्रह्माण्ड इति । द्वितीयस्य चानुमानस्य सिद्धान्ततयैवाभि-

धानात् । लीलावत्यां तु स नास्ति प्रमाणाभावात् इत्येके इत्यादि पूर्वपक्षग्रन्थे विश्वसन्तानोऽयं इत्युदाहृतानुमानद्वयं सर्वे सन्तानाः इत्येतत्तृतीयं चानुमानमुदाहृत्य निराकृत्य स एव परमाणवः भूगोलकसन्तानाः इत्येतदनुमानद्वयस्य च सिद्धान्ततया अभिहितत्वात् । कुसुमाञ्जलिवर्धमानकृता च एककालीनाः सर्वे परमाणवः कदाचित्समग्रोपादेयप्रबन्धशून्याः इत्यनुमानस्याशङ्क्य दूषणात् । इयं च क्रियेत्यनुमानं च ......भिहितत्वात् इति विवेको बोध्यः । आशङ्कितमिति पाठेऽपि विश्वसन्तानोऽयं इत्याद्यनुमानद्वारेणैतदनुमानं साधकत्वेनोक्तं तत्तदनुमानं अत्र तैः प्रलयसाधकत्वेनाशङ्क्य तया प्राप्तमिति योज्यम् । केचित्तु उक्तरीत्या लीलावत्यामाशङ्क्यानुमानत्रयस्यास्तीति छत्रिन्यायेन शङ्कितत्वोक्तिः इत्यप्याहुः । **अनुपलम्भेति** । प्रत्यक्षेण प्रलयानुपलक्षणेत्यर्थः । **कालान्तरभावितया** इत्यादिना कालविप्रकर्षात् इत्येतत् विवृतम् । **द्व्यणुकादि अन्त्यावयवीति** । द्व्यणुकमारभ्यान्त्यावयवीत्यर्थः । परमाणुषु कारणधर्ममात्रस्यान्त्यावयविनि च धर्ममात्रस्य सत्त्वेन उभयधर्मराहित्यादिति भावः । **कार्यमात्रमिति** । तस्यैव विवर्तत्वादिति भावः । **दृश्यशून्यत्वमिति** । दृश्यं यत् रूपादि तच्छून्यत्वमित्यर्थः । **सदैवेति** । सन्तानेन विशेषितं इत्येव लीलावतीवर्धमानोक्तावपि विवरणार्थं न प्रलयेत्याद्यधिकम् । **तत्सिद्धिरिति** । प्रलयसिद्धिरित्यर्थः । ब्रह्माण्डस्यागमेति कुसुमाञ्जलिवर्धमानानुसारेणाह **ब्रह्माण्डस्येति** । **पूर्वमुत्पादितेति** । साध्यस्य सजातीयब्रह्माण्डसद्भावमादायापि पर्यवसानोपपत्तेः । न लयसिद्धिः इत्यतः प्रलयपर्यवसानमुपपादयति **अत्रैकत्रेति** । **युगपदिति** । पूर्वब्रह्माण्डावष्टब्धं देश एव हि ब्रह्माण्डान्तरं सजातीयमस्तीत्यङ्गीकार्यम् । तथा च एकत्रैव एकदैव तदुभयसत्त्वं न सम्भवतीत्यर्थः । मूर्तानां तु सामानाधिकरण्यानुपपत्तिं टीकाकृदेव तत्रतत्रोपपादितवान् इति ज्ञेयम् । कुसुमाञ्जलिवर्धमानानुसारेण हेतुविशेषणकृत्यान्याह **अत्र तदारम्भकत्वमात्रमित्यादिना** । कुसुमाञ्जलिस्थ एवायं हेतुः । लीलावत्यां तु परमाणुत्वात् इत्येव हेतुकृतम् । **व्योमादिभिरिति** । ननु व्योमादेरपि शब्दारम्भकतया साध्यस्यापि सत्त्वात् कथं व्यभिचार इति चेत् । न हेतुसाध्ययोः द्रव्यारम्भकत्वस्यैव विवक्षणेन व्योमादेः तादृशत्वाभावात् इत्यवधेयम् । उक्तानुसारेण दृष्टान्तमुपपादयति **प्रदीपेति** । **संसर्गिद्रव्यतयेति** । संसर्गिद्रव्यं नाम पूर्वोत्पादितकार्यनाशोत्तरकार्यसामग्र्योः एककालीनत्वेन पूर्वोत्पादितद्रव्यनाशक्षण एव कार्यान्तरोत्पादकत्वम् । तच्च तेजोवाय्वोरेव । तथा च प्रदीपपरमाणूनां तैजसद्रव्यत्वेन प्रतीयमानसन्तानसजातीयसन्तानान्तरस्य पूर्वमुत्पादितस्य विनाशे सिद्धे पूर्वमुत्पादितेति (?) साध्यत्वात् प्रदीपपरमाणूनां दृष्टान्तत्वमुक्तम् । तन्तूनामपि पटासंयोगनाशेन स्वकार्यपटनाशः पश्चात् पुनः कुविन्दादिव्यापारेण पटान्तरजनकता तत्र पूर्वमुत्पादितसजातीयसन्तानान्तरत्वेऽपि पूर्वमनुत्पादितपटानां तेषां तथात्वाभावात् व्यभिचार इत्याशयेनैव पूर्वमनुत्पादितपटैरिति विशेषणं प्राक् कृतम् । परन्तु तन्तूनां न संसर्गिद्रव्यता पूर्वोत्पादितपटनाशलक्षण एव उत्तरपटजननाभावात् । प्रदीपपवनपरमा(?) एवास्तु तथाविधकार्यजनकतास्त्येत्येव । तथानुभवात् । मूर्तानां सामानाधिकरण्यानुपपत्त्या ब्रह्माण्डद्वयावस्थानायोगेन प्रलयसिद्धिस्वीकारेऽपि संसर्गद्रव्यगतकार्यद्रव्ययोः अन्योन्यं स्थितिक्षणे समवायिनि असत्त्वमात्रेण सामानाधिकरण्याभावः । पूर्वनाशक्षणे उत्पत्तिमतः एकक्षणावच्छेदेन समवायिनि सत्त्वेऽपि तस्य मूर्तसामानाधिकरण्याभावाविरोधित्वात् । अन्ततः पूर्वोत्पादितकार्यनाशोत्तरक्षणे कार्यान्तरोत्पादस्थल इव तन्नाशक्षणे

तदुत्पादेऽपि तत्स्थित्यभावेन तस्योत्तरकार्यानधिकरणत्वविवक्षया पूर्वोत्पादितकार्यनाशाधिकरणक्षणत्वविवक्षया चोत्तरकार्यसम्बन्धाभावेऽपि व्यवहर्तुमुचितः । अत एव सर्व एव परमाणवः इत्येतत् अनुमानीयनष्टपवनारम्भक-परमाणुरूपदृष्टान्ते साध्यभूतसमग्रोपादेयप्रबन्धशून्यत्वोपपादनाय न च तेजोवत् वायोरपि संसर्गद्रव्यतया इत्याद्याशङ्क्य पूर्वद्रव्यनाशकालीनस्य परमाणोः समग्रोपादेयप्रबन्धशून्यत्वनिश्चय इति कुसुमाञ्जलिवर्धमान-कारेणोक्तम् । अत एव तदनुमानीयनष्टेति दृष्टान्तोपपादनावसरे टीकाकृत् तथैवोपपादयिष्यति इत्यादिकम् । प्रदीपादौ कार्यनाशतदारम्भयोः एककालत्वानुभवबलात् कल्पनीयमित्याभाति । आज्यस्य संसर्गिद्रव्यतया च दृश्यत्वादिकं साक्षात् न सम्भवतीति पात्रद्वारैव सम्पाद्यमिति तु ....अधिकरणे निरूपितम् । .... **तस्य कार्येति** । यद्यपि प्रलयबोधकागमसत्त्वादिदमयुक्तम् । तथापि तदनाधारत्वेन तत्कालबोधकत्वादित्यर्थः । तथैव वर्धमानठक्कुरेणाभिधानात् । मकरन्देऽपि रुचिदत्तेनापि उक्तार्थमुक्त्वा आहुरित्येकैवोक्तेश्चेति ज्ञेयम् । आगमस्य तद्बोधकत्वे चानुमानवैय्यर्थ्यमिति भावः । यद्वा एककालीनाः सर्वे परमाणवः इत्येतत् शब्दखण्डमणि-स्थानुमानव्याख्यानरूपरुचिदत्तधर्मराज्याद्यनुसारेणाह **अत्र स्पर्शवन्त इत्यपीत्यादिना ध्येयमित्यन्तेन ग्रन्थेन** । **अन्यथेति** । सर्वे परमाणवः इत्येवोक्तं मनसोऽपि परमाणुपदार्थत्वेन तस्यापि सङ्ग्रहप्राप्तेः इत्याशयः । न च द्व्यणुकारम्भकस्यैव विवक्षणात् न मनःप्रसङ्ग इति वाच्यम् । स्पर्शवत्त्वापेक्षया विशेषाभावात् । प्रत्युत अस्यैव अलघुत्वादिति ज्ञेयम् । बाधपदं भागासिद्धेरपि उपलक्षणम् । ननु मनसोऽपि मृदाद्युपादेयघटादिसम्बन्धवतः तच्छून्यत्वस्यापि सम्भवात् नानुपपत्तिरित्यतोऽत्र उपादेयपदस्य स्वोपादेयद्रव्यपरत्वेन मनसश्च तदभावात् न तत्सम्बन्धशून्यता इत्याशयेनोक्तं **स्वोपादेयेत्यादि** । स्वगुणादीनामपि स्वोपादेयतया तत्सम्बन्ध-शून्यतोपपत्तिरित्याशङ्कावारणाय द्रव्यपदम् । ततश्चात्र नास्त्येवेति भावः । स्वपदद्रव्यपदपरित्यागे बाधकमाह **अन्यथेति** । द्रव्यपदाभावे । तमुपपादयति **गुणादीति** । स्वपदाभावे तमुपपादयति **अन्येति** । तच्छून्यत्वस्य तदत्यन्ताभावोपेतत्वपरत्वे तस्य मनस्यपि सत्त्वं इत्यत आह **शून्यपदस्येति** । **कादाचित्केति** । अत्यन्ता-भावव्यावृत्तिः । प्रागभावप्रध्वंसौ च कादाचित्काभावौ विवक्षितौ । यत् वक्ष्यति एतत् अनुमानदूषणावसरे घटध्वंसाद्यनधिकरणत्वेन इति । न च प्रतियोगिसमानदेशौ मनसि स्तः इति भावः । अत्यन्ताभावविवक्षायां आरम्भकत्वहेतोः व्याघातप्रसङ्गश्च । ततः साध्यस्य हेतुत्वानुगुण्यार्थं प्राक् प्रध्वंसाभावपरत्वमेवाङ्गीकार्यमित्याह **अत एवेति** । हेत्वन्तरानिरूपणात् उक्तहेत्वाश्रयणम्, न तु तदानुगुण्यं अपेक्षितं इत्यत आह **अन्यथेति** । मनःप्रभृतिग्रहणेन आकाशादेरेवोपादेयशून्यग्रहणम् । अत एव कुसुमाञ्जलिवर्धमानठक्कुरेण तेन नाकाशादा-वित्येवोक्तम् इति । ननु एककालीनसमयेत्यादि लीलावतिवर्धमानानुसारेण वर्धमानग्रन्थमपि विवृण्वन् आह **नन्वेककालीनेत्यादिना दिगित्यन्तेन** । **क्रमेणेति** । क्रमेण जायमानतत्तत्कालीनोपादेयसम्बन्धशून्यत्वा-न्यापादनीयसमग्रेत्युक्तसाध्यसिद्धेरित्यर्थः । **पक्षता चेति** । **सिद्धायामिति** । सिद्धं आपादनं इत्यादाविव निष्पत्तिरत्र सिद्धिशब्दार्थः । ततश्च निष्पन्नायामित्यर्थः । न च एकस्य द्वयं इतीति पाठः । एककालीनत्व-रूपविशेषणावच्छिन्नसाध्यसिद्धिर्न सम्भवति । पक्षे एककालीनत्वविशेषणस्येव साध्यस्यापि सद्भावप्राप्तावपि तदवच्छिन्नस्य तस्यासिद्धेः । श्यामे रक्तरूपं इत्यभिहिते श्यामतावच्छेदेन रक्तरूपाप्राप्तेः दर्शनादित्याशयः ।

बाधकं विनेति । श्यामत्वावच्छिन्नस्य सिद्धेः । श्यामे रक्तरूपयोश्च विरोधात् एकावच्छेदेन नापरसत्त्वबोधः इति भावः । **पक्षान्यत्वस्येति** । निश्चितसाध्यवत्वमेव दृष्टान्तत्वे प्रयोजकम् । न तु पक्षान्यत्वमिति भावः । नष्टत्वस्य परमाणुविशेषणताभ्रान्तिवारणायाह **नष्टा ये पवना इति** । उक्तठकूरानुसारेणाह **न च तेजोवदिति** । **अत्र पक्षीभूतेति** । पक्षीभूतायाः क्रियायाः अपि यत्किञ्चित्कालीनक्रियात्वेन तदन्यत्वस्य तत्र बाधितत्वेन यत्किञ्चित्कालीनक्रियान्यत्वमात्रस्य साध्यतानुपपत्तौ प्राप्तायां पक्षीभूतक्रियायाः अवयविकालीनत्वेनावयविकालीनत्वानधिकरणाभावेन अवयविकालीनत्वानधिकरणं यत्किञ्चित्कालीनक्रियात्वाभावेन तदन्यतायाः उपपत्तेर्न बाध इति बाधनिवारकावयविकालीनत्वानधिकरणेति विशेषणे उपात्तेऽपि सर्वस्यापि क्रियायाः अवयविकालीनत्वेनावयवकालीनत्वाधिकरणत्वाभावेन तादृशयत्किञ्चित्कालीनक्रियाया एवाप्रसिद्ध्या तदन्यत्वस्य दृष्टान्ते अवगन्तुमशक्यत्वात् अप्रसिद्धिरित्यतः स्वान्यत्वेन विशेषणे कृते स्वान्यात् यत् अवयवकालीनत्वानधिकरण यत्किञ्चित्कालीनक्रियान्यत्वाभावात् वर्तमानक्रियाया एव स्वान्यावयवकालीनभूतातीतानागतक्रियात्वानधिकरणयत्किञ्चित्कालीनक्रियात्वेन तस्याः अप्रसिद्ध्यभावेन तदन्यत्वस्यातीतानागतक्रिययोरेव प्रसिद्धेः अप्रसिद्ध्यभाव इति सिद्धे उक्तरीत्या वर्तमानक्रियायाः स्वान्यत्वरूपविशेषणाभावप्रयुक्तस्वान्यावयविकालीनत्वानधिकरणतया तादृशयत्किञ्चित्कालीनक्रियामादाय तदन्यत्वस्य दृष्टान्ते वक्तुं शक्यत्वेऽपि उक्तकिञ्चित्कालीनक्रियारूपायाः स्वस्या एव तदन्यत्वानुपपत्त्या पक्षे उक्तरीत्या साध्यपर्यवसानानुपपत्तेः स्वान्यत्वरूपविशेषणाभावेन एतद्विशेष्यभूतावयविकालीनत्वाभावेनापि विशिष्टाभावस्यात्र विवक्षणेन हेतोः पक्षधर्मताबलात् उक्तं साध्यं पक्षे पर्यवस्यन् स्वान्यस्याः कस्याश्चित्क्रियायाः स्वान्यत्वेऽपि अवयविकालीनत्वाभावेन । विशिष्टानधिकरणत्वमादाय तादृशयत्किञ्चित्कालीनक्रियान्यत्वमादायैव पर्यवस्यतीति तादृशक्रियासिद्धौ तदाश्रयकालस्य एवात्र प्रलयत्वेनाभिप्रेतत्वात् युक्ता सिद्धिरित्याखण्डनार्थः । अवयविकालीनत्वानधिकरणेति किञ्चित्कालीनेति अविभक्तिक एव पाठः । करणमितीति तु लेखकागतम् । सविभक्तिकत्वेऽपि न यथाश्रुतानुवादः अपि तु अर्थानुवादः इत्यदोषः इत्यप्याहुः । **स्वान्यत्वरूपेति** । **अवयविकालीनत्वरूपविशेष्येति च** । यद्यपि चान्यत् यदवयविकालीनं इति टीकोदाहृतविग्रहानुसारेण स्वान्यत्तु अवयविकालीनं एवं विशेषणं विशेष्यं च प्राप्तम् । तथापि विशेष्यभूताद्यवयविकालीनावयविकालीनत्वरूपधर्माभिधानं ओतत्ववाचीत्यादाविवाश्रित्य तथाभिधानम् । उक्तविग्रहानन्तरं तस्य भाव इत्युक्ते स्वान्यत्वविशेषणमेवावयविकालीनत्वं विशेष्यमिति पर्यवसानात् तथोक्तिरिति वा । तर्कभाषीयमुरारिभट्टानुसारेण कृत्यान्याह **अत्र देवदत्तमित्यादिना** । उद्देश्यसिद्ध्यर्थमेवात्र तदुपादानमित्यन्तेन । **तदुपादानात्** विशेषपदोपादानात् । किरणावलिवर्धमानरुचिदत्ताद्यनुसारेण लीलावत्याद्यनुसारेण चाह **न चैवमपीत्यादि** । मुरारिभट्टानुसारेणैवाह **हेतौ चेति** । प्रयत्नजन्यत्वं च प्रयत्नविशिष्टपुरुषजन्यत्वमेव पर्यवसानमाश्रित्य यज्ञदत्तप्रयत्नजन्येत्यर्थे यज्ञदत्तनिर्मितेति पदं प्रयुक्तम् । मूले साध्योक्तावपि हेत्वनुक्तिरित्यत आह **देवदत्तेति** । **निर्मितेति** । **उपलक्षणं** इत्यपि पर्यवसानमाश्रित्यैवेति ज्ञेयम् । तत् खलु स्वर्गनरकादिहेतुरिति न्यायवाचस्पतिं आदिपदेन तिर्यकादेः ग्रहणमिति निषेधं मनसि कृत्वा .... इत्याद्यनुसारेणाह **अस्ति चेह खल्विति** । **इत्यदोष** इत्यनन्तरमिति द्रष्टव्यमिति पूरणीयम् । ब्रह्मशब्दस्य ब्रह्मकुलेत्यादौ ब्राह्मणेऽपि प्रयोगात् उक्तं

ब्रह्मावगुरण इति । जिज्ञासानय ......अनुसारेणाह **अयं भाव इति** । **शब्दभावनेति** । पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शब्दभावनात् जन्या या पुंप्रवृत्तिः यागादौ पुरुषप्रयत्नरूपा तल्लक्षणभावनाप्रतीतेरित्यर्थः । **परेति** । मीमांसक इत्यर्थः । उदयनोक्ताभिप्रायनिबन्धनत्वभङ्गे लिङ्गान्तरस्वप्रकृतियज्यार्थमात्रगतेष्टसाधनत्वेऽभिमतेऽपि यागविशेषेति तर्कताण्डवानुसारेण विध्यर्थं तावदाह **इष्टसाधनत्वमात्रस्यैवेति** । स्वमते अपूर्वस्य कल्प्यत्वसमर्थनस्थलीयतर्कताण्डवानुसारेणाह **तत्र शक्त्याख्यं अतीन्द्रियं धर्मान्तरमेवेत्यादि व्यवधानं वक्तव्यं इत्यन्तेन** । **शक्त्याख्यं अतीन्द्रियं धर्मान्तरमिति** । लिङ्गपादे 'शक्तिसद्भाव एव तु' इत्येतत् अनुव्याख्यानव्याख्यानावसरे ततोऽतीन्द्रियमेव किञ्चित् मृदादीनां घटादिकारणत्वं अभ्युपगमनीयम् । तदेव शक्तिरिति शक्तिवादिभिः अभ्युपेयत इति उपसंहृतत्वादिति भावः । **अपूर्वसिद्धिः** इत्येव पाठः । इत्ययं भाव इति पूर्वेणान्वयः । मन्तव्यं इत्यधिकं लेखकागतम् ।

स०व्रं०— कालस्य साक्षिसिद्धत्वेनैन्द्रियकत्वोपपादनेन स्वरूपतो विप्रकृष्टत्वानुपपत्तेः 'कालविप्रकर्षात्' इत्युक्तम् । दृश्यसन्तानशून्यावस्थैव प्रलयकाल इति प्रथमस्योपयोगः । पूर्वमुत्पादितो योऽयं सन्तानः तत्सजातीयसन्तानान्तरं येषामिति विग्रहः । पूर्वमुत्पादितसन्तानाशे एव प्रलय इति भावः । नित्यत्वविशेषणं मृत्पिण्डादौ व्यभिचारपरिहारार्थम् । **इयं क्रियेति** । अत्र वर्तमानक्रियायाः पक्षत्वम् । अतीतानागतक्रियायाश्च दृष्टान्तत्वम् । स्वशब्देन वर्तमानक्रिया, स्वान्यत् यदवयविकालीनं तस्य भावः स्वान्यावयविकालीनत्वम् । तदनधिकरणभूता या यत्किञ्चित्कालीना क्रिया तदन्यत्वमिति साध्यम् । अत्र स्वान्यत्वरूपविशेषणाभावप्रयुक्तस्य अन्यावयविकालीनत्वरूपविशिष्टाभावस्य वर्तमानक्रियामात्रनिष्ठत्वेन तदन्यत्वरूपसाध्यस्य च तत्र बाधितत्वेन हेतोः पक्षधर्मताबलात् अवयविकालीनत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभाववत् किञ्चित्कालीनक्रियामादायैव तदन्यत्वरूपसाध्यस्य पक्षे सिद्धिरिति प्रलयसिद्धिरिति ।

विठ्ठल०— **विश्वसन्तानोऽयमिति** । समस्तकार्यप्रवाह इत्यर्थः । दृश्यसन्तानस्त्र्यणुकादिकार्यम् । तच्छून्यैस्तदभावकालीनैः समवायिभिरारब्ध इत्यर्थः । **अवयवानामागमोद्धारेण** विश्वसन्तानस्याधुना नाशे सति पुनरारब्धत्वादर्थान्तरमित्यत उक्तं **दृश्यसन्तानशून्यैरिति** । दृश्यसन्तानशून्यसन्तानाश्च प्रलयकालीना एवेति प्रलयसिद्धिरिति भावः । **आरणेयेति** । अरणिजवह्निसन्तानवदित्यर्थः । अत्र दृश्यसन्तानशून्यारण्यन्तर्गतसन्तानवान् वह्निरिति भावः । सजातीयसन्तानान्तरं ब्रह्माण्ड एव । अत्र एकदा मूर्तद्वयावस्थानासम्भवेन पूर्वमुत्पन्नसजातीयसन्तानान्तरस्य लयोऽङ्गीकरणीय इति द्रष्टव्यम् । एकस्यैव पटादेस्तन्त्वादिना जननात् तत्र व्यभिचारवारणाय नित्यत्वे सतीत्युक्तम् । पारमाण्डिल्ये परममहत्परिमाणादौ तद्वारणाय **आरम्भकत्वादिति** । **सर्वे सन्ताना इति** । सर्वकार्यप्रवाहोऽपीत्यर्थः । अत्र सर्वत्रापि सन्तानशब्देन कार्यजातमेव विवक्षितम् । स तु क्षणिकवाद्यभ्युपगतसन्तान इति ज्ञेयम् । **प्रदीपेति** । प्रतिक्षणे परिमाणाद्भिद्यते दीपरूपं कार्यमिति सर्ववाद्यभिमतस्य यथा कदाचित्सर्वा स्थितिः तथेत्यर्थः । **सर्व एवेति** । आकाशातिरिक्तभूतपरमाणव

इत्यर्थः । **समग्रोपादेयं** समग्रं द्व्यणुकत्र्यणुकादिकार्यं तत्सम्बन्धशून्याः केवलं परमाणुमात्रत्वावस्थयैव स्थितिः इति यावत् । **नष्टपवनेति** । पवननाशे तत्र परमाणुपर्यन्तं समस्तोपादेयनाशस्य सिद्धित्वादिति भावः । **भूगोलकेति** । प्राक्सर्वेऽपि सन्ताना इत्यत्र सर्वं पक्षीकृतम् । इदानीं भूमण्डलमात्रमिति स्फुटो भेदः । अत्र यदा उच्छित्तिः स कालः प्रलयकाल इति सिद्धम् । विशिष्टव्यतिरेक्यनुमानमप्याह **इयं क्रियेति** । अत्र स्वान्यावयविकालीनविशेषणम् । स्वशब्देन पक्षीभूतक्रियैवोच्यते । अवयविशब्देन च कार्यद्रव्यं ततश्चाय-मर्थः । पक्षीभूतक्रियान्यत्वे सति यत्कार्यं द्रव्यकालीनतत्त्वानधिकरणभूताया या क्रिया यत्किञ्चित्कालीनक्रिया तदन्येति । समुदायार्थस्तु पटक्रियाघटक्रियान्यकार्यद्रव्यकालीनत्वानधिकरणयत्किञ्चित्कालीनक्रियाभिन्ना क्रिया-त्वादन्यक्रियावत् अत्र स्वान्यावयवकालीनत्वं विशिष्टम् । तत्र स्वान्यत्वविशेषणाभावप्रयुक्तं विशिष्टाभावमादाय दृष्टान्ते साध्यपर्यवसानम् । तथा हि । घटक्रिया तावद्घटक्रियान्यावयविकालीनत्वानधिकरणं भवति । घटक्रियायामवयविकालीनत्वस्य विशेष्यस्य सत्त्वेऽपि घटक्रियान्यत्वस्य विशेषणस्याभावात् । सा किञ्चि-त्कालीनक्रिया च भवति । तदन्या च क्रियेति पक्षे तु विशेष्याभावप्रयुक्तं विशिष्टभावमादाय साध्यपर्यव-सानम् । तथा हि । अनवयविकालीनक्रियायां प्रलयकालीनक्रियायां घटक्रियान्यत्वविशेषणस्य सत्त्वेऽप्यव-यविकालीनत्वस्य विशेष्यस्याभावेन स्वान्यावयविकालीनत्वानधिकरणत्वं वर्तते । स्वानवयविकालीन-परमाण्वादिक्रिया यत्किञ्चित्कालीनक्रिया च भवति । तदन्या च पक्षभूता घटक्रियेति । तथा चानेनानु-मानेनानवयविकालीनक्रियासिद्धौ अनवयविकाल एव प्रलयकाले इति सिद्ध्यतीति भावः । अथ मतमित्यादि शङ्कां परिहरति **एवं तर्हीति** । **स्वरूपतो विप्रकृष्टत्वादिति** । इन्द्रियायोग्यत्वादित्यर्थः । **देवदत्त-शरीरादिकमिति** । आदिपदेन देवदत्तभोगसाधनकार्यजातसङ्ग्रहः । अत्र देवदत्तपद अन्यदीयशरीरांशतो बाधवारणाय साध्ये चेश्वरज्ञानादिना सिद्धसाधनतापरिहाराय विशेषपदमुद्देश्यसिद्ध्यर्थं हेतौ देवदत्तभाग-साधने गगनादौ व्यभिचारवारणाय कार्यत्वे सतीत्युक्तम् । यज्ञदत्तशरीरे तद्वारयितुं देवदत्तपदम् । विचित्र-कार्येति सुरनरतिर्यगादिविचित्रकार्येत्यर्थः । सुखदुःखादि विचित्रादि कार्येति वा । **यो ब्राह्मणायेति** । 'यः ब्राह्मणावज्ञां कुर्यात् तं शतसंवत्सरेण भोग्यां यातनामनुभावयेदि'त्यर्थः । **श्रुतसाध्यसाधनेति** । त्रिक्षणावस्थायिनीयादौ श्रुतं कालान्तरभाविस्वर्गादिसाधनत्वं धर्मादिकं विनाऽनुपपन्नमिति धर्मादिकं कल्पयतीत्यर्थः ।

* * *

॥ अथ ततश्च तत्र धर्मादिसाधकानुमानानामाभासत्वे प्रलयसाधकानुमानानामप्याभासत्वम् ॥

३४ **सु०— अथ मन्यसे । नानुमानादिना धर्मादिसिद्धिः, तस्याभासत्वात् ।**

तथा हि । देवदत्तशरीरादेर्देवदत्तविशेषगुणजन्यत्वं किं साक्षात्साध्यमुत परम्परया ।

नाद्यः, धर्माधर्मयोरप्यारम्भकप्रेरणादिरूपेणैवोपयोगाङ्गीकारात्, 'देवदत्तशरीरं न साक्षाद्देवदत्तविशेषगुणजन्यं शरीरत्वाद्यज्ञदत्तशरीरवदि'ति सत्प्रतिपक्षत्वाच्च ।

द्वितीये तु जन्मान्तरीयप्रयत्नाराधितदेवताद्वारेणोपपत्तेरर्थान्तरता, देवदत्तविशेषगुणजन्यतया विनाऽपि आकाशादेरिवेश्वरेच्छया देवदत्तस्य भोगहेतुता सम्भवतीत्यप्रयोजकता च । कार्यवैचित्र्यं च दृष्टकारणवैचित्र्यादेवोपपद्यते । आदिकालीनं च तत्तत्प्रागभाव एव वैचित्र्याङ्गीकारेण । स्वर्गयागादेः साध्यसाधनभावश्रवणं त्वसिद्धमेव, योग्यताविरहात् । अन्यथाख्यातिमाश्रित्याभ्युपगमेऽप्यन्यथासिद्धम्, यागाद्याराधितावज्ञातदेवताद्वारेण स्वर्गाद्युपपत्तेरिति ॥

परि०— आरम्भकप्रेरणादीति । अदृष्टवादिभिरपि दृष्टसामग्रीद्वारैवोपयोगाङ्गीकारादित्यर्थः । **यज्ञदत्तशरीरवदिति** । तस्य देवदत्तगुणाजन्यत्वात् अत्रोक्तसाध्यानुगम इति भावः । **देवताद्वारेणेति** । देवताप्रसादद्वारेणेत्यर्थः । आ(दृष्टा)र्थापत्तिं निराह **कार्यवैचित्र्यमिति** । आदिकालीनकार्यवैचित्र्यं कथमित्यत आह **आदिकालीनं चेति** । कार्यवैचित्र्यमित्यनुषङ्गः । **अङ्गीकारेणेति** । उपपद्यत इत्यनुषङ्गः । **योग्यताविरहादिति** । क्षयिष्णुयागादेः भाविफलहेतुत्वस्य बाधादिति भावः । **अन्यथाख्यातिमिति** । योग्यताभ्रममाश्रित्य साध्यसाधनभावप्रतीत्यभ्युपगमेऽपीत्यर्थः । श्रुतिप्रामाण्याद्योग्यताभ्रमेण प्रतीतमपि साध्यसाधनत्वं नादृष्टेन निर्वाह्यं किन्त्वन्यथेत्याह **अन्यथासिद्धमिति** । तद्व्यनक्ति **यागादीति** । आदिपदेनावगोरणादिग्रहः । **आराधितावज्ञातेति** । आराधिता च सा अवज्ञाता चेति विग्रहः । यागेनाराधिता आदिपदगृहीतावगोरणेन अवज्ञातेति यथाक्रममन्वयः । देवताप्रीतिकोपद्वारेणेत्यर्थः । **स्वर्गाद्युपपत्तेरिति** । स्वर्गनरकादेरुपपत्तेरित्यर्थः ।

गु०दी०— आकाशादेरिव इत्यत्र आदिपदेन वाय्वादिभूतचतुष्टयं गृह्यते । पाञ्चभौतिकदेहे आकाशस्यापि प्राणादिसञ्चारहेतुतया देवदत्तभोगहेतुत्वादित्यर्थः । **अन्यथाख्यातिमाश्रित्य** इत्यत्र अपूर्वगतसाधनत्वं यागे प्रतीयत इत्यन्यथाख्यातिरिति भावः । यागजन्यावान्तरव्यापारनिष्ठस्वर्गसाधनत्वमादाय यागस्यापि स्वर्गसाधनत्वोपचाराङ्गीकार इत्यर्थः ।

यादु०— आकाशादेरिवेति । देशकालयोः सर्वोत्पत्तिमन्निमित्तत्वाद्भोगहेतुत्वमप्यस्तीति भावः । **योग्यतेति** । ज्योतिष्टोमेनेत्यादिवाक्यान्न यागादेः साक्षात्स्वर्गादिसाधनत्वं प्रतीयते तस्य प्रमाणबाधितत्वेन

योग्यताविरहादित्यर्थः । ननु बाधानवतारकाले योग्यताभ्रमात्साध्यसाधनभावप्रतीतिः सम्भवत्येव तदनन्तरं च बाधोदये वेदप्रामाण्यदार्ढ्यात्साक्षात्साधनत्वबाधेऽपि परम्परया तदेष्टव्यं परम्पराघटकं चादृष्टमेवेत्यदृष्टसिद्धिरित्यत आह **अन्यथाख्यातिमिति** । योग्यताभ्रममाश्रित्य साध्यसाधनभावप्रतीत्यभ्युपगमेऽपीत्यर्थः । **यागादीति** । आदिपदेनावगुरणसङ्ग्रहः । **तथा च यागेनाराधितदेवताप्रसादेन स्वर्गस्यावगुरणेनावज्ञातदेवताकोपेन यातनायाश्चोपपत्तिरित्यर्थः** ।

वं०प०— आरम्भकेति । देहारम्भकावयवकार्योन्मुखत्वप्रेरणयेत्यर्थः । देवदत्तविशेषगुणजन्यताभावे तद्भोगहेतुत्वमेव न स्यादित्यत उक्तम् **आकाशादेरिवेति** । सम्भवति शरीरादेः आदिकालीनकार्यवैचित्र्यान्यथाऽनुपपत्त्या धर्मादिसिद्धिरिति चेत् तत्राह **आदिकालीनं चेति** । यागादीत्यत्रादिपदेनावगोरणम् । द्वितीयादिपदेन यातनाग्रहणम् ।

कं०रा०— आरम्भकप्रेरणेति । तथा च देवदत्तशरीरादेः साक्षादेवदत्तविशेषगुणजन्यत्वसाधने बाध इति भावः । **जन्मान्तरीयेति** । जन्मान्तराराधितदेवता प्रतिद्वारेण शरीरादेर्देवदत्तप्रयत्नजन्यतामादाय परम्परया देवदत्तविशेषगुणजन्यत्वस्यैवोपपत्तेरर्थान्तरतेत्यर्थः । नन्वधुनातनकार्यवैचित्र्यस्य दृष्टकारणवैचित्र्यादुपपत्तावप्यादिकालीनकार्यवैचित्र्यस्य ततोऽनुपपत्तेरदृष्टसिद्धिरित्यत आह **आदिकालीनमिति** । आदिकालीनकार्यवैचित्र्यं च तत्तत्प्रागभाववैचित्र्याङ्गीकारेणैवोपपद्यत इत्यर्थः । **योग्यतेति** । यागादेस्तत्करणविनष्टत्वेन कालान्तरभाविस्वर्गादिसाधनत्वस्यानुपपत्त्या योग्यताविरहादित्यर्थः । ननु यागादिद्वारा भूतधर्मादिसन्देहदशायां यागादेः स्वर्गादिसाधनत्वयोग्यतासन्देह एव न तु तद्व्यतिरेकनिश्चयः तथा च अन्यथाख्यातिरस्तीति पक्षमाश्रित्य संशयरूपयोग्यताज्ञानस्य सुवचनत्वेन यागादेः स्वर्गादिसाधनत्वज्ञानसम्भवात् कथं स्वर्गयागादेः साध्यसाधनभावश्रवणस्यासिद्धिरित्यत आह **अन्यथाख्यातिमिति** । अन्यथाख्यातिमाश्रित्योक्तरीत्या संशयरूपयोग्यताज्ञानसत्त्वेन स्वर्गयागादेः साध्यसाधनभावश्रवणाभ्युपगमेऽपि तच्छ्रवणमन्यथासिद्धमदृष्टं विनानुपपत्त्यभावादित्यर्थः । देवताप्रीतेर्द्वारत्वे को विशेष इत्यत उक्तं **विज्ञातेति** । देवताया विज्ञातत्वेनादृष्टवत्कल्प्यत्वं नेति विशेष इति भावः ।

श्रीनिधि०— धर्माधर्मयोरपीति । विशेषगुणरूपयोरित्यर्थः । **आकाशादेरिवेति** । आदिपदेन कालग्रहणम् । तस्य यथा देवदत्तविशेषगुणजन्यत्वाभावेऽपि तद्भोगहेतुत्वं ईश्वरेच्छया तथेत्यर्थः । नन्वेवमादिकालीनकार्यवैचित्र्यं न स्यात् तत्कारणानामपि विचित्रत्वात् इत्यत आह **आदिकालीनं चेति** ।

शे०बा०— अङ्गीकारादिति । तथा च बाध इति भावः । **प्रयत्नेति** । यागादिप्रयत्नेत्यर्थः । **देवताद्वारेणेति** । देवताप्रीतिद्वारेणेत्यर्थः । न चैवमेतत्कल्पे कृतयागात्कल्पान्तरे फलं न स्यात् । एतत्कल्पीययागादिजन्यायाः एतत्कल्पीयेन्द्रादिप्रीतेः कल्पान्तरेऽनुपयोगात् । उपयुक्तायाश्च कल्पान्तरीयेन्द्रादिप्रीतेरेत-

त्कल्पकृतयागाद्यजन्यत्वादिति वाच्यम् । एतत्कल्पीयकर्मभिराराधितस्येन्द्राद्यन्तर्यामिणः परमेश्वरस्यैव कल्पान्तरे फलप्रदत्वाभ्युपगमादित्याहुः । **आकाशादेरिवेति** । देशादेरिवेत्यर्थः । देशकालादेः सर्वोत्पत्तिमन्निमित्तकारणत्वेन भोगहेतुत्वस्यापि सत्त्वाद्देवदत्तविशेषगुणजन्यतया देवदत्तभोगहेतुतायामाकाशादेर्देवदत्तविशेषगुणजन्यत्वविरहेण देवदत्तभोगहेतुत्वानापत्तेस्तन्निर्वाहाय देवदत्तभोगहेतुताया निमित्तान्तरप्रयुक्तत्वस्यानुसरणीयत्वात् । आकाशादेरिव विशेषगुणाजन्यस्यापि देवदत्तशरीरादेस्तद्भोगहेतुत्वोपपत्तेरिति भावः । **दृष्टेति** । स्वर्गस्थाः सुराः, भूमिष्ठा नराः, इत्यादिस्थानवैचित्र्यरूपदृष्टकारणवैचित्र्यादेव सुरासुरादिवैचित्र्योपपत्तेरन्यथाऽनुपपत्त्यभावान्नापूर्वकल्पना युक्तेति भावः । **साध्यसाधनभावेति** । यागादेः स्वर्गादिसाधनत्वं शब्दो न बोधयतीत्यर्थः । ननु चान्वयबोधानुकूलाकाङ्क्षादिरूपवत्तया प्रतिसन्धीयमानस्य ज्योतिष्टोमादिवाक्यस्य नान्वयाबोधकत्वं युक्तमन्यथा तादृशस्य गामानयेत्यादिवाक्यस्यापि तन्न स्यादित्यतो नाकाङ्क्षाऽऽसत्ती एव तत्र हेतू अतिप्रसङ्गात्, किन्नामार्थाबाधरूपा योग्यताऽपि तत्र हेतुः । तथा चान्वयबोधाङ्गभूतसकलरूपसम्पत्त्या गामानयेत्यादेरन्वयबोधकत्वेऽपि क्षणिकक्रियायाः कालान्तरभाविफलसाधनत्वस्य बाधितत्वेन तदबाधरूपयोग्यतायाः प्रकृतेऽभावात् न आकाङ्क्षासत्तिमात्रेण तस्यान्वयबोधकत्वं 'अग्निना सिञ्चेदि'त्यादेर्बाधितस्यापि तत्प्रसङ्गादित्याशयेनाह **योग्यताविरहादिति** । तथा साध्यसाधनभावस्यैवाश्रवणान्न तदन्यथाऽनुपपत्त्याऽर्थान्तरकल्पना, आक्षेपकप्रमित्यभावेनार्थापत्तिसामग्रीविरहादिति बोध्यम् । ननु केयं योग्यता यद्विरहादन्वयाबोधकत्वमुच्यते । न तावत्सजातीयेऽन्वयदर्शनम् । कथञ्चित्साजात्यस्यायोग्यसाधारणत्वात् । व्यवहितपुष्टिजनकेन घृतपानेन सह क्रियात्वेन साजात्यस्य यागेऽपि सत्त्वाच्च । पदार्थतावच्छेदकधर्मेण वा तात्पर्यविषयीभूतान्वयप्रतियोगितावच्छेदकधर्मेण वा साजात्यविवक्षायां पयसा सिञ्चतीत्यनाप्तवाक्येऽतिव्याप्तिः । 'अथ जातः पयः पिबति' इत्याप्तवाक्येऽव्याप्तिश्च । नाप्यन्वयविरोधिरूपविरहो योग्यता । अनाप्तवाक्येऽपि तत्प्रसङ्गात् । साधनत्वसामान्यान्वयं प्रति क्षणिकत्वस्याविरोधित्वाच्च । नाप्यन्वयप्रयोजकरूपवत्ता योग्यता । अनाप्तवाक्येऽतिव्याप्तत्वात् । फलसामान्यान्वयं प्रति प्रयोजकस्य क्रियात्वस्य, फलविशेषसाधनत्वान्वयं प्रति प्रयोजकस्य यागत्वस्य, यागे सत्त्वाच्च । तस्माद्बाधकप्रमाणाभाव एव योग्यतेति वाच्यम् । सा च प्रकृतेऽप्यस्ति । तथा हि । न लिङा साक्षात्फलसाधकत्वं यागस्योच्यते येन तस्य बाधिततयोक्तरूपयोग्यता न स्यात् । नापि परम्परया साधनत्वं बोध्यते येन परम्पराघटकद्वारस्य पूर्वमनुपस्थित्या परम्परया साधनं याग इति ज्ञानानुपपत्तिः स्यात् । किन्तु यदकरणे काम्यासिद्धिस्तत्त्वरूपं साक्षात्परम्परासाधनतासाधारणं साधनत्वं सामान्यमेव बोध्यते स्वर्गसाधनं याग इति । तच्च ज्ञानं साक्षात्परम्परोदासीनम् । वस्तुगत्या परम्परासाधनविषयमुत्पद्यमानं नायोग्यतया परिभावयितुं शक्यम् । न च साक्षात्परम्पराविशेषद्वयव्यतिरिक्तसामान्यमेव नास्तीति कथं तन्निरूपणं लिङा क्रियतामिति वाच्यम् । काम्याभावव्याप्याभावप्रतियोगित्वरूपस्य तस्यावश्यकत्वात् । अन्यथाऽननुगमात् । कस्य च साक्षात्परम्परया वा विशेषणं क्रियेत । न च लिङ्बोध्यस्य तादृशसाधनत्वस्य साक्षात्साधनत्वरूपैकविशेषबाधेन बाधो वक्तुं युक्तः अतिप्रसङ्गात् । किन्तु यावद्विशेषबाधेनैव । न चात्र स सम्भवति । परम्परासाधनत्वेऽबाधात् । तथा च लिङ्बोध्यसाधनत्वस्य बाधितांशं विहाय परम्परासाधनत्वरूपाबाधितांशमादाय

विश्रान्तिसम्भवात् न बाध्यत्वमिति न। योग्यताविरहः । तथा च न योग्यताविरहप्रयुक्तमन्वयाबोधकत्वं ज्योतिष्टोमादिवाक्यस्याङ्गीकर्तुं शक्यमिति कथं साध्यसाधनभावाश्रवणम् । अस्तु वा या काचिद्योग्यता, प्रकृते तद्विरहोऽपि, किं तावता । न हि योग्यता स्वरूपसती अन्वयबोधहेतुः । तथा सत्ययोग्ये योग्यताभ्रमेण शाब्दभ्रमाभावप्रसङ्गात् । किन्तु संशयादिसाधारणं ज्ञानमात्रमेव तस्याः प्रयोजकम् । ततश्च योग्यताविरहेण तत्प्रमाऽसम्भवेऽपि तद्भ्रमसम्भवाद्भ्रमरूपं योग्यताज्ञानमादायान्वयबोधसम्भवात् । कथं साध्यसाधनभावाश्रवणमित्याशङ्क्योक्तरीत्या योग्यताभ्रमाश्रयणेनान्यथाख्यातिरूपसाध्यसाधनभावश्रवणेऽपि न तन्मात्रेणापूर्वसिद्धिः परस्याभिमता किन्तु श्रुतसाध्यसाधनभावान्यथाऽनुपपत्त्यैव । न च सा प्रकृतेऽस्ति । श्रुतसाध्यसाधनभावस्यान्यथासिद्धत्वादित्याह **अन्यथाख्यातिमाश्रित्येति** । **अभ्युपगमे** अन्यथाख्यातिरूपान्वयबोधाभ्युपगम इत्यर्थः । अन्यथासिद्धत्वमेव दर्शयति **यागादीति** । आदिपदेनावगुरणादिपरिग्रहः । स्वर्गादीत्यादिपदेन यातनापरिग्रहः । ननु देवताप्रीत्येत्यादेर्न यागादिव्यापारत्वकल्पनमुचितम् । तथा सत्येतत्कल्पेऽनुष्ठितस्य यागादेः कल्पान्तरे फलजनकत्वाभावापातात् । एतत्कल्पीययागादिजन्यस्यैतत्कल्पीयेन्द्रादिप्रीत्यादेः कल्पान्तरेऽनुपयोगात् । उपयुक्तस्य कल्पान्तरीयेन्द्रादिप्रीत्यादेश्चैतत्कल्पीययागाद्यजन्यत्वात् कथमन्यथासिद्धिरिति चेन्न । एतत्कल्पीयकर्मादिभिराराधितस्यावज्ञातस्य चेन्द्राद्यन्तर्यामिणः परमेश्वरस्यैव कल्पान्तरे तत्र फलदत्वाभ्युपगमाद्युक्तमन्यथासिद्धत्वमित्यवधेयम् ।

वा०र०— यागाधाराधिता देवता इत्यादि लीलावत्यादिकं मनसि निधायाह **यागादिप्रयत्नेनेति** । देवताप्रीतेरेव व्यापारत्वमाशङ्क्य निराकरणपरतर्कताण्डवानुसारेण तर्हि देवताप्रीतिरेव व्यापार इति चेत् । न । यागस्य देवताप्रीतिहेतुत्वे मानाभावात् इत्यादिमण्याद्यनुसारेण च देवतापदं तत्प्रीतिपरतया व्याचष्टे **देवताप्रीतीति** । क्रियाजन्यापूर्वस्य ईश्वरप्रीतिजनकत्वसमर्थनपरतर्कताण्डवीयशङ्कानुसारेणाह **न चैवमिति** । अस्य पक्षस्य तर्कताण्डवे दूषणपूर्वकमीश्वरप्रीतिजनकमपि अपूर्वमेवेति समर्थनादाह **आहुरिति** । ईश्वरप्रीतिफलयोः व्यवधानाभावेन यागान्तरमेव प्रीत्या फलप्रसक्त्या यागान्तरमेव मे प्रीतिरित्यादिकल्पना न युज्यते । अपि तु अपूर्वे एव फलपर्यन्तस्थायिना फलाव्यवहितपूर्वकाले प्रीतिः उत्पादिता इत्यादि दूषणं तु नास्माकम् । तत्पक्षस्य परीत्यैवाभिहितत्वेन तद्रीतौ दूषणस्य स्पष्टत्वेन दोषाभावात् । वस्तुतस्तु आगमसाहाय एतदनुमानस्य साधकत्वाङ्गीकारे देवताप्रीतेरेव द्वारताखण्डनमनुमतमेवेति भावः । **देशादेरिवेत्यर्थ इति** । एतन्निमित्तं देशकालादेः सर्वेत्युत्तरवाक्ये स्पष्टम् । अपूर्वस्य लिङ्वाच्यत्वभङ्गीयतर्कताण्डवानुसारेणाह **ननु कथं योग्यतेत्यादिना प्रकृतेऽप्यस्तीत्यन्तेन** । **साधनत्वसामान्येति** । इदानीन्तनकालान्तरीयसाधारणसाधनत्वसामान्येत्यर्थः । तदानीमेव साधनस्याक्षणिकत्वविरोधिभूतस्य चात्राबोधादिति भावः । **अनाप्तवाक्य इति** । पयसा सिञ्चतीत्यादिरूपेत्यर्थः । **फलविशेषसाधनत्वान्वयं प्रतीति** । ननु क्रियात्वस्य फलसामान्यसाधनत्वान्वयं प्रति प्रयोजकत्वमस्तु भोजनादि क्रियायाः तृप्त्यादिसाधनतायाः दर्शनात् । यागत्वस्य तु कथं फलविशेषसाधनत्वान्वयं प्रति प्रयोजकता । यागस्य फलविशेषसाधनतायाः अथाप्यसिद्धिरिति चेत् । न ।

श्रुत्या साध्यसाधनभावस्य प्रतिपादितत्वेन तन्मात्रेण यागस्य प्रयोजकत्वात् योग्यताविरहस्य चाद्या-प्यनिर्णयादिति भावः । उक्तस्थलीयकिञ्चनलिङ्गा साक्षात्साधनत्वमित्यादि तर्कताण्डवानुसारेणाह **तथाहि न लिङ्गेत्यादि** । उपयोगानुसारेण विवरणं तत्र तत्रेति ज्ञेयम् । **अयोग्यतया परिभावयितुं इति** । अयोग्य-ताया एवाभावात् न तया निराकर्तुं शक्यमित्यर्थः । **अननुगमादिति** । साक्षात्परम्परासाधनत्वयोः अन्यतरमात्रसाधनत्वाङ्गीकारे तस्य तयोः अननुगम इत्यर्थः । अथ प्रकृतग्रन्थोपयोगानुसारेण योग्यताभ्रमं उपपादयति **किं तावतेति** । योग्यताविरहमात्रेण किम् ? ननु स्वर्गयागादेः साध्यसाधनभावाश्रयणसिद्धेरेव योग्यताविरहफलत्वेनाभिहितत्वात् कथं **किं तावता** इत्युक्तिः इत्यतो भवेदेवं यदि योग्यताविरहेण उक्तसाध्यसाधनभावश्रवणानुपपत्तिः स्यात् । न चैवम् । तद्विरहेऽपि तज्ज्ञानमात्रेण शब्देनोक्तसाध्य-साधनबाधोपपत्तेः इत्याशयेनाह **न हीति** । **हेतुरिति** । येन तदभावे उक्तश्रवणासिद्धिः स्यात् इति शेषः । **अयोग्य इति** । अनेन स्वरूपसद्योग्यता नास्तीति प्रतिपादितम् । अयमर्थः । स्वरूपसद्योग्यतारहितेऽपि तावच्छब्दबोधस्य सत्त्वात् शाब्दबोधत्वावच्छिन्ने योग्यतामात्रं न कारणमिति वाच्यम् । कारणाभावे कार्यानुदयात् । शाब्दप्रमायां तु योग्यता प्रमाकरणम् इत्यस्तु । तथा च अयोग्येऽपि शाब्दबोधस्य भ्रमरूपस्य ज्ञानस्य सत्त्वात् तदनुगुणं योग्यताज्ञानमपि भ्रमरूपमेवास्थेयम् । तदेतदुक्तं **योग्यताभ्रमेण शाब्दभ्रमेति** । अनेनैव शाब्दभ्रम एव नास्तीति इष्टापादनमतत् कारणाभावात् इति च निराकृतम् । योग्यताभ्रमस्यैव कारणत्वात् । तदेतदप्युक्तम् । योग्येत्याद्युक्तेनैव । अन्यथाऽयोग्ये शाब्दभ्रमो न स्यात् इत्येवावक्ष्यत् । शाब्दभ्रमेऽप्युपलक्षणम् । शाब्दं संशयरूपं ज्ञानं संशयरूपयोग्यताज्ञानेन न स्यात् इत्यपि ज्ञेयम् । वक्ष्यति च **संशयादिसाधारणमिति** । विप्रतिपत्त्या संशयोत्पत्त्यङ्गीकारात् । यत्सद्भावे लिङ्गमितं ज्ञानमेव न जनयति संशयविपर्ययौ वा करोति ते उपपत्तिदोषाः इति पद्धत्युक्तेः । लिङ्गशब्दयोरपि संशयहेतुत्वात् तदहेतुत्व-मतस्यानादरणीयत्वात् । यद्वा शब्दभ्रमेऽपि योग्यतासंशयः यथाश्रुत एव हेतुरिति न क्षुद्रोपद्रवः । ततो न स्वरूपसती योग्यतान्वयबोधहेतुः इति । **संशयादीति** । संशयभ्रमप्रमासाधारणमित्यर्थः । तस्याः योग्य-तायाः ज्ञानमिति पूर्वेण सम्बन्धः । अस्त्वेवं अन्यत्राव्ययबोधं प्रति संशयादिसाधारणज्ञानस्य हेतुता, स्वर्गयागादेः साध्यसाधनभावबोधकारणीभूतम् । योग्यताज्ञानं तु कीदृशमत्रोपादीयते इत्यत आह **तत-श्चेतीति** । अन्यथाख्यातिमित्यादेर्विवरणं **प्रमाऽसम्भवेऽपीत्यादि** । भ्रमरूपं योग्यताज्ञानमादायेत्यनेन कीदृशमित्याशङ्कापरिहारः । योग्यताभावेऽपि तदुत्पत्तिसम्भवप्रतिपादनाय योग्यतेत्यादि पूर्वभागः । अत एव प्राचीनयोग्यताज्ञानमेवेति परिशेषानुसारोऽपि अत्र लब्धो भवति । अन्यथा भ्रमसम्भवेनान्वयबोधसम्भवात् इत्येव ब्रूयात् । आदायेत्यस्य चोपाश्रित्येत्यर्थः । अपेक्षैक्याश्रयणम् । अत एवोत्तराधिकरणस्थ क्वचित् भिन्नतया दृष्ट इत्येतत् अनुव्याख्यानमूले एव च प्रतीतिमुपादायापि न च्विप्रत्ययोपपत्तिरिति वाक्यं उपादायेत्यस्य च्विप्रत्ययोपपत्तिरूपकार्यविवक्षायां वा च्विप्रत्ययस्यैव विवक्षायां वा ताभ्यां स्वनिमित्तभूत-प्रतीतेरुपादानासम्भवेनोपादानं नाम तदपेक्षेति अर्थाश्रयणेन समाधानं कार्यम् । पूर्वग्रन्थे प्रतीत्यपेक्षया तदुपपत्तेरिति अपेक्षाया एव प्रकृतत्वाच्च । तथा च योऽत्र च्विप्रत्ययः अभूततद्भावार्थकः तस्य पूर्वं अप्राप्त

ऐक्यरूपार्थविवक्षया प्राप्त्यनुपपत्तावपि ब्रह्माभिन्नत्वेन मुक्तस्वप्रतीतिः प्रागभूतेदानीं जातेत्यर्थविवक्षया प्राप्त्युपपत्तिः इत्यभिप्रायवत् इहापि योग्यताविरहेण तत्प्रमारूपकारणसम्भवेऽपि तद्भ्रमस्य कारणसम्भवात् तदादाय तदाश्रित्य तद्रूपकारणसम्पत्त्येति यावत् अन्वयबोधसम्भवादित्यर्थस्य प्राप्तेः । एतेन उपादेयेत्यस्य समानकर्तृकत्वसिद्ध्यर्थं अन्वयबोधादेरेव कर्तृताङ्गीकारे कार्येण कारणोपादानप्राप्तिरिति निरस्तम् । आश्रयणस्यैवोपादानपदार्थत्वात् । तत्कर्तृतायाश्चान्वयबोधे सम्भवात् । एवमेव उपादेयेत्येतत्स्थले स्वपरग्रन्थयोः प्रयुक्तप्रकरणानुसारेण व्याख्येयम् । अनुमायुक्तिरेवोक्तेति भाष्यमूले अत्र पुनरन्तर्भावितनिर्दोषत्वं मुख्यार्थमेवोपादाय युक्तिरित्येवोक्तमिति युक्तिशब्दमुख्यार्थविवक्षायां तदनपेक्षणादिति ....इत्युत्तराधिकरणमूलेऽपि उपादायेति चोक्तेरेवमन्यत्रापीति ज्ञेयम् । **कथं साध्यसाधनभावेति** । न च वेदप्रामाण्यवादिना कथं भ्रान्तिविषयस्य श्रौतत्वाश्रयणमिति वाच्यम् । वेदप्रामाण्यवादिभिरपि यजमानः प्रस्तरः तत्त्वमसीत्यादौ योग्यतादिभ्रमे प्रतीतार्थस्य श्रौतत्वमाश्रित्यैवमुख्यार्थानुपपत्तिं मूलीकृत्य गौण्यादेराश्रयणात् । न हि आपाततः प्रतिपन्नोऽर्थः उपक्रमादिपरामर्शात् तन्मूलः । न वा तदुपपत्तिः अर्थान्तराश्रयणेन निमित्तम् । अत एवोक्ता च तत्प्राप्तिरिति । आनन्दमयन भाष्यटीकायां श्रुत्यर्थापरिज्ञाननिमित्तप्राप्तेरुक्तत्वात् इति व्याख्यानम् । एवं च वेदप्रामाण्यवादिनापि प्रतीतार्थप्रतिसन्धानादि प्रनाड्यन्यथानुपपत्त्या भ्रान्तिविषयस्याश्रौतत्वसम्भवः इत्यास्थेयम् । उपक्रमादिपर्यालोचनयाऽर्थान्तराश्रयणाच्च वेदस्य न भ्रान्तिजनकत्वं इत्यपीति न कश्चित् दोषः । वस्तुतस्तु मूलकारो हि स्वमतमपि हि प्रलयधर्माधर्मादिकं परोक्तं प्रकारान्तरेण साधयितुं अशक्यमित्येव प्रतिपादनाय प्रवृत्त तदा च वेदप्रामाण्यवादि तदप्रामाण्यवादिसाधारण्येन तत्तद्रीत्या प्राप्तदूषणेन कथञ्चित् परोक्तमनुमानादिकं निराकरोति । अत एवाथ मा भूदनुमानैः प्रलयादिसिद्धिः तथापि आगमैः भविष्यति इति स्वरीत्या शङ्कासमाधाने उत्तरत्र करिष्येते इति न कोऽपि दोषः । **अन्यथाख्यातिरूपेति** । श्रवणविशेषणं चैतत् । उक्तरीत्या कारणीभूतयोग्यताज्ञानस्य भ्रमरूपतया तत्साध्यस्य साधनभावश्रवणस्यापि भ्रमताया एव प्राप्तेः तदनुवादरूपे तथैवार्थसिद्धेः । यद्यपि बाधकप्रमाणाभाव एव योग्यतेति परिशेषयित्वा लिङ्गबाधितस्य साक्षात्परम्परासाधारण्येन साधकत्वस्याबाधात् श्रौतस्य साध्यसाधनभावस्यान्यथानुपपत्त्या अपूर्वसिद्धिरिति प्रथमोक्तपक्षोऽपि निराकर्तव्यः । तथा चास्तु वेत्यादिनोक्तद्वितीयपक्षमात्रनिराकरणपरतयैव एतद्योजना कथमित्याभाति । तथापि तत्पक्षेऽपि अन्यथासिद्धिः मूलोक्तावर्जनीयेति स्पष्टत्वात् शिष्यैरेवोह्यताम् । प्रागपि जन्मान्तरीयप्रयत्नाराधित इत्याद्युक्त्या च तस्य ज्ञातुं शक्यत्वमित्याशयेनास्तु वेत्युत्तरपक्षोक्तान्यथाख्यातिरूपसाध्यसाधनभावश्रवणपक्षनिरासपरत्वेनैव तत् योजितमित्यदोषः । अत एव शङ्काग्रन्थे प्रमाभ्रमरूपेण उभयविधसाध्यसाधनभावश्रवणप्रसक्तावपि उक्तरीत्या योग्यतेति वाक्येऽस्तु वेति पक्षोक्तभ्रमरूपस्यैव तस्योपपादनेन दूषणकथनमिति पूर्वोक्तपक्षद्वयानुवादत्वानाश्रयणेऽपि दोषाभावः । अन्यथाख्यातिरूपस्य साध्यसाधनभावविशेषणत्वप्रतीत्यप्रसक्तिश्च । **तन्मात्रेणेति** । अयमर्थः । त्वया हि योग्यताज्ञानं भ्रमरूपं स्वीकृत्य अन्वयबोधोऽपि भ्रमरूपः सम्भवतीति यत्नतः प्रतिपादितम् । किं तावता आशास्यम् । न हि साध्यसाधनभावश्रवणमात्रेणैवापूर्वसिद्धिरिति वक्तुं उद्यमः तव युक्तः । साध्यसाधनभावश्रवणान्यथानुपपत्त्येति पूर्वोक्तानुसारेण कथञ्चित् तस्य

साध्यसाधनभावस्यान्यथानुपपत्त्यैव तत्सिद्धेर्वाच्यत्वात् । तदनुपपत्तिस्तु प्रकृते नास्ति । भ्रमप्रमासाधारण-ज्ञानविषयस्यापि साध्यसाधनभावस्यान्यथोपपन्नत्वात् इति । अत एव श्रुत्येत्येतत् कथञ्चित् श्रुतेति व्याख्येयम् । एवं श्रुतेत्युत्तरत्रापि इति ज्ञेयम् । यद्वा तन्मात्रेण त्वया अपूर्वसिद्ध्यर्थं अङ्गीकृतो यः साध्यसाधनभावः तावन्मात्रेण इति वदन्तं प्रति श्रुतसाध्यसाधनभावान्यथानुपपत्तिखण्डनाय प्रवृत्तैरस्माभिः साध्यसाधनभावश्रवणमेवासिद्धमिति गूढाभिसन्धिनोक्तम् । ततश्च तदन्यथानुपपत्तिर्दूरनिरस्तेति । सत्यपि वा श्रवणे अन्यथोपमर्दत्वात् नानुपपत्तिः अप्यभिसन्धेः सत्त्वात् । त्वया तु कथञ्चित् साध्यसाधनभावश्रवण-मननान्ते । तेन तदन्यथानुपपत्त्येति वक्तुं शक्यम् इत्येव चागतम् । न तु अस्माभिः असंहितान्यथासिद्धिनिरासः त्वया कृतः । ततो व्यर्थोऽयं अन्यथाख्यातिरूपसाध्यसाधनभावश्रवणाभ्युपगम इति । एतेन तन्मात्रेण नेत्युक्ते तदधिककारणापेक्षेति प्रतीतिरिति निरस्तम् । पूर्वोक्तरीत्या तन्मात्रेणेत्यस्यार्थान्तरपरत्वेन तावतो पूर्वसाधकत्वा-भावस्यैवोक्तत्वेनान्यथानुपपत्त्यैवेत्येवकारविरोधाभावात् । लोके शास्त्रे च साधकत्वाभिप्रायेण तावन्मात्रेणेत्युक्तेरपि बहुलमुपलम्भात् । न च सेति । कथञ्चित् श्रुतो यः साध्यसाधनभावः तदन्यथानुपपत्तिरत्र नास्तीत्यर्थः । एवं च या साधिकास्ति सा नास्ति । यश्च त्वया श्रुतत्वेन साध्यसाधनभावः आनीतः सः साधक एव न भवती-त्युक्तं भवति । अभ्युपगमेऽपीत्येवोक्तेऽपि अन्यथासिद्धिमित्युत्तरानुरोधेन तावन्मात्रेणेत्यादिकं मूलाभिप्रेत-मधिकमुक्तम् । केचित्तु तन्मात्रेणास्यान्यसाहित्येऽभिप्रायं प्रकल्प्य श्रुतसाध्यसाधनभावेत्यनेन श्रुतत्वमधिकमुक्तं इत्याहुः । तन्न । टीकायां पूर्वग्रन्थे अन्यथाख्यातिरूपश्रवणे उपपादिते सति श्रौतत्वमङ्गीकृत्यैवं तदन्यथानुप-पत्त्यभाववर्णने सति श्रुतत्वस्याधिकतया उक्तत्वकल्पनायोगात् । अनुपपत्त्यैवेत्येवकारविरोधाच्च । अभ्युपगमे-ऽपीति मूलस्यापिपदेनाङ्गीकारवादत्वप्रतीतेः । अन्यथा न च श्रुतत्वमस्ति इत्येव ब्रूयात् । मूलकारोऽपि अश्रुत-त्वमेव वदेदिति सकलमकलङ्कम् । अत्र टीकान्यथाख्यातिमाश्रित्येत्यस्य व्याख्याने बहूपपादनमुक्तरीत्या कर्तव्य-तया प्राप्नोतीति हृदि कृत्वा सत्यनाथश्रीचरणाः अलौकेऽर्थे युक्तीनां अनवकाशः इति युक्तिविरुद्धमपि कामधेनु-प्रभृतीनां प्रसादोद्गिरणादिकं श्रुतिः प्रतिपादयतीति श्रुतेरितरप्रमाणापेक्षया अन्यथा विलक्षणाख्यातिप्रसिद्धि-स्तामाश्रित्य लोकदृष्ट्या योग्यमपि यागस्य स्वर्गसाधनत्वं श्रुतिः प्रतिपादयतीति तस्यैव श्रौतत्वाभ्युपगमः इत्यर्थ इति वर्णयन्ति । यातनादिपरिग्रहः इति आदिपदगर्भः पाठः । प्रागुक्ततर्कताण्डवानुसारेणाह ननु देवता-प्रीत्येत्यादेरित्यादिना ।

स०व०— आकाशादेः इत्यत्र आकाशशब्देन श्रोत्रं ग्राह्यम् । आदिकालीनं चेति । कार्य-वैचित्र्यमिति शेषः । यागादेरित्यादिपदेनावगुरणपरिग्रहः । आराधिता चासाववज्ञाना च देवता इति विग्रहः । तत्र च यागेनाराधिता आदिपदगृहीतावगुरणेनावज्ञाता । स्वर्गादीत्यादिपदेन यातनापरिग्रहः ।

स०ना०— अदृष्टं कारणं नो चेदिति मूलसुधायां अन्यथाख्यातिमाश्रित्येति । योग्यताज्ञानस्य कारणत्वपरित्यागेन अपकीर्तिमभ्युपगम्य योगस्वर्गयोः कार्यकारणभावबोधाभ्युपगम इत्यर्थः ।

विठ्ठल०— साक्षात्साध्यमिति । साक्षाद्देवदत्तविशेषगुणजन्यत्वं साध्यमित्यर्थः । **आरम्भकेति** । आरम्भकमुपादानकारणत्वादिकं तत्प्रेरकेश्वरप्रसादजनकत्वादिरूपेणेत्यर्थः । **यज्ञदत्तेति** । यज्ञदत्तशरीरे देवदत्त-गुणजन्यत्वं प्रमितं परन्तु महदादिमूलकारणस्य देवदत्तादृष्टनिमित्तकत्वस्यापि भावात् तदभावव्युत्पादनाय साक्षादित्यस्य दृष्टान्तेऽप्युपयोगो द्रष्टव्यः । **देवताद्वारेणेति** । न च तत्राप्यदृष्टं कल्प्यं प्रयत्नाराधितराजप्रसादेन कालान्तरे फलोत्पादे तदभावादिति द्रष्टव्यम् । तथा च प्रयत्नरूपविशेषगुणजन्यतासिद्धयधर्माद्यसिद्धेरर्थान्तरतेति भावः । **आकाशादेरिति** । देशकालयोः सर्वोत्पत्तिमन्निमित्तकारणत्वेन भोगहेतुत्वमप्यस्तीति भावः । विचित्र-कार्यान्यथानुपपत्त्या तन्निमित्ततया दृष्टमङ्गीकार्यमित्यत आह **कार्यवैचित्र्यं चेति** । तर्ह्यादिकालीनकार्यवैचित्र्य-मित्यत आह **आदिकालीनमिति** । **योग्यतेति** । यागादेः क्षणविनष्टत्वात्कालान्तरभाविस्वर्गसाधनत्वस्यानुप-पन्नत्वेनाग्निना सिञ्चेदितिवद्योग्यताविरहादित्यर्थः । ननु प्रथमं योग्यताभ्रमात् साध्यसाधनभावप्रतीतेश्च । कालान्तरभाविस्वर्गादिसाधनत्वादि साधनत्वानुपपत्तिदर्शनरूपबाधसमये साध्यसाधनभावप्रतिपादकवेदप्रामाण्य-दार्ढ्यात् तदन्यथानुपपत्त्या यागादिजन्यं स्वर्गादिसाधनं धर्माद्यङ्गीकार्यमिति प्राप्नोतीत्यत आह **अन्यथा-ख्यातीति** । योग्यताभ्रममाश्रित्य साध्यसाधनभावाभ्युपगमेऽपीत्यर्थः । अन्यथासिद्धिमुपपादयति **यागादीति** ।

३५ सु०— एवं तर्हि प्रलयसाधकानुमानानाम(प्य)भासत्वान्न तैस्तत्सिद्धिरिति तुल्यमुत्तरम् ।

तथा हि । 'विमतः कालोऽवयवियुक्तः कालत्वादिदानीन्तनकालवत्, विमतो ब्राह्मणो ब्राह्मणपूर्वको ब्राह्मणत्वात्सम्मतवदि'त्यादिना सत्प्रतिपक्षं तावदुक्तानुमानजातम् ।

परि०— विमतो ब्राह्मण इति । सर्गाद्यकालीन इत्यर्थः । **एवमिति** । आश्रया-सिद्धिरित्यर्थः ।

वं०प०— प्रतिपक्षमिति । प्रलयासिद्धयेत्यर्थः ।

कं०रा०— विमतो ब्राह्मण इति । प्रलयपक्षे सर्गाद्यकालीनब्राह्मणस्य ब्राह्मणपूर्वकत्वायोगाद्विमतस्य सर्वस्य ब्राह्मणस्य ब्राह्मणपूर्वकत्वसाधने प्रलयाभावासिद्धिरिति भावः ।

शे०वा०— इत्यादिना इत्यादिपदेन विमतः क्षत्रियः क्षत्रियपूर्वकः क्षत्रियत्वात् सम्मतवदित्यादेः परिग्रहः । किञ्च प्रथमप्रयोग इत्यादिना विशिष्याप्यनुमानदूषणादुत्तरत्र **तावत्** इत्युक्तम् ।

वा०र०— अनुमानदूषणादिति । उत्तरत्रानुमानदूषणात् इति सम्बन्धः ।

स०व्र०— एवमिति । एवं विमतो ब्राह्मणो ब्राह्मणपूर्वक इत्यनुमानेऽपि दोषो द्रष्टव्यः ।

विट्ठल०— अथ मन्यस इत्यादि शङ्कां परिहरति **एवं तर्हीति** । **तत्सिद्धिरिति** । न तैरनुमानै-रप्ययत्नसिद्धिरिति हेतोरीश्वरादिकं प्रलये सद्भवितुमर्हतीत्यनुमानस्याप्रसिद्धविशेषणतेति तुल्यमुत्तरमित्यर्थः । **विमतः काल इति** । प्रलयकालत्वेनाभ्युपगत इत्यर्थः । **विमतो ब्राह्मणमिति** । आदिकालीनब्राह्मण इत्यर्थः ।

३६ सु०— ननु 'प्रलयकालपक्षीकृतावाश्रयासिद्धिः, अन्यथा सिद्धसाधनम्; एवमाद्यब्राह्मणपक्षीकारेऽन्यथा च दोष' इति चेन्न, पर्वतोऽग्निमानित्यादावप्यग्निमदनग्नि-मत्पक्षदूषणसम्भवेन सर्वानुमानोच्छेदप्रसङ्गात् ।

नन्वग्निमत्त्वादिव्यतिरेकेणाप्यस्ति पर्वतादेः स्वरूपं, शक्यं च विशेषान्तरेणाव-धारयितुम्; तत्कथं दोषावकाश इति चेत् । तत्किमवयविसम्बन्धासम्बन्धौ विहाय कालविशेषस्य स्वरूपमेव नास्ति, ब्राह्मणव्यक्तेर्वाऽऽद्यत्वानाद्यत्वे विहाय । अवधारणं च कालादेर्हिरण्यगर्भापवर्गोत्तर(र्गानन्तर)भावित्वादिना भविष्यति ।

परि०— **अन्यथा दोष इति** । इदानीन्तनपक्षीकारे सिद्धसाधनतेत्यर्थः । **दूषणेति** । आश्रयासिद्ध्यादिरूपदूषणसम्भवेनेत्यर्थः । **विशेषणेति** । एष पर्वत इति पर्वतत्वरूपेणेत्यर्थः । **आद्यत्वानाद्यत्वे विहायेति** । स्वरूपमेव नास्ति किमित्यनुषङ्गः । अस्ति स्वरूपमवधारणं त्वशक्यमिति चेत् तत्राह **अवधारणं चेति** । **हिरण्यगर्भापवर्गोत्तरभावित्वादिनेति** । आदिपदेन चतुर्मुखब्रह्मत्वग्रहः ।

गु०दी०— **शक्यं च विशेषान्तरेण** इत्यत्र पर्वतत्वाख्यविशेषणान्तरेणेत्यर्थः ।

यादु०— ननु **प्रलयकालेति** । अवयव्यसम्बन्धिकालपक्षीकृतौ आश्रयासिद्धिः, तत्सम्बन्धिकाल-पक्षीकृतौ सिद्धसाधनमित्यर्थः । **एवमाद्येति** । विमतो ब्राह्मण इत्यत्रापि सर्गाद्यकालीनब्राह्मणपक्षीकारे प्रलयाभाववादिमते आद्यकालीनब्राह्मणासिद्ध्या आश्रयासिद्धिरन्यथा सिद्धसाधनतादोष इत्यर्थः । **दूषण-सम्भवेनेति** । सिद्धसाधनत्वबाधलक्षणदूषणसम्भवेनेत्यर्थः । **विशेषणान्तरेणेति** । पर्वतत्वादिधर्मान्तरेणे-त्यर्थः । ननु तत्र पर्वतत्वादिवदत्र पक्षतावधारणाङ्गमवच्छेदकं किमित्यत आह **अवधारणं चेति** । पक्षताया इति शेषः । उत्तरभावित्वादिनेत्यत्रोत्तरभाविकालत्वादिनेत्यर्थः । आदिपदेन हिरण्यगर्भसृष्टिकालीनब्राह्मणत्वेन वा हिरण्यगर्भरूपब्राह्मणत्वेन वा द्वितीयानुमाने पक्षतावधारणमिति ग्राह्यम् ।

वं०प०— **अन्यथेति** । वर्तमानकालपक्षीकार इत्यर्थः । **दोष इति** । आद्यब्रह्मणः पक्षीकारे आश्रयासिद्धिः अनाद्यब्रह्मणः पक्षीकारे सिद्धसाधनमित्यर्थः । **दूषणसम्भवेनेति** । अग्निमन्तं पर्वतं पक्षीकृत्य

अग्निमत्त्वसाधने सिद्धसाधनता अन्यथा बाध इत्यर्थः । **विशेषणान्तरेण** पर्वतत्वादिरूपेण । विहायेत्यनन्तरं स्वरूपमेव नास्तीत्यनुवर्तते ।

कं०रा०— अन्यथेति । इदानीतनकालपक्षीकृतौ तत्रावयवियुक्तस्य सिद्धत्वात्सिद्धसाधनमित्यर्थः । **एवमिति** । विमतो ब्राह्मणो ब्राह्मणपूर्व इत्यत्राद्यब्राह्मणपक्षीकारे प्रलयो नेति मत आद्यब्राह्मणस्याभावादाश्रयासिद्धिरिदानींतनब्राह्मणपक्षीकारे तु तत्र ब्राह्मणपूर्वकत्वस्य सिद्धत्वात्सिद्धसाधनमित्यर्थः । **ब्राह्मणव्यक्तेरिति** । ब्राह्मणव्यक्तेर्वा आद्यत्वानाद्यत्वे विहाय स्वरूपमेव नास्ति किमिति पूर्वेणान्वयः । पक्षीकृतकालादेरवधारणं केन विशेषणेनेत्यत आह **अवधारणं चेति** ।

श्रीनिधि०— आश्रयासिद्धिरिति । प्रलयकालस्यासिद्धत्वेनाज्ञानसिद्धिरित्यर्थः । **अन्यथा** अवयवकालपक्षीकारे । **आद्यब्राह्मणपक्षीकारे इति** । प्रलयासिद्धावाद्यत्वाप्रसिद्धेः । प्रलयानन्तरभावी हि काल आद्य इत्युच्यत इति भावः । **अन्यथा चेति** । ब्राह्मणमात्रपक्षीकार इत्यर्थः । **अग्निमदनग्निमदिति** । अग्निमत्पक्षीकारे सिद्धसाधनम् । अनग्निमत्पक्षीकारे बाध इति दूषणसम्भवादित्यर्थः । **हिरण्यगर्भापवर्गोत्तरभावित्वादिति** । आदिपदेन हिरण्यगर्भोत्पत्तिकालीनत्वेन ब्राह्मणस्यावधारणं युज्यत इति द्रष्टव्यम् ।

शे०वा०— ननु प्रलयकालेति । अवयव्यसम्बन्धिकालपक्षीकृतावाश्रयासिद्धिस्तत्सम्बन्धिकालपक्षीकृतौ च सिद्धसाधनमित्यर्थः । **एवमाद्येति** । विमतो ब्राह्मण इत्यत्रापि सर्गाद्यकालीनब्राह्मणपक्षीकारे प्रलयाभाववादिमते सर्गादिकालीनब्राह्मणासिद्ध्याऽऽश्रयासिद्धिः । अन्यथा सिद्धसाधनत्वमित्यर्थः । **दूषणसम्भवेनेति** । अग्निमत्पर्वतपक्षीकारे सिद्धसाधनत्वमनग्निमत्पर्वतपक्षीकारे च बाध आश्रयासिद्धिश्चेति दूषणसम्भवेनेत्यर्थः ।

वैषम्यान्न प्रतिबन्दीग्रह इत्याशङ्कते **नन्विति** । **विशेषणान्तरेणेति** । पर्वतत्वादिधर्मान्तरेणेत्यर्थः । आद्यत्वानाद्यत्वे विहायेत्यत्र स्वरूपमेव नास्तीत्यनुवर्तते । नन्वस्त्वग्निमत्त्वानग्निमत्त्वादिव्यतिरेकेण पर्वतादिस्वरूपवदवयविसम्बन्धासम्बन्धौ विहाय कालस्वरूपमाद्यत्वानाद्यत्वे विहायापि ब्राह्मणस्वरूपं च । न चैवं तत्पक्षीकारेणावयवियुक्तत्वादिसाधनसम्भवात् प्रतिपक्षसिद्धिरिति वाच्यम् । तत्र पर्वतत्वादेरिवात्र पक्षतावधारकधर्मान्तराभावेन तदयोगादित्यत आह **अवधारणं चेति** । पक्षताया इति शेषः । **उत्तरभावित्वादिनेति** । उत्तरभाविकालत्वादिनेत्यर्थः । आदिपदेन हिरण्यगर्भसृष्टिकालीनब्राह्मणत्वेन द्वितीयानुमानेऽपि पक्षतावधारणमित्यस्य सङ्ग्रहः ।

वा०र०— हिरण्यगर्भापवर्गेति मूले लिङ्गशरीरभङ्गरूपापवर्गो विवक्षितः इति ज्ञेयम् ।

स०व्र०— तदेव दर्शयति **आद्येति** । किमाद्यब्राह्मणः पक्षीक्रियते अनाद्यब्राह्मणो वा । नाद्यः आश्रयासिद्धेः । द्वितीये सिद्धसाधनमिति **दोष इत्यर्थः** । **विशेषणान्तरेणेति** । एतत्पर्वतत्वादित्यन्यप्रकारेण इत्यर्थः । **ब्राह्मणव्यक्तेर्वा आद्यत्वानानाद्यत्वे विहाय** इत्यत्र स्वरूपमेव नास्तीत्यनुवर्तते ।

विठ्ठल०— **आश्रयासिद्धिरिति** । प्रलयकालस्यैव त्वयानङ्गीकारादिति भावः । **अन्यथेति** । तदन्यकालपक्षीकारे तदावयवियुक्तत्वस्य सिद्धत्वादिति । **एवमाद्यब्राह्मणेति** । प्रलयो नेति मते आद्यब्राह्मणस्यैवाभावादाश्रयासिद्धिः इदानींतनब्राह्मणपक्षीकारे सिद्धिसाधनमिति दोष इत्यर्थः । **विशेषान्तरेणेति** । पुरोवृत्तित्वह्रस्वत्वादिविशेषणान्तरेणेत्यर्थः । आद्यत्वान्नाद्यत्वे विहायेत्यतःपरं स्वरूपमेव नास्ति किमित्यनुवर्तते किं त्वस्तीत्युभयत्र दोषः । तथापि पक्षतावधावरणं कथमित्यत आह **अवधारणं चेति** । आदिपदेन हिरण्यगर्भादि ब्राह्मणग्रहणम् ।

३७ **सु०— किञ्च प्रथमप्रयोगे विश्वशब्देन किं ब्रह्माण्डमभिप्रेयते सकलकार्याणि वा ॥ नाद्यः, आश्रयासिद्धेः, प्रलयमनभ्युपगच्छता ब्रह्माण्डस्यानङ्गीकृतत्वात्, ब्रह्माण्डाभावेऽपि कार्यान्तरावस्थितिसम्भवेन प्रलयासिद्धेश्च । कपिकपोलान्तर्गतौदुम्बरोदरवर्तिमशकशरीरादिवत्कार्यान्तरावस्थानमसम्भावितमिति चेन्न, कुण्डबदरवदुपपत्तेः, कालाग्निरुद्रादिप्रक्रियाया असिद्धत्वात् ॥ द्वितीयेऽपि न प्रलयसिद्धिः, यथा हीदानीन्तनानां दहनपवनसन्तानानां क्रमेणास्तमयेऽपि न प्रलयस्तथा तरुगिरिशरीरादिसन्तानानामपि क्रमारम्भसिद्धावप्यवयविशून्यसमयासिद्धेः । अथैकदैवेति विशेषणमुपादीयेत तदा क्रमारब्धदहनपवनादिसन्तानैर्व्यभिचारः स्यात् । एकदारम्भकहेतुसाकल्ये सतीति हेतुविशेषणे विशेषणासिद्धिः, द्व्यणुकादिक्रमेणारम्भस्वीकारेण बाधादिप्रसङ्गश्च ।**

परि०— **कार्यान्तरावस्थितीति** । दृश्यसन्तानशून्यैरित्यस्य दृश्यब्रह्माण्डशून्यैरित्यर्थ उक्तः स्यात् । तथा च ब्रह्माण्डहानेऽपि तदन्तर्गताविनष्टकार्यान्तरवद्भिरारब्ध इत्यर्थसम्भवेन प्रलयासिद्धिः सर्वकार्यविनाशकालस्य प्रलयकालत्वादिति भावः । **कुण्डबदरवदिति** । कुण्डनाशेऽपि तदन्तस्थबदरफलावस्थितिर्यथा तथेत्यर्थः । ननु कालाग्निना रुद्रेण द्वादशादित्यैः युगपदुदयवद्भिः शेषान्तर्गतसङ्कर्षणज्वालया भागवताद्युक्तदिशा ब्रह्माण्डे गर्भीकृतपदार्थैः सह भस्मीजायमाने सति कथं कार्यान्तरावस्थितिरित्यत आह **कालाग्नीति** । प्रलयविवादिनो मीमांसकस्यासिद्धत्वादित्यर्थः । **क्रमारम्भेति** । प्रथमं तरुसन्तानं पश्चाद्गिरिसन्तानजन्म ततः शरीरजन्मेत्येवं क्रमारम्भेत्यर्थः । **इति विशेषणमिति** । एकदा दृश्यसन्तानशून्यैरारब्ध इत्युक्तौ न दोषः । क्रमारम्भपक्षे क्रमेण

सन्तानशून्यत्वस्यैव लाभादिति भावः । **क्रमारब्धेति** । दहनारम्भानन्तरं पवनारम्भ इत्येवंरूपेणेत्यर्थः । **इति हेतुविशेषण इति** । एकदारम्भकहेतुसाकल्यविशिष्टसन्तानत्वादिति हेतुविशेषणे इति भावः । द्व्यणुकादिक्रमेणारम्भस्वीकारेणेत्येतत्पूर्वत्रोत्तरत्र चासिद्धिबाधोपपादनायान्वेतीति ज्ञेयम् । साध्ये एकदेति विशेषणदाने बाधो ध्येयः । आदिपदेन दृष्टान्ते साध्यसाधनहीनता ग्राह्या ।

गु०दी०— ब्रह्माण्डस्यानङ्गीकृतत्वात् इत्यत्र प्रलयावसाने उत्पद्यमानब्रह्माख्यपक्षिणोऽण्डस्थानीयं हि ब्रह्माण्डम् । प्रलयाभाववादिना तस्यानङ्गीकारादित्यर्थः ।

यादु०— कुण्डेति । कुण्डनाशेऽपि तदन्तर्गतबदरावस्थानवद्ब्रह्माण्डनाशेऽपि तदन्तर्गतकार्यावस्थानोपपत्तेरित्यर्थः । ननु कालाग्निरुद्रादित्यादिसकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतादृष्टानां वृत्तिनिरोधे सति माहेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः । तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव कर्मणोत्तरस्मिन्नुत्तरस्मिन्सति पूर्वस्य पूर्वस्य विनाशः । ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्त इति हि प्रलयप्रक्रिया । अत्र हि पृथिव्यात्मकस्य ब्रह्माण्डस्य नाश इतरभूतनाशानन्तरमेव प्रतीयते । एवं च कथं ब्रह्माण्डनाशे कार्यान्तरावस्थानशङ्कोदय इत्यत आह **कालाग्निरुद्रादीति** । अत्र प्रमाणाभावादिति भावः । यद्वा कालाग्निरुद्रादिभिर्ब्रह्माण्डान्तर्वर्तिकार्यजातविनाशे सति पश्चादण्डमग्न्यादिना नश्यतीति हि पौराणिकी प्रलयप्रक्रिया । तथा च कथं ब्रह्माण्डनाशे कार्यान्तरावस्थानशङ्केत्यत आह **कालाग्नीति** । असिद्धत्वात् त्वन्मत इति शेषः । सत्यमेवं पौराणिकी प्रक्रियेति । सा तु त्वया नाङ्गीकृता किन्तु प्रागुक्तैवेति भावः । **क्रमारम्भेति** । शरीरारम्भसमयात्पूर्वं गिरिसन्तानावस्थितिः तत्पूर्वं तरुसन्तानावस्थितिरित्येवं सकलकार्याणां क्रमेणारम्भ एव सिद्धः स्यादित्यर्थः । बाधादीत्यत्र आदिपदेन दृष्टान्तस्य साध्यसाधनवैकल्यसङ्ग्रहः ।

वं०प०— कार्यान्तरेति । ब्रह्माण्डान्तर्गतकार्यान्तरेत्यर्थः । **कुण्डेति** । कुण्डनाशेऽपि तदन्तर्गतबदरावस्थानदर्शनादित्यर्थः । **द्वितीयेऽपीति** । विश्वशब्देन सकलकार्यग्रहणेऽपीत्यर्थः । **एकदैवेति** । एकदैवारब्ध इति साध्ये विशेषणदानात् तत्पूर्वमवयविशून्यसमयरूपप्रलयकालसिद्धिरिति भावः । **हेतुविशेषण इति** । तथा च क्रमारब्धदहनपवनादिसन्ताने हेतोरेवाभावान्न व्यभिचार इति भावः । एकदैवेति साध्ये विशेषणदाने व्यभिचाररूपं दूषणमुक्त्वा बाधादिरूपं दूषणान्तरमाह **द्व्यणुकादीति** । बाधादीत्यत्रादिपदेन साध्यवैकल्यग्रहणम् । अरण्युत्पन्नाग्निसन्तानेषु क्रमारम्भस्यैव सत्त्वेन एकदैवारब्धत्वाभावादिति भावः ।

कं०रा०— ब्रह्माण्डाभावेऽपीति । आद्यप्रयोगे विश्वसन्तानशब्देन ब्रह्माण्डमभिप्रेयत इति पक्षे दृश्यसन्तानशून्यैः समवायिभिरारब्ध इत्यस्य ब्रह्माण्डशून्यैः समवायिभिरारब्धत्वे पर्यवसानादारम्भकाणां ब्रह्माण्डशून्यत्वावस्थां सिद्ध्यति न चैतावता प्रलयसिद्धिः ब्रह्माण्डभावेऽपि कार्यान्तरावस्थितिसम्भवेन

सकलकार्यनाशासिद्धेरिति भावः । **कपिकपोलेति** । कपिकपोलान्तर्गतस्यौदुम्बरफलस्य नाशे तदन्तर्वर्तिमशकशरीरादेरपि नाशाद्यथा तदवस्थानमसम्भावितं तथा ब्रह्माण्डनाशे तदन्तर्गतसर्वकार्यनाशावश्यम्भावेन कार्यान्तरावस्थानमसम्भावितमित्यर्थः । **कुण्डेति** । कुण्डनाशे तदन्तर्गतबदरावस्थानस्येव ब्रह्माण्डनाशेऽपि तदन्तर्गतकार्यान्तरावस्थानस्योपपत्तेरित्यर्थः । ननु प्रलयकालाग्निः रुद्रो वा ब्रह्माण्डान्तर्गतं सर्वं कार्यं च दहतीत्यादियौगिकप्रक्रियाबलात् तत्काले कार्यान्तरावस्थानमसम्भावितमित्यत आह **कालाग्नीति** । **एकदेति** । क्रमेणारब्धदहनपवनादिसन्तानेष्वेकदारम्भकहेतुसाकल्यस्याभावान्न व्यभिचार इति भावः । **विशेषणेति** । पक्षीकृते सकलकार्यसन्ताने एकदारम्भकहेतुसाकल्यरूपविशेषस्यासिद्धिरित्यर्थः । साध्ये एकदेति विशेषणप्रक्षेपे पक्षीकृतसकलकार्यसन्तानस्य द्व्यणुकादिप्रक्रमेणारम्भस्वीकारेणैकदा सन्तानशून्यैः समवायिभिरारब्धत्वाभावाद्बाधः । उक्तन्यायेनारणिप्रभवाग्निसन्तानरूपदृष्टान्तस्य साध्यवैकल्यं च प्रसज्यत इत्यत आह **द्व्यणुकादीति** ।

श्रीनिधि०— द्वितीय इति । सकलकार्याणि वेति द्वितीयपक्ष इत्यर्थः । **अथैकदैवेति** । **विशेषणमिति** । **एकदारम्भक इति** । साध्येऽपि विशेषणेऽपीत्यर्थः ।

शे०वा०— ननु च यथा ज्वलनं विनाऽप्यरण्ये ज्वलनोत्पत्तिर्यथा वा वृश्चिकतन्दूलकणादिविजातीयजन्यमानानामपि वृश्चिकतान्दूलीयकत्वादिजातिरन्यथाऽब्राह्मणजातस्यापि सर्गादिकालीनब्राह्मणस्य विशिष्टादृष्टोपगृहीतपरमाणुजन्यत्वेन ब्राह्मणत्वोपपत्तेर्ब्राह्मणत्वादेर्ब्राह्मणपूर्वकत्वादिव्याप्यत्वविरहान्न तेन तत्साधनमुपपन्नमित्यरुचेराह **किञ्चेति** । यद्वाऽस्तु वोदाहृतानुमानानामाश्रयासिद्ध्यादिप्रसङ्गः । किमेतावताऽभ्यर्थ्यते । न चागमानबलत्वान्न प्रलयसाधकानुमानसत्प्रतिपक्षतेति वाच्यम् । प्रलयसाधकानुमानानामपि तदाक्रान्ततया तुल्यबलत्वानपायादित्याशयेनाह **किञ्चेति** । **आश्रयासिद्धेरिति** । न चागमसिद्धत्वात् ब्रह्माण्डस्य नाश्रयासिद्धिरिति वाच्यम् । तस्य सिद्धार्थकतया मुख्यार्थपरत्वाभावात् । अन्यथा प्रलयस्यापि तत एव सिद्धेरनुमानवैयर्थ्यापातादिति भावः । **कार्यान्तरेति** । गिरिसागरादिरूपकार्यान्तरेत्यर्थः । ब्रह्माण्डनाशे कार्यान्तरस्यापि नाशो भवतीत्यत्र नियामकाभावादिति भावः । ननु च कार्यान्तरावस्थानं न तावदहेतुकं वक्तुं शक्यम् । नित्यस्थितिप्रसङ्गात् । नापि नित्यहेतुकम् । तथा सति कादाचित्कत्वाभावप्रसङ्गात् । तदेवं प्रसक्तप्रकारद्वयनिषेधेन परिशिष्यमाणस्यानित्यहेतुनिबन्धनत्वस्यैव वाच्यत्वात् कथं कार्यान्तराविच्छेदः । यत्कार्यं यन्निबन्धनस्थितिकं तदपगमे तस्य निवृत्तिध्रौव्यात् । तेदयं प्रयोगः । ब्रह्माण्डान्तरवर्ति गिरिसागरादिकं विनाशवद्भवितुमर्हति महद्व्यान्तरेण विहन्यमानाधारवत्त्वात् । महादहनदह्यमानाश्रयवत्त्वात् । महादहनक्षुभितसमुद्रविलीयमानाधारवत्त्वादित्यनुमानं मनसि निधाय दृष्टान्तमाह **कपिकपोलेति** । कपीत्यतःपूर्वं कुपितेति शेषः । उपलक्षणं चैतत् । दावदहनदह्यमानदारूदरविघूर्णितघुणसङ्घातवत् प्रलयपवनोल्लासलीलावडवानलानुपातिपोतगतसांयात्रिकसार्थवच्चेत्यपि द्रष्टव्यम् । क्वचिच्छरीरादिवदिति पाठः । तत्रादिपदेनोक्तदृष्टान्तद्वयपरिग्रहः । **कुण्डेति** । कुण्डनाशेऽपि तदन्तर्गतबदराणामवस्थानवत् ब्रह्माण्डनाशेऽपि तदन्तर्गतकार्यावस्थानोपपत्तेरित्यर्थः ।

तथा तत्रैव व्यभिचारान्नानुमानेन कार्यान्तरविच्छेदसिद्धिरिति भावः । ननु कालाग्निरुद्रादित्यादिभिर्ब्रह्माण्डान्तर्वर्तिकार्यजातस्य विनाशे सति पश्चादण्डमप्यग्न्यादिना नश्यतीति पौराणिकी प्रलयप्रक्रिया । तत्कथं ब्रह्माण्डनाशे कार्यान्तरावस्थानशङ्कावकाश इत्यत आह **कालाग्नीति** । **असिद्धत्वादिति** । त्वन्मत इति शेषः । सत्यमेवं पौराणिकी प्रलयप्रक्रिया । न चेयं परस्य सम्मता । तेन प्रकारान्तरेणैव तदभ्युपगमात् । तथा च तद्रीत्या ब्रह्माण्डनाशे कार्यान्तरावस्थानशङ्कोपपन्नैवेति भावः । यद्वा कालाग्निरुद्रादित्यादिसकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतादृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छाऽऽत्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशस्तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन्विनष्टे सति पूर्वस्य पूर्वस्य विनाशस्ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्त इति हि प्रशस्तपादोक्ता प्रलयप्रक्रिया । अत्र च पृथिव्यात्मकस्य ब्रह्माण्डस्य नाशः तदितरसर्वनाशानन्तरमेव प्रतीयते । एवञ्च कथं ब्रह्माण्डनाशे कार्यान्तरावस्थानशङ्कोदय इत्यत आह **कालाग्नीति** । प्रमाणाभावादिति भावः । अथवा ननु यथा वातपित्तश्लेष्माणां च प्रकोपप्रशमक्रमानियमेऽप्येकदा त्रिदोषसन्निपाते देहसंहारः । यथा वा ग्रहाणां गमनानियमेऽपि कदाचित्सर्वमण्डलोपरागः तथा प्रकृते कालानलपवनमहार्णवानां सन्निपाते युगपत्सर्वकार्यनाशः स्यादित्यत आह **कालाग्नीति** । **असिद्धत्वादिति** । प्रमाणाभावादिति भावः । न चात्र पुराणादिरूपः शब्द एव प्रमाणमिति वाच्यम् । तथा सति तत एव प्रलयसिद्धेरनुमानवैयर्थ्यापातादित्यत्र तात्पर्यात् ।

कार्यमात्रपक्षीकरणेऽपि दहनादिसन्तानवत् क्रमेणारम्भः साध्यते युगपद्वेति विकल्पद्वयं मनसि निधायाद्यमर्थान्तरत्वेन दूषयति **यथा हीति** । क्रमारम्भसिद्धावपीत्यतःपरम् एकदा तदसिद्धयेति शेषः । अवयविशून्यसमयसिद्धेरित्यस्य न प्रलयसिद्धिरिति पूर्वेणान्वयः । उपलक्षणं चैतत् । कार्योत्पत्तेः प्राक् कार्यशून्यैरारम्भे साध्ये सिद्धसाधनं कार्यानधिकरणैरारम्भसाधने तु बाध इत्यपि द्रष्टव्यम् । द्वितीयमाशङ्क्य दूषयति **अथैकदैवेति** । **विशेषणमुपादीयेतेति** । साध्यस्येत्यर्थः । **क्रमारब्धेति** । एककार्योत्पादकालस्य तदितरसर्वकार्योत्पादककालेन व्याप्त्यसिद्धेरिति भावः । **विशेषणासिद्धेरिति** । हेतुविशेषणासिद्ध्या विशिष्टस्य स्वरूपासिद्धत्वादित्यर्थः । **स्वीकारेणेति** । सकलकार्याणां युगपदनुत्पत्तेरिति भावः । किञ्चैकदेति किं यदैककार्यस्य हेतुसाकल्यं तदैव तदन्येषामपि, किंवा क्रमेण । आद्ये प्रागुक्त एव दोषः । अन्त्ये क्रमिकहेतुसाकल्यस्य क्रमिककार्योत्पादकव्याप्तत्वात् युगपद्यदुत्पादे साध्ये व्याघात इत्याशयेन बाधादीत्यादिपदप्रयोगः ।

वा०र०— वृश्चिकतण्डुलीयकादिवदेव वर्णादि व्यवस्थाप्युपपद्यते । तथा हि इत्यादिकुसुमाञ्जल्यनुसारेण यथा वेलनं वेत्यादिवर्धमानानुसारेण च शङ्कां उत्थापयति **ननु च यथा ज्वलनमिति** । स एव हेतुः सर्वत्रेति कुसुमाञ्जलिव्याख्यानरूप इदानीमपि अदृष्टविशेषोपगृहीतभूमिजन्यत्वेनैवेति विशिष्टादृष्टे पाठहितेति च वर्धमानानुसारेणाह **विशिष्टादृष्टेति** । विशिष्टं कार्यकरणसमर्थं अदृष्टं अदृश्यं परमाणुगतावस्थाविशेष इति यावत् । तदुपगृहीतपरमाणुषु इत्यर्थः । 'न चागमसिद्धत्वाद् ब्रह्माण्डस्य' इत्यादि लीलावतीवर्धमानानुसारेण ।

न चागमेति । तथा च ब्रह्माण्डे परमाणुसद्भावे इतरपरमाणुषु च स्वतन्त्रेषु प्रागासीनेषु तदन्तःपातिनः प्राणिगणाः क्व वर्तन्तां कुसुमाञ्जल्युक्तब्रह्माण्डनाशसिद्धौ गिरिसागरादीनां प्रलय इति एतन्निराकर्तुं प्रवृत्तमूलम् **ब्रह्माण्डाभावेऽपीति** । तात्पर्यार्थाप्रतीतेः आह **ब्रह्माण्डनाश इति** । तस्मात् यत् कार्यं तन्निबन्धस्थितितदपाये तदपगमे तस्य निवृत्तिरिति कुसुमाञ्जलि अवतारिकारूपसन्तानस्यावस्थानमहेतुकं इत्यादिवर्धमानं तथा च ब्रह्माण्डेति वाक्यं वर्धमानं च मनसि निधायाह **ननु च कार्यान्तरेत्यादिना** । कुसुमाञ्जलौ कुपितकपोलेत्यादिना दृष्टान्तत्रयमुक्तम् । तत्र हेतुविशेषाः त्रयोऽभिमताः इत्याशयेन वर्धमानकृता महत् ह्रस्वोपक्षणतया हेतुत्रयमप्यभिमतं मूले इत्याशयेनावशिष्टं प्रयोगं दर्शयति **तदयं प्रयोग इति** । महापवनक्षुभितेति पाठः । प्रबलपवन इति दृष्टान्तानुसारात् । कुसुमाञ्जलौ तथैव सत्त्वात् । **आधारत्वादिति** । तदिदमनुमानमिति पाठः । **इत्यनुमानमिति** पाठेऽपीति अपिशब्दः आवर्तते । द्वितीय इतिशब्दस्येति सिद्धं यदनुमानमिति योजना । कुसुमाञ्जलौ कुपितेत्युक्तत्वात् । शेषं पूरयति **कपीत्वतःपूर्वमिति** । तत्रोक्त्यनुसारेणैवाह **उपलक्षणं चैतदिति** । **दावेति** । दारुदरेति पाठः । दावानलेन दह्यमानं यद्दारु तद्दरादिघूर्णितो ज्वालाधिक्येन क्षीरवत् ऊर्ध्वमागतो यो घुणानां क्रिमिविशेषाणां सङ्घातः समूहः तद्वलादित्यर्थः । **प्रलयेति** । प्रलयः पवनः तस्य यदुल्लासः उत्कृष्टावस्थाविशेषः । तेन जायमाना या लीलाक्रियाविशेषः तत्सहितो वडवानलो स लीलावडवानल इति मध्यमपदस्य गम्यमानत्वात् अप्रयोगः । तादृशवडवानलं अनुसृत्य पतति । एवंरूपं यमोत्तं नौस्तद्गतो यो सांपात्रिकानां नाविकानां सङ्घः समूहस्तद्वदित्यर्थः । कुसुमाञ्जलौ प्रबलपवन इत्युक्तावपि प्रबलपदव्याख्यानार्थमिव प्रलयेत्युक्तमिति ज्ञेयम् । **दृष्टान्तद्वयेति** । यद्यपि मशकशरीरित्येवोक्ततया पदार्थसमूहालाभः इत्याभाति तथा मशकानां शरीराणीति विग्रहे मशकशरीरसमुदायलाभः इत्याशयः । एतेनादिपदेन दृष्टान्तद्वयाभिधाने समुदायालाभ इति निरस्तम् । **पौराणिकीति** । इत्यादिपुराणप्रतिपादितेत्यर्थः । **कालाग्निरुद्रादित्यादि** सकलेति प्रशस्तपादभाष्ये सकलभुवनपतेर्महेश्वरस्य इत्येवोक्तावपि कालाग्निरुद्रादिपरमेश्वरपर्यन्तानां भुवनानां पत्युरिति किरणावलीकारोक्तव्याख्यानं मनसि निधाय इदं प्रशस्तपादभाष्यस्य विवरणेनोपपादनम् । **सञ्जिहीर्षासमकालमिति** । ननु सञ्जीहीर्षायाः अदृष्टवृत्तिनिरोधं प्रति कारणभूतायाः कथं वृत्तिनिरोधसमकालोत्पत्तिकत्वं युक्तमिति चेत् । अत्र समकालत्वं नाम सञ्जिहीर्षासमनन्तरकालत्वमिति वक्ष्यमाणत्वात् । यथोक्तम् । किरणावल्यामपि संहरणेच्छासमनन्तरकालमिति । शरीरेन्द्रियमहाभूतोपनिबन्धकानां उत्पत्तिस्थितिहेतुकानां इति किरणावल्योक्तार्थो ज्ञेयः । अत्र च महाभूतपदेन द्व्यणुकमपि विवक्षितम् । तस्यापि परमाणुभ्योऽधिकपरिमाणतया उपचारात् । **सर्वात्मगतेति** न सर्वात्मसु गमनं विवक्षितम् । येनादृष्टे गमनायोगः इति शङ्का स्यात् । अपि तर्हि सर्वात्मसमवेतत्वमेव । तथैव किरणावल्युक्तेः । निरोधोऽपि सर्गहेतूनामेव । न तु संहारहेतूनामपि । तेन संहारोपपत्तिः । **महेश्वरेति** । महेश्वरेच्छया सहिताः ये आत्मपरमाणुसंयोगनिवृत्तावित्यर्थः । तेषां शरीरेन्द्रियाणामित्यर्थः । **आपरमाण्वन्तमिति** । यद्यपि परमाण्वन्त इति वक्तुमुचितं तथापि अन्तशब्दस्यावयवयुक्तत्वभ्रमनिरासनं परमाणूनां अवधित्वमाविष्कर्तुं आङोऽधिकस्य प्रयोगः । तेन एवमुच्यते । यावत्परमाणवोऽवसानं तावन्त विनाश इति यथा दृष्टान्तः पट

इति । **तथा पृथिव्युदकेति** । तेनैव, प्रकारेण महेश्वरेच्छादिनेति यावत् । अनेनैव वक्तृक्रमेण । क्रियाविभागादिक्रमेणैवेत्यर्थः । उत्तरस्मिन् उत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाश इति पाठः । तस्यायमर्थः । जलादौ सति पार्थिवमहाभूतस्य ज्वलनादौ सति जलस्येत्यादीति । उत्तरस्मिन् उत्तरस्मिन् विनष्टे सति इत्येतदिति पाठस्तु लेखकागतः । उत्तरस्मिन् विनष्टे सति इति क्काचित्कः पाठः । तत्रापि उत्तरस्मिन् सतीत्यत्रत्यसतीत्यस्यैव विवरणं अविनष्टे सति इत्येतत् इति ज्ञेयम् । परमाणुपर्यन्तविनाशप्रतिपादनमात्रेणैव परमाण्ववस्थानलाभेऽपि सृष्टिहेतवः प्रकृत्यादयः एवावतिष्ठन्त इत्यादिसाङ्ख्यमतनिरासाय आह **ततः प्रविभक्ता इति** । **प्रविभक्ताः** कार्यद्रव्यरहिताः । प्रचयाख्यसंयोगरहिताश्चेत्यर्थः । एतत्प्रकरणे कश्चिद्विशेषो वर्धमाने बोध्यः । उक्तभाष्यस्य प्रकृतेऽपि योगमाह **अत्र चेति** । अत्र टीकायां पृथिव्याद्यात्मकस्येति पाठः । पृथिव्यादि पञ्चमहाभूतात्मकस्येति यावत् । **तदितरेति** च पञ्चमहाभूतेतरशरीरेन्द्रियादीत्यर्थो विवक्षितः । अतः पृथिवीव्यतिरिक्तभूतादिनाशानन्तरं पृथिवीनाश इति स्वीकारे प्रशस्तपादभाष्ये उत्तरस्मिन् सति पूर्वस्य विनाशप्रतिपादनात् जलादौ सति पार्थिवस्येत्यादि किरणावल्यां उक्तेश्च तद्विरुद्धमेतत् इति शङ्कानवकाशः । पृथिव्यात्मकस्य ब्रह्माण्डस्येति आदिपदशून्यः क्काचित्कः पाठः तु अन्यथाख्यातिकारीयव्याख्याने तथैव पाठस्य दर्शनेन लेखकागतः । यद्यपि अन्यथाख्यातौ उत्तरस्मिन् उत्तरस्मिन्नित्येवोक्ततया न तद्भाष्यात् पृथिव्याः अन्ते विनाशः उक्त इति प्रथमप्रतिपादितमिति तद्विरुद्धमेव फलकथनावसरे तथा वचनम् । तथापि तत्र पूर्वोत्तरविरोधो ग्रन्थान्तरविरोधश्च स्पष्ट एवेति दर्शयितुमेव पृथिव्याद्यात्मकस्य इत्यादि प्रयोगः । अत एव तत्राविनष्ट इति पदाभावेऽपि टीकायां क्वचित् अविनष्ट इति पदप्रयोगे तेनोत्तरनाशाभावेऽपि पूर्वनाशस्यैव प्रतीतेः अत एव चान्यथाख्यातावितरभूतनाशानन्तरं इत्युक्तेऽपि टीकायां तदितरसर्वनाशानन्तरं इत्येवोक्तम् । एतत्पाठस्तु उत्तरस्मिन् इत्यत्राविनष्ट इति शेषपूरणेनेति ज्ञातव्यम् । एतेनान्यथाख्यातिपक्षेऽपि स्पष्टदूषणः । केचित्तु विनष्ट इति लेखकागतमाश्रित्य किरणावल्युक्तात् वर्णकान्तरमेतदिति चाश्रित्य ब्रह्माण्डनाशान्तिमः इत्यानीय तद्दूषणावसरे किरणावल्यादिविरुद्धं वर्णकान्तरमेतत् अयुक्तमित्येवं परिहारोऽपि स्पष्टत्वात् शिष्यैरेवोह्यतामिति भावेनेत्युक्तमित्याहुः । ननु यथा वातपित्तेत्यादिवैद्यकादिरीत्या शोधनीयोऽस्ति । अस्यापि प्रकारस्य एतदर्थतया वर्णने निमित्तम् । (पुराणे यः प्रकारः उक्तोऽस्तीति कृत्वेति ज्ञेयम् ।) मूलस्य लीलावत्यनुवादरूपत्वात् तद्व्याख्यानवर्धमानानुसारेणाह **उपलक्षणं चैतत् इत्यादिना आदिपदप्रयोगः इत्यन्तेन** । **अथैकदैवेति** । विशेषणमित्यादिप्रतीकोपादानपाठः । **तदन्येषामपीति** । हेतुसाकल्यमिति वर्तते । इति विवक्षितमिति शेषः ।

स०न्र०— कुण्डेति । कुण्डाश्रितस्यापि बदरस्य तन्नाशेऽप्यनाशवत् ब्रह्माण्डनाशेऽपि तदाश्रितकार्यान्तरस्यानाशोपपत्तिरित्यर्थः । **कालाग्निरिति** । रुद्रमुखात् कालाग्निरुत्पद्यते । तेन ब्रह्माण्डान्तर्वर्तिकार्यनाशे ब्रह्माण्डनाशो भवतीति प्रक्रियाया इत्यर्थः । **क्रमारम्भेति** । गिरिसन्ताननाशस्य सलिलसन्ताननाशासमानकालत्वात् । न चैवं सर्वसन्ताननाशासिद्धिः । क्षितिसन्ताननाशस्य गिरिसन्ताननाशसमानकालीनत्वं, गिरिसन्तानविनाशस्य क्षितिसन्तानसमानकालत्वमित्येवं सर्वसन्ताननाशोपपत्तेरिति भावः । **दहनपवनादि-**

सन्तानैरिति । सत्येव दहनसन्ताने दहनान्तरोत्पत्तेरित्यर्थः । बाधादीत्यादिपदेन साधनवैकल्यपरिग्रहः । **द्व्यणुकादीति** । त्र्यणुकावस्थाने तत्प्रत्यक्षाद्यापत्त्या तस्यासम्भवेऽपि द्व्यणुकावस्थानेऽपि तस्यातीन्द्रियत्वेन प्रत्यक्षाद्यनापत्तेरिति भावः ।

विठ्ठल०— प्रथमप्रयोग इति । विश्वसन्तानोऽयमिति प्रयोग इत्यर्थः । **ब्रह्माण्डाभावेऽपीति** । दृश्यसन्तानशून्यैरित्यस्य दृश्यब्रह्माण्डहीनैरित्यर्थः पर्यवस्यति । न च तावता प्रलयसिद्धिः ब्रह्माण्डनाशेऽपि तदन्तर्गताविनष्टकार्यान्तरावस्थितिसम्भवात् । सर्वकार्यविनाशस्यैव प्रलयत्वादिति भावः । **कुण्डबदरवदिति** कुण्डनाशेऽपि तदन्तर्गतबदरावस्थानवद्ब्रह्माण्डनाशेऽपि तदन्तर्गतकार्यावस्थानोपपत्तिरिति भावः । ननु सञ्जि-हीर्षोर्महेश्वरस्यादिप्रक्रियायां सर्वकार्यनाशानन्तरमेव ब्रह्माण्डनाशोक्तेः । कथमण्डनाशेऽपि तदन्तर्गतकार्याव-स्थानमुच्यत इत्यत आह **कालाग्नीति** । प्रलयाभाववादिनो अस्याः प्रक्रियायाः असिद्धत्वादित्यर्थः । **द्वितीयेऽपीति** । विश्वशब्देन सकलकार्याण्यभिप्रेतं त इति द्वितीयपक्षेन प्रलयसिद्धिः । दहनादिसन्ता-नानां क्रमेणास्तमयेऽपि दहनादिसजातीयकार्यान्तराणां वा विजातीयकार्यान्तराणां सद्भावादिति भावः । **तथा तरुगिरीति** । तरुगिर्यादिकार्याणां दृश्यसन्तानशून्यसन्तानान्यारब्धत्वसाधनेन प्रथमं तरुसन्तानजन्म पश्चाद्गिरि-सन्तानजन्मेत्येवं क्रमारम्भसिद्धावपि पर्यवसानान्न प्रलयसिद्धिः । सजातीयविजातीयकार्यान्तरसद्भावनाभेन सर्वात्मना अपविशून्यसमवायासिद्धेरित्यर्थः । **दृश्यसन्तानशून्यैरित्यत्र** क्रमारम्भव्यावृत्तये एकदैवेति विशेषण-मुपादीयते । सकाल एव प्रलय इति ब्रूम इत्याशङ्क्याह **अथैकदैवेति** । एकदा सर्वकार्यारम्भकहेतुसाकल्ये सति सन्तानत्वादिति हेतुर्विशेष्यते । न चायं क्रमारब्धदहनादिसन्तानेष्वस्ति । अतो न तत्र व्यभिचार इत्यत आह **एकदेति** । प्रलयाभाववादिमते एकदारम्भकहेतुसाकल्यसाकल्यस्यासिद्धत्वाद्विशेषणासिद्धिरिति भावः । **बाधादीति** । प्रथमं द्व्यणुकारम्भ इति पक्ष इति एकदेत्यस्य बाधितत्वादित्यर्थः । आदिपदेन दृष्टान्ते साध्यवैकल्यसङ्ग्रहः ।

३८ **सु०— एतेन द्वितीयानुमानमपि निरस्तम्, ब्रह्माण्डानभ्युपगमात् । अभ्युप-गमेऽप्यवयवानामावापोद्धाराभ्यामेवोत्पादविनाशयोरुपपत्तेः । कार्यान्तरावस्थानोपपत्तेश्च ॥ तृतीयेऽप्यपसिद्धान्तः, क्रमेणोच्छेदस्याभ्युपगम(त्त्व)ात् ॥ चतुर्थेऽपि पटादिभ्यः पूर्वविनष्टैस्तन्त्वादिभिर्व्यभिचारः । परमाणुत्वेन- हेतुविशेषणेऽपि द्व्यणुकाद्यवस्थान-सम्भवेन दृष्टान्तस्य सन्दिग्धसाध्यता ॥ पञ्चमेऽपि किं भूगोलका एव सन्तानशब्देन उच्यन्ते तदतिरिक्तो वा कश्चित् । आद्ये सिद्धसाधनम्, अवयवानामावापोद्धाराभ्यां सन्ततोत्पत्तिविनाशसिद्धेः । द्वितीये त्वाश्रयासिद्धिः ॥ षष्ठं त्वाभाससमानयोगक्षेमत्वा-दुपेक्षणीयमिति ।**

परि०— आवापोद्धाराभ्यामिति । एकस्यावयवस्यावापे प्रक्षेपे उत्पत्तिः । उद्धारेऽपगमे च विनाश इत्यङ्गीकारेण साध्यपर्यवसानोपपत्त्या प्रलयासिद्धिरिति भावः । **कार्यान्तरेति** । ब्रह्माण्डनाशेऽपि पूर्वोक्तरीत्या तदन्तर्गतकार्यान्तरावस्थानोपपत्तेरित्यर्थः । यत्र समवायिकारण-तन्तुनाशात्पटनाशः तत्र सत्यप्यारम्भकत्वे साध्यं नेति भावेनाह **पटादिभ्य इति** । सत्स्वेव समवायादिषूपादेयत्वतच्छून्यत्वादिव्यवहारो न तु तदभावे; शून्यपदेन ध्वंसस्य विवक्षितत्वादिति भावः । **सन्ततोत्पत्तिविनाशेति** । तथैव तार्किकैरभ्युपगमादिति भावः । **आभाससमानेति** । अयं पटः एतत्पटान्यावयविकालीनत्वरहितकिञ्चित्कालीनपटान्यः पटत्वात्पटान्तरवदित्यादेरपि वक्तुं शक्यत्वादिति भावः ।

गु०दी०— पक्षं त्वाभाससमानयोगक्षेमत्वात् इत्यत्र स्वान्यशशविषाणासमानकालीनत्वरहित-किञ्चित्कालीनक्रियान्येति साधने शशविषाणस्यापि सिद्धेः । यद्वा स्वान्यावयवसमानकालत्वानधिकरण-किञ्चित्कालीनक्रियान्येत्यपि साधयितुं शक्यत्वेनावयवस्याप्यभावः स्यात् । दृष्टान्ते तु विशेषणाभावादेव विशिष्टाभावः । पक्षे त्वदनुमानवदेवास्माकमपि सुलभ इति भावः ।

यादु०— क्रमेणोच्छेदस्येति । महाभूतानामप्यनेनैव क्रमेण उत्तरस्मिन्नुत्तरस्मिन्सति पूर्वस्य पूर्वस्य विनाश इति प्रशस्तपादभाष्य उक्तत्वादिति भावः । **पटादिभ्य इति** । नष्टानां तन्तूनां पटध्वंसाद्यनधिकरणत्वेन तत्र साध्याभावाद्धेतोर्व्यभिचार इत्यर्थः । **आभाससमानेति** । पक्षादौ क्रियापदस्थाने घटपदप्रक्षेपेणापि प्रयोगे प्रलयकालीनघटसिद्धिरप्येवं स्यात् ततश्च तत्र यः प्रतीकारः स प्रकृतेऽपि तुल्य इति भावः । केचित्तु इयं क्रिया स्वान्यप्रागभावकालीनत्वानधिकरणकिञ्चित्कालीनक्रियाऽन्येत्यपि साधयितुं शक्यत्वेन प्रलये प्रागभावस्या-प्यभावसिद्ध्यापत्त्या त्वदभिमतहानिः स्यादित्यर्थ इत्याहुः ।

वं०प०— अवयवानामिति । पीलुपाकप्रक्रियापक्षे ब्रह्माण्डावयवानां प्रबलवायुवह्न्याद्युपघातेनोद्धारे सन्तानिनां परमाणूनां दृश्यसन्तानशून्यत्वं प्राप्तम् । पुनर्द्व्यणुकादिप्रक्रमेणावयवानामागमे ब्रह्माण्डस्यारब्धत्वं प्राप्तम् । एवमुत्पादविनाशयोरुपपत्त्या ब्रह्माण्डपरमाणूनां पूर्वमुत्पादितसजातीयसन्तानान्तरवत्त्वस्येदानीं वर्तमानकालेऽपि सत्त्वेऽर्थान्तरत्वप्राप्त्या प्रलयासिद्धिरिति भावः । किञ्चानेनानुमानेन पूर्वमुत्पादितब्रह्माण्ड-नाशसिद्धावपि सर्वकार्यविनाशरूपः प्रलयो न सिद्ध्यति । ब्रह्माण्डनाशेऽपि कुण्डबदरवत् तदन्तर्गत-कार्यावस्थानसम्भवादित्याह **कार्यान्तरेति** । ब्रह्माण्डातिरिक्तेत्यर्थः । **पूर्वविनष्टैरिति** । समवायिकारणनाशस्थल इत्यर्थः । तथा च तादृशेषु तन्तुष्वारम्भकत्वे सत्यपि समग्रोपादेयसम्बन्धध्वंसाधिकरणत्वरूपं समग्रोपादेय-प्रतिबन्धशून्यत्वरूपं साध्यं नास्ति । ध्वंसस्य प्रतियोगिसमवायिदेशवृत्तित्वेन प्रतियोगिभूतपटसमवायिदेशानां तन्तूनां नष्टत्वेनोपादेयध्वंसानधिकरणत्वाद्व्यभिचार इति भावः । **सम्भवेनेति** । पवनानां स्थूलकार्याणां

नष्टत्वेऽपि पवनद्व्यणुकावस्थानसम्भवेन तदारम्भकपरमाणूनां समग्रोपादेयप्रतिबन्धशून्यत्वं सन्दिग्धमिति न दृष्टान्तत्वं युक्तम् । निश्चितसाध्यवत एव दृष्टान्तत्वादित्यर्थः । अत एव सम्भवेनेत्युक्तम् । **भूगोलका एवेति** । भूप्रभेदभूता मृद्गिरितरुप्रभृतयः समुदायिन एवेत्यर्थः । **कश्चिदिति** । समुदाय्यतिरिक्तः कश्चित्समुदाय इत्यर्थः । **अवयवानामिति** । पीलुपाकप्रक्रियापक्षे प्रबलवायूपघातादिना भूगोलकानामवयवापगमादीनां साकल्येनोच्छेदस्य सततं सर्वदा इदानीमपि सत्त्वेन सिद्धसाध्यतया न प्रलयसिद्धिरिति भावः । **आश्रयासिद्धिरिति** । समुदाय्यतिरिक्तसमुदायाभावादिति भावः ।

कं०रा०— एतच्छब्दपरामृष्टं हेतुमाह **ब्रह्माण्डानभ्युपगमादिति** । प्रलयावसाने उत्पद्यमानब्रह्माख्यपक्षिणोऽण्डस्थानीयं हि ब्रह्माण्डं प्रलयमनभ्युपगच्छता च ब्रह्माण्डस्यानङ्गीकृततया वर्तमानब्रह्माण्डपरमाणुरूपाश्रयासिद्धेरित्यर्थः । **अभ्युपगमेऽपीति** । ब्रह्माण्डाभ्युपगमेऽप्यवयवानामावापोद्धाराभ्यामेव तस्योत्पादविनाशयोः सम्भवेन वर्तमानब्रह्माण्डपरमाणूनामुत्पादितसजातीयसन्तानानां च त्वस्योपपत्त्या स्वरूपेण ब्रह्माण्डस्योत्पादविनाशयोरसिद्धेः प्रलयासिद्ध्यार्थान्तरत्वादित्यर्थः । **कार्यान्तरेति** । स्वरूपेण ब्रह्माण्डस्योत्पादविनाशसिद्धावप्युक्तरीत्या ब्रह्माण्डाभावदशायां कार्यान्तरावस्थानोपपत्तेः प्रलयासिद्ध्यार्थान्तरत्वध्रौव्यादित्यर्थः । **पटादिभ्य इति** । यद्यपि पटादिभ्यः पूर्वं नष्टेषु तन्त्वादिषु नष्टत्वदशायामारम्भकत्वरूपहेतोरभावाद्विद्यमानतादशायां तु पटाद्युत्पत्तिप्राक्कालीनसमग्रोपादेयप्रबन्धशून्यत्वमादाय साध्यस्यापि सत्त्वान्न व्यभिचार इति तथापि पटादिभ्यः पूर्वविनष्टेषु पटाद्युत्पत्तेः पूर्वविनष्टेषु अनुत्पादितपटादिकेष्विति यावत् । तादृशतन्त्वादिषु व्यभिचारः तत्रारम्भकत्वयोग्यरूपहेतोः सत्त्वेऽपि सर्वदा समयोपादेयप्रबन्धशून्यत्वस्यैव सत्त्वेन कदाचित्समग्रोपादेयप्रबन्धशून्यत्वरूपसाध्याभावान्न हि यत्सर्वदा यच्छून्यं तत्कदाचित् तच्छून्यमिति व्यपदिश्यत इत्याशयोऽत्र द्रष्टव्यः । **परमाणुत्वेनेति** । परमाणुत्वेन हेतुविशेषणेनोक्तव्यभिचारपरिहारेऽपि नष्टपवनारम्भकपरमाणुषु त्र्यणुकपर्यन्तकार्यजातस्य स्पर्शानुपलब्ध्या व्यतिरेकनिश्चयेऽपि पवनद्व्यणुकस्यामहत्त्वेन तत्सत्त्वेऽपि तदीयस्पर्शानुपलब्ध्युपपत्त्या तद्व्यतिरेकनिश्चयाभावेन तत्सत्त्वसम्भावनया समग्रोपादेयप्रबन्धशून्यत्वस्य सन्दिग्धत्वात् दृष्टान्तस्य सन्दिग्धसाध्यतादोषोऽपरिहार्य इति भावः । **आश्रयेति** । भूगोलकातिरिक्तसन्तानस्याभावादाश्रयासिद्धिरिति भावः । **षष्ठमिति** । इयं क्रिया स्वान्यावयविकालीनत्वानधिकरणयत्किञ्चित्कालीनक्रियान्याक्रियात्वादिति षष्ठमनुमानमियं क्रिया स्वान्यावयवकालीनत्वानधिकरणयत्किञ्चित्कालीनत्वानधिकरणयत्किञ्चित्कालीन-क्रियान्याक्रियात्वादित्यत् यवमात्रानधिकरणकालसाधकाभासेन समानयोगक्षेमत्वादुपेक्षणीयमित्यर्थः ।

श्रीनिधि०— **आवापोद्धाराभ्यामेवेति** । अवयवानां संश्लेषविश्लेषाभ्यामित्यर्थः । **पटादिभ्यः पूर्वविनष्टैरिति** । अत्र पटकालीने तन्तौ कदाचित्समग्रोपादेयप्रबन्धशून्यत्वमस्ति न व्यभिचारः । उक्तरूपेण कदाचित्साध्यसत्त्वमिति व्यभिचार इति एवमुक्तम् । **द्वितीये त्वाश्रयासिद्धिरिति** । तस्याप्रसिद्धत्वादिति भावः ।

शे०वा०— एतेनेत्यनेन परामृष्टं दूषणजातमेव दर्शयति **ब्रह्माण्डेति** । तथा चाश्रयासिद्धिरिति भावः । नन्वागमादेव तत्सिद्धेर्नाश्रयासिद्धिरित्यतस्तर्हि तत एव प्रलयसिद्धेरनुमानवैयर्थ्यमिति सत्येव दोषे आगमेन तत्सिद्धिमभ्युपेत्य दूषणान्तरमाह **अभ्युपगमेऽपीति** । तत्तदवयवोपगमापगमाभ्यां क्रमेण नाशोत्पादेऽपि प्रकृतसाध्योपपत्त्या ब्रह्माण्डनाशासिद्ध्या प्रलयासिद्धेरर्थान्तरत्वमित्यर्थः । ब्रह्माण्डनाशमङ्गीकृत्याप्यर्थान्तरमाह **कार्यान्तरेति** । ब्रह्माण्डनाशे तदन्तर्गतस्य नाश एवेत्यत्र नियामकविशेषानुपलम्भाच्छङ्कितस्य प्रथमानुमान-दूषणावसरे आशङ्क्य दूषितत्वादिति भावः । **अभ्युपगतत्वादिति** । महाभूतानामप्यनेनैव न्यायेनोत्तरस्मि-न्नुत्तरस्मिन्सति पूर्वस्य पूर्वस्य विनाश इति तदुक्तेरिति भावः । **पटादिभ्य इति** । पटारम्भकत्वेऽपि नष्टानां तन्तूनां पटध्वंसाद्यनधिकरणत्वेन तत्र साध्याभावादिति भावः । **द्व्यणुकाद्यवस्थानेति** । प्रत्यक्षानुपलम्भ-बाधिततया त्र्यणुकावस्थानानुपपत्तावपि द्व्यणुकावस्थानेऽपि तस्यातीन्द्रियत्वेन प्रत्यक्षत्वानापत्तेर्नानुपलम्भबाध इत्यर्थः । **सन्दिग्धेति** । तथा च पक्षसमत्वान्न तेषां दृष्टान्तत्वमिति भावः । **आभासेति** । अयं घटः स्वान्यावयविकालीनत्वानधिकरणकिञ्चित्कालीनघटान्यो घटत्वाद्घटान्तरवदित्याभाससमानयोगक्षेममित्यर्थः । स्वान्यत्वरूपविशेषणाभावप्रयुक्तस्वान्यावयविकालीनत्वरूपविशिष्टाभाववत्पक्षीभूतघटान्यत्वस्य घटान्तरे सत्त्वाद् दृष्टान्तता । उक्तरीत्या विशेषणाभावप्रयुक्तविशिष्टाभावस्य पक्षीभूतघटमात्रनिष्ठत्वेन तदन्यत्वरूपसाध्यस्य च तत्र बाधितत्वेन हेतोः पक्षधर्मताबलादवयविकालीनत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभाववत्किञ्चित्कालीनघटमादायैव तदन्यत्वरूपसाध्यस्य पक्षे सिद्धिरित्यनवयविकालीनक्रियासिद्धिवत् तत्कालीनघटसिद्धिरपि स्यादिति भावः ।

वा०र०— वर्धमानानुसारेणैवाह **तत्तदवयव इति** । **नाशोत्पादेऽपीति** । उपगमापगमाभ्यां यथायोग्यं सम्बन्धः । उपगमेनोत्पादे अपगमेन नाश इति । उत्पादविनाशयोः नैककालकता किन्तु भिन्नकालकतेत्युक्तं **क्रमेणेति** । महाभूतानामपि अनेनैव क्रमेणेति पाठः । न्यायेनेति लेखकागतम् । क्रमेणेत्येव तद्भाष्यकारोक्तेः । **तदुक्तेति** । उक्तेत्यस्य प्रशस्तपादभाष्ये उक्तेत्यर्थः । **पटारम्भकत्वेऽपीति** । अनेकहेतुसत्त्वं उक्तं भवति । **ध्वंसाद्यनधिकरणत्वेनेति** । शून्यशब्दस्य कादाचित्काभावपरत्वेन प्राक् व्याख्यातत्वात् । प्रध्वंसस्यैव प्रागभावस्यापि कादाचित्कत्वाभावत्वेन तदुभयसत्त्वे प्रबन्धशून्यत्वं भविष्यतीत्यतोऽत्र तदुभयाभावप्रतिपादनाय ध्वंसादि इत्यादिपदप्रयोगः । **प्रत्यक्षानुपलम्भेति** । एतच्च द्व्यणुकावस्थानेति पाठमाश्रित्य व्याख्यातम् । आदिपदेन त्र्यणुकादिग्रहणाशयेनादिपदगर्भपाठमुपपादनापक्षे त्र्यणुकादिसत्त्वे तदनुपलम्भानुपपत्तिरिति अनुप-लम्भबाध आयाति इति सूचितं भवति । ननु द्व्यणुकादीति बहुपुस्तकेषु पाठः प्रतीयत इति तर्हि आदिपदस्य का गतिरिति चेत् । न । त्र्यणुकाद्यवस्थानेऽपि तत्तत्स्पर्शस्यावयविस्पर्शवत् ग्रहणाभावेन तत्स्पर्शानुभूतत्वादि प्रकल्प्य त्र्यणुकादेः महत्वसमानाधिकरणोद्भूतस्पर्शवत्त्वाभावेन योग्यतयाऽनुपलम्भाभावेन त्र्यणुकादेरपि आदि-ग्रहणोपपत्तेः । वस्तुतस्तु परमाणुद्वयसंयोगस्यापि परमाणुवदेवातीन्द्रियतया तस्याप्रत्यक्षत्वाशयेनादिपदमिति न कश्चित् दोष इत्यवधेयम् ।

सं०व्या०— षष्ठं त्वाभासेति । इयं क्रिया, स्वान्यप्रागभावकालीनत्वानधिकरणकिञ्चित्कालीन-क्रियाऽन्या, क्रियात्वात् अन्यक्रियावत्; इत्यपि साधयितुं शक्यत्वेन अनेन सर्वप्रागभावविनाशकाले काचन क्रिया वर्तते इति सिद्धे प्रागभावः कर्तेति त्वदभिमतहानिः स्यादिति भावः ।

विठ्ठल०— अभ्युपगमेऽपीति । सदा विद्यमाने एव ब्रह्माण्डे केषाञ्चिदवयवानामावापेन संश्लेषेण शिष्टस्योत्पत्तिः । केषाञ्चिदुद्वापेनापगमेन विशिष्टस्य विनाश इत्येवं विशिष्टत्वब्रह्माण्डोत्पत्तिविनाशेऽपि विशेष्यब्रह्माण्डानुवृत्त्या प्रलयासिद्धेरिति भावः । अस्तु वा ब्रह्माण्डनाशः तथापि न प्रलये सिद्धिः तरुगिर्यादि-कार्यान्तरावस्थानोपपत्तेरित्याह **कार्यान्तरेति** । **तृतीयेऽपीति** । सर्वे सन्तानाः कदाचित्सहैवोच्छिद्यन्त इति तृतीयानुमान इत्यर्थः । **क्रमेणैवोच्छेदस्येति** । महाभूतानामनेनैव क्रमेणैवोत्तरस्मिन्नुत्तरस्मिन् पूर्वस्य पूर्वस्य विनाश इति प्रशस्तपादभाष्येऽभ्युपगतत्वादपि सिद्धान्त इत्यर्थः । **पटादिभ्यः पूर्वविनष्टेति** । समवायिकारणं तन्तुनाशानन्तरं पटनाशस्थले तन्तुष्वारम्भकेषु समग्रोपादेयसम्बन्धस्यैव सत्त्वाद् व्यभिचार इत्यर्थः । **सन्दिग्धसाध्यतेति** । परमाणूनां कदाचित्समग्रोपादेयसम्बन्धशून्यत्वं सन्दिग्धम् । द्व्यणुकावस्थानाङ्गीकारे बाधकाभावादित्यर्थः । सिद्धसाधनत्वमुपपादयति **अवयवानामिति** । प्रागुपपादितरीत्यावयवे संश्लेषविशेषाभ्यां सर्वदा विशिष्टभूगोलस्योत्पत्तिविनाशयोः सिद्धत्वेन कदाचित्साकल्येनोच्छिद्यत इति साधने सिद्धसाधनेत्यर्थः । **आभाससमानयोगक्षेमत्वादिति** । पक्षादौ क्रियापदस्थाने घटपदप्रक्षेपेणापि प्रयोगे प्रलयकाले घटसिद्धिरप्येव स्यात् । ततस्तत्रत्यः प्रतीकारः स प्रकृतेऽपि तुल्य इति भावः । यद्वा साध्ये किञ्चित्कालीनक्रियाऽन्या न भवतीति प्रक्षेपे तदभावस्यापि साधयितुं शक्यत्वादिति भावः ।

॥ इति धर्मादिसाधकानुमानानामाभासत्वे प्रलयसाधकानुमानानामप्याभासत्वम् ॥

॥ इति 'प्रलयस्यानुमानसिद्धत्वाङ्गीकार'सम्भवः ॥

* * *

॥ अथ द्वितीयतृतीयविकल्पदूषणे परपक्षस्याप्रसिद्धविशेषणतायां 'प्रलयस्यागमसिद्धत्वे धर्मादिकस्याप्यागमसिद्धता' ॥

३९ **सु०— अथ 'मा भूदनुमानैः प्रलयसिद्धिः, तथाऽप्यागमैर्भविष्यति, तेषां सिद्धार्थेऽपि प्रामाण्यस्य साधितत्वात्; ततो नाप्रसिद्धविशेषणते'ति ब्रूषे; तर्ह्यस्माक-मपि धर्मादिसिद्धिरागमाद्भविष्यतीति कथमाश्रयासिद्धिरिति ।**

एवं प्रलये जीवेश्वरसद्भावं साधयता धर्मादिसत्त्वमपि साधितमिति न प्रलये भावमात्रासत्त्वसाधनं युक्तम् ।

एवम् आदिकार्यं पक्षीकृत्य सोपादानत्वसाधने प्रकृत्यादिसिद्धिरपि द्रष्टव्येति ।

परि०— आगमैरिति । श्रुत्यादिरूपैरित्यर्थः । 'अपश्यमप्यये', 'यमप्येति भुवनं साम्पराये', 'यत्प्रयन्ति' इत्यादिश्रुतयः । 'दुर्गा वाप्यवरा ततः । सर्वसंहारकारित्वादि'त्यादिदशमतात्पर्याद्युक्तस्मृतयः । 'स्रष्टा पाता च संहर्ते'त्यादिपुराणवाक्यानि । 'अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके, इत्यादीतिहासवाक्यानि च ध्येयानि । **साधितत्वादिति** । कार्यता चेत्यादाविति भावः । **आगमादिति** । यजेतेत्यादिश्रुत्यादिरूपादित्यर्थः ।

शे०वा०— नन्वागमानां सिद्धार्थत्वेन स्वार्थे प्रामाण्याभावात् कथं तैः प्रलयसिद्धिरित्यत आह **तेषामिति** । **साधितत्वादिति** । कार्यतावाद इति शेषः । **नाप्रसिद्धविशेषणतेति** । ईश्वरादिकं प्रलयेऽसद्भवितुमर्हति भावत्वादितीश्वराद्यसत्त्वसाधकानुमानस्येति शेषः । **आगमादिति** । 'पुण्येन पुण्यं लोकं नयति पापेन पापमि'त्यादेरित्यर्थः । **कथमाश्रयेति** । धर्माधर्माश्रयत्वतदधिष्ठातृत्वादिना जीवेश्वरसाधकस्य धर्माधर्माश्रयत्वेनेत्यादिमूलोक्तप्रतिपक्षानुमानस्येति शेषः ।

वा०र०— कथमाश्रयतेति प्रतीकोपादानेनाश्रयेति इति पाठस्तु लेखकागतः । समानार्थत्वेऽपि कथमाश्रयासिद्धिरितीत्युपसंहारमूलानुसारेण तथैव प्रतीकोपादानस्य उक्तत्वात् । धर्माधर्माश्रयत्वतदधिष्ठातृत्वाभ्यां इति पाठः । आदिपदं लेखकागतम् ।

विठ्ठल०— ननु प्रतिपक्षसद्भाव एवानुमाने कारणमित्यत आह **आगमैरिति** । यमप्येति भुवनं साम्पराये । अपश्यमप्यये मायया । रात्र्यागमे प्रलीयन्त इत्यागमैरित्यर्थः । **नाप्रसिद्धविशेषणतेति** । ईश्वरादिकं प्रलयेऽसद्भवितुमर्हतीत्यनुमानस्येति शेषः ।

॥ इति प्रलयस्यागमसिद्धत्वे धर्मादिकस्याप्यागमसिद्धता ॥

॥ इति 'ईश्वरादिकं प्रलयेऽसद्भवितुमर्हति' इतिपरपक्षस्याप्रसिद्धविशेषता ॥

॥ इति द्वितीयतृतीयविकल्पदूषणम् ॥

॥ इति धर्माधर्मसंज्ञितादृष्टाभावशङ्कायां विकल्पत्रयं तन्निरसनञ्च ॥

॥ इति आश्रयासिद्धिशङ्कानिरसनम् ॥

॥ इति उक्तानुमानदूषणनिरासः ॥

॥ इति जीवसद्भावसाधकानुमानम् ॥

॥ इति दृष्टान्तपदस्य 'प्रलये परमेश्वरादिसद्भावसाधकानुमान' वाच्यत्वम् ॥

॥ इति एकां वृत्तिमभिप्रेत्य 'न तु दृष्टान्ताभावात्' इति सूत्रस्य व्याख्यानम् ॥

* * *

॥ अथ द्वितीयां वृत्तिमभिप्रेत्य 'न तु दृष्टान्तभावात्' इति सूत्रस्य व्याख्यानम् ॥

४० सु०— प्रथमसूत्रेऽभावस्य कर्तृत्वनिरासायानुमानमुक्तम् । इदानीमितोऽपि नाभावकर्तृकं जगत्, चेतनकर्तृकत्वे दृष्टान्तभावादिति सूत्रस्य वृत्त्यन्तरमभिप्रेत्य चेतनकर्तृकत्वे अनुमानमाह उत्पत्तीति ।

अनु०— उत्पत्तिनाशकारी च बुद्धिमान् दृश्यते क्वचित् ।
तद्दृष्टान्तेन सर्वत्र कर्ता किं नानुमीयते ।

बुद्धिमानुत्पत्तिनाशकारी इति बुद्धिपूर्वं तत्कर्तेत्यर्थः । क्वचित् पटादौ । सर्वत्र विप्रतिपन्ने कार्ये ।

महदादिकार्य इत्येवोक्ते अंकुरादौ व्यभिचारः शङ्क्येत, तदर्थं तस्यापि पक्षनिक्षेपार्थं सर्वत्रेत्युक्तम् ।

कर्ता बुद्धिमानिति शेषः । अन्यथाऽभावकर्तृत्ववादिनं प्रति सिद्धसाधनताप्रसङ्गात् ।

किम् आक्षेपे । अननुमाने न किमपि कारणम्, दृष्टान्ताभावेन प्रतिपक्षासम्भवादित्यर्थः ।

एतेन 'स्वपक्षदोषाच्चे'ति सूत्रमपि व्याख्यातं भवति ।

अयमत्र प्रयोगक्रमः । विमतं कार्यं चेतनोत्पाद्यं कार्यत्वाद्घटवत् । चेतनविनाश्यं च तत एव तद्वदेव । विमतोत्पत्तिश्चेतनकर्तृका उत्पत्तित्वात् पटोत्पत्तिवत् । विमतो विनाशश्चेतनकर्तृको विनाशत्वात् सम्मतवदिति । अत्र विनाशस्य चेतनकर्तृकत्वसाधनं प्रासङ्गिकम् ।

यद्वा केचित्कारणस्य बीजादेः प्रध्वंसेनांकुरादेः जन्मदर्शनात् तन्त्वादिनाशेन पटादिनाशदर्शनाच्च प्रध्वंसाभावस्यैव जगज्जन्मविनाशकर्तृत्वमास्थिताः । यथोक्तम् 'नानुपमृद्य प्रादुर्भावादि'ति । तन्मतं वा अत्र असदित्यादि सूत्रैर्निराकृतमिति ज्ञापनार्थम् । दृष्टान्ताभावस्तु स्वयमूहनीयः ।

परि०— अनुमानमुक्तमिति । प्रतिषेधमात्रत्वरूपमित्यर्थः । **सूत्रस्येति** । न तु दृष्टान्तभावादिति सूत्रस्येत्यर्थः । **एतेनेति** । अननुमाने किमपि कारणं नेत्याद्यर्थककिंपदप्रयोगेणेत्यर्थः । स्वपक्षे सर्वासत्त्वपक्षे तत्साधकदृष्टान्ताभावदोषाच्चेति व्याख्यातमित्यर्थः । **विमतमिति** । आदिकालीनमित्यर्थः । एवमग्रेऽपि । **प्रासङ्गिकमिति** । एतत्प्रयोगस्य प्रलयप्राक्कालीनचेतनसत्त्वसाधकत्वेन लयकाले तदसाधकत्वात् । उत्पत्तेश्चेतनकर्तृकत्वसाधनप्रसङ्गात् विनाशस्य तथात्वं साधितमित्यर्थः । **नानुपमृद्येति** । कारणमविनाश्य कार्यस्योत्पत्तिविनाशौ न स्त इत्यर्थः । ननु प्रध्वंसकर्तृत्वपक्षेऽपि तन्निरासकाः 'प्रतिषेधमात्रत्वात्', 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसं', 'न तु दृष्टान्तभावादि'ति सूत्रत्रयोक्तहेतवो मूलोक्तदिशा व्याख्याता इति ज्ञायते । 'स्वपक्षदोषाच्चे'ति सूत्रोक्तहेतुव्याख्यानं न ज्ञायत इत्यत आह **दृष्टान्ताभावस्त्विति** । अविनष्टस्यैव बीजादेरङ्कुरादिजननादव्यतिषिक्ततन्तुनाशेन पटनाशस्य त्वन्मतेऽप्यभावात् । व्यतिषिक्ततन्तुनाशान्यपटनाशस्यैवाभावादित्यूहनीय इति भावः ।

गु०दी०— दृष्टान्ताभावस्तु स्वयमूहनीय इत्यत्र भर्जितबीजादितोऽङ्कुरस्य क्वाप्यदर्शनेन बीजोपमर्दात्कार्योदयस्याङ्गीकर्तुमनुचितत्वादिति भावः ।

यादु०— नानुपमृद्येति । कारणमनुपमृद्य न कार्यप्रादुर्भाव उत्पत्तिरिति यावत् । किन्तु कारणं विनाश्यैव कार्यमुत्पद्यते । आदिपदेन विनाशपरिग्रहः । **स्वयमूहनीय इति** । अविनष्टस्यैव बीजादेरङ्कुराद्यात्मना परिणतत्वान्नाद्यो दृष्टान्तोऽस्माकं सम्मतः । नापि द्वितीयः । तन्तुनाशातिरिक्तपटनाशाभावादिति भावः । न चाङ्कुरस्याविनष्टबीजोपादानकत्वे घटे मृत्त्वमिवाङ्कुरे बीजत्वप्रसङ्ग इति वाच्यम् । यत्र धर्मिणस्तादवस्थ्ये धर्मस्यैवान्यथाभावस्तत्रैवोपादानगतो धर्म उपादेये भवति । यथा घटे मृत्त्वम् । यत्र तु धर्मिण एवान्यथाभावो न तत्रोपादानधर्म उपादेये भवति । क्षीरस्य दध्यात्मना परिणामे क्षीरव्यवहारानुपलम्भात् । बीजादेश्च धर्मिण एवाङ्कुराद्यात्मना परिणतत्वान्नाङ्कुरादौ बीजत्वादिप्राप्तिरिति ।

वं०प०— यथोक्तमिति । कारणत्वरूपमनुपमृद्य कार्यस्य प्रादुर्भावः । आदिपदेन नाशो वा नेत्यर्थः । **दृष्टान्ताभावस्त्विति** । बीजादेः प्रध्वंसेनाङ्कुरादेर्जननदर्शनात् । तन्त्वादिनाशेन पटनाशदर्शनाच्चेत्युक्तदृष्टान्ताभावस्त्वित्यर्थः । तन्त्वादिनाशातिरिक्तपटादिनाशाभावादिति भावः ।

कं०रा०— वृत्त्यन्तरमिति । न तु दृष्टान्तभावादिति सूत्रस्य प्रलये सर्वाभावसत्त्वं नाङ्गीकर्तुमुचितं दृष्टान्तेऽवधारितव्याप्तिमूलकत्वस्य प्रलये परमेश्वरादिभावपदार्थसत्त्वसाधकानुमानस्य भावादिति पूर्वाभिप्रेतवृत्तित इदं वृत्त्यन्तरमिति भावः । **एतेनेति** । अचेतनकर्तृकत्वे दृष्टान्ताभावेन प्रतिपक्षासम्भवाद्विश्वस्य चेतनकर्तृक-

त्वानुमानेन किमपि कारणमित्यर्थप्रतिपादकेन किंशब्देन स्वपक्षदोषाच्चेति सूत्रमपि व्याख्यातं भवति । अचेतनकर्तृकत्वपक्षे दृष्टान्ताभावाख्यदोषस्योक्तत्वादिति भावः । नन्वत्रत्यपूर्वपक्षिणा महदादिकार्योत्पत्तेरचेतन-प्रागभावकर्तृकतया उक्तत्वात् तन्निरासायोत्पत्तेश्चेतनकर्तृकत्वसाधनमेव सङ्गतं न तु विनाशस्य तत्साधनं तस्याचेतनकर्तृकतायाः पूर्वपक्षिणानुक्तत्वादित्यत आह अत्रेति । नानुपमृद्येति । यथा बीजादेरुपमर्दं विना अङ्कुरादेः प्रादुर्भावाभावाद्बीजादिध्वंसो अङ्कुरादिकारणं यथा च तन्त्वाद्युपमर्दं विना पटादिनाशाभावात् तन्त्वादिनाशः पटादिनाशकारणं तथा कस्यचिदुपमर्दं विना जगज्जन्मविनाशायोगात् तद्ध्वंस एव जगज्जन्म-विनाशकर्तेत्यर्थः । ज्ञापनार्थमिति । विनाशस्य चेतनकर्तृकत्वसाधनमित्यनेनान्वयः । नन्वसदिति चेन्न प्रतिषेधमात्रत्वादित्यादिसूत्राणां प्रध्वंसस्यैव जगज्जन्मविनाशकर्तृत्वमिति यन्मतं तन्निरासकत्वे स्वपक्षदोषा-च्चेत्यत्रोक्तो दृष्टान्ताभावोऽनुपपन्नः तद्वादिना ध्वंसस्य जगज्जन्मादिकारणतायामङ्कुरादिजनकबीजादिध्वंसस्य विनाशकारणतायां तु पटादिनाशकतन्त्वादिनाशस्य च दृष्टान्तीकृतत्वादित्यत आह दृष्टान्ताभाव इति । बीजादिकमङ्कुरादिरूपेण परिणतमित्येव व्यवहाराद्बीजादिकं नष्टमिति व्यवहाराभावाच्चाङ्कुराद्युत्पत्तिदशायां बीजादि-ध्वंसस्यैवाभावेन तस्याङ्कुरादिजनकत्वमसिद्धं तन्त्वादिनाशस्य पटादिनाशहेतुत्वेऽपि प्रतिषेधमात्रत्वादि-त्युक्तन्यायेन तस्य तत्कर्तृत्वमसिद्धमतः प्रध्वंसाभावस्यैव जगज्जन्मविनाशकर्तृत्वमित्यत्र दृष्टान्ताभाव इति स्वयमूहनीयमित्यर्थः ।

श्रीनिधि०— **सूत्रस्य** । 'न तु दृष्टान्तभावादि'ति सूत्रस्य । ननु कर्तुः क्वचिद् बुद्ध्युपलम्भेऽपि तदभावेन कर्तृत्वभावसाधने अनुमानमात्रोच्छेदः । क्वचिद्वह्न्यादिमति स्थाल्यादिदर्शनेन पर्वतादौ तदभावेन वह्न्यादिसाधनसौलभ्यात् इत्यत आह **बुद्धिपूर्वं तु तत्कर्तव्य इति** । बुद्धिं व्यापिकेति भावः । स्थाल्यादिमत्वं तु न व्यापकमिति नोक्तदोषः । **व्यभिचार आशङ्क्येति** । महीधरगुहान्तर्वर्ति तृणाद्यङ्कुरादौ कर्तुरनुपलम्भादिति भावः । **एतेनेति** । एवमेवमनुमानेत्यर्थः । प्रतिपक्षतालक्षणदोषात् । **दृष्टान्ताभावस्त्विति** । कारणबीजादेः प्रध्वंसेनेत्यादि दृष्टान्ताभाव इत्यर्थः ।

शे०वा०— ननूत्पत्तीत्युत्तरभाष्यमनर्थकम् । न चैतत् 'न तु दृष्टान्तभावादि'त्येतत्सूत्रोक्तानुमान-प्रदर्शनार्थत्वान्नानर्थक्यमिति वाच्यम् । एतत्सूत्रोक्तानुमानस्य सर्वनाशेष्वपीत्यादिपूर्वभाष्येणैव प्रदर्शितत्वेन तादर्थ्यायोगादित्यतःपूर्वं प्रलये परमेश्वरादिसद्भावसाधकानुमानाभावान्नैव प्रलये सर्वासत्त्वमङ्गीकर्तुं शक्यमिति योजनामभिप्रेत्य तदनुमानं 'सर्वनाशेष्वपी'त्यादिना भाष्ये प्रदर्शितमिदानीं तु योजनान्तरम् अभिप्रेत्य सूत्र-सूचितानुमानप्रदर्शनं क्रियत इति नानर्थक्यमित्यभिप्रेत्य योजनान्तरप्रदर्शनपूर्वकं सूत्रसूचितानुमानप्रदर्शक-तयोत्तरवाक्यं योजयितुम् 'असदिति चेन्न प्रतिषेधमात्रत्वात्' इति प्रथमसूत्र एव अभावो न कर्ता निषेधैक-स्वरूपत्वादित्यभावकर्तृत्वनिरासाय अनुमानस्योक्तत्वात् किमनेनेत्यतः तन्निरासाय युक्त्यन्तरोपदर्शनार्थत्वा-न्नानुपपत्तिरित्याह **प्रथमसूत्र इति** । **व्याख्यातं भवतीति** । **स्वपक्षे** प्रागभावकर्तृत्वरूपस्वपक्षे अप्रामाणिक-

त्वाख्यदोषाच्चेति व्याख्यातं भवतीत्यर्थः । प्रागभावकर्तृत्वे प्रमाणान्तरस्य सर्वथाऽप्यभावेनानुमानमेव तथेति वाच्यम् । तदपि विश्वप्रागभाव इत्येवंरूपं प्रागुक्तप्रकारेण दूषितमिति नोपपद्यते । अतो विश्वं प्रागभावकर्तृकं कार्यत्वादित्येव वाच्यम् । तच्च दृष्टान्ताभावान्न सम्भवतीत्यप्रामाणिकत्वं प्रागभावकर्तृत्वपक्षस्येति भावः । यद्वा प्रागभावकर्तृत्वपक्षे दृष्टान्ताभावाख्यदोषाच्चेति व्याख्यातं भवतीत्यर्थः । चेतनस्योत्पत्तिकर्तृत्वसाधनमात्रेणैव प्रागभावकर्तृत्वपक्षनिराससिद्धेर्विनाशस्य चेतनकर्तृत्वसाधनं भाष्येऽसङ्गतमित्यत आह **अत्रेति** । प्रासङ्गिकत्वमसहमानः पक्षान्तरमाह **यद्वेति** । प्रध्वंसाभावस्यैव जगज्जन्मविनाशकर्तृत्वमपि केषाञ्चित्सम्प्रतिपन्नमित्यत्रैव न्यायसूत्रसम्मतिमाह **यथेति** । चतुर्थाध्याय इति शेषः । तत्सूत्रं पठति **नेति** । अत्र 'नानुपमृद्य प्रादुर्भावादि'त्यस्याभावाद्भावोत्पत्तिरिति पूर्वेण सम्बन्धः । अभावाद्भावस्य कार्यस्योत्पत्तिः । कुतः । न बीजमनुपमृद्याङ्कुरस्य प्रादुर्भावो यत इत्यर्थः ।

अयमाशयः । न किलाविनष्टे कारणे कार्यमुत्पद्यते । बीजनाशोत्तरकालमङ्कुरस्य प्रादुर्भावदर्शनात् । यदि च विनाशोऽङ्कुरकारणं नाभविष्यत् । अविनष्टेऽपि बीजेऽङ्कुरोऽभविष्यत् । न चैवमस्ति । तस्माद्बीजविनाशाभावेऽङ्कुरानुत्पत्तेः सति च तस्मिंस्तदुत्पत्तेरन्वयव्यतिरेकसध्रीचीनप्रत्यक्षेण बीजविनाश एवाङ्कुरकारणमिति निश्चीयते । ततश्च तद्दृष्टान्तेन सर्वत्रापि तदनुमानमिति । यद्यप्यत्रान्वयव्यतिरेकबलात् कारणविनाशस्य कार्योत्पत्तिकर्तृत्वमेव प्राप्तं न तु कार्यनाशकर्तृत्वमपीति न परेषां प्रध्वंसस्यैव जगदुत्पत्तिविनाशकर्तृत्वाङ्गीकारे सम्मतितया अस्योदाहरणं युक्तम् । तथाऽपि ध्वंसस्य कार्योत्पत्तिकर्तृत्वमात्रस्वीकारे परेषां सम्मतितया अस्योपन्यासो न तु विनाशकर्तृत्वेऽपीति नानुपपत्तिरित्याहुः । वस्तुतस्त्वन्वयव्यतिरेकसहचारदर्शनसहकृतप्रत्यक्षमवलम्ब्य कारणनाशस्य कार्योत्पत्तिकर्तृत्वं वदतोऽभावस्योत्पत्तिकर्तृतायामिव नाशकर्तृतायामपि तत्कल्पकान्वयव्यतिरेकसहचारदर्शनसहकृतप्रत्यक्षस्याविशेषेण कार्योत्पत्तिमात्रकर्तृत्वसूत्रेणास्वारस्यात् तत्स्वारस्याय नानुपमृद्य प्रादुर्भावादित्यत्र प्रादुर्भावपदस्य विनाशोपलक्षणत्वस्याश्रयणीयत्वेन फलतः सूत्रस्य जगदुत्पत्तिविनाशकर्तृत्वाङ्गीकारसमर्पकत्वमस्तीत्यभिप्रेत्यैवैतत्सूत्रोदाहरणम् । अत एव भाष्यवार्तिकादौ तन्त्वादिनाशेन पटादिनाशस्यानुदाहरणेऽपि स्वयं तदुदाहरणं तत्राप्येतदुदाहर्तव्यमित्यभिप्रेत्य पूर्वं कृतमित्यवधेयम् । अत्र टीकायां मूलकोशेषु भाष्यवार्तिकादिषु च प्रादुर्भावादितीत्येव सर्वत्र पाठदर्शनात्, क्वाचित्कः 'नानुपमृद्य प्रादुर्भावादी'ति पाठो व्याख्यातृमतिदोषपरिकल्पित एवेति ध्येयम् । ज्ञापनार्थमित्यत्र विनाशस्य चेतनकर्तृकत्वसाधनमित्यनुषङ्गः । नन्वन्वयव्यतिरेकसहचारनिश्चयसध्रीचीनप्रत्यक्षेण ध्वंसस्योत्पत्तिविनाशकर्तृतायाः सिद्धत्वात् कथमनेन तन्निरास इत्यत आह **दृष्टान्ताभावस्त्विति** । अविनष्टस्यैव बीजादेरङ्कुरात्मना परिणतत्वान्न बीजध्वंसाङ्कुरोत्पादयोरन्वयव्यतिरेकौ स्तः । न चाङ्कुरस्याविनष्टबीजोपादानत्वे कुण्डले सुवर्णस्येवाङ्कुरेऽपि बीजत्वानुगतिः स्यादिति वाच्यम् । परिणामस्यानेकप्रकारत्वस्य प्रागुपपादितत्वेन यत्र धर्मिणस्तादवस्थ्येऽपि धर्मस्यैव अन्यथाभावः तत्रैवोपादानगतधर्मस्योपादेयेऽनुगतता । ततश्च कटकाद्याकारस्य सुवर्णस्य कुण्डलत्वाद्यापत्तौ कुण्डलत्वाद्यापन्नेऽपि सुवर्णव्यवहारदर्शनाद्धर्मिणस्तादवस्थ्यसिद्ध्योपादेये उपादान-

धर्मस्यानुगतिः युक्ता ? इह च क्षीरस्य दधिभाववद्बीजस्याङ्कुरभावो धर्मिस्वरूपस्यैव परिणामरूपो विशेषिपरिवर्त एव । तथा च क्षीरस्य दधिभावापत्तौ क्षीरव्यवहारानुपलम्भाद्धर्मिभूतक्षीरस्यैवातञ्चनादिवशाद्दधिभावेन धर्मिणोऽतादवस्थ्यादुपादेये यथा क्षीरत्वाननुगतिः तथा धर्मिभूतस्य बीजस्यैवाङ्कुरभावाद्धर्मिणोऽतादवस्थ्यान्नाङ्कुरे बीजत्वानुगतिः प्रसज्यत इति । एवं तन्त्वादिनाशातिरिक्तपटादिनाशासम्प्रतिपत्त्या कारणनाशस्य कार्यनाशान्वयव्यतिरेकयोस्तत्राप्यसम्प्रतिपत्तेर्नान्वयव्यतिरेकसहचारनिश्चयसहकृतप्रत्यक्षेण ध्वंसस्य कार्योत्पत्तिविनाशकर्तृत्वसिद्धिरित्येवं दृष्टान्ताभावः स्वयमूहनीय इत्यर्थः ।

वा०र०— **सूत्रसूचितानुमानेति** । अभावकर्तृत्वनिरासकचेतनोत्पाद्यत्वादि साध्यत्वानुमानेत्यर्थः । **तन्निरासायेति** । अभावकर्तृत्वनिरासायेत्यर्थः । **प्रागभाव इत्येवंरूपमिति** । महाप्रलयवृत्तिकार्यप्रागभावः इति प्रागुक्तस्यायमर्थानुवाद इत्यदोषः । निराकरणं च निषेधकस्वरूपकत्वादि प्रतिपक्षेणेति ज्ञेयम् । **दृष्टान्ताभावादिति** । घटादिकं प्रति कुलालादेः भावस्यैव कर्तृतादृष्टेरिति भावः । **तत्सूत्रमिति** । सूत्रोत्तरभागमित्यर्थः । **पूर्वेणेति** । अभावात् अभावोत्पत्तिर्नानुपमृद्य प्रादुर्भावादिति सूत्रगतपूर्वभागेनान्वय इत्यर्थः । भावपदस्य कार्याकार्यसाधारणस्यायोगात् आह **कार्यस्येति** । उपमृद्य बीजं अङ्कुरं उत्पाद्यते नानुपमृद्येत्यादिभाष्यानुसारेणाह **न बीजं अनुपमृद्येत्यादि** । न किलानष्टः इत्यादिवार्तिकानुसारेणाह **अयमाशय इति** । विश्वं हि शून्यताया एव जायते इत्यादि न्यायवाचस्पत्याद्यनुसारेणाधिकस्य वक्तृत्वादाह **ततश्च तद्दृष्टान्तेनेति** । **अन्वयव्यतिरेकेति** । अत्र यद्यपि अत्रानुपमृद्याङ्कुरस्य प्रादुर्भावो नेति व्यतिरेकमात्रं व्याख्यातम् । तथापि उपमृद्य प्रादुर्भावात् इत्यादिभाष्योक्तरीत्याऽर्थतोऽन्वयोऽपि लभ्यत इति भावेन प्राक् तदनुक्तिः । अत एवोक्तम्— तात्पर्यपरिशुद्धावुदयनेन । बीजोपमर्दाङ्कुरयोः कार्यकारणभावे व्यतिरेकगतं प्रत्यक्षं शाब्दं अन्वयस्त्वार्थ इति । ततः शाब्दत्वनिमित्तेन व्यतिरेकमात्रोदाहरणेऽप्यन्वयस्याभिप्रेतत्वात् युक्तं अन्वयव्यतिरेकबलात् इत्युभयकीर्तनमिति ज्ञेयम् । **परेषामिति** । परेषां यो ध्वंसस्य कार्योत्पत्तिकर्तृत्वस्वीकार इति पूर्वेण सम्बन्धः । कार्योत्पत्तिकर्तृत्वं वदतः इति पाठः । कार्योत्पत्तिं वदतः इति तु कर्तृत्वपदस्य पातात् । पूर्वोत्तरयोः कर्तृत्वपदस्य स्पष्टप्रयोगात् । कारणविनाशस्य सकाशात् कार्योत्पत्तिं वदतः इत्यर्थकत्वात् यथाश्रुत एव पाठः । अत्र वदत इत्यस्य सूत्राणां स्वारस्यात् इति वक्ष्यमाणेनान्वयः । वदतो यत्सूत्रणं तस्यास्वारस्यात् 'इति योजना । अस्वारस्योपपादनं अभावस्येत्यादि प्राक् उपपादितत्वेन इत्यत्र प्रागित्यस्य प्रकृत्यधिकरणेत्यर्थः '।

स०व्र०— **एतेनेति** । दृष्टान्ताभावेन प्रतिपक्षाद्यभावात् अननुमाने न किमपि कारणमित्याक्षेपेणेत्यर्थः । **यथोक्तमिति** । कारणमनुपमृद्य न कार्यप्रादुर्भावः । किन्तु कारणनाशेनैव कार्यप्रादुर्भावः । आदिपदेन विनाशपरिग्रहः । **दृष्टान्ताभावस्त्विति** । बीजादेः प्रध्वंसेनाङ्कुरादेर्जननदर्शनाद्वेत्युक्तदृष्टान्ताभावस्त्वित्यर्थः ।

विट्ठल०— **दृष्टान्ताभावेनेति** । कर्तृभावे दृष्टान्ताभावेनेत्यर्थः । अचेतने कर्तृत्वे दृष्टान्ताभावेन प्रतिपक्षासम्भवाद्विश्वस्य चेतनकर्तृकत्वाननुमानेन किमपि कारणमित्यर्थप्रतिपादकेन किंशब्देनेत्यर्थः । स्वपक्षे

सर्वासत्त्वपक्षे दृष्टान्ताभावेन प्रत्युत चेतनकर्तृकत्वे दृष्टान्तभावेन स्वपक्षदोषाच्चेति सूत्रार्थः । **नानुपमृद्येति** कारणमनुपमृद्य न कार्यप्रादुर्भावविवादीत्यर्थः । आदिपदेन विनाशसङ्ग्रहः । ननु स्वपक्षदोषाच्चेत्यत्र ध्वंसस्य कारणतायामपि दृष्टान्ताभावोऽभिधीयत इति पूर्ववद्वक्तव्यम् । न चैतदुपपन्नम् । अङ्कुरादिजनकबीजादिदृष्टान्तस्य कथितत्वादित्यत आह **दृष्टान्ताभाव इति** । अविनष्टस्यैव बीजादेरङ्कुराद्यात्मना परिणतत्वात् तन्तुनाशाति-रिक्तपटनाशाभावाच्चेति स्वयमूहनीयमित्यर्थः ।

४१ सु०— नन्विदमनुमानेनेश्वरस्य जगत्कर्तृत्वसाधनं सूत्रकारस्य उक्तविरुद्धम्, 'शास्त्रयोनित्वादि'तीश्वरेऽनुमानप्रामाण्यस्य स्वयमेव निराकृतत्वात्; इत्यत आह आगमेति ।

अनु०— आगमानुगृहीता तु मानम्

'अनुमे'ति वक्ष्यमाणमत्रापि सम्बध्यते । न सर्वथाऽपीश्वरेऽनुमानस्य प्रामाण्यं सूत्रकृता निराकृतम्, किन्नामागमाननुगृहीतस्य । आगमानुगृहीता त्वनुमा ईश्वरे मान-मेवाभिमता, अन्यथा वेदवाक्यार्थे युक्त्यनुसन्धानरूपजिज्ञासां नारभेतेति ।

किमतो यद्येवमित्यत आह एषेति ।

एषाऽनुमाऽपि तु ।

'आगमानुगृहीते'त्यनुवर्तते । 'मानमि'ति च । एषा सम्प्रत्युपन्यस्ताऽपि अनुमा 'यतो वा इमानि भूतानी'त्यागमानुगृहीता । ततो भवतीश्वरे मानमिति न कश्चिद्विरोध इति ।

परि०— एषेत्यादि तु वाक्यान्तरं मत्वाह **इति वक्ष्यमाणमिति** । तुशब्दसूचित-पक्षान्तरनिरासं व्यनक्ति **न सर्वथापीति** । अनुगृहीतत्वं तत्संवादित्वं तदुपनिबद्धत्वं तद्गृहीत-व्याप्त्यादिमत्वं च ध्येयम् । कुत एवं कल्पनेत्यतो ज्ञापकमाह **अन्यथेति** । **युक्तीति** । ताश्चागमोपनिबद्धाः काश्चित्तत्संवादिन्य इति भावः । **सम्प्रत्युपन्यस्तापीति** । उत्पत्तिविनाश-कारीत्युक्तेरित्यर्थः । तत्र यत्प्रयन्तीत्यपि श्रुतौ श्रवणादिति भावः ।

कं०रा०— **नन्विदमिति** । तर्कस्याप्रतिष्ठितत्वादन्यथाप्यनुमेयमित्येतद्व्यधिकरणं तर्कस्यानुमानाद्भिन्नत्वादिति भावः ।

शे०वा०— नन्वागमानुगृहीतेत्युत्तरवाक्यमनर्थकम् । न चागमानुगृहीतस्यानुमानस्यातीन्द्रियार्थे प्रामाण्यप्रतिपादनार्थं तदिति वाच्यम् । तद्व्युत्पादनस्याप्यनर्थकत्वादित्यतोऽनुमानेनेश्वरस्य जगत्कर्तृतासाधनस्योक्तविरुद्धत्वशङ्कापरिहारार्थत्वात् तस्य न तदिति भावेनोक्तविरुद्धताशङ्कानिवर्तकतयोत्तरवाक्यं योजयितुं कथमस्योक्तविरुद्धत्वमित्यतस्तदुपपादनपूर्वकं तां शङ्कामुत्थापयति **नन्विति** । नन्वत्र शास्त्रयोनिसूत्रे न सर्वथाऽनुमानस्येश्वरेऽप्रामाण्यमुक्तं किन्त्वागमाननुगृहीतस्यैव । आगमानुगृहीतस्य तु प्रामाण्यमेवेत्युक्ताभिप्रायमात्रकथनपरतयैतद्वाक्ययोजनायाम् 'एषाऽपि तु' इत्यंशवैयर्थ्यम् । ईश्वरस्य जगत्कर्तृत्वसाधकानुमाया आगमानुगृहीतत्वात् प्रामाण्यमिति प्रकृतपरतया योजनायां च 'अपि तु' इत्यंशवैयर्थ्यम् । पक्षद्वयेऽपि अनुमानेनेश्वरस्य जगत्कर्तृत्वसाधनस्योक्तविरुद्धत्वशङ्कापरिहारानुपपत्तिश्च । शास्त्रयोनिसूत्रे आगमाननुगृहीताया अनुमाया एवेश्वरेऽप्रामाण्यप्रतिपादनेनागमानुगृहीतायास्तत्र प्रामाण्यस्येष्टत्वेन सर्वथाऽनुमाया अप्रामाण्यानुक्तेः प्रकृतानुमायाश्चागमानुगृहीतत्वेनेश्वरे प्रामाण्यसम्भवान्नोक्तविरोधोऽनुमानेन जगत्कर्तृत्वसाधनस्य इत्येतावदर्थप्रतिपादकत्वे ह्यस्य वाक्यस्य तदनुपपत्तिपरिहारकत्वं स्यात् । न चैतद्योजनाद्वयेऽपि लभ्यते । आद्ययोजनायामागमानुगृहीताया अनुमाया ईश्वरे प्रामाण्यस्य शास्त्रयोनिसूत्राभिप्रेतत्वस्य वाक्येन समर्पणेऽपि जगत्कर्तृत्वसाधकानुमानस्यागमानुगृहीततया मानताया वाक्येनासमर्पणात् द्वितीययोजनायां च जगत्कर्तृत्वसाधकानुमानस्यागमानुगृहीततया प्रामाण्यमित्यंशस्य वाक्याल्लाभेऽपि तादृशानुमाया ईश्वरे प्रामाण्यमित्यंशस्य शास्त्रयोनिसूत्राभिप्रेततया अनेन वाक्येनासमर्पणादित्यतो नेदमुक्ताभिप्रायकथनमात्रपरं नापि प्रकृतानुमानस्यागमानुगृहीततया प्रामाण्यसमर्थनमात्रपरं किन्तूभयपरमिति युक्तमुक्तविरोधशङ्कापरिहारकत्वमित्याशयवान् कथमेकस्य वाक्यस्योभयपरत्वमित्यतोऽत्र 'आगमानुगृहीता तु मानमि'त्येकं वाक्यं 'एषाऽनुमापि तु' इत्यपरं वाक्यम् । तत्राद्यमुक्ताभिप्रायकथनपरं द्वितीयं च जगत्कर्तृत्वसाधकानुमानस्यागमानुगृहीततया प्रामाण्यप्रतिपादनपरमिति वाक्यभेदेनोभयपरत्वोपपत्तिरित्यभिप्रेत्य आद्यवाक्यम् उक्तार्थाभिप्रायकथनपरतयाऽपेक्षितपूरणेन योजयति **अनुमेत्यादिना** । ननु किमभिप्रायान्तरकल्पनया शास्त्रयोनिसूत्रेऽनुमाया ईश्वरे सर्वथाऽप्रामाण्यमेवोक्तमित्येव किन्न स्यादित्यत आह **अन्यथेति** । न हि सूत्रकारो व्याहतभाषीति भावः । द्वितीयमपि वाक्यमपेक्षितपूरणेन विवक्षितार्थोपपादकतया योजयितुमनाकाङ्क्षिताभिधानेनावाक्यताशङ्कां तावत्परिहर्तुमाकाङ्क्षामुत्थापयति **किमत इत्यादिना** ।

वा०र०— प्रसज्यतेत्यस्य दृष्टान्ताभावः इत्यादिवक्ष्यमाणेनान्वयः । कुतोऽनुपपत्तिः इत्यतो योजनाद्वये एकैकार्थलाभेऽपि विशिष्टार्थप्रतिपादकत्वात् इत्याह **शास्त्रयोनिसूत्र इति** । लाभाभावमेव दर्शयति **आद्ययोजनायामिति** ।

विठ्ठल०— एषानुमेत्यादि वाक्यान्तरं मत्वाह **इति वक्ष्यमाणमिति** । तुशब्दसूचितपक्षान्तर-निरासप्रकारं व्यनक्ति **न सर्वथेति** । अनुगृहीतत्वं तत्संवादित्वं तदुपनिबद्धत्वं तद्गृहीतव्याप्त्यादिमत्वं ध्येयम् । कुत एवं कल्पनेत्यत आह **अन्यथेति** ।

॥ इति द्वितीयां वृत्तिमभिप्रेत्य 'न तु दृष्टान्तभावात्' इति सूत्रस्य व्याख्यानम् ॥
॥ इति सूत्रोक्तसिद्धान्तांशव्याख्याने
'न तु दृष्टान्तभावात्' इतिसूत्रस्य द्वाभ्यां वृत्तिभ्यां व्याख्यानम् ॥

* * *

॥ अथ सूत्रोक्तसिद्धान्तांशव्याख्याने 'तर्काप्रतिष्ठानात्' इति सूत्रस्य व्याख्यानम् ॥
॥ अथ तत्रादौ सूत्रोक्तपूर्वपक्षस्य व्याख्यानम् ॥
॥ अथ तत्राप्यादौ आक्षेपस्यार्थः ॥

४२ **सु०— एवमनुमानेनाभावकर्तृकत्वं विश्वस्याशङ्क्यानुमानेनैवेश्वरकर्तृकत्वं समर्थितम् । तदेतन्मतान्तरेणाक्षिप्य समादधत्सूत्रम् ॐ तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॐ इति ॥ तत्राक्षेपस्यायमर्थः । नायमनुमानावष्टम्भेन पूर्वपक्षः सिद्धान्तो वा युज्यते, यतः प्रमाणाभासेन पूर्वपक्षः प्रमाणेन च सिद्धान्तो भवति । न च अनुमानं नाम प्रमाणमस्ति । (कुतः ।) अन्यथाऽप्यनुमेयम् । असत्प्रतिपक्षत्वं ह्यनुमान-प्रामाण्यवादिभिरनुमानाङ्गमङ्गीकरणीयम्, प्रतिरुद्धस्य करणस्य क्वापि क्रियानिष्पादक-त्वादर्शनात् । अनुमानप्रतिपन्नं च अन्यथाऽप्यनुमेयम् अनुमातुं शक्यम् । कस्मात् । तर्काप्रतिष्ठानात् । 'एवमेवानुमातव्यम्, न पुनरन्यथा' इति तर्कस्य व्यवस्थाऽभावात् । तथा चोक्तम् । 'उपाधिप्रतिपक्षौ तु क्व नामातीव दुर्वचावि'ति ।**

परि०— मतान्तरेणेति । तर्काप्रामाण्यवादिमतेनेत्यर्थः । **तथा चोक्तमिति** । पूर्वपादीया-नुव्याख्याने ।

वं०प०— अस्तीति । येनानुमानरूपप्रमाणेन सिद्धान्तः स्यादित्यर्थः ।

शे०वा०— नन्वागमानुग्रहाभाव इत्याद्युत्तरभाष्यमनर्थकम् । न चेदं तर्काप्रतिष्ठानादिति सौत्रसमा-धानांशविवरणरूपत्वान्नानर्थक्यमिति वाच्यम् । सौत्रपूर्वपक्षांशस्य परित्यागेन तत्स्थसिद्धान्तांशस्यैव विवरणे निमित्ताभावादित्यतः सौत्रपूर्वपक्षविवरणं स्पष्टत्वाच्छिष्यैरेवोह्यतामिति भावेन तत्परित्यागेन सिद्धान्तांश-

मात्रविवरणं भाष्यकाराणां नानुपपन्नमित्याशयेन स्वयं सङ्गतिप्रदर्शनपूर्वकं सूत्रमुपन्यस्य पूर्वपक्षांशं विवृणोति **एवमित्यादिना** । **कस्मादिति** । सर्वत्र सत्प्रतिपक्षितत्वम(1)त्रं साध्यं, तर्कस्याव्यवस्थितत्वं च हेतुरिति द्रष्टव्यम् ।

वा०र०— इति सौत्रसमाधानांशे इति । इति यत् सूत्रं तत्र तत्रत्यसमाधानांशेति योजना । अथवा तर्कस्येत्युत्तरपक्षात् एतत्पक्षस्य भेदं दर्शयितुं एतत्पक्षविषयमाह **सर्वत्रेति** । पूर्वपक्षसिद्धान्तानुमानयोः इत्यर्थः । अत एवोत्तरमूलं सर्वत्र प्रत्यनुमानसम्भव इतीति । सत्प्रतिपक्षत्वं अत्र साध्यं इत्येव मूलकोशे पाठानुसारेण सत्प्रतिपक्षितत्वं अत्रेत्येव पाठः । अत्रेत्यस्य चात्र पक्षे एतद्योजनायां इत्यर्थः ।

स०व०— कस्मादिति । अस्मिन्पक्षे सर्वत्र प्रतिपक्षसद्भावः साध्यः । तर्कस्य अव्यवस्थितत्वं हेतुः ।

विठ्ठल०— मतान्तरेणेति । अनुमानाप्रामाण्यवादि चार्वाकमतेनेत्यर्थः । अन्यथानुमेयतामात्रेण कथमप्रामाण्यमित्यत आह **असत्प्रतिपक्षत्वमिति** । तर्कस्यानुमानाद्भिन्नत्वात् । अनुमानाप्रतिष्ठानादिति वा । अन्यथाऽप्यतर्क्यमिति वक्तव्यमित्याशयः ।

॥ इति आक्षेपस्यार्थः ॥

* * *

॥ अथ 'तर्काप्रतिष्ठानात्' इतिसूत्रोक्तपूर्वपक्षव्याख्याने आक्षेपस्य वैयधिकरण्यशङ्का, तत्समाधानञ्च द्विविधयोजनया ॥

४३ **सु०— नन्विदं व्यधिकरणं, तर्कस्याप्रतिष्ठितत्वादन्यथाऽनुमेयमिति । मैवम् । एतदनेन ज्ञापयति सूत्रकारः 'न तर्कोऽनुमानाद्भिद्यते' इति ।**

अथवा तर्कस्य अनुमानस्य अप्रतिष्ठानात् अप्रमाणत्वात् न अनुमानेन पूर्वोत्तरपक्षौ युक्तौ । कथमप्रमाणत्वम्, यतः अन्यथाऽनुमेयम् इति योजना ।

परि०— इदं व्यधिकरणमिति । अनुमानाप्रतिष्ठानादिति वा । अन्यथा तर्क्यमिति वा विन्यसितव्यमिति भावः । पूर्वमनुमानाप्रामाण्ये अन्यथेत्यादिर्हेतुः । तत्र हेतुस्तर्केत्यादिरिति व्याख्यातम् । इदानीं साध्यान्तरे तर्केत्यादिहेतुः । तत्र हेतुरन्यथेत्यादिरित्याह **अथवेति** ।

वं०प०— व्यधिकरणमिति । इदमन्यथाऽनुमेयमनुमानस्याव्यवस्थितत्वादिति वक्तव्यत्वेन तर्कस्ये-त्येतद्व्यधिकरणमिति भावः । पूर्वयोजनायां तर्काप्रतिष्ठानमन्यथाऽनुमेयत्वरूपे साध्ये हेतुः । इदानीं तु तर्कस्याप्रामाण्यरूपाप्रतिष्ठितत्वे प्रत्यनुमानपराहतत्वरूपमन्यथानुमेयत्वं हेतुरिति भेदः । अत एवोपलक्षण-ज्ञापनायैवेत्यर्थः ।

कं०रा०— एतदनेनेति । तर्कस्याप्रतिष्ठितत्वादन्यथाप्यनुमेयमिति वचनेन सूत्रकारस्तर्कोऽनुमानान्न भिद्यत इत्येतत् ज्ञापयति अतस्तर्कशब्देनानुमानस्यैव ग्रहणादवैयधिकरण्यमिति भावः ।

शे०वा०— नन्विति । तर्काप्रतिष्ठानत्वानुमानप्रतिपन्नान्यथाऽनुमेयत्वयोर्व्यधिकरणत्वादित्यर्थः । अनुमानाव्यवस्थितताया एवानुमानप्रतिपन्नान्यथाऽनुमेयत्वोपपादकत्वादिति भावः । **कथमिति ।** अत्र च पक्षेऽनुमानस्याप्रामाण्यं साध्यं सत्प्रतिपक्षत्वं च हेतुरिति ।

वा०र०— वक्ष्यति चात्र पक्ष इति । मात्रमिति तु लेखकदोषात् । हेतुरितीत्यनन्तरं द्रष्टव्यं इति शेषः ।

स०व्र०— नन्विदमिति । तर्काप्रतिष्ठानत्वान्यथानुमेयत्वयोर्व्यधिकरणत्वादित्यर्थः । **अथवेति ।** अस्मिन्पक्षे अनुमानस्य अप्रामाण्यं साध्यम् । सत्प्रतिपक्षत्वं हेतुरिति ध्येयम् ।

विठ्ठल०— मैवमिति । तर्कस्यानुमानत्वादिति शेषः । तर्ह्यनुमानप्रतिष्ठानादिति एकशब्देनैव सूत्रकारैः कुतो नोक्तमित्यत आह **एतदनेनेति ।** तर्काप्रतिष्ठानादिति कथनेनेत्यर्थः । एवं भाष्यानुसारेण पूर्वपक्षांशं व्याख्याय प्रकारान्तरेणापि व्याख्याति **अथवेति ।**

॥ इति तत्र आक्षेपस्य वैयधिकरण्यशङ्का, तत्समाधानञ्च द्विविधयोजनया ॥

॥ इति 'तर्काप्रतिष्ठानात्' इतिसूत्रोक्तपूर्वपक्षस्य व्याख्यानम् ॥

* * *

॥ अथ 'तर्काप्रतिष्ठानात्' इतिसूत्रोक्तोत्तरपक्षस्य व्याख्यानम् ॥

॥ अथ तत्रादौ उत्सूत्रमुत्तरम् ॥

४४ सु०— तत्र समाधानसूत्रं सङ्गमयितुमुत्सूत्रमेव भाष्यकारस्तावत् उत्तरमाह आगमेति ।

अनु०— आगमानुग्रहाभावे न तर्कः स्यात्प्रतिष्ठितः ।

आगमग्रहणं प्रमाणमात्रोपलक्षणम् । अत एवोत्तरार्धेऽक्षजमपि सङ्गृहीतम् । प्रमाणानुग्रहप्रमाणमूलत्वशब्दाभ्यां प्रतिष्ठितप्रामाण्यप्रमाणान्तरावधृतपक्षलिङ्गव्याप्तिमत्त्वं तत्संवादित्वं चोच्यते ।

परि०— सूत्रं सूत्रांशम् । प्रतिष्ठितप्रामाण्येति बहुव्रीहिः ।

वं०प०— **प्रतिष्ठितेति** । प्रतिष्ठितप्रामाण्यकं यत्प्रमाणं तदवधृतेरित्यर्थः ।

शे०वा०— नन्वेवमपि सौत्रसमाधानांशस्य अन्यथा अस्य प्रतिष्ठा चेति भाष्यशेषेणैव विवृतत्वात् आगमानुग्रहाभाव इत्यादिभाष्यानर्थक्यमेवेत्यतः समाधानांशं सौत्रं सङ्गमयितुं तदुपयुक्तार्थाभिधायितया तच्छेषत्वान्नानर्थक्यमित्याशयेनोक्तरीत्या तद्योजयति **तत्रेति** । अन्यथेत्यादिना सूत्रारूढस्याप्युत्तरत्र वक्ष्यमाणत्वात् तावदित्युक्तम् । नन्वागमानुगृहीतस्येव प्रत्यक्षानुगृहीतस्यापि तस्याक्षजागममूलस्येत्युत्तरत्र प्रतिष्ठितत्वाभिधानात् अत्र वाक्ये नागमस्यैव विशिष्य ग्रहणं युक्तमित्यतोऽत्रागमग्रहणस्य प्रमाणमात्रोपलक्षणत्वेन प्रत्यक्षसङ्ग्राहकत्वेन तद्व्यवच्छेदकत्वाभावेन प्रत्यक्षागमाननुगृहीतस्यैवाप्रतिष्ठितत्वस्यात्राभिधानान्नानुपपत्तिरित्याह **आगमेति** । मूले आगमग्रहणस्य प्रमाणमात्रोपलक्षणत्वे मूलकारीयं ज्ञापकमाह **अत एवेति** । आगमग्रहणस्य प्रमाणमात्रोपलक्षणत्वेनाभिप्रेतत्वादेवेत्यर्थः । अन्यथा तत्र स्यादिति भावः । **प्रतिष्ठितेति** । निश्चितप्रामाण्येत्यर्थः ।

वा०र०— **उक्तरीत्येति** । उपयुक्तार्थाभिधायितयेत्यर्थः । **सूत्रारूढस्यापीति** । उत्तरस्येति शेषः । **प्रमाणमात्रोपलक्षणत्वेनेति** मूलम् । अत्र च एवमेवानुमातव्यम् । न पुनः अन्यथेति तर्कस्याव्यवस्थितत्वमेवानुमानस्याव्यवस्थितत्वपदेनोच्यते इति तर्कस्येति वाच्यमिति शङ्कानवकाशः ।

विठ्ठल०— सूत्रं सूत्रांशम् ।

* * *

॥ अथ तत्राप्याद्यौ आद्ययोजनानुसारेणास्योत्तरस्यार्थः ॥

४५ **सु०—** तत्राद्ययोजनायामस्यायमर्थः । **यदुक्तमनुमानस्याव्यवस्थितत्वेन सर्वत्र प्रत्यनुमानसम्भव इति तदनुपपन्नम्, यतः प्रमाणानुग्रहाभावे तर्को न प्रतिष्ठितः स्यात्, किन्तु प्रमाणमूलस्यैवास्य प्रतिष्ठितिः स्यात् ।**

एतदुक्तं भवति । प्रत्यनुमानं भवत्किं प्रमाणानुग्रहरहितं स्यात्, उत तन्मूलम् । आद्यं तु कथं स्वयमदृढभूमिकं परं प्रतिरुन्ध्यात्, न हि भवति तरक्षोः प्रतिपक्षो

हरिणशावः, किन्त्वाद्येनैव प्रमाणमूलेन बाध्यते । द्वितीयं तु स्यादेव प्रमाणम्, आद्यं चापबाधेत ॥ उभयथाऽपि न सर्वानुमानाप्रामाण्यम् ॥ यदा तूभयोः अपि प्रमाणमूलत्वसन्देहः तदाऽस्तु प्रतिरोधः । किन्तु नैवं सर्वत्र । अवधारणायां तु पूर्वैव गतिरिति ।

परि०— अस्येति । सिद्धान्तसूत्रांशस्येत्यर्थः । किंत्वित्यध्याहृत्योत्तरार्धं योजयति **किन्तु प्रमाणमूलस्येति** । अक्षजागममूलस्येत्यस्यार्थोऽयम् । **प्रतिष्ठितिरिति** । प्रामाण्यमित्यर्थः । ननूभयोरपि मानमूलत्वानिर्णये स्यादेव सर्वानुमानाप्रामाण्यमित्यत आह **यदा त्विति** । **किन्त्विति** । येन सर्वानुमानाप्रामाण्यमिति वाक्यशेषः । **अवधारणायां त्विति** । अन्यतरस्य प्रमाणमूलत्वनिर्णये तु तेन प्रमाणभूतेनान्यतरस्य बाध इति न सर्वानुमानाप्रामाण्यमिति पूर्वोक्तैव गतिरित्यर्थः ।

यादु०— अनुमानं नाम प्रमाणमेव नास्ति प्रतिपक्षानुमानसद्भावेनाप्रतिपक्षत्वरूपाङ्गविक[illegible]त्वात् इदित्याद्ययोजनालब्धमर्थमनूद्य दूषयति **यदुक्तमित्यादिना** । **न प्रतिष्ठित इति** । न लब्धात्मेत्यर्थः । अत्र मूलगततर्कशब्देन प्रतिपक्षानुमानमाद्ये, द्वितीये स्थापनानुमानं च विवक्षितमिति ध्येयम् । **किन्त्वाद्येनैवेत्यादि** । अनेन द्वितीयार्धगतेनास्येत्यनेनाद्ये स्थापनानुमानं, द्वितीये प्रतिपक्षानुमानं परामृश्यत इत्युक्तं भवति । **न सर्वथाऽनुमानाप्रामाण्यमिति** । न सर्वथाऽनुमानरूपप्रमाणाभावप्राप्तिरित्यर्थः । ननु तदैव सर्वथाऽनुमानाभावः प्राप्त इत्याशङ्कते **किन्त्विति** । उत्तरमाह **नैवं सर्वत्रेति** । अत्र हेतुमाह **अवधारणायामिति** । प्रमाणमूलतयाऽवधृतस्यैव दुर्बलबाधकतया प्रामाण्यसिद्धौ, न सर्वथाऽनुमानाभाव इति पूर्वोक्तैव गतिर्यत इत्यर्थः ।

वं०प०— द्वितीयं तन्मूलकम् । **उभयथा** प्रत्यनुमानप्रमाणानुग्रहराहित्ये तन्मूलत्वे वेत्यर्थः । **न सर्वेति** । **आद्यं त्विति** । पूर्वोक्तरीत्येत्यर्थः । **एवम्** उभयोरपि प्रमाणमूलत्वम् । **अवधारणायामिति** । एकस्य प्रमाणमूलत्वावधारणायामित्यर्थः ।

कं०रा०— आद्ययोजनायामिति । तर्काप्रतिष्ठानादन्यथाप्यनुमेयमित्यस्यैवमेवानुमातव्यं न पुनरन्यथेति तर्कस्य व्यवस्थाविरहादन्यथाप्यनुमातुं शक्यमित्याद्ययोजनायामस्य आगमानुग्रहाभावेन तर्कः स्यात् प्रतिष्ठित इति वाक्यस्यायं वक्ष्यमाणोऽर्थ इत्यर्थः । **तरक्षोरिति** । व्याघ्रस्येत्यर्थः । 'शार्दूलद्वीपिनौ व्याघ्रस्तरक्षुस्तु मृगादनमि'त्यमरः ।

शे०वा०— न प्रतिष्ठित इति । न प्रमाणं स्यादित्यर्थः । अत्र मूलगततर्कशब्देन प्रतिपक्षानुमानमाद्ये, द्वितीये स्थापनानुमानं च विवक्षितमिति ध्येयम् । अस्तु प्रमाणमूलस्यैवास्य प्रतिष्ठितत्वं तथाऽपि कुतो न

प्रतिपक्षानुमानसम्भव इत्यत आह **एतदुक्तं भवतीति** । **किन्त्वाद्येनैवेत्यादि** । अनेन द्वितीयार्धगतेन अस्येत्यनेनाद्ये स्थापनानुमानं, द्वितीये प्रतिपक्षानुमानं परामृश्यत इत्युक्तं भवति । ननु प्रमाणमूलेनाद्येन द्वितीयस्य वा, प्रमाणमूलेन द्वितीयेनाद्यस्य वा, बाधाभ्युपगमे तदनुमानाप्रामाण्यप्राप्तेः परस्येष्टसिद्धिरित्यतः सर्वानुमानाप्रामाण्यप्राप्तावेव परस्येष्टसिद्धिर्न तु यत्किञ्चिदनुमानाप्रामाण्यप्राप्तौ, ततश्चाद्यपक्षे आद्यस्यैव द्वितीयपक्षे च द्वितीयस्यानुमानस्यैवाप्रामाण्यप्राप्त्या पक्षद्वयेऽपि सर्वानुमानाप्रामाण्याप्राप्तेर्नेष्टसिद्धिरित्याह **उभयथाऽपीति** । यत्किञ्चिदनुमानाप्रामाण्यवर्णनं च प्रकृतानुपयुक्तं सिद्धान्तिन इष्टं चेति न दूषणमिति भावः । ननु यत्रानुमानद्वये एकं प्रमाणमूलतया निश्चितम् । तत्राद्यस्य द्वितीयस्य वा प्रमाणत्वादुभयोरप्रामाण्याप्राप्तावपि यत्र नैकमपि प्रमाणमूलतया निश्चितं तत्रैकेनापरस्य बाधायोगात् परस्परप्रतिरोधकत्वं भविष्यतीत्यत इष्टापत्त्या समाधत्ते **यदा त्विति** । तर्हि तत्रानुमानद्वयमप्यप्रमाणं स्यादिति मदिष्टसिद्धिरिति शङ्कते **किन्त्विति** । यत्रानुमानद्वयस्य प्रमाणमूलत्वसन्देहस्तत्र प्रतिरुद्धत्वेनानुमानद्वयाप्रामाण्यप्राप्तावपि यत्रान्यतरस्य प्रमाणमूलत्वनिश्चयस्तत्र परस्परप्रतिरोधकत्वानुपपत्त्या तदप्राप्तेः सर्वानुमानाप्रामाण्यनिश्चयात्र परस्येष्टसिद्धिरित्याशयेनाह **नैवं सर्वत्रेति** । अङ्गीकृत्य च स्थलविशेषे उभयाप्रामाण्यमिदं समाधानम् । वस्तुतस्तु वस्तुनो निःस्वभावत्वानुपपत्त्याऽन्यतरस्य प्रमाणमूलत्वस्यावश्यम्भावात् तात्कालिकसन्देहेऽप्यन्यतरस्य परीक्षया प्रमाणमूलत्वावधारणसम्भवात् प्रमाणमूलेनेतरबाधसम्भवान्नोभयोरप्रामाण्यं तत्रापीत्याह **अवधारणायामिति** । **पूर्ववेति** । प्रमाणमूलेनातथाभूतस्य बाध इत्युक्तैवेत्यर्थः ।

वा०र०— आद्य इति । आद्ययोजनानुसारेणार्थकथनपक्षे इत्यर्थः । **द्वितीय इति** । द्वितीययोजनां इत्यादिनोक्तार्थ इत्यर्थः । स्थापनानुमाने च द्वितीय इति सम्बन्धः । चस्त्वर्थः । **प्रत्यक्षानुमानं त्विति** । एतेन समुच्चयार्थक चशब्दप्रयोगायोगः इति निरस्तमिति ज्ञेयम् । **आद्ये त्विति** मूलम् । प्रत्यनुमानं त्वर्थात् न शेषपूरणादिप्रसक्तिरिति ज्ञेयम् । **न हि भवति तरक्षोरिति** मूलम् । समरकण्डुनिघ्नविषाणकोटिसमुल्लिखितगण्डशैलस्य विरिनमाहिषस्यैव सत्प्रतिपक्षत्वादिति भावः । सत्प्रतिपक्षस्थलीयन्यायवाचस्पतौ तयोरेव परस्परप्रतिपक्षत्ववर्णनात् इति ज्ञेयम् । **प्रामाण्यप्राप्त्येति** प्रामाण्यभावोपलक्षणं अस्त्वत्रोभयाप्रामाण्यमिति नञ्युक्तः पाठः । अन्यादृशस्तु लेखकदोषायातः । एतच्च समाधानमस्तु प्रतिरोधः किन्तु नैवं सर्वत्रेति । प्रथमपक्षीयमूलानुसारीति ज्ञेयम् ।

स०व०— पूर्वैव गतिरिति । प्रमाणमूलेनान्यस्य बाधः इत्यादिपूर्वैव गतिरित्यर्थः ।

विठ्ठल०— आद्ययोजनायामिति पूर्वपक्षांशस्याद्ययोजनायामित्यर्थः । अस्य भाष्यस्य । भाष्यं योजयति **यत इति** । किञ्चिदध्याहारेणोत्तरार्धं योजयति **किन्त्विति** । किमनेन पक्षस्योत्तरं लब्धमित्यत आह **एतदुक्तमिति** । तरक्षोर्व्याघ्रस्य 'शार्दूलद्वीपिनौ व्याघ्रस्तरक्षस्तु मृगादनमि'त्यमरः । ननूभयोरपि प्रमाणमूलत्वं सन्देहस्य सार्वत्रिकत्वे प्रतिरोधस्यापि सार्वत्रिकत्वादनुमानाप्रामाण्यप्राप्तमिति शङ्कते **किन्त्विति** । उत्तरमाह

नैवमिति । तत्र हेतुमाह **अवधारणायामिति** । अन्यतरस्य प्रमाणमूलतानिर्णये तु तेन प्रमाणभूतप्रमाणेनान्यतरस्य बाध इति न सर्वथानुमानाप्रामाण्यमित्युक्तैव गतिरित्यर्थः ।

॥ इति आद्ययोजनानुसारेणास्योत्तरस्यार्थः ॥

* * *

॥ अथ तत्रान्ते द्वितीययोजनानुसारेणास्योत्तरस्यार्थः ॥

४६ **सु०— द्वितीययोजनायां तु प्रष्टव्यम् । किं प्रमाणानुग्रहरहितमनुमानं प्रत्यनुमानपराहतत्वादप्रमाणम्, उत तन्मूलम् । आद्ये सम्प्रतिपत्तिमुत्तरमाह आगमेति । (तथापि) नैवं सर्वत्रेति भावः । प्रतिष्ठितः प्रमाणभूतः । द्वितीये त्वाह अक्षजेति ।**

अनु०— अक्षजागममूलस्य स्यादेवास्य प्रतिष्ठितिः ।

प्रतिष्ठितिः प्रामाण्यम् । तेनैव प्रतिप्रयोगस्य बाधितत्वात् । उभयोर्वास्तवप्रमाणमूलत्वासम्भवादिति भावः ।

यादु०— अनुमानं न प्रमाणं प्रत्यनुमानपराहतत्वादिति द्वितीययोजनालब्धमर्थमनूद्य दूषयितुं विकल्पयति **किमिदमित्यादिना** । अत्र मूलतर्कशब्देनास्येत्यनेन च स्थापनानुमानमेव विवक्षितम् । मूलस्य साधारण्यादेवं योजनाद्वयम् । आद्ययोजनायां स्थापनानुमानस्वरूपमेव परेण नाङ्गीकृतमिति तद्विहाय तदङ्गीकृते प्रतिपक्षानुमान एव प्रमाणानुग्रहसदसद्भावं विकल्प्य दूषणमुक्तमिति मन्तव्यम् ।

वं०प०— तथाऽपीति । ततश्चागमानुग्रहाभावे किल तर्कोऽप्रतिष्ठितः । एवम् आगमानुग्रहाभावस्तु सर्वत्र नेत्यर्थः । तथा च प्रकृतास्मदीयानुमानस्यागमानुग्रहोऽस्तीति युक्तं प्रामाण्यमिति हृदयम् । **तेनैव** अक्षजादिमूलकेनैव । यदा तूभयोरपि प्रमाणमूलत्वसम्भवस्तदा कथमत आह **उभयोरिति** । तथात्वे वस्तुनो द्वैरूप्यापत्तेरिति भावः ।

कं०रा०— द्वितीययोजनायामिति । तर्कस्यानुमानस्याप्रतिष्ठानादप्रमाणत्वान्नानुमानेन पूर्वोत्तरपक्षो युक्तौ कथं तर्कस्याप्रमाणत्वं यतोऽन्यथाप्यनुमेयमिति द्वितीययोजनायामित्यर्थः ।

श्रीनिधि०— द्वितीययोजनायां त्विति । पूर्वयोजनायां तु तर्कस्याव्यवस्थितत्वोपपादने तात्पर्यम् । अत्र तु तर्काप्रामाण्योपपादन इत्येतावन्मात्रेण भेदः ।

शे०वा०— **द्वितीययोजनायामिति** । प्रत्यनुमानपराहतत्वान्नानुमानं प्रमाणमिति नानुमानेन पूर्वोत्तरपक्षौ युक्तावित्यादिना प्रदर्शितयोजनायामित्यर्थः । ननु प्रमाणानुग्रहरहितस्यानुमानस्य प्रत्यनुमानपराहतत्वेनाप्रामाण्ये परस्येष्टसिद्धेः कथं तत्सम्प्रतिपत्तिरित्यतस्तादृशस्याप्रामाण्यप्राप्तावपि प्रमाणानुग्रहवतोऽनुमानस्य प्रबलतया, तद्बाधितत्वेन द्वितीयस्य तत्प्रतिरोधकत्वायोगेन तदप्रामाण्याप्राप्त्या न सर्वानुमानाप्रामाण्यसिद्धिरिति न परस्येष्टसिद्धिः, तथा च युक्ता सम्प्रतिपत्तिरित्याशयेनाह **तथाऽपीति** । ननु च यत्रोभयोरप्यक्षजागममूलत्वं तत्र प्रतिप्रयोगस्य पूर्वेण बाधानुपपत्तेरुभयाप्रामाण्यमावश्यकमित्यतोऽस्त्वत्रोभयाप्रामाण्यं तथाऽपि नैवं सर्वत्रेति न परस्येष्टसिद्धिरिति सत्येव समाधाने वास्तवं समाधानमाह **उभयोरिति** । ततो यद्वस्तुतः प्रमाणमूलं तेनेतरबाधोपपत्तेर्नोभयाप्रामाण्यप्रसङ्ग इति भावः ।

विठ्ठल०— अनुमानं न प्रमाणं प्रतिपक्षानुमानपराहतत्वादिति द्वितीययोजनामनूद्य दूषयितुं विकल्पयति **द्वितीययोजनायामिति** ।

॥ इति द्वितीययोजनानुसारेणास्योत्तरस्यार्थः ॥
॥ इति आदौ तत्सूत्रमुत्तरम् ॥

* * *

॥ अथ ततः सूत्रारूढमुत्तरम् ॥

४७ सु०— यस्त्वेतां व्यवस्थामनभ्युपगम्य सर्वत्रापि प्रतिपक्षस्यास्त्यवकाश इति सर्वमनुमानमप्रमाणमिति च मन्यते तस्य सूत्रारूढमुत्तरमाह अन्यथेति ।

अन्यथाऽस्याप्रतिष्ठा च स्ववाचा व्याहतैव हि ।

एतेन **एवम्** उपपादिते **अपि यो नैवं मन्यते तस्य स्ववचनव्याघातात् अनिर्मोक्षप्रसङ्ग** इति सूत्रयोजना सूचिता ।

तथा हि । सर्वमनुमानमप्रमाणं प्रतिपक्षप्रतिहतत्वादिति त्वदीयमनुमानं प्रतिपक्षपराहतं चाप्रमाणं च भवति न वा । आद्ये नानेन सर्वस्याप्रामाण्यसिद्धिः । द्वितीये त्वत्रैव बाधादीति । **अन्यथा** उक्तव्यवस्थां विहाय, **अस्य** सर्वस्याप्यनुमानस्य **अप्रतिष्ठा** अप्रमाणता, **स्ववाचैव व्याहता हि** इति ।

परि०— अनिर्मोक्ष इत्यत्र कस्मादित्यपेक्षायामाह **स्ववचनव्याघातादिति** । इयं च सूत्रशेषोक्तिः स्वव्याहतिरूपदोषः स्यादिति फलितार्थः । भाष्यटीकयोस्तु अनध्याहारेणानिर्मोक्षप्रसङ्गो मोक्षाभावप्रसङ्ग इत्यर्थ उक्तः । एवं सूत्रतात्पर्यं विवृत्य मूलवाक्यं योजयति **अन्यथेति** । तस्यार्थः **उक्तेत्यादि** ।

वं०प०— **आद्य इति** । साधकस्याप्रमाणत्वादित्यर्थः । **अत्रैवेति** । सर्वान्तर्गते तस्मिन्नेवानुमान इत्यर्थः ।

कं०रा०— **एतेनेति** । अन्यथास्याप्रतिष्ठा च स्वावाचा व्याहतैव हीत्यनेन आगमानुग्रहरहितमेवानुमानं प्रत्यनुमानपराहतत्वादप्रमाणं न सर्वमित्युपपादितेऽपि यो नैवं मन्येत तस्य स्ववचनव्याघातान्निर्मोक्षाभावप्रसङ्ग इत्येवमप्यनिर्मोक्षप्रसङ्ग इति सिद्धान्तांशस्य योजना सूचितेत्यर्थः ।

श्रीनिधि०— **स्वव्याघातादनिर्मोक्ष इति** । व्याघातः एनं बध्नातीत्यर्थः । **बाधादिति** । अंशतो बाधः भागासिद्धिश्चेत्यर्थः ।

शे०वा०— **अवकाश इति** । मन्यते इत्युत्तरेण सम्बन्धः । स्ववचनव्याघातोपदर्शनपूर्वकं भाष्यं योजयति **तथा हीत्यादिना** । बाधादीत्यादिपदेन स्वरूपासिद्धिपरिग्रहः ।

स०व्र०— **अत्रैव बाधादीति** । त्वदीयानुमाने प्रामाण्यस्यैव निश्चितत्वेन सर्वमप्यनुमानं पक्षीकृत्य अप्रामाण्यसाधने अंशतो बाधः । आदिपदेन सत्प्रतिपक्षत्वलक्षणहेतोर्भागासिद्धिरित्यर्थः । **स्ववाचैवेति** । स्वानुमानेनैव बाधासिद्धिलक्षणव्याहतिरित्यर्थः ।

विठ्ठल०— अत्र मूलस्थतर्कशब्देनास्येत्यनेन च स्थापनानुमानमेव विवक्षितम् । **व्याघातादिति** । सूत्रे शेषोक्तिः । **अनिर्मोक्षप्रसङ्गः** मोक्षाभावप्रसङ्गः । उक्तार्थमूलारूढं कुर्वन्मूलं योजयति **अन्यथोक्तव्यवस्थां विहायेति** ।

॥ इति ततः सूत्रारूढमुत्तरम् ॥

॥ इति सूत्रोक्तोत्तरपक्षस्य व्याख्यानम् ॥

॥ इति 'तर्काप्रतिष्ठानात्'इति सूत्रस्य व्याख्यानम् ॥

॥ इति 'असदितिचेन्न प्रतिषेधमात्रत्वात्'इति सूत्रोक्तसिद्धान्तांशव्याख्यानम् ॥

* * *

॥ अथ उक्तार्थस्य सूत्राक्षरानुसारेण उदाहरणनिष्ठत्वापादने मतान्तराणां निरासः ॥

॥ अथ तत्रादौ 'न विलक्षणत्वात्'इत्यादिसूत्राणां व्याख्यानान्तरनिरासः ॥

४८ सु०— अपरे तु 'न विलक्षणत्वादि'त्यादीनि सूत्राणि ब्रह्मणो जगदुपादानत्वाक्षेपसमाधानार्थतया व्याचक्षते । तत्प्रकृत्यधिकरण एव निराकृतम् ।

परि०— तदिति । ब्रह्मणो जगदुपादानत्वमित्यर्थः । सर्वत्र दूषणं तु चन्द्रिकायां व्यक्तम् ।

यादु०— अपरे त्विति । 'न विलक्षणत्वादि'त्यादि 'एवमप्यनिर्मोक्षप्रसङ्गः' इत्यन्तं सूत्राष्टकमेकमधिकरणम् । 'न विलक्षणत्वादि'त्यनन्तरं 'दृश्यते त्वि'ति सूत्रं नास्त्येव । अस्य जगतः स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिना ब्रह्मविलक्षणत्वान्न ब्रह्मोपादानकत्वं, तथात्वं च वैलक्षण्यं 'विज्ञानं चाविज्ञानं चे'त्यादिशब्दादिति आद्यसूत्रेणोक्त्वा, 'न च मृदब्रवीदित्यादिश्रुत्या जगदपि चेतनरूपमेवेति वैलक्षण्यमसिद्धमिति वाच्यम् । तत्राभिमानिदेवताव्यपदेशादि'ति द्वितीयसूत्रेणोक्तम् । तथा चैते पूर्वपक्षसूत्रे ॥ एवं प्राप्ते वैलक्षण्येऽपि गोमयवृश्चिकादेः कार्यकारणभावो दृश्यत इति तृतीयसूत्रेण सिद्धान्तयित्वा, 'ननु तर्ह्यचेतनरूपजगत् प्रागुत्पत्तेरसत्प्रसज्येत तदा चेतनब्रह्ममात्रावस्थानात् । तच्चानिष्टं सत्कार्यवादिनस्तवेति चेन्न । कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वसम्भवात् । सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् । सत्कार्यवादप्रतिषेधासमर्थत्वादि'ति चतुर्थसूत्रेणोक्त्वा, 'ननु तर्हि प्रलये कार्यं कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदिति कार्यवद्ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्गादसमञ्जसमिदमिति पञ्चमेन पूर्वपक्षयित्वा, 'मैवं शरावमायास्वप्नादिषु प्रलीनेषु तद्धर्माणां मृन्मायाविस्वप्नद्रष्ट्रादिष्वदर्शनेन कारणस्य कार्यदोषासंसर्गे दृष्टान्तसद्भावादिति षष्ठेन सिद्धान्तयित्वा, किञ्च न विलक्षणत्वादनुपादानतेत्यादयो दोषाः साङ्ख्यमतेऽपि समाः शब्दादिहीनं प्रधानं शब्दादिमज्जगदुपादानमिति साङ्ख्यैः स्वीकारात्' इति सप्तमेनोक्त्वा, 'किञ्च न तर्केण ब्रह्मणः श्रौतकारणत्वापह्नवो युक्तः तर्काणामप्रतिष्ठितत्वात् । नन्वन्यथा तर्कस्याप्रतिष्ठा यथा न भवति तथा सूक्ष्मबुद्धिभिरनुमेयमिति चेदेवमपि विषयान्तरे तर्कस्य प्रतिष्ठितत्वेऽप्यतिगम्भीरे शब्दैकगम्ये जगत्कारणे तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षः' इत्यष्टमेन उक्तमिति व्याचक्षत इत्यर्थः ।

कं०रा०— अपरे त्विति । न विलक्षणत्वादित्यादीनि एवमप्यनिर्मोक्षप्रसङ्ग इत्यन्तानि सूत्राण्येकमधिकरणम् । तानि च ब्रह्मणो जगदुपादानत्वाक्षेपसमाधानार्थानि । तथा हि । अस्य जगतः स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिना ब्रह्मविलक्षणत्वान्न ब्रह्मोपादानकत्वं तथात्वं च वैलक्षण्यं च विज्ञानं चाविज्ञानं चेत्यादिशब्दात्सिद्धमित्याद्यसूत्रेणोक्त्वा न च मृदादिश्रुत्या जगदपि चेतनरूपमेवेति वैलक्षण्यमसिद्धमिति वाच्यम् । तत्राभिमानिदेवताव्यपदेशादिति द्वितीये नोक्तं तथा चैते पूर्वपक्षसूत्रे एवं प्राप्ते

वैलक्ष्यण्येऽपि गोमयवृश्चिकादेरुपादानोपादेयभावो दृश्यत इति दृश्यते त्विति तृतीयसूत्रेण सिद्धान्तयित्वा ननु तर्ह्यचेतनरूपं जगत् प्रागुत्पत्तेरसत्प्रसज्येत तदा चेतनब्रह्ममात्रावस्थाना ते चानिष्टं सत्कार्यवादिनस्तदेवेति चेन्न कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वासम्भवात्सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् सत्कार्यवाद-निरासाक्षमत्वादिति चतुर्थसूत्रेणोक्त्वा ननु तर्हि प्रलये कार्यं कारणाविभागमापद्यमानमात्मीयेन धर्मेण कारणं दूषयेदिति कार्यवद्ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्गादसमञ्जसमिदमिति पञ्चमेन पूर्वपक्षयित्वा मैवं शरावादि माया-स्वप्नादिषु प्रलीनेषु तद्धर्मणा मुखमायाविस्वप्नद्रष्टादिष्वदर्शनेन कारणस्य कार्यदोषासंसर्गे दृष्टान्तसद्भावादिति षष्ठेन सिद्धान्तयित्वा किञ्च विलक्षणत्वादनुपादानतेत्यादयो दोषाः साङ्ख्यमतेऽपि समाशब्दादिहीनं प्रधानं शब्दादि-मज्जगदुपादानमिति साङ्ख्यैः स्वीकृतत्वादिति सप्तमेनोक्त्वा किञ्च तर्केण ब्रह्मणः श्रौतकारणत्वापह्नवो युक्त-स्तर्कस्याप्रतिष्ठितत्वात् ननु अन्यथाप्यनुमेयं तर्कस्याप्रतिष्ठा यथा न भवति तथा सूक्ष्मबुद्धिभिरनुमेयमिति चेदेवमपि विषयान्तरे तर्कस्य प्रतिष्ठितत्वेऽप्यतिगम्भीरशब्दैकगम्ये जगत्कारणे तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्ष इत्यष्टमेनोक्तमित्यपरे व्याचक्षत इत्यर्थः । **तदिति** । ब्रह्मण उपादानत्वाक्षेपसमाधानार्थतया व्याख्यानं प्रकृ-त्यधिकरणे ब्रह्म उपादानत्वासम्भवस्य सुदृढमुपपादितत्वान्निराकृतमिति भावः ।

शे०वा०— आगमानुग्रहाभाव इति सार्धश्लोकस्य सौत्रसमाधानांशविवरणपरतया योजनायां, तर्काप्रतिष्ठानादित्येतत्सूत्रीयव्याख्याननिरासपरतया स्पष्टप्रतिभासस्य तत्परत्वत्यागः, क्लेशेन कथञ्चित्सौत्र-समाधानांशविवरणपरत्वं च, आगमानुग्रहाभाव इत्याद्यकारिकाया उत्सूत्रार्थविवरणपरत्वेनाभाष्यत्वापत्तेश्चे-त्याद्यपरितोषात् तत्सूत्रीयापव्याख्यानिरासपरत्वमेवाश्रित्य तर्ह्यधिकरणार्थस्याप्यसम्प्रतिपन्नस्य निरस्यत्वात् तमनिरस्यैवाधिकरणैकदेशार्थनिराकरणं भाष्यकाराणामनुचितमित्यतोऽधिकरणार्थस्य प्रागेव निरस्तत्वात् किं पुनरिह तन्निरासेनेत्याशयेन तमनिरस्यैवाधिकरणैकदेशार्थस्यापि तर्काप्रतिष्ठितत्वस्यैव निरासो युक्त इत्यभिप्रेत्य कोऽसावधिकरणार्थः कुत्र च तन्निरास इत्याशङ्कापरिहाराय तदुभयं दर्शयन्नेव प्रागनिराकृतैतदधिकरणैक-देशार्थभूततया परोत्प्रेक्षिततर्काप्रतिष्ठितत्वनिरासपरतयोत्तरभाष्यं योजयति **अपरे त्वित्यादिना सार्धश्लोकेने-त्यन्तेन** ।

इत्यादीनीत्यतःपरमनिर्मोक्षप्रसङ्ग इत्यन्तान्यष्टाविति शेषः । दृश्यते चेत्यस्य सूत्रस्य परमतेऽसत्त्वेन न विलक्षणत्वादित्यादिसूत्राष्टकस्यैवैकाधिकरणत्वस्य परैरुरीकृतत्वादिति द्रष्टव्यम् । **जगदुपादानत्वाक्षेप-समाधानार्थतयेति** । प्रथमद्वितीयपञ्चमसूत्राणि ब्रह्मणो जगदुपादानत्वाक्षेपार्थानि तृतीयचतुर्थषष्ठसप्तमाष्टमानि तत्समाधानानीत्येवं जगदुपादानत्वाक्षेपसमाधानार्थतयेत्यर्थः । तथा हि— प्रकृतिश्चेत्यादिना ब्रह्म जगदुपा-दानमित्युक्तम् । तदाक्षेपार्थं 'न विलक्षणत्वादि'ति सूत्रम् (ब्र.सू. २-१-२-१) । न ब्रह्म जगदुपादानम् । कुतः । अस्य जगतः स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिना ब्रह्मविलक्षणत्वात् । न चाप्रयोजकत्वम् । रुचकादीनां मृद्विकारत्वस्य शरावादीनां च सुवर्णविकारत्वस्यादर्शनेन समानरूपयोरेव प्रकृतिविकृतिभावस्थित्या विलक्षणयोर्ब्रह्मजगतोस्तदयोगात् । न च ब्रह्मजगतोरपि वैलक्षण्यासिद्धेर्युक्तः प्रकृतिविकृतिभाव इति वाच्यम् ।

विज्ञानं चाविज्ञानं चेत्यादिशब्दादेव तत्सिद्धेरिति प्रथमसूत्रार्थः ॥ ननु मृदब्रवीदापोऽब्रुवन्नित्यादिश्रुत्या जगतोऽपि चेतनरूपत्वसिद्धेर्वैलक्षण्यमसिद्धमिति युक्तः प्रकृतिविकृतिभाव इत्यत्रोत्तरं पठति **अभिमानीति** (ब्र.सू. २-१-६) । अत्र सूत्रे तुशब्दः शङ्कामपनुदति । न मृदब्रवीदित्येवंजातीयकया श्रुत्या मृदादीनां चेतनत्वमाशङ्कनीयम् । यतोऽभिमानिव्यपदेश एषः । मृदाद्यभिमानिन्यश्चेतना देवता वदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते न मृदादिमात्रम् । कस्मात्, विशेषात् । 'एता ह वै देवता अहं श्रेयसे विवदमानाः' इति कौषीतकीब्राह्मणे प्राणसंवादे करणमात्राशङ्कानिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशेषणात् । अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मन्त्रार्थवादे इतिहासपुराणादिभ्योऽवगम्यन्ते । अग्निर्वाग्भूत्वा मुखं प्राविशदित्येवमादिकया श्रुत्या करणेष्वनुग्राहकदेवतानुगतिदर्शनाच्च । तस्माद्विलक्षणमेवेदं ब्रह्मणो जगत् । विलक्षणत्वाच्च न ब्रह्मप्रकृतिकमित्याक्षिप्ते सिद्धान्तयति **दृश्यते त्विति** (ब्र.सू. २-१-३-७) तुशब्दः पक्षं व्यावर्तयति । यदुक्तं विलक्षणत्वाज्जगन्न ब्रह्मप्रकृतिकमिति न तद्युक्तम् । वैलक्षण्येऽपि गोमयवृश्चिकादेः प्रकृतिविकृतिभावदर्शनेन समानरूपयोरेव तद्भावनियमास्थित्या विलक्षणयोरपि ब्रह्मजगतोः प्रकृतिविकृतिभावो युक्त इत्यर्थः । उक्तमर्थमाक्षिप्य समाधत्ते **असदिति चेदिति** (ब्र.सू. २-१-४-८) । ननु तर्ह्यचेतनरूपं जगत् प्रागुत्पत्तेरसत्प्रसज्येत तदा चेतनमात्रावस्थानात् । अनिष्टं चैतत् सत्कार्यवादिनस्तवेति चेन्न । कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वसम्भवात् । सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् । सत्कार्यवाद-प्रतिषेधासमर्थत्वादित्यर्थः । पुनरुक्तमाक्षिपति **अपीताविति** (ब्र.सू. २-१-४-९) । एवं तर्हि स्थौल्यसावयव-त्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मकं कार्यं प्रलये कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदिति अपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिप्रसङ्गात् सर्वज्ञं ब्रह्म जगतः कारणमित्यसमञ्जसमित्यर्थः ॥ समाधत्ते **न तु दृष्टान्तभावादिति** । (ब्र.सू. २-१-४-१०) । नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्ति । यत्तावदभिहितं कारणभावं गच्छत्कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति । तददूषणम् । कस्मात् दृष्टान्त-भावात् । सन्ति हि दृष्टान्ता यथा कारणमपि गच्छत् कार्यं कारणमात्मीयेन धर्मेण न दूषयति । तद्यथा शरावादयो मृत्प्रकृतिका विकाराः प्रलीनाः सन्तो न प्रकृतिमात्मीयेन संसृजन्ति । रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजन्ति । पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजति । यथा च मायास्वप्नादयः प्रलीना न मायादिस्वप्नद्रष्ट्रादीन् स्वधर्मेण संसृजन्ति । ततश्च कारणस्य कार्यदोषासंसर्गे मृदाद्यनेकदृष्टान्तभावान्न कार्यधर्मेण ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्ग इत्यर्थः । दूषणान्तरमाह **स्वपक्षदोषाच्चेति** (ब्र.सू. २-१-४-११) । न विलक्षणत्वादुपादानतेत्यादयो ये दोषा ब्रह्मणो जगदुपादानताया-मभिहितास्ते साङ्ख्यमतेऽपि समाना एव शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात् । अत एव विलक्षणकार्योत्पत्त्यभ्युपगमात् समानः प्रागुत्पत्तेरसत्कार्यप्रसङ्गः । तथाऽपीतौ कार्यस्य कारणाविभागाभ्युप-गमात् तद्वत्त्वप्रसङ्गोऽपि समानः । ततश्च स्वपरसाधारणत्वान्नैतेऽस्मत्पक्षे चोदयितव्या इत्यदोषा एवैत इति नैतैर्ब्रह्मणो जगदुपादानत्वनिरास इति भावः । दूषणान्तरमाह **तर्केति** (ब्र.सू. २-१-४-१२) न तर्केण ब्रह्मणः श्रौतकारणत्वापह्नवो युक्तः । तर्काणामप्रतिष्ठितत्वादित्यर्थः । शङ्कते **अन्यथेति** (ब्र.सू. २-१-४-१२) ।

वैलक्षण्येऽपि गोमयवृश्चिकादेरुपादानोपादेयभावो दृश्यत इति दृश्यते त्विति तृतीयसूत्रेण सिद्धान्तयित्वा ननु तर्ह्यचेतनरूपं जगत् प्रागुत्पत्तेरसत्प्रसज्येत तदा चेतनब्रह्ममात्रावस्थाना ते चानिष्टं सत्कार्यवादिनस्तदेवेति चेन्न कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वासम्भवात्सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् सत्कार्यवाद-निरासाक्षमत्वादिति चतुर्थसूत्रेणोक्त्वा ननु तर्हि प्रलये कार्यं कारणाविभागमापद्यमानमात्मीयेन धर्मेण कारणं दूषयेदिति कार्यवद्ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्गादसमञ्जसमिदमिति पञ्चमेन पूर्वपक्षयित्वा मैवं शरवादि माया-स्वप्नादिषु प्रलीनेषु तद्धर्मणा मुखमायाविस्वप्नद्रष्टादिष्वदर्शनेन कारणस्य कार्यदोषासंसर्गे दृष्टान्तसद्भावादिति षष्ठेन सिद्धान्तयित्वा किञ्च विलक्षणत्वादनुपादानतेत्यादयो दोषाः साङ्ख्यमतेऽपि समाशब्दादिहीनं प्रधानं शब्दादि-मज्जगदुपादानमिति साङ्ख्यैः स्वीकृतत्वादिति सप्तमेनोक्त्वा किञ्च तर्केण ब्रह्मणः प्रोतकारणत्वापह्नवो युक्त-स्तर्कस्याप्रतिष्ठितत्वात् ननु अन्यथाप्यनुमेयं तर्कस्याप्रतिष्ठा यथा न भवति तथा सूक्ष्मबुद्धिभिरनुमेयमिति चेदेवमपि विषयान्तरे तर्कस्य प्रतिष्ठितत्वेऽप्यतिगम्भीरशब्दैकगम्ये जगत्कारणे तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्ष इत्यष्टमेनोक्तमित्यपरे व्याचक्षत इत्यर्थः । **तदिति** । ब्रह्मण उपादानत्वाक्षेपसमाधानार्थतया व्याख्यानं प्रकृ-त्यधिकरणे ब्रह्म उपादानत्वासम्भवस्य सुदृढमुपपादितत्वान्निराकृतमिति भावः ।

शे०वा०— आगमानुग्रहाभाव इति सार्धश्लोकस्य सौत्रसमाधानांशविवरणपरतया योजनायां, तर्काप्रतिष्ठानादित्येतत्सूत्रीयव्याख्याननिरासपरतया स्पष्टप्रतिभासस्य तत्परत्वत्यागः, क्लेशेन कथञ्चित्सौत्र-समाधानांशविवरणपरत्वं च, आगमानुग्रहाभाव इत्याद्यकारिकाया उत्सूत्रार्थविवरणपरत्वेनाभाष्यत्वापत्तेश्चे-त्याद्यपरितोषात् तत्सूत्रीयापव्याख्यानिरासपरत्वमेवाश्रित्य तर्ह्यधिकरणार्थस्याप्यसम्प्रतिपन्नस्य निरस्यत्वात् तमनिरस्यैवाधिकरणैकदेशार्थनिराकरणं भाष्यकाराणामनुचितमित्यतोऽधिकरणार्थस्य प्रागेव निरस्तत्वात् किं पुनरिह तन्निरासेनेत्याशयेन तमनिरस्यैवाधिकरणैकदेशार्थस्यापि तर्काप्रतिष्ठितत्वस्यैव निरासो युक्त इत्यभिप्रेत्य कोऽसावधिकरणार्थः कुत्र च तन्निरास इत्याशङ्कापरिहाराय तदुभयं दर्शयन्नेव प्रागनिराकृतैतदधिकरणैक-देशार्थभूततया परोत्प्रेक्षिततर्काप्रतिष्ठितत्वनिरासपरतयोत्तरभाष्यं योजयति **अपरे त्वित्यादिना सार्धश्लोकेने-त्यन्तेन** ।

इत्यादीनीत्यतःपरमनिर्मोक्षप्रसङ्ग इत्यन्तान्यष्टाविति शेषः । दृश्यते चेत्यस्य सूत्रस्य परमतेऽसत्त्वेन न विलक्षणत्वादित्यादिसूत्राष्टकस्यैवैकाधिकरणत्वस्य परैरुररीकृतत्वादिति द्रष्टव्यम् । **जगदुपादानत्वाक्षेप-समाधानार्थतयेति** । प्रथमद्वितीयपञ्चमसूत्राणि ब्रह्मणो जगदुपादानत्वाक्षेपार्थानि तृतीयचतुर्थषष्ठसप्तमाष्टमानि तत्समाधानानीत्येवं जगदुपादानत्वाक्षेपसमाधानार्थतयेत्यर्थः । तथा हि— प्रकृतिश्चेत्यादिना ब्रह्म जगदुपा-दानमित्युक्तम् । तदाक्षेपार्थं 'न विलक्षणत्वादि'ति सूत्रम् (ब्र.सू. २-१-२-१) । न ब्रह्म जगदुपादानम् । कुतः । अस्य जगतः स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिना ब्रह्मविलक्षणत्वात् । न चाप्रयोजकत्वम् । रुचकादीनां मृद्विकारत्वस्य शरावादीनां च सुवर्णविकारत्वस्यादर्शनेन समानरूपयोरेव प्रकृतिविकृतिभावस्थित्या विलक्षणयोर्ब्रह्मजगतोस्तदयोगात् । न च ब्रह्मजगतोरपि वैलक्षण्यासिद्धेर्युक्तः प्रकृतिविकृतिभाव इति वाच्यम् ।

विज्ञानं चाविज्ञानं चेत्यादिशब्दादेव तत्सिद्धेरिति प्रथमसूत्रार्थः ॥ ननु मृदब्रवीदापोऽब्रुवन्नित्यादिश्रुत्या जगतोऽपि चेतनरूपत्वसिद्धेर्वैलक्षण्यमसिद्धमिति युक्तः प्रकृतिविकृतिभाव इत्यत्रोत्तरं पठति **अभिमानीति** (ब्र.सू. २-१-६) । अत्र सूत्रे तुशब्दः शङ्कामपनुदति । न मृदब्रवीदित्येवंजातीयकया श्रुत्या मृदादीनां चेतनत्वमाशङ्कनीयम् । यतोऽभिमानिव्यपदेश एषः । मृदाद्यभिमानिन्यश्चेतना देवता वदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते न मृदादिमात्रम् । कस्मात्, विशेषात् । 'एता ह वै देवता अहं श्रेयसे विवदमानाः' इति कौषीतकीब्राह्मणे प्राणसंवादे करणमात्राशङ्कानिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशेषणात् । अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मन्त्रार्थवादे इतिहासपुराणादिभ्योऽवगम्यन्ते । अग्निर्वाग्भूत्वा मुखं प्राविशदित्येवमादिकया श्रुत्या करणेष्वनुग्राहकदेवतानुगतिदर्शनाच्च । तस्माद्विलक्षणमेवेदं ब्रह्मणो जगत् । विलक्षणत्वाच्च न ब्रह्मप्रकृतिकमित्याक्षिप्ते सिद्धान्तयति **दृश्यते त्विति** (ब्र.सू. २-१-३-७) तुशब्दः पक्षं व्यावर्तयति । यदुक्तं विलक्षणत्वाज्जगन्न ब्रह्मप्रकृतिकमिति न तद्युक्तम् । वैलक्षण्येऽपि गोमयवृश्चिकादेः प्रकृतिविकृतिभावदर्शनेन समानरूपयोरेव तद्भावनियमास्थित्या विलक्षणयोरपि ब्रह्मजगतोः प्रकृतिविकृतिभावो युक्त इत्यर्थः । उक्तमर्थमाक्षिप्य समाधत्ते **असदिति चेदिति** (ब्र.सू. २-१-४-८) । ननु तर्ह्यचेतनरूपं जगत् प्रागुत्पत्तेरसत्प्रसज्येत तदा चेतनमात्रावस्थानात् । अनिष्टं चैतत् सत्कार्यवादिनस्तवेति चेन्न । कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वसम्भवात् । सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् । सत्कार्यवाद-प्रतिषेधासमर्थत्वादित्यर्थः । पुनरुक्तमाक्षिपति **अपीताविति** (ब्र.सू. २-१-४-९) । एवं तर्हि स्थौल्यसावयव-त्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मकं कार्यं प्रलये कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदिति अपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिप्रसङ्गात् सर्वज्ञं ब्रह्म जगतः कारणमित्यसमञ्जसमित्यर्थः ॥ समाधत्ते **न तु दृष्टान्तभावादिति** । (ब्र.सू. २-१-४-१०) । नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्ति । यत्तावदभिहितं कारणभावं गच्छत्कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति । तददूषणम् । कस्मात् दृष्टान्त-भावात् । सन्ति हि दृष्टान्ता यथा कारणमपि गच्छत् कार्यं कारणमात्मीयेन धर्मेण न दूषयति । तद्यथा शरावादयो मृत्प्रकृतिका विकाराः प्रलीनाः सन्तो न प्रकृतिमात्मीयेन संसृजन्ति । रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजन्ति । पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजति । यथा च मायास्वप्नादयः प्रलीना न मायादिस्वप्नद्रष्ट्रादीन् स्वधर्मेण संसृजन्ति । ततश्च कारणस्य कार्यदोषासंसर्गे मृदाद्यनेकदृष्टान्तभावान्न कार्यधर्मेण ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्ग इत्यर्थः । दूषणान्तरमाह **स्वपक्षदोषाच्चेति** (ब्र.सू. २-१-४-११) । न विलक्षणत्वादुपादानतेत्यादयो ये दोषा ब्रह्मणो जगदुपादानतायाः-मभिहितास्ते साङ्ख्यमतेऽपि समाना एव शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात् । अत एव विलक्षणकार्योत्पत्त्यभ्युपगमात् समानः प्रागुत्पत्तेरसत्कार्यप्रसङ्गः । तथाऽपीतौ कार्यस्य कारणाविभागाभ्युप-गमात् तद्वत्त्वप्रसङ्गोऽपि समानः । ततश्च स्वपरसाधारणत्वान्नैतेऽस्मत्पक्षे चोदयितव्या इत्यदोषा एवैत इति नैतैर्ब्रह्मणो जगदुपादानत्वनिरास इति भावः । दूषणान्तरमाह **तर्केति** (ब्र.सू. २-१-४-१२) न तर्केण ब्रह्मणः श्रौतकारणत्वापह्नवो युक्तः । तर्काणामप्रतिष्ठितत्वादित्यर्थः । शङ्कते **अन्यथेति** (ब्र.सू. २-१-४-१२) ।

अन्यथा तर्कस्याप्रतिष्ठा यथा न भवति तथा सूक्ष्मबुद्धिभिरनुमेयमिति चेदित्यर्थः । परिहरति **एवमपीति** (ब्र.सू. २-१-४-१२) । एवमपि विषयान्तरे तर्कस्य प्रतिष्ठितत्वेऽप्यतिगम्भीरशब्दैकसमधिगम्ये जगत्कारणे तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसङ्ग इत्यर्थ इति जगदुपादानत्वाक्षेपसमाधानार्थतया व्याख्यानप्रकारोऽनुसन्धेयः । न केवलं जगदुपादानत्वाक्षेपसमाधानार्थतयेत्येतद्वस्तुस्थितिकथनमात्रपरं किन्तु 'न विलक्षणत्वादित्यादि'सूत्राणां पूर्वपक्षसूत्रत्वसूचनव्याजेन परकीयव्याख्याने पूर्वपक्षसूत्रत्वानुपपत्तिरूपदोषसूचनार्थं च । तथा हि । अस्मद्रीत्याऽभिमानिव्यपदेशस्त्वित्यादिरवश्यवक्तव्यश्रुतिसंवादियुक्त्यविरोधोक्त्या सिद्धान्तसूत्रत्वेन प्रत्येकमधिकरणत्वे सम्भवति, आद्यद्वितीयपञ्चमसूत्राणां पूर्वपक्षसूत्रत्वेन, तृतीयादीनां च सिद्धान्तसूत्रत्वेनानभिप्रेतस्य ब्रह्मजगतोर्विकारविकारिभावस्योक्त्या एकाधिकरणत्वकल्पनाऽनुपपत्तिः । यदि च तुशब्दप्रयुक्तत्वात् 'दृश्यते तु' इतिसूत्रस्य तत्पूर्वसूत्रयोः पूर्वपक्षत्वं तर्हि 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्', 'असम्भवस्तु सतोऽनुपपत्तेः' इत्यादौ तुशब्दश्रवणात् तत्तत्पूर्वसूत्राणां पूर्वपक्षत्वं स्यात् । यद्यपि पूर्वमीमांसादौ पूर्वपक्षसूत्राणि सन्ति तथाऽपि तत्राद्याध्यायाद्यपाद एव पूर्वपक्षसूत्रसद्भावात्, इह च त्वन्मते प्रथमाध्याये तदभावेनान्यत्रापि सूत्रकृतः पूर्वपक्षत्वसूचकजैमिन्यादिग्रहणाभावे व्याकरणकल्पसूत्रादाविव पूर्वपक्षसूत्राकरणशैलीनिश्चयान्न 'न विलक्षणत्वात्' इत्यादिसूत्राणां पूर्वपक्षसूत्रत्वकल्पनमुचितमिति ।

प्रकृत्यधिकरण एव निरस्तमिति । 'न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यत' इत्यादिनेति शेषः । यद्यप्यत्र सूत्राक्षरानानुगुण्यव्युत्पादनेन परव्याख्यानस्यासाधुत्वं व्युत्पादयितुं शक्यते । तथाऽपि प्रमेयनिराकरणेनैव तदाक्षेपसमाधानाभ्यां तत्प्रतिपादकतया परव्याख्यानस्यासाधुत्वे सिद्धे नाक्षरानुगुण्यानानुगुण्यचिन्ताऽप्यावश्यकी । तदावश्यकतायामपि वा शिष्यैरेव तदूह्यतामित्याशयवता न विशिष्य तद्व्युत्पादितम् । एतदभिप्रेत्य विशिष्यैतद्व्युत्पादनं चन्द्रिकायां कृतमित्यवधेयम् ।

वा०र०— त्याग इति । भवतीति शेषः । **परत्वं चेति** । आश्रयणीयमिति शेषः । **आपत्तिश्चेति** । भवतीति शेषः । **परत्वं चेति** । आश्रयं भवतीति शेषः । **आपत्तेश्चेति** । भवतीति शेषः । **अधिकरणार्थस्यापीति** । अत्र निराकृत एकदेश्यतिरिक्त-सम्पूर्णाधिकरणार्थस्येत्यर्थः । निरस्यत्वे हेतुप्रतिपन्नस्येति । दृश्यते चेत्यस्य सूत्रस्येति । **अयमर्थः** । न विलक्षणत्वादित्यस्यानन्तरं दृश्यतेति सूत्रं नास्त्येव । अभिमानिव्यपदेशस्तु इत्यनन्तरं दृश्यते तु इति सूत्रसद्भावेऽपि दृश्यते चेति सूत्रं नास्ति । तथा च सूत्राष्टकमेव सम्पन्नं इति । तथा हि । प्रवृत्तिश्चेत्यादिनेति भाष्यभामत्याद्युक्तरीत्या क्वचित् चन्द्रिकानुसारेण चोपयुक्तानुवादोऽयम् । तद्वन्यो व्याख्येयोऽस्ति । ......सूचनव्याख्याने परकीयेत्यत्र व्याजेनेत्यतःपरं प्रवृत्तेति शेषः । चन्द्रिकानुसारेणास्मद्रीत्येत्यादि ग्रन्थः । शैलिनिश्चयादित्यतः तर्हि अभिमानीति । यद्यपि तत्पूर्वसूत्रस्य पूर्वपक्षसूत्रं तु परेणाङ्गीकृतमेवेति इष्टापादनमेतद्भवति । तथापि अभिमानीत्येतद्विवक्षया न तथात्वं परेणाङ्गीकृतम् । तथास्यापि पूर्वपक्षसूत्रत्वेनाङ्गीकृतस्य सिद्धान्तसूत्रत्वं तु शब्दशबलात् तदनिष्टमेवेति भावः ।

तदूह्यतामिति । अक्षरानुगुण्यानानुगुण्यमित्यर्थः । एतदेवेति । मूलकृता शिष्यैरूह्यत्वाशयेनाक्षरानुगुण्या-व्युत्पादितमिति एतदेवेत्यर्थः ।

विठ्ठल०— अपरे त्विति । न विलक्षणत्वादित्याद्यनिर्मोक्षप्रसङ्ग इत्यत्र अष्टसूत्रात्मकमेवमधिकरणं न विलक्षणत्वादित्यधिकरणं न विलक्षणत्वादित्यनन्तरं दृश्यते त्विति सूत्रं नास्त्येव । तत्र ब्रह्मण उपादानत्वाक्षेपकं सूत्रं न विलक्षणत्वादिति । अस्य जगतः स्थौल्यसावयवत्वादिना ब्रह्मविलक्षणत्वान्न ब्रह्मोपादानकत्वं तथात्वं वैलक्षण्यं चाविज्ञानं चेत्यादिशब्दात्सिद्धमित्याद्यसूत्रेणोक्त्वा न च 'मृदब्रवीदि'त्यादिश्रुत्या जगदपि न रूपमेवेति वैलक्षण्यमसिद्धमिति वाच्यम् । तत्राभिमानिदेवताव्यपदेशादिति द्वितीयेनोक्तं तथा चेति । पूर्वपक्षसूत्रे एवं प्राप्तेऽपि वैलक्षण्यमपि गोमयवृश्चिकादेरुपादानोपादेयभावो दृश्यत एवेति । दृश्यते चेति तृतीयसूत्रेणा-सिद्धान्तयित्वा । ननु तर्ह्यचेतनरूपजगदुत्पत्तेः प्राक् असत्प्रसज्येत तदा चेतनब्रह्ममात्रावस्थानात् । तच्चानिष्टं सत्कार्यवादिनस्तवेति चेन्न । कार्यस्य कारणाभिन्नतया कारणरूपेण सत्त्वसम्भवात् सत्कार्यवादप्रतिषेधस्य प्रतिषेधमात्रत्वात् सत्कार्यवादनिषेधाक्षमत्वादिति चतुर्थसूत्रेणैवोक्त्वा तर्हि प्रलये कार्यं कारणाविभागमापाद्य-मानमात्मीयेन धर्मेण कारणं दूषयेदिति । कार्यवद्ब्रह्मणोऽप्यशुद्ध्यादिप्रसङ्गादसमञ्जसमिति पञ्चमेन पूर्वपक्षयित्वा मैवं शरावमायास्वप्नादिषु प्रलीनेषु तद्धर्माणां मृन्मायाविस्वप्नद्रष्टादिषु अदर्शनात् कारणस्य कार्यदोषात्संसर्गे दृष्टान्तसद्भावादिति षष्ठ्येन सिद्धान्तयित्वा किञ्च विलक्षणत्वादनुपादानतेत्यादयो दोषाः साङ्ख्यमतेऽपि समाः शब्दादिहीनं प्रधानं शब्दानि मज्जगदुपादानमिति साङ्ख्यैः स्वीकृतत्वादिति सममेवोक्त्वाकिञ्चन तर्केण श्रौतजगत्कारणत्वापह्नवो युक्तः तर्कस्याप्रतिष्ठितत्वात् । न तु अन्यथाऽप्यनुमेयं तर्कस्याप्रतिष्ठा यथा न भवति तथा सूक्ष्मबुद्धिभिरनुमेयमिति चेदेवमपि विषयान्तरे तर्कस्य प्रतिष्ठितत्वेऽपि अतिगम्भीरे शब्दैकसमधिगम्ये जगत्कारणे तर्कस्याप्रतिष्ठितत्वप्रसङ्गादनिर्मोक्ष इत्यष्टमेनोक्तमित्यपरे व्याचक्ष्यत इत्यर्थः । प्रकृत्यधिकरण एवेति । तत्र ब्रह्मण उपादानत्वासम्भवस्य सुदृढमुपपादितत्वादिति भावः ।

॥ इति 'न विलक्षणत्वात्'इत्यादिसूत्राणां व्याख्यानान्तरनिरासः ॥

* * *

॥ अथ तत्र 'तर्काप्रतिष्ठानात्'इत्यंशस्य 'सिद्धान्ततयैव वर्णनपरत्व'निरासः ॥

४९ सु०— यच्चात्र सूत्रे तर्काप्रतिष्ठानादिति वाक्यं भित्त्वा सिद्धान्ततयैव वर्णयन्ति, तद्वा अनेन सार्धेन श्लोकेन निराचष्टे ।

तथा हि तर्कस्याप्रतिष्ठां वदन् वक्तव्यः, किं प्रमाणानुग्रहरहितस्योत तन्मूलस्य ।

आद्ये गूढाभिसन्धिरुत्तरमाह आगमेति । अयमाशयः । सत्यमेतत् । तथाऽपि न साङ्ख्यः स्वतर्कस्यागमाद्यनुग्रहाभावं मन्यते । स्वमतेनेदमुच्यते चेत्पौनरुक्त्यम्, शास्त्रयोनित्वात्, ईक्षतेर्नाशब्दम्, आनुमानिकमित्यादिनाऽस्यार्थस्योक्तत्वादिति ।

द्वितीयं दूषयति अक्षजेति । न हि ज्ञानकरणस्य प्रमाणगृहीतव्याप्त्यादिमत्त्वेन अप्रामाण्यकारणव्यभिचारादिशङ्काकलङ्कविकलस्य प्रामाण्यं नास्तीति युक्तमिति भावः । विपक्षे बाधकं चाह अन्यथेति । अन्यथा उक्तानभ्युपगमेन अस्य प्रमाणमूलस्याप्यनुमानस्य अप्रतिष्ठा स्ववाचा व्याहतैव सूत्रकृतः स्यात् । स्वयमेव हि युक्त्यनुसन्धानरूपां ब्रह्ममीमांसामारभ्य प्रमाणमूलस्यापि तर्कस्याप्रामाण्यमभिदधानः सूत्रकारो न व्याहतभाषी कथं स्यात् ।

परि०— सिद्धान्ततयेति । साङ्ख्योत्प्रेक्षितैः विलक्षणत्वादितर्कैः ब्रह्मजगतोरुपादानोपादेयभावखण्डनमयुक्तं तर्काणामप्रतिष्ठानादिति वर्णयन्तीत्यर्थः । गूढाभिसन्धिरित्युक्तमाशयं व्यनक्ति **अयमाशय इति** । **स्वमतेनेति** । मायिमतेनेत्यर्थः । **अस्यार्थस्येति** । मायावादिमते शास्त्रयोन्यादिषु सूत्रेषु प्रधानकारणत्वं नागमवेद्यं किन्तु ब्रह्मकारणत्वमेवेत्युक्त्या साङ्ख्यतर्काणामागमासंवादस्योक्तत्वात् पौनरुक्त्यमित्यर्थः ।

गु०दी०— तर्काप्रतिष्ठानादिति वाक्यं भित्वा इत्यत्र पृथक् सूत्रं कृत्वेत्यर्थः ।

यादु०— वाक्यं भित्त्वेति । तर्काप्रतिष्ठानादन्यथाऽनुमेयमित्येकवाक्यतया श्रुतसाध्यान्वयेन शङ्काशेषत्वे सम्भवति श्रौतस्य विलक्षणयोरपि कार्यकारणभावस्य न हानिः तर्कस्याप्रतिष्ठितत्वादित्येवमध्याहृतसाध्यान्वयेन वाक्यं भित्त्वा सिद्धान्तशेषतयैव वर्णयन्तीत्यर्थः । गूढमभिसन्धिं प्रकटयति **अयमाशय इति** । **शास्त्रयोनित्वादित्यादि** । शास्त्रयोनिसूत्रेऽनुमानेनान्यस्यैव जगत्कारणत्वमिति प्राप्ते जगत्कारणस्य शास्त्रैकसमधिगम्यत्वेन न तदननुगृहीतानुमानस्य तत्र प्रतिष्ठितत्वमिति, अथवेति वर्णकान्तरेणोक्तत्वात् । ईक्षतेरित्यत्र च 'अशब्दं हि तत्' इत्यनेन तद्विवरणपरेणानुमानिकमित्यादिना च साङ्ख्यानुमानसिद्धं प्रधानं क्वापि श्रुतिवाक्ये प्रतिपाद्यं नेति समर्थनेन तदीयानुमानस्यागमानुग्रहाभावलाभेनाप्रतिष्ठितत्वस्योक्तत्वादित्यर्थः ।

वं०प०— यच्चेति । अन्यथाऽनुमेयमिति पूर्वपक्षे प्राप्ते तर्काप्रतिष्ठानादित्यनेन सिद्धान्तः क्रियत इत्यर्थः । गूढाभिसन्धिमाह **अयमिति** । **स्वमतेनेति** । सिद्धान्तिभिः स्वमतेनेत्यर्थः । **अस्यार्थस्येति** । साङ्ख्योक्तानुमानस्यागमानुग्रहाभावेनाप्रतिष्ठितत्वस्योक्तत्वादित्यर्थः । **अप्रतिष्ठा** अप्रमाणता । तथा च पुरुषमति-

वैश्वरूप्यजन्यत्वात् सर्वस्तर्कोऽप्रमाणमित्यस्य तर्कस्य यदि प्रामाण्यं तर्हि सर्वस्तर्कोऽप्रमाणमिति प्रतिज्ञारूप-स्ववचनव्याहतिः अस्यैव प्रमाणत्वात् । यदि चाप्रामाण्यं तर्हि सर्वतर्काप्रामाण्यसाधकाभावात् सर्वतर्को-ऽप्रमाणमिति व्याहतमिति भावः ।

कं०रा०— यद्वेति । तर्कादिप्रतिष्ठानादन्यथाप्यनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्ग इति सूत्रे तर्काप्रतिष्ठानादित्यस्य अन्यथाप्यनुमेयमित्यनेनैकवाक्यतां त्यक्त्वा तर्काप्रतिष्ठानादिति वाक्यं विलक्षणत्वा-दित्यादितर्केण ब्रह्मणः श्रौतजगदुपादानत्वापह्नवो न युक्तस्तर्कस्याप्रतिष्ठितत्वादिति सिद्धान्तयुक्तिपरतया यत्परे व्याख्याति । यद्वा 'आगमानुग्रहाभावे न तर्कः स्यात् प्रतिष्ठितः । अक्षजागममूलस्य स्यादेवास्य प्रतिष्ठितः । अन्यथास्याः प्रतिष्ठा च स्ववाचा व्याहतैव ही'त्यनेन सार्धश्लोकेन निराचष्ट इत्यर्थः ।

श्रीनिधि०— तर्कस्याप्रतिष्ठां वदन्निति । साङ्ख्यानुमानस्य प्रधानकारणताविषयस्य ब्रह्मकारणता प्रतिषेधरूपस्य वा । गूढाभिसन्धिरिति उक्ताभिसन्धिमुद्घाटयति साङ्ख्यः **स्वतर्कस्येति** ।

शे०वा०— अत्र सूत्र इति । 'तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः' इत्येतस्मिन्सूत्र इत्यर्थः । **वाक्यं भित्त्वेति** । तर्काप्रतिष्ठानादित्येकं वाक्यम्, अन्यथाऽप्यनुमेयमित्यादि अपरम्; इति द्वे एते वाक्ये इत्यर्थः । **सिद्धान्ततयैवेति** । तत्प्रकारश्च प्रागुक्त एवानुसन्धेयः । इदं च वचनं न करिष्यमाणदूषणार्थं परोक्तानुवादमात्रपरं किन्तु परव्याख्यानेऽनुपपत्त्यन्तरसूचकमपि । तथा हि । चशब्दाभावेन सिद्धान्ते हेत्वन्तरायोग्यस्य त्वयाऽप्यन्यथाऽनुमेयमित्यनेनैकसूत्रत्वेन स्वीकृतस्य च तर्काप्रतिष्ठानादित्यस्यास्म-दीयरीत्या अन्यथा स्वपक्षदोषाच्चेति सूत्रोक्ताद्वैपरीत्येनानुमेयं तर्काप्रतिष्ठानादित्येकवाक्यतया श्रुतसाधनान्वयेन शङ्काशेषत्वे सम्भवति, श्रौतस्य विलक्षणयोरपि कार्यकारणभावस्य न हानिः तर्कस्याप्रतिष्ठानादित्येवमध्या-हृतसाध्यान्वयेन वाक्यं भित्त्वा न सिद्धान्तशेषत्वोक्तिर्युक्ता । अनिर्मोक्षं प्रति प्रतियोगिनो दोषादित्यस्योत्तरवाक्ये त्वद्योजनायामनुषञ्जनीयत्वाच्च । दोषादनिर्मोक्ष इत्येतावतापूर्तेः अनिर्मोक्षप्रसङ्ग इत्यत्र प्रसङ्गपदवैयर्थ्याच्चेति न वाक्यभेदो युक्त इति । अभिसन्धिमेवोद्घाटयति **अयमाशय इति** । **सत्यमेतदिति** । आगमानुग्रहरहितस्तर्को न प्रतिष्ठित इत्येतत्सत्यमित्यर्थः । नन्वेवं साङ्ख्योत्प्रेक्षितस्य ब्रह्मणोऽनुपादानत्वसाधकवैलक्षण्याख्यतर्कस्य प्रधानस्य जगदुपादानतासाधकतर्कस्य चागमाद्यननुगृहीतत्वेनाप्रतिष्ठितत्वप्राप्त्या न ब्रह्मणो जगदुपादानत्वासिद्धि-र्नापि प्रधानस्य तत्सिद्धिरिति मदिष्टसिद्धिरित्यतो भवेदेवं कथञ्चिद्यदि तर्कद्वयस्याप्यागमाद्यननुगृहीतता स्यात् । न च साऽस्ति । तत्किं तर्कद्वयस्याप्यागमाद्यननुगृहीतत्वं साङ्ख्यरीत्याऽसिद्धमित्युच्यते स्वरीत्या वेति विकल्पद्वयं मनसि निधाय ब्रह्मणो जगदुपादानत्वनिषेधकोक्ततर्कस्य, प्रधानस्य तदुपपादकतर्कस्य च निर्विकारमि-त्यादिश्रुत्यनुगृहीतत्वाभ्युपगमान्न तस्याप्रतिष्ठितत्वप्राप्तिरित्याशयेनाह **तथाऽपीति** । द्वितीयमुत्थाप्य दूषयति **स्वमतेनेति** । पौनरुक्त्यमेव व्युत्पादयति **शास्त्रयोनित्वादित्यादिना** । शास्त्रयोनित्वादित्यत्र जगत्कारणस्य आनुमानिकत्वमाशङ्क्य शास्त्रैकसमधिगम्यत्वस्य अथवा शास्त्रं योनिः प्रमाणमित्यादिना वर्णकान्तरेणोक्तत्वात्

ब्रह्मणो जगदुपादानत्वस्य शास्त्रसमधिगम्यत्वस्य सिद्धेः तदाक्षेपकतर्कस्यागमाननुगृहीतत्वेनाप्रतिष्ठितत्वस्य तत्रैव सिद्धेः तथा प्रधानाशाब्दत्वस्य **ईक्षतेर्नाशब्दमित्यत्र** तद्विवरणात्मके आनुमानिकपादे च त्वयोपपादितत्वेन तत्कारणताया अनागमिकत्वस्य सिद्धत्वेन तत्कारणतासाधनतर्कस्यागमाननुगृहीततया अप्रतिष्ठितत्वसिद्धेः तदुभयोपपादकत्वे तर्काप्रतिष्ठानादित्यस्य शास्त्रयोनित्वादित्यादिना पौनरुक्त्यमित्यर्थः । नन्वत्र प्रमाणमूलस्य तर्कस्य प्रामाण्यमुच्यते न तु अप्रामाण्यनिरास इति कथमस्य द्वितीयपक्षस्य दूषणत्वं प्रतिष्ठितपदेनाप्रामाण्यनिरासविवक्षया; तथात्वे च हेत्वनुक्तिरेव । हेत्वर्थगर्भतया द्वितीयपक्षानुवादपरस्याक्षजागममूलस्येत्यस्यैतद्धेतुत्वाश्रयणेऽपि अप्रयोजकत्वमित्यतोऽभिप्रायमाह **न हीति** । अन्यथाऽतिप्रसङ्ग इति भावः । **विपक्षे बाधकं चाहेति** । अक्षजागममूलस्यापि तर्कस्याप्रामाण्ये बाधकान्तरमाहेत्यर्थः । स्ववाचा व्याहतिमेवोपपादयति **स्वयमेव हीति** । उपलक्षणं चैतत् । तर्काप्रतिष्ठितत्वसाधकतर्कस्याप्यप्रतिष्ठितत्वेन तर्काप्रतिष्ठानासिद्धेः 'मन्तव्यः सोऽन्वेष्टव्यो यस्तर्केणानुसन्धत्ते' इत्यादिश्रुतिस्मृतिविरोधाच्चेत्यपि द्रष्टव्यम् ।

वा०र०— प्रागुक्त एवेति । न तर्केण ब्रह्मणः श्रौतकारणत्वापह्नवो युक्तः तर्काणामप्रतिष्ठितत्वात् इत्युक्त एवेत्यर्थः । **अनुपपत्त्यन्तरसूचकमपीति** । करिष्यमाणदूषणार्थं परोक्तानुवादपरमपि इदं अनुपपत्त्यन्तरसूचकमपीत्यर्थः । अष्टममप्ययुक्तम् । चशब्दाभावेनेत्यादि चन्द्रिकानुसारेणाह **चशब्दाभावेनेत्यादिना** । **एकसूत्रत्वेनेति** । तर्कस्याप्रतिष्ठितत्वदोषादिति योजनादिति भावः । **वैयर्थ्याच्चेतीति** । अत्र इतिशब्दो हेतौ । **अभिसन्धिमेवेति** । गूढाभिसन्धिरित्युक्ताभिसन्धिमेवेत्यर्थः । अप्रतिष्ठितत्वप्राप्त्या न ब्रह्मणो जगदुपादानत्वसिद्धिः इत्यनुपादानघटितपाठः । तत्रानुपादानत्वशब्दोक्तजगदुपादानत्वाभावप्रतियोगित्वेन जगदुपादानत्वस्यापि पूर्वमुपस्थितत्वमभिप्रेत्य प्रकृतजगदुपादानत्वपरामर्शकतया नापि प्रधानस्य तत्सिद्धिरित्यत्र तच्छब्दोपपत्तिः । जगदुपादानत्वसिद्धिरिति पाठस्तु लेखकागतः इति न कश्चिद्दोषः । **निर्विकार इत्यादीति** । निर्विकाराक्षरो इत्यादीत्यर्थः । आदिपदेनाजामेकां इत्यादि श्रुतिर्ग्राह्या । निर्विकारमिति पाठे तु निर्विकारं इति ....श्रुतिपरिग्रहः । न हि ज्ञानकारणस्येत्यादिनैवान्यथाख्यातिप्रसङ्गः इत्येतत् बाधकस्योक्तत्वात् बाधकपदं बाधकान्तरपरं इत्याह **बाधकान्तरमिति** । चन्द्रिकानुसारेणाह **उपलक्षणं चैतदिति** ।

विठ्ठल०— वाक्यं भित्त्वेति । तर्काप्रतिष्ठानादन्यथाऽप्यनुमेयमित्येकवाक्यतां त्यक्त्वा तर्काप्रतिष्ठानादिति वाक्यं सिद्धान्ततया वर्णयित्वा अन्यथाऽप्यनुमेयमिति चेदिति पूर्वपक्षतया एवमपीत्यादि पुनः सिद्धान्ततया वर्णयन्तीत्यर्थः । व्याख्यानं पूर्ववत् द्रव्यमित्याशयेन गूढाभिसन्धिरित्युक्ताशयमात्रे व्यनक्ति **अयमाशय इति** । आगमानुग्रहमात्रे किं साङ्ख्यरीत्याभिधीयते उत भवद्रीत्येति विकल्पं हृदि निधायाद्यं निराह **तथापीति** । द्वितीयं प्रत्याख्याति **स्वमतेनेति** । शास्त्रयोनित्वादीक्षितेरिति शास्त्रयोनिसूत्रे जगत्कारणस्य शास्त्रैकसमधिगम्यत्वेन तदननुगृहीतानुमानावेद्यत्वस्योक्तत्वात् ईक्षितेरित्यत्र अशब्दं हि तदित्यनेन तद्विवरणपरेणानुमानिकामित्यादिना च साङ्ख्यानुमानसिद्धं प्रधानं कुत्रापि श्रुतिवाक्ये प्रतिपाद्यं

नेति समर्थनेन तदीयानुमानस्यागमानुग्रहाभावेनाप्रतिष्ठितत्वस्योक्तत्वादित्यर्थः । **उक्तानभ्युपगमेनेति** । उक्तानभ्युपगमनिमित्तेनेत्यर्थः ।

॥ इति 'तर्काप्रतिष्ठानात्'इत्यंशस्य 'सिद्धान्ततयैव वर्णनपरत्व'निरासः ॥

* * *

॥ अथ तमान्ते पुरुषमतिवैश्वरूप्यजन्मनस्तर्कस्याप्रतिष्ठितत्वम् इति मतस्य निरसनम् ॥

५० **सु०— यदपि वृत्तिकारैरुक्तम् 'एकेन तार्किकेणोत्प्रेक्षितं तर्कमपरो दूषयति, तेनोत्प्रेक्षितमप्यपरः, इत्यतः पुरुषमतिवै(श्व)रूप्यजन्मा तर्कः स्यादप्रतिष्ठितः' इति । तच्चायुक्तम् । यतोऽस्यापि तर्कस्य प्रामाण्येऽप्रामाण्ये वा अस्याप्रतिष्ठा च स्व(वाचा)-व्याहतैवेति नायं वाक्यभेदो युक्तः ।**

इत्युक्त एव सूत्रार्थः ।

परि०— वैरूप्यजन्मेति । वैरूप्येण जन्म यस्येति बहुव्रीहिः । पुरुषमतिवैचित्र्यादुत्पन्न इत्यर्थः ।

यादु०— वैश्वरूप्यं विविधप्रकारत्वम् ।

श्रीनिधि०— अस्यापि तर्कस्येति । तर्कः प्रतिष्ठितः पुरुषमतिवैश्वरूप्यजन्मत्वादिति तर्कस्य । **नायं वाक्यभेदः इति** । वृत्तिकारेणापि वाक्यभेदेनैव व्याख्यानं कृतमिति ज्ञातव्यम् ।

शे०वा०— पुरुषमतिवैश्वरूप्यजन्मेति । पुरुषमतीनां **वैश्वरूप्यं** विचित्रत्वं तज्जन्मा विचित्रपुरुषमतिजन्मेति यावत् । **यतोऽस्यापि तर्कस्येति** । तर्कस्याप्रतिष्ठितत्वसाधको यः पुरुषमतिवैश्वरूप्यजन्मा तर्कोऽप्रतिष्ठितः इत्येवंरूपस्तर्कस्तस्यापीत्यर्थः । यस्तर्कस्याप्रतिष्ठितत्वसाधकस्तर्कः स प्रतिष्ठितो न वा । प्रथमे कुतः सर्वतर्काप्रतिष्ठितत्वं तदुपपादकतर्कस्यैव तदभावात् । द्वितीये कुतः सर्वतर्काप्रतिष्ठितत्वं तत्प्रसाधकतर्कस्यैवाप्रतिष्ठितत्वादित्यर्थः ।

स०न्न०— पुरुषमतिवैश्वरूप्यं नाम तन्मतेरनेकप्रकारत्वम् ।

विठ्ठल०— एकेन तार्किकेणेति । एतेन पूर्वपक्षिणा तार्किकेणेत्यर्थः । **अस्यापि तर्कस्येति** । सुपुरुषमतिवैचित्र्यजन्यत्वात् तर्कोऽप्रतिष्ठित इत्यस्येत्यर्थः ।

॥ इति पुरुषमतिवैचित्र्यजन्यत्वात्तर्कस्याप्रतिष्ठितत्वम् इति मतस्य निरसनम् ॥

॥ इति उक्तार्थस्य सूत्राक्षरानुसारेण उदाहरणनिष्ठम्युत्पादने मतान्तराणां निरासः ॥

* * *

॥ अथ उक्तार्थस्य सूत्राक्षरानुसारेण उदाहरणनिष्ठम्युत्पादने
'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः' इति सूत्रस्य व्याख्यानम् ॥
॥ अथ तत्रादौ केषाञ्चिदपव्याख्यानं तद्दूषणञ्च ॥

५१ **सु०— अत्र सूत्रम् ॐ एतेन शिष्टा अपरिग्रहा अपि व्याख्याता इति** ॥ तत्केचिद्व्याचक्षते, "**एतेन** 'न विलक्षणत्वादि'त्यादिना प्रकृतेन शिष्टैः केनचिदंशेन परिगृहीतस्य प्रधानकारणवादस्य निराकरणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदप्यंशेन **अपरिगृहीता** येऽण्वादिकारणवादास्ते **अपि व्याख्याता** द्रष्टव्याः" इति । तदिदं दूषयति **न चेति** ।

अनु०— न च शिष्टागृहीतत्वं निरीशादीशवादिनः ।

आस्तां तावद् अभ्यधिकाशङ्काप्रकारः, परिहारातिदेशप्रकारश्च । यत्तावदुक्तम् 'साङ्ख्यादपि वैशेषिकादेरतिशयेन शिष्टागृहीतत्वं' तदति(तीव)विरुद्धम्, साङ्ख्यस्य निरीश्वरत्वात्, वैशेषिकादेस्तु सेश्वरत्वात्, वैपरीत्यस्यैवोचितत्वात् । इह हि ब्रह्मणो जगत्कारणत्वे विप्रतिपत्तयो निरस्यन्ते । तत्र साङ्ख्यो ब्रह्मैव नाभ्युपैति कुतस्तदीयं जगत्कारणत्वमित्यतिशयेन वेदान्तवादविरोधित्वाच्छिष्टापरिगृहीतः । वैशेषिकादिस्तु, ब्रह्म तस्य जगन्निमित्तत्वं चाङ्गीकृत्योपादानतामात्रं नाङ्गीकुरुत इतीषद्विरोधित्वात् ईषच्छिष्टापरिगृहीत इति युक्तम् । सत्कार्यवादित्वादिकं तु प्रकृतासङ्गतमेव, अन्यथा यागीयहिंसानिषेधादिना विपरिवर्तः स्यात् । अथ वेदसंवादबाहुल्याबाहुल्यप्रयुक्तमिदम् । मैवम् (तन्न । तत्त्वानां) प्रतिपाद्यानामपरिसङ्ख्यातत्वादिति ।

परि॰— अत्रेति । अधिकरणे चरमं सूत्रमित्यर्थः । अधिकाशङ्काप्रकारादेरदूषणादनुमतत्वभ्रान्तिं निराह **आस्तामिति** । तावच्छब्देन तयोरप्यनुपपन्नत्वं सूचयति । तच्च व्यक्तं चन्द्रिकायाम् । ननु सत्कार्यवादस्य महदादितत्त्वगणादेश्च शिष्टसम्मतस्य वैशेषिकादिभिरनङ्गीकाराच्छिष्टापरिगृहीतत्वमित्यतः तदप्रयोजकं, विप्रतिपन्नप्रधानप्रमेयविषये साङ्ख्यस्येव वैशेषिकादेरतिविरोधाभावादिति भावेन वैपरीत्यौचित्यं व्यनक्ति **इह हीति** । **प्रकृतेति** । विप्रतिपन्नप्रमेयासङ्गतमित्यर्थः । **यागीयेति** । साङ्ख्येन यागीयहिंसाया निषेधात् वैशेषिकादिना तदनिषेधात् विपरीतत्वमेव शिष्टापरिगृहीतत्वस्य स्यादित्यर्थः ।

गु॰दी॰— ननु साङ्ख्यस्य सत्कार्यवादित्वात् केनचिदंशेन शिष्टपरिगृहीतत्वं किं न स्यादित्यत आह **सत्कार्यवादित्वादिकं तु इति** । **अन्यथा यागीयपशुहिंसानिषेधाविना** इत्यत्र चतुर्विंशतितत्त्वविचारेणैव कैवल्यवादी निरीश्वरः साङ्ख्यः यागीयां हिंसां न मन्यत इति विपरिवर्तः शिष्टापरिगृहीतत्वस्य वेदनिन्दकतया पुनस्साङ्ख्य एव परावृत्तिः स्यादित्यर्थः ।

यदु॰— आस्तां तावदभ्यधिकाशङ्काप्रकार इत्यादि । श्रुत्यवष्टम्भेन जगदभिन्नं ब्रह्म उपादानमिति पूर्वमभिहितं, तदयुक्तम् । कार्यकारणयोरभेदस्य बाधितत्वात् । अभेदे कारणरूपवत् कार्यत्वानुपपत्तेः, करोत्यर्थानुपपत्तेश्च । अभूतभवनं हि तदर्थः । न चास्य कारणात्मत्वे किञ्चिदभूतमस्ति । यदर्थमयं पुरुषो यतेत । अभिव्यक्त्यर्थमिति चेन्न । तस्या अपि कारणात्मत्वेन सत्त्वात् । असत्त्वे वाऽभिव्यङ्ग्यस्यापि तद्वत्प्रसङ्गेन कारणात्मत्वव्याघातात् । भेदाभेदयोश्च परस्परविरोधेनैकत्र सहासम्भवात् । तस्मात्कार्यात् कारणमेकान्तत एव भिन्नम् । न च भेदे गवाश्ववत् कार्यकारणभावानुपपत्तिरिति साम्प्रतम् । अन्यत्वाविशेषेऽपि समवायभेदस्यैवोपादानोपादेयभावनियामकत्वात् । यस्याभूत्वाभवतः समवायस्तदुपादेयम् । यत्र च समवायः तदुपादानम् । उपादानत्वं च कारणस्य कार्यादल्पपरिमाणस्य दृष्टम् । यथा तन्त्वादीनां पटादिभ्यो न्यूनपरिमाणत्वम् । चिदात्मनस्तु परममहत उपादानान्नात्यन्ताल्पपरिमाणमुपादेयं भवितुमर्हति । तस्माद्यत्रेदमल्पतारतम्यं विश्राम्यति यतो न क्षोदीयः सम्भवति तज्जगतो मूलकारणं परमाणुः । क्षोदीयोऽन्तरानन्त्ये तु मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गोऽनन्तावयवत्वादुभयोः । तस्मात्परममहतो ब्रह्मण उपादानादभिन्नमुपादेयं जगत्कार्यमभिदधती श्रुतिः प्रतिष्ठितप्रामाण्यतर्कविरोधात् सहस्रसंवत्सरसत्रगतसंवत्सरश्रुतिवत् कथञ्चिज्जघन्यवृत्त्या व्याख्येयेत्यभ्यधिकाशङ्काप्रकारः । तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्य चाप्रतिष्ठितत्वमन्यथाऽनुमानेऽप्यनिर्मोक्ष आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणमिति परिहारातिदेशप्रकारश्चेत्यर्थः । आस्तामित्यनेनारुचिः सूचिता । तद्बीजं त्वेवमभ्यधिकाशङ्कासद्भावेन पूर्वाधिकरणेनागतार्थत्वेऽपि 'एतेन सर्वे व्याख्याताः' इत्यनेन गतार्थत्वमस्यापरिहार्यमिति ध्येयम् । ननु शिष्टसम्मतं सत् कार्यवादित्वादिकं साङ्ख्येन स्वीकृतं न वैशेषिकैरतः साङ्ख्य एवातिशयेन शिष्टसम्मत इत्यत आह **सत्कार्यवादित्वादिकमिति** ।

आदिपदेन पुरुषे कर्तृत्वाभावादिकस्य परिग्रहः । तस्यापि वेदान्तिसम्मतत्वात् । **यागीयहिंसेति** । साङ्ख्येन यागीयहिंसाया अपि निषिद्धत्वं स्वीकृतमिति साङ्ख्योऽतिशयेन शिष्टापरिगृहीतः; वैशेषिकादिस्तु यागीयहिंसाया धर्मसाधनत्वमङ्गीकरोतीतीषच्छिष्टापरिगृहीत इति विपरिवर्तो वैपरीत्यं स्यादित्यर्थः । आदिपदेनाप्रामाण्यस्वतस्त्वादिकं साङ्ख्येन स्वीकृतं, वैशेषिकादिभिस्तु तत्परतरस्त्वम्; अतोऽपि विपरिवर्त इति ग्राह्यम् । **प्रतिपाद्यानामिति** । वेदप्रतिपाद्यानां भगवदादितत्त्वानां साङ्ख्यशास्त्रे परिसङ्ख्यानाभावात् साङ्ख्यशास्त्रप्रतिपाद्यानां स्वतन्त्राणां प्रधानादितत्त्वानां वा वेदे परिसङ्ख्यानाभावात् । तथा च न साङ्ख्योक्तस्य वेदसंवादः कुतस्तद्बाहुल्यं, ततश्चात्रापि विपरिवर्तः स्यादित्यर्थः ।

वं०प०—— केनचिदंशेनेति । उपादानत्वेनेत्यर्थः । साङ्ख्येन सत्कार्यवादस्वीकाराच्छिष्टपरिगृहीतः, वैशेषिकेण तदनङ्गीकारात् स शिष्टापरिगृहीत इति युक्तमिति चेत् तत्राह **सत्कार्येति** । **प्रकृतेति** । ब्रह्मणो जगत्कारणत्वे विप्रतिपत्तिनिरासो हि प्रकृत इत्यर्थः । **अन्यथेति** । यदि प्रकृतासङ्गतमपि वैषम्यं स्वीकृत्य शिष्टापरिगृहीतत्वादिकं व्युत्पाद्यत इत्यर्थः । तर्हि सर्वशिष्टपरिगृहीतयागीयहिंसाकर्तव्यताया वैशेषिकेण स्वीकारात् स शिष्टपरिगृहीतः, साङ्ख्येन च तदकर्तव्यतास्वीकारात् स शिष्टापरिगृहीत इति विपरिवर्तो वैपरीत्यं स्यादित्यर्थः । **इदं** शिष्टापरिगृहीतत्वादिकम् ।

कं०रा०—— साङ्ख्यतर्कस्यागमानुग्रहराहित्यवेदान्तवादविरोधित्वाच्छिष्टापरिगृहीतत्वं चास्त्वित्यत आह **सत्कार्येति** । सत्कार्यवादित्वादिकं तु प्रकृतब्रह्मकारणत्वानुपयुक्तमेवेत्यर्थः । **अन्यथेति** । प्रकृतं ब्रह्मणो जगत्कारणत्वमपहाय क्वचित्प्रमेये वैशेषिकादिसाङ्ख्ययोर्वेदान्तादिविरोधित्वतदविरोधित्वाभ्यां शिष्टापरिगृहीतत्वतत्परिगृहीतत्वाङ्गीकारे असङ्कुचद्वृत्तिना न हिंस्यादित्यनेन यागीयहिंसापि निषिद्ध्यत इति साङ्ख्येनाङ्गीकृततया यागीयहिंसायाः अनिषिद्धत्वविषये साङ्ख्यस्य वेदान्तवादविरोधित्वावैशेषिकादेस्तु तदभावात्साङ्ख्यरूपशिष्टापरिगृहीतत्वं वैशेषिकादेस्तु तत्परिगृहीतत्वमिति विपरिवर्तः स्यादित्यर्थः ।

श्रीनिधि०—— न विलक्षणत्वादित्यादिना । प्रकृतेनेति दूषणजातेनेति शेषः । **अण्वादिकारणतावादः** पराण्वादिकारणतावादः । **अभ्यधिकाशङ्काप्रकार इति** । इदं सूत्रं व्यर्थं न विलक्षणत्वादित्यादिनैव ब्रह्मकारणतावादविरोधिवादानां निराकृतत्वादित्याशङ्कायां पूर्वमीषत् शिष्टा परिगृहीता निरस्ता । इदानीं सर्वात्मना तदपरिगृहीता इत्यभ्यधिकाशङ्काप्रकार इत्यर्थः ।

शे०वा०—— न चेत्याद्युत्तरभाष्यानर्थक्यमाशङ्क्योत्तरसूत्रापव्याख्याननिरासार्थत्वान्न तदिति भावेन तत्सूत्रमुपन्यस्य तदपव्याख्यानप्रकारप्रदर्शनपूर्वकं दूषकतयोत्तरभाष्यं योजयति **अत्र सूत्रमित्यादिना** । **केनचिदंशेन** कार्यकारणयोरनन्यत्वादिनेति यावत् । **अण्वादीत्यादिपदेन** स्वभाववादपरिग्रहः । **व्याख्याता इति** । निराकृता इत्यर्थः ।

आस्तां तावदन्यधिकाशङ्काप्रकार इति । न च ब्रह्मणो जगदुपादानत्वं युक्तम् । पटादिभ्यो न्यूनपरिमाणानामेव तन्त्वादीनां पटाद्युपादानत्वदर्शनेन कार्यादल्पपरिमाणस्योपादानत्वनियमस्थित्या अत्यन्ताल्पपरिमाणादुपादेयाज्जगतः परममहतश्चिदात्मन एव उपादानत्वायोगात् । तस्माद्यत्रेदमल्पतारतम्यं विश्राम्यति, यतो न क्षोदीयः सम्भवति, तत् जगतो मूलकारणं परमाणुः । क्षोदीयोऽन्तरानन्त्ये सावयवत्वेन मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गोऽनन्तावयवत्वादुभयोः । तस्मात्परममहतो ब्रह्मण उपादानादभिन्नमुपादेयं जगत्कार्यमभिदधती श्रुतिः प्रतिष्ठितप्रामाण्यतर्कविरोधात् सहस्रसंवत्सरसत्रगतसंवत्सरश्रुतिवज्जघन्यवृत्त्यैव कथञ्चिद्व्याख्येया । न तु तदनुरोधेन ब्रह्मणो जगदुपादानत्वसिद्धिरिति भामतीरीत्या गतार्थताशङ्कानिरासायाभ्यधिकाशङ्काप्रकार आस्तामित्यर्थः । **परिहारप्रकारातिदेशश्चेति** । परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं, तर्कस्य चाप्रतिष्ठितत्वमन्यथाऽनुमानेऽप्यनिर्मोक्ष, आगमविरोधश्चेत्येवंरूपं निराकरणकारणमत्रापि तुल्यमिति परिहारातिदेशप्रकारश्चास्तामित्यर्थः । आस्तामित्यरुचिमत्र सूचयति । तद्बीजं तु एवम् । अधिकाशङ्कासद्भावेनास्य पूर्वाधिकरणेनागतार्थत्वप्राप्तावपि 'एतेन सर्वे व्याख्याताः' इत्यनेन गतार्थत्वमवर्जनीयमेव, त्वया तत्राप्यस्यैवार्थस्योक्तत्वादिति । **वैपरीत्यस्यैवेति** । वैशेषिकादेरीषच्छिष्टापरिगृहीतत्वं साङ्ख्यस्यातिशयेन शिष्टापरिगृहीतत्वमिति वैपरीत्यस्यैवेत्यर्थः । तदेवोपपादयति **इह हीत्यादिना** ।

नन्‌ साङ्ख्यस्य सत्कार्यवादित्वाद्वैशेषिकादेस्त्वसत्कार्यवादित्वान्न वैपरीत्यमुचितमित्यतो ब्रह्मणो जगत्कारणत्वे विप्रतिपत्तिनिरासावसरे ब्रह्मतदीयकारणत्वाभ्युपगमतदनभ्युपगमप्रयुक्तवैषम्यस्य 'ईषच्छिष्टापरिगृहीतत्व-अतिशयेन शिष्टापरिगृहीतत्व' अद्योतकत्वेऽपि सत्कार्यवादित्वासत्कार्यवादित्वप्रयुक्तवैषम्यस्योक्तविभागागमकत्वेन प्रकृतासङ्गतत्वान्नोद्भावितवैपरीत्यनिरासकत्वमित्याह **सत्कार्येति** । अवान्तरप्रमेयाभ्युपगमानभ्युपगमप्रयुक्तवैषम्यस्याप्युक्तविभागप्रयोजकत्वे बाधकमाह **अन्यथेति** । **यागीयहिंसानिषेधाविनेति** । साङ्ख्येन यागीयहिंसाया निषिद्धत्वाभ्युपगमात् स एव चातिशयेन शिष्टापरिगृहीतः । वैशेषिकादिना तु यागीयहिंसाया धर्मसाधनत्वस्वीकारात् स ईषच्छिष्टापरिगृहीत इति विपरिवर्तो वैपरीत्यं स्यादित्यर्थः । साङ्ख्यस्य यागीयहिंसानिषेधाभ्युपगमस्तु तद्ग्रन्थादवगम्यते । तथा हि तद्ग्रन्थः 'दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः' इति । व्याख्यातं चैतत् तत्त्वकौमुद्याम् 'गुरुपाठादनुश्रूयत एव न तु केनचित् क्रियत इति अनुश्रवो वेदः, तत्र भव आनुश्राविको वेदज्ञातः इति यावत्-। आनुश्राविकोऽपि कर्मकलापः दृष्टवदेव दृष्टेन तुल्यं वर्तत इति दृष्टवत् । ऐकान्तिकात्यन्तिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात् । न चैवं विवेकज्ञानस्याप्यात्मा ज्ञातव्यः प्रकृतितो विवेक्तव्य इत्यनुश्रवणेनानुश्राविकत्वात् आत्यन्तिकदुःखनिवृत्तिसाधनत्वं न स्यादिति वाच्यम् । आनुश्राविक इति सामान्याभिधानस्य कर्मकलापाभिप्रायकत्वेनाविरोधात् । नन्वानुश्राविकत्वाविशेषात् कथमेकस्यात्यन्तिकदुःखप्रतीकारानुपायत्वमपरस्य च तदिति वैषम्यनियामकाभावेनोभयोरप्येकप्रकारत्वस्यैवावश्यकत्वादित्यत उक्तं 'स ह्यविशुद्धिक्षयातिशय युक्तः' इति । तत्राविशुद्धियुक्तत्वं सोमयागादेः पशुबीजादिवधसाधनत्वात् । तस्य च 'न हिंस्यात्सर्वभूतानी'ति निषिद्धत्वादवसीयते ।

न च 'न हिंस्यात्सर्वभूतानि' इति निषेधस्य सामान्यशास्त्रत्वेन दुर्बलत्वात् 'अग्नीषोमीयं पशुमालभेते'ति यागविधेश्च विशेषशास्त्रत्वेन प्रबलत्वात् । प्रबलशास्त्रानुसारेण निषेधशास्त्रस्याविहितहिंसानिषेधकत्व एव पर्यवसानात् पश्वादिवधसाधनस्यापि सोमयागादेरनिषिद्धत्वात् कथमविशुद्धत्वमिति वाच्यम् । विरोध एव हि बलीयसा दुर्बलं बाध्यते । न चानयोः शास्त्रयोर्विरोधोऽस्ति भिन्नविषयत्वात् । तथा हि । न हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते । न तु हिंसाया अक्रत्वर्थत्वमपि । अग्नीषोमीयादिवाक्येन च हिंसायाः क्रत्वर्थत्वम् । न चानर्थहेतुत्वक्रतूपकारत्वयोः कश्चिद्विरोधः । सा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीति । ततश्च भिन्नविषयत्वेनाविरुद्धतया विशेषशास्त्रेण सामान्यशास्त्रस्य बाधायोगाद्युक्त एव 'न हिंस्यादि'ति यागीयहिंसाया अपि निषेध इति निषिद्धत्वात् सोमयागादिकर्मणामविशुद्धत्वमेवेति युक्तमुक्तं यागीयहिंसानिषेधादिनेति दिक् ।

प्रतिपाद्यानामिति । साङ्ख्यशास्त्रे वैशेषिकशास्त्रे च प्रतिपाद्यानामित्यर्थः । **अपरिसङ्ख्यातत्वादिति** । निरवधिकत्वादित्यर्थः । प्रतिपाद्यानामर्थानामेतावत्त्वमेवेति निश्चये हि वैशेषिकापेक्षया साङ्ख्यशास्त्रे वेद-संवादबाहुल्यं तदपेक्षया च वैशेषिकशास्त्रे तदल्पत्वमिति वेदसंवादबाहुल्यनिश्चयो भवेत् । ततश्च तदधीन उक्तविभागोऽपि सिद्ध्येत् । प्रतिपाद्येयत्तानिश्चय एव चाशक्यः प्रतिपाद्यानामनन्तत्वादित्याशयः । इतिशब्दो व्याख्याननिराससमाप्त्यर्थः ।

वा०र०— एतेन प्रकृतेनेति शाङ्करभाष्यं विवृण्वन्ननुवदति **एतेन न विलक्षणत्वादित्यादिनेति** मूलम् । अत्र प्रधानवादनिराकरणेनेति तद्भाष्यपाठः । तदनुसारेण योज्योऽस्ति । चन्द्रिकायामपि प्रधानवादस्य निरासेन इत्युक्तं स्वभाववादेति । उपादानत्वं च कारणस्य कार्यादल्पपरिमाणस्य दृष्टमित्यादि भामत्यनुसारेणाह **न च ब्रह्मण इत्यादिना** । यद्यपि न कार्यं कारणात् अभिन्नमित्यादिना उपपादनं इत्यन्तेनापि अधिकाशङ्का भामत्युक्ता तथापि आरम्भाधिकरणे निरसिष्यमाणायाः अत्राभ्युच्चयत्वेन प्रदर्शनेन तां परित्यज्य एतदधि-करणनिरस्यत्वेनोपादानत्वं चेत्यादिनोक्तशङ्कैव दर्शिता तथैव कल्पतरुकृतापि उक्तमिति ज्ञेयम् । **सहस्र-संवत्सरगतसंवत्सरश्रुतिवदिति** । षष्ठस्य सप्तमे परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् इत्यधिकरणे पञ्चपञ्चाशतः त्रिवृतः संवत्सराः, पञ्चपञ्चाशतः पञ्चदशाः, पञ्चपञ्चाशतः सप्तदशाः, पञ्चपञ्चाशतः एकविंशाः, विश्वसृजामयनं सहस्रसंवत्सरं उपयन्ति इत्यत्र संवत्सरशब्दस्योत्पत्तिवाक्ये मुख्यार्थलाभात् तावत् आयुष्काधिकारिकत्वेऽङ्गीकर्तव्ये गन्धर्वादीनां सहस्रायुषां अग्न्युपसंहारिसामर्थ्येन ब्राह्मण्याद्यभावेन च तदधि-कारिकत्वानुपपत्त्या मनुष्याणां चाग्न्युपसंहारसामर्थ्यादिसद्भावेऽपि तेषां सहस्रायुष्ट्वासम्भवात् जीवनोपाय-भूतरसायनादिसिद्धसहस्रायुषामधिकारे वक्तव्ये तादृश औषधादेः रसायनादिरूपस्याप्रामाणिकत्वेन शतायुः पुरुषः इति श्रुतिविरोधेन तावदायुःसम्पादनासम्पादनासामर्थ्येन च औषधादिकल्पनायाः अयोगादेकोऽपि त्रिवृत्स्तोम-तया युक्तः संवत्सरः पञ्चपञ्चसङ्ख्याकैः प्रत्येकं कर्तृभूतैः असम्बध्यमानः तत्संवत्सराख्यो भवति । तथा

पञ्चदशादयोऽपीति नेन चतुःसंवत्सरमिदं सत्रमर्धतृतीयैः यजमानशतैः क्रियमाणं सहस्रसंवत्सरं इति कल्प्यते इत्येवं पञ्चपञ्चाशतः इत्यादि सङ्ख्या यजमानाभिप्रायेत्यस्य पक्षस्यापि बुद्धावत्यन्तमारोहाभावात् चतुर्विंशति-परमाः सत्रमासीरन् इति वचनविरुद्धतया च दुरभ्युपगमत्वात् सङ्ख्यावाचि सहस्रशब्दस्य वा गौणतामाश्रित्य मनुष्याधिकारित्वे वक्तव्ये तत्रापि सङ्ख्याशब्दस्य मुख्यार्थतया एकार्थनिश्चयसामर्थ्याच्च स्वार्थत्यागायोनकाल-वाचिसंवत्सरशब्दस्यैव सौरचान्द्रमासाद्यनेकार्थतया प्रचलदवस्थत्वात् अर्थान्तरपरत्वे वाच्ये यो मासः संवत्सरः इति दर्शनेन मासपरत्वस्याधानादूर्ध्वं सहस्रमासजीवनासम्भवेनायोगात् संवत्सरप्रतिमासे द्वादशरात्रय इति प्रयोगात् द्वादशरात्रिषु संवत्सरशब्दः इत्यादि पक्षान्तरस्य च संवत्सरशब्दस्य प्रतिमाविशेषणत्वेऽपि द्वादशरात्रिषु प्रयोगासिद्ध्यादिनाऽयोगात् अर्थान्तरासम्भवेन द्वादशाहे त्रयस्त्रिवतो भवन्ति । पञ्चादशास्त्रयः इत्यादौ त्रिवृदादिशब्दानां त्रिवृदादिस्तोत्रविशिष्टपरत्वेन समधिगतया पञ्चपञ्चाशतः त्रिवृतः संवत्सराः इत्यादावपि अहःपरत्रिवृदादिशब्दैः निश्चितार्थैः सामानाधिकरण्यात् प्रचलदर्थसंवत्सरशब्दस्य अहरेव संवत्सरः इति अहनि अपि दृष्टप्रयोगस्याहर्लक्षकत्वमाश्रित्य सहस्रसंवत्सरशब्दः सहस्रदिनसाध्यकर्मपर इत्येवं जघन्यवृत्त्या संवत्सरश्रुतिर्नेया इति निर्णीतमिति भावः । अभ्यधिकाशङ्काप्रकाशप्रदर्शनवैयर्थ्यं परिहरति **गतार्थतेति** । तुल्यमात्रापि परमेति भाष्यानुसारेणाह **परमगम्भीरेति** । चन्द्रिकानुसारेणाह **तद्बीजं त्विति** । दृष्टवदिति साङ्ख्यश्लोकस्य तद्विपरीतश्रेयान्प्रयुक्तात् व्यक्ताव्यक्तविज्ञानात् इति उत्तरार्धः । परन्तु उपयोगानुसारेण पूर्वार्धस्य एवोपादानं व्याख्यानोपपादनं चेति ज्ञेयम् । **तत्र प्राप्तः ज्ञात इति यावदिति** । साङ्ख्यपरीक्षाभामत्यनुसारेण भव इत्यस्य प्राप्तः इत्यर्थमाश्रित्य तस्य तात्पर्यं ज्ञातः इत्येतत् मनसि निधाय तात्पर्यार्थमेवाह **वेदज्ञात इति यावत् इति** । यद्यपि चानुश्रवि इत्यादि भामतीमतमनुसृत्याह **न चैवमित्यादिना** । अस्यां प्रतिमायां हेतुमाहेत्यादि भामतीं विवृण्वन् आकाङ्क्षाक्रमेण साङ्ख्यकारिकार्थमुपपादयति **आनुश्राविकत्वाविशेषात् इत्यादिना दिक् इत्यन्तेन** । द्वितीयटीकापि अनुसृता अवलोकनीयास्ति । यत्तु अन्यथाख्यातौ यागीय-हिंसानिषेधात् इत्यादिना प्रामाण्यस्वतस्त्वादिकं साङ्ख्येन स्वीकृतम् । वैशेषिकादिभिस्तु तत्परतस्त्वं अतोऽपि परिवर्तते इति ग्राह्यमित्युक्तम् । तद्विपरिवर्तस्य वैपरीत्यभ्रान्तिमूलम् । वेदानुसारिभिः हि प्रामाण्यस्वतस्त्वमुक्तमिति साङ्ख्योऽपि प्रामाण्यवचनत्वमभ्युपगच्छन् ईषत् शिष्टापरिगृहीतः । नैय्यायिका-दिस्तु प्रामाण्यपरतस्त्वमभ्युपगच्छन्तीति अशिष्टा परिगृहीताः इत्येव प्रामाण्यस्वतस्त्वपरतस्त्वरूपप्रमेय-स्वीकारे विपरिवर्तस्यैव प्राप्तेः । तथा च यागीयहिंसायाः निषेधेन साङ्ख्यस्य शिष्टापरिगृहीतत्वे प्राप्त्या यागीयहिंसास्वीकारे वैशेषिकादेः एव शिष्टैः परिगृहीतः इति प्रतिपादनानन्तरं आदिपदेन प्रामाण्य-स्वतस्त्ववादिसाङ्ख्य ईषच्छिष्टपरिगृहीतः तत्परतस्त्ववादिवैशेषिकादिस्तु शिष्टैः अपरिगृहीत इति विपरिवर्तस्य परं प्रति आपाद्यतयाऽर्थत्वेन कथने भ्रान्तिरेव मूलमिति स्पष्टनीये तत्प्रमेयं दूषणग्रन्थे निवेश्य पूर्वमेव दुष्टत्वाशयेन तत्पुस्तके रक्तमृत्तिकालापनात् । **तदर्थमिति** मूलम् । अत्रार्थशब्दः आवर्तनीयः । आद्यो निवृत्तिवचनः द्वितीयस्तु प्रयोजनवचनः तेन तन्निवृत्त्यर्थं इत्यर्थलाभ इति ज्ञेयम् ।

स०व्र०— ननु साङ्ख्येन सत एव कार्यस्योत्पादाङ्गीकारात् वैशेषिकेण तदनङ्गीकारात् कथं तस्य शिष्टापरिगृहीतत्वाभाव इत्यत आह **सत्कार्यवादित्वादिकमिति । अन्यथेति** । साङ्ख्येन यागीयहिंसानिषेधादे-रङ्गीकृतत्वात्, वैशेषिकेण तदनङ्गीकारात् साङ्ख्यस्यैव शिष्टापरिगृहीतत्वं वैशेषिकस्यैव शिष्टपरिगृहीतत्वं स्यादित्यर्थः ।

विठ्ठल०— प्रामाण्ये व्याहतिः स्फुटा अप्रामाण्येऽपि स्वस्याप्रतिष्ठितासाधकत्वात् प्रतिष्ठैव सिद्धे-त्यप्रतिष्ठा व्याहतेत्यर्थः । प्रकृतैतद्युक्तिमेव दर्शयति **शिष्टैरिति निराकरणेनेत्यन्तेन । केनचिदंशेनेति** । स्वास्वातन्त्र्येण प्रधानस्य जगत्कारणतायाः अपरिग्रहीतत्वेऽपि ब्रह्मविद्यापरिकल्पित प्रधानकारणतेत्यंशस्य परिग्रहादिति भावः । शिष्टापरिगृहीता इत्यस्य प्रतियोगितयैव एवमेतेनेति पदं व्याख्यायेदानीं शिष्टापरिगृहीता इत्येतद्व्याचष्टे **शिष्टैरिति** । विशिष्टैरित्यर्थः । अण्वादिकारणतावादः परमाण्वारम्भवादः । वैशेषिकादिवाद इत्यर्थः । **आस्तां तावदिति** । तावच्छब्देन तयोरनुपपन्नतामभिप्रैति । अभ्यधिकाशङ्कादिकं तस्यानुपपन्नत्वं च चन्द्रिकातोऽवसेयम् । ननु शिष्टसम्मतं सत्कार्यवादादिकं साङ्ख्येन स्वीकृतमिति कथं साङ्ख्योऽतिशयेन शिष्टापरिगृहीत इत्यत आह **सत्कार्यवादित्वादिकमिति** । आदिपदेन पुरुषकृतत्वाभावादिकस्य परिग्रहः । तस्यापि वेदान्तिसम्मतत्वात् । **अन्यथेति** । प्रकृतब्रह्मकारणत्वविरोधित्वातिशयतदभावाभ्यामेव शिष्टागृहीत-त्वादित्यनङ्गीकृत्य प्रकृतासङ्गतसत्कार्यवादित्वादिना तदभ्युपगमे साङ्ख्येन यागीयहिंसाया निषिद्धत्वं स्वीकृतमिति साङ्ख्योऽतिशयेन शिष्टापरिगृहीतः । वैशेषिकादिस्तु धर्मसाधनत्वमङ्गीकरोतीति न शिष्टापरिगृहीत इति वैपरीत्यं स्यादित्यर्थः । आदिपदेन प्रामाण्यस्वतस्त्वादिकं साङ्ख्येन स्वीकृतं वैशेषिकादिस्तु तत्परतस्त्वमतोऽपि विपरिवर्तत इति ग्राह्यम् । **प्रतिपाद्यानामिति** । पौनरुक्त्यादिप्रसङ्गादित्यत्रादिशब्देनातिदेशानुपपत्तिपरिग्रहः इत्यादेः प्रमाणादिति । इदं वा अग्रे नैव किञ्चन आसीत् तदसदेव तन्मनोऽकुरुतेत्यादेः प्रमाणादित्यर्थः ।

॥ इति केषाञ्चिदपव्याख्यानं तद्दूषणञ्च ॥

* * *

॥ अथ एतत्सूत्रस्याभिधेयकथनं तत्समर्थनञ्च ॥

॥ अथ तत्रादौ अभिधेयकथनम् ॥

५२ **सु०**— किं तर्ह्यस्य सूत्रस्याभिधेयमित्यत आह **अत इति** ।

अतोऽवशिष्टजीवादिकर्तृताऽत्र निषिध्यते ।

अर्थान्तरस्य निराकृतत्वादित्यर्थः । अपव्याख्याननिराकरणस्य स्वव्याख्यान-दार्ढ्यार्थत्वान्नासङ्गतमिति सूचयितुम् **अत** इत्युक्तम् । **अवशिष्टा** निराकृताया अभाव-

कर्तृतायाः, जीवादिकर्तृता, जगत इति शेषः । अनेन निराकृतात् अवशिष्टा वेदापरिगृहीता जीवप्रधानासत्कालस्वभावादिवादा निराकृता इति व्याख्यातं भवति । तत्र शिष्टा इत्येवोक्ते ब्रह्मकारण(ता)वादोऽपि प्राप्नोति, तदर्थम् अपरिग्रहा इत्युक्तम् । तन्मात्रे तूक्ते अभावकर्तृत्ववादोऽपि गृह्येत । तथा च पुनरुक्तिरतिदेशानुपपत्तिश्च स्यात् । अतः शिष्टा इत्युक्तम् । अभ्यधिकाशङ्कासद्भावसूचनेन सूत्रारम्भोपपादनार्थं च शिष्टाः शिष्टतया प्रतीताः, न तु तत एव निराकृततयेति ।

परि०— अतिदेशानुपपत्तिरिति । अभेदे तदयोगादिति भावः ।

वं०प०— ब्रह्मकारणतावादोऽपीति । तस्यापि निराकृताभावकर्तृकताया अवशिष्टत्वादित्यर्थः । उपपादनार्थं च शिष्टा इत्युक्तमिति वर्तते । तदेवोपपादयति शिष्टतयेति । न त्विति । शिष्टतया निराकृताया असत्कारणतायाः सकाशादवशिष्टतया । प्रतीता वस्तुगत्या वक्ष्यमाणरीत्या युक्तिविरुद्धत्वेन निराकृता एव परन्तु तत एव न्यायेन निराकृतत्वेन न प्रतीयन्तेऽतः शिष्टत्वेन प्रतीता इत्यर्थः । न तु तत एवेत्यनेनाधिका-शङ्काऽस्तीति सूचितम् । जीवकारणकत्वे घटः, अचेतनकारणकत्वे क्षीरकारणकं दधि, निष्कारणकत्वे कण्टक-तैक्ष्ण्यं दृष्टान्त इत्यर्थः ।

श्रीनिधि०— न तु तत एव निराकृततयेति । प्रतीता इत्यनुवर्तते । तत एव । असदिति चेन्न इत्यस्मादधिकरणादेव ।

शे०वा०— 'सूत्रारम्भोपपादनार्थं च' इत्यतःपरं 'शिष्टाः' इत्युक्तमनुवर्तते । कथमनेनाधिकाशङ्का-सूचनमित्यतः तदुपयोगितया तद्व्याचष्टे शिष्टाः शिष्टतया प्रतीता इत्यादिना ।

॥ इति अभिधेयकथनम् ॥

* * *

॥ अथ तत्र उक्तार्थस्य समर्थनम् ॥
॥ अथ तत्रादौ अनुव्याख्यानोक्तजीवादीत्यादिपदे आक्षेपस्तत्समाधानञ्च ॥

५३ **सु०—** "ननु जीवादीति आदिग्रहणेन असत्कर्तृकत्वं गृहीतम् । तदसत्, तस्य 'असदिति चेत्' इत्यादिना निरस्तत्वेन पौनरुक्त्यादिप्रसङ्गादि"त्यत आह तन्मन इति ।

अनु०— तन्मनोऽकुरुतेत्यादेरसतो मनसो जनिः ।
निवारिता तु पूर्वत्र ह्यकस्मादिति तद्विना ।
असतो विश्वजननमाशङ्क्यात्र निषिध्यते ।

इत्यादेः प्रमाणात् । **आशङ्कितेति** शेषः । **आदिपदेनोक्तयुक्तिर्गृह्यते** । **असतः** अभावस्य । **मनस इति** । ज्ञानेच्छाप्रयत्नेभ्यः । **जनिः** जगत इति शेषः । **पूर्वत्र तु इति** सम्बन्धः । तच्च प्रतिषेधमात्रत्वादित्यादिना स्फुटमवगम्यत इति **हि**शब्दः । 'अकस्माद्बीदमाविरासीदि'त्यादिश्रुत्या । **तत्** मनो, **विना** । **असतः** शून्यात् ।

एतदुक्तं भवति । पूर्वमभावस्य जगत्कारणत्वं निराकृतमिदानीं तु शून्यस्य, किञ्च पूर्वं कर्तृत्वेनाधुना कर्तृतां विनैवेति न पौनरुक्त्यादीति ॥ यद्वा भाष्यदिशा निष्कारणैवात्र जगज्जनिराशङ्कितेति न पौनरुक्त्यादिकम् । अत्र शङ्काप्रापकप्रमाणोपन्यासस्तु अस्यैव प्रमेयभेदस्योपपादनार्थम् ।

एतेनाभ्यधिका शङ्काऽपि सूचिता । तथा हि । मा भूदभावकर्तृकं जगत्, तथापि जीवादिभ्यो जनिमद्भविष्यति । 'जीवाद्भवन्ति भूतानि', 'प्रधानादिदमुत्पन्नम्', 'अकस्माद्बीदमाविरासीदि'त्यादिश्रुत्यनुगृहीतेभ्यो घटदधिकण्टकतैक्ष्ण्यादिदृष्टान्तेभ्यः । न हि जीवादीनां प्रतिषेधमात्रत्वमस्ति, येनोक्तयुक्तिविरोधः स्यात् । असत्त्वाचेतनत्वादेरुपलक्षणमेतदिति चेत्; किमत्रासदादेः कारणत्वमात्रं नेत्युच्यते, किंवा कर्तृत्वम् । नाद्यः, उक्तदृष्टान्तेषु व्यभिचारात् । न द्वितीयः, कर्तृत्वस्यास्माभिरनङ्गीकृतत्वादिति । अत एवात्र सर्वत्र कर्तृशब्दः कारणत्वमात्रपरो द्रष्टव्यः ।

परि०— पौनरुक्त्यादीति । आदिपदेन अतिदेशायोगग्रहः । **उक्तयुक्तिरिति** । अभावकर्तृत्वपक्षे या युक्तिरुक्ता सेत्यर्थः । अत्र **तत्** इत्यनुवादः **मनो विना** इति व्याख्या । ज्ञानेच्छाप्रयत्नान्विनेति यावत् । अपौनरुक्त्याय प्रमेयभेदमात्रे वक्तव्ये प्रमा(णभेदोक्ति)णोक्तिर्व्यर्थेत्यत आह **अत्र शङ्काप्रापकेति** । दृष्टान्तेभ्य इत्यस्य भविष्यतीति पूर्वसाध्येनान्वयः । **उक्तेति** । आद्यसूत्रोक्तेत्यर्थः । **अनङ्गीकृतत्वादिति** । तथा चोपलक्षणमाद्यसूत्रे न युक्तमिति भावः ।

या॰वृ॰— पौनरुक्त्यादिप्रसङ्गाविति । आदिपदेनातिदेशानुपपत्तिपरिग्रहः । **तन्नेति** । निवारणमित्यर्थः । **भाष्यदिशेति** । तत्राकर्तृकेत्युक्तत्वान्निष्कारणैव जनिराशङ्कितेत्यर्थः । नन्वेवं प्रमेयभेदेनैव पौनरुक्त्यादिपरिहारे सम्भवति उभयत्र शङ्काप्रापकप्रमाणभेदोपन्यासो व्यर्थ इत्यत आह **अत्र शङ्केति** । अस्मिंस्तु पक्षे 'असतो विश्वजननमि'ति मूलेऽसच्छब्दोऽभावपरः कारणस्येति शेष इति ज्ञातव्यम् । **घटेत्यादि** । जीवादुत्पन्नत्वे घटो दृष्टान्तः, अचेतनादुत्पन्नत्वे दधि, अकस्मादुत्पन्नत्वे कण्टकतैक्ष्ण्यादीति ज्ञातव्यम् । **असत्त्वाचेतनत्वादेरिति** । आदिपदेनासार्वज्ञ्यपरिग्रहः । **उक्तदृष्टान्तेष्विति** । उक्तदृष्टान्ता येभ्यस्तथोक्ता इति बहुव्रीहिः । ततश्चोक्तदृष्टान्तजनकेष्वित्यर्थः । तथा च घटजनककुलाले असार्वज्ञ्यस्य, दधिजनकक्षीरेऽचेतनत्वस्य, कण्टकशैक्ष्ण्यादिजनके सम्प्रतिपन्नकारणाभावेऽसत्त्वस्य व्यभिचार इति भावः । **कर्तृत्वस्येति** । बुद्ध्यादिमत्त्वरूपमुख्यकर्तृत्वस्येत्यर्थः । **अत एवात्र सर्वत्रेति** । अत्र एतत्सूत्रव्याख्याने सर्वत्र भाष्येऽनुव्याख्याने चेत्यर्थः । भाष्येऽकर्तृकत्वाचेतनकर्तृत्वजीवकर्तृत्वादयोऽपीत्युक्तत्वेनानुव्याख्याने च 'अतोऽवशिष्टजीवादिकर्तृताऽत्र निषिध्यते' इति कर्तृशब्दस्य प्रयोगादिति भावः । एवमव्याख्याने एतत्सूत्रव्याख्यानपरानुव्याख्यानेऽन्यत्र कर्तृशब्दाश्रवणात् सर्वत्रेत्यस्य न स्वारस्यमिति ध्येयम् ।

वं॰प॰— इदं न पूर्वोक्तयुक्तिनिराकृतमिति युक्ताऽभ्यधिकाशङ्केत्याह **न हीत्यादिना** । ननु पूर्वं प्रतिषेधमात्रत्वादित्येतावन्मात्रं यदि हेतुत्वेन विवक्षितं स्यात् तर्ह्येव जीवादिनिराकरणस्य तेन हेतुना असम्भवादभ्यधिकाशङ्का स्यात् । न चैवम् । प्रतिषेधमात्रत्वपदेनासत्त्वाचेतनत्वास्वतन्त्रत्वादिहेतूनामुपलक्षणकरणात् । असज्जीवप्रधानानां कारणतानिषेधस्यैतैर्हेतुभिः कृतत्वेन नास्त्यभ्यधिकाशङ्केत्याशङ्कते **असत्त्वेति** । अभ्यधिकाशङ्काकर्ता, पुनरभ्यधिकाशङ्का युक्ता उपलक्षितैः पूर्वहेतुभिस्तन्निराकरणायोगादित्युपपादयति **किमत्रेति** । **उक्तेति** । प्रधानादिकं कारणं न अचेतनत्वादिहेतुभ्य इत्यत्र घटादावेव व्यभिचारादित्यर्थः । घटादेरपि रूपनवनीतदुःखादिकारणत्वादिति भावः । **कर्तृत्वस्येति** । जीवादिः कर्ता नेति साधने जीवादिभ्यो जनिमद्भविष्यतीति जीवादेः सामान्यतः कारणत्वमात्रं वदद्भिरभ्यधिकाशङ्काकर्तृभिरस्माभिर्जीवादेः कर्तृताया अनङ्गीकारात् सिद्धसाधनं स्यात् । तस्मात्कारणतामात्रनिषेध एव कार्यः, तत्र च व्यभिचारः प्राप्नोति । तस्मात्पूर्वं प्रतिषेधमात्रत्वहेतुनाऽसत्त्वादिहेतूनुपलक्ष्याभ्यधिकाशङ्काभावो न वक्तव्य इति युक्तैवाभ्यधिकाशङ्केत्यर्थः । **अत एव** अभ्यधिकाशङ्काकर्त्रा मया जीवादेः कारणतामात्रस्यैवाङ्गीकारेण कर्तृताया अनङ्गीकारादित्यर्थः । **सर्वत्रेति** । भाष्येऽनुव्याख्याने चेत्यर्थः । अनेन 'जीवादिकर्तृताऽत्रे'ति कर्तृशब्दस्यैकत्रैव सत्त्वात् सर्वत्रेति कथमुक्तमिति शङ्कानवकाशः । केचित्तु जीवे प्रधानेऽसति चेत्येवं सर्वत्र जीवादौ श्रुतः कर्तृशब्द इत्यर्थ इत्याहुः ।

कं॰रा॰— घटेति । विप्रतिपन्नं जीवकारणकं कार्यत्वात् घटवत् विप्रतिपन्नमचेतनकारणकं कार्यत्वाद्दधिवद्विप्रतिपन्नमाकस्मिकं कार्यत्वात् कण्टकतैक्ष्ण्यवदिति दध्यादिदृष्टान्तेष्ववधारितव्याप्तिमूलकत्वानुमानेभ्यो जगज्जीवादिभ्यो जनिमद्भविष्यतीत्यन्वयः । केवलानुमानप्रामाण्यं न सम्भवतीत्यतः । जीवाद्भवन्ति

भूतानि प्रधानादिदमुत्पन्नं अकस्माद्धीदर्वित्यादि श्रुत्यनुगृहीतेभ्य इत्युक्तं उक्तदृष्टान्तेष्विति कण्टकतैक्ष्ण्यादधि घटादिषु क्रमेणासदचेतनजीवानां कारणत्वस्य निश्चितत्वात् प्रतिषेधमात्रत्वोपलक्षितेनासत्त्वात् चेतनत्वादिना तेषां कारणत्वसामान्याभावसाधने व्यभिचार इति भावः ।

श्रीनिधि०— तद्विना मनोविनेति । ज्ञानेच्छाप्रयत्नान्विनेति यावत् । **अस्यैव प्रमेयभेदस्येति** । तथा चाकस्मादिति । कमपि विना निष्कारणकेति यावत् । **अत्र सर्वत्र कर्तृशब्दः कारणत्वमात्रपर इति** । अत्र एतदधिकरणरूपव्याख्यारूपभाष्यानुभाष्यन्यायविवरणेष्वित्यर्थः । अत्रैवानेकस्थलेषु कर्तृशब्दाश्रवणात् ।

शे०वा०— ननु तन्मनोऽकुरुतेत्युत्तरभाष्यमनर्थकम् । न चासदिति चेदित्यादिसूत्राणामेतेनेत्यस्य च प्रमेयभेदोपदर्शनार्थमेतदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न च पुनरुक्त्यादिशङ्कापरिहारः तत्प्रयोजनमिति वाच्यम् । जीवादिकर्तृतानिरासपरस्यैतेनेत्यस्य असत्कर्तृतानिरासपरैः 'असदिति चेत्' इत्यादिसूत्रैर्भिन्नविषयतया तच्छङ्काया एवानुदयादित्यतः समानविषयतोपदर्शनेन पौनरुक्त्यादिशङ्कामुत्थाप्य तन्निवर्तकतयोत्तरभाष्यं योजयति **ननु जीवादीत्यादिना** । **पौनरुक्त्यादीति** । न च तत्रासत्कर्तृतामात्रनिरासादत्र च तदनिराकृतजीवादिकर्तृताया अपि निरासान्न तेन पौनरुक्त्यमिति वाच्यम् । तथापि अंशे पौनरुक्त्यादिपरिहारात् । अधिकविषयतयाऽस्य तेनागतार्थत्वेऽप्येतदपेक्षयाऽल्पविषयकस्य तस्यानेन गतार्थताशङ्काया अवर्जनीयत्वाच्चेति भावः । आदिपदेनातिदेशानुपपत्तिपरिग्रहः । **उक्तयुक्तिरिति** । प्रागभावस्य कर्तृत्वसाधकतया पूर्वपक्ष्युक्तयुक्तिरित्यर्थः । पूर्वत्राभावस्य जगत्कर्तृतानिरास इत्यर्थस्य मूलारूढतासिद्ध्यर्थमसच्छब्दमभावपरतया व्याख्याति **असतोऽभावस्येति** । ननु ज्ञानपूर्वकेच्छाप्रयत्नादिरूपप्रवृत्तेरेव कर्तृत्वादुदाहृतश्रुतौ चासतो ज्ञानेच्छाप्रयत्नप्रतिपादनाभावात् कथमस्याः श्रुतेरसतो जगत्कर्तृत्वे प्रमाणतयोदाहरणमित्यतोऽस्यां श्रुतौ मनःपरिणामस्य ज्ञानादेरेव लक्षणया मनःशब्देन ग्रहणान्न तदनुक्तिरिति भावेन मनस इत्यस्यार्थमाह **मनस इति ज्ञानेच्छाप्रयत्नेभ्य इति** । विश्वजननमित्युत्तरग्रन्थानुरोधेनापेक्षितं पूरयति **जगत इतीति** । 'निवारिता त्वि'त्यत्र तुशब्दस्य निष्प्रयोजनत्वाद्यालोच्य भिन्नक्रमतया तं योजयति **पूर्वत्र त्विति सम्बन्ध इति** । ननु भाष्ये हिशब्दोऽनर्थक इत्यतः सौत्रासच्छब्दस्य शून्ये स्वारस्यात् तदनुरोधेन पूर्वत्र शून्यस्य जगत्कारणत्वनिरासस्यापि सम्भवात् पूर्वत्राभावस्य जगत्कारणतानिरासः कुतः, इत्यतोऽसच्छब्दस्य योगेनाभावपरतयोपपादितत्वेन शून्याभावसाधारणत्वात् । प्रतिषेधमात्रहेतोश्च शून्ये कथमप्यवृत्त्याऽभावमात्रनिष्ठत्वेन निरवकाशत्वात् तदनुरोधेन पूर्वत्राभावस्य जगत्कर्तृताया एव निरासोऽवगम्यत इत्युक्तार्थस्य स्फुटावगतिसूचनार्थत्वान्न तदिति भावेनाह **प्रतिषेधमात्रत्वादित्यनेन इति** ।

ननु पूर्वत्राभावस्योत्तरत्र च शून्यस्य जगत्कारणताया निरस्यत्वकथनमात्रेण पौनरुक्त्यादिपरिहारसम्भवात् तदर्थं पूर्वत्राभावस्य जगत्कर्तृतोत्तरत्र च शून्यस्य जगत्कारणता निरस्यत इत्येतावत्प्रमेयभेदवर्णनं भाष्यकारीयमनर्थकमित्यतस्तावन्मात्रकथनेन पौनरुक्त्यादिपरिहारासिद्ध्यैतावत्प्रमेयभेदकथनमिति न भाष्याभिप्रायः

किन्तु तावन्मात्रेण तत्सिद्धावपि प्रकारान्तरेणापि तत्परिहार इत्यभिप्रेत्य भाष्येऽधिकाशङ्काकीर्तनमित्यभिप्रेत्य प्रकारद्वयेन पौनरुक्त्यपरिहारकतया भाष्याभिप्रायमाह **एतदुक्तं भवतीति** । नन्वेतेनेत्यस्य शून्यस्य जगत्कारणतानिरासपरत्वाश्रयणेन पौनरुक्त्यपरिहारो न युक्तः । अकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृकत्वादयोऽपीति भाष्ये कारणनैरपेक्ष्येणैव जगदुत्पत्तिरित्येतच्छङ्कानिरासपरतयाऽधिकरणारम्भस्य समर्थितत्वेन शून्यकारणतानिरासपरत्वस्य भाष्यविरुद्धत्वादित्याशङ्क्य भाष्योक्तप्रकारापेक्षयाऽसतो विश्वजननमित्यत्रोक्तप्रकारस्य वर्णकान्तरत्वान्न विरोध इति परिहारे सत्येव निरवकाशभाष्यानुसारेणानुव्याख्यानस्यापि भाष्योक्तप्रकारसमर्पकतयाऽधिकरणारम्भसमर्पकत्वसम्भवे किं प्रकारान्तरत्वाश्रयणेनेत्याशयवान् भाष्यैकार्थताश्रयणेनापि पौनरुक्त्यादिपरिहारमाह **यद्वेति** । ततश्च मूलेऽकस्मादिति श्रुतिमनुसृत्य, तद्विना, कारणं विनैव असतो विश्वस्य जननमाशङ्क्येत्यपि योजना सूचिता भवति । ननु च प्रमेयभेदकथनमात्रेण पौनरुक्त्यादिपरिहारसिद्धेस्तन्मनोऽकुल्लेत्यादेरित्यकस्मादिति च प्रमाणोदाहरणं भाष्येऽनर्थकमित्यत आह **अत्रेति** । प्रमेयभेदकथनमात्रेणैव पौनरुक्त्यादिपरिहारसिद्धेर्न प्रमेयभेदोपपादनस्यापि प्रयोजनं किञ्चिदिति पूर्वत्रापरितोषात् आह **अभ्यधिकाशङ्काऽपीति** । अभ्यधिकाशङ्कासूचनार्थं प्रमाणोदाहरणं कृतमित्यर्थः । **दृष्टान्तेभ्य इति** । **तत्रावधृतव्याप्तिकेभ्यः** विप्रतिपन्नं जीवकर्तृकं कार्यत्वाद्घटवत्, विप्रतिपन्नमचेतनकर्तृकं कार्यत्वात् दधिवत्, विमतमसत्कारणं निष्कारणकं वा कार्यत्वात् कण्टकतैक्ष्ण्यादिवत्, इत्यनुमानेभ्य इत्यर्थः । प्रतिषेधमात्रत्वानुमानप्रतिरुद्धत्वान्नोक्तानुमानेभ्यो जीवादीनां कर्तृत्वसिद्धिरिति गतार्थतामाशङ्क्य किमत्र प्रतिषेधमात्रत्वं श्रौतं जीवादीनामकर्तृतासाधकतयाऽभिमतं, किं वा तदुपलक्षितमसर्वज्ञत्वाचेतनत्वादिकमिति विकल्पद्वयं मनसि निधायाद्यमसिद्ध्या दूषयति **न हीति** । द्वितीयमाशङ्कते **असत्त्वाचेतनत्वादेरिति** । आदिपदेनासर्वज्ञत्वपरिग्रहः । **उक्तदृष्टान्तेष्विति** । घटादिदृष्टान्तेष्वित्यर्थः । तत्र सत्यप्यसर्वज्ञत्वादावकारणताया अभावादित्यर्थः । न च चेतनत्वे सतीति विशेषणान्न घटे व्यभिचार इति वाच्यम् । तथाऽपि कुलाले तदपरिहारात् । **अनङ्गीकृतत्वादिति** । तथा च सिद्धसाधनत्वेनाभासत्वान्न सत्प्रतिपक्षत्वमिति भावः । नन्वत्र जीवादीनां विश्वकारणतामात्रपरत्वे पूर्वपक्षस्य 'अतोऽवशिष्टजीवादिकर्तृता' इत्यनुव्याख्याने, 'अकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृकत्वादयोऽपी'ति भाष्ये च जीवादिकारणतेति कारणताशब्दस्यैव प्रयोक्तव्यत्वात् कर्तृशब्दप्रयोगो न युक्तः स्यादित्यत आह **अत एवेति** । कारणत्वमात्रस्यैव पूर्वपक्षत्वेन जीवादीनां कर्तृत्वस्य पूर्वपक्षत्वाभावादेवेत्यर्थः । **अत्र सर्वत्रेति** । अत्रैतत्सूत्रव्याख्याने सर्वत्र भाष्येऽनुव्याख्याने चेत्येवं सर्वत्रेत्यर्थः ।

•

वा०२०— एतेनेत्यस्येति । अस्य सूत्रस्येत्यर्थः । **निष्प्रयोजनत्वादीति** । आदिपदेन पूर्वत्रेत्यत्र निर्देशार्थकानुशब्दाप्रयोगस्यापि उक्तत्वपरिग्रहः । **पूर्वत्राभावस्येति** । अभावस्यैवेत्यर्थः । **शून्याभावेति** । एवं चासच्छब्दस्य शून्ये स्वारस्यं तदभावेऽपि योगवृत्त्या स्वारस्येनासच्छब्देनाभावव्यावृत्त्ययोग इति भावः । तर्हि प्रतिषेधत्वहेतोरपि शून्यसाधारण्यात् तस्यापि प्राक् निरासः किं न स्यात् इत्यत आह **प्रतिषेधमात्रहेतोश्चेति** । **इत्येतच्छङ्केति** । इत्याद्याशङ्केत्यर्थः । उपलक्षणं वा । स्ववचनेनैव एतच्छङ्कया एवोपादानं

शून्यकारणतार्थविषयकस्यैव इहापेक्षस्य सत्त्वात् एतच्छङ्काया एव च तद्विपरीतार्थविषयकत्वाच्चेति भावेनेति ज्ञेयम् । अधिकरणेनानेन एतेन इति सूत्रं ग्राह्यम् । तस्यापि अभ्यधिकाशङ्कया प्रवृत्त्यधिकरणतुल्यत्वात् व्यधिकरणत्वव्यवहार इति बोध्यम् । एवं इतरत्रापि । **असतो विश्वस्येति** । अनेन विश्वस्य ज्ञानमिति विगृह्य बुद्ध्या विविक्तविश्वस्येत्यस्यासतः इति विशेषणमिति योजितं भवति । न तु असतः इति पञ्चम्यन्तं अनुव्याख्याने अभिप्रेतम् । अत्र पक्षे निष्कारणैवात्र जगज्जनिः आशङ्कितेति मूलानुसारेणासतः कारणतासमर्पणे असत्कारणकत्वपक्षपरित्यागायोगेन पञ्चम्यन्ततायाः अयोगेन विश्वाविशेषणतयैवासतः इत्यस्य योज्यत्वात् । तच्चासत्वं नात्यन्तासत्वं किं नाम प्रागसतः सत्तासम्बन्धरूपोत्पत्तिघटकं असत्त्वमात्रमिति न कश्चित् दोषः । एतेनैव कारणं विनैवासतो विश्वस्येति टीकायां निष्कारणत्वात् कारणकत्वपक्षयोरुपादानमिति भ्रान्ताः निरस्ताः । निष्कारणैवाज्यजुष्टात् जनिः भाष्योक्तदिशेति मूलानुसारेण निष्कारणकत्वपक्षमात्रपरत्वम् । एतद्योजनायां उक्तत्वादिति ज्ञेयम् । **तैक्ष्ण्यादीत्**यादिपदेन कूलपतनादिपरिग्रहः । ततः न विष्णोः जगत्कारणत्वं युक्तं इति भाव इति शेषः । उपलक्षितत्वव्यावर्तनायाह **श्रौतमिति** । सूत्रे श्रुतमित्यर्थः । **जीवादीनामकर्तृतेति** । जीवादि न कर्तृ प्रतिषेधमात्रत्वादिति प्रयोगप्रकारो बोध्यः । **उपलक्षितमिति** । ननु जीवो न कर्ता असर्वज्ञत्वात्, प्रधानं न कर्तृ अचेतनत्वात्, असन् न कर्तृ असत्वात्, इत्यनुमानप्रकारो यद्यपि सम्भवति तथापि निष्कारणत्वपक्षे जीवादिपक्षकानुमानेष्विव सूत्रोक्तहेतुना प्रत्यनुमानप्रकारो न सम्भवतीति चेत् न । विमतं नाकारणकं इत्यादेरेव प्रयोगप्रकारत्वात् इत्याहुः । **घटादिदृष्टान्तेष्वित्यर्थः इति** । घटदधिकण्टकतैक्ष्ण्यादिलक्षणदृष्टान्तेष्वित्यर्थः । **तत्रेति** । घटदधिआदिषु दृष्टान्तेष्वित्यर्थः । घटस्य जलाहरणकारणता दध्नः नवनीतकारणतत्तृप्त्यादिकारणतायाः कण्टकतैक्ष्ण्यादीनां दुःखादिविशेषकारणतायाः सत्त्वात् । यद्यपि घटादौ असर्वज्ञत्वाचेतनत्वयोरविशेषेण व्यभिचारेण नासत्त्वस्य व्यभिचारो वक्तुं शक्यः । घटादेरसत्त्वाभावात् । तथापि उपलक्षणया असतोऽप्यत्राभिमतत्वात् तत्रासत्त्वहेतोः व्यभिचारः । तस्य कल्पनादिकारणत्वादि । न च घटादिसमकक्षतयाऽसतो ग्रहणे तस्य दृष्टान्तत्वेनानभिधानात् दृष्टान्तपदास्वारस्यं इति वाच्यम् । दृष्टान्तपदेनैवोपलक्षणस्वीकारात् । दृष्टान्तेष्विति बहुवचनस्याद्यर्थत्वेनादिपदेन वा ग्रहणोपपत्त्या तत्स्वारस्यसम्भवात् । अत्यन्तपदाभावं विवक्षित्वा असत्त्वमात्रस्य स्वस्मिन्नेव व्यभिचारः । अत एव प्रागसतो विश्वस्येति व्याख्यातं इत्यप्याहुः । यत्तु दृष्टान्तपदस्वारस्याविद्धिः उक्तदृष्टान्तेषु इत्यत्रोक्तदृष्टान्ता येभ्यः इति तथोक्ताः इति बहुव्रीहिमाश्रित्य कण्टकशौक्त्यादिजनकासत्यसत्त्वहेतोः व्यभिचारः इत्यर्थवर्णनं अन्यथाख्यातौ । तदसत् । उक्तरीत्या दृष्टान्तपदस्वारस्येनैवासति व्यभिचारोपपत्त्या जघन्यबहुव्रीह्याश्रयणायोगात् । किं चासत्त्वहेतोः व्यभिचारसिद्ध्यर्थमुक्तपदस्योक्तप्रायपरत्वमाश्रित्य घटादिदृष्टान्तेन जगतो जीवादिकर्तृत्वे उक्ते जीवादीनां कुलालादिदृष्टान्तेन जीवत्वानन्यथासिद्धनियतपूर्वभावित्वाभ्यां कारणत्वमपि उक्तमेव भवति । जीवादीनां कारणत्वे दृष्टान्ततया कुलालक्षीरा सत्यपि प्राकृतानि इत्युक्तदृष्टान्तपदेन तेषामेवोक्तप्रमाणं ग्रहणम् । अत एव न हि जीवादीनां इत्यादिनोक्तप्रतिपक्षस्य समानविषयत्वेन शङ्कार्हतया तच्छङ्का । तत्परिहारादिकं च मूले उक्तम् । कार्यपक्षीकारे तु प्रतिपक्षो यत्नतः उपपाद्यः । प्रसज्येतेत्यादिकमपि कल्पनीयं स्यात् । तस्मात् अयुक्तमेतत्

व्याख्यानमिति इत्यारभ्य प्रपञ्चः । उक्तोपलक्षणादिकमभिप्रेत्य एवासर्वज्ञत्वहेतोः चेतनत्वविशेषणमाश्रित्य घटे व्यभिचारपरिहारमाशङ्क्य कुलाले तथापि व्यभिचारपरिहारं वक्ष्यतीति ध्येयम् । यद्यपि असत्त्वाचेतनत्वादेः उपलक्षणमेतत् वाक्यपर्यवसन्नार्थतया जीवादीनां कारणत्वाभावसाधनद्वारा विमतं न जीवादिकर्तृकम्, वस्तुत्वात् इति सिद्धान्त्यभिप्रेतानुमानस्यैव व्याख्याने तत्रत्यवस्तुत्वहेतोः घटादौ व्यभिचारः । घटे जीवकर्तृतायाः दध्यचेतनकारणतायाः कण्टकतैक्ष्ण्यादिवत् सत्कारणतायाश्च सत्यसाध्याभावात् इति वस्तुत्वहेतोः व्यभिचाराभिधानपरतयोक्तदृष्टान्तेष्विति मूलं योजयितुं शक्यम् । असदादेः कारणत्वमात्रं नेत्युच्यते इत्यादिमूलमपि विमतस्यासत्कारणत्वाभावे साधिते फलिताक्षेपपरत्वेन योजयितुं शक्यमेवेति न कश्चिद्दोषः । तथापि अचेतनत्वादिकं च कारणतामात्रवादेऽनैकान्तिकमित्येतदनुवादरूपोत्तरग्रन्थानुसारेण सिद्धान्तस्थवस्तुत्वानुमाने पर्यवसानायाचेतनसर्वज्ञत्वादि हेतूक्तानुमानस्यैव वाक्यलभ्यतामाश्रित्य तत्र व्यभिचारपरतया उक्तदृष्टान्तेषु इत्येतत् वाक्यं योजितम् । यद्यपि चाभावो न कर्ता, विमतं नाभावकर्तृकं इत्येतत् प्रतिपक्षतया उपन्यस्तप्रतिषेधत्वमात्रत्वस्य प्रतिपक्षसामर्थ्यायाभावपक्षकप्रयोगान्तरकरणस्यावश्यकत्वेऽपि प्रकृतेऽसर्वज्ञत्वादेरेव प्रतिपक्षत्वे बाधकाभावेन किं प्रयोगान्तरपर्यन्तधावनेनेत्याशयेन कार्यपक्षकप्रयोगे घटादावेव व्यभिचारकीर्तनं इत्यादि ज्ञेयम् ।

स०व्र०— असत्त्वाचेतनत्वादेरिति । आदिपदेनासार्वज्ञ्यपरिग्रहः । **उक्तदृष्टान्तेति** । जीवादेर्जनिमत्त्वे प्रयुक्तेषु घटदधिकण्टकतैक्ष्ण्यरूपोक्तदृष्टान्तहेतु-कुलालक्षीरासत्सु असार्वज्ञाचेतनत्वासत्त्वेषु सत्स्वपि घटादिकारणत्वस्यैव तत्र सत्त्वेन भवदनुमाने व्यभिचारादिति भावः । **अत्र सर्वत्रेति** । अनुव्याख्याने भाष्ये चेत्यर्थः ।

विट्ठल०— उक्तयुक्तिः भावत्वयुक्तिः । **तच्चेति** । निवारणमित्यर्थः । कथमनेन पौनरुक्त्यमित्यत आह **एतदुक्तं भवतीति** । ननु पूर्वमसत एव जगत्कारणत्वं निरस्तमिति भाष्यादवगम्यते । तत्कथमेतदित्यतः सन्न्यायरत्नावल्यनुसारेणाप्यपौनरुक्त्यं दर्शयति **यद्वेति** । तन्मनोऽकुलेत्यादेरिति प्रमाणोपन्यासस्य कृत्यमाह **अत्रेति** । घटेत्यादि जीवादचेतनादकस्माच्चोत्पन्नत्वे क्रमाद्घटादधिकण्टकशौक्ष्ण्यादयो दृष्टान्त इति ज्ञातव्यम्'। दृष्टान्तेभ्य इत्यस्य भविष्यतीति पूर्वसाध्येनान्वयः । **सूत्रोक्तं** प्रतिषेधमात्रत्वं लिङ्गमुपलक्षणमिति शङ्कते **असत्त्वेति** । **अचेतनत्वादेरित्यादिपदेन** अस्वातन्त्र्यसङ्ग्रहः । तथा च शून्यस्यासत्प्रधानादेव चेतनत्वादस्वतन्त्रत्वाज्जीवस्यास्वतन्त्रत्वादित्युक्तं भवति । **उक्तदृष्टान्तेष्वित्यत्र** बहुव्रीहिः । ततश्चोक्तदृष्टान्तो योऽयं घटादिस्तज्जनककुलालादिष्वसत्त्वात् स्वतन्त्रत्वादिहेतूनां व्यभिचाराज्जीवादिर्न कर्ता सत्त्वादस्वतन्त्रत्वादिकमस्वतन्त्रत्वेनाभिमतं न साधकमित्यर्थः । **असदादेरिति** । प्रकृतत्वेऽप्युक्तदृष्टान्तेषु व्यभिचारादित्युक्तेरुपलक्षणत्वेनाभिमतानामेवात्र व्यभिचारोऽभिधीयते । न त्वसतः कारणत्वादुक्तस्य प्रतिषेधमात्रस्येति ज्ञेयम् । आद्यसूत्रे उपलक्षणत्वेन युक्तमित्येवात्र प्रकृतत्वात् । **अत्र सर्वत्रेति** । एतत्सूत्रव्याख्याने सर्वभाष्ये चेत्यर्थः ।

भाष्ये अकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृत्वादयोऽपीत्युक्तत्वेनात्राप्यतोऽवशिष्टजीवादिकर्तृता अत्र निषिध्यत इति कर्तृशब्दप्रयोगादिति भावः ।

॥ इति अनुव्याख्यानोक्तजीवादीत्यादिपदे आक्षेपस्तत्समाधानश्च ॥

* * *

॥ अथ तत्र निषेध्यायां जीवादिकर्तृतायां विकल्प्य शङ्का तत्समाधानश्च ॥

५४ सु०— 'नन्वत्र जीवादेर्विश्वकारणत्वमात्रं शङ्क्यते, तस्यैव वा । आद्ये न सिद्धान्तविरोधः, जीवस्य ह्यदृष्टाधारतया निमित्तत्वं प्रधानस्य चोपादानत्वमङ्गीकृतमेव । न द्वितीयः प्रापकाभावात्, कार्यस्य सकर्तृकत्वनियमदर्शनाच्चे'त्यत आह **प्रापकमिति** ।

अनु०— प्रापकं वाक्यमात्रं तु

द्वितीय एवाशङ्क्यते । तस्य च प्रापकं 'न जीवात्कारणं परं', 'न ह्यन्यत्कारणं मतमि'त्यादिवाक्यम् । न च लोकविरोधः । वाक्यमात्रसिद्धेऽर्थे तत्प्रतिपन्नमेव गृह्यते न तु लोकोऽनुगम्यत इति पूर्वपक्षी मन्यत इति ।

ननु च प्रधानकारणत्वादिमतानि द्वितीयपादे निराकरिष्यन्ते, तेषामत्रापि निराकरणे पुनरुक्तिदोषः स्यादित्यतो वाऽऽह **प्रापकमिति** । अत्र शङ्काप्रापकं वाक्यमात्रं न तु समय इत्यर्थः । इदमुक्तं भवति । अत्र श्रुत्यनुगृहीताभिर्युक्तिभिः प्राप्तं प्रधानादिकारणत्वं निराक्रियते । उत्तरं(त्र) तु साङ्ख्यादिसमयप्राप्तम् । अतोऽपि नोक्तदोष इति ।

'नन्वेवं तर्ह्येतेनेत्यतिदेशः कथम्, उक्तपरिहारस्य पूर्वपक्षिणा परिहृतत्वादि'त्यत आह **परिहार इति** ।

परिहारोऽविशेषितः ।

यद्यपि प्रतिषेधमात्रत्वं प्रधानादिष्वसिद्धम्, अचेतनत्वादिकं च कारणत्वमात्रवादे अनैकान्तिकम्; तथाऽपि पूर्वपक्षाणां युक्तिविरुद्धत्वं यत्प्रतिषेधमात्रत्वात् दृष्टान्त-

भावादिति सामान्यतः सूचितम्, यश्च स्वपक्षदोषाच्चेत्यप्रामाणिकत्वं, स परिहारः अत्रापि अविशेषितः समानः; **इत्यतिदेशो युज्यत** इत्यर्थः ।

परि०— प्रापकाभावादिति । उक्तदृष्टान्तानां तन्मात्रकारणत्वाप्रापकत्वात् । प्रत्युत कर्तृरूपकारणान्तरप्रापकं चास्तीत्याह **कार्यस्येति** । **द्वितीय इति** । तस्यैव कारणत्वमिति पक्ष एवेत्यर्थः । **लोकेति** । लोके हि कार्यस्य सकर्तृकत्वनियमदृष्ट्या दृष्टिविरोध इत्यर्थः । **द्वितीयपाद इति** । रचनेत्यादौ प्रधानकारणत्वमतस्य अभ्युपगमेऽपीत्यादावकारणत्वमतस्य अन्यथानुमितौ चेत्यत्र जीवकारणत्वमतस्य असत इत्यत्र शून्यकारणत्वमतस्य निरासादिति भावः । एवं हि तृतीयपादे निवेशापात इत्यत आह **इदमुक्तमिति** । **युक्तिभिरिति** । दृष्टान्तेभ्य इति प्रागुक्तयुक्तिभिरित्यर्थः । **उक्तेति** । निषेधमात्रत्वरूपपरिहारस्येत्यर्थः ।

वादु०— इत्यादिवाक्यमिति । आदिपदेन 'अकस्माद्धीदमाविरासीदि'त्येवंजातीयके क्वचित् 'न ह्यन्यत्कारणं परमि'त्येवंजातीयकं वाक्यं यत्सम्भावितं तस्य परिग्रहः । ननु तर्ह्यस्य तृतीयपादेऽन्तर्भावप्रसङ्ग इत्यत आह **एतदुक्तं भवतीति** । तथा च श्रुत्युपसर्जनयुक्तिविरोधत्वरूपैतदधिकरणोपाध्युपहितत्वादत्रैवैतेषां पक्षाणां निराकरणमिति भावः ।

वं०प०— अचेतनस्यैव कारणत्वं शङ्क्यते इति पक्षे एव दूषणान्तरमाह **कार्यस्येति** । तथा च कर्तृतया जीवस्यापि कारणत्वेऽङ्गीकार्येऽचेतनस्यैव कारणत्वशङ्का न युक्तेत्यर्थः । **लोकेति** । कार्यस्य सकर्तृकत्वनियमाच्चेत्युक्तेत्यर्थः । **उक्तपरिहारस्य** प्रतिषेधमात्रत्वादित्यस्य । **परिहृतत्वादिति** । न हि जीवादीनामित्यादिनेत्यर्थः । **अचेतनत्वादिकं** प्रतिषेधमात्रत्वादित्यनेनोपलक्षितमित्यर्थः । **वादे** कारकमात्रं निषेध्यमित्यस्मिन्पक्षे ।

श्रीनिधि०— कार्यस्य सकर्तृकत्वनियमाच्चेति । उपलक्षणमिदम् । सोपादानत्वं नियमाच्चेत्यपि द्रष्टव्यम् । तथा च जीवमात्रस्य कारणत्वपक्षे सोपादानत्वनियमभङ्गः । प्रधानमात्रस्य तदनङ्गीकारे सकर्तृकत्वनियमभङ्ग इति विवेकः । असत्कारणत्वपक्षे तु उभयभङ्गोऽपि द्रष्टव्यः ।

शे०वा०— ननु प्रापकमित्युत्तरभाष्यमनर्थकम् । न च जीवादीनामेव कारणत्वमित्येतत्पक्षप्रापकप्रमाणोपदर्शनार्थं तदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न च जीवादीनामेव कारणत्वमिति पूर्वपक्षस्य प्रापकाभावादनुपपत्तिरिति शङ्कानिरास एव तत्प्रयोजनमिति वाच्यम् । जीवादीनां कारणत्वमित्येतावन्मात्रस्याप्यत्र पूर्वपक्षत्वसम्भवेन जीवादीनामेव कारणत्वमित्येतावत्पर्यन्तपूर्वपक्षस्यैवानाश्रयणीयत्वे

प्रापकाभावप्रयुक्ततदनुपपत्तिशङ्कायाः दूरापास्तत्वादित्यतोऽत्र जीवादीनां कारणत्वमित्येतावन्मात्रस्य पूर्वपक्षत्वायोगेन जीवादीनामेव कारणत्वमित्येव पूर्वपक्षस्य कर्तव्यतया प्रापकाभावप्रयुक्ततदनुपपत्तिशङ्कोपपत्तेस्तन्निरासाय तत्प्रापकप्रमाणोपदर्शनपरोत्तरवाक्यस्य नानर्थक्यमित्यभिप्रेत्य रीत्यन्तरेण कथं पूर्वपक्षायोग इत्यतस्तं वक्तुं सम्भावितप्रकारवत्तया पूर्वपक्षं विकल्पयति **नन्विति** । **कार्यस्येति** । तथा च जीवादीनामेव कारणत्वे लोकविरोध इति भावः । इत्यादीत्यादिपदेनान्यकारणनिषेधकस्याकस्मादिति वाक्यशेषस्य परिग्रहः । **न च लोकेति** । लोके कार्यस्य सकर्तृकत्वनियमदर्शनादिति भावः । **न तु लोक इति** । अन्यथाऽतिप्रसङ्गादिति भावः ।

मूले प्रापकं वाक्यमित्येतद्वाक्यं न केवलं तत्प्रापकप्रमाणोपदर्शनेन पूर्वपक्षानुपपत्तिशङ्कापरिहारमात्रपरं किन्नाम समयपादीयप्रधानादिकारणत्वनिराकरणार्थाधिकरणैर्गतार्थताशङ्कापरिहारपरं चेत्यतोऽपि नानर्थकमिति भावेन गतार्थताशङ्कानिरासकतयाऽपि योजयितुं तामुत्थापयति **नन्विति** । इत्यतो वेत्यत्र वाशब्दः समुच्चये । नन्वेवमस्य सूत्रस्य श्रुतीनां श्रुतिविरोधपरिहारकत्वापत्त्या तृतीयपादे निवेशः स्यात् । श्रुतीनां युक्तिविरोधपरिहारकेऽस्मिन्पादे कथमन्तर्भाव इत्यतोऽभिप्रायमाह **इदमुक्तं भवतीति** । **श्रुत्यनुगृहीताभिर्युक्तिभिरिति** । तथा च युक्तिविरोधपरिहारकत्वाद्युक्तोऽस्यैतत्पादान्तर्भावः । युक्त्युपसर्जनश्रुतिविरोधपरिहारकत्वे तृतीये प्रवेशप्रसक्तावपि श्रुत्युपसर्जनयुक्तिविरोधपरिहारकत्वे न तत्प्रवेशप्रसङ्गोऽपीति भावः । इतीत्यस्य इदमुक्तं भवतीत्यनेन सम्बन्धः ।

मूले 'परिहारोऽविशेषित' इति परिहारस्याविशेषितत्ववर्णनानर्थक्यमाशङ्क्यैतेनेत्यतिदेशसमर्थनार्थत्वान्न तदितिभावेनातिदेशानुपपत्तिशङ्कामुत्थापयति **नन्वेवं तर्हीति** । **उक्तपरिहारस्येति** । सूत्रे श्रौतस्य प्रतिषेधमात्रत्वस्योपलक्षितस्यासर्वज्ञत्वाचेतनत्वादिरूपस्य चेत्यर्थः । **परिहृतत्वादिति** । असिद्धिव्यभिचाराभ्यामिति शेषः ।

वा०र०— नन्वत्र जीवादीनामित्यादिवाक्ये पूर्वपक्षस्य जीवादीनां इत्यादि सम्बन्धः । **तृतीये प्रवेशेति** । उपलक्षणं चैतत् । चतुर्थे च प्रवेशप्रसक्तावपीत्यपि द्रष्टव्यम् । तृतीयचतुर्थयोरेवान्तरविशेषवत्त्वेऽपि युक्त्युपसर्जनश्रुतिविरोधरूप एकार्थत्वात् इति ज्ञेयम् । इतीत्यस्य इदमुक्तमिति पाठः । असिद्धेरिति भावः इत्यनन्तरं महदादिकार्य इत्यादि पाठः । मध्ये अकार्यत्वमुपाधिरिति प्रतीकोपादानं लेखकागतम् । **नानर्थक्यमिति** । भोक्त्रापत्तेरित्याद्युत्तरसूत्रगतभागव्याख्यानार्थकताया अभावेन सार्थक्यसम्भवादिति भावः ।

स०न्न०— न च लोकेति । दण्डादीनामपि कारणत्वेन सिद्धत्वादिति भावः ।

विठ्ठल०— एतन्मूलसूचितामत्यधिकाशङ्कां दर्शयित्वा उत्तरमूलं सङ्गमयितुं व्यावर्त्याशङ्कां दर्शयति **नन्वत्रेति** । **तस्यैवेति** । जीवादेरेव कारणत्वं नान्यस्येत्येवं शक्यत एवेत्यर्थः । **प्रापकाभावादिति** ।

उक्तदृष्टान्तानां कारणतामात्रप्रापकत्वादिति भावः । किं च यत्कार्यं तत्सकर्तृकमिति व्याप्तेः अकर्तृत्वेनाङ्गीकृतजीवाद्यपेक्षया अन्यकर्तृरूपं कारणमस्तीति विपरीतप्रापकसद्भावान्न द्वितीयः पक्षः चारुरित्याह **कार्यस्येति । न चेति** । यत्कार्यं तत्सकर्तृकमिति लोकविरोधो नेत्यर्थः । **द्वितीयपाद इति** । रचनानुपपत्तेश्च नानुमानम् । अभ्युपगमेऽप्यर्थाभावात् । अन्यथानुमितौ च ज्ञशक्तिवियोगात् । नासतो दृष्टत्वादित्याद्यधिकरणेषु क्रमेण प्रधानकर्तृत्वाकारणत्वजीवकारणत्वशून्यकारणानां निरासादिति भावः । नन्वत्र वाक्यप्राप्तनिराकरणे तृतीयपदान्तर्भावप्रसङ्ग इत्यत आह **इदमुक्तं भवतीति** । तथा च श्रुत्युपसर्जनयुक्तिविरोधनिराकरणरूपत्वान्न केवलं श्रुतिविरोधापाकरणरूपे तृतीयेऽन्तर्भाव इति भावः ।

॥ इति निषेध्यायां जीवादिकर्तृतायां विकल्प्य शङ्का तत्समाधानञ्च ॥

* * *

॥ अथ च तत्र जीवकर्तृत्ववादस्य युक्तिविरुद्धत्वे शङ्का तत्समाधानञ्च ॥

५५ सु०— ननु कथं जगतो जीवकर्तृत्वादिवादस्य युक्तिविरुद्धत्वमित्यत आह **क्वचिदिति** ।

अनु०— क्वचिज्जीवाकृतं दृष्ट्वाऽचेतनादेव चाकृतम् ।
तद्वदेवानुमाऽन्यत्र वस्तुत्वात्क्रियते श्रुतेः ॥

क्वचित् देशादौ । यद्वा **क्वचित्** जीवादौ । **अकृतमिति** च भावप्रधानो निर्देशः । कारणत्वमात्रमत्र पूर्वपक्षो न कर्तृत्वमित्यतः **अचेतनात्** इति पञ्चमीप्रयोगः । **अचेतनादकृतं च दृष्ट्वा** । एवशब्देन दृष्टान्तानामसन्दिग्धसाध्यतामाह । **अनुमा** अनुमितिः । अन्यथा वस्तुत्वस्यैवानुमानत्वात्पञ्चमी न स्यात् । जीवाकृतत्वादेरिति शेषः । **अन्यत्र** महदादौ ।

अत्रैते प्रयोगाः । महदादिकार्यं न जीवकृतं वस्तुत्वाज्जीववत्, विमतं न प्रधानकार्यं वस्तुत्वात्प्रधानवत्, विमतं नासत्कार्यं वस्तुत्वाद्घटवदिति ।

यद्यपि जीवस्य निमित्तत्वेन प्रधानस्योपादानत्वेन जगत्कारणत्वमङ्गीकृतमेव तथाऽपि स्वातन्त्र्याभावाभिप्रायेणेदं वचनमिति न विरोधः ।

परि०— पञ्चमीप्रयोग इति । कर्तृत्वपक्षे कर्तृकरणयोस्तृतीयेति तृतीया स्यादिति भावः । **अन्यथेति** । कर्तृत्वपूर्वपक्ष इत्यर्थः । अचेतनादित्येतदचेतनत्वादित्यनुमानपरत्व-पञ्चम्युपपत्तिरस्तीत्यत उक्तम् **वस्तुत्वस्यैवेति** । किन्तु तृतीया स्यादिति वाक्यशेषः । **नासत्कार्यमिति** । शून्यकार्यमकारणकार्यं वा नेत्यर्थः । **निमित्तत्वेनेति** । जीवस्यादृष्टाधार-तयेत्यादिना प्रागुक्तदिशेति भावः ।

यादु०— क्वचिद्देशादाविति । अव्याकृताकाशादौ नित्य इत्यर्थः । जीवादावित्यत्रादिपदेन प्रधानादिपरिग्रहः । **पञ्चमीप्रयोग इति** । हेतौ पञ्चमीविधानात् । कर्तृत्वे तु तृतीयया भाव्यमिति भावः । **अन्यथेति** । अनुमाशब्देन करणव्युत्पत्त्याऽनुमानपरिग्रह इत्यर्थः ।

वं०प०— अनुमानत्वात् अनुमितिकरणत्वात् ।

कं०रा०— ननु क्वचिदित्यस्य जीवादिपरतत्वपक्षे क्वचिज्जीवादौ जीवाकृतत्वं दृष्ट्वेति वक्तव्यम् । जीवाकृतमिति त्वनन्वितमित्यत आह **अकृतमिति चेति । कारणत्वमात्रमिति** । अत्राचेतनस्य कारणत्व-मात्रमिति पूर्वपक्षे न तु कर्तृत्वमित्यतोऽचेतनस्य कर्तृत्वविवक्षाविरहेण चेतनादेव वा कृतमित्यत्राचेतनेनेति तृतीयाया अप्रसक्तेर्हेतुत्वमात्रपरपञ्चमीप्रयोग इत्यर्थः । **अन्यथेति** । अनुमानशब्दस्य कारणार्थत्वे वस्तुत्व-स्यैवानुमात्वाद्वस्तुत्वादनुमेति पञ्चमी न स्यात् किन्तु वस्तुत्वमनुमेति प्रथमैव स्यादित्यर्थः । कस्यानुमे-त्याकाङ्क्षायामाह **जीवाकृतत्वादेरिति** । आदिशब्देनाचेतनाकृतत्वाद्यदकृतत्वयोर्ग्रहणम् । **क्वचिज्जीवाकृतं दृष्ट्वा चेतनादेव चाकृतमिति** मूले चशब्देन सहकृतत्वं समुच्चीयते । **एवशब्देन दृष्टान्तानामसन्दिग्धसाध्यता-माहेत्यत्र** दृष्टान्तानामिति बहुवचनं विमतं नासत्कार्यं वस्तुत्वाद्घटवदित्यनुमानं चोपपन्नमिति ध्येयम् । **यद्यपीति** । यद्यपि जीवस्यादृष्टाधारकतया निमित्तत्वेन प्राधान्यस्योपादानत्वेन जगत्कारणत्वमङ्गीकृतमिति महदादिकार्यं न जीवकृतं विमतं न प्रधानकार्यमित्येतच्च विरुद्धं तथापि स्वातन्त्र्येण जीवादिकार्यं न भवती-त्याशयेनास्य वचनस्य प्रवृत्तेर्न विरोध इति भावः ।

श्रीनिधि०— क्वचिद्देशादाविति । यद्वा जीवादाविति । तत्र जीवाकृतत्वदर्शनात् अचेतना-दकृतत्वदर्शनान्न हि जीवादिकृत इति भावः ।

शे०वा०— देशादावित्यादिपदेन कालपरिग्रहः । ननु देशादेरपि जीवाद्यकृतत्वं ममासम्प्रतिपन्नमिति न तस्य दृष्टान्ततयोपादानं युज्यत इत्यरुचेराह **यद्वेति** । आदिपदेन प्रधानादेः परिग्रहः । ननु कर्तृकरणयो-स्तृतीयेति कर्तृकरणयोस्तद्विधानादचेतनेनाकृतमिति तृतीयया भवितव्यम् । अचेतनादिति पञ्चमी तु कथमित्यत आह **कारणत्वमात्रमिति** । तद्वदनुमा क्रियत इत्येतावतापूर्तेः मूले एवशब्दवैयर्थ्यमित्यतस्तत्प्रयोजनमाह

एवशब्देनेति । अनुमाशब्दस्य करणसाधनत्वभ्रान्तिं निवारयति **अनुमाऽनुमितिरिति** । भावसाधन एवायमनुमाशब्द इत्यर्थः । **करणसाधनत्वे** बाधकमाह **अन्यथेति** । तथा सति वस्तुत्वमनुमेत्येव वक्तव्यत्वादित्यर्थः । अत्र टीकायामनुमानमित्यनन्तरमन्यथा वस्तुत्वस्यैवानुमानत्वात् पञ्चमी न स्यादित्येव मूलकोशे पाठः । अचेतनादिति पञ्चमीप्रयोग इत्यनन्तरं तत्पाठस्तु लेखकदोषपतितो मूलकोशेष्वदर्शनादनन्वितत्वाच्चेत्यवधेयम् । सिद्धान्तविरोधमाशङ्क्य परिहरति **यद्यपीति** । **विरोध इति** । सिद्धान्तविरोध इत्यर्थः ।

स०व०— क्वचिज्जीवादौ । इत्यत्रादिपदेन प्रधानादिपरिग्रहः । ननु जीवादीनां कर्तृत्वस्यैवात्र पूर्वपक्षाभिमतत्वात् अचेतनस्यापि क्षीरादेः दध्यादिकर्तृत्वेन कर्तृकरणयोस्तृतीयया भाव्यम्, अचेतनादिति तु कथमित्यत आह **कारणत्वमात्रमत्रेति** । **अन्यथेति** । अनुमा इत्यस्य अनुमितिरिति व्याख्यानाकृतावित्यर्थः ।

विठ्ठल०— जीवादौ इत्यादिपदेन प्रधानग्रहणम् । कर्तृत्वे तृतीयया भाव्यम् । **प्रयोग इति** । कारणमात्रपरत्वात् पञ्चमीप्रयोग इति भावः । **अन्यथेति** । अनुमानशब्दस्यानुमानार्थकत्वे वस्तुत्वस्यैवानुमानत्वात् वस्तुत्वादनुमेति पञ्चमी न स्यात् किन्तु वस्तुत्वमनुमेति प्रथमैव स्यादित्यर्थः । **नासत्कार्यमिति** । आकस्मिककार्यं नेत्यर्थः । तत्राप्यसच्छब्दसम्भवात् । अत एव सन्न्यायरत्नावल्यां अकस्माद्धीदमिति मनोरहितादसत इत्यकारणेऽप्यसच्छब्दः ।

५६ सु०— नन्वेवं सत्यतिप्रसङ्गः स्यात् । विमतमीश्वरकृतं न भवति वस्तुत्वादीश्वरवत् इत्यपि प्रयोक्तुं शक्यत्वादित्यत आह श्रुतेरिति । 'स इदं सर्वमसृजते'त्यादिश्रुतेः महदादेरीश्वरकृतत्वावधारणादतिप्रसङ्गानुमानस्य बाधितत्वेनाप्रामाण्यमिति ।

समं तर्हीदं भवदनुमानेषु, 'जीवाद्भवन्ति भूतानी'त्यादिश्रुतेरित्यत आह श्रुतेरिति । भावप्रधानो निर्देशः । जीवादिशब्दानां ब्रह्मश्रुतित्वाद्ब्रह्मनामत्वान्न श्रुतिविरोध इत्यर्थः ।

तत्कुत इत्यत आह श्रुतेरिति । 'नामानि सर्वाणि यमाविशन्ती'त्यादिश्रुतेः । शेषं भाष्ये ।

ननु जीवादिकारण(क)त्वेऽपि घटादिदृष्टान्तावष्टम्भेनानुमानसम्भवात्कथमप्रामाणिकत्वमित्यत आह श्रुतेरिति । 'नान्योऽतोऽस्ति कर्ते'त्यादिश्रुतेर्बाधितविषयत्वात्, दृष्टान्तानां साध्यवैकल्याच्च नानुमानानां प्रामाण्यम् ।

परि०—— शङ्कते समं तर्हीति । ननु जीवादिशब्दानां कथं ब्रह्मश्रुतित्वं प्रवृत्तिनिमित्तादेरभावादित्यत आह **शेषं भाष्य इति** । शिष्यत इति शेषं शिष्टमित्यर्थः । आनुमानिकाधिकरणाद्युक्तदिशा प्राणधारकत्वानासाद्यत्वादिप्रवृत्तिनिमित्तभावात् 'जीवो विनयिता साक्षी'त्यादिप्रयोगाच्चेत्यादि ध्येयमित्यर्थः । यद्वा नन्वासां ब्रह्मश्रुतित्वे कथं प्रापकं वाक्यमात्रमित्युक्तमित्यत आह **शेषं भाष्य इति** । मुख्यतो ब्रह्मवाचित्वेऽपि अमुख्यवृत्त्याऽन्यवाचित्वेन पूर्वपक्षोदयस्योक्तत्वात् तत्रेति भावः ।

यावु०— ननु श्रुतीनां ब्रह्मवाचकत्वेऽप्यमुख्यया वृत्त्याऽसदादिवाचकत्वमप्यभ्युपगम्यत एव, अतः तद्विरोधः स्यादित्यत आह **शेषं भाष्य इति** । 'यत्रान्यवाचकत्वेऽप्यविरोधस्तत्रान्यदमुख्यतयोच्यते । यत्र विरोधस्तत्र ब्रह्मैवोच्यत इति हि नियमः ।' प्रकृते चासदादिशब्दानां ब्रह्ममात्रवाचकत्वे विरोधाभावान्नासदाद्यमुख्यवाच्यस्वीकार इति भाष्येऽवगन्तव्यमित्यर्थः ।

कं०रा०—— कुत इति । 'जीवाद्भवन्ति भूतानी'त्यादिश्रुतिगतानां जीवादिशब्दानां ब्रह्मनामत्वं कुत इत्यत आहेत्यर्थः । **घटादिदृष्टान्तावष्टम्भेनेति** । घटदधिकण्टकतैक्ष्ण्यादिरूपदृष्टान्तावष्टम्भेनेत्यर्थः । **कथमप्रामाणिकत्वमिति** । तथा च परिहारो विशेषित इत्यत्र यच्च स्वपक्षदोषाच्चेत्यप्रामाणिकत्वं सूचितं स परिहारो जीवादिकरणत्वशङ्कायामपि समान इत्यतिदेशो युज्यत इति यदुक्तं तदनुपपन्नमिति भावः । **नान्योऽतोऽस्तीति** । नान्योऽस्ति कर्तेत्यादिश्रुत्या ब्रह्मणोऽन्यस्य स्वातन्त्र्यनिषेधेन स्वातन्त्र्येण जीवकारणकत्वादेः बाधितत्वाद्घटादिषु स्वातन्त्र्येण जीवकारणत्वादेरभावेन दृष्टान्तानां साध्यवैकल्याच्च घटादिदृष्टान्तावष्टम्भेन प्रवृत्तानां जीवाधिकरणकत्वानुमानानां न प्रामाण्यमिति प्रागुक्तमप्रामाणिकत्वं युक्तमिति भावः ।

श्रीनिधि०—— बाधादीत्यादिपदेन विरोधव्यभिचारादिकं गृह्यते ।

शे०वा०— मूले श्रुतेरित्यंशस्य वैयर्थ्यमाशङ्क्यातिप्रसङ्गानुमानस्य श्रुतिबाधितत्वेनाप्रामाण्यप्रतिपादनार्थत्वान्न तदिति भावेन तथा योजयितुमतिप्रसङ्गशङ्कामुत्थापयति **नन्वेवं सतीति** । नन्वसदादिशब्दानां ब्रह्मवाचकत्वेऽप्यमुख्यवृत्त्याऽन्यवाचकत्वमभ्युपगतमेवेति तद्विरोधः स्यादेवेत्यत आह **शेषमिति** । यत्रान्यवाचकत्वेऽप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते । यत्र विरोधस्तत्र ब्रह्मैवोच्यत इत्यङ्गीकारात् प्रकृते चान्यवाचकत्वे विरोधान्नान्यवाचकत्वमित्यविरोध इत्येतत्सूत्रीयभाष्ये व्यक्तमित्यर्थः । यद्यप्यत्र 'घञजपाः पुंसी'ति वचनाच्छेषशब्दो नित्यपुलिङ्ग इति शेष इत्येव वक्तव्यं न तु शेषमिति । तथाऽपि तस्य प्रायिकत्वेन नियतत्वाभावान्नानुपपत्तिः । वस्तुतस्तु भावे घञन्तस्यैव नित्यपुलिङ्गत्वं कर्मादौ घञन्तस्य तु नानालिङ्गत्वाच्छेषमिति नपुंसकोपपत्तिः । अत एव दुर्घटवृत्तिकृताऽप्येवमेव समाहितमिति ध्येयम् । **बाधित-**

विषयत्वादिति । नान्योऽतोऽस्ति कर्तेत्यादिश्रुत्या महदादेरन्यकृतत्वाभावावधारणादिति भावः । **दृष्टान्ताना-मिति** । घटादीनामपि जीवादिमात्रकृतत्वस्यासिद्धेरिति भावः ।

स०व्र०— शेषं भाष्य इति । 'यत्रान्यवाचकत्वेऽप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते । यत्र विरोधस्तत्र ब्रह्मैवोच्यत इति नियमः' इत्यादिना शेषं भाष्ये स्पष्टमित्यर्थः ।

स०ना०— वस्तुत्वाक्रियते श्रुतेरिति मूलसुधायां **शेषं भाष्य इति** । जानीयादिति शेषः । एतेन शेषशब्दस्य पुल्लिङ्गत्वनपुंसकलिङ्गानुपपत्तिरिति परास्तम् । शेषमित्यस्य द्वितीयान्तत्वात् ।

विठ्ठल०— ननु श्रुतीनां ब्रह्मवाचकत्वेऽपि समाकर्षाधिकरणन्यायेन असदादिवाचकत्वमप्यभ्युपगम्यत एवातोऽनुपपत्तिस्तदवस्थैवेति । मैवम् । विरोधाभावेऽन्यस्य प्रतिपाद्यत्वं न तु विरोध इत्यस्मिन्नेवाधिकरणभाष्ये उक्तत्वादित्यभिप्रेत्याह **शेषं भाष्य इति** । जानीयादिति शेषः ।

॥ इति जीवकर्तृत्ववादस्य युक्तिविरुद्धत्वे शङ्का तत्समाधानञ्च ॥

* * *

॥ अथ तत्रान्ते अस्मदनुमाने अकार्यत्वोपाधिशङ्का तत्समाधानञ्च ॥

५७ **सु०— एतेनास्मदनुमानेऽकार्यत्वमुपाधिरित्यपि निरस्तः(म्) । (स्वातन्त्र्येण) जीवाद्यकृतेऽपि घटादावकार्यत्वाभावात्, प्रतिपक्षे बाधादिदोषानुषङ्गाच्चेति सर्वं सुस्थम् ॥**

परि०— जीवाद्यकृतेऽपीति । स्वातन्त्र्येणेति भावः ।

वं०प०— अस्मदिति । महदादिकार्यं न जीवकृतं वस्तुत्वाज्जीववदित्याद्यनुमान इत्यर्थः । एतेनेत्युक्तं विशदयति **जीवादीति** । स्वातन्त्र्येणेति शेषः । तथा च साध्याव्यापकतेति भावः । **प्रतिपक्षे चेति** । महदादिकार्यं जीवकृतं कार्यत्वादित्यकार्यत्वरूपोपाध्यभावेन कृते सत्प्रतिपक्षानुमान इत्यर्थः । **बाधादीति** । स्वातन्त्र्यविवक्षयेति ध्येयम् ।

कं०रा०— अस्मदनुमान इति । महदादिकार्यं न स्वातन्त्र्येण जीवकृतमित्याद्यनुमान इत्यर्थः । एतच्छब्दपरामृष्टं हेतुमाह **स्वातन्त्र्येणेति** । नान्योऽतोऽस्तीत्यादि श्रुत्या ब्रह्मणोऽन्यस्य स्वातन्त्र्यनिषेधेन स्वातन्त्र्येण जीवाकर्तृत्वादिरूपसाध्यवति घटादावकार्यत्वाभावेनाकार्यत्वस्य साध्यव्यापकत्वादित्यर्थः । **प्रतिपक्ष**

इति । महदादिकं स्वातन्त्र्येण जीवकृतं कार्यत्वाददृष्टवदित्यादिरूपप्रतिपक्षे नान्योऽतोऽस्तीत्यादि श्रुतेः पक्षदृष्टान्तयोः स्वातन्त्र्येण जीवकृतत्वाद्यभावनिश्चयेन बाधसाध्यवैकल्ययोरनुषङ्गाच्चेत्यर्थः ।

शे०वा०— महदादिकार्यं न जीवादिकृतं वस्तुत्वाज्जीवादिवदित्यनुमाने जीवादिकृतत्वाभाववति जीवादावकार्यत्वसद्भावेन साध्यव्यापकत्वाद्वस्तुत्वरूपसाधनवति पक्षेऽकार्यत्वविरहेण साधनाव्यापकत्वाच्चाकार्यत्वमुपाधिः । उपाधेः प्रतिपक्षोन्नायकतया, विप्रतिपन्नं जीवादिकृतं कार्यत्वाददृष्टवदिति सत्प्रतिपक्षश्चेति सिद्धान्तीयानुमानस्याप्रामाण्यमिति न तेनापि जीवादिकृतत्वाभावसिद्धिरित्यप्यनेन निरस्तमित्याह **एतेनेति** । **जीवाद्यकृतेऽपीति** । स्वातन्त्र्येण जीवाद्यकृतेऽपीत्यर्थः । ततश्च साध्याव्यापकत्वान्नाकार्यत्वमुपाधिरिति भावः । बाधादीत्यादिपदेन दृष्टान्ते साध्यवैकल्यपरिग्रहः ।

विठ्ठल०— **स्वातन्त्र्येणेति** । तथा च साध्यव्यापकत्वं नास्तीति भावः । **प्रतिपक्षे** उपाध्युन्नीते ।

॥ इति अस्मदनुमाने अकार्यत्वोपाधिशङ्का तत्समाधानञ्च ॥

॥ इति उक्तार्थस्य समर्थनम् ॥

॥ इति एतत्सूत्रस्याभिधेयकथनं तत्समर्थनञ्च ॥

॥ इति 'एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः' इति सूत्रस्य व्याख्यानम् ॥

॥ इति उक्तार्थस्य सूत्राक्षरानुसारेण उदाहरणनिष्ठं व्युत्पादनम् ॥

॥ इति ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य अल्पवाक्ययुतविरोधस्य श्रुतिसंवादित्वेन श्रुत्यागमयोर्बाहुल्यरूपप्राबल्यवत्तया युक्त्या परिहारः ॥

॥ इति असदधिकरणम् ॥

॥ २-१-४ ॥

* * *

॥ अथ भोक्त्रधिकरणम् ॥

॥ २-१-५ ॥

ब्र०सू०— ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥

**॥ अथ ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य अल्पबलयुतयुक्तिविरोधस्य
'श्रुतिसिद्धत्वेन प्रबल'या युक्त्या परिहारः ॥**

॥ अथ तत्रादौ भाष्योक्तव्याख्यानानुपपत्तिपरिहारकतया सूत्रव्याख्यानम् ॥

**॥ अथ तत्राप्यादौ भाष्योक्तव्याख्यानानुवादपूर्वकं
तत्रानुपपत्तिप्रदर्शनसहितं तत्परिहारकानुव्याख्यानस्य निदर्शनम् ॥**

५८ सु०— अतीताधिकरणे ब्रह्मणो जगज्जन्मादिकारणत्वे श्रुतिसंवादित्वेन प्रबलया युक्त्या विरोधः परिहृतः । इदानीं तु श्रुतिसिद्ध(लिङ्ग)त्वेन प्रबलया युक्त्या विरोधः परिह्रियते ।

तथा हि । न ब्रह्मणो जगत्कारणत्वं वास्तवं सम्भवति, असर्वकारणेन मुक्ते(क्तजीवे)नात्यन्ताभिन्नत्वात् । न हि 'यो येनात्यन्ताभिन्नः स तद्विरुद्धस्वभावो वस्तुत' इति क्वचिदुपलब्धम् । न च मुक्तस्यासर्वकारणत्वमसिद्धम्, (सर्वकारणत्वस्य) संसारेऽनुपलम्भात् । संसारे प्रतीयमानस्य कस्यचिदाकारस्यैवापगमो हि मोक्षो न तु अपूर्वाकारोत्पादः, अनित्यत्वप्रसङ्गात् । न चानन्दादेरिव विद्यमानस्यैवाविद्यया तिरोहितत्वात्सर्वकारणत्वस्यानुपलम्भ इति वाच्यम्, प्रमाणाभावात् । आनन्दादेः परमप्रेमास्पदत्वादिना ईषदुपलब्धेश्च । न च ब्रह्मणो जगत्कारणत्वश्रवणात्सर्वथाऽनुपलभ्यमानमपि जगत्कारणत्वं संसारे कल्प्यमिति युक्तम्, श्रुतेः काल्पनिकजगत्कारणत्वानुवादित्वेनापि सावकाशत्वात् । न च तथाभूतमेव लक्षणमस्त्विति वाच्यम्, अनङ्गीकारात्, काल्पनिकस्य जगत्कारणत्वस्य प्रधानादिष्वपि सम्भवेनातिप्रसङ्गाच्च ॥ स्यादेतत् । मुक्तस्य ब्रह्मणैक्यमेवासिद्धमिति । मैवम् । 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ती'त्यादिश्रुतिसिद्धत्वादिति ।

तदिदमुक्तं सूत्रकृता **भोक्तुः** जीवस्य मोक्षे ब्रह्मत्वापत्तिश्रवणात् तयोः **अविभागो** भेदाभावः । ततश्च न ब्रह्मणो जगत्कारणत्वं वास्तवं युक्तमिति ।

एवं प्राप्ते सिद्धान्तितम्, 'भवेदेतदखिलं यदि मुक्तस्य ब्रह्मणाऽभेद एव प्रामाणिकः स्यात् । न चैतदस्ति । श्रौतस्त्वेकीभावप्रयोगः **स्याल्लोकवत्** । यथा लोके उदके उदकस्यैकीभावव्यवहारः स्थानैक्यनिबन्धनः, यथा वा प्राग्विभिन्ना ब्राह्मणाः साम्प्रतमेकीभूता इति मत्यैक्यनिबन्धनः, तथा प्राग्विभिन्नस्थाना भिन्नमतयश्च जीवा मुक्तौ ब्रह्मणा **एकी भवन्ति** एकस्थाना एकमतयश्च भवन्तीत्युपपद्यते ।

तस्मात् असिद्धेनासिद्धसाधनमेतदिति ।

तदेतदयुक्तम्, मुख्यार्थे बाधकाभावात्, विना बाधकेन जघन्यवृत्त्याश्रयणे चाति-प्रसङ्गात् ।

इत्यतो मुख्यार्थे बाधकयुक्तिव्युत्पादनपरत्वेनापि स्याल्लोकवदिति सूत्रखण्डं व्याचष्टे **नान्यदिति** ।

अनु०— नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथञ्चन ।
अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचन ।

परि०— पूर्वेण सङ्गत्यगतार्थत्वे सूचयन् अधिकरणोपाधिमाह **अतीतेति** । **श्रुति-सिद्धेति** । बहुश्रुतिसिद्धलिङ्गत्वेनेत्यर्थः । तथैव चन्द्रिकोक्तेः, इत्यादिश्रुतीतिवक्ष्यमाणत्वाच्च । एतेन पूर्वत्र श्रुतेः सिद्धान्त्यभिमतार्थस्वीकारो युक्तो मुख्यार्थाहानेः । इह तु न सिद्धान्त्यभिमतस्थानै-क्याद्यर्थाङ्गीकारो युक्तः मुख्यार्थहानेः । अतो युक्तेः प्राबल्यमिति प्रत्युदाहरणसङ्गतिः सूचिता । विरोधप्रकारं तावद्व्यनक्ति **न ब्रह्मण** इत्यादिना **एवं प्राप्त** इत्यन्तेन । भेदाभेदनिरासायोक्त-मत्यन्ताभिन्नत्वादिति । भेदाभेदनिरासस्तु 'अत एव चोपमासूर्यकादिवदि'त्यत्र करिष्यत इति भावः । नीरूपेऽपि गगने कल्पितनैल्यमिव कल्पितः सम्भवतीत्यतो वस्तुत इत्युक्तम् । हेतौ विशेषणसिद्धिं निराह **न च मुक्तस्येत्यादिना** । **अनित्यत्वेति** । मोक्षस्येत्यनुषङ्गः । तर्ह्यानन्द-

ज्ञानादिरपि जीवस्य स्वभावो न स्यात् संसारेऽनुपलम्भादित्यत आह **आनन्दादेरिति** । प्रमाणाभावादित्यसिद्धमिति शङ्कते **न च ब्रह्मण इति** । **संसार इति** । संसारदशायामित्यर्थः । **अनङ्गीकारादिति** । सिद्धान्तिनेति भावः । हेतोर्विशेषणासिद्धिं निरस्य विशेष्यसिद्धिं शङ्कापूर्वं निराह **स्यादेतदिति** । श्रुतौ सर्व इति बहुवचनोपपत्त्यर्थं कर्माणीत्यंशस्याप्यनुवादः । मुक्तिपरत्वद्योतनाय वा । मुक्तावेव कर्मणां निवृत्तेः । **विज्ञानमय आत्मा** जीवः । **सिद्धान्तितमिति** । सूत्रकृतेत्यनुषङ्गः । सप्तम्यन्ताद्गतिरयमिति भावेनाह **यथा लोक इति** । **विभिन्नस्थाना इति** । प्राप्यरूपविशेषापेक्षयैवमुक्तिः । **एकमतयः** एकार्थविषयकमतय इत्यर्थः । इतिशब्दस्य इतिसिद्धान्तितमिति पूर्वेणान्वयः । **जघन्यवृत्त्येति** । आद्ये लक्षणा, अन्ये लक्षितलक्षणेति भावः ।

यादु०— **श्रुतिसिद्धलिङ्गत्वेनेति** । अनेन 'श्रुतिगुणयुक्तय' इत्यनुव्याख्यानोक्तं श्रुत्युपसर्जनकत्वं युक्तीनां द्विविधम्, श्रुतिसंवादित्वं श्रुतिसिद्धलिङ्गत्वं चेत्युक्तं भवतीति ज्ञातव्यम् । अत्र मुक्तेनैकीभूतत्वलिङ्गं 'परेऽव्यये सर्व एकीभवन्ती'ति श्रुतिसिद्धमिति भावः ।

वं०प०— **ब्रह्मण इति** । मुक्तेन निश्चितैक्योपेतस्येति शेषः । **श्रवणादिति** । यतो वेत्यादिश्रुतावित्यर्थः । **कल्प्यमिति** । **कल्प्यं** मुक्तस्य संसारे कल्प्यमित्यर्थः । तथा चासर्वकारणेनेति विशेषणासिद्धिरिति भावः । **श्रुतेरिति** । तथा च ब्रह्मणो जगत्कारणत्वश्रवणमेवासिद्धं श्रुतेस्तत्र तात्पर्याभावादिति भावः । **तथाभूतं** काल्पनिकमेव जगज्जन्मादिकारणत्वम् । काल्पनिकस्येत्यतःपूर्वमङ्गीकारे चेति शेषः । **तस्मादिति** । लोके सिद्धेन धूमादिहेतुनाऽसिद्धं वह्न्यादि साध्यते । प्रकृते च मुक्तेनैक्यरूपो हेतुरसिद्धोऽनिश्चितस्तेन कथमसिद्धस्यानिश्चितस्य जगत्कारणत्वादिलक्षणस्यावास्तवत्वस्य साधनं युज्यत इति भावः । **मुख्यार्थ इति** । एकीभवन्तीति श्रुतैक्यरूपमुख्यार्थे प्रोच्यमान इत्यर्थः । **जघन्येति** । स्थानैक्यादि तु अमुख्यार्थ इति भावः ।

कं०रा०— **श्रुतिसंवादित्वेनेति** । 'असदेवेदमग्र आसीत्', 'असतः सदजायते'त्यादिश्रुतिसमानविषयत्वेनेत्यर्थः । **श्रुतिसिद्धलिङ्गत्वेनेति** । ब्रह्मणो जगत्कारणत्वाभावसाधिकाया असर्वकारणेन मुक्तजीवेनात्यन्ताभिन्नत्वरूपयुक्तेः 'परेऽव्यये सर्व एकीभवन्ती'ति श्रुतिसिद्धत्वात् श्रुतिसिद्धलिङ्गरूपत्वेन प्राबल्यमिति भावः । ननु संसारेऽनुपलभ्यमानत्वेनाविद्यमानमपि सर्वकारणत्वमुक्त्यवस्थायामुत्पद्यतां मोक्षस्यापूर्वाकारोत्पादस्तथात्वे मोक्षस्यानित्यत्वप्रसङ्गादित्यर्थः । **प्रमाणाभावादिति** । संसारदशायां जीवे सर्वकारणत्वसद्भावे प्रमाणाभावात्सति हि तत्र प्रमाणे तदनुपलम्भस्याविद्यातिरोधाननिमित्तत्वं कल्पयितुं शक्यं नान्यथेति भावः । **आनन्दादेरिति** । जीवस्वरूपभूतस्यानन्दस्याप्रकाशे आनन्दरूपत्वज्ञानप्रयुक्तस्य मानभुवं भूयासमिति परमप्रेमास्पदत्वस्याभावापातेन तथा ज्ञानस्याप्रकाशे प्रकाशमानसंवित्तादात्म्यनिबन्धनसुखाद्यपरोक्ष्यव्यवहार-

स्याभावापाते अन्यपरमप्रेमास्पदत्वाद्यनुसारेण आनन्दादेर्मोक्ष इव सर्वात्मना प्रकाशाभावेऽपीषदुपलब्धेः सत्त्वेन दृष्टान्तीकृतानन्दादावनुपलम्भस्यासिद्धेश्चेत्यर्थः । न च वाच्यमात्मनः सुखरूपत्वाज्ञानेऽपि तत्साधनत्वज्ञानेन परमप्रेमास्पदत्वमिति तथात्वे दुःखसाधनत्वज्ञानेन परमद्वेषविषयत्वस्यापि प्रसङ्गात् । **न चेति** । 'यतो वा इमानि भूतानि जायन्त' इत्यादिना ब्रह्मणो जगत्कारणत्वश्रवणाज्जीवस्यासर्वकारणत्वे तदभिन्नस्य ब्रह्मणो जगत्कारणत्वश्रुत्यनुपपत्तेः । संसारे सर्वथानुपलभ्यमानमपि जीवस्य जगत्कारणत्वं कल्प्यमिति न च युक्तमित्यर्थः । **मुख्यार्थ इति** । एकीभवन्तीति व्यपदेशस्य मुख्यार्थत्वे बाधकाभावादित्यर्थः । बाधकाभावेऽप्यमुख्यवृत्त्या श्रवणं किं न स्यादित्यत आह **विनेति** ।

श्रीनिधि०— न ब्रह्मणो जगत्कारणत्वं वास्तवं सम्भवतीति । न सम्भवतीत्युक्ते 'यतो वा इमानी'त्यादि श्रुतिविरोधः स्यात् । अतो वास्तवमित्युक्तम् । श्रुतिस्तु काल्पनिककर्तृत्वविषयेति भावः । अत एव वक्ष्यति 'श्रुतेः काल्पनिकजगत्कारणानुवादित्वेनापि सावकाशत्वादि'ति । **परमप्रेमास्पदत्वादिनेति** । प्रकारान्तरेणेति भावः । **ईषदिति** । अतो मुक्तिवैलक्षण्यं चोपपद्यते । यावदनुपलब्धेरिति भावः । **असिद्धेनासिद्धसाधनमेतदिति** । असिद्धस्य जगत्कारणत्वाभावस्य साधनम् । **असिद्धेनैक्येन** हेतुना । तथा च साध्यावैशिष्ट्यमिति भावः ।

शे०वा०— ननु 'नान्यदन्यत्वमापन्नमि'त्युत्तरभाष्यमनर्थकमित्यत उत्तरसूत्रीयसिद्धान्तखण्डव्याख्यानार्थत्वान्न तदनर्थकमित्यभिप्रेत्य भवेदेतदेवं यद्युत्तरसूत्रमेवारम्भणीयं स्यात् । न चैतदस्ति । पूर्वेण गतार्थतया तस्यैवाकर्तव्यत्वादित्यतोऽधिकरणद्वयोपाधिभेदोपदर्शनेन गतार्थताशङ्कां तावत्परिहरति **अतीताधिकरण इत्यादिना** । श्रुतिगुणयुक्तय इत्यनुव्याख्यानोक्तं श्रुत्युपसर्जनत्वं युक्तीनां द्विविधं श्रुतिसंवादित्वं श्रुतिसिद्धत्वं चेत्यभिप्रेत्योक्तं **श्रुतिसंवादित्वेनेति श्रुतिसिद्धत्वेनेति च** । न च पूर्वत्र श्रुतिसंवादितया प्रबलयुक्तिविरोधपरिहारात् तन्न्यायेनैव श्रुतिसिद्धतया प्रबलयुक्तिविरोधपरिहारसिद्धेर्गतार्थत्वमवर्जनीयमिति वाच्यम् । तत्रासदादिशब्दानां पूर्वसिद्धान्तरीत्या ब्रह्मपरतायामपि मुख्यार्थत्वेनासत्कारणत्वे पूर्वपक्ष्युक्तश्रुतिसंवादाभावात् तत्प्रयुक्तप्राबल्यस्याप्यभावसिद्धावपि अत्रैकीभवन्तीत्यादीनामत्रत्यसिद्धान्तरीत्या स्थानैक्यादिपरत्वे मुख्यार्थहानेः ऐक्ये श्रुतिसिद्धत्वस्यानपायेन तत्प्रयुक्तप्राबल्यसम्भवेन श्रुतिसिद्धत्वेन प्रबलयुक्तिविरोधशङ्काया अवर्जनीयत्वात् । यद्यपि च भावत्वादिका पूर्वाधिकरणयुक्तिरपि श्रुतिसिद्धैवेति तादृशयुक्तिविरोधे परिहृते नैतच्छङ्कोदयोऽपि । तथाऽपि तस्य प्रलयेऽसत्त्वरूपं साध्यं विनाऽप्युपपत्तेरत्रत्याया जीवाभिन्नत्वादिरूपयुक्तेस्तु असर्वकर्तृत्वरूपं साध्यं विनाऽनुपपत्तेरस्त्येवोक्तविधया शङ्कोदय इति हृदयम् ।

ननु 'नान्यदन्यत्वमापन्नमि'त्यादेः 'स्याल्लोकवदि'ति सूत्रखण्डव्याख्यानता नोपपद्यते । तस्य भाष्यादावन्यथाव्याख्यानत्वात् । न चेदं प्रकारान्तरेण तद्व्याख्यानमिति वाच्यम् । तस्याप्यनर्थकत्वात् । न च भाष्यकारीयव्याख्यानोपपादनार्थत्वान्न तदिति वाच्यम् । तद्व्याख्यानेऽनुपपत्त्यप्रसक्त्या तस्योपपादना-

नपेक्षत्वादित्यतो भाष्योक्तरीत्या सूत्रयोजनाप्रकारप्रदर्शनपूर्वकं तत्रानुपपत्तिं प्रदर्श्य तत्परिहारकतया योजनान्तरस्यावश्यकतां दर्शयितुं भाष्यदिशाऽधिकरणशरीरं तावद्दर्शयति **तथा हीत्यादिना** । उपन्यस्तानुमाने विशेषव्याप्तौ दृष्टान्ताभावेन तदसम्भवेऽपि सामान्यव्याप्तिरविकलेत्यभिप्रेत्य व्यभिचारनिरासोपदर्शनव्याजेन तां सूचयति **न हीति** । संसारिण इव मुक्तस्य सर्वकारणत्वे प्रत्यक्षादिविरोधाभावेन सर्वकर्तृत्वमेवेत्यसर्वकारणेनेति विशेषणसिद्धिरित्याशङ्कते **न चेति** । मुक्तस्य सर्वकारणत्वं वदन् प्रष्टव्यः । किं तस्य मुक्तेः पूर्वमपि सर्वकारणत्वं सदिति किं वा ततःपूर्वमसतोऽपि तस्य मुक्तिवज्ज्ञानेन तस्मिन्नुत्पत्तिरिति । आद्येऽपि किमात्मस्वरूपवदतिरोहितं किंवाऽऽनन्दादिवत्तिरोहितमिति विकल्पान्मनसि निधायानुपलम्भतर्कबाधान्नाद्य इत्याह **संसार इति** । दृष्टान्तासिद्ध्या द्वितीयं दूषयति **संसार इति** । आद्यद्वितीयमाशङ्कते **न चेति** । नानुपलम्भमात्रमसत्त्वव्यवस्थापकं तथा सत्यनुपलम्भसाम्येन संसारावस्थायामानन्दादेरप्यसत्त्वप्रसङ्गात् । किन्तु योग्यानुपलम्भ एव । न चासाविहास्ति । आनन्दादेरिव सर्वकारणत्वस्यापि अविद्यया आवृतत्वेन सतोऽप्ययोग्यतया अनुपलम्भोपपत्त्या अनुप-लम्भस्यान्यथासिद्धत्वादिति भावः । नानन्दादिदृष्टान्तेन सर्वकारणत्वस्याविद्ययाऽऽवृतत्वं कल्पयितुं शक्यम् । तथा सति शशविषाणादेरप्यावृतत्वेनानुपलम्भप्रसङ्गात् । किन्तु प्रमाणेन वस्तुसिद्धौ सत्याम् । तथा च 'नित्यानन्दज्ञानबला इत्यादिप्रमाणानुसारेणानन्दादेः स्वरूपात्मतया सत्त्वसिद्धेर्युज्यतेऽविद्ययाऽऽवृतत्वेनानुपलम्भान्यथासिद्धिवर्णनम् । न च तद्वत्प्रकृते सर्वकारणत्वस्य जीवे सत्त्वसाधकं प्रमाणमिहास्ति । येन तस्याप्यविद्ययाऽऽवृतत्वकल्पनयानुपलम्भस्यान्यथासिद्धिवर्णनमवकाशं लभेतेत्याह **प्रमाणाभावादिति** । किञ्च न वयमनुपलम्भमात्रेण सर्वकारणत्वं निराकुर्मो जीवस्य, किन्नाम सर्वथाऽप्यनुपलम्भेन । न चानन्दादेः सर्वथाऽप्यनुपलम्भोऽस्ति । तत्कथं तद्वदविद्ययाऽऽवृतत्वकल्पनमित्याशयेनाह **आनन्दादेरिति** । ननु जीवाभिन्नस्य ब्रह्मणो जगत्कारणत्वप्रतिपादकश्रुतिरेव जीवस्य सर्वकारणत्वे प्रमाणमिति प्रमाणबलाज्जगत्कारणत्वस्यापि सत्त्वसिद्धेर्युज्यते संसारे तस्याविद्ययाऽऽवृतत्वकल्पनमित्याशङ्कते **न चेति** । भवेदियं ब्रह्मणो जगत्कारणत्वाभिधायिनी श्रुतिस्तदभिन्नजीवस्य सर्वकारणत्वेऽपि प्रमाणं, यदि सा तस्याकल्पितजगत्कारणत्वाभिधायिनी स्यात् । न चैतदस्ति । तस्याः काल्पनिककारणत्वानुवादकत्वेन तदभावात् । तत्कथं सा जीवस्य सर्वकारणतायां प्रमाणं स्यादित्याह **श्रुतेरिति** । ननु श्रुतेः काल्पनिकजगत्कारणत्वानुवादकत्वेन श्रुत्यवष्टम्भेन माऽस्तु जीवस्य जगत्कारणत्वप्राप्तिः । तथाऽपि न लक्षणाक्षेपो युक्तः । श्रुतिप्रतिपादितकाल्पनिकजगत्कारणत्वस्य ब्रह्मलक्षणत्वाङ्गीकारादुक्तरीत्याऽसर्वकारणेन मुक्तेनात्यन्ताभिन्नस्य ब्रह्मणो वास्तवजगत्कारणत्वासम्भवेऽपि लक्षणीभूतकाल्पनिकजगत्कारणत्वसम्भवादित्याशङ्कते **न चेति** । **अनङ्गीकारादिति** । भवेदेवं लक्षणाक्षेपानुपपत्तिर्यदि काल्पनिकं जगत्कारणत्वं ब्रह्मलक्षणतया सिद्धान्तिनाऽङ्गीकृतं स्यात् । न चैतदस्ति । तस्य सजातीयविजातीयसमस्तवस्तुव्यावृत्ततया ब्रह्मस्वरूपानवधारकत्वेनोक्तरूपलक्षणप्रयोजनशून्यत्वेन लक्षणत्वानभ्युपगमात् । किन्त्वकल्पितमेव तत्तथाऽभिमतं तच्चोक्तविधया न सम्भवतीति युक्तो लक्षणाक्षेप इति भावः । अतिव्याप्तत्वादपि न काल्पनिकस्य जगत्कारणत्वस्य लक्षणत्वं सम्भवति किन्त्वकल्पितस्यैवेत्यत आक्षेपोपपत्तिरित्याह **काल्पनिकस्येति** । प्रदर्शितपूर्वपक्षस्योत्सूत्रतापरिहाराय सूत्रारूढतां दर्शयति **तदिदमिति** । **न ब्रह्मणो**

जगत्कारणत्वं वास्तवं युक्तमितीति । यद्यप्यत्र जीवब्रह्मणोरभेदस्य, ब्रह्मणः प्रत्यक्षसिद्धासर्वकर्तृजीवसालक्षण्येनेव, जीवस्य श्रुतिसिद्धसर्वकर्तृब्रह्मसालक्षण्येनापि निर्वाहादतिव्याप्त्या लक्षणाक्षेपः कर्तुं शक्यः । अत एव जगत्कारणत्वादि ईश्वरैकनिष्ठं न भवतीत्यादिना टीकायामतिव्याप्त्या लक्षणाक्षेपो दर्शितः । तथाऽपि प्रत्यक्षस्य प्राबल्याद्ब्रह्मणः प्रत्यक्षसिद्धासर्वकर्तृजीवसालक्षण्यमेव वक्तव्यमित्यभिप्रेत्यासम्भव एवात्र निर्धारित इत्यवधेयम् । 'एकीभूता इती'त्यतःपरमेकीभावव्यवहार इत्यनुवर्तते ।

वा०र०— सिद्धान्तखण्डेति । पूर्वपक्षखण्डव्याख्यानत्वाभावेऽपि इति पूरणीयम् । **व्याख्यानार्थत्वात्** इत्यस्य व्याख्यानान्तरार्थत्वादित्यर्थः । एतच्च ननु 'नान्यदन्यत्वमापन्नं' इत्यादिरुत्तरटीकायां स्पष्टम् । **एतत्** अनारम्भणीयत्वम् । **अकर्तव्यत्वात्** इत्यस्य कर्तुमशक्यत्वात् इत्यर्थः । अनारम्भणीयत्वाकर्तव्यत्वयोः एकरूपत्वेन हेतुहेतुमद्भावानुपपत्तिरिति शङ्कानवकाशः । एतेनैव पूर्वेण गतार्थत्वात् इत्येतावतैव पूर्तेः अधिकं व्यर्थं इत्यपि निरस्तम् । उक्तरीत्या अकर्तव्यत्वादित्यस्य अधिकार्थप्रतिपादकत्वात् इति ज्ञेयम् । **तावदिति** । अनेनारम्भणीयत्वेऽपि भाष्यादिदिशोक्तसूत्रखण्डव्याख्यानसिद्धे पुनः तद्व्याख्यानं अनर्थकं इत्याशङ्कापरिहारोऽपि उत्तरत्र करिष्यत इति सूचितं भवति । **श्रुत्युपसर्जनत्वमिति** । श्रुत्युपसर्जनभूता यासां ताः तथोक्ताः इति बहुव्रीहिः । **द्विविधमिति** । श्रुतिगुणेत्यस्याधिकरणद्वयोपाधिकथनपरत्वादिति भावः । तथा च पूर्वत्र श्रुतिसंवादिचन्द्रिकोक्तरीत्याशङ्कामुत्थाप्य तत्रासदादिशब्दानां इत्यादिचन्द्रिकानुसारेण समाधत्ते **न च पूर्वत्रेत्यादिना** । **मुख्यार्थत्वेनासत्कारणत्व इति** । यदि ब्रह्मपरतामुख्यार्थहानिः स्यात् अतोऽर्थान्तरपरत्वायोगात् असत्त्वपरत्वमेवाश्रयणीयमिति श्रुतिसंवादसिद्धिरिति न वक्तुं शक्यम् । ब्रह्मपरत्वेऽपि मुख्यार्थत्वेन पूर्वपक्ष्युक्तदूषणावकाशात् । ततः पूर्वपक्ष्युक्तयुक्तेः श्रुतिसंवादाभावात् न तत् प्रयुक्तं प्राबल्यमित्यस्य सिद्धावपीत्यर्थः । **मुख्यार्थहानेरिति** । यदि स्थानैक्यादिपरता तर्हि मुख्यार्थहानिः स्यादतोऽर्थान्तरपरत्वायोगात् मुक्तब्रह्मैक्यमेवार्थत्वेनाश्रयणीयमिति पूर्वपक्ष्युक्तयुक्ते श्रुतिसंवादसिद्धिरिति वक्तुं शक्यत एव । स्थानैक्यपरत्वे एकीभवन्ति इत्यस्य लाक्षणिकत्वप्रसङ्गेन मुख्यार्थत्यागावारणात् इत्यर्थः । ऐक्ये श्रुतिसिद्धत्वस्याभावात् तत्प्रयुक्तप्राबल्याभावो न सिद्धान्तरीत्येति चन्द्रिकावाक्ययोजनां मनसि निधाय फलितमेवाह **श्रुतिसिद्धत्वस्यानपायेनेत्यादि** । **अवर्जनीयत्वात्** प्रागुक्तन्यायेनापरिहृततया प्रत्येकं परिहरणीयत्वात् इत्यर्थः । **पूर्वाधिकरणेति** । तत्पूर्वपक्षयुक्तीत्यर्थः । **नैतच्छङ्कोदयोऽपीति** । भावत्वादियुक्तिमूलकशङ्कोदयसमुच्चयायापिपदम् । **तस्येति** । सूत्रखण्डस्येत्यर्थः । **योजनान्तरस्येति** । प्रवृत्तिवर्णनेति शेषः । आवश्यकतेति दर्शयितुं इति योज्यम् । स सर्वकर्तृत्वमेवेत्यस्य तत्सम्भवतीत्यर्थः । इतिशब्दो हेतौ । **नाद्य इत्याहेति** । पूर्वविकल्पीयाद्यकल्पीयः प्रथमो नेत्याह इत्यर्थः । **द्वितीयं दूषयतीति** । आद्यविकल्पीयद्वितीयं कल्पं पूर्वसम्मतोऽपि जगत्कारणत्वस्य मुक्तिवत् ज्ञानेनोत्पत्तिः इत्येवंरूपमित्यर्थः । जगत्कारणत्वोत्पत्तिनिराकरणाय मोक्षे प्रकारान्तस्य निराकर्तव्यतया मोक्षस्य आकारान्तरौ तद्रूपतानिराकरणसङ्गतिः इत्यतो मोक्षवत्कारणत्वस्योत्पत्तिरिति वदन्तं

प्रति मोक्षस्योत्पत्तिरिति हि कस्यचित् आकारस्योत्पत्तिरिति मत्वा त्वयोक्तम् । न चैतदस्ति । मोक्षस्य पूर्वप्रतीयमानाकारनिवृत्तिरूपत्वेनागन्तुक आकारोत्पत्तिरूपत्वाभावात् । तथा च दृष्टान्तासिद्ध्या तद्दृष्टान्तेन जगत्कारणत्वस्योत्पत्तिरित्यप्ययुक्तं इत्येतत् अभिप्रायेण मोक्षस्याकारान्तरोत्पादरूपतानिराकरणमिति नासङ्गतिरिति भावेनोक्तं दृष्टान्तासिद्धयेति । अत्रोक्तविकल्पक्रममपि विवक्षितेति पूरणीयमित्यभिप्रायात् मूलोक्तक्रमाननुसरणं न दोषायेत्यपि उक्तटीकायां सूचितमिति ज्ञेयम् । आद्यद्वितीयमिति । आद्येऽपि आद्यशब्दो आद्यविकल्पीयाद्यकल्पेऽपि अस्ति विकल्पेन कल्पद्वयम् । तत्र द्वितीयकल्पे आनन्दादिवत् तिरोहितं कारणत्वमिति । तन्निराकरोतीत्यर्थः । एतेनाद्यविकल्पीयद्वितीयपक्षस्य मुक्तिवत् उत्पत्तिरित्येवंरूपस्य प्राक् निराकृतत्वात् नानन्दादेरिवेत्यनेनाशङ्कनाप्रतीतेश्च कथं तदाशङ्कापरतया एतद्वाक्यावतरणं इति शङ्का निरस्ता वेदितव्या । उक्तविधयेति । सर्वकारणमुक्ताभिन्नत्वेनेत्याद्युक्तविधयेत्यर्थः । एकत्रैव विशिष्टरूपत्यागेन ब्रह्मणः प्रत्यक्षेत्यादिसुधायां तु प्रत्यक्षस्याप्राबल्यात् इत्यादि चन्द्रिकां मनसि निधायाह यद्यप्यत्र जीवेत्यादि । यथा लोके उदके इत्यादि मूले स्थानैक्ये मत्यैक्ये उपपादिते तदुपपादनं तत्त्वनिर्णयटीकाव्याख्यानयोः ज्ञेयम् । अधिकं लक्षणादिव्युत्पादनं व्याख्यानप्रकाशे अस्मदुक्तप्रकारेण ज्ञेयम् । उपयुक्तं लेख्यं च । पृथगधिकरणे उपपादयिष्यते च । ब्रह्मण ऐक्यं चानेनैवोच्यते इत्यतःपरं उच्यते इत्यनुवर्तते ।

स०व्र०— श्रुतिसिद्धलिङ्गत्वेनेति । मुक्तावेकीभावरूपलिङ्गस्य 'परेऽव्यये' इति श्रुतिसिद्धत्वादिति भावः । ननु संसारेऽनुपलम्भेऽपि मुक्तौ सर्वकारणत्वं किं न स्यादिति चेन्न । संसारे अनुपलम्भे किमविद्यमानमेव सर्वकारणत्वं मुक्तावुत्पद्यते, उत विद्यमानमेव आनन्दादिवत् संसारे अनभिव्यक्तं मुक्तावभिव्यज्यते । नाद्य इत्याह संसार इति । ईषदुपलब्ध्येति । न च यत्किञ्चित्कारणत्वस्य संसारे उपलभ्यमानत्वात् कथमीषदुपलब्ध्यभाव इति वाच्यम् । तथाऽपि आनन्दस्येषदुपलब्धिवत् सर्वकारणत्वस्य कदापि ईषदुपलब्ध्यभावादिति भावः । ननु प्रमाणाभावादानन्दादेरिव विद्यमानस्य तिरोहितत्वात् सर्वकारणत्वानुपलम्भ इति वक्तुं न शक्यत इत्युक्तम्; तदयुक्तम्, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिप्रमाणसत्त्वादिति शङ्कते न चेति ।

विठ्ठल०— सङ्गत्यगतार्थत्वे सूचयन्नधिकरणोपाधिमाह अतीतेति । श्रुतिसिद्धलिङ्गत्वेनेति । बहुश्रुतिसिद्धत्वेनेत्यर्थः । तथैव चन्द्रिकोक्तेः । अनेन श्रुतिगुणयुक्तय इत्यनुव्याख्यानोक्तं श्रुत्युपसर्जनकत्वं युक्तीनां द्विविधं श्रुतिसंवादित्वं श्रुतिसिद्धत्वलिङ्गत्वं चेत्युक्तं भवति । हेतुप्रयोजकः किं न स्यादित्यत आह न हीति । काल्पनिकविरुद्धस्वभावसम्भववारणाय वस्तुत इत्युक्तम् । तथा चादृष्टकल्पना स्यादित्याशयः । हेतोर्विशेषणासिद्धिं च निराह न चेति । अनित्यत्वेति । जन्यत्वे मोक्षस्यानित्यत्वप्रसङ्गादित्यर्थः । प्रमाणाभावादिति । सर्वकारणत्वस्य विद्यमानत्वेऽपि प्रमाणाभावादित्यर्थः । आनन्दादेस्तिरोहितत्वमप्यसिद्धमित्याह आनन्दादेरिति । प्रमाणाभावादित्यसिद्धिमाशङ्क्य निराह न चेति । संसारे संसारदशायाम् । ननु ब्रह्मणः

काल्पनिकजगत्कारणत्वेनापि लक्षणसूत्रोपपत्तेर्न युक्तिविरोधस्तस्येत्याशङ्क्य परिहरति **न च तथाभूतमिति** । **अनङ्गीकारादिति** । सिद्धान्तिनेति शेषः । एवं हेतोर्विशेषणासिद्धिं निरस्य विशेष्यासिद्धिमपि निराह **स्यादेतदिति** । **जघन्यवृत्त्येति** । लक्षितलक्षणारूप एवेत्यर्थः ।

॥ इति भाष्योक्तव्याख्यानानुवादपूर्वकं तत्रानुपपत्तिप्रदर्शनसहितं तत्परिहारकानुव्याख्यानस्य निदर्शनम् ॥

* * *

॥ अथ तत्र एतदनुव्याख्यानस्य व्याख्यानम् ॥

५९ **सु०—** अत्र मुख्यमेवार्थमङ्गीकुर्वाणः प्रष्टव्यः, किं प्रागभिन्नस्यैव जीवस्य मुक्तौ ब्रह्मणैक्यमनेनोच्यते, उत भिन्नस्य, अथ(वा) भिन्नाभिन्नस्य । नाद्यः, अभूततद्भावार्थस्यैकीभवन्तीति च्विप्रत्ययस्यैव अनुपपत्तेः । अत एव न तृतीयः, ऐक्यस्य प्राक् सिद्धत्वात्, भेदनिवृत्त्यर्थत्वे तु गौणार्थत्वापत्तेः, द्वितीयनिराकरणेन निरस्तत्वात् (च) । द्वितीये त्विदमुपतिष्ठते, **नान्यदिति** । हिशब्दो हेतौ । यतो लोके **अन्यत्** वस्तु, **अन्यत्वं** वस्त्वन्तरेणाभेदम् **आपन्नम्, क्वचित्** काले, **कथञ्चन** उपायेन, **न दृष्टम्** । **अतः** तद्दृष्टान्तेन **जीवस्य** अपि **कदाचन** मुक्तावपि **ब्रह्मभावः** ब्रह्मत्वं **न स्यात्** ।

अयमत्र प्रयोगः । जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते, प्राक् ततोऽत्यन्तभिन्नत्वात् । यः कदाचिद्यतोऽत्यन्तं भिद्यते नासौ कदाचित्तदैक्यमापद्यते, यथा घटः पटेनेति ॥ अथवा जीवब्रह्मणोः भेदः, सतोर्भेदिनोर्न निवृत्तिमान्, भेदत्वात्स्तम्भकुम्भादिभेदवदिति । आगमबाधितमेतदिति चेन्न; 'आगमानां मुख्यार्थतासम्भवेऽनुमानबाधकत्वं, बाधिते चानुमाने तेषां मुख्यार्थते'ति परस्पराश्रयत्वप्रसङ्गात्, सत्प्रतिपक्षत्वाच्च । तथा हि श्रुतिः, 'यथोदकमि'त्यादिका । प्रल्हादोऽपि 'परमात्मात्मनोर्योगः परमार्थ इतीष्यते(ताम्) । मिथ्यैतदन्यद् द्रव्यं हि नैति तद् द्रव्यतां यतः' इति ।

परि०— अभूतेति । अभूततद्भावे 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरि'ति सूत्रेण पाणिनिना प्रागनेकतामाप्ता इदानीमेकतां सम्पन्ना इत्याद्यर्थे च्विप्रत्ययोक्तेरिह प्रागप्यैक्ये एकीभवन्तीति च्विप्रत्ययान्तैकशब्दप्रयोगो न युक्त इत्यर्थः । **गौणार्थत्वापत्तेरिति** । मुख्यार्थस्याभूततद्भावरूपस्य

त्यागापत्तेरित्यर्थः । **द्वितीयेति** । उत भिन्नस्येति पक्षनिराकरणेन वक्ष्यमाणेनेत्यर्थः । प्रागभिन्नस्य पश्चादभेदः क्वाप्यदृष्ट इति यावत् । प्रागभिन्नाभिन्नस्य पश्चादत्यन्ताभेदोऽपि क्वापि न दृष्ट इति व्याख्यानसम्भवादिति भावः । **यथोदकमिति** । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम' इति भेदे दृष्टान्तपूर्वं जीवब्रह्मभेदोक्तेरिति भावः । परमात्मेति विष्णुपुराणवाक्यम् । एतत् पूर्वप्रकृतं जीवब्रह्मैक्यं मिथ्या कुतः यतोऽन्यद्द्रव्यं तद्व्यतां नैतीति योजना ।

यादु०— गौणार्थत्वापत्तेरिति । अभूततद्भावरूपवाच्यार्थगुणो भेदनिवृत्तिरेवेति भावः । **निरस्तत्वाच्चेति** । यद्यपि द्वितीयपक्षोऽद्यापि न निराकृतस्तथाऽप्यतिदेशसौकर्यायैवात्र तन्निराकरणम्, वस्तुतस्तु द्वितीयपक्षनिराकरणानन्तरमेव तृतीयपक्षनिराकरणमित्यभिप्रायेणैवमुक्तमिति ध्येयम् । **द्वितीये त्विति** । अनेन न ह्यन्यस्यान्यत्वं युज्यत इति भाष्ये पूर्वं भिन्नस्य पश्चादभिन्नत्वाभावः पूर्वपक्षयुक्तित्वेनोक्तः अत्र कथं सिद्धान्तयुक्तित्वेनोच्यत इति शङ्का निरस्तेति ज्ञातव्यम् । प्रागभिन्नस्यैव जीवस्य मुक्तौ ब्रह्मणैक्यमितीमं पूर्वपक्षमाश्रित्य मुक्ताभावभेदेन पूर्वमभेदं साधयितुं न हीत्यादिपूर्वपक्षभाष्यं प्रवृत्तम् । च्विप्रत्ययस्तु भेदभ्रमनिवृत्तेरभूततद्भावाभिप्राय इति तत्पूर्वपक्षाशयः । पूर्वं भेदो मुक्तावभेदः च्विप्रत्ययस्वारस्यात् । न ह्यन्यस्येति युक्तिस्तु च्विप्रत्ययरूपश्रुतिबाधितेति पूर्वपक्षनिरासाय पूर्वं सिद्धेन भेदेन पश्चादपि भेदं साधयितुं नान्यदन्यत्वमात्रमित्यादिसिद्धान्तानुव्याख्यानं प्रवृत्तमतो न कोऽपि विरोध इत्याशयात् । तदिदमाह **द्वितीये त्विदमुपतिष्ठत इति** । तर्हि तवाप्यन्योन्याश्रय इत्यस्वरसादाह **सत्प्रतिपक्षेति** । **यथोदकमिति** । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतमे'ति श्रुतिः । 'विजानतां मुनीनामात्मा स्वामी चतुर्मुखोऽपि तादृगेव भवति न तु स एवे'ति मुक्तौ भेदमाहेत्यर्थः । **परमात्मात्मनोरिति** । विष्णुपुराणप्रल्हादवाक्यमिदम् । **योगः** सायुज्यम् । **एतत्** पूर्वमाशङ्कितम् । मिथ्येति प्रतिज्ञा । पूर्वं ततोऽतिभिन्नत्वादित्यभिप्रेतस्वहेतोर्व्याप्तिमुपपादयति **अन्यद्द्रव्यं हीति** । अत्र द्रव्यपदं तु स्वरूपकथनार्थं न तु हेत्वादिशरीरान्तर्गतम् ।

वं०प०— अत एवेत्युक्तं विशदयति **ऐक्यस्येति** । प्राक् संसारे । तथा च च्विप्रत्ययानुपपत्तिरेवेत्यर्थः । ननु प्राग्भिन्नाभिन्न एव जीवस्तस्य मुक्तौ त्वभेदो भवतीत्येकीभवन्तीति श्रुत्यर्थतया नोच्यते येन च्विप्रत्ययानुपपत्तिः किन्नाम भेदो निवर्तत इत्यर्थ इत्युच्यते । भेदनिवृत्तिश्च प्रागविद्यमानैव भवतीति च्विप्रत्ययोपपत्तिरित्याशङ्क्याह **भेदेति** । **गौणेति** । न ह्येकीभवन्तीत्यस्य भेदनिवृत्तिर्मुख्योऽर्थ इत्यर्थः । **द्वितीयेति** । प्राग्भिन्नाभिन्नस्यैव मुक्तावैक्यं भवतीति पक्षस्योत्तरत्र क्रियमाणेन द्वितीयपक्षनिरासेन निरस्तत्वादित्यर्थः । यथाकथञ्चित्पूर्वं भेदस्याङ्गीकारेण पश्चादभेदोऽयुक्त इति हृदयम् । भेदो न निवृत्तिमानित्युक्ते बाधः । यदा भेदिनोर्निवृत्तिस्तदा भेदस्यापि भविष्यत्येव निवृत्तिरत उक्तं **भेदिनोः सतोरिति** । तथा चात्र

भेदिनौ ब्रह्मजीवौ सर्वदा स्त इति तद्भेदोऽपि सर्वदाऽस्तीति लभ्यत इत्यर्थः । **आगमेति** । ऐक्यागमेत्यर्थः । **एतत्** अनुमानम् । **मुख्यार्थेति** । ऐक्यरूपेत्यर्थः । **मुख्यार्थतेति** । तद्बाधाभावादिति भावः । ऐक्यागमानां भेदागमैः सत्प्रतिपक्षितत्वाच्च न मुख्यार्थत्वमित्याह **सत्प्रतिपक्षितत्वाच्चेति** । कोऽसौ भेदागम इत्यत आह **तथा हीति** । प्रह्लादोऽपीत्याहेति शेषः । **आत्मा** जीवो, **योगः** सम्बन्धः; स च सायुज्यः ऐक्यरूपो विवक्षितः प्रकृत इति ध्येयम् । इतीत्यस्यावृत्तिः । तदित्यस्य पञ्चम्यन्तस्य बुद्ध्या विविक्तस्यान्यपदेनापि सम्बन्धः । तच्च तत् द्रव्यं च तद्द्रव्यं, तस्य भावस्तद्द्रव्यता, ताम् । परमात्मात्मनोर्योग ऐक्यं परमार्थ इत्येतन्मिथ्येतीष्यताम् । कुत इति चेत् यतः तस्मादन्यद्द्रव्यं तद्द्रव्यतां तद्द्रव्याभेदं नैति प्राप्नोतीति व्याप्तेरिति श्लोकार्थः ।

कं०रा०— अतःशब्दपरामृष्टं हेतुमाह **ऐक्यस्येति** । जीवस्य मुक्तेः प्राक् ब्रह्मणा भिन्नाभिन्नत्वमिति तृतीयपक्षेऽप्यैक्यस्य प्राक्सिद्धत्वेनाभूततद्भावार्थस्यैकीभवन्तीति च्विप्रत्ययस्यानुपपत्तेरित्यर्थः । नन्वेकीभवन्तीत्यत्रैकशब्दस्य भेदनिवृत्त्यर्थत्वात् तस्याश्च भिन्नाभिन्नत्वपक्षे प्रागसिद्धत्वात् च्विप्रत्ययोपपत्तिरित्यत आह **भेदेति** । एकशब्दस्य भेदनिवृत्त्यर्थत्वे त्वभेदवाचिनस्तस्यामुख्यार्थत्वापत्तेस्तदर्थत्वमादाय च्विप्रत्ययोपपादनमिति भावः । **द्वितीयेति** । प्राग्भिन्नस्य जीवस्य मुक्तौ ब्रह्मणैक्यमिति द्वितीयपक्षस्य निरासकः नान्यदन्यत्वमापन्नमित्यत्राभिप्रेतः । जीवब्रह्मभेदः सतोर्भेदिनोर्न निवृत्तिमान् भेदत्वात् स्तम्भकुम्भादिभेदवदिति यो न्यायस्तेन निरस्तत्वाच्च प्राग्भिन्नाभिन्नस्य जीवस्य मुक्तावत्यन्तैक्यमिति तृतीयपक्षो न युक्त इत्यर्थः । **सतोर्भेदिनोरिति** । न निवृत्तिमानित्येव साध्यनिर्देशे भेदिनोः स्तम्भकुम्भयो निवृत्तौ तत्स्वरूपभूतभेदस्यापि निवृत्तेः स्तम्भकुम्भादिभेदेन निवृत्तिमानिति साध्यस्याभावेन दृष्टान्तस्य साध्यवैकल्यं तत्र व्यभिचारश्च स्यात् तन्निरासाय सतोर्भेदिनोरित्युक्तं तथा च स्तम्भकुम्भयोः सतोरेव तद्भेदस्य निवृत्त्यभावेनोक्तसाध्यस्य तत्र सत्त्वान्न तद्वैकल्यादीति भावः । **आगमबाधितमिति** । परेऽव्यये सर्व एकीभवन्तीत्याद्यागमबाधितमुक्तानुमानमित्यर्थः । **सत्प्रतिपक्षत्वादिति** । ऐक्यबोधकामानां भेदपरश्रुत्यादिना सप्रतिपक्षत्वादित्यर्थः । तदेव श्रुत्यादिकं लेशतो दर्शयति **तथा हीति** । **परमात्मेति** । परमात्मनोर्योगः सम्बन्ध एव परमार्थस्तयोरैक्यं तु मिथ्येतीष्यतां कुतः हि यस्मात्कारणाद्यद्द्रव्यं यतो यस्माद्द्रव्यादन्यत् तद्द्रव्यं तद्द्रव्याभिन्नतां नैतीति दृष्टं तस्मादित्यर्थः ।

श्रीनिधि०— **भेदनिवृत्त्यर्थत्वे त्विति** । एवं चैक्यस्य प्राक् सिद्धत्वेऽपि भेदस्यापि प्रतीयमानत्वे च्विप्रत्ययोपपत्तिरिति भावः । **गौणार्थतेति** । एकशब्दस्य भेदाभावे अशक्तत्वादिति भावः । **द्वितीयनिराकरणेति** । तन्न्यायेनेत्यर्थः । न हि यद्येन भिन्नाभिन्नं तत्तेनाभिन्नं दृष्टमिति भावः । योगः सायुज्यम् । **मिथ्यैतदिति** । परमात्मद्रव्यस्य जीवद्रव्यस्य च तादात्म्यम् । एतन्मिथ्येति कुत इत्यत आह **अन्यद्द्रव्यं हीति** ।

शे०वा०— ननु प्राग्भिन्नस्य जीवस्य मुक्तौ ब्रह्मणैक्यमेकीभवन्तीत्यनेनोच्यत इति नोच्यते । किन्नाम प्रागभिन्नस्य भिन्नाभिन्नस्य वा जीवस्य मुक्तौ ब्रह्मणैक्यमनेनोच्यत इति । तावन्मात्रेणाप्येकीभवन्तीत्यादे-

मुख्यार्थता-निर्वाहात्; तत्कथं नान्यदित्यादिमूलस्यैकीभवन्तीत्यादेर्मुख्यार्थतायां बाधकयुक्तिव्युत्पादनपरत्वेन प्रवृत्तिवर्णनम्, प्राग्भिन्नस्य पश्चादैक्यमिति पक्षे बाधकयुक्तिव्युत्पादनपरत्वेऽप्यस्य प्रागभिन्नस्येति भिन्नाभिन्नस्य वेति पक्षे बाधकयुक्तिव्युत्पादनपरत्वाभावात्; इत्यत प्राग्भिन्नस्य जीवस्य मुक्तौ ब्रह्मणैक्यमनेनोच्यत इति पक्षमाश्रित्य मुख्यार्थत्ववादिनं प्रति बाधकयुक्तिव्युत्पादनपरत्वमेवात्रास्याभिमतं न तु पक्षान्तरमाश्रित्यापि तद्वादिनं प्रत्यस्य तदभिमतम्; किन्तु तत्रान्यदेव बाधकमिति नानुपपत्तिरित्यभिप्रेत्यात्र सम्भावितविकल्प-प्रदर्शनपूर्वकं पक्षान्तरं बहिरेव प्रदूष्य, प्राग्भिन्नस्य जीवस्य मुक्तावैक्यमनेनोच्यत इत्येतत्पक्षनिरासकतयोत्तरवाक्यं योजयितुमत्र सम्भावितविकल्पानाह **अत्रेत्यादिना** । **अनुपपत्तेरिति** । अभेदस्य प्रागपि सत्त्वेनाभूततद्भावा-भावादिति भावः । **गौणेति** । भेदनिवृत्तिरेवाभूततद्भावरूपवाच्यार्थगुण इति भावः । **निरस्तत्वाच्चेति** । यद्यपि द्वितीयपक्षो नाद्यापि निराकृत इति निरस्तत्वोक्तिर्न श्लिष्टा, तथाऽपि द्वितीयपक्षनिरासकन्यायेनैतत्पक्षनिरास-सिद्धेर्न पृथगत्र तद्दूषणव्युत्पादनमित्यत्र तात्पर्यमित्यवधेयम् । **द्वितीये त्विति** । ननु 'न ह्यन्यस्यानन्यत्वं युज्यते' इति भाष्ये पूर्वभिन्नस्य पश्चादभिन्नत्वाभावः पूर्वपक्षयुक्तित्वेनोक्तः, 'नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथ-ञ्चने'त्यत्र तु सिद्धान्तयुक्तित्वेन । तत्कथमस्य न भाष्यविरोध इति चेत् । अत्र ब्रूमः । अत्र त्रयः पूर्वपक्षाः सम्भवन्ति । तथा हि । एकीभवन्तीति ब्रह्मणस्तावन्मुक्ताभेदः श्रूयते । न च तावता ब्रह्मणोऽसर्वकर्तृत्वं सिद्ध्यति । संसारिण इव मुक्तस्य सर्वकर्तृत्वे प्रत्यक्षादिविरोधाभावेन पूर्वमसतोऽपि जीवे सर्वकर्तृत्वस्य मुक्तेरिव ज्ञानेनोदयसम्भवेन च मुक्ताभिन्नस्यापि ब्रह्मणः कथञ्चित्कारणत्वसम्भवात् । जगद्व्यापारवर्जमित्यत्र तु अत्र-त्यसिद्धान्तन्यायेन भेदे सिद्धेऽपि मुक्तस्य सत्यकामत्वात् सर्वकर्तृत्वमिति शङ्कानिरासान्नात्रत्यपूर्वपक्षदशायां तत्रत्यसिद्धान्तेन मुक्तस्यासर्वकर्तृत्वसिद्धिः तस्मादसर्वकर्तृत्वेन प्रत्यक्षसिद्धसंसार्यभेदाद्ब्रह्मणोऽपि तथात्वमिति वक्तुं मुक्तावप्यभेदेन संसारेऽप्यभेदः साधनीयः । एकीभवन्तीत्यभूततद्भावार्थकच्विप्रत्ययस्तु न ह्यन्यस्येति भाष्योक्तयुक्तिविरोधाद्भेदभ्रमनिवृत्तेरभूततद्भावाभिप्राय इत्येकः पूर्वपक्षः । एतं पक्षमाश्रित्य मुक्तावभेदेन पूर्वमभेदं वक्तुं न हीत्यादिपूर्वपक्षभाष्यं प्रवृत्तम् । द्वितीयस्तु च्विप्रत्ययस्वारस्यात्पूर्वं भेदो मुक्तौ त्वभेदः । न ह्यन्यस्येति युक्तिस्तु च्विप्रत्ययरूपश्रुतिबाधितेति । एतत्पक्षदूषणाय पूर्वं सिद्धेन भेदेन पश्चादपि भेदं साधयितुं नान्यदन्यत्वमित्यादिसिद्धान्तानुव्याख्यानं प्रवृत्तमिति न भाष्यानुव्याख्यानयोस्तट्टीकयोर्वा विरोधः । तृतीयस्तु पूर्वं भेदाभेदौ, मुक्तौ तु केवलाभेदः । एवञ्च च्विप्रत्ययो युक्तः । पूर्वं केवलाभेदाभावात् । 'न ह्यन्यस्ये'-त्यादियुक्तिविरोधश्च न । पूर्वमप्यभेदस्य सत्त्वात् । एतं वा पक्षमाश्रित्य भाष्यानुव्याख्याने प्रवृत्ते । तत्र भाष्ये च्विप्रत्ययेन पूर्वं भेदस्य सिद्धत्वात् पूर्वपक्षानुपयुक्तत्वाच्चाभेद एव साधितः । अनुव्याख्यानेऽपि पूर्वं भिन्नाभिन्नस्य पश्चात् केवलाभेदो नास्तीति भावेन नान्यदन्यत्वमित्युक्तमिति न कश्चिद्विरोधः । पक्षभेदेन भाष्यानुभाष्ययोर्विरोधपरिहारसूचनायाप्यत्र टीकायां विकल्पत्रयप्रदर्शनमिति द्रष्टव्यम् । विस्तरस्तु चन्द्रिकायां द्रष्टव्यः । मूले 'अतो जीवस्ये'त्युक्तेस्तदनुसारेण हेत्वर्थतया हिशब्दं व्याचष्टे **हिशब्दो हेताविति** । नन्वनन्य-स्यान्यत्वापत्तेरन्यस्यानन्यत्वापत्तेर्वाऽयोगेन अन्यस्यैवान्यत्वापत्तेर्वाच्यत्वात् कथं नान्यदन्यत्वमापन्नमिति निषेधः । कथञ्चानेन प्राग्भिन्नस्योत्तरत्राभेदाभावसिद्धिरित्यतः प्रकृतोपयोगितयाऽन्यत्वपदं व्याचष्टे **अन्यत्वमिति** । संसारे

भिन्नस्य जीवस्य मुक्तावभेदवादिनं प्रति मुक्तावभेदाभावस्यैव युक्तिसिद्धताया वक्तव्यत्वात् । कदाचिदप्यभेदाभावकथनमसङ्गतमित्यतः प्रकृतोपयोगितया कदाचनेतिपदं व्याचष्टे **कदाचन मुक्ताविति** ।

यथास्थितमूलवाक्यस्य बाधकयुक्तिसूचकत्वमेव न त्वेवमभिमतप्रयोगप्रकारत्वमपि येनानुपपत्तिः शङ्क्येतेत्यभिप्रेत्यानुमानप्रयोगमाह **उभयत्रेति** । न केवलं 'नान्यदन्यत्वमि'ति मूलवाक्यं प्राग्भिन्नजीवस्य मुक्तौ ब्रह्मणैक्यमेकीभवतीत्यनेनोच्यते, इति द्वितीयपक्षे बाधकयुक्तिसमर्पकं, किन्नाम प्राग्भिन्नाभिन्नजीवस्य मुक्तौ ब्रह्मणैक्यमुच्यत इति तृतीयपक्षेऽपि बाधकयुक्तिसमर्पकमित्यभिप्रेत्य सूचितमनुमानप्रयोगप्रकारं दर्शयति **अथवेत्यादिना** । ऐक्यस्य प्रागपि सिद्धत्वेनाभूततद्भावार्थस्यैकीभवन्तीति च्विप्रत्ययस्यानुपपत्त्याऽभूतभेदनिवृत्तेरेव तदर्थत्वाभ्युपगमात् तदभाव एवात्र साधित इति द्रष्टव्यम् । ननु चागमानाममुख्यार्थत्वसिद्धावनुमानबाधकत्वसिद्धिः । अबाधिते चानुमाने तद्बाधितत्वेन तेषाममुख्यार्थत्वसिद्धिरिति तवाप्यन्योन्याश्रय इत्यरुचेराह **सत्प्रतिपक्षत्वाच्चेति** । भेदप्रतिपादकश्रुतिस्मृतिप्रतिरुद्धत्वाच्चेत्यर्थः । ततश्च भेदप्रतिपादकानुमानानामागमसचिवतया प्राबल्यान्नान्योन्याश्रय इति भावः । विरोधश्रुतिमेवोदाहरति **तथा हि श्रुतिरिति** । यथोदकमिति श्रुतिप्रतीकोपादानम् । ततश्च 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतमे'ति सम्पूर्णश्रुतिपरिग्रहः । अत्र विजानतो मुनेर्विजानतां मुनीनामात्मा स्वामी चतुर्मुखोऽपि तादृगेव भवति । न तु स एव भवतीति मुक्तौ जीवब्रह्मभेदः स्पष्टं प्रतीयते । आदिपदेन 'निरञ्जनः परमं साम्यमुपैति', 'परात्परं पुरुषमुपैति दिव्यमि'त्यादिश्रुत्यन्तरपरिग्रहः । विष्णुपुराणस्थं मुक्तपरमात्मनोर्भेदसाधकमभेददूषकं च प्रल्हादवाक्यमपि पठति **प्रल्हादोऽपीत्यादिना** । **योगः** सायुज्यम् । एतत्पूर्वमाशङ्कितं मुक्तस्य परमात्मनैक्यं तु मिथ्येति प्रतिज्ञा । कुत इत्यतो मुक्तेः प्राक् ततो भिन्नत्वादिति हेतुमभिप्रेत्य तस्य सामान्यव्याप्तिमुपपादयति **अन्यदिति** । अत्र द्रव्यपदं स्वरूपकथनार्थं न तु हेत्वन्तर्गतमिति न वैयर्थ्यशङ्कावकाश इति ध्येयम् । यद्वा सत्प्रतिपक्षत्वादित्यस्य 'निरञ्जनः परमं साम्यमुपैती'त्यादिभेदप्रतिपादकश्रुत्यादिविरुद्धत्वादित्यर्थः । न केवलं बाधकवशादेतदभेदश्रुतेरुपचरितार्थत्वं किन्तु श्रुतिस्मृतिवशाच्चेत्यभिप्रेत्य तदुदाहरति **तथा हीत्यादिना** । अत्र च पक्षे मिथ्येति गौणमिति योज्यम् ।

वा०र०— परत्वेऽप्यस्येति । अस्य बाधकं युक्तीति सम्बन्धः । **इत्यतः इति** । अनेन उक्तशङ्कापरिहाराय स्वयं पक्षान्तरं निराकृतमिति नासङ्गतिर्मूले शङ्क्येति सूचितम् । अभूततद्भावार्थस्येति मूलवाक्यस्य ह्ययमाशयः । कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरित्येतत् सूत्रे अभूततद्भाव इति वक्तव्यमस्ति । वृत्तिकृता तु वक्तव्यमपीदं सूत्रान्तर्भावेनैव पठितम् । यथा समोगम्यृच्छिभ्यां इति सूत्रीय प्रच्छिस्वरत्यर्ति श्रुविदिभ्यः इति वक्तव्यं गम्यृच्छिभ्यामित्यादिरूपेण सूत्रान्तर्भूततया पठ्यते । तथा च च्विप्रत्ययविधायकसूत्रेणाभूततद्भावार्थे गम्ये च्विप्रत्ययविधानात् । यस्याः प्रकृतेः विकारः प्राप्तो भवति सा प्रकृतिः प्राक् विकारं अभूता पश्चात् विकारं प्राप्ता भवति । सा अभूततद्भूता इत्युच्यते इति तादृशप्रकृतेः अभूतविकारायाः विकारप्राप्तिरेव अभूततद्भावपदार्थतया यत्र प्राक् अकृष्णः सम्पन्नः कृष्णः सम्पन्नो भवति कृष्णीभवति इत्यादौ कृष्णत्वमप्राप्तस्य

कृष्णत्वाभावरूपातद्भूतस्य तद्भावो गम्यते । तत्रार्थे कश्चित्प्रत्ययोपपत्तावपि प्रागपि अभेदस्यैवाङ्गीकारेऽभेदमप्राप्त एकीभवतीति । अभेदमप्राप्तस्याभेदरूपातद्भूततद्भावाभावात् तदर्थकच्विप्रत्ययायोग इति । तमेतमाशयं मनसि निधाय आह **अभेदस्य प्रागपीति** । विकारं प्राप्तप्रकृतौ वर्तमानात् एकशब्दात् विकारवाचिनः स्वार्थे च्विप्रत्यये चलोपे अस्य च्वाविति सूत्रेण दीर्घे ईकारे वेरपि लोपे एकीभवति इति रूपं ज्ञेयम् । **वाच्यार्थगुण इति** । यत्रानेकेषां एकत्वं प्राप्तं वाच्यम् । तत्राभेदनिवृत्तिरप्यस्ति । तथा च वाच्यार्थभूताभेदाविनाभूतभेदनिवृत्ति-रभेदगमकतया तद्गुण इत्युच्यते । भेदनिवृत्त्यर्थत्वे उक्तरूपगुणभूता भेदनिवृत्तिरभेदसम्बन्धे नास्तीति भेदनिवृत्तिरेव गौणार्थ इति भावः । तदेतदाह निवृत्तिरेवेत्यवधारणेन । **इत्यत्र तात्पर्यमिति** । न तु निरासस्य प्रकृतत्वेऽपीति शेषः । निश्चितस्य एष्यतोऽतीतत्वेन व्यवहारात् । एष्यन्नु निश्चितं यत् तदतीतत्वेन भण्यते इति प्रमाणाच्चात्र भाविनोऽपि निरासस्य निश्चितत्वात् । तदभिप्रायेणातीतव्यपदेशः इत्यस्याप्युपलक्षणमेतत् । अत एव वाक्यार्थ-विनोदे निश्चितद्वितीयपक्षदूषणदूषकत्वमित्यादिना अन्यथाख्यातिनिराकृतेति ज्ञेयम् । चन्द्रिकोक्तरीत्या भाष्या-नुभाष्ययोः विरोधमाशङ्क्य परिहरति **ननु न हि अन्यस्येत्यादिना** । **सिद्धान्तयुक्तित्वेनेति** । पूर्वं भिन्नस्य पश्चाद्भिन्नत्वाभाव उक्त इति वर्तते । ननु मुक्तजीवे जगत्कर्तृत्वस्य जगद्व्यापारवर्ज्यमित्यत्र निराकरिष्यमाणत्वात् तत्कथं तदङ्गीकारः इत्यत आह **जगद्व्यापारेति** । ननु मुक्तेः पूर्वं अभेदाङ्गीकृतौ एकीभवतीति च्विप्रत्ययः कथं इत्यत आह **एकीभवन्तीत्यभूतेति** । **भेदभ्रमनिवृत्तेरिति** । अनेनाभेदोपदेशोऽपि व्यर्थः सिद्धेऽप्यभेदे भेद-निवृत्त्यर्थत्वात् इत्यपि सूचितम् । **अभूततद्भावेति** । ननु तत्त्वमसीति इदानीमपि अभेदश्रुतेः च्विप्रत्ययो न स्वरसः इति दूषणं वक्तुं शक्यं, तथापि न हि अन्यस्येति भाष्ये प्रागभिन्नस्य पश्चादभेदानुपपत्तेः मुक्तौ अभेदान्यथानुपपत्त्या प्रागपि अभेद एवाश्रयणीयः इति युक्तिविरोधेन प्रागभेदे पूर्वपक्षितश्रुतिविरोधेन च्विप्रत्ययास्वारस्यदूषणस्य भाष्योक्तपूर्वपक्षविरोधेनानुत्थाप्यत्वात् । कथञ्चित् उत्थापनेऽपि पृथगुपदेशात् इत्यनेन गतार्थता इत्यत आह **न हि अन्यस्येतीति** । आद्ये पक्षे न हि अन्यस्येत्यादिभाष्योक्तयुक्तेः आभासत्वमङ्गीकृतम् । इदानीं च्विप्रत्ययभाष्योक्तयुक्त्युभयस्वारस्यानुरोधेन पक्षान्तरमाह **तृतीयस्त्विति** । उक्तरीत्या कृत स्वचर्चस्योद्ग्रन्थत्वशङ्कानिरासाय ग्रन्थारूढतां दर्शयति **पक्षभेदेनेति** । **विकल्पत्रयमिति** । किं प्राक् अभिन्नस्य एव जीवस्येत्यादिना प्रदर्शितमित्यर्थः । अत्र पक्षत्रये प्रत्येकं पुनः पक्षत्रयं सम्भवति इत्यादि चर्चस्यावश्यकतामन्वानः आह **विस्तरस्त्विति** । तदनुसारेण यस्मादित्यर्थ इति पाठः स्वरसः । हेत्वर्थतयेति पाठेऽपि यस्मादित्येवं रूपं यत् हेतुभूतं अतः इत्येतत् उपयुक्तं तदर्थतयेत्यर्थः । मूलेऽपि हिशब्दो यस्मादित्यर्थे इति पाठः स्वरसः । हेताविति पाठेऽपि इयमेव गतिः । यत्र यत्तच्छब्दार्थयोः द्वयोरप्यभावः तत्रैव हेत्वर्थतया व्याख्यानात् । वाक्यानन्तर्गतयत्तच्छब्दोपस्कारेण वाक्यार्थप्रदर्शनस्यैव पूर्वोत्तरग्रन्थयोः स्पष्टत्वात् । यत्र तु तच्छब्दो वा अतःशब्दो वास्ति वाक्यगतयच्छब्दार्थकतया एव हिशब्द-चशब्दादेः व्याख्यानं स्पष्टत्वाच्चेति ज्ञेयम् । **अनुपपत्तिः शङ्क्येत इति** । यथा श्रुतस्य प्रयोगप्रकारत्वासम्भवरूपानुपपत्तिरित्यर्थः । **ऐक्यस्य प्रागपीति** । ततश्च जीवानां प्रागप्राप्तब्रह्मैक्यप्राप्त्यभावात् अभूततद्भावरूपच्विप्रत्ययार्थो नास्तीति एकीभवन्तीति च्विप्रत्ययानुपपत्तिरित्यर्थः । **अभूतेति** । इदं च भेदनिवृत्तेः अप्राप्तत्वरूपएकदेशोत्कीर्तनम् । भेदनिवृत्तेः

प्रागसिद्धायाः प्राप्तिसद्भावेन जीवाः प्राक् ब्रह्मणा भेदनिवृत्तिरहिताः पश्चात् भेदनिवृत्तिमन्तः भवन्तीति अभूततद्भावो भेदनिवृत्तिगत इति तस्या एव च्विप्रत्ययार्थत्वमिति ध्वनितं भवति । अत्र च प्रकरणे ऐक्यस्य प्रागपि सिद्धत्वेन च्विप्रत्ययार्थत्वमिति नानुपपत्तिः इत्यादिकं वचनं सम्पद्यते । कर्तॄणां जीवानां एव प्राक् ब्रह्मणा ऐक्यं अप्राप्तानां पश्चात् ऐक्यप्राप्तिरिति एकशब्दात् अभूततद्भावे गम्ये च्विप्रत्यय इति सिद्धमेव प्रमेयं अर्थप्राधान्यपुरस्कारेण एकदेशोत्कीर्तनत्वेन व्याख्येयमिति विवेचनीयम् । सम्पूर्णव्यवस्थया एतत् स्थलं व्याख्येयमस्ति । पृथगधिकरणे एतत् विचारोऽस्ति । सोऽत्रानुसन्धेयः । श्रुतिस्मृतिवशात् उपचरितार्थत्वमेवेत्येतदवतारानुसारेण मिथ्येति स्मृतिगतं पदं व्याख्याति **अत्र चेति** । प्राक् बाधकथनपरतया योजनानुसारेण यथाश्रुत एवार्थः स्वीकृतः । इदानीं श्रुतिस्मृत्योः एकीभावव्याख्यानरूपतया स्मृतिगतमिथ्यापदस्य यथाश्रुतार्थानुपपत्तेः गौणमित्येतदर्थकत्वमेव वाच्यमिति भावः । एवमुत्तरत्रापि विभागपदार्थो ज्ञेयः । अधिकरणान्तं व्याख्येयमस्ति । सशरीरत्वकृतमिति पाठः ।

स०व्र०— द्वितीयनिराकरणेनेति । उत भिन्नस्येति द्वितीयविकल्पनिराकरणावसरे, जीवब्रह्मणोर्भेदः, सतोर्भेदिनोर्न निवृत्तिमान्, भेदत्वात् स्तम्भकुम्भादिभेदवदिति यदनुमानं तेन निरस्तत्वाच्चेत्यर्थः । पूर्वं भेदनिवृत्त्यभावे मुक्तावपि भेदनिवृत्तिर्बाधितेति भावः । **आगमेति** । 'परेऽव्यये' इत्यागमबाधितमित्यर्थः । तर्हि तवाप्यन्योन्याश्रय इत्यत आह **सत्प्रतिपक्षत्वाच्चेति** । **अन्यत्** द्रव्यं भेदोपेतं द्रव्यं, यतः, तद्द्रव्यतां तदैक्यं, नैति, तस्मात्, एतत् ऐक्यं, मिथ्येत्यर्थः ।

विठ्ठल०— न चैक्यस्य सिद्धत्वेऽपि भेदस्यापि सद्भावात् तन्निवृत्त्यर्थं चित्प्रत्ययोपपत्तिरित्याह **भेदनिवृत्त्यर्थं त्विति** । **गौणार्थत्वापत्तेरिति** । मुख्यार्थभूतस्याभूततद्भावरूपस्य त्यागापत्तेरित्यर्थः । **निरस्तत्वाच्चेति** । यद्यपि द्वितीयपक्षोऽद्यापि न निराकृतः । तथाप्यतिदेशसौकर्यायैतन्निराकरणम् । वस्तुतस्तु द्वितीयपक्षनिराकरणानन्तरमेव तृतीयपक्षनिराकरणमित्यभिप्रायेण निरस्तत्वादित्युक्तमिति ध्येयम् । प्राग्भिन्नस्य पश्चादभेदः कुत्राप्यदृष्ट इतिवत् प्राक्भिन्नाभिन्नस्य पश्चादत्यन्ताभेदोऽपि न क्वापि दृष्ट इति व्याख्यानसम्भवादिति भावः । **अयमत्र प्रयोग इति** । यद्यपि गीतातात्पर्यटीकोक्तरीत्या कार्यकारणयोः प्रागुत्पत्तेरत्यन्ताभेदेऽपि कालान्तरे ऐक्यमुपलब्धं तथापि धर्मिणो सत्त्वे सतीति विशेषणान्नानुपपत्तिरिति ध्येयम् । **सत्प्रतिपक्षत्वाच्चेति** । एकीभवतीत्यादेर्भेदश्रुत्या सत्प्रतिपक्षत्वाच्चेति भावः । यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतमेति श्रुतिर्विजानतां मुनीनामात्मा स्वामी वायुरपि तादृगेव भवति । न तु स एव भवति । किमन्ये जीवा इति सतात्पर्यं भेदमाहेत्यर्थः । **परमात्मनोर्योग इति** । विष्णुपुराणवाक्यं योगः सायुज्यम् । एतत्पूर्वमाशङ्कितं मुक्ता वैक्यं तु मिथ्या कुत इत्यत उक्तम् **अन्यद्द्रव्यमिति** । यतः कारणाद्यस्मादन्यद्द्रव्यं तद्द्रव्यतां अन्यत्वावधीभूतद्रव्यतां नैतीति दृष्टान्तः स्यादित्यर्थः ।

॥ इति एतदनुव्याख्यानस्य व्याख्यानम् ॥

* * *

॥ अथ तत्रान्ते उक्तव्याख्याने अभ्यधिकाशङ्का,
तत्परिहारकानुव्याख्यानव्याख्यानञ्च ॥

६० सु०— अथ मतम् । नायमस्ति युक्तिविरोधः, प्रागप्यभिन्न एव ब्रह्मणा जीव इत्यङ्गीकारात् । न च च्विप्रत्ययानुपपत्तिः, प्रतीत्यपेक्षया तदुपपत्तेः; प्राग्विभिन्नतया दृष्टोऽयं जीवो ब्रह्मणः, अथेदानीं मुक्तावभिन्नतया दृश्यते, इत्यत एकीभवन्तीत्युच्यत इति ।

अत्रेदं वक्तव्यम् । किं प्राक्तनी जीवब्रह्मणोर्भेददृष्टिर्भ्रान्तिरुत प्रमेति ॥ नाद्यः, बाधकाभावात् । श्रुतयस्त्वद्याप्यव्यवस्थितार्था न बाधकतामश्नुवते ॥ द्वितीये त्वाह **क्वचिदिति** ।

अनु०— क्वचिद्भिन्नतया दृष्टं तदभिन्नतया कथम् ।
दृश्येन्नो दृष्टपूर्वं हि तादृशं न च दृश्यते ।

क्वचित् काले यद्वस्तु यतः **भिन्नतया** प्रमितं, तत् कालान्तरेऽपि **कथं तदभिन्नतया** प्रती(मी)येत; न कथञ्चिदित्यर्थः ।

कुत इत्यत आह **नो दृष्टपूर्वं हीति** । **तादृशं** प्राग्भिन्नतया प्रमितं, कालान्तरेऽभिन्नतया प्रमीयमाणम् ।

अयमिह प्रयोगः । जीवो न कदाचिद्ब्रह्माभिन्नतया प्रमाविषयः, ततोऽत्यन्तभिन्नतया प्रमितत्वात्, यदेवं तदेवं, यथा घटः पटाद्भिन्नतयेति ।

यस्तु क्वचिदपि भेदप्रमां न मन्यते, तं प्रत्यारोपितभेदमेकं वस्तु व्यतिरेकोदाहरणं वाच्यम् । एवञ्च प्रतीतिमुपादायापि न च्विप्रत्ययोपपत्तिः । एतदर्थत्वेनापि **स्याल्लोकवत्** इति योज्यम् ।

तदेवं 'ग्रावप्लवना'दिश्रुतिवत् उपपत्तिविरुद्धत्वेन श्रुतेर्मुख्यार्थासम्भवादमुख्यार्थ एव स्वीकरणीये परकीयहेतोरसिद्धत्वान्न ब्रह्मणो जगत्कारणत्वे युक्तिविरोध इति सिद्धम् ॥

परि०— ऐक्यश्रुतयो: बाधिका इत्यत आह **श्रुतयस्त्विति** । **आरोपितभेदमेकं वस्त्विति** । अङ्गुल्यवष्टब्धनेत्रेण भिन्नतया प्रतीयमानं चन्द्रबिम्बादिकमित्यर्थः । चन्द्रादावेकस्मिन्वस्तुनि चन्द्रादिभेदाभावेन तत्र हेतुसाध्यव्यतिरेकभावादिति भावः । **एतदर्थत्वेनापीति** । यथा लोके घटः पटाद्भिन्नतया प्रमितो न पटेनाभेदवान्, तथा जीवोऽपि न ब्रह्माभेदवानित्येवं योज्यमित्यर्थः । **परकीयहेतोरिति** । असर्वकर्तृमुक्तजीवाभिन्नत्वहेतोरित्यर्थः ।

वं०प०— **यस्त्विति** । तथा चान्वयव्याप्तिर्न गृहीतुं शक्यते । हेतूपेतस्थलाभावादित्यर्थः । **तं प्रतीति** । तथा चारोपितभेदोपेते एकस्मिन्घटे वस्तुगत्याऽभेदप्रकारकप्रमाविषयत्वमस्ति । आरोपितभेदत्वादेव भिन्नतया प्रमितत्वाभावोऽप्यस्तीत्यर्थः । **एवञ्चेति** । अभेदप्रमारूपप्रतीत्यभावोपपादनेनेत्यर्थः । **एतदिति** । 'नो दृष्टपूर्वं ही'त्येतदर्थप्रतिपादनपरत्वेनापीत्यर्थः । **परकीयेति** । मुक्तेनाभिन्नत्वादित्यस्य ।

कं०रा०— **प्रमीयेतेति** । यद्यपि परेण जीवा मुक्तावभिन्नतया दृश्यत इति प्रतीतिमात्रमुक्तं तथापि तत्प्रतीतेः प्रमितित्वेनैव पराभिप्रेतत्वादियमुक्तिः । अत्र दृश्यं नोऽदृष्टपूर्वं हीति मूलपाठेन काऽप्यनुपपत्तिः दृश्यन्नोऽदृष्टपूर्वे हीति पाठेऽनुभावकर्मणोरित्यात्मनेपदाभावः छान्दस इति वा दृश्यप्रतिपादिकादाचारार्थक्विबन्ताल्लिटि रूपमेतदिति वा द्रष्टव्यं न च दृश्यमिति पाठे प्रमीयतेति ञन्तपदेन व्याख्यानमयुक्तमिति वाच्यम् । कर्मणि निष्पन्नस्य दृश्यशब्दस्य तत्र निष्पन्नेन प्रमीयतेत्यनेन कथं दृश्यं कथं प्रमीयतेति व्याख्यानसम्भवान्न हि सुबन्तस्य सुबन्तमेव प्रतिपदं प्रयोक्तप्रमितो घटः पटाभिन्नतया कदाचित्प्रमाविषयो नेत्यर्थः । **यस्त्विति** । यस्तु भेदमात्रस्य कल्पितत्ववादी क्वचिदपि भेदप्रमां न मन्यते तं प्रति यथा पराद्भिन्नतया प्रमितो घट इत्यन्वयदृष्टान्तस्य वक्तुमशक्यत्वाद्यदभिन्नतया कदाचित्प्रमाविषयस्ततततोऽत्यन्तभिन्नतया प्रमितेति व्यतिरेकव्याप्तावारोपितत्वभेदमेकं वस्तूदाहरणं वाच्यमित्यर्थः । अत्र व्यतिरेकोदाहरणस्यारोपितभेदत्वोक्तिस्तत्र वतोत्यन्तभिन्नतया प्रमितत्वरूपहेतुनिषेधस्य विशेषनिषेधरूपत्वात् तस्य चेतराभ्यनुज्ञानं विनानुपपत्तेस्तदर्थमिति द्रष्टव्यम् । न च वाच्यं सर्वस्य कल्पितत्वपक्षे घटादौ घटादिप्रमाया इव स्वाभेदप्रमाया अप्यभावेन तदभिन्नतया कदाचित्प्रमाविषयत्वरूपसाध्याभावाभावात् तस्य व्यतिरेकोदाहरणत्वासम्भव इति ब्रह्माभिन्नतया प्रमाविषयस्य ब्रह्मणोऽत्यन्तभिन्नतया प्रमितत्वरहितस्य च ब्रह्मण एव व्यतिरेकोदाहरणत्वसम्भवात् तस्यैव चारोपितभेदमेकं वस्त्वित्यनेन विवक्षितत्वादिति । **एवं चेति** । उक्तानुमानेन जीवस्य ब्रह्माभिन्नतया प्रमाविषयत्वाभावे सिद्धे सति प्रागसिद्धामभेदप्रतीतिमुपादायापि न च्चिप्रत्ययोपपत्तिर्वक्तुं शक्येत्यर्थः । **परकीयहेतोरिति** । असर्वकारणेन मुक्तजीवेनात्यन्तभिन्नत्वरूपहेतोरित्यर्थः ।

श्रीनिधि०— **एतच्च** श्रीविष्णुपुराणस्थं वाक्यम् । अतो न भागवते अनुपलब्धिर्दोषः । **पूर्वमिति** । प्रकृत्यधिकरण इति भावः ।

शे०वा०— ननु च **क्वचिद्भिन्नतयेत्युत्तरभाष्यमनर्थकम्** । न च प्राग्भिन्नतया दृष्टस्य तदभिन्नतया दृष्टत्वशङ्कानिरासार्थं तदिति वाच्यम् । तच्छङ्कया अनवसरग्रस्तत्वेन तन्निरासकतद्वाक्यवैयर्थ्यानिस्तारात् । न च च्विप्रत्ययानुपपत्तिदोषपरिहारार्थत्वादस्त्येवोक्तशङ्कावकाश इति वाच्यम् । प्राग्भिन्नस्य मुक्तौ ब्रह्मणैक्यमुच्यत इति निषेध्यपक्षे ऐक्यमादायैव च्विप्रत्ययोपपत्त्या तद्दृष्टिपर्यन्तधावनानर्थक्यादित्यतोऽस्मिन्पक्षे ऐक्यमादाय तन्निर्वाहात् तत्प्रतीतिपर्यन्तधावनस्यानर्थकत्वेऽपि नान्यदितिवाक्योक्तबाधकयुक्तिभिरेतत्पक्षपरित्यागेन प्राग्भिन्नस्यैव जीवस्य मुक्तौ ब्रह्मणैक्यमुच्यत इति प्रथमपक्षमेवाङ्गीकृत्य तत्रोक्तच्विप्रत्ययानुपपत्तिरूपदोषपरिहाराय प्रतीतिपर्यन्त-धावनस्यार्थवत्त्वेन तच्छङ्कावकाशान्न तन्निरासकोत्तरवाक्यवैयर्थ्यमित्यभिप्रेत्योक्तशङ्कानिवर्तकतयोत्तरवाक्यं योज-यितुमभेदपक्षपरिग्रहपूर्वकं तत्रोक्तदोषमाशङ्क्य प्रतीत्यपेक्षया तत्परिहारशङ्कामुत्थापयति **अथ मतमित्यादिना** । नन सत्यरजतस्थले नेदं रजतमिति भिन्नतया भ्रान्तिदृष्टस्यापि पुरोवर्तिनस्तदभाववत्तया दृश्यमानत्वमस्त्येवेति कथं 'क्वचिद्भिन्नतया दृष्टमि'ति तदयोगवर्णनमित्यतो नानेन भेददृष्टेर्भ्रान्तित्वपक्षे तदभेददर्शनस्यायोगो व्युत्पाद्यते, किन्नाम तस्य प्रमात्वपक्षे, ततो नानुपपत्तिरित्यभिप्रेत्यात्र सम्भावितविकल्पप्रदर्शनपूर्वकमाद्यपक्षं बहिरेव प्रदूष्य द्वितीयपक्षनिरासपरतयोत्तरवाक्यं योजयितुमाह **अत्रेदं वक्तव्यमित्यादिना** । नन चाभेदबोधकागमानामेव बाधकत्वात् तदभावोऽसिद्ध इत्यतोऽभेदागमानां मुख्यार्थत्वसिद्धौ तेषां भेददृष्टिबाधकत्वं, बाधितायां भेददृष्टौ तेषां मुख्यार्थत्वमिति परस्पराश्रयप्रसङ्गान्न तेषां बाधकतेत्याशयेनाह **श्रुतयस्त्विति** । द्वितीयपक्षनिरासं मूलारूढं कर्तुमपेक्षितपदाध्याहारं दर्शयन्नेव क्वचिदित्यादि व्याचष्टे **क्वचित्काल इत्यादि** । मूले कथमित्यस्योत्तराभावेन प्रश्नार्थत्वायोगादाक्षेपार्थत्वमित्याशयेन तत्तात्पर्यमाह **नेति** । क्वचिदित्यादेरुत्सूत्रार्थप्रतिपादकत्वादभाष्यत्वमित्यतः स्याल्लोकवदित्येतत्सूत्रखण्डार्थत्वान्न तदित्याह **एतदिति** । **उपपत्तिविरुद्धत्वेनेति** । 'नान्यदन्यत्वमापन्नं' 'क्वचिद्भिन्नतये'त्यादिवाक्यद्वयसूचितोपपत्तिविरुद्धत्वेनेत्यर्थः । **श्रुतेरिति** । एकीभवन्तीत्यद्वैतश्रुतेरित्यर्थः । **अमुख्यार्थ एवेति** । स्थानैक्यमत्यैक्यरूपे इत्यर्थः । **परकीयहेतोरिति** । मुक्तेनात्यन्ताभिन्नत्वरूपस्येत्यर्थः । **जगत्कारणत्व इति** । वास्तवजगत्कारणत्व इत्यर्थः ।

स०व्र०— **एतदर्थत्वेनापीति** । प्रतीतिमुपादाय च्विप्रत्ययोपपत्तिनिराकरणपरत्वेनापीति भावः । योजनाप्रकारस्तु, **लोकवत् स्यात्** लोके हि यत् यतोऽत्यन्तभिन्नतया प्रमीयते तत् तदभिन्नतया कदाऽपि प्रमाविषयो न भवति । तस्मात् लोकविरुद्धमिति ।

विठ्ठल०— **यस्तु क्वचिदपीति** । यस्तु वैयात्यात्क्वचिदपि भेदप्रमां न मन्यते तं प्रति यद्यदभिन्नतया प्रमाविषयः तत् ततोऽत्यन्ताभिन्नतया प्रमाविषयो न यथा स्वाभिन्नतया प्रतीयमानश्चन्द्रः स्वस्मादेव भिन्न-तयाङ्गुल्यवष्टम्भेन भ्रान्तिविषयश्चन्द्र इति यावत् । न स्वप्रादेव चन्द्राद्भिन्नतया प्रमाविषय इति व्यतिरेकोदाहरणं वाच्यमित्यर्थः । अत्र व्यतिरेकोदाहरणस्यारोपितभेदत्वोक्तिस्तत्र ततोऽत्यन्तभिन्नतया प्रमितत्वरूपहेतुनिषेधस्य विशेषनिषेधरूपत्वात् तस्य 'चेतराभ्यनुज्ञानं विनानुपपत्तेस्तदर्थमिति द्रष्टव्यम् । एतदर्थत्वेनापीति यथा लोके घटः

पटाद्भिन्नतया प्रमितो न पटेनाभेदवान् तथा जीवोऽपि न ब्रह्मणो भेदवानिति योज्यमित्यर्थः । **परकीयहेतोरिति** । असर्वकर्तृजीवाभिन्नत्वरूपहेतोरित्यर्थः ।

॥ इति उक्तव्याख्याने अभ्यधिकाशङ्का, तत्परिहारकानुव्याख्यानव्याख्यानञ्च ॥

॥ इति भाष्योक्तव्याख्यानानुपपत्तिपरिहारकतया सूत्रव्याख्यानम् ॥

* * *

॥ अथ एतत्सूत्रीयान्यव्याख्यानदूषणम् ॥

॥ अथ तत्रादौ ब्रह्मपरिणामवादिनां व्याख्यानं, तद्दूषणं, तत्राभ्यधिकाशङ्कानिरसनञ्च ॥

६१ **सु०—** केचिदिदं सूत्रमन्यथा व्याचक्षते, "पूर्वं किल चेतनाचेतनात्मकस्य प्रपञ्चस्य ब्रह्मोपादानत्वेन ब्रह्मानन्यत्वमुक्तम् । तदाक्षिप्य समाधातुमिदं सूत्रम् । तथा हि 'यदि चेतनाचेतनात्मकस्य जगतो ब्रह्मानन्यत्वं स्यात्तदा चेतनो भोक्ता भोग्याश्चाचेतना विषया इत्ययं विभागो न स्यात् । कुतः । भोग्यस्यापि भोक्तृत्वापत्तेः, भोक्तुरपि भोग्यत्वापत्तेः । भवितव्यं चानेन विभागेन, प्रत्यक्षादिसिद्धत्वात्' इति चेत् । **स्याल्लोकवत्** । यथा लोके समुद्रात्मनामपि फेनतरङ्गादीनां नेतरेतरभावापत्त्या विभागभङ्गः, यथा वा महाकाशात्मनामपि घटमठाद्याकाशानां, तथा प्रकृतेऽपि स्यात्" इति ।

तदिदं दूषयति **भोक्तृत्वेति** ।

अनु०— भोक्तृत्वापत्तित इति यन्मतं तत्कुतो हरिः ।
भोक्त्रापत्तेरिति प्राह

यत् यदि भोक्त्रापत्तेरित्यत्र भोक्तृत्वापत्तेरिति व्याख्यानं सूत्रकारस्यापि(भि)मतं स्यात्, तत् तर्हि **कुतः हरिः** सूत्रकृत् **भोक्त्रापत्तेरिति** (प्र)**आह** । भोक्तृत्वापत्तेरित्येव ब्रूयात् । न चैवमब्रवीत् । ततो नायमभिप्रायः सूत्रकारस्येति ।

यद्यप्यत्र परेषामस्माकं चाध्याहारसाम्यम्, तथाऽपि भावप्रत्ययाभावः परस्याधिकः ।

परि०— केचिदिति । ब्रह्मपरिणामवादिनः । **यत्** इत्यनुवादः, **यदि** इति व्याख्या । तत्तर्हीत्यपि तथा ध्येयम् । **अध्याहारेति** । मायिमते भोक्तुर्भोग्यत्वापत्तेः भोग्यस्य च भोक्तृत्वापत्तेरिति व्याख्यातत्वात्; भोग्यस्येत्यस्य परमते, स्वमते च मोक्षे ब्रह्मत्वेत्यस्याध्याहारादिति भावः ।

गु०दी०— पूर्वं किल चेतनाचेतनात्मकस्य इत्यत्र मायावादिमते ब्रह्मचितोरैक्याङ्गीकारेण चिद्व्यतिरिक्तस्य सर्वस्यापि जडस्य मिथ्यात्वाङ्गीकारेण जडब्रह्मैक्यस्य प्रागप्यप्रस्तुतत्वात्किलेत्युक्तम् । **भावप्रत्ययाभावः परस्य** इत्यत्र सौत्रपदे भावप्रत्ययाभाव इत्यर्थः ।

वादि०— अध्याहारसाम्यमिति । भोक्तुः शारीरस्य भोग्यत्वापत्तेर्भोग्यस्य च शब्दादेर्भोक्तृत्वापत्तेस्तयोरविभागः स्यादिति परेण व्याख्यातत्वात् । अस्माभिरपि भोक्तुर्जीवस्य मोक्षे ब्रह्मत्वापत्तिश्रवणादिति व्याख्यातत्वादिति भावः ।

वं०प०— भोक्तृत्वापत्तेरिति । भोक्त्रभिन्नब्रह्मात्मकत्वाद्भोग्यस्येत्यर्थः । यद्यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तेरिति ध्येयम् । **भोग्यत्वेति** । भोग्याभिन्नब्रह्मात्मकत्वाद्भोक्तुरित्यर्थः, उक्तव्याप्तेरिति ध्येयम् । **सिद्धत्वादिति** । तस्माज्जगतो ब्रह्मानन्यत्वं नास्तीति शेषः । **इतरेतरेति** । फेनस्य तरङ्गतापत्त्या, तरङ्गस्य फेनतापत्त्येत्यर्थः । **विभागो** भेदः । **तथाऽपीति** । परमते भोग्यस्येत्यस्यावश्याध्याहार्यत्वाद्भोक्तुरित्यत्र त्वप्रत्ययस्याप्यध्याहारादध्याहारद्वयं, स्वमते तु ब्रह्मत्वस्येत्येकस्यैवाध्याहार इति भेदः ।

कं०रा०— इदं सूत्रमपीति । न विलक्षणत्वादित्यादिसूत्रमिव भोक्त्रापत्तेरिति सूत्रमप्यन्यथा व्याचक्षत इत्यर्थः । **इतरेतराभावापत्त्येति** । परस्परतादात्म्यापत्त्येत्यर्थः । **यथा वेति** । यथा वा महाकाशात्मनामपि घटपटाद्याकाशानामितरेतराभावापत्त्या न विभागभङ्गस्तथैकब्रह्मात्मकानां भोक्तृभोग्यशब्दितचेतनाचेतनानामपीतरेतरापत्त्या विभागभङ्गो नेत्यर्थः । **भावेति** । भोक्तृत्वापत्तेरिति भाववाचित्वप्रत्ययाभावः परस्याधिको दोष इत्यर्थः ।

श्रीनिधि०— ननु यथा ममत्वप्रत्ययाश्रयणं दोषः । तथा भवतामपि अध्याहारदोषः इति दोषसाम्यम् । मोक्ष इत्यस्य ततश्च न ब्रह्मण इति साध्यस्य चाध्याहारादित्यत आह **यद्यपीति** । **परेषामिति** । तेनाप्यापादकस्याध्याहार्यत्वादिति भावः ।

शे०वा०— 'भोक्तृत्वापतितः' इत्यादौ तत्सूत्रव्याख्यानत्वाभावादानर्थक्यमित्यतस्तदभावेऽप्येतत्सूत्रीयापव्याख्याननिरासार्थत्वान्न तदितिभावेन तन्निरासकतयोत्तरवाक्यं योजयितुं तदनुवदति **केचिदित्यादिना** ।

पूर्वमिति । प्रकृतिश्चेत्यादाविति शेषः । नन्वापादकानुक्तेरविभागापादनमयुक्तम् । न च भोक्त्रापत्तिरेव तदापादिकेति वाच्यम् । भोक्तृभोग्ययोरैक्यस्य परेणानुक्ततया तस्यासिद्धत्वेन तदयोगादित्यतो जगतो ब्रह्मो-पादानकत्वेन प्राप्तं ब्रह्मानन्यत्वमेव तदापादकमित्याशयेनापादकप्रदर्शनपूर्वकमविभागापादनमुपपादयति **यदीति** । तर्ह्येतावतैव जगदुपादानत्वाक्षेपसिद्धेर्भोक्त्रापत्तेरिति पूर्वपक्षांशवैयर्थ्यमित्याशङ्क्य ब्रह्मानन्यत्वेऽपि विभागो-ऽस्त्वित्यप्रयोजकताशङ्कापरिहारार्थत्वान्न तदिति भावेनोक्तरीत्या तं योजयितुमप्रयोजकत्वशङ्कामुत्थापयति **कुत इति** । न वयं जगतो ब्रह्मानन्यत्वेन साक्षादविभागमापादयामो येनाप्रयोजकत्वं शङ्क्येत किन्तु चेतनाचेतना-त्मकप्रपञ्चस्य ब्रह्मानन्यत्वेनेतरेतरभावापत्तिमापाद्य तया विभागाभावमापादयाम इति नाप्रयोजकत्व-मित्याशयेनेतरेतरभावापत्तिसमर्पकतया भोक्त्रापत्तेरित्येतद्योजयति **भोग्यस्यापीत्यादिना** । अविभागापादने इष्टापत्तिं परिहरति **भवितव्यं चेति** । उक्तविभागस्य द्वैतग्राहिप्रत्यक्षादिप्रमाणसिद्धत्वेन तदभावस्य प्रमाणबाधितत्वान्नेष्टापत्तिरित्यर्थः । न चाद्वैतबोधकश्रुत्या बाधितत्वेन द्वैतग्राहिप्रत्यक्षस्याप्रामाण्यान्न द्वैता-भावस्य प्रमाणबाधितत्वमिति वाच्यम् । श्रुतेरुपचरितार्थत्वेन सावकाशतया निरवकाशप्रत्यक्षस्यैव प्राबल्या-दित्यत्र तात्पर्यात् । सूत्रे स्याच्छब्दो न केवलम् 'अविभागः स्यादि'ति पूर्वेणान्वेति, किन्तु 'स्याल्लोकवदि'-त्युत्तरेणापीति भावेन तथैवोपादत्ते **स्यादित्यादिना** । **लोकवदिति** । सप्तम्यन्ताद्वतिरित्यभिप्रेत्य व्याख्याति **यथेति** । समुद्रशब्द उदकपरः । आदिपदेन बीचीबुद्बुदादीनां परिग्रहः । ननु फेनादीनां समुद्रकार्यत्वाद्युक्तस्तदभेदो, भोक्ता तु न ब्रह्मविकारः । 'तत्सृष्ट्वा तदेवानुप्राविशदि'ति स्रष्टुरविकृतस्यैव कार्यानुप्रवेशवचनादित्यतः कार्य-मनुप्रविष्टस्याप्यस्त्येवोपाधिनिमित्तो विभागः । अनुप्रविष्टाकाशस्य घटपटाद्युपाधिनिमित्तविभागदर्शनादित्यभि-प्रेत्योक्तशङ्कामनुगुणदृष्टान्तान्तरोक्त्या परिहरति **यथा वेति** । ननु भोक्तुर्भोग्यत्वापत्तेर्भोग्यस्य भोक्तृत्वापत्तेरिति परकीययोजनायां भोग्यत्वापत्तेरित्यादेरिव स्वपक्षे ब्रह्मत्वस्येत्यस्याध्याहारेणाध्याहारस्योभयत्र समानतयोभय-समाधेयत्वेन कथं परं प्रति तत्पर्यनुयोग इति शङ्कते **यद्यपीति** । भोक्तुर्भोग्यत्वापत्तेरिति परकीययोजनाया भोक्तुर्ब्रह्मत्वापत्तेरिति स्वकीययोजनायाश्चैकपदाध्याहारेण साम्येऽपि भोग्यस्य भोक्तृत्वापत्तेरिति परकीययोजनाया भोक्तुर्ब्रह्मत्वापत्तेरिति स्वकीययोजनायाश्च न साम्यम् । भोग्यस्येति पदाध्याहारस्य भोक्तृशब्दे भावप्रधानताया-श्चाश्रयणेनानेकाध्याहारात् । स्वमते तु ब्रह्मत्वस्येत्यध्याहारेणाल्पाध्याहारात् । न चाल्पाध्याहारेणोपपत्तावनेका-ध्याहाराश्रयणं युक्तमिति युक्त एव पर्यनुयोग इत्याह **तथाऽपीति** ।

स०व्र०— अध्याहारसाम्यमिति । स्वमतेऽपि 'भोक्त्रापत्तेः' इत्यत्र भोक्तुर्जीवस्य ब्रह्मत्वस्यापत्तेः श्रवणात् तयोरविभाग इति व्याख्यातत्वात् ब्रह्मत्वस्येत्यध्याहारादिति भावः । **तथापीति** । परमते भोग्यस्येत्यस्यावश्याध्याहार्यत्वात् भोक्तुरित्यत्र त्वप्रत्ययस्यापि अध्याहारात् अध्याहारद्वयम् । स्वमते तु ब्रह्मत्वस्येत्येकस्यैवाध्याहार इति भावः ।

विठ्ठल०— केचिदिति । परिणामवादिनो भास्करादय इत्यर्थः । **तदनन्यत्वमुक्तमिति** । प्रकृत्यधि-करणादौ पूर्वाधिकरणे चोक्तमित्यर्थः । **'यदि'**त्यनुवादः **'यदी'**ति व्याख्यानम् । हीत्यवध्येयम् । **अध्याहार-**

साम्यमिति । भोक्तुर्भोग्यत्वापत्तेर्भोग्यस्य च भोक्तृत्वापत्तेरविभागः स्यादिति परेणाव्याख्यातत्वात् । अस्माभिरपि भोक्तुर्जीवस्य मोक्षे ब्रह्मत्वापत्तिश्रवणादिति व्याख्यानादिति भावः ।

चषक— भावप्रत्ययाभाव इति । प्रकृतिजन्यबोधे प्रकारीभूय भासमानो धर्मो भावः । तदवबोधकप्रत्ययाभाव इत्यर्थः ।

॥ इति ब्रह्मपरिणामवादिनां व्याख्यानं, तद्दूषणं, तत्राभ्यधिकाशङ्कानिरसनञ्च ॥

* * *

॥ अथ तत्र रामानुजीयव्याख्यानं, तद्दूषणञ्च ॥

६२ सु०— ये तु व्याचक्षते 'चिदचिद्वस्तुशरीरत्वे ब्रह्मणो जीववत्सुखदुःखादिभोक्तृत्वापत्तेर्जीवब्रह्मस्वभावविभागो न स्यादिति चेन्न । यथा कान्तारे निपतितस्य(ापि) नृपस्य न दंशमशकाद्युपद्रवस्तथाऽत्रापि स्यादि'ति । तेषामप्ययं शब्ददोषः समानः ।

परि०— ये त्विति । रामानुजीया इत्यर्थः ।

यादु०— ये त्विति । रामानुजीया इत्यर्थः ।

वं०प०— उपद्रव इति । राज्ञ ऐश्वर्येण भृत्यादिभिस्तदुपद्रवपरिहारात् । एवं ब्रह्मणोऽप्यैश्वर्येण सुखाद्यभोक्तृत्वं युक्तमित्यर्थः । तत्र तत्र 'मुक्तोपसृप्यव्यपदेशादि'त्यादौ शाब्दी गौणता भावप्रधानाध्याहारादिरूपा ।

कं०रा०— यथेति । यथा कान्तारे विद्यमानस्यापि नृपस्य व्यजनाद्यवधूतदेहस्य दंशमशकाद्युपद्रवस्तथेश्वरस्य चिदचिद्वस्तुशरीरेषु वर्तमानस्यापि स्वसामर्थ्यं चापरस्य दुःखादिभोग इत्यर्थः । **अयमिति** । भावप्रत्ययाभावरूपशब्ददोष इत्यर्थः ।

शे०वा०— रामानुजीयसूत्रव्याख्यानदूषणपरतयाऽपि भाष्यं योजयितुं तदनुवदति **ये त्विति** । **अयं शब्ददोष इति** । भोक्तृशब्दे भावप्रधानत्वाश्रयणत्वरूप इत्यर्थः । अस्मद्रीत्या भोक्तुर्जीवस्य ब्रह्मत्वापत्तेरित्यल्पाध्याहारेणोपपत्तौ ब्रह्मणश्चिदचिद्वस्तुशरीरित्वादित्यापादकाध्याहारस्यापाद्येऽपि दुःखादिपदाध्याहारस्य, भोक्तृशब्दे भावप्रधानतायाश्चाश्रयणमनुचितमिति भावः ।

विट्ठल०— ये त्विति । रामानुजा इत्यर्थः ।

* * *

॥ अथ तत्र च तद्दूषणे अभ्यधिका शङ्का, तन्निरसनञ्च ॥

६३ **सु०—** ननु भावप्रधाना निर्देशास्तत्र तत्र बहुलमुपलभ्यन्ते, तत्कथमयं दोषोऽभिधीयते ।

अयमभिसन्धिर्भाष्यकारस्य । प्रतिपाद्ये व्यवस्थिते तद्बलाच्छाब्दी गौणता कथञ्चिदनुसर्तव्या । न चास्य सूत्रस्येदं प्रतिपाद्यं व्यवस्थितम्; जगदुपादानत्वस्य प्रागनुक्तत्वेन अनुक्तोपालम्भप्रसङ्गात्, जगच्छरीरत्वस्यान्तर्याम्यधिकरणे प्रसक्तत्वेऽपि सम्भोगप्राप्तिरित्यनेनैव परिहृतत्वात् । तत्र जीवशरीरगतत्वेन प्रस(क्तं)क्तभोक्तृत्वमपास्तम्, अत्र तु जगच्छरीरत्वेनेति चेन्न, पूर्वोत्तरपक्षयोर्न्यायाविशेषे सूत्रारम्भानुपपत्तेः । अतो निर्निमित्तः शाब्ददोषोऽपि नानुसरणार्ह इति ।

यद्वैतदर्थप्रतिपादनाय कथं चेत्याद्युत्तरवाक्यमत्रापि संयोज्य व्याख्येयमित्युक्त एव सूत्रार्थ इति ॥

परि०— **तत्र तत्रेति** । 'मुक्तोपसृप्यव्यपदेशात्', 'अपीतौ तद्वत्प्रसङ्गादि'त्यादावित्यर्थः । **अनुक्तत्वेनेति** । प्रकृत्यधिकरणादेरन्यार्थत्ववर्णनादिति भावः । **अनुक्तोपालम्भप्रसङ्गादिति** । भोक्त्रापत्तेरित्यादि वदतः तत्पूर्वपक्षिण इति योज्यम् । 'ये त्वि'त्युक्तमतान्तरेऽपि दोषमाह **जगच्छरीरत्वस्येति** । **एतदर्थप्रतिपादनायेति** । अनुक्तोपालम्भप्रसङ्गोपपादनायेत्यर्थः ।

यादु०— **तत्र तत्रेति** । मुक्तोपसृप्यव्यपदेशादित्याद्यस्मच्छास्त्रे द्व्येकयोरित्यादिपरशास्त्रे, चेत्यर्थः । रामानुजं प्रत्याह **जगच्छरीरत्वस्येति** । **यद्वैतदर्थेति** । मायावादिनोक्तस्यैतदधिकरणप्रतिपाद्यस्याव्यवस्थितत्वप्रतिपादनायेत्यर्थः ।

वं०प०— **प्रसक्तत्वेऽपीति** । 'यस्य पृथिवी शरीरं', 'यस्यात्मा शरीरमि'त्यादिना पृथिव्याद्यचेतनचेतनात्मकजगच्छरीरस्योक्तत्वादित्यर्थः । जगच्छरीरत्वेन प्रसक्तं भोक्तृत्वमपास्यत इत्यर्थः । **न्यायविशेष इति** । उभयोरपि शरीरस्थत्वं पूर्वपक्षन्यायः । ऐश्वर्येण परिहारः सिद्धान्तन्यायः । **एतदर्थेति** । न चास्य सूत्रस्येदं प्रतिपाद्यं व्यवस्थितमित्युक्त-'सूत्रप्रतिपाद्यस्य प्रमेयस्याव्यवस्थितत्वरूप'-अर्थप्रतिपादनायेत्यर्थः । **व्याख्येयमिति** । तथा च जगतोऽविकारत्वे उक्तन्यायेन साधिते सति, कथं च तदनन्यता जगत एतत्सूत्रप्रतिपाद्या स्यात् । तथा च प्रतिपाद्यस्याव्यवस्थितत्वाद्भावप्रधानतादिरूपा शाब्दी गौणता नानुसरणीयेत्येतावानर्थः इदानीं मूलोपर्येवागत इति ध्येयम् ।

कं०रा०—भावप्रधाना इति । द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यादिषु भावप्रधाना निर्देशा उपलभ्यन्ते । तथा च तद्वदत्रापि भोक्तृविनिर्देशस्य भावप्रधानत्वसम्भवात् कथं भावप्रत्ययाभावरूपदोषोऽभिधीयत इत्यर्थः । प्रतिपाद्यव्यवस्थित इति द्व्येकयोरिति निर्देशस्य धर्मिपरत्वे द्वयोरेकस्य च बहुत्वेन द्व्येकेष्वतिनिर्देशापत्त्या द्वित्वादिकमेव द्व्यादिशब्दप्रतिपाद्यं व्यवस्थितं बहुत्वाश्रयरूपधर्मिणः प्रातिपदिकलभ्यस्य वचनार्थत्वायोगेन बहुषु बहुवचनमित्यपि बहुत्वमेव बहुशब्दप्रतिपाद्यं व्यवस्थितमिति द्व्यादिशब्दानां भावे लाक्षणिकता कथञ्चिदाश्रीयते न च भोक्त्रापत्तेरिति सूत्रस्याद्वैत्याद्युक्तं प्रमेयं प्रतिपाद्यमिति व्यवस्थितं तद्व्यवस्थापकस्याभावाद्येन भोक्तृशब्दस्य भावे लाक्षणिकताश्रीयेतेति भावः । प्रत्युताद्वैत्युक्तं प्रमेये तत्सूत्रप्रतिपाद्यं न भवतीत्येव निश्चितमित्याह **जगदुपादानत्वस्येति** । ब्रह्मणो जगदुपादानत्वस्य प्रागनुक्तत्वेन प्रपञ्चस्य ब्रह्मानन्यत्वानुक्तेर्यदि चेतनाचेतनात्मकस्य जगतो ब्रह्मानन्यत्वं स्यात् तदा चेतनो भोक्ता भोग्याश्चाचेतनविषया इत्ययं विभागो न स्यात् । कुतः भोग्यस्यापि भोक्तृत्वापत्तेर्भोक्तुरपि भोग्यत्वापत्तेरित्याक्षेपस्यानुक्तोपालम्भनप्रसङ्गेनायोगात् तत्समाधानात्मकं प्रमेयमेतत्सूत्रप्रतिपाद्यं नैवेति निश्चितमित्यर्थः । नन्वन्तर्याम्यधिकरणे यस्य पृथिवी शरीरं यस्याप शरीरमित्यादिनोक्तस्य जगच्छरीरत्वस्यान्तर्यामित्वाश्रयब्रह्मनिष्ठताया प्राप्ततया तत्प्रयुक्तसुखदुःखादिभोक्तृत्वापत्तिशङ्कयाः सम्भवेन समाधानस्य कर्तव्यत्वाद्रामानुजोक्तयुक्तशङ्कासमाधानात्मकं प्रमेयमेतत्सूत्रप्रतिपाद्यं व्यवस्थितमिति सौत्रभोक्तृशब्दस्य भावलाक्षणिकत्वमाश्रयणीयमित्यत आह **जगच्छरीरत्वस्येति** । ब्रह्मणो जगच्छरीरत्वस्यान्तर्याम्यधिकरणे प्राप्तत्वेऽपि तत्प्रयुक्तसुखदुःखादिभोक्तृत्वापत्तिशङ्कयाः सम्भोगप्राप्तिरिति चेन्न वैशेष्यादित्यनेनैव परिहृततया तत्समाधानस्येदानीमकर्तव्यत्वेन तदात्मकप्रमेयस्यैतत्सूत्रप्रतिपाद्यत्वाभावनिश्चयात्सौत्रभोक्तृशब्दस्य भावप्रधानत्वाश्रयणमयुक्तमिति भावः । **तत्रेति** । 'सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' इत्यत्र ब्रह्मणो जीवशरीरान्तर्वर्तित्वेन प्रसक्तं दुःखादिकभोक्तृत्वमपास्तम् । 'भोक्त्रापत्तेरि'त्यत्र तु जगद्रूपशरीरस्वामित्वेन प्रसक्तं दुःखादिभोक्तृत्वमपास्यते तथा चात्रत्यशङ्कायास्तत्रानिरस्तत्वेन तत्समानार्थमारम्भणीयोऽत्र सूत्रे भोक्तृशब्दस्य भावप्रधानाश्रयणं युक्तमिति भावः । **पूर्वोक्तरेति** । त्वया तत्र जीवस्येव परस्यापि ब्रह्मण शरीरान्तर्वर्तित्वमभ्युपगतं चेत् तद्वदेव शरीरसम्बन्धप्रयुक्तसुखदुःखोपभोगप्राप्तिरिति चेन्न हेतुवैशेष्यात् । न हि शरीरान्तर्वर्तित्वमेव सुखदुःखोपभोगहेतुः अपि तु पुण्यपापरूपकर्मपरवशत्वं तत्त्वपहतपाप्मनः परमात्मनो न सम्भवतीत्युक्ततयाऽत्र च न हि जीवस्य शरीरं धातुसाम्यवैषम्यनिमित्तसुखदुःखभोक्तृत्वं सशरीरत्वकृतं अपि तु पुण्यपापरूपकर्मकृतमपहतपाप्मनस्तु परमात्मनः स्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरत्वेऽपि कर्मसम्बन्धगन्धो नास्तीत्युक्ततया सशरीरत्वरूपपूर्वपक्षन्यायस्य कर्मबन्धाभावरूपसिद्धान्तन्यायस्य चोभयत्राविशेषेण पुनः शङ्कानुदयेन तत्समाधानार्थमेतत्सूत्रारम्भस्यानुपपत्तेरित्यर्थः । पूर्वं परोक्तप्रमेयस्यैतत्सूत्रप्रतिपाद्यत्वं नेत्येव निश्चितम् । ब्रह्मणो जगदुपादानत्वस्य प्रागनुक्तत्वेन जगतो ब्रह्मानन्यत्वादित्युक्तेर्यदि चेतनाचेतनात्मकस्य जगतो ब्रह्मानन्यत्वं स्यात् तदा चेतनो भोक्ता भोग्यश्चाचेतनाविषयतया इत्ययं विभागो न स्यात् कुतः भोग्यस्यापि भोक्तृत्वापत्तेरित्याक्षेपस्यैवानुक्तोपालम्भप्रसङ्गेनायोगादतः सौत्रभोक्तृशब्दस्य भावप्रधानत्वाश्रयणमयुक्तमित्ययमर्थो अनुव्याख्यानाद्बहिरेव भाष्य-

काराभिप्रेतत्वेन वर्णितः । इदानीं त्वेतदर्थप्रतिपादनाय कथं च तदनन्यता जगतस्त्वविकारत्वे उक्तन्यायेन साधित इत्युत्तराधिकरणस्य अनुव्याख्यानवाक्यमत्रापि संयोज्य जगतः अविकारत्वे ब्रह्मविकारत्वादन्यस्मिन्नर्थेऽपकृतिश्चेत्यादिसूत्रप्रतिपाद्यतयोक्तन्यायेन साधिते सति जगतो ब्रह्मोपादानकत्वानुक्तेः कथं तदनन्यतोक्ता स्यान्न कथञ्चित् तथा च यदि चेतनाचेतनात्मकस्य जगतो ब्रह्मानन्यत्वमित्याद्याक्षेपस्यैवानुक्तोपालम्भप्रसङ्गेनानुत्थितेः तत्समाधानात्मकपरोक्तप्रमेयस्यैव तत्सूत्रप्रतिपाद्यत्वाभावनिश्चयात् सौत्रभोक्तृशब्दस्य भावप्रधानत्वाश्रयणमयुक्तमित्येवं व्याख्येयमित्याह **यद्वेति** ।

श्रीनिधि०— तत्र तत्र बहुलमिति । 'मुक्तोपसृप्यव्यपदेशादि'त्यादौ द्व्येकयोर्द्विवचनैकवचन इत्यादि परग्रन्थेषु च । **साङ्ख्यमतेनेति** । साङ्ख्यैकदेशी भोक्तृत्वं भोग्यत्वं च चेतनस्यैव मन्यत इति भावः ।

शे०वा०— तत्र तत्रेति । 'मुक्तोपसृप्यव्यपदेशात्', 'द्व्येकयोर्द्विवचनैकवचने' इत्यादावित्यर्थः । **प्रागनुक्तत्वेनेति** । प्रकृत्यधिकरणस्य ब्रह्मणो जगदुपादानपरत्वस्य तत्रैव निरस्तत्वादिति भावः । ननु मायावादिमतेऽनुक्तोपालम्भप्रसक्तावपि रामानुजपक्षेऽन्तर्याम्यधिकरणे चिदचिद्वस्तुशरीरित्वस्य प्रसक्तत्वेन तदाक्षेपकत्वे नानुक्तोपलम्भप्रसङ्ग इत्यत आह **जगच्छरीरत्वस्येति** । **जीवशरीरगतत्वेन प्रसक्तमिति** । शरीरान्तरावस्थानमात्रप्रसक्तभोक्तृत्वाशङ्कायास्तत्र निरासः, इह तु शरीरस्वामित्वप्रयुक्तायास्तस्या, इति भेद इत्यर्थः । **न्यायाविशेष इति** । त्वया तत्र, 'न हि शरीरान्तर्वर्तित्वमेव सुखदुःखहेतुरपि तु पुण्यपापरूपकर्मवशत्वम्, तत्त्वपहतपाप्मनः परमात्मनो न सम्भवति' इत्युक्तत्वात् । अत्र च, न हि जीवस्य शरीरधातुवैषम्यनिमित्तसुखदुःखभोक्तृत्वम् शरीरत्वकृतम् अपि तु पुण्यपापरूपकर्मकृतम् । अपहतपाप्मनश्च परमात्मनः स्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरित्वेऽपि कर्मबन्धगन्धो नास्तीत्युक्तत्वान्न्यायाविशेष इति भावः । **एतदर्थप्रतिपादनायेति** । जगदुपादानताया एतदधिकरणप्रतिपाद्यत्वाव्यवस्थितिप्रतिपादनायेत्यर्थः । **इत्युक्त एवेति** । अनेनापव्याख्याननिराकरणं स्वव्याख्यानदृढीकरणार्थत्वान्नासङ्गतमिति स्मारयति ।

स०व्र०— तत्र तत्रेति । 'मुक्तोपसृप्यव्यपदेशात्' इत्यादावित्यर्थः । **यद्वेति** । जगतः, तदनन्यता ब्रह्मोपादानता, कथं, न कथमपीत्यर्थः । कुतः । 'अविकारित्वे जगतः' इति अत्रापि सम्बध्यते । अविकारित्वे ब्रह्मोपादानत्वाभावे, उक्तन्यायेन 'न च प्रकृतिशब्देने'त्यादिपूर्वोक्तन्यायेन, साधिते इत्यर्थः । तस्माज्जगदुपादानत्वस्य प्रागनुक्तत्वेन तदाक्षेपसमाधानमनुपपन्नमिति । एवं जगतः तदनन्यता तच्छरीरिता कथम् । न कथमपि । कुतः । 'अविकारित्वे ब्रह्मणः' इति शेषः । भोक्तृत्वादिविकाराभावे सम्भोगप्राप्तिरित्यादिपूर्वोक्तन्यायेन साधिते । तस्मात् तदाक्षेपसमाधानपरत्वे पुनरुक्तिः स्यादिति योज्यमिति भावः ।

विठ्ठल०— तत्र तत्रेति । मुक्तोऽप्यसृप्यव्यपदेशादित्यादावित्यर्थः । न वा केवलं व्यवस्थितत्वादिति भावः । प्रत्युताद्वैत्युक्तं प्रमेयमेतत्सूत्रप्रतिपाद्यं नेति निश्चितमित्याह **जगदुपादानत्वस्येति** । **अनुक्तत्वेनेति** ।

प्रकृत्यधिकरणादेरन्यार्थवर्णनादिति भावः । अनुक्तोपालम्भेति । त्वत्पूर्वपक्षिणेति योज्यम् । रामानुजं प्रत्याह जगच्छरीरत्वस्येति । यद्वैतवर्थप्रतिपादनायेति । मायावादिरामानुजोक्तार्थस्याव्यवस्थितत्वप्रतिपादनाय कथं च तदनन्यता जगतस्त्वविकारित्व उक्तान्यायेन साधिते इत्युक्तेराधिकरणवाक्यमत्राधिकरणेऽपि सम्बन्ध्य व्याख्येय-मित्यर्थः । व्याख्यानप्रकारस्तु जगत अविकारित्वे विकारित्वादन्यस्मिन्नर्थे न च प्रकृतिशब्देनेत्युक्तन्यायेन साधिते सति जगतो ब्रह्मोपादानकत्वानुपपत्तेः कथं तदन्यता प्रकृत्यधिकरणे उक्ता स्यात् । न कथञ्चित् । तथा च जगदुपादानत्वस्य प्रागनुक्तत्वेन सूत्रगताक्षेपस्यानुक्तोपालम्भप्रसङ्गादिति । अथवा रामानुजोक्तार्थस्य एतदधिकरणप्रतिपाद्यत्वे तदनन्यतासम्भोगप्राप्तिरित्यत्र प्रतिपाद्यादनन्यतास्य कथं परिहर्तव्या न कथञ्चित् । तथा च न सूत्रारम्भो युक्त इति ।

॥ इति तद्दूषणे अन्यथिका सङ्गत, तन्निरसनञ्च ॥

॥ इति रामानुजीयव्याख्यानं, तद्दूषणञ्च ॥

॥ इति एतत्सूत्रीयान्यव्याख्यानदूषणम् ॥

॥ इति ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य अल्पवाक्ययुतयुक्तिविरोधस्य 'श्रुतिसिद्धत्वेन प्रबल'या युक्त्या परिहारः ॥

॥ इति भोक्त्रधिकरणम् ॥

॥ २-१-५ ॥

* * *

॥ अथ आरम्भणाधिकरणम् ॥

॥ २-१-६ ॥

ब्र०सू०— ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥

॥ अथ ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य बाहुल्यलक्षणबलवद्युक्तिविरोधस्य परिहारः ॥

॥ अथ तत्रादौ तदनन्यत्वमित्यादिसूत्रव्याख्यानम् ॥

॥ अथ तत्राप्यादौ एतत्सूत्रनिराक्रियमाणापव्याख्यानद्वयानुवादः ॥

६४ सु०— प्राक् प्रमाणमूलत्वतत्संवादित्वाभ्यां प्रबलया युक्त्या उक्ते(क्ता)र्थे विरोधो निर(स्तः)ाकृतः । बाहुल्यलक्षणबलवद्युक्तिविरोधपरिहाराय इदमधिकरणमारभ्यते ।

तदिदं ब्रह्मपरिणामवादी व्याचष्टे "अनन्तराधिकरणे भोग्यवर्गस्य परिणामतः सिद्धप्रातिस्विकरूपभेदानपह्नवेन लोकसिद्ध(द्धं)कारणाभेदमङ्गीकृत्य साङ्ख्यसिद्धान्तेन शास्त्रतो भोक्तृवर्गस्य स्वाभाविकरूपब्रह्माविभागे भोग्यस्यापि ब्रह्मैक्यवत् भोक्तृत्वापत्तिमाशङ्क्य अनैकान्तिकत्वेन निरासो (वि)ऽभिहितः । सम्प्रति वैशेषिकादिमतेन स्वरूपकार्यव्यपदेशादिभेदेन कार्यस्य कारणात्म(क)त्वासिद्ध्या प्रपञ्चस्य ब्रह्माद्वैतम् आक्षिप्य समाधीयते ॥ तथाहि । तदनन्यत्वं तेन ब्रह्मणा अनन्यत्वं, कार्यस्य । कुतः ? **आरम्भणशब्दादिभ्यः** 'यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात् । वाचा **आरम्भणं** विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति **आदिशब्दात्** । **'आदि'**ग्रहणात् 'ऐतदात्म्यमिदं सर्वम्', 'यदयमात्मा', 'सर्वं खल्विदं ब्रह्म' इत्यादितादात्म्यावेदकश्रुतिपरिग्रहः" इति ।

विवर्तवादी तु व्याख्याति, "अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागम्, 'स्याल्लोकवत्' इति परिहारोऽभिहितः । न त्वयं विभागः पारमार्थिकोऽस्ति । यस्मात् तदनन्यत्वं कारणाद् ब्रह्मणः कार्यस्याकाशादेः परमार्थतोऽनन्यत्वं व्यतिरेकेण अभावः, अवगम्यते । कुतः ? **आरम्भणशब्दादिभ्यः**" इति ।

परि०— प्रमाणमूलेति । प्रमाणसिद्धेति भोक्त्रधिकरणार्थः तत्संवादित्वेति तु 'असदिति चेदि'त्यधिकरणार्थः । 'स्मृतियुक्तिश्रुतिगुणयुक्तयो बहुयुक्तयः' इत्यनुव्याख्यानानुरोधेनाह **बाहुल्यलक्षणेति** । **अनन्तरेति** । अव्यवहितपूर्वाधिकरण इत्यर्थः । भोग्यवर्गस्येत्यस्य लोकसिद्धकारणाभेदमङ्गीकृत्येत्यन्वयः । मृद्धटादेरभेदस्य लोकसिद्धत्वाल्लोकसिद्धेत्युक्तम् । साङ्ख्यसिद्धान्तेनेत्यस्याशङ्क्येत्यन्वयः । **शास्त्रतः** तत्त्वमसीत्यादिशास्त्रेण । **ब्रह्मैक्यवदिति** मतुप् न वतिः । भोग्यस्य कारणीभूतब्रह्माभेदे तदभिन्नभोक्तृत्वापत्तेरावश्यकत्वादिति भावः । **अनैकान्तिकत्वेनेति** । फेनतरङ्गयोरेककारणसमुद्राभेदेऽपि परस्परसाङ्कर्यापत्तेरभावादिति भावः । **वैशेषिकादिमतेनेति** । दूषणसौकर्यायानूदितं **स्वरूपेति** । कार्यकारणस्वरूपभेदेन, शीतनिवारणाद्यर्थक्रियारूपकार्यभेदेन, एते तन्तवोऽयं पट इत्यादिव्यवहारभेदेन, परिमाणादिभेदेन चेत्यर्थः । **इत्यादिशब्दादिति** । वाचारम्भणवाक्ये विकारो घटादिरारम्भणमुपादानमित्यभेदोक्तेरिति भावः । व्याख्यातीत्यनन्तरं अनन्तराधिकरण इत्यनुषज्यते । **स्याल्लोकवदिति** । फेनतरङ्गयोरिवेत्यर्थः ।

गु०दी०— अनन्तराधिकरण इति वाक्यस्य प्रातिस्विकरूपभेदानपह्नवेन लोकसिद्धं कारणाद्भेदमङ्गीकृत्य भोग्यवर्गस्य **ब्रह्मैक्यवत्** कारणीभूतब्रह्मैक्यवत् **शास्त्रतः** तत्त्वमस्यादिशास्त्रतः भोक्तृवर्गस्य स्वाभाविकरूपब्रह्माविभागे सिद्धान्तिना कथ्यमाने साङ्ख्यमतेन भोग्यस्यापि भोक्तृत्वापत्तिमाशङ्क्य भोग्यस्य भोक्तुश्च ब्रह्माविभागे सति भोक्तृभोग्ययोरन्योन्यधर्मसङ्कलनमपि स्यादित्याशङ्क्येत्यर्थः । **अनैकान्तत्वेन** इत्यत्र समुद्रेणैकीभूतयोः फेनतरङ्गयोरन्योन्यधर्मसङ्कलनादर्शनाद्व्यभिचारेणेत्यर्थः । **स्वरूपकार्यव्यपदेशादिभेदेन** इत्यत्र स्वरूपभेदः चिदचित्त्वम् । कार्यभेदो दृक्त्वं दृश्यत्वं व्यपदेशभेदो ब्रह्मत्वादिव्यपदेशः घटत्वादिव्यपदेशश्च ।

यादु०— भोग्यवर्गस्येत्यादि । अत्र भोग्यवर्गस्य कारणाभेदमङ्गीकृत्य इत्येतत् भोग्यस्यापि भोक्तृत्वापत्तिमाशङ्क्येत्यस्योपपादकम् । भोग्यस्य ब्रह्मरूपकारणाभिन्नत्वेऽपि भोक्तृत्वापत्तिः कुत इत्यत उक्तं **ब्रह्मैक्यवदिति** । ब्रह्मैक्यवान् यो भोक्ता तत्त्वापत्तिमित्यर्थः । तथा च भोक्तुर्ब्रह्माभिन्नत्वात् तदभिन्नस्य भोग्यस्यापि भोक्तृत्वापत्तिरनिवार्येति भावः । ननु भोक्तुरुपाध्यवच्छिन्नस्य ब्रह्मैक्यवत्त्वमेव कथमित्यत उक्तं **भोक्तृवर्गस्य यत्स्वाभाविकं रूपं तस्य ब्रह्माविभाग इति** । अत्र किं प्रमाणमित्याकाङ्क्षायामुक्तम् **शास्त्रत इति** । तत्त्वमसीत्यादिशास्त्रत इत्यर्थः । ब्रह्मपरिणामवादिमते कार्यस्य कारणाभेदेऽपि कारणस्य कार्याद्भेद इति भेदाभेदयोर्व्यवस्थितत्वेन भोक्तृभोग्ययोः ब्रह्मणा अभेदेऽपि ब्रह्मणस्तद्भेदेन भोग्यस्य ब्रह्माभेदेऽपि भोक्त्रभिन्नब्रह्माभेदस्य भोग्ये अभावेन भोक्तृत्वापादनानुपपत्तिरित्यत उक्तं **साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्येति** । **साङ्ख्येन** च कार्यकारणयोः परस्परमत्यन्ताभेदाभ्युपगमात् तन्मतेनोक्तमापादनमुपपन्नमिति भावः । अत्र 'भोग्यवर्गस्य साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्य' इत्येतावन्मात्रमुक्तरीत्या भोग्यस्य भोक्तृत्वापत्त्युप-

पादकं, 'परिमाणतः सिद्धो यः प्रातिस्विकस्वरूपभेदस्तदनपह्नवेन लोके फेनतरङ्गादौ सिद्धं कारणाभेदं प्रकृतेऽपि साङ्ख्यसिद्धान्तेनाङ्गीकृत्ये'त्येतत्सर्वमनैकान्तिकत्वेन निरासो विहित इत्यस्योपपादकम् । समुद्ररूपैककारणाभिन्नानामपि फेनतरङ्गादीनां परस्परं भेदस्य लोके सिद्धत्वात् प्रकृतेऽपि ब्रह्मरूपैककारणाभिन्नानामपि भोक्तृभोग्यादीनां परस्परं भेदोपपत्तिरित्युपपादनस्य तेन लाभात् । नन्वेकेन कारणेनात्यन्ताभिन्नानां कार्याणां कथं परस्परं भेदः सम्भवति येन व्यभिचारचोदना सङ्गता स्यादिति, चेत् । सत्यम् । तथात्वेऽपि साङ्ख्यैः कार्याणां परस्परं भेदोऽपि स्वीकृतः । यद्वक्ष्यति । 'परस्परविभेदश्च कार्याणामाल्यं भवेदि'ति । अतः 'प्रातिस्विकरूपभेदानपह्नवेन कारणाभेदं साङ्ख्यसिद्धान्तेनाङ्गीकृत्ये'त्येतद्व्यभिचारोपपादकमिति ज्ञातव्यम् । नन्वचेतनस्य कथं चेतनानन्यत्वमित्यत आह **व्यतिरेकेणाभाव इति** ।

वं०प०— शाश्वत इति । एकीभवन्तीति शाश्वादित्यर्थः । ननु यद्यदभिन्नमित्यादिव्याप्तिश्च न सम्भवति । कार्यस्य कारणाभेदेऽपि कारणस्य कार्याद्भेदाद्भोक्तृब्रह्माभेदेऽपि ब्रह्मणो भोक्त्रभिन्नत्वाभावाद्भोक्त्रभिन्नब्रह्माभिन्नत्वाद्भोग्यस्येति न वक्तुं शक्यतेऽत उक्तं **सिद्धेत्यादि** । कारणस्य कार्येणाभेदम् ।

कं०रा०— प्रागिति । पूर्व-'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इत्यत्र परेऽव्यये सर्व एकीभवन्तीत्यादि श्रुतिसिद्धत्वेन प्रबल्या ब्रह्म न जगत्कारणं असर्वकारणेन मुक्तेनात्यन्तभिन्नत्वादिति युक्त्या विष्णोर्जगज्जन्मादिकारणत्वे विरोधो निराकृतः । 'असदिति चेन्न प्रतिषेधमात्रत्वादि'त्यत्र तु 'असदेवेदमग्र आसीदि'त्यादि श्रुतिसंवादित्वेन प्रबल्या महाप्रलयवर्ती कार्यप्रागभावो महदादिकार्यकारणं भवितुमर्हति । अन्यत्रानुपक्षीणत्वे सति नियमेन तत्पूर्वभावित्वादित्यादियुक्त्योक्तेष्वर्थे विरोधो निराकृतः । इदानीं तु जन्मादिसूत्राभिप्रेते विष्णोरेव स्वातन्त्र्ये बाहुल्यलक्षणप्राबल्योपेताभिः महदादिसृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षासृष्टित्वात् घटसृष्टिवत् । एवं महदादिकं कर्तृव्यतिरिक्तस्वतन्त्रकारणायत्तोत्पत्तिकं कार्यत्वात् घटवत् प्रकृत्यादिकं स्वतन्त्रं करणत्वात् मृदादिवदित्यादियुक्तिभिर्विरोधं परिहर्तुमिदमधिकरणमारभ्यत इत्यर्थः । यद्वा प्रयोगभेदेन बाहुल्यविवक्षायामतिप्रसङ्गात् महदादिसृष्टिः कर्त्रनधीनसत्ताकाधिष्ठानसापेक्षा तथा तदनधीनशक्तिकाधिष्ठानसापेक्षा तथा उक्तरूपप्रकरणसापेक्षा सृष्टित्वात् एवं महदादिस्थितिः कर्त्रनधीनसत्ताकाधिष्ठानसापेक्षास्थितित्वादित्यादिरूपाभिः प्रमेयभेदेन बाहुल्योपेताभिर्युक्तिभिर्विरोधं परिहर्तुमिदमधिकरणमारभ्यत इत्यर्थः । महदादिसृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षासृष्टित्वादित्यादेरागामिसुधाग्रन्थस्योक्तयुक्तिष्वेव तात्पर्यं द्रष्टव्यम् । **अनेकान्तत्वेनेति** । प्रपञ्चब्रह्माभेदस्य भेदसहितत्वेनेत्यर्थः । **स्वरूपेति** । उपादानोपादेययोः स्वरूपभेदेन कार्यभेदेन व्यपदेशभेदेन चेत्यर्थः ।

शे०वा०— ननु अनारम्भणीयमेवेदमधिकरणम्, 'न विलक्षणत्वात्' इत्यनेन वेदस्य सकलयुक्तिविरोधानां परिहृतत्वात् । न च प्रबलयुक्तिविरोधपरिहारार्थमेतदिति वाच्यम्; युक्तेः प्रबलत्वस्य प्रत्यक्षादिप्रमाणावधृतव्याप्तित्वरूपत्वे अभिमान्यधिकरणेन, श्रुतिरूपप्रमाणसंवादित्वरूपत्वे च असदधिकरणेन, श्रुतिरूप-

प्रमाणसिद्धत्वरूपत्वे च भोक्त्रापत्तेरित्यनेन गतार्थत्वापातात्; इत्यतः न उक्तप्रकारत्रयेण युक्तेः प्राबल्यम् अत्राभिमतम्, किन्नाम बाहुल्येनैव, इति न पूर्वेण गतार्थता; इत्याशयवान् पूर्वोत्तराधिकरणीयविलक्षणोपाधीनाह **'प्राक्' इत्यादिना** । अत्र **प्रमाणमूलत्वम** प्रत्यक्षावधृतव्याप्तिकत्वम्, श्रुतिसिद्धत्वं च अभिमतम् । **तत्संवादित्वं** च श्रुतिसंवादित्वम्; इत्यवधेयम् ।

'तदनन्यत्वम्' इत्येतत्सूत्रव्याख्यानत्वाभावात् 'कथं च' इत्युत्तरभाष्यानर्थक्यम् इत्याशङ्क्य, तदभावेऽपि एतत्सूत्रीयापव्याख्याननिराकरणार्थत्वात् न तत्; इति भावेन अपव्याख्याननिराकरणपरतया उत्तरं भाष्यं योजयितुं तदनुवदति **'तदिदम्'** इत्यादिना । **अनन्तराधिकरण इति** । अत्र अनन्तराधिकरणे भोग्यवर्गस्य भोक्तृत्वापत्तिमाशङ्क्य अनैकान्तिकत्वेन निरासोऽभिहितः इति सम्बन्धः ॥ ननु भोग्यवर्गस्य भोक्तृत्वापत्तिशङ्कायां नावकाशः, निर्बीजत्वात्; इत्यतो भोग्यवर्गस्य कारणीभूतब्रह्माभेद एव तत्र बीजम् इत्याशयेनोक्तम् **भोग्यवर्गस्य कारणभेदमङ्गीकृत्येति** ॥ ननु भोग्यवर्गस्य ब्रह्मरूपकारणाभिन्नत्वेन ब्रह्मत्वापत्तिशङ्कैव स्यात्, भोक्तृत्वापत्तिशङ्का तु कथम् ? इत्यत उक्तम् **ब्रह्मैक्यवदिति** । ब्रह्मैक्यवान् यो भोक्ता, तत्त्वापत्तिमित्यर्थः । तथा च भोक्तुर्ब्रह्माभिन्नत्वात्, ब्रह्माभिन्नस्य भोग्यस्य भोक्तृत्वापत्तिशङ्का युक्तेति भावः ॥ भवेदेवं भोग्यस्य भोक्तृत्वशङ्का यदि भोक्तुः ब्रह्माभिन्नत्वमुपपद्येत । न चैवम्, प्रकारप्रमाणयोरभावात्; इत्यत उक्तम् **शास्त्रतः** 'तत्त्वमसि'- आदिशास्त्रतः **भोक्तृवर्गस्य** यत् **स्वाभाविकं रूपं** तस्य **ब्रह्माविभागे** सिद्धे सतीति ॥ ब्रह्मपरिणामवादिमते कार्यस्य कारणाभेदेऽपि कारणस्य कार्याद्भेदः, इति भेदाभेदयोर्व्यवस्थितत्वेन; भोक्तृभोग्ययोर्ब्रह्मणा अभेदेऽपि ब्रह्मणस्तद्भेदेन, भोग्यस्य ब्रह्मणाऽभेदेऽपि भोक्त्रभिन्नब्रह्माभेदस्य भोग्येऽभावेन, कथं भोक्तृत्वापत्तिशङ्का ? इत्यत उक्तं **साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्येति** । ततश्च साङ्ख्येन कार्यकारणयोः परस्परमत्यन्ताभेदाभ्युपगमात् युक्तमेव तद्रीत्या भोक्तृत्वापादनम् इति भावः । अनैकान्तिकत्वोपपादनायोक्तं 'परिणामतः सिद्धप्रातिस्विकरूपभेदानपह्नवेन लोकसिद्धं कारणाभेदं साङ्ख्यसिद्धान्तेनाङ्गीकृत्य' इति । परिणामतः सिद्धो यः प्रातिस्विकरूपभेदः, तदनपह्नवेन, लोके फेनतरङ्गादौ सिद्धं समुद्ररूपकारणाभेदं, प्रकृतेऽपि साङ्ख्यसिद्धान्तेन अङ्गीकृत्येत्यर्थः । समुद्ररूपैककारणाभिन्नानामपि फेनतरङ्गादीनां परस्परं भेदस्य लोके दृष्टत्वात्, प्रकृतेऽपि ब्रह्मरूपैककारणाभिन्नयोरपि भोक्तृभोग्ययोः परस्परं भेद इति भावः । न च एकेन कारणेन अत्यन्ताभिन्नानामपि कार्याणां कथं साङ्ख्यरीत्या परस्परं भेदः येन व्यभिचारचोदना सङ्गता स्यात्, इति वाच्यम्, कारणेनात्यन्ताभिन्नानामपि कार्याणां परस्परम् आ-लयं भेदस्य तन्मतेऽपि स्थितत्वात् । यद्वक्ष्यति साङ्ख्यपरीक्षायां (साङ्ख्यकारिकायां)'परस्परं विभेदश्च कार्याणामालयं भवेत्' इति । **स्वरूपेति** । स्वरूपभेदात्, कार्यभेदात्, व्यपदेशभेदात्, इति प्रत्येकं भेदशब्दसम्बन्धः । 'आदि'पदेन आकारसङ्ख्याभेदादेः परिग्रहः । तन्तुत्वपटत्वादिरूपस्वरूपभेदात्; जलाहरणादिरूपकार्यभेदात्; 'तन्तुः पटः' इति व्यपदेशभेदात् । आदिपरिगृहीतात् पिण्डाकारं कारणम्, पृथुबुध्नोदराकारं च कार्यम् इत्याकारभेदात्; बहवस्तन्तवः, एकः पटः इति सङ्ख्याभेदात् इत्यर्थः । 'तदनन्यत्वम्' इति प्रतिज्ञाम् अनूद्य व्याचष्टे **तदनन्यत्वमिति** । उक्तप्रतिज्ञायां हेतुं

पृच्छति **कुत इति** । बुभुत्सितहेतुविषयं सूत्रभागमवतारयति **आरम्भणेति** । तत्र भेदनिषेधकमारम्भणशब्दं व्याकरोति **यथेति** ।

पूर्वाधिकरणेऽपि भेदग्राह्यभिमानाविरोधोपपादनात् गतार्थत्वम् इत्याशङ्कानिरासायोक्तम् **अभ्युपगम्येति** । अङ्गीकृत्य हि भेदग्राहिप्रमाणस्य प्रामाण्यं, भेदाभेदयो रूपभेदेन विरोधः अनन्तराधिकरणे समाहितः; सम्प्रति स्वीकृतं प्रामाण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्यावहारिकत्वे व्यवस्थाप्यते । तथा च विषयभेदात् अपौनरुक्त्यमिति भावः ॥ विभागस्य वस्तुतोऽसत्त्वे हेतुत्वेन 'तदनन्यत्वम्' इति सूत्रावयवं विभजते **यस्मादिति** । ननु कार्यप्रपञ्चस्य भेदाभेदाभ्यामनिर्वाच्यतामिच्छन् कारणात्परमार्थतोऽनन्यत्वं व्याचक्षाणः स्वोक्तिविरोधं कथं नाधिगच्छति ? तत्राह **व्यतिरेकेणेति** । यस्मादेवमवगम्यते तस्मात् परमार्थतो विभागो नास्तीति तद्ग्राहि मानं व्यावहारिकमानत्वात् तात्त्विकमानस्य समन्वयस्याविरोधीत्यर्थः । कार्यस्य कारणातिरेकेणाभावे हेतुं पृच्छति **कुत इति** । बुभुत्सितहेतुविषयं सूत्रमवतारयति **आरम्भणेति** ।

वा०र०— **प्रमाणमूलत्वतत्संवादित्वाभ्यां** इति मूले प्रमाणसंवादित्वतन्मूलत्वमिति यथायोग्यं युक्तिविशेषणम् । तेन प्रमाणमूलत्वस्य वक्ष्यमाणटीकोक्तरीत्या द्विविधस्यापि संवादित्वात् परत्वेन कथं प्रथमतः तदुक्तिरिति शङ्कानवकाशः । **बाहुल्यलक्षणेति** । उक्तार्थ इति वर्तते । किं नाम बाहुल्येनैवेति पाठः । प्रमाणमूलत्वं इत्यादौ उपाधित्रयं विवक्षितमिति दर्शयितुं प्रमाणशब्दस्यापि व्यवस्थितार्थत्वं दर्शयति **अत्र प्रमाणेति** । **व्याख्यानत्वाभावादिति** । पूर्वाधिकरणीयापव्याख्याननिरासानन्तरं प्रवृत्तस्य कथं चेत्यादि भाष्यस्य तदनन्यत्वमित्यधिकरणव्याख्यानताया एव न्याय्यत्वादिति भावः । **अपव्याख्यानेति** । यद्यपि यद्वेति पूर्वाधिकरणान्ते उक्तप्रकारेण तदधिकरणीयापव्याख्याननिरासार्थताप्यस्ति, तथापि मुख्यतः एतदधिकरणीयव्याख्याननिराकरणार्थत्वेन अन्यार्थमप्येतद्भाष्यं पूर्वशेषतयापि संयोज्यमित्युक्तत्वात् । अतः मुख्यप्रयोजनाभिप्रायेण एतत्सूत्रीयेति विशिष्योक्तिरिति ध्येयम् । अनन्तराधिकरण इत्यस्य बहुव्यवधानात् अन्वयं दर्शयति **अत्र अनन्तराधिकरणेति** । ब्रह्मैक्यवत् इत्यस्योपपादकत्वं आकाङ्क्षाक्रमेणास्तीति भावेन तत्परित्यागः । भोग्यस्यापि भोक्तृत्वेति पाठः । भोग्यवर्गस्येति पाठो लेखकप्रयुक्तः । भोग्यवर्गस्येत्यारभ्य ब्रह्माविभागः इत्यन्तमूलस्य भोगस्य भोक्तृत्वापत्त्युपपादकत्वमिति प्रतीयते । तन्नायुक्तम् । भोग्येत्यारभ्य करणाभेदमङ्गीकृत्य इत्यन्तस्य अनैकान्त्योपपादकतायाः कथञ्चित्सम्भवेऽपि भोक्तृत्वापत्त्युपपादकत्वस्य विरोधेनासम्भवात् । अनैकान्तिकत्वोपपादकान्तरस्य अन्यस्य स्वाभावाच्च इत्यतोऽत्र कारणभेदमङ्गीकृत्य साङ्ख्यसिद्धान्तेनेत्यस्य भोग्यवर्गस्येत्यादिपूर्वभागशेषत्ववत् शाश्वतो भोक्तृ इत्यादि उत्तरभागशेषत्वमपि । तथा च साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्य शाश्वतो भोक्तृवर्गस्य स्वाभाविकरूपब्रह्मविभागे सति भोग्यस्यापि ब्रह्मैक्यवत् भोक्तृत्वापत्तिमाशङ्क्य भोग्यवर्गस्य परिमाणतः सिद्धप्रातिस्विकरूपभेदानपह्नवत्वेन लोकसिद्धं कारणाभेदं साङ्ख्यसिद्धान्तेनाङ्गीकृत्यानैकान्त्येन निरासोऽभिहितः इति योजनालाभेन पूर्वोत्तरभागयोः क्रमेण भोक्तृत्वापत्तिः अनैकान्त्योपपादकत्वाश्रयणात् नोक्तदोषावकाशः इत्यभिप्रेत्याकाङ्क्षाक्रमेण भोक्तृत्वापत्तिप्रापकभागं अनैकान्त्योप-

प्रमाणसिद्धत्वरूपत्वे च भोक्त्रापत्तेरित्यनेन गतार्थत्वापातात्; इत्यतः न उक्तप्रकारत्रयेण युक्तेः प्राबल्यम् अत्राभिमतम्, किन्नाम बाहुल्येनैव, इति न पूर्वेण गतार्थता; इत्याशयवान् पूर्वोत्तराधिकरणीयविलक्षणोपाधीनाह **'प्राक्' इत्यादिना** । अत्र **प्रमाणमूलत्वम** प्रत्यक्षावधृतव्याप्तिकत्वम्, श्रुतिसिद्धत्वं च अभिमतम् । **तत्संवादित्वं** च श्रुतिसंवादित्वम्; इत्यवधेयम् ।

'तदनन्यत्वम्' इत्येतत्सूत्रव्याख्यानत्वाभावात् 'कथं च' इत्युत्तरभाष्यानर्थक्यम् इत्याशङ्क्य, तदभावेऽपि एतत्सूत्रीयापव्याख्याननिराकरणार्थत्वात् न तत्; इति भावेन अपव्याख्याननिराकरणपरतया उत्तरं भाष्यं योजयितुं तदनुवदति **'तदिदम्' इत्यादिना** । **अनन्तराधिकरण इति** । अत्र अनन्तराधिकरणे भोग्यवर्गस्य भोक्तृत्वापत्तिमाशङ्क्य अनैकान्तिकत्वेन निरासोऽभिहितः इति सम्बन्धः ॥ ननु भोग्यवर्गस्य भोक्तृत्वापत्तिशङ्कायाः नावकाशः, निर्बीजत्वात्; इत्यतो भोग्यवर्गस्य कारणीभूतब्रह्माभेद एव तत्र बीजम् इत्याशयेनोक्तम् **भोग्यवर्गस्य कारणभेदमङ्गीकृत्येति** ॥ ननु भोग्यवर्गस्य ब्रह्मरूपकारणाभिन्नत्वेन ब्रह्मत्वापत्तिशङ्कैव स्यात्, भोक्तृत्वापत्तिशङ्का तु कथम् ? इत्यत उक्तम् **ब्रह्मैक्यवदिति** । ब्रह्मैक्यवान् यो भोक्ता, तत्त्वापत्तिमित्यर्थः । तथा च भोक्तुर्ब्रह्माभिन्नत्वात्, ब्रह्माभिन्नस्य भोग्यस्य भोक्तृत्वापत्तिशङ्का युक्तेति भावः ॥ भवेदेवं भोग्यस्य भोक्तृत्वशङ्का यदि भोक्तुः ब्रह्माभिन्नत्वमुपपद्येत । न चैवम्, प्रकारप्रमाणयोरभावात्; इत्यत उक्तम् **शास्त्रतः** 'तत्त्वमसि'- आदिशास्त्रतः **भोक्तृवर्गस्य** यत् **स्वाभाविकं** रूपं तस्य **ब्रह्माविभागे** सिद्धे सतीति ॥ ब्रह्मपरिणामवादिमते कार्यस्य कारणाभेदेऽपि कारणस्य कार्याद्भेदः, इति भेदाभेदयोर्व्यवस्थितत्वेन; भोक्तृभोग्ययोर्ब्रह्मणा अभेदेऽपि ब्रह्मणस्तद्भेदेन, भोग्यस्य ब्रह्मणाऽभेदेऽपि भोक्त्रभिन्नब्रह्माभेदस्य भोग्येऽभावेन, कथं भोक्तृत्वापत्तिशङ्का ? इत्यत उक्तं **साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्येति** । ततश्च साङ्ख्येन कार्यकारणयोः परस्परमत्यन्ताभेदाभ्युपगमात् युक्तमेव तद्रीत्या भोक्तृत्वापादनम् इति भावः । अनैकान्तिकत्वोपपादनायोक्तं 'परिणामतः सिद्धप्रातिस्विकरूपभेदानपह्नवेन लोकसिद्धं कारणाभेदं साङ्ख्यसिद्धान्तेनाङ्गीकृत्य' इति । परिणामतः सिद्धो यः प्रातिस्विकरूपभेदः, तदनपह्नवेन, लोके फेनतरङ्गादौ सिद्धं समुद्ररूपकारणाभेदं, प्रकृतेऽपि साङ्ख्यसिद्धान्तेन अङ्गीकृत्येत्यर्थः । समुद्ररूपैककारणाभिन्नानामपि फेनतरङ्गादीनां परस्परं भेदस्य लोके दृष्टत्वात्, प्रकृतेऽपि ब्रह्मरूपैककारणाभिन्नयोरपि भोक्तृभोग्ययोः परस्परं भेद इति भावः । न च एकेन कारणेन अत्यन्ताभिन्नानामपि कार्याणां कथं साङ्ख्यरीत्या परस्परं भेदः येन व्यभिचारचोदना सङ्गता स्यात्, इति वाच्यम्, कारणेनात्यन्ताभिन्नानामपि कार्याणां परस्परम् आ-लयं भेदस्य तन्मतेऽपि स्थितत्वात् । यद्वक्ष्यति साङ्ख्यपरीक्षायां (साङ्ख्यकारिकायां)'परस्परं विभेदश्च कार्याणामालयं भवेत्' इति । **स्वरूपेति** । स्वरूपभेदात्, कार्यभेदात्, व्यपदेशभेदात्, इति प्रत्येकं भेदशब्दसम्बन्धः । 'आदि'पदेन आकारसङ्ख्याभेदादेः परिग्रहः । तन्तुत्वपटत्वादिरूपस्वरूपभेदात्; जलाहरणादिरूपकार्यभेदात्; 'तन्तुः पटः' इति व्यपदेशभेदात् । आदिपरिगृहीतात् पिण्डाकारं कारणम्, पृथुबुध्नोदराकारं च कार्यम् इत्याकारभेदात्; बहवस्तन्तवः, एकः पटः इति सङ्ख्याभेदात् इत्यर्थः । 'तदनन्यत्वम्' इति प्रतिज्ञाम् अनूद्य व्याचष्टे **तदनन्यत्वमिति** । उक्तप्रतिज्ञायां हेतुं

पृच्छति **कुत इति** । बुभुत्सितहेतुविषयं सूत्रभागमवतारयति **आरम्भणेति** । तत्र भेदनिषेधकमारम्भणशब्दं व्याकरोति **यथेति** ।

पूर्वाधिकरणेऽपि भेदग्राहिमानाविरोधोपपादनात् गतार्थत्वम् इत्याशङ्कानिरासायोक्तम् **अभ्युपगम्येति** । अङ्गीकृत्य हि भेदग्राहिप्रमाणस्य प्रामाण्यं, भेदाभेदयो रूपभेदेन विरोधः अनन्तराधिकरणे समाहितः; सम्प्रति स्वीकृतं प्रामाण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्यावहारिकत्वे व्यवस्थाप्यते । तथा च विषयभेदात् अपौनरुक्त्यमिति भावः ॥ विभागस्य वस्तुतोऽसत्त्वे हेतुत्वेन 'तदनन्यत्वम्' इति सूत्रावयवं विभजते **यस्मादिति** । ननु कार्यप्रपञ्चस्य भेदाभेदाभ्यामनिर्वाच्यतामिच्छन् कारणात्परमार्थतोऽनन्यत्वं व्याचक्षाणः स्वोक्तिविरोधं कथं नाधिगच्छति ? तत्राह **व्यतिरेकेणेति** । यस्मादेवमवगम्यते तस्मात् परमार्थतो विभागो नास्तीति तद्ग्राहि मानं व्यावहारिकमानत्वात् तात्त्विकमानस्य समन्वयस्याविरोधीत्यर्थः । कार्यस्य कारणातिरेकेणाभावे हेतुं पृच्छति **कुत इति** । बुभुत्सितहेतुविषयं सूत्रमवतारयति **आरम्भणेति** ।

वा०४०— प्रमाणमूलत्वतत्संवादित्वाभ्यां इति मूले प्रमाणसंवादित्वतन्मूलत्वमिति यथायोग्यं युक्तिविशेषणम् । तेन प्रमाणमूलत्वस्य वक्ष्यमाणटीकोक्तरीत्या द्विविधस्यापि संवादित्वात् परत्वेन कथं प्रथमतः तदुक्तिरिति शङ्कानवकाशः । **बाहुल्यलक्षणेति** । उक्तार्थ इति वर्तते । किं नाम बाहुल्येनैवेति पाठः । प्रमाणमूलत्वं इत्यादौ उपाधित्रयं विवक्षितमिति दर्शयितुं प्रमाणशब्दस्यापि व्यवस्थितार्थत्वं दर्शयति **अत्र प्रमाणेति** । **व्याख्यानत्वाभावादिति** । पूर्वाधिकरणीयापव्याख्याननिरासानन्तरं प्रवृत्तस्य कथं चेत्यादि भाष्यस्य तदनन्यत्वमित्यधिकरणव्याख्यानताया एव न्याय्यत्वादिति भावः । **अपव्याख्यानेति** । यद्यपि यद्वेति पूर्वाधिकरणान्ते उक्तप्रकारेण तदधिकरणीयापव्याख्याननिरासार्थताप्यस्ति, तथापि मुख्यतः एतदधिकरणीयव्याख्याननिराकरणार्थत्वेन अन्यार्थमप्येतद्भाष्यं पूर्वशेषतयापि संयोज्यमित्युक्तत्वात् । अतः मुख्यप्रयोजनाभिप्रायेण एतत्सूत्रीयेति विशिष्योक्तिरिति ध्येयम् । अनन्तराधिकरण इत्यस्य बहुव्यवधानात् अन्वयं दर्शयति **अत्र अनन्तराधिकरणेति** । ब्रह्मैक्यवत् इत्यस्योपपादकत्वं आकाङ्क्षाक्रमेणास्तीति भावेन तत्परित्यागः । भोग्यस्यापि भोक्तृत्वेति पाठः । भोग्यवर्गस्येति पाठो लेखकप्रयुक्तः । भोग्यवर्गस्येत्यारभ्य ब्रह्मविभागः इत्यन्तमूलस्य भोगस्य भोक्तृत्वापत्त्युपपादकत्वमिति प्रतीयते । तदयुक्तम् । भोग्येत्यारभ्य कारणाभेदमङ्गीकृत्य इत्यन्तस्य अनैकान्त्योपपादकतायाः कथञ्चित्सम्भवेऽपि भोक्तृत्वापत्त्युपपादकत्वस्य विरोधेनासम्भवात् । अनैकान्तिकत्वोपपादकान्तरस्य अन्यस्य स्वाभावाच्च इत्यतोऽत्र कारणभेदमङ्गीकृत्य साङ्ख्यसिद्धान्तेनेत्यस्य भोग्यवर्गस्येत्यादिपूर्वभागशेषत्ववत् शाश्वतो भोक्तृ इत्यादि उत्तरभागशेषत्वमपि । तथा च साङ्ख्यसिद्धान्तेन कारणाभेदमङ्गीकृत्य शाश्वतो भोक्तृवर्गस्य स्वाभाविकरूपब्रह्मविभागे सति भोग्यस्यापि ब्रह्मैक्यवत् भोक्तृत्वापत्तिमाशङ्क्य भोग्यवर्गस्य परिमाणतः सिद्धप्रातिस्विकरूपभेदानपह्नत्वेन लोकसिद्धं कारणाभेदं साङ्ख्यसिद्धान्तेनाङ्गीकृत्यानैकान्त्येन निरासोऽभिहितः इति योजनालाभेन पूर्वोत्तरभागयोः क्रमेण भोक्तृत्वापत्तिः अनैकान्त्योपपादकत्वाश्रयणात् नोक्तदोषावकाशः इत्यभिप्रेत्याकाङ्क्षाक्रमेण भोक्तृत्वापत्तिप्रापकभागं अनैकान्त्योप-

पादकभागं च तत्तदाकाङ्क्षापूरकतया तत्तद्विशेषणकृत्यकथनेन योजयति **ननु भोग्यवर्गस्येत्यादिना** । भोगस्यापीत्यस्यानुवादो **भोग्यवर्गस्येति** । अनेन भोग्यस्यापीत्यतःपरं कारणाभेदमङ्गीकृत्य एतत् उत्तरभागगतं योजनीयं इति दर्शयति । अत एव शङ्कते **ननु भोग्यवर्गस्य ब्रह्मरूपेति** । वदिति न वतिः अपि तु मतुप् इत्यतो नासङ्गतं एतद्विशेषणमित्याशयं दर्शयति **ब्रह्मैक्यवान् इति** । **भोक्तुर्ब्रह्मेति** । अनेन भोग्यं भोक्त्रभिन्नं तदभिन्नब्रह्माभिन्नत्वात् इति प्रयोगः सूचितः । शास्त्रेत्यनुव्याख्याति **शास्त्रतः इत्यादि** । प्रमाणप्रदर्शनमेतत् । प्रकारप्रदर्शकस्वाभाविकब्रह्मेत्यादि योजयति **यत्स्वाभाविकमिति** । देवदत्तस्य गुरुकुलं इतिवत् नित्यसापेक्षत्वात् समास इति भावः । भोक्तृब्रह्माविभागस्य मूलस्थसप्तम्या सूचितहेतुत्वं स्पष्टयितुं उक्तं **सिद्धे सतीति** । **भेद इति इति** । इत्येवं कार्यकारणयोः भेदाभेदयोः व्यवस्थया सत्त्वेनेत्यर्थः । न तु कार्यनिरूपिताभेदः कारणेऽस्ति इति भावः । एवं सामान्यतः कार्यकारणभेदसत्त्वमभिधाय प्रकृते तदुपयोगमाह **भोक्तृभोग्ययोरिति** । कार्यभूतयोरिति पूरणीयम् । एवं ब्रह्मणेत्यत्र कारणभूतेनेति । **तद्भेदेन** कार्यभूताभ्यां भेदेनेत्यर्थः । ब्रह्मणा भेदेनेत्यनेन विशिष्य सत्त्वमभ्युपैति **भोक्त्रभिन्नेति** । **ब्रह्मणः** भोक्त्रभेदाभावेन विशेषणाभावात् विशिष्टाभावः । ततश्च कारणेनाभेदमात्रमप्रयोजकम् । विशिष्टकारणाभेदस्तु असिद्ध इति प्रागुक्तप्रयोगे हेत्वसिद्धिरित्युक्तं भवति । **अङ्गीकृत्येतीति** । इत्येवं कारणाभेदस्य साङ्ख्यसिद्धान्तेनेति विशेषणमुपात्तमित्यर्थः । साङ्ख्येन यादृशः कारणाभेदोऽङ्गीकृतः तादृशं कार्यकारणयोः परस्परं अत्यन्ताभेदं अङ्गीकृत्येति सिद्ध्यति । तदेवाह **ततश्चेति** । **तद्रीत्येति** । **ब्रह्मणो** भोक्त्रभिन्नत्वप्राप्त्या भोक्त्रभिन्नब्रह्माभेदरूपविशिष्टयावत्सत्त्वात् इति योज्यम् । एतच्चोपलक्षणपूर्वाधिकरणोक्तरीत्या भोक्तुर्भोग्यत्वं स्यात् भोग्याभिन्नब्रह्मणैकत्वस्य भोक्तरि सत्त्वेन भोक्तुः भोग्यत्वापत्तिमाशङ्क्येत्यपि ज्ञेयमिति स्पष्टत्वात् शिष्यैरेवोह्यतां इत्याशयेन टीकाकृता नोक्तमिति ज्ञेयम् । एवं भोक्तृत्वापत्तिप्रापकभागं योजयित्वा तन्निरासकानैकान्त्योपपादकभागं योजयति **अनैकान्तिकत्वेति** । उपपादनायोक्तं इत्यनन्तरं भोग्यवर्गस्य परिणामतः इति पाठः । भोग्येत्यत्र भोक्तृ इत्यपि उपलक्षणया ग्राह्यम् । ततश्च भोक्तृभोग्ययोरिति लभ्यते । भोक्तृभोग्ययोरिति च वक्ष्यति च इति ज्ञेयम् । **प्रकृतेऽपि साङ्ख्येति** । ब्रह्मभोग्यादिस्थलेऽपीत्यर्थः । एवमुत्तरत्रापि । अत्र समुद्ररूपकारणाभेदस्य ब्रह्मभोग्यादिस्थलेऽङ्गीकारो नाम तद्वत् भोक्तृत्वभोग्ययोः ब्रह्मरूपकारणाभेदाङ्गीकार इत्यदोषः । अत एव समुद्ररूपैक इत्युत्तरवाक्ये तथैव भाववर्णनं इति ज्ञेयम् । भोक्तृभोग्य इत्युक्तस्यैव भोक्तृभोग्यादीनामिति बहुवचनं अन्यथाख्यातिस्थलं अयुक्तमिति सूचितम् । **परस्परमालयमिति** । **आलयं** प्रलयपर्यन्तम् । कार्याणां परस्परं विभेदश्च भवेदिति । निगद्यते तैरिति समयपादीयमूलोक्तार्थो ज्ञेयः । ....तदनुसारेण स्वरूपभेदादिकं स्पष्टयति **तन्तुत्वपटत्वादि इत्यादिना** । **तन्तुः पट इतीति** । इत्यादीति योज्यम् । एवमुत्तरत्राप्यादिपदार्थान्तभविनार्थोऽवधेयः । स्वरूपभेदकार्यभेदादेः सर्वत्र सद्भावव्युत्पादनप्रकारशिक्षणाय तन्तुपटयोः मृत्पिण्डघटयोश्चोपादानेन सङ्करेण तद्व्युत्पादनम् । अन्यथा कारणस्य ततो दीर्घता पटस्य चतुष्कोणता इत्याद्येवोच्येत इति ज्ञेयम् । कल्पतर्वनुसारेण भाष्यार्थमाह **अङ्गीकृत्य हीति** । एतेन भोक्तृभोग्यविभागावेदकप्रत्यक्षादेः प्रामाण्ये तत्सिद्धविभागाङ्गीकार आवश्यक एवेति कथमिदानीं तदनङ्गीकारः इति शङ्का निराकृता वेदितव्या । **रूपभेदेनेति** । कारणात्मना भेदः, प्रातिस्विक-

कार्यरूपेण भेद इति रूपभेदेनेत्यर्थः । **तत्त्वावेदकत्वात् प्रच्याव्येति** । तत्त्वावेदकत्वरूपं न सम्भवतीति व्युत्पाद्येत्यर्थः । कार्यस्य कारणातिरेकेणाभावः इति पाठः । **सूत्रमवतारयतीति** । तत्खण्डमित्यर्थः ।

स०व्या०— लोकसिद्धं कारणाभेदमिति । ननु कारणाभेदाङ्गीकारे परस्परं कार्यभेदः कथम् । दृश्यते च कार्यभेदः । तस्मात्कारणाभेदाङ्गीकारोऽयुक्त इत्यत उक्तं **परिणामत इति** । कार्यभेदस्याप्यङ्गीकृतत्वान्नानुपपत्तिरिति भावः । भोग्यस्य कारणाभेदमिति सम्बन्धः । **शास्त्रतः** वेदत इत्यर्थः । भोग्यस्यापि भोक्तृत्वापत्तिमाशङ्क्येत्यत्र दृष्टान्तः **ब्रह्मैक्यवदिति** । यथा भोग्यस्य ब्रह्मणैक्यमङ्गीक्रियते, तद्वत् भोक्तृत्वमङ्गीकरणीयम् । ननु ब्रह्मैक्याङ्गीकारेऽपि भोक्तृत्वं कुतः इत्यत उक्तं **शास्त्रत इति** । भोक्तृवर्गस्य स्वाभाविकरूपब्रह्माविभागे सिद्धे, इति शेषः । शास्त्रेण भोक्तृवर्गस्य यत् स्वाभाविकं रूपं तस्य ब्रह्माविभागस्य ब्रह्मणैक्यस्य सिद्धत्वात्, भोग्यस्य तदैक्याङ्गीकारे ब्रह्मणो भोक्तृवर्गस्य चाभिन्नत्वात्, ऐक्यवत् भोक्तृत्वमप्यङ्गीकरणीयमिति भावः ।

केचित् (?) मायिमतेन कार्यस्य कारणाभेदेऽपि कारणस्य कार्यात् भेद इत्येवं व्यवस्थितभेदाभेदसद्भावेन भोक्तृभोग्ययोः ब्रह्मणाऽभेदेऽपि ब्रह्मणस्तद्भेदेन भोग्यस्य ब्रह्मणाऽभेदेऽपि भोक्त्रभिन्नब्रह्मणाऽभेदस्य भोग्ये अभावेन भोक्तृत्वापादनानुपपत्तेः, साङ्ख्येन च परस्परमत्यन्ताभेदाभ्युपगमात् तन्मतेन तदापादनोपपत्तेः **साङ्ख्यसिद्धान्तेन** इत्युक्तम् । **शास्त्रतः** श्रुतितः । अनैकान्तिकत्वेनेत्यत्र 'भोग्यवर्गस्य परिणामतः सिद्धप्रातिस्विकरूपभेदानपह्नवेन लोकसिद्धं कारणाभेदमङ्गीकृत्ये'त्यस्योपपादकत्वं द्रष्टव्यम् ।

विठ्ठल०— प्रमाणमूलेति । भोक्त्रधिकरणार्थः । **तत्संवादित्वेति** । असदिति चेदित्यधिकरणार्थः । 'स्मृतियुक्तिश्रुतिगुणयुक्तयो बहुयुक्तय' इत्यनुव्याख्यानविरोधेनाह **बाहुल्यलक्षणेति** । जन्मादिसूत्राभिप्रेते विष्णोरेव स्वातन्त्र्ये बाहुल्यलक्षणप्राबल्योपेताभिर्महदादिसृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षसृष्टित्वात् पटसृष्टिवत् इत्यादिभिर्वक्ष्यमाणाभिर्युक्तिभिः विरोधं परिहर्तुमिदमधिकरणमारभ्यत इत्यर्थः । यद्वा प्रयोगमात्रेण बाहुल्यविवक्षायामतिप्रसङ्गात् । महदादिसृष्टिः कर्त्रधीनसत्ताकाधिष्ठानसापेक्षा तथा तदधीनसत्त्वाधिष्ठाने सापेक्षा तथोक्तरूपकारणसापेक्षा सृष्टित्वात् । एवं महदादिस्थितिरपि कर्त्रधीनसत्ताकाधिष्ठानसापेक्षा स्थितित्वादिति प्रमेयभेदेन बाहुल्योपेताभिर्युक्तिभिर्विरोधं परिहर्तुमिदमधिकरणमारभ्यत इत्यर्थः । महदादिसृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षा सृष्टित्वादित्यादेरागामिसुधायाः उक्तयुक्तिष्वेव तात्पर्यं द्रष्टव्यम् । यथा चैतत्तथा तत्रैव वक्ष्याम इति । **अनन्तराधिकरण इति** । अव्यवहितपूर्वाधिकरण इत्यर्थः । अत्र भोग्यवर्गस्य लोकसिद्धं कारणाभेदमङ्गीकृत्य एतद्भोग्यस्यापि भोक्तृत्वापत्तिमाशङ्क्येत्यस्योपपादकम् । भोग्यस्य ब्रह्मरूपकारणभिन्नत्वेऽपि भोक्तृत्वापत्तिः कुत इत्यत उक्तम् **ब्रह्मैक्यवदिति** । ब्रह्मैक्यवान् यो भोक्ता तत्त्वापत्तिमित्यर्थः । तथा च भोक्तुर्ब्रह्माभिन्नत्वात् तदभिन्नस्य भोग्यवर्गस्यापि भोक्तृत्वापत्तिरनिवार्येति भावः । ननु भोक्तृरूपाध्यवच्छिन्नस्य ब्रह्मैक्यत्वमेव कथमित्यत उक्तं भोक्तृवर्गस्य यत्स्वाभाविकं रूपं तस्य ब्रह्माविभाग इति । अत्र

किं प्रमाणमित्याकाङ्क्षायामुक्तं **शास्त्रत इति** । तत्त्वमसीति शास्त्रत इत्यर्थः । लोकसिद्धं कारणभेदमङ्गीकृत्येत्यस्यावृत्तिः । तथा च परिणामतः सिद्धप्रातिस्विकरूपभेदानपह्नवेन लोकसिद्धं कारणाभेदमङ्गीकृत्य एतदनैकान्तिकत्वस्योपपादकम् । तथा हि । समुद्ररूपैककारणाभिन्नानामपि फेनतरङ्गादीनां परस्परं भेदस्य लोकसिद्धत्वात् ब्रह्मरूपैककारणाभिन्नानां भोक्तृभोग्यादीनां परस्परमभेदो व्यभिचरितः फेनतरङ्गादिवद्भेदोपपत्तेरिति । ततश्चैवं योजना पूर्वाधिकरणे भोग्यवर्गस्य जडस्य उपादानोपादेययोर्भेद इति लोकन्यायेन सिद्धम् । उपादानकारणरूपब्रह्माभेदमङ्गीकृत्य भोक्तृवर्गस्य तत्त्वमसीत्यादिना शास्त्रतः स्वाभाविकरूपब्रह्मभेदे सति भोग्यस्यापि ब्रह्मैक्यवद्भोक्तृत्वापत्तिसाङ्कर्यसिद्धान्तेनाशङ्क्य परिणामतः यः प्रातिस्विको रूपभेदः अयं फेनादिरेवायं तरङ्गादिरेवेत्यादिरूपपरस्परभेदे च तदनपह्नवेन तदपलापेन तदभ्युपगम्येति यावत् । लोकसिद्धं कारणाभेदं चाङ्गीकृत्य फेनतरङ्गादावनैकान्तिकत्वेन निरासोऽभिहित इति । **स्वरूपेति** । पृथुबुध्नोदराद्याकारभेदः जलाहरणादिः कार्यभेदः अयं घट इयं मृत्तिकेत्यादि व्यपदेशभेदः । घटत्वं मृत्वमत्वमित्यादि जातिभेदः तेनेत्यर्थः ।

चषक— परिणामवादीति । ब्रह्मणो जगदाकारेण परिणामवादीत्यर्थः । **विवर्तवादीति** । ब्रह्मणो विश्वभ्रमाधिष्ठानत्ववादीत्यर्थः ।

॥ इति एतत्सूत्रनिराक्रियमाणापव्याख्यानद्वयानुवादः ॥

* * *

॥ अथ प्रथमस्य(ब्रह्मपरिणामवादिनां) अपव्याख्यानस्य निरासः ॥

॥ अथ तत्रादौ 'कथं च तदनन्यता'इत्यनुव्याख्यानस्य त्रेधा व्याख्यानम् ॥

॥ अथ तत्राप्यादौ प्रथमव्याख्यानम् ॥

६५ **सु०— तत्राद्यं व्याख्यानं तावन्निराकरोति कथं चेति ।**

अनु०— कथं च तदनन्यता ।

कथम् इत्याक्षेपे । **चशब्दः** पूर्वसूत्रापव्याख्यानाक्षेपेण अस्य समुच्चयार्थः । 'जगतः' इति वक्ष्यमाणमत्रापि सम्बध्यते । अत्र प्रतिपाद्या स्यादिति शेषः ।

अयमाशयः । यो हि ब्रह्मोपादानतां जगतोऽभ्युपगम्यापि तदन्यतां मन्यते सोऽत्र पूर्वपक्षीकरणीयः । न च वैशेषिकादिस्तथेतिप्राप्तभावान्न तदनन्यत्वोक्तेरवसरोऽस्ति ॥ ब्रह्मोपादानतामनङ्गीकुर्वाणं प्रति तु सैव समर्थनीया, न तु तदनन्यता; तदधीनसिद्धि-

त्वादस्याः ॥ अथ ब्रह्मोपादानताऽप्यत्र समर्थ्यत इति चेत्, न, तथा सति प्रकृत्यधिकरणवैयर्थ्यापत्तेः । प्रकृत्यधिकरणन्यायोपपादितं ब्रह्मोपादानत्वमभ्युपेत्यापि तदन्यतां मन्यमानोऽत्र पूर्वपक्षीति चेत् । किमिदं ब्रह्मोपादानत्वं ब्रह्मसमवायित्वं वा ब्रह्मपरिणामत्वं वा यत्परेणाङ्गीकारितम् । नाद्यः कल्पः, तस्यानन्यत्वविरोधात्, समवायस्य निराकरिष्यमाणत्वाच्च । द्वितीये प्रयत्नवैयर्थ्यमेव; न हि कोऽपि परिणामवादमङ्गीकृत्य कार्यकारणयोरत्यन्तभेदमङ्गीकुरुते, यं प्रतीदमारभ्येतेति ।

परि०— तर्हि वैशेषिकादिकं प्रति कीदृशोक्तेरवसर इत्यत आह **ब्रह्मोपादानतामिति** । **अङ्गीकारितमिति** । प्रकृत्यधिकरणन्यायेनेति योज्यम् ।

यादु०— अवसराभावमेवोपपादयति **ब्रह्मोपादानतामिति** । **अङ्गीकारितमिति** । प्रकृत्यधिकरण इति शेषः ।

वं०प०— सा ब्रह्मोपादानता । **आक्षेपेण** निराकरणेन । **तदिति** । ब्रह्मोपादानत्वे सिद्धे उपादानोपादेययोरनन्यत्वं स्वयमेव भविष्यतीत्यस्या अनन्यताया उपादानत्वाधीनसिद्धिकत्वात् सैव समर्थनीयेत्यर्थः । **मन्यमान इति** । वैशेषिकातिरिक्त इत्यर्थः । **अथेति** । न केवलं तदनन्यतेत्यपिशब्दार्थः । **परेण** तार्किकेण, त्वयेति शेषः । **तस्येति** । ब्रह्मसमवायित्वं जगतोऽङ्गीकृत्य प्रवृत्तं प्रति कथं त्वया अनन्यत्वं साध्यते, तदनन्यत्वतत्समवायित्वयोर्विरोधादित्यर्थः । **निराकरिष्यमाणत्वाच्चेति** । तथा च ब्रह्मसमवायिकारणकत्वरूपं ब्रह्मोपादानकत्वं कथं परेणाङ्गीकृतमिति भावः । **प्रयत्नेति** । अनन्यत्वसाधनप्रयत्नेत्यर्थः । तदुपपादयति **न हीति** ।

श्रीनिधि०— यो हि ब्रह्मोपादानतां जगतोऽभ्युपगम्यापीति । अन्यथा जगत् ब्रह्मानभिन्नं ब्रह्मोपादानत्वादित्युक्ते परेणासिद्धिरुद्भाव्येतेति भावः । **तदधीनसिद्धत्वादस्या इति** । आरम्भणशब्दस्य सूत्रे श्रवणात् तदनुसारेण परमतानुसारेण च विकल्पः । तथा च सूत्रानुसारेणोपादानत्वं नाम समवायित्वमित्यङ्गीकृत्येति वा स्वकल्पनानुसारेण परिणामित्वमिति मन्यसे वेति द्रष्टव्यम् । **अङ्गीकारितम्** । पूर्वपक्षिणं प्रतीति शेषः ।

शे०वा०— आक्षेप इति । न कथमपीत्याक्षेप इत्यर्थः । उत्तरत्र परिहाराभावेन प्रश्नार्थत्वायोगादिति भावः । **चशब्द इति** । अनेन तदन्यता चेति चशब्दसम्बन्धः सूचितो भवति । **ब्रह्मणो** ब्रह्मानन्यतायाः सिद्धान्तेऽपि सत्त्वेन तदाक्षेपायोगादाह **जगत इतीति** । कार्यस्य कारणानन्यतायाः सूत्राप्रतिपाद्यताया भाष्येऽनुक्तत्वात् तल्लाभायापेक्षितशेषं पूरयति **अत्रेति** । 'कथञ्च तदनन्यता' इति मूले आक्षेपार्थककथंशब्देन न कथञ्चिदिति केनापि प्रकारेण तदनन्यतायाः सूत्राप्रतिपाद्यत्वमुपदर्शितं तत्कथमित्यतस्तद्दर्शयन् पूर्वपक्षा-

सम्भवनिमित्तं तावदाह **अयमाशय इति** । ननु वैशेषिकरीत्या स्वरूपकार्यव्यपदेशादिभेदेन कार्यस्य कारणानन्यत्वासिद्ध्या जगतो ब्रह्मानन्यत्वाक्षेपस्य प्रदर्शितत्वात् कथमत्र पूर्वपक्षासम्भव इत्यतो भवेदेवं यद्यत्र वैशेषिकादेः पूर्वपक्षितोपपद्येत । न च सोपपद्यत इत्याह **यो हीति** । तं प्रत्येवानन्यत्वप्रतिपादनस्य श्लिष्टत्वादिति भावः । ननु च मयाऽप्यत्र यो ब्रह्मोपादानत्वमङ्गीकृत्यापि तदनन्यत्वं न मन्यते तस्यैव पूर्वपक्षीकरणात् न पूर्वपक्षासम्भवः; इत्यतो भवेदेतदेवं यदि तव पूर्वपक्षित्वेनाभिमतो वैशेषिकादिः जगतो ब्रह्मोपादानत्वमङ्गीकृत्य तदनन्यत्वं न मन्यत इति स्यात् । न चैतदस्ति । वैशेषिकादिभिर्जगतो ब्रह्मानन्यताया इव ब्रह्मोपादानताया अप्यनभ्युपगमेन तेषामुक्तरूपत्वाभावादित्याह **न चेति** । माऽस्तु वैशेषिकादेस्तथात्वं किं तावता प्रकृते समायातमित्यत आह **इतीति** । इतिशब्दो हेतौ । वैशेषिकादेरतथात्वेन तद्रीत्या जगतो ब्रह्मोपादानकत्वमभ्युपगम्य ब्रह्मानन्यत्वशङ्कारूपपूर्वपक्षानुदयात् तं प्रत्यनन्यत्वप्रतिपादनमनवसरग्रस्तमिति भावः । अनवसरमेवोपपादयति **ब्रह्मेति** । **सैवेति** । प्रथममिति शेषः । **न त्विति** । प्रथममिति शेषः । तत्र हेतुमाह **तदिति** । तदनन्यतायास्तदुपादानकत्वैकप्रमाणकत्वात् तदसिद्धौ न सा समर्थयितुं शक्यत इत्यर्थः । ननु ब्रह्मोपादानतामनङ्गीकुर्वाणं प्रति तस्या अप्यत्र साधनादत्रोक्तन्यायोपपादितब्रह्मोपादानतामङ्गीकृत्य तदन्यतां मन्यमान एवात्र पूर्वपक्ष्यभिमतः । तं प्रति चास्त्येवोक्तरीत्या जगतो ब्रह्मान्यत्वप्राप्तिरिति न तदनन्यत्वप्रतिपादनस्य सूत्रेऽनवसरग्रस्तत्वमित्याशयेन शङ्कते **अथेति** । **न तथा सतीति** । तदधिकरणव्युत्पाद्यप्रमेयस्यानेनैव सिद्धेरिति भावः । नन्वत्र न वैशेषिकादिः पूर्वपक्षी येनोक्तदोषः किन्तु जगतो ब्रह्मोपादानताम्भ्युपगम्यापि तदन्यतां मन्यमान एव । तत्कथमनन्यत्वप्रतिपादनस्यानवसरग्रस्तत्वमित्याशङ्कते **प्रकृत्यधिकरण इति** । **अङ्गीकारितमिति** । प्रकृत्यधिकरण इति शेषः । **विरोधादिति** । समवायस्यान्यत्वेनैव सहवृत्तेः सर्वत्र दर्शनानान्यत्वेन विरोधादित्यर्थः । अङ्गीकृत्य च समवायं विरोधोद्भावनमिदम् । वस्तुतस्तु स एवासिद्धः । 'समवायाभ्युपगमाच्चे'त्यादिना वैशेषिकपरीक्षायां तस्य निराकरिष्यमाणत्वादित्याह **समवायस्येति** । **प्रयत्नवैयर्थ्यमिति** । अधिकरणानारम्भप्रसङ्ग इत्यर्थः । एतदेव विशदयति **न हीति** । आरभ्येतेतीत्यत्रस्येतिशब्दस्य 'अयमाशय' इति पूर्वेण सम्बन्धः ।

वा०र०— तावदाहेति । सूत्राप्रतिपाद्यत्वं तावदाहेत्यर्थः । **पूर्वपक्षीकरणादिति** । पूर्वपक्षित्वेनाङ्गीकारादित्यर्थः ।

स०व्र०— परेणेति । मायावादिनेत्यर्थः ।

विट्ठल०— कात्र कथन्तेत्यतस्तदुपपादयितुमाह **अयमाशय इति** । अनवसरमुपपादयति **ब्रह्मोपादानतामिति** ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ तस्यैव व्याख्याने द्वितीयव्याख्यानम् ॥

६६ **सु०— यद्वा कथं च तदनन्यता जगतो वक्तुं शक्यते । अनन्यत्वं हि भेदाभावः, अत्यन्ताभेद इति यावत् । भेदाभेदौ च परेणाङ्गीकृतौ, अतस्तादात्म्यमिति वक्तव्यं स्यात् । नैष दोषः; यावता कार्यस्य कारणेनाभेद एव, कारणस्य तु कार्याद्भेद एव, इत्येवं भेदाभेदावङ्गीकृताविति चेन्न; यदि ब्रह्म जगतोऽन्यदेव तदा कथं च तदनन्यत्वं (ता) जगतः स्यात् । न हि यद्यतोऽत्यन्तभिन्नं तत्तेनात्यन्ताभिन्नमिति सम्भवति, अति-प्रसङ्गादिति ।**

परि०— तदनन्यत्वमित्युक्तिर्भेदाभेदाङ्गीकारपक्षे युक्तेति शङ्कते **नैष दोष इति** । तादात्म्यमित्युक्तो दोषो नेत्यर्थः । **अतिप्रसङ्गादिति** । घटपटादेरपि तथात्वापत्तेरिति भावः ।

गु०दी०— अनन्यत्वं हि भेदाभाव इत्यत्र अन्यत्वापरपर्यायभेदनिषेधरूपत्वादनन्यत्वस्येत्युप-स्कर्तव्यम् ।

वं०प०— परेणेति । सिद्धान्तकर्त्रा भास्करेण त्वयेत्यर्थः । तथा च कार्यस्य कारणेन भेदाभेदयो-रङ्गीकृतत्वादभेदमनङ्गीकुर्वन्तं पूर्वपक्षिणं प्रति तादात्म्यमात्रं साधनीयमत्यन्ताभेदसाधनं तु त्वत्सिद्धान्त-विरुद्धमित्यर्थः । द्वितीये प्रयत्नवैयर्थ्यमित्युक्तदोषं परिहरति **नैष दोष इति** । **अभेद एवेति** । अत्यन्ताभेद एवेत्यर्थः । तथा च न विरोध इति भावः । **अतिप्रसङ्गादिति** । गजादत्यन्तभिन्नस्यापि गर्दभस्य गजा-दत्यन्ताभेदः स्यादित्यर्थः ।

कं०रा०— अनन्यत्वं हीति । अन्यो न भवतीत्यनन्यस्तस्य भावोऽनन्यत्वमित्यनन्यत्वशब्देन भेदाभावस्यैव प्रतीतेरिति भावः । **भेदाभेदाविति** । प्रपञ्चस्य ब्रह्मपरिणामत्ववादिना भेदाभेदावङ्गीकृतौ तथा च जगतो ब्रह्मभेदाभावरूपं ब्रह्मानन्यत्वं वक्तुं न शक्यते किन्तु तत्तादात्म्यमित्येव सूत्रे वक्तव्यं स्यादिति भावः । **अतिप्रसङ्गादिति** । कार्यादत्यन्तभिन्नेन कारणेन कार्यस्यात्यन्ताभिन्नत्वे पटादत्यन्तभिन्नेन घटेन पटस्या-प्यत्यन्ताभेदप्रसङ्गादित्यर्थः ।

श्रीनिधि०— तादात्म्यमिति वक्तव्यमिति । अनन्यवत्त्वमित्यनेन भेदप्रतिक्षेपः प्रतीयते न तादा-त्म्यमित्यनेनेति भावः । **यावतेति** । यत इत्यर्थः ।

शे०वा०— एवं प्राप्त्यभावान्न 'तदनन्यत्वमि'ति सूत्रं जगतो ब्रह्मानन्यत्वप्रतिपादकमित्यर्थपरतया कथञ्चेति भाष्यं योजितम् । इदानीं त्वङ्गीकारविरोधादित्यभिप्रेत्य तमुपपादयति **अनन्यत्वं हीति** । परो-

त्प्रेक्षितविरोधपरिहाराभासदूषणपरतयाऽप्येतदेव भाष्यं योजयितुमाशङ्कते **नेति** । भाष्यस्योक्तविरोधपरिहाराभासदूषकतासिद्ध्यर्थमपेक्षितपूरणेन भाष्यं योजयति **यदीत्यादिना** ।

विट्ठल०— अनन्यत्वं हीति । अन्यत्वापरपर्यायभेदनिषेधरूपत्वादनन्यत्वस्येत्यर्थः । भेदाभेदाङ्गीकारेऽपि तदनन्यत्वमित्युक्तिर्युज्यते । अतस्तादात्म्यमिति वक्तव्यमित्याशयेन शङ्कते **नैष दोष इति** । विकार्यनन्यत्वमिति विकारिण उपादानत्वेनान्यत्वमित्यर्थः । **इत्युक्तमिति** । यथा सोम्येत्यत्र मृत्पिण्डादेर्घटाद्युपादानतामभिधाय त उपादानाय वाचारम्भणवाक्यं प्राप्तमिति परेणोक्तमित्यर्थः । ब्रह्मणो विकाररहितत्वे उक्तन्यायेन साधिते जगतस्तदनन्यत्वं कथञ्चित्स्यात् तद्विकारत्वाभावादिति मूलयोजनामभिप्रेत्याह **यद्वेति** ।

॥ इति द्वितीयव्याख्यानम् ॥

* * *

॥ अथ तत्प्रेक्षा व्याख्याने तृतीयव्याख्यानम् ॥

६७ **सु०— अथवा कथं च तदनन्यता प्रतिज्ञातुं युक्ता; प्रमाणाभावादिति शेषः । ननु चारम्भणशब्दादिभ्य इत्युक्तत्वात् कथं प्रमाणाभाव इति चेत् । अत्र वक्तव्यम् । आरम्भणशब्दस्तावत्किं साक्षाज्जगतो ब्रह्मानन्यत्वमाचक्षीत, उत विकारस्य विकार्यनन्यत्वम् । आद्ये कथं च तदनन्यता जगतोऽस्यार्थः स्यात्, 'यथा सोम्ये'ति मृत्पिण्डादेः प्रकृतत्वादित्युत्तरम् । द्वितीये भवतु नाम विकारस्य विकार्यनन्यत्वम्, जगतस्तु कथं तदनन्यतेति ।**

परि०— विकार्यनन्यत्वमिति । विकारिणोपादानेनानन्यत्वमित्यर्थः ।

वं०प०— अस्य आरम्भणशब्दस्य । **प्रकृतत्वादिति** । तथा च मृन्मयादेव मृत्पिण्डाद्यनन्यत्वमस्यार्थो न तु महदादिसर्वजगतो ब्रह्मानन्यत्वमित्यर्थः ।

कं०रा०— अस्येति । आरम्भणशब्दस्येत्यर्थः । **मृत्पिण्डादेः प्रकृतत्वादिति** । तथा च मृण्मयस्य मृत्पिण्डानन्यत्वमेव वाचारम्भणमित्यादेरर्थः स्यान्न तु जगतो ब्रह्मानन्यत्वमिति भावः ।

श्रीनिधि०— साक्षादिति । सामान्यन्यायमन्तरा ब्रह्म जगदभिन्नमित्येवंरूपेणेत्यर्थः ।

शे०वा०— आरम्भणशब्दादिभ्य इत्येतत्सूत्रखण्डसूचिततया पराभिमतारम्भणशब्दरूपप्रमाणनिरासकतयाऽप्येतदेव भाष्यं योजयितुं प्रथमं तावज्जगतो ब्रह्मानन्यत्वप्रतिज्ञायाः प्रमाणाभावेनायुक्तत्वसम-

र्यकतया तद्व्याचष्टे **अथवेति** । नन्वारम्भणशब्दरूपप्रमाणनिरासकत्वं न भाष्यस्य प्रतीयते तत्कथं तेन तन्निरास इत्यतोऽत्र सम्भावितविकल्पद्वयप्रदर्शनपूर्वकं प्रथमपक्षनिरासपरतया भाष्यं व्यापारयति **अत्रेति** । **आद्ये इति** । प्रकृतघटादिविषयत्वादारम्भणशब्दस्य जगद्विषयत्वाभावान्न तेन जगतो ब्रह्मानन्यत्वसिद्धिरिति भावः । अपेक्षिताध्याहारेण द्वितीयपक्षनिरासपरतया तदेव भाष्यं व्यापारयति **द्वितीय इति** ।

॥ इति तृतीयव्याख्यानम् ॥

॥ इति 'कथं च तदनन्यता'इत्यनुव्याख्यानस्य त्रेधा व्याख्यानम् ॥

* * *

॥ अथ 'कथं च'इत्यादि 'साधिते'इत्यन्तानुव्याख्यानस्य षोढा व्याख्यानम् ॥

॥ अथ तत्रादौ प्रथमव्याख्यानम् ॥

६८ सु०— (ननु) विकारस्य विकार्यनन्यत्वे तेनोक्तेऽपि जगतो ब्रह्मानन्यत्वं सिद्ध्यत्येव, तस्यापि तद्विकारत्वात्; इत्यत आह **जगतस्त्विति** ।

अनु०— जगतस्त्वविका(रि)रत्वे उक्तन्यायेन साधिते ।

अविकारत्वे ब्रह्मविकारत्वाभावे । **उक्तन्यायेन** 'न च प्रकृती'त्यादिनेति शेषः । **साधिते** सति **कथं च तदनन्यता** इत्यन्वयः ।

यद्वा **जगत** इति पूर्वेणैव सम्बध्यते । **अविकारत्वे** ब्रह्मण इति शेषः । न विद्यते विकारो यस्येत्यविकारम्, तस्य भावस्तत्त्वं, तस्मिन् ।

परि०— **न च प्रकृतीति** । 'न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यते' इत्यादिना पूर्वपादोक्तन्यायेनेत्यर्थः । **इत्यन्वय इति** । विकारत्वाधीनत्वादनन्यताया इति भावः ।

कं०रा०— **न च प्रकृतीत्यादिनेति** । न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यते । अविकारः सदा शुद्धो नित्य आत्मा सदा हरिरित्यादिनेत्यर्थः ।

शे०वा०— उक्तरीत्या 'कथं च तदनन्यता जगतः' इति भाष्येणैव प्रमाणनिराससिद्धेर्जगतो ब्रह्मणो वाऽविकारत्ववर्णनपरमुत्तरभाष्यमनर्थकमित्याशङ्क्य विकारस्य विकार्यनन्यत्वप्रतिपादकारम्भणशब्दस्य साक्षा-

जगतो ब्रह्मानन्यत्वगमकत्वारम्भवेऽप्यर्थतस्तद्गमकत्वं भविष्यतीति शङ्कापरिहारार्थत्वान्न तदिति भावेन अर्थत आरम्भणशब्देन जगतो ब्रह्मानन्यत्वसिद्धिशङ्कामुत्थापयति **विकारस्येति** । विकारत्वाभावमात्रस्याविकारत्व-शब्दार्थत्वेऽपि योग्यतादिवशाद्ब्रह्मणः सम्बन्ध इति भावेन अविकारत्वमित्येतद्ब्रह्मविकारत्वाभाव इति व्याख्या-तम् । 'न च प्रकृतीत्यादिने'त्यत्रादिशब्देन 'ब्रह्मोपादानमुच्यते' इति वाक्यशेषपरिग्रहः । **साधिते सतीति** । सतिसप्तमीयमित्यर्थः । साकाङ्क्षत्वेन वाक्याभासत्वशङ्कापरिहाराय कथं च तदनन्यतेति पूर्वेण सम्बन्धमाह **कथं चेति** । एवं 'जगतस्त्वविकारत्वे' इति कारिकाखण्डे जगत इत्यस्याविकारत्व इत्यनेनापि सम्बन्धमङ्गीकृत्य जगतो ब्रह्मविकारत्वाभावाद्विकारस्य विकार्यनन्यत्वप्रतिपादकारम्भणशब्देन नार्थतोऽपि जगतो ब्रह्मानन्यत्व-सिद्धिरित्युक्तम् । इदानीं त्वारम्भणशब्देनार्थतो जगतो ब्रह्मानन्यत्वसिद्धिशङ्काया जगतो ब्रह्मविकारत्वा-भावसाधनेनैव ब्रह्मणो विकारित्वाभावसाधनेनापि परिहारान्न जगत इत्यस्याविकारत्व इत्यनेन सम्बन्धः । किन्तु कथं च तदनन्यता जगत इति पूर्वेणैव सम्बन्ध इति पक्षान्तरमाह **यद्वेति** । मूले ब्रह्मण इत्यनुक्तेर्न ब्रह्मणो विकारित्वाभावप्रतिपादकत्वमस्य भाष्यस्येति कथमनेन तन्निरास इत्यतोऽपेक्षितमर्थं शेषपूरणेनाह **ब्रह्मण इति शेष इति** । ननु जगतो ब्रह्मविकारत्वाभावेनैव ब्रह्मणो विकारित्वाभावसाधनेनैतच्छङ्कानिरासेऽपि ब्रह्मणो-ऽविकारत्वसाधनेन न तच्छङ्कानिरासः । अविकारत्वेऽपि ब्रह्मणो जगत्प्रति विकारित्वमात्रेण जगतो ब्रह्मा-नन्यत्वसिद्धेरवर्जनीयत्वादित्यतोऽत्राविकारपदस्याविकारिपरत्वाद्विकारित्वाभावस्यैवाविकारत्व इत्यनेन वर्णनाद्युक्त एवोक्तशङ्कानिरास इति भावेनाविकारत्व इत्यस्य कथमविकारित्वमर्थ इत्यतस्तद्व्युत्पाद्य दर्शयति **न विद्यत इत्यादिना** ।

वा०र०— आद्य इतीति प्रतीकोपादानं **योग्यतादीति** । आदिपदेन शेषपूरणपरिग्रहः । **तद्व्युत्पा-द्येति** । अविकारित्वपदं व्युत्पाद्य इत्यस्य तत्पदे व्युत्पत्त्यन्तरप्रदर्शनेन ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ तच्छोधा व्याख्याने द्वितीयव्याख्यानम् ॥

६९ **सु०— नन्वत्रारम्भणश(ब्दश)ब्देन 'उत तमादेशमप्राक्ष्य(क्षः)' इत्याद्या श्रुतिरुप-लक्ष्यते, तत्तात्पर्यपर्यालोचनायां च जगतो ब्रह्मविकारत्वं तदनन्यत्वं चावगम्यते इति चेन्न, महावाक्यावान्तरवाक्योपक्रमत्वप्रधानवाचित्वाद्यभावेनास्य श्रुत्युपलक्षणयोपादाने निमित्ताभावात् ।**

अभ्युपेत्याप्युपलक्षणत्वमाह अविकारत्व इति । **विकारत्वादन्यस्मिन्साहश्यादौ श्रुत्यर्थतया उक्तन्यायेन साधिते सति श्रुतितात्पर्यपर्यालोचनया च कथं तदनन्यता सिद्ध्येदिति ।**

परि०— इत्याद्येति । 'उत तमादेशमप्राक्ष्यः । येनाश्रुतं श्रुतं भवत्यमतं मतमि'ति ब्रह्मज्ञानेन सर्वविज्ञानप्रतिपादकोपक्रमवाक्यमित्यर्थः । **तत्तात्पर्येति** । ब्रह्मविज्ञानेन सर्वविज्ञानं च तयोरभेदे तात्पर्यं विनाऽनुपपन्नमिति भावः । **महावाक्येति** । महावाक्योपक्रमत्वान्तरवाक्योपक्रमत्वेत्यर्थः । आदिपदेन तच्छब्दोपेतत्वतत्प्रतिपादकत्वफलविशेषादिग्रहः । यथा 'यदन्ति यच्च दूरके' इति सप्त जपेत् । 'आदित्यप्रवस्ये'त्येके इत्यादि । सूत्रेषु च 'तद्भूतस्य तु तद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः', 'अस्यैव चोपपतेरूष्मे'त्यादिषु ध्येयम् । **उक्तन्यायेनेति** । 'अतः सादृश्य एव च । विवक्षात्र तु नित्यत्वे प्राधान्ये चोक्तवर्त्मनि'ति पूर्वपादान्तोक्तन्यायेनेत्यर्थः । 'ब्रह्मणोऽविकारित्व उक्तन्यायेन साधिते सति' इत्यत्रोक्तन्यायेनेत्यस्य 'अधिकारः सदा शुद्धो नित्य आत्मे'त्यादिनोक्तन्यायेनेत्यर्थः ।

यादु०— महावाक्येति । महावाक्योपक्रमत्वमवान्तरवाक्योपक्रमत्वं वा प्रधानवाचित्वं वा आदिपदगृहीतप्रयोजनविशेषो वा यत्र, तत्रैव श्रुत्युपलक्षणयोपादानम् । प्रकृते चैतन्मध्ये किमपि नास्तीति भावः । अस्मन्मते चाधिष्ठानाद्यपेक्षया आरम्भणशब्दोदितकरणस्य प्रधानत्वात् तद्वाचिनः शब्दस्य श्रुत्युपलक्षणयोपादानमुपपन्नमिति ध्येयम् । उदाहरणानि तु 'आत्वा वहन्तु हरयः, उपोषु श्रुणु हि गिरः, इति गायत्रीश्च पङ्क्तीश्च व्यतिषजती'त्यादिब्राह्मणे सूक्तरूपमहावाक्योपक्रमेणोपलक्षणया तृचः ग्रहणम् । तत्रैव 'अर्चत प्रार्चते'त्याद्यवान्तरवाक्योपक्रमेण तृचः ग्रहणम् । प्रधानवाचकत्वेन श्रुत्युपलक्षणं प्रकृतारम्भणशब्द एव । 'निरवयवत्वं शब्दकोपो वे'त्यादौ निरवयवत्वशब्देन 'अथ यः स जीवः स नित्यो निरवयवो ज्ञाते'त्यादिश्रुत्युपलक्षणं निरवयवशब्दस्य जीवपरत्वज्ञापनरूपप्रयोजनविशेषेणेत्येवं ज्ञातव्यानि ।

वं०प०— श्रुतीति । उत तमादेशमित्यादीत्यर्थः । तदुपपादकं **महावाक्येत्यादि** । यदाऽयं शब्दो महावाक्योपक्रमेऽवान्तरवाक्योपक्रमे वा स्यात्, यदि वा प्रधानप्रमेयवाची स्यात् तर्ह्येव तत्रानुपपत्तौ सत्यामितरोपलक्षकत्वं युक्तम् । एतत्त्रयं विनोपलक्षकत्वमयुक्तमित्यर्थः । ननु सिद्धान्ते तावदारम्भणशब्देन तदाक्षेपो लभ्यते । तत्रोक्तनिमित्तत्रयमध्ये किमस्तीति चेत् । प्रधानवाचित्वमिति वदामः । नन्वत्र यदि शब्दं प्राधान्यं विवक्षितं तर्हि किंस्विदासीदधिष्ठानमिति श्रौतनिर्देशानुसारेणाधिष्ठानशब्दस्यैव प्राधान्यादधिष्ठानशब्दादिभ्य इत्यधिष्ठानशब्दं प्रयुज्येत, नैवाक्षेप उपलक्षणीय इति चेत् । सत्यम् । तथाऽप्यार्थिकं प्राधान्यमस्ति । तथा हि ।

आरम्भणशब्दस्तावदुत्पादकवाची । उत्पादकं च साधकतमं तच्च करणं चाधिष्ठानाद्यपेक्षया प्रधानमतः प्रधानवाचित्वात् किंस्विदासीदधिष्ठानमिति वाक्योपक्रमप्रतीततत्त्वरूपशब्दप्राधान्यापेक्षया आर्थिकप्राधान्यस्य बलवत्त्वाद्युक्त आरम्भणशब्दस्यैव प्रयोगस्तस्यैवोपलक्षकत्वं युक्तमित्यर्थः । एतच्चोत्तरत्र स्पष्टम् ।

कं०रा०— तत्तात्पर्येति । उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमित्यादि श्रुतितात्पर्यपर्यालोचनायां ब्रह्मविज्ञानेन सर्वविज्ञानस्य जगतो ब्रह्मानन्यत्वं विनानुपपत्त्यानन्यत्वस्य च प्रकारान्तराभावेन जगतो ब्रह्मविकारत्वं तदन्यत्वं चावगम्यत इति भावः । **महावाक्येति** । आरम्भणशब्दे महावाक्योपक्रमत्वस्यावान्तरवाक्योपक्रमत्वस्य वा प्रधानवाचित्वस्य वा अभावेन आरम्भणशब्दस्य उत तमादेशमित्यादि श्रुत्युपलक्षणकत्वेन ग्रहणे निमित्ताभावेन सूत्रे तदुपलक्षकत्वेन ग्रहणायोगादित्यर्थः । **सादृश्यादाविति** । आदिशब्देन प्राधान्ये गृह्यते । **उक्तन्यायेनेति** । प्रकृत्यधिकरणोक्तन्यायेनेत्यर्थः ।

शे०वा०— ननु 'अविकारत्वे उक्तन्यायेन साधिते' इत्युत्तरभाष्ये सादृश्यादेः श्रुत्यर्थतया साधितत्वमुच्यते, तदनर्थकम् । न च जगतो ब्रह्मानन्यत्वे पराभिप्रेतप्रमाणस्यार्थान्तरपरत्वेन तदनन्यत्वाद्यर्थकत्वाभावप्रतिपादनद्वारा जगतस्तदनन्यताया अप्रामाणिकत्वसिद्ध्यर्थं तदिति वाच्यम् । तत्र प्रमाणतया पराभिमतस्यारम्भणशब्दस्य साक्षादर्थतो वा तदनन्यत्वाद्यगमकत्वस्य 'कथं च तदनन्यता । जगतः' इति पूर्वभाष्येणैव व्युत्पादितत्वेन तन्मात्रेणैव तदनन्यताया अप्रामाणिकत्वस्य सिद्धत्वात् । न च तेनारम्भणशब्दमात्रस्य तत्राप्रामाण्यसिद्धावपि तत्सङ्गृहीताया 'उत तमादेशमप्राक्ष्य' इत्यनेनैकविज्ञानेन सर्वविज्ञानश्रुतेस्तदसिद्ध्या तत्सिद्ध्यर्थमेतदिति वाच्यम् । आरम्भणशब्दस्य तत्राशक्तत्वेन तेन तत्सङ्ग्रहस्यैव परेण वक्तुमशक्यत्वाज्जगतो ब्रह्मविकारस्य ब्रह्मानन्यत्वस्य च तत्राप्रतिभासेन तत्सङ्ग्रहस्य व्यर्थत्वाच्चेत्यतस्तेन तत्परिग्रहप्रकारप्रदर्शनपूर्वकं तस्यास्तत्र प्रामाण्यं च व्युत्पाद्य तत्सावकाशत्वव्युत्पादकतयोत्तरभाष्यं योजयितुमारम्भणशब्देन तत्परिग्रहशङ्कामुत्थापयति **नन्विति** । **तत्तात्पर्यपर्यालोचनयेति** । एकविज्ञानेन सर्वविज्ञानान्यथाऽनुपपत्त्येत्यर्थः । लोकेऽन्यज्ञानेनान्यज्ञानस्यादर्शनादिति भावः । भवेदेवं श्रुतितात्पर्यपर्यालोचनया जगतो ब्रह्मानन्यत्वसाधनत्वं यदि सौत्रारम्भणशब्दस्य परोक्तं श्रुत्युपलक्षणतयोपादानमुपपद्येत, न तदुपपद्यत इत्याह **महावाक्येति** । श्रुत्युपलक्षणयोपादानं हि तन्निमित्ते सति स्यात् । तन्निमित्तं च महावाक्योपक्रमत्वम्, अवान्तरवाक्योपक्रमत्वं वा, प्रधानवाचित्वं वा, आदिपरिगृहीतमन्यद्वा किञ्चिदेतेष्वन्यतमस्य सत्त्व एव श्रुत्युपलक्षणयोपादानदर्शनात् । न चैतेषु यत्किञ्चिदप्यारम्भणशब्दे परस्यापि सम्मतम् । तत्कथं तस्य श्रुत्युपलक्षणया तस्योपादानं स्यात् । स्वमते तु प्रधानवाचित्वादारम्भणशब्दस्य श्रुत्युपलक्षणयोपादानमुपपन्नमिति भावः । नन्वेवं निमित्ताभावेन सौत्रारम्भणशब्दस्य 'उत तमादेशमप्राक्ष्य' इति श्रुत्युपलक्षणत्वायोगादेकविज्ञानेन सर्वविज्ञानश्रुतेर्न तेन प्राप्तिरित्यप्राप्तश्रुतेरर्थान्तरवर्णनेनानन्यत्वेऽप्रामाण्यव्युत्पादनपरोत्तरभाष्यानर्थक्यमित्यत आह **अभ्युपेत्येति** । उपलक्षणत्वेऽपि नेष्टसिद्धिः परस्येत्याशयेनोपलक्षणत्वाभ्युपगमो

भाष्यकाराणामिति भावः । ननु चैकविज्ञानेन सर्वविज्ञानश्रुतेः सादृश्यार्थतया उक्तन्यायसिद्धत्वेऽप्यविकारार्थत्वस्य पूर्वमसाधितत्वात् तत्साधितत्वकथनमनुपपन्नमित्यतोऽत्राविकारत्वपदेन सादृश्यादेरेव ग्रहणान्नानुपपत्तिरित्यभिप्रेत्याविकारत्वपदेन तल्लाभं दर्शयति **विकारत्वादन्यस्मिन्नित्यादिना** । आदिपदेन प्राधान्यादेः परिग्रहः । **उक्तन्यायेनेति** । 'प्राधान्यात्तत्परिज्ञानात्' इत्यादिनेति शेषः । यद्यपि तत्र प्राधान्यार्थत्वमेवोक्तं न तु सादृश्यार्थत्वमपीत्युक्तन्यायेनेति न श्लिष्टम् । तथापि सादृश्यादेकविज्ञानेन सर्वविज्ञानमाचार्येणान्यत्र व्युत्पादितमत्रानुसन्धेयमिति स्वकीयतात्पर्यनिरूपणमनुरुध्य सादृश्यादावित्युक्तमिति ज्ञेयम् । वस्तुतस्तु सादृश्यादावित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा प्राधान्यस्यैवोक्तेर्नानुपपत्तिरिति द्रष्टव्यम् । उक्तशङ्कापरिहारस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **श्रुतितात्पर्यपर्यालोचनयाऽपीति** । सौत्रारम्भणशब्दोक्तप्रमाणनिरासमात्पर्यको-ऽत्रेतिशब्दः ।

वा०र०— इदानीं त्वारम्भणेति । इदानीं तु न जगतः इत्यस्येत्यादि सम्बन्धः । तत्सम्बन्धाभावे उक्तदूषणालाभप्रसङ्गः इत्यतः उक्तं **आरम्भणशब्देनेत्यादि** । **इति पक्षान्तरमिति** । उपपादनं प्रागुक्तमेव मनसि निधाय सङ्कोचेनैव पक्षान्तरकीर्तनं इत्यर्थः । **दर्शयति** अविकारत्व इत्यर्थस्य लाभं दर्शयतीत्यर्थः । **सादृश्यादेः श्रुत्यर्थतया साधितत्वं उच्यत इति** । इदं च विकारित्वादन्यस्मिन् सादृश्यादाविति करिष्यमाणव्याख्यानुसारेणोक्तमिति ज्ञेयम् । **तत्तात्पर्यपर्यालोचनयेति** इति प्रतीकोपादानम् । श्रुत्युपलक्षणतया उपादानं उपपद्यते इति पाठः । उपलक्षणपदोत्तरलक्षणपदं लेखकागतम् । **प्रधानवाचित्वादिति** । किंस्विदासीदधिष्ठानं इत्युक्ताधिष्ठानादिषु आरम्भणस्यैव वक्ष्यमाणरीत्या प्रधानतया आरम्भणशब्दस्य प्रधानवाचित्वादित्यर्थः । **अप्राप्तश्रुतेरिति** । श्रुतेरित्यादिकमेव प्रतिपाद्यम् । तदानर्थक्यप्रतिपादनाया प्राप्तेति हेतुगर्भमिति बोध्यम् । **आचार्येणान्यत्रेति** । तत्त्वनिर्णये तात्पर्यनिरूपणम् । प्राधान्यात् इत्यनुभाष्यस्येति योज्यम् ।

स०व्र०— महावाक्येति । महावाक्योपक्रमत्वम् अवान्तरवाक्योपक्रमत्वं वा प्रधानवाचित्वं वा आदिपदेन प्रकृतत्वं वा तत्रैव श्रुत्युपलक्षणयोपादानम् । अत एव स्वमते आरम्भणशब्दस्य प्रधानवाचित्वात् श्रुत्युपलक्षणोपपत्तिरिति भावः ।

विठ्ठल०— तात्पर्येति । एकस्य ब्रह्मणो ज्ञानेन सर्वज्ञानस्य सर्वस्य ब्रह्मविकारित्वादिकं विनानुपपन्नत्वादिति भावः । **महावाक्येति** । आरम्भणशब्देन महावाक्योपक्रमत्वस्य प्रधानवाचित्वस्य प्रयोजनविशेषस्य भावेन यदन्ति यच्च दूरक इति सम पठेत् । अस्यैव चोपपत्तेरुप्मेत्यादाविव अत्र आरम्भणशब्दस्योततमादेशमित्यादि श्रुत्युपलक्षणाया उपादाने निमित्ताभावादित्यर्थः । **उक्तन्यायेनेति** । अत्र सादृश्य एव हि विवक्षात्र च नित्यत्वे प्राधान्ये चोक्तवत्मनिति पूर्वपदान्तोक्तन्यायेनेत्यर्थः ।

॥ इति द्वितीयव्याख्यानम् ॥

* * *

॥ अथ तत्त्वोद्योत व्याख्याने तृतीयचतुर्थपञ्चमव्याख्यानानि ॥

७० **सु०—** यदप्युक्तमादिपदगृहीतात् 'ऐतदात्म्यमिदं सर्वं' इत्यादिवाक्यात् तदन्यत्वसिद्धिरिति । तदप्यसत्, आदिपदेन वाक्यान्तरग्रहणस्यानुपपत्तेः, तथा सत्येतेषामपि शब्दत्वेनारम्भणादिशब्देभ्य इति प्रयोगप्रसङ्गात् ।

अस्तु वा कथञ्चिदादिपदोपात्तत्वं तेषां वाक्यानाम्, तथापि तेनैतेभ्यस्तदनन्यता सिद्ध्यति, उपपत्तिविरुद्धत्वात्; इत्याशयेन पृच्छति **कथं चेति** । या सूत्रकृता प्रतिज्ञाता, श्रुतिभिः च प्रतिपादिता, सा जगतः **तदनन्यता कथं** किंप्रकारा ।

किं पिकः कोकिल इतिवदेकत्वलक्षणा, किं वा मृद्घट इतिवद्विकारिविकारत्वलक्षणेति प्रश्नार्थः ।

आद्यामाक्षिपति **कथं चेति** । एकत्वलक्षणा जगतः **तदनन्यता** तु **कथं** सूत्रकृता प्रतिज्ञायेत, कथं च श्रुतिभिः प्रतिपाद्येत; न कथञ्चिदित्यर्थः ॥ अत्र हेतुमाह **अविकारत्व इति** । ब्रह्मणः **अविकारत्व** उक्तन्यायेन साधिते सति, **जगतस्तु** विकारात्मकत्वे प्रत्यक्षादिप्रमिते सति । विरुद्धधर्माधिकरणत्वादिति भावः ।

द्वितीयमाक्षिपति **कथं चेति** । विकारिविकारत्वरूपेति शेषः । आक्षेपे युक्तिमाह **जगतस्त्विति** । व्याख्यानं पूर्ववत् ।

परि०— **व्याख्यानं पूर्ववदिति** । जगतो ब्रह्मविकारत्वाभावे 'न च प्रकृतिशब्देने'-त्यादिनोक्तन्यायेन साधिते सति विकारिविकारत्वरूपा तदनन्यता कथम् । न कथमपीत्येवमित्यर्थः ।

वं०प०— **अनुपपत्तेरिति** । यथा 'वशिष्ठाद्याः समागताः' इत्युक्ते तत्सजातीया ऋषय एवादिपदेन गृह्यन्ते । तद्वदत्राप्यादिपदेनारम्भणशब्दसजातीयः कश्चिच्छब्द एव ग्राह्यो न वाक्यमित्यर्थः । **तथा सतीति** । उपपत्तौ वेत्यर्थः । **एतेषामपि** वाक्यानामपि । **पूर्ववदिति** । ''अविकारत्वे ब्रह्मविकारत्वाभावे । 'न च प्रकृती'त्युक्तन्यायेने''ति शेषः । इति पूर्ववदित्यर्थः ।

श्रीनिधि०— **आरम्भणादिशब्देभ्य इति** । अत्यन्तसजातीयस्यादिग्रहणेन ग्रहणयोगादिति भावः ।

शे०वा०— आरम्भणशब्दादिभ्य इत्यादिशब्दोपात्तवाक्यानां भाष्ये तदनन्यत्वासाधकताया अनुपपादितत्वेन प्रासङ्गिन्यूनताशङ्कापरिहारायादिशब्दोपात्तप्रमाणनिरासपरतयाऽपि 'कथं च तदनन्यते'त्येतदेव भाष्यं योजयितुमादिपदोपात्तवाक्यैस्तदनन्यत्वसिद्धिमनुवदति **यद्यपीति** । भाष्ये आदिपदेन वाक्यान्तरग्रहणस्य अनिरस्तत्वेन प्रसक्तां वाक्यान्तरस्यादिपदोपात्ततया भाष्यकारानुमतताशङ्कां स्वयं तदनुपपत्तिव्युत्पादनेन परिहरति **तदप्यसदित्यादिना** । कुतो न वाक्यान्तरस्य ग्रहणमित्यतस्तद्ग्रहणे बाधकमाह **तथा सतीति** । **एतेषामपीति** । आदिशब्दोपात्तानामिदं सर्वमित्यादीनामित्यर्थः । **इति प्रयोगः स्यात्** । न त्वारम्भणशब्दादिभ्य इति प्रयोगः । तथा सति शब्देतरविजातीयप्रमाणानामेवादिशब्देन लाभापत्त्या वाक्यान्तरस्यादिपदोपात्तता न सिद्ध्येदिति भावः । तर्हि भाष्यकृताऽप्यादिपदेन वाक्यान्तरग्रहणानुपपत्तिरेव वक्तव्या, किं तत्परित्यागेनोपपत्तिविरोधव्युत्पादनप्रयासेनेत्यत आदिपदोपात्ततायामपि वाक्यान्तराणां न परस्येष्टसिद्धिरित्यभिप्रेत्यादिशब्देन वाक्यान्तराणां ग्रहणासम्भवमनुपपाद्योपपत्तिविरोधेन तत्प्रामाण्यनिराकरणं भाष्यकारीयमुपपन्नमित्याशयेनाङ्गीकारवादरूपतया भाष्यमवतारयति **अस्तु वेत्यादिना** । कथमनन्यत्वे वाक्यानामुपपत्तिविरोध इत्यतस्तं दर्शयितुं सम्भावितविकल्पद्वयप्रदर्शनपरतया तावद्भाष्यं व्याचष्टे **वेत्यादिना** । भाष्ये, विकल्पितपक्षद्वयाक्षेपादर्शनान्न्यूनतामाशङ्क्यैतदेव भाष्यं तदाक्षेपतया योजयति **आद्यमाक्षिपतीति** । प्रथमपक्षाक्षेपस्य मूलारूढतासिद्ध्यर्थं तत्परतया भाष्यं व्याचष्टे **एकत्वलक्षणेति** । तदनेनैव भाष्येण प्रथमपक्षाक्षेपसिद्धेरुत्तरभाष्यानर्थक्यमित्यतस्तदाक्षेपमात्रसिद्धावप्याक्षेपकयुक्तेरनुपन्यस्ततया तदुपन्यासार्थत्वान्नोत्तरभाष्यानर्थक्यमित्यभिप्रेत्याक्षेपे हेतुसमर्पकतयोत्तरभाष्यं योजयति **अत्रेति** । ब्रह्मणोऽविकारत्वमात्रं ब्रह्मजगतोर्नैकत्वाभावसाधकमित्यत उपलक्षणतया मूलं व्याचष्टे **जगतस्तु विकारात्मकत्वे प्रत्यक्षादिप्रमिते सतीति** । तावताऽप्याक्षेपहेतुः कः सिद्ध इत्यत आह **विरुद्धेति** । भाष्यस्य द्वितीयपक्षाक्षेपत्वसिद्ध्यर्थं शेषपूरणेन दर्शयति **विकारीति** । **व्याख्यानमिति** । जगतोऽविकारत्वे ब्रह्मविकारत्वाभावे, 'न च प्रकृती'त्याद्युक्तन्यायेन साधिते सति विकारिविकारभावलक्षणा च तदनन्यता कथमिति पूर्वेणान्वय इति व्याख्यानं पूर्ववदित्यर्थः ।

वा०र०— **न्यूनतामाशङ्क्येति** । न्यूनत्वेत्याशङ्क्येत्यर्थः ।

विठ्ठल०— **एतेषामपीति** । 'ऐतदात्म्यमिदं सर्वमि'त्यादीनामपीत्यर्थः । तथा च विजातीयप्रमाणस्यैवादिशब्दग्राह्यत्वमुपपन्नं न तु शब्दान्तराणामिति भावः । **उपपत्तीति** । विरुद्धधर्मानधिकरणत्वरूपवक्ष्यमाणोपपत्तिविरुद्धत्वादित्यर्थः । **ब्रह्मणोऽविकारत्व इति** । अविकारस्सदा शुद्ध इत्युक्तन्यायेनेत्यर्थः । **व्याख्यानं पूर्ववदिति** । जगतो ब्रह्मविकारित्वाभावेन च प्रकृतिशब्देनेत्युक्तन्यायेन साधिते सति विकारिविकाररूपा तदन्यता कथं न कथमपीत्यर्थः ।

॥ इति तृतीयचतुर्थपञ्चमव्याख्यानानि ॥

* * *

॥ अथ तच्छोता व्याख्याने षड्व्याख्यानम् ॥

७१ **सु०**— नन्वेवमुपपत्तिविरुद्धाऽपि जगतो ब्रह्मानन्यताऽङ्गीकरणीया, अन्यथा 'ऐतदात्म्यमिदं सर्वमि'त्यादिश्रुतीनामप्रामाण्यप्रसङ्गात् इत्यत आह **कथं चेति** । **अविकारित्वे** अपि विकारत्वादन्यस्मिंस्तदधीनत्वादौ श्रुत्यर्थे 'स्वातन्त्र्ये च विशिष्टत्व' इत्युक्तन्यायेन साधिते सति, **कथं तदनन्यता** अङ्गीकर्तुमुचिता । सावकाशश्रुतिप्रतीतोऽप्यर्थो निरवकाशोपपत्तिविरोधात् त्याज्य एव, **यथोक्तमभिमान्यधिकरण** इति भावः ॥

परि०— **इत्युक्तन्यायेनेति** । जिज्ञासासूत्रानुव्याख्यानोक्तन्यायेनेत्यर्थः । **निरवकाशोपपत्तीति** । विरुद्धधर्माधिकरणत्वादिरूपोपपत्तिविरोधादित्यर्थः । **यथोक्तमिति** । तत्र मृत्त्वजडत्वादियुक्तिविरोधेन मृदब्रवीदित्यादेः प्रतीतार्थप्रच्यावनस्य कृतत्वादिति भावः ।

वं०प०— **यथोक्तमिति** । 'दृढयुक्तिविरोधे तु सर्वत्र न्याय ईदृशः' इत्युक्तत्वादिति ध्येयम् ।

शे०वा०— विषयान्तरोपदर्शनेन श्रुतिप्रामाण्यसमर्थनपरतयाऽपि भाष्यं योजयितुं श्रुत्यप्रामाण्यशङ्कामुत्थापयति **नन्विति** । **अन्यथेति** । उपपत्तिविरोधेन श्रुतेस्तदनन्यार्थकत्वाभाव इत्यर्थः । **अप्रामाण्येति** । न च तद्युक्तमपौरुषेयत्वेन निर्दोषायास्तदयोगादिति भावः । तावता कथमुक्तशङ्कापरिहार इत्यतोऽभिप्रायमाह **सावकाशेति** । नन्वेतदयुक्तम् । यद्युक्तिविरोधेन श्रुतेः स्वार्थात्प्रच्यावनं तस्याः सकलप्रमाणापेक्षया प्राबल्यात् । यत्किञ्चित्स्वार्थात्प्रच्यावनं तदुपजीव्यविरोध एव । न चात्र तथेत्याशङ्क्याह **यथेति** । अयं भावः । श्रुतेरर्थप्रच्यावनस्यायुक्ततां वदतः कोऽभिसन्धिः । किं विरुद्धयोरेव प्रामाण्यमुत वेदविरुद्धाया युक्तेरप्रामाण्यमिति । नाद्यः । वस्तुनि विकल्पप्रसङ्गात् । नान्त्यः । व्याप्तिपक्षधर्मतोपेतायास्तदयोगात् । कथं तर्हि 'उपजीव्यविरोधे त्वि'त्युक्तमिति चेदुपलक्षणत्वेनेति ब्रूमः । उपजीव्यं खलु नोपजीव्यमित्येव बाधकं किन्तु प्रबलत्वेन । तद्यदि युक्त्यन्तरस्यापि स्यात् तदा कुतो न बाधकतेत्यभिमान्यधिकरणे 'दृढयुक्तिविरोधे तु सर्वत्र न्याय ईदृशः' इति कारिकाखण्डेन भाष्यकृतोक्तमित्यर्थः ।

वा०र०— **विरुद्धयोरेवेति** । द्वयोरपीति योज्यम् । **अन्यत्र न्यायेति** । न्यायभाष्यादावित्यर्थः । विशेषणमुपसङ्क्रामतीति प्रतीकोपादानम् । विशेषणव्यावृत्तेरपि इतराधीनत्वेऽनवस्था इत्यत उक्तम् ।

विठ्ठल०— **यथोक्तमिति** । अभिमान्यधिकरणे मृत्वजडत्वादियुक्तिविरोधेन मृदब्रवीदित्यादिश्रुतेः

प्रतीतार्थप्रच्यावनस्य कृतत्वादित्यर्थः । न हि प्रतीतार्थमात्रेणाप्रामाण्यं भवति । निर्बाधार्थान्तरत्वोपपत्तेरित्याकृतार्थः ।

॥ इति षष्ठव्याख्यानम् ॥

॥ इति 'कथं च'इत्यादि 'साधिते'इत्यन्तानुव्याख्यानस्य षोढा व्याख्यानम् ॥

॥ इति प्रथमस्य(ब्रह्मपरिणामवादिनां) अपव्याख्यानस्य निरासः ॥

* * *

॥ अथ एतत्सूत्रेण निराक्रियमाणस्य द्वितीयस्य (विवर्तवादिनां) अपव्याख्यानस्य निरासः ॥

॥ अथ तत्र 'कथञ्च तदनन्यता'इत्याद्यनुव्याख्यानस्य त्रेधा व्याख्यानम् ॥

॥ अथ तत्रादौ प्रथमव्याख्यानम् ॥

७२ सु०— अपरमपि व्याख्यानं दूषयति **कथं चेति** । (इति) प्राहेत्यनुवर्तते । यद्यत्र कार्यमात्रप्रपञ्चस्यानृतत्वं सूत्रकृतोऽभिमतं स्यात्, तदाऽनृतत्वमित्येव ब्रूयात्, **तदनन्यत्वम्** इति **कथं** प्राह । न हि ब्रह्मानन्यत्वशब्दोऽनृतत्ववाची । तथा सति ब्रह्मणोऽप्यनृतत्वप्रसङ्गात् ।

ननु च तदनन्यत्वं तद्व्यतिरेकेणाभाव इति व्याख्यातम् । सत्यम् । न तथाऽप्यनृतत्वलाभः । तद्व्यतिरेकेण नास्तीत्युक्ते तदात्मनाऽस्तीति लभ्यते, न पुनः सर्वथाऽप्यनृतत्वम्; अन्यथा ब्रह्मातिरेकेणासतो जीवचैतन्यस्यापि सर्वथाऽनृतत्वं स्यात् । प्रसिद्धं चैतत्, यद्विशिष्ट(विषयः)प्रतिषेधो विशेषणमुपसङ्क्रामतीति ।

सत्यम् । तथाऽपि ब्रह्मविवर्तताज्ञापनायैवमुक्तमिति चेत् (न) । तथा सति तत्रारोपित(त्व)मिति वक्तव्यत्वात् । न हि शुक्तिकाशकले कलधौतमारोपितमिति वक्तव्ये ततोऽनन्यदिति प्रयुञ्ज(ज्य)ते ।

अथ 'ब्रह्मसत्तयैवेदं सत्, नापरा सत्ताऽस्यास्ती'ति ज्ञापनमेतस्य प्रयोजनमिति चेत्, तर्हि परमार्थसदेवेदमित्यायातमिति कथमनृतत्वम् ।

अथ येयं प्रपञ्चे सत्ताऽवभासते साऽधिष्ठानब्रह्मगतैवारोपितेत्यनेन ज्ञाप्यत इति चेत् । तत्किमन्यथाख्यातिवादिवदनिर्वचनीयख्यातिवादिनोऽप्यारोपिताकारस्य अन्यत्र

पारमार्थ्यमावश्यकम्; तथात्वे चाकाशत्वादिकमपि ब्रह्मणि पारमार्थिकमङ्गीकार्यं(रणीयं) स्यात्, रजतत्वादिकं च शुक्तिकायामिति ।

परि०— अपरमपीति । विवर्तवादिकृतं सूत्रव्याख्यानमित्यर्थः । आपादकमध्याहृत्य योजयति **यद्यत्रेति** । **प्रसिद्धं चैतदिति** । 'न जीर्णमलवद्वासाः स्नातकः स्यादि'त्यादाविति भावः । शङ्कते **सत्यमिति** । **कलधौतमिति** । रजतमित्यर्थः ।

वं०प०— ब्रह्मणोऽपीति । ब्रह्मणोऽपि ब्रह्मानन्यत्वेन ब्रह्मण्यपि ब्रह्मानन्यत्वशब्दः प्रवर्तते । न हि स्वयं स्वस्मादन्यद्भवति । ततश्च ब्रह्मणोऽपि ब्रह्मानन्यत्वशब्दवाच्यत्वेनानृतत्वं स्यादिति ध्येयम् । **प्रसिद्धं चैतदिति** । कार्यप्रपञ्चो ब्रह्मव्यतिरेकेण नास्तीतिनिषेधस्य ब्रह्मव्यतिरेकेण तस्य सत्त्वं नास्तीत्यर्थः । अयं विशिष्टनिषेधः । तत्र सत्त्वस्य प्रपञ्चे प्रमितत्वेन निषेधायोगात् सत्त्ववति प्रपञ्चे ब्रह्मव्यतिरिक्तत्वरूपं विशेषणमेव निषिध्यत इति वक्तव्यम् । तथा च तदात्मना नास्तीति लभ्यत इति भावः । शङ्कते **सत्यमिति** । अनृतत्वमित्येव वक्तव्यमिति यदुक्तं तत्सत्यमित्यर्थः । तर्हि तदनन्यत्वमिति किमर्थमुक्तमित्यत आह **तथाऽपीति** । तथा च तदनन्यत्वमित्युक्ते प्रपञ्चस्य तेनानन्यत्वं तद्व्यतिरेकेणासत्त्वं तत्रारोपितत्वरूपं ब्रह्मविवर्तत्वं ज्ञाप्यते । अनृतमित्युक्तौ नेदं ज्ञापितं भवतीति भावः । **तर्हीति** । ब्रह्मसत्तैवात्र यदि तिष्ठतीत्यर्थः । **तथात्वे चेति** । आकाशादेर्ब्रह्मण्यारोपितत्वात् रजतस्य शुक्तावारोपितत्वात् । आरोपिते प्रतीयमानस्याधिष्ठानगतत्वाङ्गीकारादाकाशादौ प्रतीयमानमाकाशत्वादिकं रजते प्रतीयमानं रजतत्वादिकं चाधिष्ठानभूतब्रह्मशुक्तिकागतमेव प्रतीयत इत्यङ्गीकार्यं स्यादित्यर्थः ।

कं०रा०— अपरमपीति । विवर्तवादिकृतमपीत्यर्थः । **प्रसिद्धं चेति** । तथा च ब्रह्मातिरेकेण जगन्नास्तीति विशिष्टाविषयनिषेधस्यापि जगति ब्रह्मातिरेकरूपविशेषणनिषेधपर्यवसायित्वात् तद्व्यतिरेकेण नास्तीत्युक्ते तदात्मना अस्तीत्येव लभ्यत इति भावः । **सत्यं तथापीति** । अत्र जगतोऽनृतत्वस्य सूत्रकृदभिमतत्वे अनृतत्वमित्येव वक्तव्यमित्येतत्सत्यम् । तथाप्यनृतत्वमित्येवोक्ते जगतो ब्रह्मविवर्तत्वं न ज्ञापितं स्यात् नेदमन्यत्वमित्युक्ते तु जगतो ब्रह्मविवर्तित्वं ज्ञापितं भवति अतस्तज्ज्ञापनाय तदन्यत्वमिति सूत्रकारेणोक्तमित्यर्थः । **तथा सतीति** । ब्रह्मविवर्तत्वज्ञापनस्य प्रयोजनत्वे तद्भेदाभावप्रतिपादकतदनन्यत्वशब्देनोक्तप्रयोजनालाभात् तल्लाभाय तत्रारोपितत्वमित्येव वक्तव्यत्वात् तदनन्यत्ववचनमयुक्तमेवेति भावः । **एतस्येति** । तदनन्यत्वमिति प्रयोगस्येत्यर्थः । **तर्हीति** । ब्रह्मसत्तयैव जगतः सत्त्वे ब्रह्मणः परमार्थसत्त्वाज्जगदपि परमार्थसदेवेत्यायातमिनि कथं जगतोऽनृतत्वमित्यर्थः । **तथात्व इति** । आरोपिताकारस्यान्यत्र पारमार्थिकत्वस्यावश्यकत्वे प्रपञ्चे प्रतीयमानं सत्त्वं यथा ब्रह्मणि पारमार्थिकमङ्गीक्रियते तथाकाशत्वादिकमपि ब्रह्मणि पारमार्थिकमङ्गीकार्यं स्यात् तथा रजतत्वादिकं च शुक्तिकायां पारमार्थिकमङ्गीकर्तव्यं स्यादित्यर्थः ।

श्रीनिधि०— ब्रह्मणोऽप्यनृतत्वप्रसङ्गात् इति । ब्रह्मानन्यत्वस्य स्वस्मिन्नपि सत्त्वेन तच्छब्दप्रतिपाद्यत्वादिति भाव. **ब्रह्मणि पारमार्थिकमङ्गीकार्यमिति** । अधिष्ठानब्रह्मगतस्यैवारोपितत्वाङ्गीकारादिति भावः ।

शे०वा०— अपरमिति । विवर्तवादिव्याख्यानमित्यर्थः । परव्याख्यानस्य सूत्राक्षराननुगुणतां दर्शयितुं योग्यं पूरयति **इतीति** । 'भोक्त्रापत्तेरिति प्राहे'ति पूर्ववाक्यादिति शेषः । सूत्राक्षराननुगुणतामभिनयेन दर्शयति **यद्यत्रेति** । नन्वनृतशब्दस्येव तदनन्यत्वशब्दस्याप्यनृतत्ववाचकत्वादनृतत्वमित्येव ब्रूयादित्यापादनं निर्बीजमित्यतो भवेदेवं यदि तदनन्यत्वशब्दस्यानृतत्ववाचकत्वं स्यान्न च तदस्तीत्याह **न हीति** । अभिधानाद्यभावादिति भावः । न केवलं साधकाभावो बाधकं चास्तीत्याह **तथा सतीति** । ब्रह्मण्यपि ब्रह्मानन्यत्वशब्दप्रयोगादिति भावः । **तदात्मनाऽस्तीति लभ्यत इति** । ब्रह्मव्यतिरेकेणासत्त्वव्यवहारालम्बनस्य जीवचैतन्यस्यानन्दादेश्च तदात्मना सत्त्वदर्शनादिति भावः । तदात्मना सत्त्वलाभमनभ्युपगम्य तद्व्यतिरेकेण नास्तीत्युक्त्या सर्वथाऽप्यनृतत्वलाभाभ्युपगमे बाधकमाह **अन्यथेति** । जीवचैतन्यस्येत्युपलक्षणम् । आनन्दादेश्चेत्यपि द्रष्टव्यम् । तद्व्यतिरेकेण नास्तित्वव्यवहारालम्बनत्वाविशेषादिति भावः । न केवलं विशिष्टनिषेधस्य विशेषणमात्रविषयत्वं दर्शनादिबलमात्रसिद्धं किन्तु न्यायसिद्धं चेत्याह **प्रसिद्धं चैतदिति** । यद्यपि 'सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामतः' इत्येवात्र न्यायः पठितो न तूक्तरूपस्तथाऽप्यर्थत एकदेशस्य प्रकृतोपयोगाभिप्रायेणायं पाठ इति ध्येयम् । **विशेषणमुपसङ्क्रामत इतीति** । विशेष्यमात्रोपस्थितेर्निषेधानुपयोगादितराव्यावृत्ततया तत्स्वरूपोपस्थितेश्च स्वत एवेतरव्यावृत्तविशेषणोपस्थितिर्विना योगेन निष्कृष्टविशेष्योपस्थित्यपेक्षया विशेषणोपस्थितेः पूर्वभावित्वेन विशेषणस्य प्राप्तत्वादित्यर्थः । यत्तु क्वचिद्विशिष्टस्यापि निषेधान्वयो दृश्यते 'नैव शून्यगृहे स्वपेदि'ति, स त्वगतिकतया । यथा चैतत्तथोपपादितं जिज्ञासासूत्रे ग्रन्थकारेण विवृतं च वाक्यार्थचन्द्रिकाकृतेति ध्येयम् । नन्वनृतत्वमित्येव वक्तव्यत्वेऽपि तथाऽनुक्त्वा प्रयोजनविशेषसिद्ध्यर्थं तदनन्यत्वमिति वचनं सङ्गच्छत एवेत्यतः किमन्यत्र ब्रह्मण्यारोपितत्वज्ञानं तदनन्यत्वोक्तेः प्रयोजनमभिमतम् । किंवा ब्रह्मसत्तयैवेदं सत्तावन्नापराऽस्य सत्ताऽस्तीति ज्ञापनम् । अथवा येयं प्रपञ्चे सत्ताऽवभासते साऽधिष्ठानब्रह्मगतारोपितेति ज्ञापनमिति विकल्पत्रयं मनसि निधायाद्यपक्षमाशङ्कते **सत्यमिति** । तथा सति वक्तव्यानुक्त्यवक्तव्योक्तिप्रसङ्ग इत्याशयेन वक्तव्यानुक्तिमुपपादयति **तथा सतीति** । तत्रारोपितत्वमिति वचनस्यैव ब्रह्मविवर्तताज्ञापकत्वेन तेन विना तदसिद्धेरिति भावः । अवक्तव्योक्तिप्रसङ्गमप्युपपादयति **न हीति** । अन्यथा रजतस्य शुक्तिविवर्तताज्ञापनाय ततोऽनन्यत्वप्रयोगप्रसक्तेरिति भावः । द्वितीयं पक्षमुत्थापयति **अथेति** । **तर्हीति** । अन्यथा ब्रह्मसत्तयैव सत्तावतो जीवचैतन्यस्यानन्दादेर्वा तदभावप्रसक्त्याऽनृतत्वप्रसङ्गादिति भावः । तृतीयमाशङ्कते **अथेति** । तथा सत्यन्यथाख्यातिवादित्वापत्त्याऽनिर्वचनीयख्यातिवादित्वभङ्गप्रसङ्ग इत्याह **तत्किमिति** । आरोपिताकारस्यान्यत्र पारमार्थिकत्वस्यान्यथाख्यातिवादिपक्षत्वादिति भावः । नन्वयं न तेषामेव पक्षः किन्तु ममापीति नारोपिताकारस्यान्यत्र पारमार्थ्यनियममात्रेणान्यथाख्यातिवादित्वप्रसङ्ग इत्यत

आह **तथात्वे चेति** । किमत्र यद्यत्प्रपञ्चेऽवभासते तत्सर्वं तदारोपाधिष्ठाने ब्रह्मणि पारमार्थिकमिति विशेष-नियमो विवक्षितः किंवा आरोपितनिष्ठतया यद्यद्भाति तत्तदारोपाधिष्ठाने पारमार्थिकमिति सामान्यनियम इति विकल्पद्वयमभिप्रेत्याद्यं दूषयति **आकाशत्वादिकमपीति** । द्वितीयमपि प्रत्याह **रजतत्वादिकं चेति** ।

वा०र०— स्वत एवेतरेति । **विवृतं चेति** । तदपि अस्माभिः तद्व्याख्यावसरे विवृतमिति ज्ञेयम् । **तद्व्याख्यानेति** । परापव्याख्यानेत्यर्थः ।

विठ्ठल०— अपरमपीति । विवर्तनादि व्याख्यानमित्यर्थः । आपादकाध्याहारेण योजयति **यद्यत्रेति** । **ब्रह्मणोऽप्यनृतत्वेति** । ब्रह्मणोऽपि ब्रह्मणोऽनन्यत्वादिति भावः । ब्रह्मानन्यत्वस्य योगवृत्त्या-नृतत्वपरता सम्भवतीति शङ्कते **ननु चेति** । तद्व्यतिरेकेण नास्तीत्युक्ते तादात्म्यं नास्तीति कथं लभ्यत आह **प्रसिद्धं चैतदिति** । न जीर्णमलवद्वासाः स्नातकः स्यादित्यादावित्यर्थः । शङ्कते **सत्यमिति** । कलधौतं रजतं रजतत्वादिकं चेति आरोपिते भासमानमधिष्ठानगतमेवेति सर्वत्राङ्गीकार्यं स्यात् । तथा च शुक्तिरजतेव भासमानं रजतत्वादिकं च शुक्तिगतमेवेत्यङ्गीकार्यमिति भावः ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ तत्त्रेधा व्याख्याने द्वितीयव्याख्यानम् ॥

७३ सु०— यद्वा 'स्याल्लोकवदि'ति भोक्तृभोग्यप्रपञ्चस्य सत्यतामभिधायेदानीं 'कथं च तदनन्यते'ति तद्विरुद्धमनृतत्वं प्राहेति योजना ।

ननु सूत्रकारः परमार्थाभिप्रायेण तदनन्यत्वमित्याह, व्यवहाराभिप्रायेण तु स्याल्लोक-वदिति, तत्कुतो विरोध इति चेन्न; प्रतारकत्वप्रसङ्गात् । अन्यथा प्रत्याचक्षीत ।

अप्रत्याख्यायैव कार्यप्रपञ्चं, परिणामप्रक्रियामाश्रयति; सगुणेषूपासनेषूपयोक्ष्यत इ(ती)ति चेत् । किं सगुणोपासनविषयप्रयोजने प्रकृतविषयप्रयोजनानुकूले, उत तद्विरुद्धे, अथोदासीने । नाद्यः; भेदविषयत्वात्, सांसारिकफलत्वाच्च; भेदवासना हि सुदृढा तामेवोपोद्बलयेत् । अत एव न तृतीयोऽपि । न द्वितीयः, अनाप्तत्वापरिहारादिति ।

परि०— सत्यतामभिधायेति । फेनतरङ्गदृष्टान्तेन भोक्तृभोग्ययोरसाङ्कर्योक्तौ सत्यत्वा-भिधानस्य प्राप्तत्वादिति भावः । **अन्यथेति** । प्रागुक्तसत्यत्वस्यानभिप्रेतत्व इत्यर्थः । शङ्कते

अप्रत्याख्यायैवेति। **प्रकृतेति** । शुद्धब्रह्मरूपविषयतज्ज्ञानप्रयोजनेत्यर्थः । **उपोद्बलयेदिति** । कार्यप्रपञ्चपरिणामप्रक्रियेति वा सगुणोपासनमिति वाऽनुषङ्गः । **अत एवेति** । भेदवासनोपोद्बलकत्वादेवौदासीन्यपक्षो न युक्त इत्यर्थः ।

गु०दी०— सांसारिकफलत्वाच्च इत्यत्र सगुणभगवदुपास्त्या मत्स्याद्यवतारैर्वेदाहरणसुधापानादिलौकिकफलस्मरणादित्यर्थः ।

वं०प०— अन्यथेति । यद्यप्रतारक इत्यर्थः । **उपयोक्ष्यत इति** । जगज्जन्मादिकर्तृत्वेन सगुणोपास्तौ कार्यप्रपञ्च उपयुक्तः । अन्यथा तत्कर्तृकत्वेनोपास्तेरयोगात् । **प्रकृतविषयेति** । तदनन्यत्वेति जगदारोपाधिष्ठानत्वेन प्रोच्यमाननिर्गुणब्रह्मरूपविषयतदैक्यापत्तिरूपप्रयोजनेत्यर्थः । तां भेदवासनाम् । अत एव भेदविषयकत्वेन विरुद्धत्वादुदासीनत्वं नास्त्येवेत्यर्थः । **अनाप्तत्वेति** । प्रकृतविषयप्रयोजनविरुद्धविषयप्रयोजनोपयुक्तं कार्यप्रपञ्चं 'स्याल्लोकवदि'ति प्रतिपाद्य तन्निराकरणमकुर्वन् कथमनाप्तो न स्यादिति भावः ।

कं०रा०— प्रतारकत्वप्रसङ्गादिति । सूत्रकारस्येति शेषः । **अन्यथेति** । सूत्रकारस्याप्रतारकत्वं वस्तुतः प्रपञ्चो नास्तीति प्रपञ्चं प्रत्याचक्षीत अप्रत्याख्यायैव कार्यप्रपञ्चं तस्य ब्रह्मानन्यत्वमिति वदन् सूत्रकारं परिणामप्रक्रियामाश्रयतीति कथं न प्रतारक इत्यर्थः । **शङ्कते सगुणेष्विति** । अप्रत्याख्यायैव कार्यप्रपञ्चं यत्परिणामप्रक्रियाश्रयणं सूत्रकारेणाङ्गीकृतं तत्सगुणविषयेषूपासनेषूपयोक्ष्यते तानि चोपासनानि सफलानि अतः कथं तदुपयुक्तं वदन् सूत्रकारः प्रतारक इत्यर्थः । **प्रकृतेति** । प्रकृतो यो विषयः जीवब्रह्मैक्यलक्षणः यच्चाविद्यानिवृत्तिलक्षणं प्रयोजनं तदनुकूले इत्यर्थः । **तदेति** । सगुणोपासनस्य भेदविषयकत्वात् सांसारिकफलवत्त्वाच्च सगुणोपासनविषयस्तत्प्रयोजनं च भेदवासनासुदृढतामेवोपोद्बलयेदिति न सगुणोपासनविषयप्रयोजनप्रकृतविषयप्रयोजनानुकूले इति भावः । **अत एवेति** । सगुणोपासनविषयप्रयोजनयोरुक्तरीत्या भेदवासनादार्ढ्यापादकत्वेन प्रकृतविषयप्रयोजनविरोधित्वादेव सगुणोपासनविषयप्रयोजने प्रत्युदासीनेन तदनुकूलेनापि तद्विरुद्धे इति तृतीयपक्षोऽपि नेत्यर्थः ।

श्रीनिधि०— अनाप्तत्वापरिहारादिति । अव्यवस्थितभाषित्वादिति भावः ।

शे०वा०— एवमपव्याख्यानस्य सूत्राक्षरानानुगुण्यव्युत्पादकतया 'कथं च तदनन्यते'ति भाष्यं योजितम् । इदानीं तु परोत्प्रेक्षितविरोधपरिहाराभासं दूषयितुं तच्छङ्कोत्थापनाय तथा व्याख्याने सूत्रकारस्य पूर्वोत्तरविरोधव्युत्पादकतयाऽपेक्षिताध्याहारेण तद्योजयति **यद्वेति** । अत्राभ्युपगम्य चेममित्यादिना सङ्क्षेपोक्तं विरोधपरिहाराभासप्रकारं शङ्कते **नन्विति** । तथा सति भोक्त्रापत्तेरित्यंशे सूत्रकारस्य यथाभूतार्थोपदेष्टृत्वाभावादनाप्तत्वं स्यादित्याह' **प्रतारकत्वप्रसङ्गादिति** । उपलक्षणं चैतत् । भोक्त्रापत्तेरिति प्रमाणस्य सूत्रस्या-

नृतविषयत्वेऽप्रामाण्यं स्यादित्यपि द्रष्टव्यम् । ननु च प्रत्यक्षादिप्राप्तप्रपञ्चसत्यताया अत्रानूद्यमानत्वेन तत्सत्यतायामतात्पर्यान्नाप्रामाण्यापत्तिस्तात्पर्यविषयीभूतार्थबाध्यताया एव तत्र प्रयोजकत्वात् तस्याश्च प्रकृतेऽभावादित्यतः; स्यादेवं कथञ्चिद्यदि प्रत्यक्षादिप्राप्तप्रपञ्चसत्यताऽनुवादितोपपद्येत । न चेयमुपपद्यते । अनुवादस्य निष्फलत्वात् । तथा हि । किमयं निषेधार्थानुवादो विधानार्थो वेति विकल्पं मनसि निधायोत्तरत्रानिषेधान्न निषेधार्थोऽनुवाद इत्याशयेनाद्यं प्रत्याह **अन्यथेति** । सूत्रस्य भोक्तृभोग्यलक्षण-प्रपञ्चसत्यतायां तात्पर्ये हि प्रतारकत्वमापादितम् । तत्परिहाराय तात्पर्यं परित्यज्य निषेधायानुवादत्वा-श्रयणे सूत्रकार उत्तरत्र तत्सत्यतां प्रत्याचक्षीत । न च तदस्तीत्यर्थः । द्वितीयमाशङ्कते **अप्रत्याख्यायैवे-त्यारभ्य उपयोक्ष्यत इत्यन्तेन** । कार्यप्रपञ्चमप्रत्याख्याय तत्सत्यतामप्रतिषिध्यैव तत्परिणामप्रक्रियामेवा-श्रयति सूत्रकारः । तस्याः सगुणोपासनोपयोगित्वात् । तस्याश्च मोक्षार्थनिर्गुणोपासनार्थत्वादित्यर्थः । भवेदेवं यदि सगुणोपासननिर्गुणोपासनयोः साध्यसाधनभाव एव स्यात् । न चासावुपपद्यत इत्यभिप्रेत्य तत्र सम्भावितविकल्पप्रदर्शनपूर्वकं तन्निरासेन साध्यसाधनभावासम्भवमेव दर्शयति **किमित्यादिना** । **प्रकृतेति** । अथातो ब्रह्मजिज्ञासेति प्रतिज्ञा निर्गुणोपासनविषयप्रयोजनेत्यर्थः । सगुणोपासनविषयप्रयोजनयोः कथं प्रकृतो-पासनविषयप्रयोजनाननुकूलत्वमित्यतस्तत्स्फोरणाय सगुणोपासनविषयप्रयोजने दर्शयति **भेदविषयत्वादि-त्यादिना** । तयोरननुकूलतां दर्शयति **भेदवासना हीति** । **अत एवेति** । सगुणोपासनविषयप्रयोजनयोः प्रकृतविषयप्रयोजनप्रतिकूलत्वादेवेत्यर्थः । **अनाप्तत्वेति** । प्रतिकूलतया तदसाधनस्यैव तत्साधनत्ववर्णनादिति भावः ।

स०व्र०— **परिणामप्रक्रियामिति** । कार्यभेदमित्यर्थः । **प्रकृतेति** । प्रकृतं यत् ब्रह्ममीमांसाशास्त्रम्, तद्विषयप्रयोजनानुकूले इत्यर्थः । **अत एवेति** । भेदविषयत्वेन विरुद्धत्वादेवेत्यर्थः ।

विठ्ठल०— **सत्यतामभिधायेति** । फेनतरङ्गदृष्टान्तेन भोक्तृभोग्ययोरसाङ्कर्योक्तौ सत्यताप्राप्तत्वादिति भावः । **प्रतारकत्वप्रसङ्गादिति** । स्याल्लोकवदिति परिहारकथने पारमार्थ्यमेवावगम्यते । तथा च सर्व्यं व्याव-हारिकं बद्ध्वा यथा परेषां पारमार्थिकबोधो भवति तथा प्रत्यपादयन् कथं न प्रतारक इति । **अन्यथेति** । सूत्रकारस्य प्रतारकत्वाभावे वस्तु ततः प्रपञ्चो नास्तीति प्रपञ्चं प्रत्याचक्षीत अप्रत्याख्यायैव कार्यप्रपञ्च-तदनन्यत्वमिति वदन् सूत्रकारः परिणामप्रक्रियामाश्रयतीति कथं न प्रतारकः स्यादित्यर्थः । शङ्कते **सगुणे-ष्विति** । कार्यप्रपञ्चमप्रत्याख्यायैव यत्सूत्रकारेण कृतं परिणामप्रकृत्याश्रयणं तत्सर्वगुणेषूपासनेषूपयुज्यते । उपासनानि च सफलानि । अतस्तदुपयुक्तं वदन् कथं प्रतारक इत्यर्थः । यद्वा अप्रत्याख्यायैवेत्येतदारभ्यैव शङ्का तथा च कार्यप्रपञ्चमप्रत्याख्यायैव सूत्रकारेण परिणामप्रक्रियामाश्रयतीति सति तदाश्रयणं सगुणेषूपयुज्यत इत्यर्थः । **प्रकृतेति** । शुद्धब्रह्मरूपविशेषज्ञानप्रयोजनेत्यर्थः । **भेदेति** । प्रकृतस्य च भेदविषयत्वादिति भावः । **सांसारिकफलत्वादिति** । स्वर्गाद्यल्पकालीनदुःखशिरस्वफलत्वादिति भावः । सगुणोपासनाभेदवासनयो-

द्वलकत्वात् न प्रकृतविषयप्रयोजनानकूलत्वमिति भावः । **अत एवेति** । भेदवासनोपोद्बलत्वादेवेत्यर्थः । **अनाप्तत्वेति** । अपरमार्थप्रतिपादकत्वादित्यर्थः ।

॥ इति द्वितीयव्याख्यानम् ॥

* * *

॥ अथ तत्रैव व्याख्याने तृतीयव्याख्यानम् ॥

७४ सु०— अथवाऽऽस्तां तावदियं ग्रन्थार्जवचिन्ता, **कथं च तदनन्यता** अनृतत्वलक्षणा जगतो युक्ता स्यात्, न कथञ्चिदिति योजयम् । अत्र हेतुमाह **जगत इति** । **अविकारित्वे** ब्रह्मविवर्तत्वाभावे । 'यच्चाविकृतमि'त्याद्युक्तन्यायेन ।

एवं प्रमाणाभावपरत्वेनापि पूर्ववद्व्याख्येयमिति ।

परि०— **इत्याद्युक्तन्यायेनेति** । पूर्वपादीयानुव्याख्यानोक्तन्यायेनेत्यर्थः । **एवं प्रमाणाभावपरत्वेनापीति** । तथाहि 'कथं च तदनन्यता' ब्रह्मविवर्तता जगतो न कथमपि प्रमाणाभावात् । नन्वारम्भणशब्दादिभ्य इत्युक्तत्वात् कथं प्रमाणाभाव इति चेत् तत्किमारम्भणशब्दः साक्षाज्जगतोऽनृतत्वमाचष्टे अथवा विकारस्य । आद्ये कथं ब्रह्मविवर्तता जगत इति तस्यार्थः, मृत्पिण्डादेः प्रकृतत्वात् । द्वितीये कथं जगतो ब्रह्मविवर्तता प्रमाणवती । ननु च विकारमात्रस्यानृतत्वे जगतो ब्रह्मविकारत्वादनृतत्वं भविष्यतीति चेत् (न) । 'यच्चाविकृतमेवैकमि'त्यादिनोक्तन्यायेन जगतो ब्रह्मविकारत्वाभावे साधिते सति कथं ब्रह्मविवर्तता जगत इत्यादिरूपेण व्याख्येयमित्यर्थः ।

यादु०— **एवं प्रमाणाभावपरत्वेनापीति** । कथं च तदनन्यता अनृतत्वलक्षणा प्रतिज्ञातुं युक्ता प्रमाणाभावादिति शेषः । नन्वारम्भणशब्दादिभ्य इत्युक्तत्वात् कथं प्रमाणाभाव इति । अत्र वक्तव्यम् । आरम्भणशब्दः किं साक्षाज्जगतोऽनृतत्वमाचक्षीत उत मृदादिविकारस्यैव मिथ्यात्वम् । नाद्यः । यथा सोम्येति मृत्पिण्डादेरेव प्रकृतत्वात् । द्वितीये तु भवतु विकारस्यानृतत्वं जगतस्तु कथम् । न च जगतोऽपि ब्रह्मविकारत्वादनृतत्वसिद्धिः, यच्चाविकृतमेवैकमित्याद्युक्तन्यायेन निराकृतत्वात् । न चारम्भणशब्देन 'उत तमादेशमि'त्यादिश्रुतिरुपलक्ष्यत इति वाच्यम् । महावाक्योपक्रमत्वादिनिमित्ताभावात् । तदुपलक्षणायामपि विकारत्वादन्यस्मिन्सादृश्यादौ श्रुत्यर्थतयोक्तन्यायेन साधिते सति कथं तस्मादप्यनृतता सिध्येदिति प्रमाणाभावपरत्वेन पूर्ववद्व्याख्येयमित्यर्थः ।

वं०प०— ग्रन्थेति । तदनन्यत्वमिति सौत्रपदेत्यर्थः । **आर्जवेति** । अनृतत्वमित्येव वक्तव्यत्वात् तदनन्यत्वमिति न वदेदित्येवंरूपार्जवेत्यर्थः ।

कं०रा०— यच्चाविकृतमिति । 'यच्चाविकृतमेवैकं ब्रह्मविश्वात्मना मृषा । दृश्यते मन्ददृष्ट्यैव स सर्ग इति कथ्यते । सा मन्ददृष्टिस्तस्यैव ब्रह्मणः किं ततोऽन्यगा । ब्रह्मणश्चेत्क सार्वज्ञमन्यगा चेत्स्वतोऽन्यते'-त्यादावुक्तन्यायेनेत्यर्थः ।

शे०वा०— अत्र पक्षद्वये हेतुसमर्पक 'जगतः' इत्युत्तरभाष्यानर्थक्यं भवतीत्यतस्तदनुरोधेन तदुपयुक्तार्थपरतया पूर्वभाष्यं योजयति **अथवेति** । नन्क्तप्रतिज्ञायां जगतो ब्रह्मविवर्तत्वाभावस्य साधितत्वं हेतुतयोपवर्णनीयं भाष्यकारेण तस्यैवोक्तप्रतिज्ञोपपादकत्वात् । न तु ब्रह्मविकारत्वाभावस्य साधितत्वम् । तत्कथमेतदित्यतोऽत्राविकारत्वपदस्याविवर्तत्वपरत्वान्नानुपपत्तिरित्यभिप्रेत्य तद्व्याख्याति **ब्रह्मविवर्तत्वाभाव इति** । तर्ह्युक्तन्यायेनेत्यस्यानुपपत्तिः । न च प्रकृतीति पूर्वोपन्यस्तन्यायेनाविकारत्वप्राप्तावप्यविवर्तत्वाप्राप्ते-रित्यतः प्रवृत्तोपयोगिन्यायसमर्पकतया तद्व्याचष्टे **यच्चाविकृतमित्याद्युक्तन्यायेनेति** ।

अस्मिन्नपि पक्षे आरम्भणशब्दादिभ्य इति सूत्रावयवार्थतया पराभिप्रेतप्रमाणनिरासेन भाष्ये प्रसक्त-न्यूनतापरिहाराय तत्परतयाऽप्येतदेव भाष्यं योज्यमित्याह **एवं प्रमाणाभावपरत्वेनापीति** । इयमत्र प्रमाणा-भावपरत्वेन भाष्ययोजना । "कथं च जगतस्तदनन्यतानृतत्वलक्षणा प्रतिज्ञातुं युक्ता । तत्र प्रमाणाभावादिति शेषः । नन्वारम्भणशब्दादिभ्य इत्युक्तत्वात् कथं प्रमाणाभाव इति चेत् । अत्र वक्तव्यम् । किमारम्भणशब्दः साक्षाज्जगतोऽनृतत्वमाचक्षीत उत विकारस्यानृतत्वम् । आद्ये कथं च तदनन्यताऽनृततालक्षणा जगतोऽस्यार्थः स्यात्, यथा सोम्येति मृत्पिण्डादेः प्रकृतत्वादित्युत्तरम् । द्वितीये तु भवतु विकारस्यानृतत्वं जगतस्तु कथमनृततेति । विकारस्यानृतत्वे उक्ते जगतोऽपि ब्रह्मविकारत्वादनृतत्वं सिद्ध्यत्येव तस्यापि तद्विकारत्वादित्यत **उक्तं जगत इति** । अविकारत्वे ब्रह्मविकारत्वाभावे उक्तन्यायेन 'न च प्रकृती'त्यादिनेति शेषः । साधिते सति कथं तदनन्यतेति सम्बन्धः । नन्वारम्भणशब्देन 'उत तमादेशमप्राक्ष्यः' इत्याद्या श्रुतिरुपलक्ष्यते । तत्तात्पर्य-पर्यालोचनया जगतो ब्रह्मविकारत्वमनृतत्वं चावगम्यत इति चेन्न । महावाक्यावान्तरवाक्योपक्रमत्वप्रधान-वाचित्वाद्यभावेनास्य श्रुत्युपलक्षणयोपादाने निमित्ताभावात् । अभ्युपेत्याप्युपलक्षणत्वमाह **अविकारत्व इति** । विकारत्वादन्यस्मिन्सादृश्यादौ श्रुत्यर्थतयोक्तन्यायेन साधिते सति श्रुतितात्पर्यपर्यालोचनया च कथमनृतता सिध्येत् । यदप्युक्तम् आदिपदगृहीतात् ऐतदात्म्यमिदं सर्वम् इत्यादिवाक्यादनृतत्वसिद्धिरिति । तन्न । आदिपदेन वाक्यान्तरग्रहणानुपपत्तेः । तथा सत्यारम्भणादिशब्देभ्य इति प्रयोगप्रसङ्गात्" इति ।

स०व्र०— एवं प्रमाणाभावपरत्वेनापीति । 'कथं च तदनन्यता जगतः अनृतत्वलक्षणा प्रतिज्ञातुं युक्ता । प्रमाणाभावादिति शेषः ।' इत्यादिपूर्वोक्तपरिणामवादिनिराकरणपरयोजनावत् अत्रापि तेन क्रमेण योजनीयमित्यर्थः ।

विठ्ठल॰— एवं प्रमाणाभावपरत्वेनापीति । कथं च तदनन्यता अनृतत्वलक्षणा प्रतिज्ञातुं युक्ता प्रमाणाभावादिति शेषः । ननु कथं प्रमाणाभावः आरम्भणशब्दादिभ्य इत्युक्तत्वादिति चेत् अत्र वक्तव्यम् । आरम्भणशब्दः किं साक्षाज्जगतानृतत्वमाचक्षीतेत्यादि पूर्ववद्व्याख्येयमित्यर्थः ।

॥ इति तृतीयव्याख्यानम् ॥

॥ इति एतत्सूत्रेण निराक्रियमाणस्य द्वितीयस्य (विवर्तवादिनां) अपव्याख्यानस्य निरासः ॥

॥ इति 'कथञ्च तदनन्यता'इत्याद्यनुव्याख्यानस्य शेषा व्याख्यानम् ॥

* * *

॥ अथ एतस्य (तदनन्यत्वमित्यादि)सूत्रस्यार्थः ॥

७५ **सु॰**— एवं तर्हि कोऽस्यार्थ इत्यत आह **स्वतन्त्रेति** ।

अनु॰— स्वतन्त्रकारणान्यत्वं तेन ह्यत्र निषिध्यते ।

यत एवं जगतो ब्रह्मानन्यत्वमनेकविधमपि नात्र प्रतिपाद्यम्, तेनेत्यर्थः । अनेनापव्याख्याननिराकरणं स्वव्याख्यानदृढीकरणार्थत्वान्नासङ्गतमिति स्मारयति ।

कर्त्रनधीनसत्ताशक्त्यादिमत्कारणान्तरसव्यपेक्षा खलु घटादिसृष्टिर्दृष्टा । ततो; महदादिसृष्टिरपि कर्तृव्यतिरिक्तस्वतन्त्रकारणस(ा)व्यपेक्षा सृष्टित्वाद्घटसृष्टिवत्, महदादिकं वा कर्तृव्यतिरिक्तस्वतन्त्रकारणायत्तो(सापेक्षो)त्पत्तिकं कार्यत्वाद् घटवत्, प्रकृत्यादिकं वा स्वतन्त्रं कारणत्वान्मृदादिवत्, ईश्वरो वा स्वतन्त्रकारणसव्य(णान्तरसा)पेक्षः कर्तृत्वात्कुलाल(ादि)वदिति युक्तिविरुद्धत्वाज्जन्मादिसूत्रेऽभिप्रेतं यत्परस्यैव ब्रह्मणः स्वातन्त्र्यं तन्नोपपद्यते । न च श्रुतिविरोधः, श्रुतीनां ब्रह्मणो जगत्कारणत्वमात्रपरत्वात् । स्वतन्त्रकारणान्तरनिरासे श्रुतेरभावात् । भावेऽप्यपौरुषेयतया श्रुतिप्राबल्यवद्बाहुल्येन युक्तिप्राबल्यस्यापि सम्भवात्, सत्प्रतिपक्षतया श्रु(त्य)त्याऽभिप्रेतावधारणानुपपत्तेरित्येवं प्राप्तम् ॥ स्वतन्त्रकारणान्यत्वं ब्रह्मणोऽन्यस्य स्वतन्त्रकारणत्वमिति यावत् । अत्र अधिकरणे । तदनन्यत्वमित्यनेन निषिध्यते । महदादिसृष्टौ यत्स्वतन्त्रकारणं तस्य तदनन्यत्वमिति ।

यद्यत्र स्वतन्त्रकारणाभाव इत्येव ब्रूयात्, तदा ब्रह्मणोऽपि स्वातन्त्र्यं प्रतिषिद्धं स्यात् । तदनन्यत्वं स्वतन्त्रकारणस्येत्युक्ते हि स्वतन्त्रकारणं तदेव नान्यदिति लभ्यते । तदुपपादनाय यत् 'आरम्भणशब्दादिभ्यः' इति स्वपक्षे प्रमाणमुक्तम्, यच्च 'भावे चोपलब्धेरि'ति विपक्षे प्रमाणाभावस्तदुभयं हिशब्देन सूचयति ।

परि०— अस्येति । सूत्रस्येत्यर्थः । 'अतो यथार्थबन्धस्य विना विष्णुप्रसादतः' इत्यादौ प्राग्बहुधास्यार्थस्योक्तत्वात्स्मारयतीत्युक्तम् । स्वतन्त्रसाधनशब्दार्थं विवृण्वन् विरोधयुक्तिबाहुल्यप्रकारं दर्शयति **कर्त्रनधीनेत्यादिना** । **स्वतन्त्रकारणेति** । ईश्वरानधीनसत्ताशक्त्यादिमत्कारणेत्यर्थः । सौत्रप्रतिज्ञांशव्यावृत्त्यर्थं कर्तृव्यतिरिक्तेत्युक्तम् । सृष्टिशब्दः कार्यविषयककर्तृव्यापारवाची । उत्पत्तिशब्दः कार्यगतधर्मवाची । अतो न प्रयोगयोः पौनरुक्त्यमिति । 'इति युक्तिविरुद्धत्वादि'त्यत्र इतिशब्दः प्रकारार्थः । कारणान्तरेत्यत्र तत्तत्पदोद्धारेणाधिष्ठानपदप्रक्षेपेण तथाऽग्रेऽपि कारणादिपदस्थाने अधिष्ठानपदप्रक्षेपेणापि कारणस्येवाधिष्ठानादेरपि स्वातन्त्र्ययुक्तिविरुद्धत्वात्, तथा सृष्ट्यादिपदस्थाने स्थितिसंहृत्यादिपदप्रक्षेपेणापि प्रमेयभेदेन बहुयुक्तिविरुद्धत्वादित्यर्थो ध्येयः । तेन प्रयोगभेदमात्रेण (युक्तिबा)प्रयोगबाहुल्यं, अधिकरणान्तरेऽपि सुशकमित्यतिप्रसङ्ग इति निरस्तमित्युक्तं चन्द्रिकायाम् । **न च श्रुतीति** । 'यतो वा इमानि भूतानि', 'सदेव सोम्येदमग्र' इत्यादिश्रुतिविरोध इत्यर्थः । सौत्रहेत्वंशव्यावर्त्यमाह **स्वतन्त्रकारणान्तरनिरास इति** । सौत्रादिपदव्यावर्त्यमाह **भावेति** । मूलं योजयति **स्वतन्त्रकारणान्यत्वमिति** । तेनेत्यस्यार्थान्तरं **तदनन्यत्वमित्यनेनेति** । कथमित्यतः सूत्रप्रतिज्ञांशं योजयति **महदादीति** । **तदुभयमिति** । एतच्चानुपदमाकर एव सूत्रद्वयार्थव्यक्तीकरणेनाग्रे व्यक्तम् ।

यादु०— 'नान्योऽतोऽस्ति कर्ते'त्यादिश्रुतिसद्भावात् कथं श्रुतेरभाव इत्यत आह **भावेऽपीति** । **विपक्षे प्रमाणाभाव इति** । 'स्वतन्त्रसाधनभावे प्रमाणैरुपलभ्येते'ति सूत्रव्याख्यानादिति भावः ।

वं०प०— वक्ष्यमाणानुमाने दृष्टान्ते साध्यवैकल्यपरिहारायाह **कर्त्रनधीनेति** । न हि कारणान्तरस्य दण्डादेः सत्ता घटादिजनकत्वरूपा शक्तिर्वा कुलालायत्ता दृष्टेत्यर्थः । **श्रुतीति** । ब्रह्मणः स्वातन्त्र्येण जगत्कारणत्वप्रतिपादक 'यतो वे'त्यादिश्रुतिविरोध इत्यर्थः । **श्रुत्यभिप्रेतेति** । 'यतो वे'त्यादिश्रुतेरभिप्रेतं यंत्परब्रह्मण एव स्वातन्त्र्येण जगत्कारणत्वमित्येवंरूपमवधारणमितरव्यवच्छेदस्तस्यानुपपत्तेरित्यर्थः । **इत्येवमिति** । सामान्येनेत्यर्थः ।

श्रीनिधि०— अनेकविधमपीति । परिणामरूपत्वम् । विवर्तरूपत्वमित्यनेकविधमित्यर्थः । **स्वतन्त्रमिति** । स्वातन्त्र्यं नाम कर्त्रनधीनशक्तिमत्वं द्रष्टव्यम् । **भावेऽपीति** । द्रव्यं कर्म चेत्यादेरिति भावः । **प्राबल्यस्यापि सम्भवात्, सत्प्रतिपक्षतवेति** । अत्र पूर्वस्योत्तरत्र हेतुत्वं द्रष्टव्यम् ।

शे०वा०— ननु स्वतन्त्रकारणान्यत्वमित्याद्युत्तरभाष्यमनर्थकम् । न च सूत्रार्थकथनरूपत्वान्न तदिति वाच्यम् । दोषव्युत्पादनेनापव्याख्याननिरासमात्रेण चारितार्थ्येन तत्कथनस्याप्यनर्थकत्वादित्यतः, नोक्तरीत्या अपव्याख्याननिरासो युक्तः । तथा सत्यर्थान्तराभावेन सूत्रस्य निरर्थकत्वेनाप्रामाण्यप्रसङ्गात् । परमाप्ततया भगवत्प्रणीतसूत्रस्य च तदयोगात् । किन्तु व्याख्यानद्वयमध्ये यत्किञ्चिदेकमङ्गीकृत्य तत्रोक्तदोषा एवाभासतां नेतव्या इत्याशङ्कायां; भवेदेवं यद्यबाधितमर्थान्तरं न स्यान्न चैवम्, अतो न दोषा अन्यथयितव्याः, इत्याशयेनार्थान्तरकथनस्यार्थवत्त्वादित्यभिप्रेत्य तथोत्तरवाक्यं योजयितुं शङ्कामुत्थापयति **एवं तर्हीति** । मूले तेनेत्यस्य वैयर्थ्यमाशङ्क्य स्वतन्त्रकारणत्वमत्र निषिध्यत इति प्रतिज्ञार्थेऽपेक्षितहेतुसमर्पकत्वात् न तदिति-भावेन हेतुसमर्पकतया तदर्थमाह **यत इत्यादिना** । **अनेकविधमिति** । तदात्मत्वानृतत्वरूपमित्यर्थः । ननु न स्वतन्त्रकारणान्यत्वस्यात्र निषेधो युक्तः । प्रापकाभावेन तस्याप्राप्तत्वात् । प्राप्तस्य च निषेद्धव्यत्वात् । न च युक्त्या तत्प्राप्तिः । प्रापकयुक्तेरनुपन्यासेन तदभावात् । भावेऽपि वा तस्याः श्रुतिबाधितत्वेनोक्तार्थागमक-त्वादित्यत उक्तार्थप्रापकयुक्तीनां स्पष्टत्वेन शिष्यैरेवोत्प्रेक्षितुं शक्यत्वेन तदनुपन्यासो भाष्ये दोषं नावहती-त्यभिप्रेत्य युक्तिप्रापकयुक्तिस्वरूपप्रदर्शनपूर्वकं तासां श्रुत्यबाधितत्वमुपपाद्य स्वतन्त्रकारणान्यत्वस्य प्राप्तिं तावदुपदर्शयति **कर्त्रनधीनेत्यादिना** । तत्र घटसृष्टावपि कर्तृव्यतिरिक्तकारणस्य स्वातन्त्र्यासिद्ध्या कर्तृ-व्यतिरिक्तस्वतन्त्रकारणसापेक्षत्वरूपसाध्यासिद्धेर्दृष्टान्तासिद्धिरित्यतः स्वातन्त्र्यस्वरूपनिरूपणपूर्वकं करिष्यमाण-प्रयोगे दृष्टान्तसिद्धिमुपदर्शयति **कर्त्रीति** । शक्त्यादिमदित्यादिपदेन प्रवृत्तिपरिग्रहः । **ततो महदादिसृष्टिरपी-त्यादि** । नन्वेतेषामनुमानानां कर्त्रन्यस्वतन्त्रकारणसद्भावाख्यैकविषयत्वेन प्रमेयभेदाभावान्न बहुत्वं सम्भवति । न च पक्षादिभेदेन प्रयोगभेदमाश्रित्य बहुत्वं विवक्षितमिति वाच्यम् । तथा सत्यतिप्रसङ्गापत्तेः । अती-ताद्यधिकरणेऽपि, मृन्न वक्त्री जडत्वात् । वक्तृत्वाभावो वा मृन्निष्ठश्चेतनासाधारणधर्माभावात् । वक्तृत्वं वा मृन्निष्ठाभावप्रतियोगि चेतनासाधारणधर्मत्वादित्येवं प्रयोगभेदेन युक्तिबाहुल्यस्याभिमान्यधिकरणेऽपि वक्तुं शक्य-त्वेन तद्विरोधपरिहारकाभिमान्यधिकरणेन गतार्थत्वापातात् । तत्कथं बहुत्वमिति चेत् । उच्यते । अत्र विमता सृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षेत्येकस्मिन्नपि प्रयोगे, विमता सृष्टिः कर्त्रनधीनसत्ताकाधिष्ठानसापेक्षा तदनधीनशक्तिकाधिष्ठानसापेक्षा तदनधीनसत्ताककरणसापेक्षा तदनधीनशक्तिककरणसापेक्षा सृष्टित्वादिति प्रयोगे-ऽनेकप्रयोगा अभिप्रेताः । तथा महदादिकं कर्तृव्यतिरिक्तस्वतन्त्रकारणायत्तोत्पत्तिकमित्याद्यनुमानत्रयेऽप्युक्त-रीत्यैकैकस्मिन्नपि प्रत्येकं चत्वारश्चत्वारः प्रयोगा अभिप्रेताः । अत एवानुमानप्रयोगदर्शनात्पूर्वमुक्तसर्वार्थ-साधारण्येन कर्त्रनधीनसत्ताकशक्त्यादिमत्कारणान्तरसव्यपेक्षा खलु घटादिसृष्टिर्दृष्टा इत्यनेन ग्रन्थेन दृष्टान्ते

साध्यसमर्थनं कृतम् । अत्र चाद्यानुमाने कर्त्रनधीनसत्ताकाधिष्ठानं प्रमेयं, द्वितीये कर्त्रनधीनशक्तिकाधिष्ठानं, तृतीये कर्त्रनधीनसत्ताकं करणं, चतुर्थे तदनधीनशक्तिकं करणमित्यस्त्येव प्रमेयभेदः । एवमेव विमता स्थितिः उक्तरूपाधिष्ठानसापेक्षा उक्तरूपकरणसापेक्षा स्थितित्वात् । विमतो विनाश उक्तरूपाधिष्ठानसापेक्ष उक्तरूपकरणसापेक्षो विनाशत्वादित्यपि साधनमत्राभिमतम् । तत्कथं न प्रमेयभेद इति सर्वमनवद्यम् । किमत्र यतो वेत्यादिब्रह्मकारणत्वप्रतिपादकश्रुत्या विरोधोऽभिमतः किंवा ईश्वरव्यतिरिक्तस्वतन्त्रकारणनिरासकश्रुत्येति विकल्पं मनसि निधायाद्यं दूषयति **श्रुतीनामिति** । द्वितीयं प्रत्याह **स्वतन्त्रेति** । ननु च 'नान्योऽतोऽस्ति दृष्टे'त्यादिश्रुतिसद्भावात् कथं तदभाव इत्यत आह **भावेऽपीति** । **बाहुल्येनेति** । बहुत्वेनेत्यर्थः । बहुत्वं च प्रागुपपादितरीत्या द्रष्टव्यम् । मूले स्वतन्त्रकारणस्यान्यत्वं निषिध्यत इति भवति । तच्चायुक्तम् । स्वतन्त्रकारणस्य ब्रह्मणो जीवजडात्मकप्रपञ्चान्यत्वस्य सिद्धान्तिनाऽप्यङ्गीकृतत्वात् । तस्यैवं प्राप्तत्वाभावाच्चेत्यतोऽभिप्रायमाह **ब्रह्मणोऽन्यस्येति** । उक्तार्थसमर्पकतयाऽध्याहारेण सूत्रं योजयति **महदादीति** । ननु 'स्वतन्त्रकारणान्यत्वं येनात्र निषिध्यते' इत्येतावतैवोक्तरीत्या तदनन्यत्वमिति सूत्रांशव्याख्यानासिद्धेः हिशब्दवैयर्थ्यम्; इत्यतस्तदनन्यत्वमिति प्रतिज्ञांशव्याख्यानसिद्धावप्यारम्भणशब्दादिभ्य इत्यादिनोक्तस्वपक्षसाधकप्रमाणादिसूचकत्वात् तस्य न तदिति भावेन तत्प्रयोजनमाह **तदिति** । **स्वपक्ष इति** । कर्तृव्यतिरिक्तस्वतन्त्रकारणाभावरूप इत्यर्थः । **विपक्ष इति** । कर्तृव्यतिरिक्तस्वतन्त्रकारणभावरूप इत्यर्थः । 'स्वतन्त्रसाधनभावे प्रमाणैरुपलभ्येते'ति भाष्योक्तेरिति भावः ।

वा०र०— व्याख्यानद्वयमध्य इति । परिणामि विवर्तरीत्योक्तव्याख्यानद्वयेत्यर्थः । अतीताधिकरणेऽपीत्येतद्विवरणं अभिमान्यधिकरणेऽपीत्येतद्विज्ञेयम् । इत्यनेके प्रयोगाः अभिप्रेता इत्येव पाठः । प्रयोग इति अधिकं लेखकदोषात् । मूलकोशेऽसत्त्वात् इति अवधेयम् । शक्तिकाधिष्ठानमित्यनन्तरं प्रमेयमिति वर्तते । न तु आरम्भणशब्दादिभ्यः इतीत्यनन्तरं वक्तव्यं इति वर्तते ।

विठ्ठल०— अस्येति सूत्रस्येत्यर्थः । 'अतो यथार्थबन्धस्य विना विष्णुप्रसादतः' इत्यादौ बहुशोऽस्य प्रमेयस्योक्तत्वात् स्मारयतीत्युक्तम् । स्वतन्त्रसाधनशब्दार्थं विवरितुं विरोधियुक्तिबाहुल्यं दर्शयन् व्याप्तिमुपपादयति **कर्त्रनधीनेति** । **स्वतन्त्रकारणेति** । ईश्वरानधीनसत्ताकशक्त्यादिमत्कारणेत्यर्थः । सौत्रप्रतिज्ञांशव्यावृत्त्यत्वात्कर्तृव्यतिरिक्तेत्युक्तम् । **इति युक्तिविरुद्धत्वा**दित्यत्रेतिशब्दः प्रकारवचनः । **कारणान्तरेत्यत्र** तत्पदोद्धारेणाधिष्ठानपदप्रक्षेपे तथाग्रेऽपि कारणादिपदस्थानेऽधिष्ठानादिपदप्रक्षेपेणापि कारणस्येवाधिष्ठानादेरपि स्वातन्त्र्ययुक्तिविरुद्धत्वात् । तथा सृष्ट्यादिपदस्थाने स्थितिसंवृत्यादिपदप्रक्षेपेणापि प्रमेयभेदेनापि बहुयुक्तिविरुद्धत्वादित्यर्थः । तेन प्रयोगमात्रबाहुल्येन युक्तिबाहुल्यमधिकरणान्तरेऽपि सुशकमित्यतिप्रसङ्ग इति निरस्तमिति चन्द्रिकोक्तेनोक्तशङ्कावकाशः । **न च श्रुतीति** । 'यतो वा इमानि भूतानि', 'सदेव सोम्येदमग्र आसीदि'त्यादिश्रुतिरित्यर्थः । सौत्रहेत्वंशान् व्यावृत्यमाह **स्वतन्त्रकारणान्तरनिरास इति** । सौत्रादिपद-

व्यावृत्यमाह **भावेऽपि वेति** । मूलं योजयति **स्वतन्त्रकारणान्यत्वमिति** । तेनेत्यस्यार्थान्तरं तदनन्यत्वमित्यनेनेति मूलं सूत्रारूढं कर्तुं तदनन्यत्वमिति सूत्रखण्डं योजयति **महदादिसृष्टाविति** ।

॥ इति एतत्सूत्रस्यार्थः ॥

* * *

॥ अथ तत्र विविधाक्षेपनिराकरणम् ॥

७६ **सु०— नन्वारम्भणाद्याक्षेपशब्दादिभ्य इति वक्तव्यम् । सत्यम् । लक्षितलक्षणयैष एवार्थः प्रतिपाद्यत इत्यदोषः ।**

तथाऽपि 'किंस्विदासीदधिष्ठानमि'ति (ऋ.सं.१०-८१-२) श्रौतनिर्देशानुसारेणाधिष्ठानस्योपादानमुचितमिति चेन्न, शाब्दादप्यर्थप्राधान्यस्य बलवत्त्वात्, साधकतमं करणमिति वचन(स्मरण)ात् ।

ननु च स्वतन्त्रकारणस्य ब्रह्मानन्यत्वं प्रतिज्ञाय कारणान्तराभावे प्रमाणोपन्यासोऽसङ्गतः । मैवम् । अस्त्यत्राभिप्रायः । वक्ष्यते (हि) च ब्रह्मातिरिक्तप्रकृत्यादिकारणसद्भावः । आरम्भणशब्दादिभ्यस्तदभावोऽवगम्यते । ततोऽर्थात्स्वतन्त्रकारणा(न्तरा)भाव एव सिद्ध्यतीति ।

ननु च युक्तीरुपलभमानोऽपि सूत्रकारः कथं स्वतन्त्रकारणान्तरभावे च प्रमाणैरुपलब्धेः प्रसङ्ग इति वदन् प्रमाणाभावमाह । एवं मन्यते । शुष्काभ्यो बहुयुक्तिभ्योऽपि श्रुत्यनुगृहीतानां बह्वीनां युक्तीनां प्राबल्यात्, तद्विरुद्धानां पूर्वपक्षयुक्तीनामप्रामाण्यमिति ।

परि०— लक्षितलक्षणयेति । प्रधानभूतोपादानवाचकारम्भणशब्देन साधकजातं लक्षयित्वा तेन तदाक्षेपलक्षणेति लक्षितार्थद्वारकलक्षणयेत्यर्थः । अधिष्ठानापेक्षयोपादानं प्रधानमिति भावेन समाधत्ते **शाब्दादिति** । कार्योत्पत्तावुपादानं कारणमिति भावेन पाणिनीयसूत्रं संवादयति **साधकतममिति** । **वक्ष्यते हीति** । सत्त्वाच्चेति सूत्रे । **स्वतन्त्रकारणान्तराभाव एवेति** । 'धर्मान्तरेण वाक्यशेषादि'ति वक्ष्यमाणन्यायात् तत्र वाक्यशेषादित्यस्य मानान्तरोपलक्षणत्वादित्यर्थः । द्वितीयसूत्रेऽप्यनुपपत्तिमाशङ्क्य समाधत्ते **ननु च युक्तीरिति** । महदादिसृष्टिरपीत्यादिनोक्ताः

युक्तीरित्यर्थः । **युक्तीनामिति** । अपरतन्त्रत्वात् स्वतन्त्रत्वात् साधनसत्तादिप्रदत्वाच्च स्वव्यतिरिक्त-स्वतन्त्रसाधनमनपेक्ष्य महदादिसृष्टिं करोतीश्वरो व्यतिरेकेण कुलालवदिति सौत्रादिपदोक्तयुक्तीना-मित्यर्थः ।

गु०दी०— लक्षितलक्षणया एष एवार्थ इत्यत्र **लक्षितलक्षणा** नामैकेन पदेनैकं पदार्थं लक्षयित्वा तत्राप्यनुपपत्तिदर्शनेन पदार्थान्तरलक्षणा । आरम्भणपदसमीपे आदिपदाभावादारम्भणपदेनादीत्युपलक्ष्यते । तेन च तदाक्षेप उपलक्ष्यते । सौत्रमादिपदं तु यथास्थान एव न तस्य व्यत्यास इति भावः । **वक्ष्यते हि** इत्यत्र 'सत्त्वाच्चावरस्ये'त्युत्तरसूत्रे वक्ष्यत इत्यर्थः ।

यादु०— लक्षितलक्षणयेति । आरम्भणशब्देनाधिष्ठानादिसाधनजातमुपलक्ष्यते । तेन च तदाक्षेपो लक्ष्यत इति लक्षितलक्षणयेत्यर्थः । लक्षितस्याप्यर्थस्यानुपपत्त्या यत्र लक्षणा सा लक्षितलक्षणा । वाच्यार्था-नुपपत्त्यैव व.ल्यमाना तु लक्षणैवेति विवेको द्रष्टव्यः । उपादानमुचितमित्यनन्तरं न तु करणपर्यायस्या-रम्भणशब्दस्येति शेषः । **बह्वीनां युक्तीनामिति** । आरम्भणशब्दादिभ्य इत्यत्रादिपदेन युक्तेः, पटवच्च, यथा प्राणादिः, इति सूत्रैश्चोक्तानां युक्तीनामित्यर्थः । ताश्च तत्त्वप्रकाशिकायां चन्द्रिकायां च प्रदर्शितास्तत्रैव द्रष्टव्याः ।

वं०प०— शाब्दात् प्राधान्यादित्यर्थः । बलवत्त्वोपपादनं **साधकतममिति** । आरभ्यतेऽनेनेति आरम्भणम् इत्यारम्भणशब्दस्य प्रधानरूपकरणवाचित्वात् । अधिकरणकारकस्य च करणापेक्षयाऽप्राधान्यादिति भावः । **युक्तीः** स्वतन्त्रकारणसद्भावसाधिकाः सत्प्रतिपक्षभूता उक्तयुक्तीरित्यर्थः । **आहेति** । तथा च तर्के इष्टापत्तिरिति भावः । **स्वतन्त्रकारणस्य** अबादेः ।

कं०रा०— लक्षितलक्षणयेति । 'किंस्विदासीदधिष्ठानमि'ति श्रुतावधिष्ठानस्याप्याक्षिप्तत्वेनारम्भण-शब्देनारम्भणादिकं लक्षयित्वा तद्द्वारा तदाक्षेपो लक्ष्यत इति लक्षितलक्षणमारम्भणशब्दादिभ्य इत्यनेनारम्भ-णाद्याक्षेपशब्दादिभ्य इत्येष एवार्थः प्रतिपाद्यत इत्यर्थः । **तथापीति** । 'किंस्विदासीदधिष्ठानमि'ति श्रुताव-धिष्ठानस्य प्रथमं निर्देशात् तदनुसारेण सूत्रेऽधिष्ठानशब्दादिभ्य इत्यधिष्ठानस्योपादानमुचितमित्यर्थः । 'साधकतमं करणमि'ति पाणिनिस्मृतेरारम्भणशब्दितकरणस्यार्थतः प्राधान्यात् तस्य च शाब्दप्राधान्यतो बलवत्वात् सूत्रकृतारम्भणमेव स्वशब्देनोपात्तं श्रुतौ प्रथमनिर्दिष्टमप्यधिष्ठानं तु लक्षितमित्याशयेन पठति **नेति** । **युक्तीरुपलभमान इति** । महदादिसृष्टिः कर्तृव्यतिरिक्तस्वतन्त्रकारणसापेक्षासृष्टित्वादित्यादि पूर्वपक्ष्युत्प्रेक्षित-युक्तीरुपलभमान इत्यर्थः । **प्रमाणैरुपलब्धेः प्रसङ्ग इति** । अनेन 'भावे चोपलब्धेरि'त्यत्र प्रमाणैरिति प्रसङ्ग इति पदं चाध्याहार्यमिति सूचितम् । **एवं मन्यत इति** । श्रुत्यननुगृहीताभ्यः पूर्वपक्ष्युत्प्रेक्षितबहुयुक्तीभ्यो-ऽप्यारम्भणाद्याक्षेपशब्देन स्वतन्त्रकारणान्तराभावपरेणानुगृहीतानां परतन्त्रो ह्यपेक्षन्ते स्वतन्त्रः किमपेक्षन्ते ।

साधनानां साधनत्वं यतः किं तस्य साधनैरित्यनेनोक्तानां ईश्वरः स्वतन्त्रकारणान्तरानपेक्षः पारतन्त्र्यरहितत्वात् स्वतन्त्रत्वात् साधनशक्तिप्रदत्वादिति व्यतिरेकीयुक्तीनां प्राबल्यात् तद्विरुद्धानां पूर्वपक्षयुक्तीनामप्रामाण्यमित्येवं सूत्रकारो मन्यत इत्यर्थः ।

श्रीनिधि०— लक्षितलक्षणेति । आरम्भणपदेन करणरूपं यद्यपि वाच्यम् । तथापि अधिष्ठानादेरप्याक्षेपेन न तन्मात्रपरत्वं वक्तव्यम् । तथा च लक्षणैवेति । **साधकतममिति** । अत्र सर्जनक्रियां करणं वक्तव्यम् । तदारम्भणपदेनोच्यत इति भावः । **कारणान्तराभावे प्रमाणोपन्यास इति** । 'किंस्विदासीदि'ति अधिष्ठानाद्याक्षेपकप्रमाणोपन्यास इत्यर्थः ।

शे०वा०— नन्वारम्भणाद्याक्षेपशब्दस्यैव कर्तृव्यतिरिक्तस्वतन्त्रकारणाभावसाधकत्वात् तदनन्यत्वमिति प्रतिज्ञातार्थसिद्ध्यर्थं सूत्रकृता आरम्भणाद्याक्षेपशब्दादिभ्य इत्येव वक्तव्यं, न तु 'आरम्भणशब्दादिभ्यः' इति; आरम्भणशब्दमात्रस्य विवक्षितार्थासाधकत्वात्; तथा च वक्तव्यानुक्तिरवक्तव्योक्तिश्च प्रसज्यत इत्यभिप्रेत्य शङ्कते **नन्विति** । **लक्षितलक्षणयेति** । सूत्रे आरम्भणशब्देन स्वार्थसहचार्यधिष्ठानादिकं लक्ष्यते । तथा चारम्भणादिशब्दादिति सिद्ध्यति । न चैतावतैव विवक्षितार्थः सिद्ध्यति । आरम्भणादिप्रतिपादकवाक्यस्य कर्तृव्यतिरिक्तस्वतन्त्रसाधनाभावाप्रतिपादकत्वात् अत आरम्भणशब्देनैवारम्भणाद्याक्षेपो लक्ष्यते । ततश्चारम्भणशब्देनैव लक्षितलक्षणया आरम्भणाद्याक्षेपे लब्धे आरम्भणशब्दादित्यस्यारम्भणाद्याक्षेपप्रतिपादकवाक्यादित्यर्थपर्यवसानान्न वक्तव्यानुक्तिरवक्तव्योक्तिश्च प्रसज्यत इत्यर्थः । वाच्यार्थानुपपत्त्यैकस्मिन्नर्थे लक्षिते सति तस्याप्यनुपपत्त्या पुनस्तेनैव शब्देनार्थान्तरमपि यत्र लक्ष्यते सा लक्षितलक्षणा । वाच्यार्थानुपपत्तिमात्रमूला तु लक्षणेत्येवं लक्षणा-लक्षितलक्षणयोर्विवेको द्रष्टव्यः । ननु श्रुतावधिष्ठानस्यारम्भणापेक्षया प्रथमं निर्देशेन प्राधान्यादधिष्ठानशब्दादिभ्य इति तस्यैव ग्रहणमुचितं न त्वप्रधानस्यारम्भणस्य । प्रधानमधिष्ठानं विहायाप्रधानस्यारम्भणस्योपादाने निमित्ताभावात् । तथा च वक्तव्यानुक्तिरवक्तव्योक्तिश्च सूत्रेऽवर्जनीये इत्याशङ्कते **तथापीति** । अधिष्ठानस्यारम्भणापेक्षया प्राधान्यं शाब्दम्, आरम्भणस्य चापेक्षया प्राधान्यमार्थं, शाब्दाच्च प्राधान्यादार्थस्य प्राधान्यस्य बलवत्त्वात् तद्विवक्षया सूत्रे आरम्भणशब्दस्यैवोपादानमुपपन्नमिति न वक्तव्यानुक्त्यादिप्रसङ्ग इत्याशयेन परिहरति **शाब्दादिति** । भवेदेतदेवं यद्यारम्भणस्याधिष्ठानापेक्षया प्राधान्यमेव स्यात् तदेव तु कुत इत्यत आरम्भणशब्दार्थस्य करणस्य क्रियासाधकेष्वतिशयितत्वस्य पाणिनिस्मृतिसिद्धत्वादित्याह **साधकतममिति** । **असङ्गत इति** । तेन स्वतन्त्रकारणाभावस्यासिद्धेरित्यर्थः । आरम्भणशब्दादेरागमतयोक्तार्थसाधकत्वाभावेऽप्यर्थापत्तितया तद्बोधकत्वसत्त्वाद्युक्तस्तस्य प्रमाणतयोपन्यास इति भावेनार्थापत्तिस्वरूपं दर्शयति **नैवमिति** । इतिशब्दस्यास्त्यत्राभिप्राय इति पूर्वेण सम्बन्धः । **बहीनामिति** । आरम्भणशब्दादिभ्य इत्यत्रादिपदेन 'युक्तेः', 'पटवच्च', 'यथा प्राणादिः' इति सूत्रैश्चोपात्तानामपरतन्त्रत्वस्वतन्त्रत्वसाधनसत्ताप्रदत्वादिरूपयुक्तीनामित्यर्थः ।

वा०र०— आरम्भणाक्षिप्रतिपादकवाक्यस्येति । वाक्यैकदेशस्येत्यर्थः । एकीभवन्तीत्यादि लक्षित-लक्षणस्थलसाधारण्याय सङ्ग्रहरूपेणाह **वाच्यार्थानुपपत्त्येति** । पृथगधिकरणेऽधिकं ज्ञेयम् । तस्यैवेत्यनन्तरं **प्रथममिति** शेषः । आरम्भणस्येत्यनन्तरं प्रथमं ग्रहणं उचितम् इति वर्तते । **पाणिनीति** । उक्तं च वाक्य-पदीये । क्रियायाः परिनिष्पत्तिः यः व्यापारानन्तरं विवक्ष्यते, यदा यत्र कारणं तत्तदा स्मृतम् इत्यादीति भावः । अधिकं .... । **स्वतन्त्रकारणाभावस्येति** । कारणाभावसिद्धावपि स्वातन्त्र्याभावासिद्धेः इत्यर्थः । स्वतन्त्रकारणाभाव एव सिद्ध्यतीत्युत्तरमूलस्यापि अयमर्थः । कारणसद्भावेऽपि तत्स्वातन्त्र्याभावः सिद्ध्यतीति । **युक्तीरिति मूलम्** । पूर्वपक्षयुक्तीरित्यर्थः । **आदिपदेन युक्तेः पटवच्चेत्यादि** । आदिपदेनोपात्तानामिति सम्बन्धः । ततश्चादिपदोपात्तानां अपरतन्त्रत्वसाधनसत्ताप्रदत्वरूपयुक्तीनां युक्तेरित्यादिसूत्रैश्चोपात्तानां सत्ता-प्रदत्वादीत्यादिपदोपात्तस्वपक्षे कारणत्वघटनादिरूपयुक्तीनामिति विवेको बोध्यः ।

स०व्र०— लक्षितलक्षणयेति । करणवाचकेन आरम्भणशब्देन साधनं लक्ष्यते । तेन च तदा-क्षेपशब्दो लक्ष्यत इति भावः ।

विठ्ठल०— लक्षितलक्षणयेति । आरम्भणशब्देनाधिष्ठानादिसाधनजातमुपलक्ष्यते । तेन तदाक्षेपो लक्ष्यते लक्षितलक्षणयेत्यर्थः । **अधिष्ठानस्योपादानमिति** । अधिष्ठानशब्दादिभ्य इत्येवमप्यधिष्ठानस्य स्वीकार उचित इत्यर्थः । आरम्भणशब्दार्थभूतोपादानकरणस्याधिष्ठानाद्यपेक्षया प्राधान्यं कथमित्यतः पाणिनिसम्मत्यो-पपादयति **साधकमिति** । उपादानकारणस्यैव साधकतमत्वादिति भावः । आरम्भणशब्दादिभ्यः इत्यस्या-नुपपत्तिमाशङ्क्य समाधत्ते **युक्तीति** । **महदादिसृष्टिरपीत्यादिना** पूर्वपक्षिणोदाहृतयुक्तीरित्यर्थः । **बह्वीनां युक्तीनामिति** । आरम्भणशब्दादिभ्य इत्यत्रादिपदेन पटवच्च यथा प्राणादिरिति सूत्राभ्यां चोक्तानां युक्तीनामित्यर्थः ।

॥ इति विविधाक्षेपनिराकरणम् ॥

॥ इति तदनन्यत्वमित्यादिसूत्रव्याख्यानम् ॥

* * *

॥ अथ तत्र सत्त्वाच्चावरस्य-असद्व्यपदेशादित्यादिसूत्रद्वयव्याख्यानम् ॥

॥ अथ तत्रादौ सत्त्वाच्चावरस्येतिसूत्रस्य द्विधा व्याख्यानम् ॥

॥ अथ तत्राप्यादौ प्रथमव्याख्यानम् ॥

७७ **सु०—** ''स्यादेतत् । 'अद्भ्यः सम्भूत' इत्यादिवचनात् कथं ब्रह्मातिरिक्तस्य स्वतन्त्रकारणस्यानुपलब्धिः । न चात्र न स्वातन्त्र्यं श्रूयत इति वाच्यम्, पारतन्त्र्यानुक्तौ स्वातन्त्र्यस्य लोकानुरोधादेव सिद्धेरिति । एतत्परिहाराय सूत्रम् ॐ **सत्त्वाच्चावरस्येति** ।

तस्या(यम)र्थः । स्यादयं दोषो यदि वयं ब्रह्मातिरिक्तं कारणमेव नास्तीति वदामः । न चैवम्, अवरस्यैव तदधीनस्य प्रकृत्यादेः कारणस्य सत्त्वादिति ॥ तदिदं परिहाराय न पर्याप्तम्, यावता पूर्वपक्षिणा पारतन्त्र्यानुक्तौ स्वातन्त्र्यमेव सेत्स्यतीत्युक्तम् । अन्यथा पूर्वपक्षस्य निर्दलत्वापत्तेः;" इत्यतः प्रकृत्यादेः कारणजातस्येश्वराधीनसत्ताकत्वे प्रमाणं दर्शयन् सूत्रं व्याचष्टे द्रव्यमिति ।

अनु०— 'द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः ।
यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ।'
इति श्रुतेस्तद्वशस्य भावः

चेतनाः जीवाः । **धृतिः** चित्प्रकृतिः, 'धारकत्वात्' इति श्रुतेः । प्रकृत्यादेः **तद्वशस्य भावः** अङ्गीक्रियते । अतः 'अद्भ्यः सम्भूत' इत्यत्रापि स्वातन्त्र्यासिद्धेर्नानुपलब्धिरयुक्तेत्यर्थः । यद्यपि आरम्भणशब्दादेः 'अद्भ्यः सम्भूत' इति श्रुतेश्च परस्परविरोधादर्थापत्त्यैवैषोऽर्थो लभ्यते, तथाऽपि मन्दापेक्षया स्पष्टश्रुत्युदाहरणम् ।

परि०— **लोकानुरोधादिति** । चैत्रो गच्छति भुङ्क्ते शेते इत्यादौ यथा स्वातन्त्र्यधीः तथेत्यर्थः । **अन्यथेति** । उक्तरीत्या स्वातन्त्र्योक्तिपर्यन्तं पूर्वपक्ष्यभिप्रायवर्णन इत्यर्थः । **ईश्वराधीनसत्ताकत्व इति** । तथा च अद्भ्य इत्यादिश्रुतौ साधनानां पारतन्त्र्यानुक्तावपि श्रुत्यन्तरे तदुक्तेः परतन्त्रसाधन एव तात्पर्यं साधनश्रुतीनामिति भावेन व्याचष्ट इत्यर्थः । **एषोऽथ इति** । प्रकृत्यादेरित्यादिनोक्तोऽर्थ इत्यर्थः ।

वं०प०— **एषोऽर्थ इति** । तद्वशस्य भाव इत्ययमर्थ इत्यर्थः ।

कं०रा०— चित्प्रकृतेर्धृतिशब्दवाच्यत्वं कथमित्यत आह **धारकत्वादिति** ।

श्रीनिधि०— **अन्यथा पूर्वपक्षस्य निर्दलत्वापत्तेरिति** । एवमनभिप्रेतत्व इत्यर्थः ।

शे०वा०— ननु द्रव्यं कर्म चेत्याद्युत्तरभाष्यमनर्थकम् । न चैतत्सत्त्वाद्यावरस्येत्येतत्सूत्रव्याख्यानार्थमिति वाच्यम् । तद्वशस्य भाव इति भाष्यखण्डेनैव तद्व्याख्यानसिद्ध्या शेषवैयर्थ्यानिस्तारात् । न चेश्वरव्यतिरिक्तप्रकृत्यादिसाधनानामीश्वराधीनत्वप्रदर्शनपरत्वान्न शेषवैयर्थ्यमिति वाच्यम् । तत्प्रदर्शनस्यापि निष्फल-

त्वात् । न च भावे चोपलब्धेरिति पूर्वसूत्रोक्तेश्वरव्यतिरिक्तस्वतन्त्रसाधनानां प्रमाणेनानुपलब्धिसमर्थनार्थत्वान्न तन्निष्फलमिति वाच्यम् । ईश्वरव्यतिरिक्तस्वतन्त्रसाधनोपलम्भकप्रमाणाभावेन तच्छङ्काया एवानुदयेन तदनुपलम्भ-समर्थनस्यापि निष्प्रयोजकत्वात् । न च 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्च' इत्येतदेव वाक्यं तच्छङ्काप्रापकमिति वाच्यम् । तत्र स्वातन्त्र्यस्याश्रवणेन तेन तत्प्राप्तेरयोगात् । कथञ्चित्तेन प्राप्तावपि 'सत्त्वाच्चावरस्य' इति सूत्रेणैव तच्छङ्कापरिहारात् प्रमाणदर्शनपरभाष्यानर्थक्यानिस्तारादित्यतः तत्प्रयोजनदर्शनपूर्वकमीश्वरव्यतिरिक्तसाधनानां प्रमाणेन स्वातन्त्र्योपलम्भशङ्कामुपपाद्य तत्परिहारकतया सूत्रमेवावतार्य तेन तस्यापरिहृतत्वं चोपपाद्य तच्छङ्का-निरासायेश्वरव्यतिरिक्तसाधनानामीश्वराधीनतायां प्रमाणोपदर्शकतयोत्तरभाष्यं योजयितुं तच्छङ्कामुत्थापयति **स्यादेतदिति** । ननु पारतन्त्र्यानुक्तौ स्वातन्त्र्यमेव सेत्स्यतीत्येतावत्पर्यन्तमत्र पूर्वपक्ष एव न क्रियते, तत्कथं सूत्रस्य परिहाराय न पर्याप्तत्वमित्यत आह **अन्यथेति** । 'अद्भ्यः सम्भूत' इति वाक्येनेश्वरव्यतिरिक्तस्वतन्त्र-साधनालाभेन ब्रह्मातिरिक्तस्वतन्त्रकारणानुपलब्धेरप्रत्यूहत्वेन तदाक्षेपायोगादिति भावः । अत्र चेतनाशब्दस्य मनोवृत्तिविशेषचेतनापरतायां 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च' इत्यादिवाक्यान्तरविरोधप्रसङ्गात् तदनुरोधेन चेतनाशब्दो जीवपर इत्याह **चेतना जीवा इति** । धृतिशब्दस्य कथं चित्प्रकृतिपरत्वमित्यतो योगेन तदित्याशयेन यौगिकमर्थमाह **धारकत्वादिति** । सर्वाधारत्वादित्यर्थः । 'आकाश एव तदोतं च प्रोतं चेती'ति श्रुतेरिति भावः । अत्र द्रष्टव्यादिपदार्थस्तु जिज्ञासाधिकरणोक्तरीत्या प्रतिपत्तव्यः । तावता कथमुक्तशङ्का-परिहार इत्यतस्तं दर्शयति **इति श्रुतेरित्यादिना** । **एषोऽर्थ इति** । द्रव्यं कर्म चेत्येतत्प्रमाणोदाहरणसाध्योऽर्थ इत्यर्थः । तथा च भाष्यकारीयं तदुदाहरणमनर्थकमिति भावः ।

वा०र०— वाक्यान्तरविरोधप्रसङ्गात् तदनु इति प्रसङ्गपदं पञ्चम्यन्तम् । प्रसङ्गस्तदन्विति प्रथमान्तं लेखकदोषात् । **जिज्ञासाधिकरणोक्तरीत्येति** । द्रव्यशब्देन प्रकृत्यादिकं तत्त्वमुच्यते । कर्मेति धर्माधर्मौ स्वभावः प्रकृत्यादीनां परिणामादिः । इत्याद्युक्तरीत्येत्यर्थः । **शेषं पूरयतीति** मूले भावः इत्यनुवादेनावगम्यते इत्येव शेषपूरणमिति स्पष्टमित्याशयेनात्रापि यथास्थितमूलानुवाद इति ज्ञेयम् ।

विठ्ठल०— **अद्भ्यः सम्भूत इत्यादिवचनादिति** । 'अद्भ्यः सम्भूतः', 'पृथिव्यै रसाच्चे'त्यादि-वचनादित्यर्थः । **लोकानुरोधादेवेति** । 'देवदत्तो घटं करोती'त्यादौ स्वातन्त्र्यस्यैव लोके प्रतीतेः । तदनुसारादित्यर्थः । यावता यस्मादित्यननुस्वातन्त्र्यपर्यवसायितया पूर्वपक्षोपवर्णनं कुतः क्रियते येन सूत्रस्य पूर्वपक्षाच्छादकत्वासम्भवेनापर्याप्तता स्यादित्यत आह **अन्यथेति** । स्वातन्त्र्योक्तिपर्यन्तं पूर्वपक्षाभिप्रायवर्णन इत्यर्थः । तथा चाद्भ्य इत्यादिश्रुतौ कारणानां पारतन्त्र्यानुक्तावपि श्रुत्यन्तरेऽपि तदुक्तेः तद्बलादत्रापि तत्रैव तात्पर्यं सेत्स्यतीति । स्वतन्त्रकारणानुपलब्धिर्युक्तेत्येवं तात्पर्यकत्वादस्य सूत्रस्य नापर्याप्ततेति भावेन लब्धार्थमाह **तत्राद्य इति** ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ तत्र द्वितीयव्याख्यानम् ॥

७८ सु०— यद्वा 'स्वतन्त्रकारणान्यत्वं निषिध्यत' इत्यनेन परतन्त्रकारणान्तरसद्भावः सूचितः, अन्यथा कारणान्यत्वमित्येव स्या(ब्रूया)त् । (स) परतन्त्रकारणसद्भावः कुत इत्यत आह **व्यमिति** । **भावः** गम्यत इति शेषः । अत्र तद्वशत्वं विधेयम्, कारण-सद्भावस्य परेणाप्यङ्गीकृतत्वात् ।

वं०प०— कारणसद्भावमात्रमेव विधेयं किन्न स्यादित्यत आह **कारणेति** ।

श्रीनिधि०— अत्र **तद्वशत्वमिति** । अस्य व्याख्यान इत्यर्थः ।

शे०वा०— अस्मिन्पक्षे भाष्यकारीयप्रमाणोपन्यासस्य मन्दविषयत्वं कल्पनीयं भवति इत्यपरितोषात् सत्त्वाच्चावरस्येत्येतत्सूत्रशेषत्वं परित्यज्य तदनन्यत्वमित्यादसूत्रशेषत्वमेवाङ्गीकृत्य कथमस्य तेन सङ्गति-रित्यतस्तदपेक्षितार्थप्रतिपादकतां दर्शयति **यद्वेति** । ज्ञापकश्चायमर्थो न कारक इत्याशयेन योग्यं शेषं पूरयति **भावोऽवगम्यत इति शेष इति** । अत्र **तद्वशत्वमेव विधेयमिति** । तस्यैव जिज्ञासितत्वादिति भावः । भावोऽपि विधेयः किन्न स्यादित्यतस्तस्याजिज्ञासितत्वान्नैवमित्यभिप्रेत्य तस्याजिज्ञासिततायां हेतुमाह **कारणेति** ।

स०व्र०— अत्र **तद्वशत्वमिति** । तद्वशस्य भावः इत्यत्रेत्यर्थः ।

विठ्ठल०— यदेतत्प्रधानादिसाधनजातमभ्युपगतं तस्य सत्त्वादिकमपि पराधीनमित्यत्र प्रमाणमाहेति सन्न्यायरत्नावल्यनुसारेणेति योजयति **यद्वेति** । परतन्त्रकारणसद्भावः कुत इत्यस्य विद्यमानकारणजातस्य पारतन्त्र्यं कुत इत्यर्थोऽभिधेयः ।

॥ इति द्वितीयव्याख्यानम् ॥

॥ इति सत्त्वाच्चावरस्येतिसूत्रस्य द्विधा व्याख्यानम् ॥

* * *

॥ अथ तत्र असद्व्यपदेशादित्यादिद्वितीयसूत्रव्याख्यानम् ॥

॥ अथ तत्रादौ आक्षेपसिद्धान्तयोरर्थः ॥

७९ सु०— ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ इति सूत्रम् ।

तत्र आक्षेपस्यायमर्थः । 'नासदासीन्नोसदासीत्तदानीमि'ति महाप्रलये मूर्तामूर्तादिरशेषस्यासत्त्वव्यपदेशात् कारणोपलब्धिपरिचोदना, तस्येश्वरवशस्याङ्गीकारेण समाधानं च नोपपद्यते । न चायं पक्षः 'असदिति चेत्' इत्यादिनैव निराकृतः, तत्रेश्वरस्याप्यनङ्गीकारात्, इह पुनरीश्वरमङ्गीकृत्य कारणान्तरनिराकरणात् । न च 'अद्भ्यः सम्भूतः' इत्यादिविरोधः, अत्र महाप्रलये कारणान्तरसद्भावस्याश्रवणात्, ईश्वरातिरिक्तकर्तृकासु सृष्टिष्वबादिकारणसद्भावपरत्वाच्च । एवञ्चारम्भणशब्दादयोऽपि समञ्जसा भवन्तीति ।

(अत्र) नेति सिद्धान्तांशं व्याचष्टे **द्रव्यमिति** । न महाप्रलये कारणान्तरस्याभावो वाच्यः, किन्तु **तद्वशस्य भाव एव** । तस्य तद्वशत्वं कुत इति चेत्, **द्रव्यमिति श्रुतेरिति** ।

परि०— 'मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते' इत्यादिवाक्यानुरोधेनार्थमाह **मूर्तामूर्तेति** । पृथिव्यादित्रयं मूर्तं, अमूर्तं च वायुरन्तरिक्षं च । **एवञ्चेति** । साधनमात्रस्यासत्त्वेऽङ्गीकृते सति स्वातन्त्र्यापेक्षार्थपर्यन्तत्वकल्पनाक्लेशेन विना स्वरूपमात्राक्षेपपरतया स्वरसा भवन्तीत्यर्थः ।

वं०प०— **समाधानं** सत्त्वाच्चावरस्येत्यनेनोच्यमानम् । **अत्र** 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्चे'ति वाक्ये । **एवञ्चेति** । प्रलये कारणान्तरस्येश्वरातिरिक्तस्याभावेनारम्भणाद्याक्षेपो युक्त इत्यर्थः ।

श्रीनिधि०— **महाप्रलये कारणान्तरसद्भावस्याश्रवणादिति** । तथा चादिकालीना सृष्टिर्निर्हेतुकैव भविष्यति । न हि प्रलये असतो आदिकालीनसृष्टिं प्रति करणत्वं युक्तमिति भावः ।

शे०वा०— अस्मिन्पक्षे 'न पर इत्यत' इत्युत्तरखण्डस्य पूर्वेण सह सङ्गत्यलाभाद्वैयर्थ्यमित्यतस्तत्परित्यागेन द्रव्यमित्यादेरसद्व्यपदेशादित्येतत्सूत्रस्थ 'न' इति सिद्धान्तखण्डव्याख्यानत्वेन तच्छेषत्वान्न वैयर्थ्यमित्यभिप्रेत्य तच्छेषतया योजनां दर्शयितुं स्पष्टतया शिष्यैरेव व्याख्यातुं शक्य इति भावेन भाष्यकृताऽव्याख्यातमेतत्सूत्रीयपूर्वपक्षखण्डं सूत्रमुपन्यस्य स्वयं व्याचष्टे **असदित्यादिना** । **विरोध इति** । अत्र कारणान्तरश्रवणादिति भावः । न कारणान्तरसद्भावश्रवणस्य नासदासीदिति तदसत्त्वव्यपदेशविरोधित्वं कालभेदेनोपपन्नतत्सत्त्वासत्त्वविषयत्वेन श्रवणद्वयस्य भिन्नविषयत्वात् । किन्तु यत्कालावच्छेदेन नासदासीदिति कारणान्तरस्यासत्त्वं वर्णितं तत्कालावच्छेदेन कारणान्तरसत्त्वाभिधानस्यैव । न चाद्भ्यः सम्भूत इति कारणान्तरबोधकवाक्यं महाप्रलये तत्सद्भावमवगमयति येन विरोधः स्यादित्याशयेन परिहरति **अत्रेति** । नासदासीदितीश्वरकर्तृकसृष्टौ कारणान्तरासद्भावपरम् । तस्य चेश्वरकर्तृकसृष्टावेव कारणान्तरसद्भावश्रवणेन विरोधो वाच्यः । न चाद्भ्यः सम्भूत इतीश्वरकर्तृकसृष्टौ कारणान्तरसद्भावपरं, येन तद्विरोधः स्यात् किन्तु तदतिरिक्त-

कर्तृकासु सृष्टिष्ववादिकारणान्तरसद्भावपरं तत्कथं विरोध इत्याह **ईश्वरेति** । **एवञ्चेति** । प्रकारद्वयेन वाक्यद्वयस्य भिन्नविषयतायां सिद्धायामित्यर्थः । **समञ्जसं भवतीति** । तेषां स्वारस्येन सर्वथा कारणान्तराभावावगमकत्वादीश्वरकर्तृकसृष्टौ च तद्बोधितस्य सर्वथा कारणान्तराभावस्य च सत्त्वात् सामञ्जस्यम् अन्यथा तु ईश्वरकर्तृकसृष्टावपि स्वतन्त्रकारणान्तरनिषेधकत्वादसामञ्जस्यं तेषामिति भावः । इतिशब्दस्य इत्ययमर्थ इति सम्बन्धः । द्रव्यमित्यादेर्भाष्यस्य न साक्षात् 'न' इति सिद्धान्तांशव्याख्यानत्वं सम्भवतीत्यत आकाङ्क्षाक्रमेणापेक्षितपूरणपूर्वकं तद्योजयति **नेत्यादिना** ।

वा०र०— द्रव्यमित्यादेरिति । आदिपदेन न परः इत्येतद्भाष्यपरिग्रहः । **न वैयर्थ्यमिति** । द्रव्यमित्यादेरिति वर्तते । न परः य इत्यस्य वैयर्थ्यपरिहाराय प्रवृत्तेन द्रव्यमित्यादिपूर्वभाष्यस्यापि योजनान्तरेण सार्थक्योत्या पूर्वमाशङ्कितवैय्यर्थ्यपरिहारः सिद्धो भवतीति भावेन द्रव्यमित्यादि सम्पूर्णभाष्यग्रहणमिति ज्ञेयम् । एतेन न परः इत्येतद्भाष्यवैय्यर्थ्ये शङ्किते तद्वैय्यर्थ्यपरिहारमात्रसङ्गतत्वेऽपि द्रव्यमित्यादिपूर्वभाष्यस्यापि वैय्यर्थ्यपरिहारो न सङ्गतः इति शङ्का निरस्ता भवति । कारणान्तरसत्त्वाभिधानस्यैव इत्यनन्तरं असत्त्वव्यपदेशविरोधित्वं इति वर्तते । **नासदासीदिति इति** । नासदासीत् इत्येतद्वाक्यमित्यर्थः । **सम्भूत इतीति** । अद्वयः सम्भूत इत्येतद्वाक्यमित्यर्थः । **स्वारस्येनेति** । सत्त्वाद्यावरस्येत्येतत्सूत्रोक्तकारणसद्भावमाश्रित्याक्षेपस्यार्थापत्तिविधया स्वतन्त्रकारणाक्षेपकत्वे तु स्वारस्यं सर्वथा कारणान्तराभावावगमकत्वे तु इतरापेक्षाभावात् स्वारस्यं इत्याशयः । कारणान्तराभावस्य सत्त्वादिति पाठः । चशब्दोऽधिकः लेखकागतः । मूलकोशेऽपि शोधितस्यैव सत्त्वात् । कारणान्तराभावस्य सत्त्वं च नासदासीत् इत्यादि सिद्धमिति प्रागेवोक्तं इत्याशयः । **सामञ्जस्यमिति** । स्वारस्येन प्रतिपादितार्थपरित्यागाभावात् इत्याशयः । **अन्यथा त्विति** । सर्वथा कारणान्तराभावावगमकत्वातिरिक्तं स्वतन्त्रकारणान्तरनिषेधकत्वाभ्युपगमे त्वित्यर्थः । **ईश्वरकर्तृकसृष्टावपि** इत्यनेन इदमाह । ईश्वरकर्तृकसृष्टिर्हि नासदासीत् इत्यादिना सर्वथा कारणान्तरसद्भावशून्यतया प्रमिता तस्यारम्भणशब्दादिना कारणान्तराभावमात्रप्रतिपादनमेव स्वरसम् । स्वतन्त्रकारणान्तरनिषेधस्तु अप्रसक्तिपराहत इति स्वतन्त्रकारणान्तरप्रसक्तिशून्यायामपि ईश्वरकर्तृसृष्टौ स्वतन्त्रकारणान्तरनिषेधस्यानुपपन्नत्वात् तन्निषेधकारम्भणशब्दादेः अस्वारस्यं अवर्जनीयमेवेति । स्वतन्त्रकारणान्तरनिषेधकत्वात् तस्य चायोगादिति शेषः ।

विठ्ठल०— उत्तरसूत्रसिद्धान्तांशपरतयापीदमेव वाक्यं योजयितुं सूत्रं पठित्वा पूर्वपक्षांशं स्वयं व्याचष्टे **असद्व्यपदेशादित्यादिना** । 'मूर्तं सदिति संप्रोक्तममूर्तमसदुच्यत' इत्याद्यनुसारेण मूर्तामूर्तेति गतार्थतामाशङ्क्य परिहरति **न चेति** । **अत्र महाप्रलयेति** । आदिकाले एवाबादिसृष्ट्यङ्गीकारेणाप्युपपत्तेरिति भावः । अनीश्वरकर्तृकावान्तरसृष्टिपरत्वेनापि तद्वाक्योपपत्तिरित्याह **ईश्वरातिरिक्तेति** । **समञ्जसा भवन्तीति** । आरम्भणादिस्वरूपस्येवाक्षेपपरत्वसम्भवेन मुख्यार्था भवन्तीत्यर्थः ।

॥ इति आक्षेपसिद्धान्तयोरर्थः ॥

* * *

॥ अथ असद्व्यपदेशादित्यादिद्वितीयसूत्रव्याख्याने अभ्यधिकाशङ्कात्रयपरिहारः ॥

॥ अथ तत्रादौ प्रथमाभ्यधिकाशङ्कापरिहारः ॥

८० सु०— ननु 'नासदासीदि'ति सर्वस्यासत्त्वव्यपदेशात्कथं नेति, अत उक्तं **'धर्मान्तरेण'** इति । **तद्व्याचष्टे तद्वशस्येति** । **सावधारणं चेदम्** । **तद्वशस्य एव भावः प्रलये, न स्वतन्त्रस्य** । ततः **स्वातन्त्र्यलक्षणधर्मविशेषाभिप्रायेणासत्त्वव्यपदेशो युज्यते** ।

उपलक्षणमेतत् । **यथोक्तं** भाष्ये **'यत्खलु परतन्त्रमव्यक्तं कार्यानभिमुखं तदसदिति व्यपदिश्यते'** ।

परि०— यथोक्तं भाष्य इति । 'अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण हि तदुच्यते' इति धर्मान्तरमप्युक्तमिति अव्यक्तत्वादिधर्मान्तरमपि निषेध्यतयाऽत्र ग्राह्यमित्यर्थः ।

वं०प०— 'अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण तदुच्यते' इत्युक्तं भाष्ये । तदुपपादयति **यत्खल्विति** । अव्यक्तमित्यस्य विवरणं **कार्यानभिमुखमिति** ।

कं०रा०— उपलक्षणमिति । तद्वशस्येत्येतदव्यक्तत्वादेरुपलक्षणमित्यर्थः । उपलक्षणत्वं कुत इत्यत आह **यथोक्तमिति** । अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण तदुच्यत इति भाष्ये **यथोक्तं** तथात्र वक्तव्यत्वादुपलक्षणत्वमाश्रयणीयमिति भावः ।

शे०वा०— एवं सूत्रे नेति प्रतिषिद्धप्रकारप्रतियोग्याकाङ्क्षितप्रकारविशेषसमर्पकतया 'तद्वशस्य भावः' इति भाष्यं योजितम् । इदानीं तु भाष्ये धर्मान्तरेणेति सूत्रखण्डस्य पृथग्व्याख्यानप्रयुक्तन्यूनतापरिहाराय तद्व्याख्यानतयाऽप्येतदेव व्यापारयितुं सूत्रे धर्मान्तरेणेत्येतन्निरासनीयशङ्कामुत्थापयति **नन्वित्यादिना** । तद्वशस्येत्यादेर्धर्मान्तरेणेत्येतद्व्याख्यानत्वस्फोरणायापेक्षितं पूरयति **साधारणं चेदमिति** । तदेवाभिनयेन दर्शयति **तद्वशस्यैवेति** । **स्वातन्त्र्यलक्षणधर्मविशेषाभिप्रायेणेति** । स्वातन्त्र्यलक्षणधर्मावच्छिन्नकारणाभावस्य 'सविशेषणे ही'ति न्यायेन प्रथमप्राप्तस्वातन्त्र्यरूपविशेषणमात्रविषयत्वमभिप्रेत्येदमुक्तमिति ध्येयम् । **उपलक्षणमेतदिति** । तद्वशस्यैव भाव इत्येतदव्यक्तकार्यानभिमुखस्यैव च भाव इत्यस्योपलक्षणम् । ततश्च व्यक्तत्वकार्याभिमुखत्वरूपधर्मविशेषाभिप्रायेणासत्त्वव्यपदेशो युज्यत इत्यपि द्रष्टव्यम् । नन्वत्र तद्वशस्यैव भाव इत्येतत् यथाश्रुतमेवास्तु किमुपलक्षणत्वाश्रयणेनेत्यतो भाष्यानुसारादित्यभिप्रेत्योक्तस्य सर्वस्य भाष्यारूढतां दर्शयति **यथोक्तं भाष्य इति** । 'अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण हि तदुच्यते' इति तद्वाक्यादिति भावः । इदं

च भाष्यं विशिष्टनिषेधे सति योऽर्थ उपलक्ष्यते तत्प्रदर्शनपरमेव न तु निषेध्यतावच्छेदकधर्मप्रदर्शनपरमित्यविरोध इत्यवधेयम् । ननु च तद्वशस्यैव भाव इत्यस्यैवोपलक्षणत्वे स्वायत्तन्यायविरोध इत्यतः स्वतन्त्रप्रयोग एव तथा । न चायं स्वतन्त्रप्रयोग इति भावेन अस्वतन्त्रप्रयोगतां दर्शयति **यत्त्वित्विति** ।

वा०र०— प्रकारप्रतियोगीति । स्वतन्त्रकारणत्वरूपाकारविरोधो हि तद्वशे कारणत्वं भवतीति तद्वशाकारणत्वप्रतियोगि इति भावः । तादृशमपि कारणत्वं कुतोऽभिधेयं इत्यत उक्तं **आकाङ्क्षितेति** । यदि न स्वतन्त्रकारणत्वं तर्हि कीदृशं वात्र प्रकृत्यादेः कारणत्वं इत्याकाङ्क्षायामित्यर्थः । **सूत्रे** धर्मान्तरेण इत्येतदिति सूत्रे विद्यमानेत्यर्थः । सूत्रस्थधर्मान्तरेण इत्येतदिति यावत् । **प्रथमप्राप्तेति** । निष्कृष्यविशेष्योपस्थित्यपेक्षया विशेषणोपस्थिते प्राथम्येन विशेषणस्य प्रथमप्राप्तत्वादित्यर्थः । विशदं चैतत् प्रागेव न्यायोपपादनावसरे इति ज्ञेयम् । उपलक्षणं चैतत् । तद्व्याख्यानेत्यपि द्रष्टव्यं इति स्वरसः पाठः । तथापाठाभावेव द्रष्टव्यं इत्यनन्तरं इत्यर्थ इति शेषः । तेन द्रष्टव्यमित्यन्तस्य मूलव्याख्यानतया इत्यर्थः इत्यस्याभावे मूलार्थत्वालाभः इति परास्तम् । ननु भाष्ये स्वतन्त्रव्यक्तत्वादि धर्मान्तरावच्छिन्नस्य कारणस्याभावेनासत्त्वव्यपदेशस्यानुक्तेः परतन्त्रत्वादिधर्मान्तरेणैव च तदुक्तेः कथं भाष्यं अत्रोक्तार्थे सम्मतितया वक्तुं शक्यं अनेकार्थत्वाभावात् इत्यत आह **इदं च भाष्यमिति** । **अविरोध इति** । सम्मतितया प्रदर्शनायोगरूपविरोधो नेत्यर्थः । **ननु च तद्वशस्यैव भाव इत्यस्येति** । अत्र श्रौततच्छब्दस्येति शेषः । तथा च श्रौतो सत्त्वव्यपदेशः उपलक्षणया तद्वशस्यैव प्रतिपादयतीत्यङ्गीकारे स्वायत्तन्यायविरोधः । श्रुतावपि स्वतन्त्रं व्यक्तं कार्याभिमुखं च कारणं नासीत् इत्येव वक्तव्यतया उपलक्षणया तदर्थप्रतिपादनायासत्त्वव्यपदेशोऽस्मदायत्ते वाक्प्रयोगे किमवाचकशब्दं प्रयुञ्महि इति न्यायविरोधादिति भावः । **तद्वशस्यैव भावः इत्यस्य** इत्यस्य इत्यादेरित्यर्थः । तद्वशस्येत्येव भावः इत्याद्यर्थकत्वपाठस्तु स्वरस एव । केचित्तु तद्वशस्यैव भावः इत्यस्योपलक्षणत्वे अव्यक्तत्वकार्यानभिमुखत्वोपलक्षणत्वे इत्येवार्थः । स्वायत्तन्यायविरोधो भाष्यकारस्य । **न चायं स्वतन्त्र इति** । असद्व्यपदेशस्य तद्वशस्यैव भावः इत्येतत् स्वातन्त्र्येण व्याख्यानं न । किन्तु परतन्त्रं अव्यक्तं इत्याद्युत्तरवाक्यैकदेशानुवादमात्रम् । न च एकदेशान्तरे प्रसिद्धे सति एकदेशे एकदेशान्तरलक्षणाशयेन उक्ते स्वायत्तन्यायविरोध इति । तथाविधस्थलानां बहूनां उपलम्भेन बहुविप्लवापातात् इत्याशय इति वर्णयन्ति ।

विठ्ठल०— उपलक्षणमिति । तद्वशस्येत्येतदव्यक्तत्वादेरुपलक्षणमित्यर्थः । तत्कुत इत्यत आह **यथोक्तमिति** । 'अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण हि तदुच्यते' इति भाष्ये यथोक्तं तथात्र वक्तव्यत्वादुपलक्षणत्वमाश्रयणीयमिति भावः । भाष्योक्तमेवाह **यत्त्वित्विति** ।

॥ इति प्रथमाव्यभिकाराक्षपरिहारः ॥

* * *

॥ अथ तत्र द्वितीयाभ्यधिकाशङ्कापरिहारः ॥

८१ **सु०— कुतः श्रुतेः मुख्यार्थपरित्यागेनामुख्यार्थोऽङ्गीक्रियते । 'तम आसीत्' इत्यादिवाक्यशेषात् । न च तमो ब्रह्म, 'आनीदवातम्' इति तस्य पृथगवस्थानोक्तेः । न चानन्तप्रकाशस्य तमस्त्वमुपपद्यते, किन्तु प्रकृतेरेव; आच्छादकत्वादेरिति ।**

परि०— सूत्रांशमवतारयति **कुत इति** । **आनीदवातमिति** । वातप्रेरणं विना आनीत् अचेष्टत । अन चेष्टायामिति धातोरित्यर्थः । **आच्छादकत्वादेरिति** । ग्लानिकरत्वज्ञानप्रतिबन्धकत्वादिः आदिपदार्थः ।

वं०प०— तर्हि तमःशब्दवाच्यं किमिति पृच्छति **किन्त्विति** । उत्तरमाह **प्रकृतेरेवेति** । तमस्त्वमिति वर्तते । केन निमित्तेनेत्यत आह **आच्छादकत्वादेरिति** । तमःप्रकृत्योरुभयोरप्याच्छादकत्वसाम्यादिति भावः ।

कं०रा०— न चेति । तम आसीदिति वाक्ये तमःशब्दितं ब्रह्मेति न च । वातप्रेरणारहितमेकं सर्वोत्तमं तद्ब्रह्म तदानीं प्रलयकाले स्वधया सुखेन आनीदचेष्टतेति ब्रह्मणः पृथगवस्थानोक्तेरित्यर्थः । न केवलमानीदवातमिति ब्रह्मणः पृथगवस्थानोक्तेस्तम आसीदित्यत्र तमःशब्देन ब्रह्मग्रहणे पुनरुक्तिप्रसङ्गः । किं त्वनन्तप्रकाशस्य ब्रह्मणः तमःशब्दितत्वं च न सम्भवतीत्याह **न चेति** । तर्हि कस्य तमःशब्दितत्वं सम्भवतीति पृच्छति **किं त्विति** ।

शे०वा०— सौत्रवाक्यशेषादित्यस्य वैयर्थ्यमाशङ्क्य नासदासीदिति निषेधस्य स्वरूपविषयकत्वोपपत्तेर्न स्वातन्त्र्यादिधर्मान्तरविषयकत्वमित्याशङ्कापरिहाराय स्वरूपनिषेधे बाधकोपदर्शनपरत्वान्न तदिति भावेनोक्तशङ्कानिवर्तकतया सूत्रखण्डं योजयति **कुत इति** । वाक्यशेषस्थतमःशब्दस्य ब्रह्मपरतयाऽस्य वाक्यस्य ब्रह्मणः प्रलयेऽवस्थानप्रतिपादकतया सावकाशत्वेन प्रकृत्यादिसत्त्वाप्रतिपादकत्वान्न नासदासीदिति स्वरूपेण प्रकृत्यादिनिषेधस्य वाक्यशेषस्य बाधकतेति भावेन शङ्कते **न चेति** । नापीत्यर्थः । अनन्तप्रकाशस्येति हेतुगर्भविशेषणम् ।

यद्वा ननु 'न पर' इत्युत्तरवाक्यमनर्थकम् । न चेदं वाक्यशेषादित्येतत्सूत्रखण्डव्याख्यानरूपत्वान्नानर्थक्यमिति वाच्यम् । तम आसीदिति वाक्यशेषादिति भाष्यानुरोधेन वाक्यशेषादित्यस्यान्यार्थत्वेनैतदर्थत्वस्य तद्विरुद्धत्वेन सूत्रखण्डव्याख्यानरूपत्वायोगादित्यतः सति तस्मिन्व्याख्याने प्रकारान्तरेणेदमनुभाष्य-

काराणां तद्व्याख्यानमिति तत्परोत्तरभाष्यानर्थक्यमित्यभिप्रेत्य भाष्यदिशा सूत्रखण्डं व्याख्याय तत्र प्रसक्तानुपपत्तिमाशङ्क्य तत्परिहारेण तदुपपादकतयाऽस्य सम्भवदुक्तिकतां चोपपाद्यात्रापि प्रसक्तानुपपत्तिशङ्काप्रदर्शनपूर्वकं तत्परिहाराय प्रकारान्तरेण सूत्रखण्डव्याख्यानपरतयोत्तरभाष्यं सङ्गमयितुं भवेदेतदेवं यदि वाक्यशेषादिति सूत्रखण्डस्यैव प्रयोजनं किञ्चिद्भवेत् । न चैवम् । पूर्वखण्डेनैवोक्ताक्षेपसमाधानादित्यतः प्रकृत्यादिस्वरूपनिषेधस्य मुख्यनिषेधत्वात् सार्वज्ञादिधर्मनिषेधस्य चामुख्यत्वात् 'मुख्यामुख्ययोश्च मुख्ये सम्प्रत्ययः' इति न्यायेन मुख्यस्यैव ग्राह्यत्वात् नासदासीदिति निषेधस्य प्रकृत्यादिस्वरूपनिषेधरूपमुख्यार्थपरित्यागेन सार्वज्ञादिधर्मनिषेधरूपामुख्यार्थपरत्वाश्रयणं धर्मान्तरेणेति पूर्वोक्तं तन्न्यायविरोधादयुक्तमिति शङ्कायामसति बाधके मुख्यार्थपरित्यागेनामुख्यार्थपरत्वाश्रयणस्य न्यायविरुद्धत्वेऽपि प्रकृते प्रकृत्यादिस्वरूपनिषेधार्थत्वे प्रलये तत्सत्त्वप्रतिपादकवाक्यशेषरूपबाधकस्य सद्भावाद्युज्यते मुख्यार्थपरित्यागेनामुख्यार्थाश्रयणमिति पूर्वोक्तधर्मनिषेधपरत्वसमर्पणार्थत्वान्न सूत्रखण्डवैयर्थ्यमपीत्याशयवांस्तद्भावबावर्त्यतया मुख्यामुख्यन्यायविरोधशङ्कां तावदुत्थापयति **कुत इति** । कुतो बाधकादित्यर्थः । बाधकाभावेनामुख्यार्थाश्रयणमन्यथाऽतिप्रसङ्गादिति भावः । भवेद्वाक्यशेषस्य स्वरूपनिषेधबाधकत्वम् । यदि वाक्यशेषस्थतमश्शब्दस्य प्रकृत्यादिपरत्वं स्यात् । न चैतदस्ति । तस्य ब्रह्मपरत्वादिति बाधकस्यावकाशतामाशङ्क्य निषेधति **न चेति** । **पृथगिति** । तथा च तेन पौनरुक्त्यप्रसङ्गान्न तमःशब्दस्य ब्रह्मपरत्वमाश्रित्य तस्य प्रलयेऽवस्थानपरमेतद्वाक्यमङ्गीकर्तुमुचितमिति भावः । प्रवृत्तिनिमित्तविरहाच्च न तमश्शब्दस्य ब्रह्मपरतेत्याह **न चेति** । नापीत्यर्थः । यद्यप्यन्यगततमस्त्वस्य भगवदधीनत्वात् स्वातन्त्र्यं निमित्तमादाय तमश्शब्दप्रवृत्तिनिमित्तं व्युत्पादयितुं शक्यते तथाऽपि प्रवृत्तिनिमित्तस्य तद्गतत्वमेव शब्दप्रवृत्तिनिमित्तमिति मतमाश्रित्येदमुक्तमिति ध्येयम् । अनन्तप्रकाशस्येति हेतुगर्भविशेषणम् । अनन्तप्रकाशत्वादित्यर्थः ।

वा०र०— नासदासीदिति इति । इत्यनेनेत्यर्थः । **न चेतीति** । द्विः प्रतीकोपादानपाठः । **एतदर्थत्वस्येति** । 'तस्माद्धान्यन्न परः किञ्च नासीत्' इति वाक्यशेषात् प्रकृत्यादेः स्वातन्त्र्याभावः इत्येतदर्थत्वस्येत्यर्थः । अस्य सम्भवदुक्तिकतां चोपपाद्येत्य(?)तथास्येत्यस्य भाष्यव्याख्यानस्येत्यर्थः । **प्रकारान्तरेण सूत्रखण्ड इति** । भाष्यकारीयप्रकारापेक्षया प्रकारान्तरेण इत्यर्थः । अत्र प्रकारान्तरेणेत्येतत् मध्यदीपिकान्यायेन प्रकारान्तरेण तत्परिहाराय इति पूर्वशेषतयापि योज्यम् । अर्थापत्तिरूपप्रकारस्य स्वयमेवाभिधानेन तेनापि मुख्यार्थत्यागेनामुख्यार्थस्वीकारः कुतस्त्वाशङ्कापरिहारसिद्धेः प्रकारान्तरेण व्याख्यानस्यापि परिहारे उपायान्तरत्वादिति बोध्यम् । स्वातन्त्र्यादिधर्मनिषेधस्येत्यादिः स्वातन्त्र्यपदघटित एवोत्तरत्र पाठः । मध्ये मध्ये सार्वज्ञ्यादि इत्यादिरूपः पूर्वोत्तरबहोक्तिसंदर्भविरुद्धपाठस्तु लेखकदोषात् । स्वाधीनसत्तादिमतः सार्वज्ञ्यं नियतमिति स्वातन्त्र्यप्रयुक्तसार्वज्ञं अत्र व्यवहृतमिति सार्वज्ञापीति क्वचित् क्वचित् उक्तिरपि न दोषायेति केचित् । **तन्न्यायेति** । मुख्यामुख्यन्यायेत्यर्थः । अयमाशयः । न प्रकृत्यादेः इत्यादिः पाठः । अयमर्थ इति पाठेऽपि अर्थपदं आशयपरं बोध्यम् ।

विठ्ठल०— उत्तरमूलं सूत्रशेषस्य भाष्योक्तादर्थादर्थान्तरपरतया व्याख्यातुं सूत्रखण्डमवतार्य भाष्यरीत्या व्याचष्टे **कुत इति**। **आनीदवातमिति**। वातप्रेरणया रहितं तदेकं सर्वोत्तमं ब्रह्मानीदचेष्टतेति श्रुत्यर्थः। **आच्छादकत्वादेरित्यादिपदेन** ज्ञानप्रतिबन्धकत्वादि ग्रहणम्।

॥ इति द्वितीयाभ्यधिकाशङ्कापरिहारः ॥

* * *

॥ अथ तत्रान्ते तृतीयाभ्यधिकाशङ्कापरिहारः ॥

८२ **सु०— ननु च प्रलयेऽवस्थितं चेत्प्रकृत्यादि तस्य स्वातन्त्र्यादिधर्माभावः कुतः, येनैवं व्याख्यायत, इति चेत्, वाक्योपक्रमतच्छेषयोर्विरोधादर्थापत्त्यैवेति ब्रूमः। श्रूयते च स्पष्टमित्याशयवान् 'वाक्यशेषादि'त्येतत्प्रकारान्तरेण व्याचष्टे न पर इति।**

अनु०— न पर इत्यतः।

'तस्माद्धान्यन्न परः किञ्च नास' इत्यतो **वाक्यशेषात्प्रकृत्यादीनां प्रलये स्वातन्त्र्याद्यभावोऽवगम्यत इत्यर्थः। इह हि तस्मात् ब्रह्मणः अन्यत् प्रकृत्यादिकं परः परं स्वातन्त्र्यादिधर्मोपेतं नासेति तत्सद्भावाभ्युपगमेन परत्वं निषिध्यते, अन्यथा परशब्दवैयर्थ्यादिति।**

परि०— **इति ब्रूम इति**। एतेन भाष्योक्तार्थस्पष्टीकरणं कृतं ध्येयम्। **प्रकारान्तरेणेति**। न केवलं वाक्यशेषोक्ततमःप्रभृतिसाधनत्वोक्त्यन्यथानुपपत्त्या किन्तु स्वातन्त्र्यनिषेधकवाक्यशेषादित्यर्थतयाऽपीत्यर्थः। पर इत्येतत्सकारान्तनपुंसकमिति भावेनाह **परः परमिति**।

यादु०— **स्वातन्त्र्यादिधर्माभावः कुत इति**। न च 'द्रव्यं कर्म च कालश्चे'ति प्रमाणस्य पूर्वमुक्तत्वात् कथमियमाशङ्केति वाच्यम्। कुतः अन्तरङ्गज्ञापनादिति प्रश्नाशयात्।

वं०प०— नासदासीत् इति वाक्योपक्रमः, **तम आसीत्** इति वाक्यशेषः। **अन्यथेति**। यदि स्वरूपमात्रनिषेध इत्यर्थः।

कं०रा०— उत्तरमाह **प्रकृतेरिति** । **वाक्योपक्रमेति** । नासदासीदित्याद्युपक्रमस्य तम आसीदित्यादिवाक्यशेषस्य न विरोधात् प्रमाणयोश्च वस्तुतो विरोधायोगादविरोधोपपत्तये स्वरूपेण सतः प्रकृत्यादेः स्वातन्त्र्यादिधर्माभावस्य कल्प्यत्वादर्थापत्त्यैव स्वातन्त्र्याद्यभावसिद्धिरिति ब्रूम इत्यर्थः । **अन्यथेति** । तस्माद्धान्यन्नपरः किञ्चनासेत्यत्र ब्रह्मणोऽन्यस्य प्रकृत्यादेः स्वरूपेणैवासत्त्वस्याभिप्रेतत्वे तस्माद्धान्यान्न किञ्चनासेत्येतावता पूर्णत्वेन परशब्दवैयर्थ्यादित्यर्थः ।

शे०वा०— एवं तम आसीदिति वाक्यशेषादिति भाष्यकारीयसूत्रखण्डव्याख्यानस्य सम्भवदुक्तिकतामुपपाद्य प्रकारान्तरेण तद्व्याख्यानतया 'न पर इत्यतः' इत्यनुभाष्यं सङ्गमयितुं तन्निरसनीयतया भाष्योक्तेऽर्थेऽनुपपत्तिमाशङ्कते **ननु चेति** । अत्र स्वातन्त्र्यादिधर्माभावः कुतः, न कुतोऽपि सम्भवति । स किं स्वातन्त्र्यादिसाधकाभावाद्भवेत् किंवा तत्र बाधकसद्भावात् । नाद्यः । प्रलयावस्थितत्वस्यैव तत्साधकस्य सत्त्वात् । नान्त्यः । स्वातन्त्र्याद्यभावसाधकप्रमाणाभावादिति योजना । अयमर्थः । न प्रकृत्यादेः प्रलयेऽवस्थितत्वं वक्तुं युक्तम् । तथा सति प्रलयेऽवस्थितत्वेन ब्रह्मवत्स्वातन्त्र्यप्राप्तौ नासदासीदिति श्रौतनिषेधस्य त्वदभिमतसार्वज्ञ्यादिधर्मविषयत्वभङ्गप्रसङ्गादतो निषेधस्य सार्वज्ञ्यादिधर्मविषयकत्वसिद्ध्यर्थं प्रलये प्रकृत्यादेरवस्थानाभावस्यैव त्वयाऽपि वाच्यत्वेन वाक्यशेषस्य प्रलये प्रकृत्यादिसत्त्वपरत्वाभावे नासदासीदिति निषेधस्य प्रकृत्यादिस्वरूपमात्रविषयत्वे बाधकत्वासम्भवादसति बाधके एव मुख्यार्थपरित्यागेनामुख्यार्थस्वीकारस्यान्याय्यत्वान्न प्रकृत्यादिस्वरूपनिषेधरूपमुख्यार्थपरित्यागेन स्वातन्त्र्यादिधर्मनिषेधरूपामुख्यार्थस्वीकारो युक्त इति । यद्यपि 'द्रव्यं कर्म च कालश्चे'ति स्वातन्त्र्याभावसाधकश्रुतेः पूर्वमुदाहृतत्वान्नैतच्छङ्कावकाशः तथाऽप्यन्तरङ्गज्ञापकबुभुत्सयेयं शङ्केति ध्येयम् । प्रकृत्यादेः स्वातन्त्र्याद्यभावसिद्ध्यर्थं भाष्ये वाक्यशेषादिति सूत्रखण्डार्थतया स्वातन्त्र्याभावप्रतिपादकश्रुत्युदाहरणेन प्रसक्तां स्वातन्त्र्याद्यभावस्यानन्यलभ्यत्वभ्रान्तिमन्यलभ्यत्वोपदर्शनेन परिहरति **वाक्येति** । अर्थापत्तेरप्यनुमानत्वान्न स्वातन्त्र्यानुमानबाधकतेत्याशङ्क्य अर्थापत्तेः श्रौतत्वाद्युक्तं तद्बाधकत्वमिति भावेन वाक्येत्याद्युक्तम् । तदर्थापत्त्यैव स्वातन्त्र्यादिसिद्धेर्भाष्यकारीयं 'न पर' इति प्रकृत्यादेः स्वातन्त्र्याभावप्रतिपादकश्रुतिपरतया सूत्रखण्डव्याख्यानमनर्थकमित्यतस्तत्तात्पर्यमाह **श्रूयते चेति** । 'न पर' इत्युपन्यस्तप्रमाणैकदेशस्य प्रलये प्रकृत्यादीनां स्वातन्त्र्याभावाप्रतिपादकत्वेन तत्पूर्वोत्तरभागोपलक्षणत्वं 'न पर इत्यतः' इत्यत्र भाष्ये विशेष्यानुपादानेनास्य भाष्यस्य वाक्यशेषादिति सूत्रेणान्वयं ज्ञापकश्चायमर्थो न कारक इति न्यायेनावगम्यत इत्यस्य लाभं च मनसि निधायापेक्षिताध्याहारेण भाष्यं व्याचष्टे **तस्मादित्यादिना** । ननु तस्मादितिवाक्ये प्रकृत्यादिकं न स्वतन्त्रमित्यश्रवणात् कथमस्य स्वातन्त्र्याभावावगमकत्वमित्यतो मन्त्रेण तल्लाभं दर्शयितुं मन्त्रार्थमाह **इह हीति** । नन्वथाऽपि ब्रह्मणोऽन्यन्नासेति प्रकृत्यादेः स्वरूपनिषेधस्यैव सम्भवान्न तत्सद्भावाभ्युपगमेन स्वातन्त्र्यनिषेधकत्वमस्येत्यतः स्वरूपनिषेधकत्वे बाधकमाह **अन्यथेति** । ब्रह्मणोऽन्यन्नासेत्येतावतैव स्वरूपनिषेधसिद्धेरिति भावः ।

वा०र०— अन्तरङ्गेति । उपलक्षणं चैतत् । वक्ष्यमाणानन्यलभ्यत्वभ्रान्तिनिरासार्थं च शङ्कचेत्यपि ज्ञेयम् । एवमाशयेनैवोत्तरावतारो वा पृथक्करणेन कृत इति ज्ञेयम् । **भाष्य इति** । अनुभाष्येत्यर्थः । **अर्थापत्तेरपि अनुमानत्वादिति** । अनुमानत्वेन स्वातन्त्र्यानुमानादविशेषात् इत्यर्थः । **स्वातन्त्र्याभावप्रतिपादकत्वेनेति** । केवलस्य न परः इत्येकदेशस्य प्रकृत्यादिप्रतियोग्यनुपस्थितिस्वातन्त्र्याभावप्रतिपादकत्वाभावादिति भावः । आसेत्येतत् इदमासेत्यादि आमन्तानुप्रयोगस्य विद्यमानत्वे विभक्तिप्रतिरूपकमव्ययं इत्यदोषः इत्यादि । उलूकेन कृतमपि आसबोधकमिति एतद्व्याख्यानादितः अवगन्तव्यम् ।

विट्ठल०— वाक्योपक्रमतच्छेषयोरिति । नासदासीदिति सर्वासत्त्वमभिधाय तच्छेषे तम आसीदिति तमसोऽवस्थानमुच्यते । अतस्तयोः प्रमाणभूतयोः विरोधान्यथानुपपत्त्यैव स्वातन्त्र्याद्यभावसिद्धिरिति भावः ।

॥ इति तृतीयाभ्यधिकाशङ्कापरिहारः ॥

॥ इति अभ्यधिकाशङ्कात्रयपरिहारः ॥

॥ इति असद्व्यपदेशादित्यादिद्वितीयसूत्रव्याख्यानम् ॥

॥ इति सत्त्वाभावस्य-असद्व्यपदेशादित्यादिसूत्रद्वयव्याख्यानम् ॥

* * *

॥ अथ 'युक्तेः शब्दान्तराच्च' इतिसूत्रस्य व्याख्यानम् ॥

॥ अथ तत्रादौ स्वमतेन व्याख्यानम् ॥

॥ अथ तत्राप्यादौ अभ्यधिकाशङ्काप्रदर्शनार्थं सिद्धान्तानुवादः ॥

८३ **सु०— स्यादेतत्** । कारणान्तरसद्भावमभ्युपगम्य तस्येश्वराधीनतां वदता सिद्धान्तिनेदं वक्तव्यम् ।

"किमीश्वरः प्रकृत्यादिभिर्विनाऽपि कदाचित्सृष्ट्यादिकं करोत्युत तैरेवेति नियमः । आद्ये तेषां कथं कारणत्वमनियतत्वात्, अन्यथा रासभस्यापि घ(प)टकारणतापत्तेः । द्वितीये तु कथं तत्परित्यागेन कदाऽप्यकुर्वाणस्येश्वरस्य स्वातन्त्र्यम्, कथं च नियमेनापेक्षणीयानां तेषां पारतन्त्र्यम् ।

एवं प्रकृत्यैव महान्तं महतैवाहङ्कारमित्यादिनियमं कदाचिदपहाय सृजति उतानेन नियमेनैव । आद्ये त्वनियतत्वेनाकारणत्वप्रसङ्गः । द्वितीये पुनरीश्वरादेः स्वातन्त्र्याद्यनुपपत्तिः ।

तथा प्रकृत्यादिकमुपादानीकृत्य कालादिकं निमित्तीकृत्य सृजतीति नियमे व्यत्यासे चोक्तदोषानुषङ्गः ।

अतो युक्तिबाधितत्वादस्यार्थस्य कारणान्तरनिरपेक्ष एव भगवान् सृष्ट्यादिकं करोतीत्येव ज्यायः । एवञ्च निरर्गलमैश्वर्यमस्य समर्थितं स्यात् । न च प्रमाणबाधः, 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्चे'त्यादेरनीश्वरकर्तृकावान्तरसृष्टिविषयत्वस्योक्तत्वात्, 'तम आसीदि'त्यादौ तमःप्रभृतीनां प्रलये सत्त्वश्रवणेऽपीश्वरकर्तृकायां सृष्टौ कारणत्वाश्रवणात्' इत्याशङ्कापनोदनार्थं सूत्रम् ॐ युक्तेः शब्दान्तराच्च ॐ इति ।

अस्यायमर्थः । नोक्तयुक्तिविरोधेन भगवतः कारणान्तरविधुरत्वमुरीकर्तव्यम्, कारणान्तरसद्भावाभ्युपगमेऽपि प्रकृत्यादेः कारणत्वस्येश्वरादिस्वातन्त्र्यादिकस्य च युक्तेः । न चैवं तर्हि विनिगमने कारणाभाव इति वाच्यम्, 'अद्भ्यः सम्भूतो हिरण्यगर्भ' इत्यादिशब्दान्तरात् । पूर्वोदाहृतशब्दविलक्षणशब्दः शब्दान्तरम् ।

तेनेदमुक्तं भवति । यद्यपि प्रागुदाहृताः शब्दाः कथञ्चिदन्यथा नेतुं शक्यन्ते, तथाऽप्ययं न तथा; अत्रेश्वरकर्तृकायामेव सृष्टौ कारणान्तरसद्भावश्रवणात् । न हि हिरण्यगर्भसृष्टिरनीश्वरकर्तृका, तस्यैव प्रथमजत्वात् । —इति ।

परि०— युक्तेरित्यादिसूत्रमवतारयति **स्यादेतदित्यादिना । उक्तदोषानुषङ्ग इति ।** अनियमेत्यनुपादानत्वं नियमे त्वस्वातन्त्र्यमिति दोषानुषङ्ग इत्यर्थः । **एवं तर्हि विनिगमन इति ।** कारणान्तरसद्भावपक्षे प्रकृत्यादेः कारणत्वस्येश्वरादिस्वातन्त्र्यादिकस्य युक्ततैवेत्येवमर्थद्वयनिर्णय इत्यर्थः । कारणान्तरसत्त्वाभ्युपगमकारणत्वादिघटनरूपोक्तार्थद्वयस्यापि शब्दान्तराच्चेतिसूत्रशेषेणैव कारणोक्तिः । तत्कथमित्यतः कारणान्तरसद्भावाभ्युपगमपक्षे कारणसत्वं तावद्भाष्योक्तार्थव्यक्ती-करणेनाह **अद्भ्य इति ।** कारणत्वादेरित्यादिपदेनेश्वरस्वातन्त्र्यकारणान्तरास्वातन्त्र्ययोर्ग्रहः ।

गु०दी०— तस्यैव **प्रथमजत्वात्** इति वदता 'अहमस्मि प्रथमजा ऋतस्ये'ति मौक्तब्रह्मविषयिणी श्रुतिः सूचिता ।

यादु०— **उक्तदोषानुषङ्ग इति ।** नियमेऽस्वातन्त्र्यं, अनियमेऽनुपादानत्वादिकमित्युक्तदोषानुषङ्ग इत्यर्थः ।

वं०प०— ईश्वरादेरित्यत्र आदिपदेन प्रकृत्यादि, द्वितीय-आदिपदेन पारतन्त्र्यम् । **इत्यादेः** प्रमाणस्य । **युक्तेः** घटनात् सम्भवादिति यावत् । **विनिगमन इति** । उभयोरपि प्रलये सत्त्वात् प्रकृतेः स्वातन्त्र्यमीश्वरस्य पारतन्त्र्यं किं न स्यादित्यर्थः । **प्रागुदाहृता इति** । तम आसीदित्यादयः । **अन्यथेति** । तम आसीदित्यादौ तमःप्रभृतीनां सत्त्वश्रवणेऽपीशकर्तृकायां सृष्टौ कारणत्वाश्रवणादित्युक्तरीत्येत्यर्थः । **तस्यैवेति** । 'अहमस्मि प्रथमजा ऋतस्ये'ति श्रुतेरित्यर्थः ।

कं०रा०— **प्रागुदाहृताः शब्दा इति** । अद्भ्यः सम्भूतः पृथिव्यै रसाच्चेत्यादिशब्दा इत्यर्थः । **तस्यैवेति** । हिरण्यगर्भस्यैवेत्यर्थः ।

श्रीनिधि०— **न चैवं तर्हीति** । एवं उभयतापि स्वातन्त्र्यादिकस्य योगे तद्वैलक्षण्यमेव दर्शयति **इदमुक्तं भवतीत्यादिना** । **न हि हिरण्यगर्भसृष्टिरिति** । 'अद्भ्यः सम्भूत हिरण्यगर्भ इत्यष्टौ' इति श्रुतेः । **अष्टौ** दिक्पालकाः ।

शे०वा०— ननु शक्तोऽपीत्युत्तरभाष्यमनर्थकम् । न च युक्तेरित्युक्तकारणत्वादिघटनाप्रकारप्रदर्शनार्थ-मेतदिति वाच्यम् । प्रकृत्यादिकारणत्वादेरघटनाप्रापकाभावेन तद्घटनाया युक्तेरित्यनेनावक्तव्यत्वादित्यतः तत्सूत्रावतारिकारूपपूर्वपक्षरीत्या तदघटनायाः प्रसक्तत्वेन तन्निरासके युक्तेरित्यादिसूत्रे युक्तेरित्यनेन प्रकृत्यादेः कारणत्वादिघटनाया अवश्यवक्तव्यत्वात् तदुक्तकारणत्वादिघटनाप्रकारप्रदर्शकत्वमुत्तरभाष्यस्य नानुपपन्नमित्य-भिप्रेत्य तत्प्रकारप्रदर्शकतयोत्तरभाष्यं योजयितुं प्रकृत्यादिकारणत्वादेर्युक्तिविरोधेनाघटनाशङ्कां तावदुत्थापयति **स्यादेतदिति** । **अन्यथेति** । अनियतत्वेऽपि प्रकृत्यादीनां कारणत्व इत्यर्थः । अनियतत्वाविशेषादिति भावः । **द्वितीये त्विति** । प्रकृत्यादिपरित्यागेन कदाऽप्यकुर्वाणस्येश्वरस्य स्वातन्त्र्यं नियमेनापेक्षणीयानामपि प्रकृत्यादीनां पारतन्त्र्यमेवेत्यत्र नियामकाभावादित्यर्थः । **अकारणत्वप्रसङ्ग इति** । प्रकृत्यादेरिति शेषः । अन्यथा रासभस्यापि तदापत्तेरिति भावः । ईश्वरादेरित्यादिपदेन प्रकृत्यादेः परिग्रहः । स्वातन्त्र्यादेरित्यादिपदेन पारतन्त्र्यादिपरिग्रहः । तत्परित्यागेन कदाऽप्यकुर्वाणस्येश्वरस्य स्वातन्त्र्ये, नियमेनापेक्षणीयानां च प्रकृत्यादीनां च पारतन्त्र्ये, नियामकाभावादिति भावः । **उक्तेति** । नियमे स्वातन्त्र्यादिकं व्यत्यासे तेषामनुपादान-त्वादिकमित्युक्तदोषानुषङ्ग इत्यर्थः ।

किमत्र 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्चे'त्यादिप्रमाणबाधः शङ्क्यते किंवा 'तम आसीदि'त्यादि-प्रमाणबाध इति विकल्प्याद्यं प्रत्याह **अद्भ्य इति** । द्वितीयं प्रत्याह **तम आसीदित्यादाविति** । **प्रकृत्यादेः कारणस्येति** । प्रकृत्यादिभिर्विना कदाचित्सृष्ट्यादिकं करोतीति तेषामनियतत्वपक्षे तेषामनियतत्वेनाकारणत्व-प्रसक्तावपि प्रकृत्यादिभिरेव करोतीत्यभ्युपगमान्नियतत्वेन तेषां कारणत्वोपपत्तेरित्यर्थः । तर्ह्येतत्पक्षोक्तदोषप्रसङ्ग इत्यत उक्तम् **ईश्वरादिस्वातन्त्र्यादिकस्य चेति** । अत्राद्येनादिपदेन प्रकृत्यादिपरिग्रहो द्वितीयेन तत्पारतन्त्र्य-

परिग्रहः । ननु युक्तेरित्यनेन प्रकृत्यादिकारणत्वादेर्युक्तताप्रतिपादनमात्रेण कारणान्तरसद्भावाभ्युपगमे शङ्किते सकलयुक्तिविरोधपरिहाराच्छब्दान्तराच्चेति सूत्रखण्डवैयर्थ्यमित्याशङ्क्य कारणान्तरनिरपेक्षत्वपक्षपरित्यागेन तत्सापेक्षत्वपक्षस्वीकारे नियामकोपदर्शनार्थत्वान्नानर्थक्यमित्यभिप्रेत्य तत्पक्षपरित्यागेन सापेक्षत्वस्वीकारे नियामकाभावशङ्कामुत्थापयति **न चेति** । न कारणान्तरनिरपेक्ष एव भगवान् सृष्ट्यादिकं करोतीति पक्षपरित्यागेन तत्सापेक्ष एव करोतीति पक्षस्वीकारो युक्तः । कारणान्तरसापेक्षत्वपक्ष इव तन्निरपेक्षत्वपक्षेऽपि निरर्गलैश्वर्यसमर्थनप्राप्त्या स्वातन्त्र्यस्य युक्ततया अविशिष्टत्वेन निरपेक्षत्वपक्षपरित्यागेन सापेक्षत्वपक्षस्वीकारे नियामकविशेषाभावात् । न च निरपेक्षत्वपक्षस्य प्रमाणबाधितत्वात् तत्परित्यागेन सापेक्षत्वपक्षस्वीकारो युक्त इति वाच्यम् । अद्भ्यः सम्भूतः पृथिव्यै रसाच्चेत्यादेरनीश्वरकर्तृकावान्तरसृष्टिविषयत्वेन, तम आसीदित्यादौ च तमःप्रभृतीनां प्रलये सत्त्वश्रवणेऽपीश्वरकर्तृकसृष्टौ कारणत्वाश्रवणेनाबाधकतया तदसिद्धेरिति च न वाच्यमित्यर्थः । कुतो न वाच्यमित्यतो हेतुतया सूत्रशेषं तावद्व्याचष्टे **अद्भ्य इति** । शब्दाच्चेत्येतावति वक्तव्ये किमिति शब्दान्तराच्चेत्यन्तरपदोपादानमित्यतो वैलक्षण्यज्ञापनायेत्यभिप्रेत्य तदर्थतया शब्दान्तरशब्दं व्याचष्टे **पूर्वोदाहृतेति** । वैलक्षण्यज्ञापनमपि किमर्थमित्यतस्तत्प्रयोजनमाह **तेनेति** । तत्र हेतुमाह **अत्रेति** । नन्वत्र हिरण्यगर्भसृष्टौ कारणान्तरसद्भाव उच्यते न त्वीश्वरकर्तृकसृष्टौ तत्सद्भावः । तथा च नेश्वरकर्तृकसृष्टौ कारणान्तरसद्भावश्रवणमेतदपीत्यत आह **न हीति** । इतिशब्दस्येतीदमुक्तं भवतीति पूर्वेण सम्बन्धः । 'अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टावि'त्यत्र 'अद्भ्यः सम्भूत इत्यद्भ्यः सम्भूतः पृथिव्यै रसाच्चे'त्यनुवाकस्य प्रतीकग्रहणम् । ततश्च 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्चे'त्यनुवाको 'हिरण्यगर्भः समवर्तताग्रे' इत्याद्याः 'प्रजापते न त्वदेतान्यन्यो विश्वे'त्यन्ता अष्टावृचश्चोक्तार्थे प्रमाणमित्यर्थ इति केचित् । अद्भ्यः सम्भूत इति विशेषणस्य विशेष्यं हिरण्यगर्भ इति पूरयन् वेदपुरुषोऽद्भ्यः सम्भूत इत्यष्टौ वाक्यानि प्रमाणत्वेन सम्मतितया आह इत्यर्थ इति केचित् । हिरण्यगर्भः सम्भूतः तथा अष्टौ लोकपालाश्च जाता इति तत्त्वप्रदीपकाराः ।

वा०र०— कारणत्वादेरघटनेति । कारणत्वादेः या अघटना इति बुद्ध्या विविच्य सम्बन्धः ।

विट्ठल०— उत्तरमूलं सङ्गमयितुं युक्तेरिति सूत्रमवतार्य व्याख्याति **स्यादेतदिति** । **ईश्वरादेरित्यादिपदेन** प्रकृत्यादि ग्रहणम् । स्वातन्त्र्यादीत्यत्र पारतन्त्र्यग्रहणं यथाक्रमं सम्बन्धः उक्तदोषानुषङ्ग इति नियमे स्वातन्त्र्याभावः । अनियमे अनुपादानत्वादिकमित्युक्तदोषानुषङ्ग इत्यर्थः । **न चैवं तर्हि विनिगमन इति** । स्वतन्त्र एवेश्वरः कारणान्तरविधुर एव सृष्ट्यादिकं करोतीति पक्षं परित्यज्य प्रकृत्यादिकारणसद्भावमुपेत्य ईश्वरस्यैव स्वातन्त्र्यमुपपादनीयमित्यत्र नियामकं प्रमाणं नास्तीति न वाच्यमित्यर्थः । **अज्य इति** । हिरण्यगर्भः अनुपलक्षितपञ्चमहाभूतादिभ्यः सम्भूत इति एवमेवाष्टौ दिक्पाला अपि सम्भूता इति तत्त्वप्रदीपोक्तरीत्यार्थः ।

॥ इति आरम्भणाधिकरणशङ्कादर्शनार्थं सिद्धान्तानुवादः ॥

* * *

॥ अथ तत्र अभ्यधिकाशङ्कानिरासः ॥

॥ अथ तत्रादौ अनुव्याख्यानयोजना ॥

८४ **सु०—** अत्र 'युक्तेः' इति या स्वपक्षे कारणत्वादेर्घटनोक्ता सा कथमित्यपेक्षायामाह **शक्तोऽपीति** ।

अनु०— शक्तोऽपि ह्यन्यथा कर्तुं स्वेच्छानियमतो हरिः ।
कारणैर्नियतैरेव करोतीदं जगत्सदा ॥

अन्यथा कारणैर्विना, **कर्तुं शक्तोऽपि हरिः**, 'कारणान्तराण्युपादायैव करिष्यामी'ति **स्वेच्छानिगमतः**, **कारणैरेवेदं जगत्सदा** सृजति ।

एवमन्यथा, प्रकृत्याऽहङ्कारमहङ्कारेण महान्तमिति ।

एवं तथा प्रकृतिं निमित्तीकृत्य कालादिकं चोपादानीकृत्य **कर्तुं शक्तोऽपि** एतेनैव **इदम्** एतदुपादानीकृत्यैवेदं स्रक्ष्यामीति **स्वेच्छानियमतः**, **नियतैः** क्लृप्तैरेव, तथा **नियतैः** स्वनियतसत्ताशक्त्यादिमद्भिरेव **कारणैः इदं जगत्सदा करोति** इति योजना ।

परि०— इत्यपेक्षायामाहेति । शब्दान्तराच्चेति सूत्रांशस्य विवक्षितार्थप्रतिपादकशब्दविशेषादित्यर्थान्तरमभिप्रेत्य तादृशशब्दविशेषं श्रुतिरूपं शक्तोऽपि भगवानित्यादिनाऽग्रे विवक्षुः श्रुत्यभिप्रेतमर्थं स्वयमाहेत्यर्थः । पूर्वप्रकृतचोद्यत्रयनिवर्तकतया श्लोकं व्याचष्टे **अन्यथेत्यादिना** ।

यादु०— ईश्वरादिस्वातन्त्र्यादिकस्येति । अत्राद्येनादिपदेन प्रकृत्यादिसङ्ग्रहो द्वितीयेन तत्पारतन्त्र्यसङ्ग्रहः । पूर्वं कथं च नियमेनापेक्षणीयानां तेषां पारतन्त्र्यमित्याक्षिप्तत्वात् । **न चैवं तर्हि विनिगमन इति** । कारणान्तरविधुर एव भगवान् सृष्ट्यादिकं करोतीति पक्षं विहाय प्रकृत्यादिकारणसद्भावमभ्युपेत्येश्वरस्यैव स्वातन्त्र्यमुपपादनीयमित्यत्र नियामकं प्रमाणं नास्तीति न वाच्यमित्यर्थः ।

शे०वा०— प्रकृत्यादिभिर्विनेत्याद्याक्षेपपरिहारस्य मूलारूढत्वसिद्ध्यर्थं तदनुकूलतया भाष्यपदानि योजयति **अन्यथा कारणैर्विनैवेति** । प्रकृत्यैव महान्तं महतैवाहङ्कारमित्याद्याक्षेपपरिहारकतयाऽपि मूलयोजनां सूचयितुं तदुपयोगितयाऽप्यन्यथेत्येतद्व्याचष्टे **एवमन्यथेति** । अनेन प्रकृत्याऽहङ्कारमहङ्कारेण महान्तं कर्तुं

शक्तोऽपि हरिः प्रकृत्यैव महान्तं महतैवाहङ्कारं स्रक्ष्यामीति स्वेच्छानियमतः प्रकृत्यैव महान्तं महतैवाहङ्कारं सदा सृजतीति योजना सूचिता भवति । तथा प्रकृतिमुपादानीकृत्य कालादिकं निमित्तीकृत्येत्याद्याक्षेपपरिहारकतयाऽप्येतदेव योजयति **एवं तथेति** । ईश्वराद्याक्षेपपरिहारोपयोगितयाऽपि नियतपदं व्याचष्टे **तथेति** ।

विठ्ठल०— **कारणत्वादेरिति** । प्रकृत्यादेः कारणत्वस्येश्वरादिस्वातन्त्र्यादिकरस्य चेत्यर्थः । पूर्वप्रकृतचोद्यत्रयनिवर्तकतया मूलं योजयति **अन्यथेति** ।

॥ इति अनुव्याख्यानयोजना ॥

* * *

॥ अथ तत्र तद्योजनानिष्पन्नं तात्पर्यम् ॥

८५ **सु०—** इदमुक्तं भवति । यदुक्तमीश्वरस्य कारणोपादानादिनियमोऽस्ति न वेति, तत्रास्तीति ब्रूमः । तथा च प्रकृत्यादीनां कारणत्वं युक्तम् । स च नियमो न कुलालादेरिव तान्यपहाय व्यत्यस्य वा अकरणे शक्त्यभावनिबन्धनः, येन तस्य स्वातन्त्र्यम् तेषां च पारतन्त्र्यं न स्यात्, किन्नाम स्वेच्छायत्त एव । ततः स्वातन्त्र्यादिकमपि युक्तम् । न च तानि स्वाधीनसत्ताशक्त्यादिमन्ति, येनैश्वर्यं निरर्गलं न स्यात्; किन्तु भगवत्येव तदीयं सत्तादिकमायतते । ततस्तत्साचिव्यमतिशयेनैश्वर्यस्य द्योतकमेव । यथोक्तम् 'साधनानां साधनत्वं यदाऽऽत्माधीनमिष्यते । तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेत्' इति ।

ननु शक्तस्यापीश्वरस्य तन्नियमानुसरणेच्छा कुत इति चेत् । किं कारणं पृच्छस्युत ज्ञापकम् । आद्ये स्वभावोऽयमिति ब्रूमः (वक्ष्मः) । द्वितीये तु श्रुतिप्रसिद्धेरिति । तदिदमुक्तं हिशब्देन । श्रुतिं चोदाहरिष्यति ।

परि०— वाक्यं योजयित्वा तात्पर्यमाह **इदमुक्तमिति** । **भगवत्येव आयतत इति** । भगवदधीनमित्यर्थः । श्रीमद्भाष्योदाहृतं वचनं संवादयति **साधनानामिति** । श्रुतिप्रसिद्धेरित्युक्तं, सा केत्यत आह **श्रुतिं चेति** ।

गु०दी०— तत्साचिव्यमतिशयेनैश्वर्यद्योतकम् इत्यत्र स्वयमेव गन्तुं समर्थस्यापि राज्ञः स्वाधीन-सामन्तकरावलम्बनस्वस्वलंकृतशिबिकायानगजतुरगारोहणचतुरङ्गसेनासंवरणादिना राजाधिराजत्वस्यैव लोके दर्श-नादिति भावः ।

यावु०— उदाहरिष्यतीति । अत्रैवाधिकरणेऽग्रे 'शक्तोऽपि भगवान् विष्णुरकर्तुं कर्तुमन्यथा' इत्यादिश्रुतिमुदाहरिष्यतीत्यर्थः ।

वं०प०— तानि प्रकृत्यादीनि । स्वशब्देन प्रकृत्यादिकमेव । तथा च स्वतन्त्राणीत्यर्थः । **येन** प्रकृत्यादीनां स्वातन्त्र्येणाङ्गीकृतेन । **न स्यात्** भगवत इति शेषः । **कारणम्** इच्छाया जनकम् । **ज्ञापकम्** एवमिच्छा भवतीत्यत्र किं प्रमाणमित्यर्थः । **वदाम इति** । ततश्च कारणप्रश्नो विरुद्ध इति भावः । **श्रुतिं चेति** । 'शक्तोऽपि भगवान्विष्णुरि'ति श्रुतिमित्यर्थः ।

श्रीनिधि०— न च तानि स्वाधीनसत्ताशक्तिमन्तीति । अत्र स्वशब्देन तानि साधनान्युच्यते । **निरर्गलं** निरवधिकम् । **अतिशयेन ऐश्वर्यद्योतकमिति** । यथा जगन्निर्माणे निर्गलं ऐश्वर्यं एव तत्साधननिर्माणेन तेषां साध्यसाधनभावादिनिर्माणेन च सर्वस्यापि भगवदधीनत्वात् । ततोऽप्यधिकं सिद्ध्यतीति भावः । **श्रुतिं चात्रोदाहरिष्यतीति** । 'देवस्यैष स्वभावोऽयं आप्तकामस्य का स्पृहे'ति श्रुतिं इत्यर्थः ।

शे०वा०— कथमनेन प्रकृत्यादेः कारणत्वस्येश्वरादिस्वातन्त्र्यस्य च समर्थनमित्यतो विकल्पितपक्षेषु तत्तत्पक्षपरिग्रहेण तत्रोक्तदोषपरिहाराय कारिकास्थतत्पदतात्पर्यार्थं सूचयितुमाह **इदमुक्तं भवतीत्यादिना** । भाष्ये हिशब्दानर्थक्यमाशङ्क्य तन्नियमानुसारेणेच्छाज्ञापकप्रमाणोपसङ्ग्रहार्थत्वान्न तदित्यभिप्रेत्य तन्नियमानुसारेणेच्छा-नुपपत्तिशङ्कामुत्थापयति **नन्विति** । नानु नायमिच्छाज्ञापकप्रश्नः किन्तु कारकप्रश्नः तत्कथमनेन तन्निरास इत्यतोऽत्र सम्भावितविकल्पप्रदर्शनपूर्वकमाद्यं बहिरेव प्रदूष्य द्वितीयपक्षदूषणपरतया हिशब्दं योजयति **किमित्यादिना** । काऽसौ श्रुतिर्यत्प्रसिद्धिर्हिशब्देनोच्यत इत्यत आह **श्रुतिं चेति** । 'शक्तोऽपि भगवान् विष्णुरकर्तुं कर्तुमन्यथा । स्वभिन्नं कारणाभिन्नभिन्नं विश्वं करोत्यजः' इति श्रुतिमत्रैवाधिकरणे उत्तरत्रोदा-हरिष्यतीत्यर्थः ।

विठ्ठल०— शङ्कात्रयनिवर्तकत्वं विशदयितुं तद्भावमाह **इदमुक्तं भवतीति** । भगवत्येव तदीयं सत्त्वादिकमायातमिति तदीयं सत्त्वादिकं भगवदधीनमित्यर्थः ।

॥ इति तद्योजनानिष्पन्नं तात्पर्यम् ॥

॥ इति अभ्यधिकाशङ्कानिरासः ॥

* * *

॥ अथ तत्र हिशब्देन शब्दान्तराच्चेति सूत्रस्य व्याख्यानान्तरोक्तिः ॥

८६ **सु०— अनेन शब्दान्तराच्चेति सूत्रं प्रकारान्तरेण व्याख्यातं ज्ञातव्यम् । शब्दान्तरं च शब्दविशेषो, विवक्षितार्थप्रतिपादकः शब्द इति यावत् ।**

परि०— अनेनेति । हिशब्दसूचितश्रुत्युदाहरणेनेत्यर्थः ।

कं०रा०— अनेनेति । हिशब्देन शक्तस्यापीश्वरस्य नियमानुसरणेच्छायां प्रमाणतया 'शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा । स्वभिन्नं कारणाभिन्नं भिन्नं विश्वं करोत्यज' इति श्रुतिप्रसिद्धेरुक्तत्वेन युक्तेः शब्दान्तराच्चेत्यत्र शब्दान्तरपदमुक्तश्रुतिविशेषपरतया प्रकारान्तरेण व्याख्यातमिति ज्ञातव्यमित्यर्थः । ननु शब्दान्तरपदस्य व्यक्तोऽपि भगवान्विष्णुरित्याद्युदाहरिष्यमाणश्रुतिविशेषपरत्वं कथमित्यत आह **शब्दान्तरमिति** ।

श्रीनिधि०— अनेन हिशब्देन श्रुतिप्रसिद्धिद्योतनेन । **विवक्षितार्थप्रतिपादक इति** । शक्तस्यापि स्वभावादेव तन्नियमानुसरणमित्यर्थप्रतिपादकमित्यर्थः ।

शे०वा०— अनेनेति । उदाहरिष्यमाणश्रुतिप्रसिद्धिद्योतकहिशब्देनेत्यर्थः ।

विट्ठल०— अनेनेति । श्रुतिद्योतकेन हिशब्देनेत्यर्थः । ननु शब्दान्तरपदस्योदाहृतशब्दविलक्षणशब्द इति व्याख्यानमत्र सङ्गतमित्यत आह **शब्दान्तरमिति** । नन्वेवं व्याख्यानमिति सङ्गतिः कथमित्यत आह **विवक्षितार्थेति** ।

॥ इति अनेन शब्दान्तराच्चेति सूत्रस्य व्याख्यानान्तरोक्तिः ॥

* * *

॥ अथ च तत्रान्ते 'पटवच्च', 'यथा प्राणादिः'
इति सूत्रयोरनुव्याख्यानाभावे कारणोक्तिः ॥

८७ **सु०— 'पटवच्च', 'यथा प्राणादिः', इति सूत्रे, भाष्य एव व्यक्ते ।**

गु०दी०— भाष्य एव **व्यक्ते** इत्यत्र यथा पटादिः कुविन्दाधीनतन्त्वादिजन्यः । यथा वा इन्द्रियदेहादिकं देहाधिष्ठातृजीवाधीनप्रवृत्तिमदुपलब्धं तथेत्यर्थ इति च भाष्य एव **व्यक्ते** व्याख्याते इत्यर्थः ।

वं०प०— व्यक्ते स्पष्टार्थे ।

शे०वा०— भाष्ये एव व्यक्त इति । ततश्च न तदव्याख्यानप्रयुक्ता अनुभाष्ये न्यूनतेति भावः ।

विठ्ठल०— भाष्य एव व्यक्त इति । 'साधनान्तरेण हि पटादिसृष्टिर्लोके दृष्टा । तच्च साधनजातं तेनानुप्रविष्टमेव यथा शरीरेन्द्रियादिरिति' भाष्य एव अनयोः सूत्रयोः वक्तव्यत्वान्न ते व्याख्यात इति भावः । भाष्य एवोक्ते इति क्वचित्पाठः । **उक्ते** व्याख्याते इत्यर्थः ।

॥ इति 'पटवच्च', 'यथा प्राणादिः' इति सूत्रयोरनुव्याख्यानाभावे कारणोक्तिः ॥
॥ इति 'युक्तेः शब्दान्तराच्च' इतिसूत्रस्य स्वमतेन व्याख्यानम् ॥

* * *

॥ अथ 'युक्तेः शब्दान्तराच्च' इतिसूत्रव्याख्याने अन्योक्तव्याख्याननिराकरणम् ॥
॥ अथ तत्रादौ अन्योक्तव्याख्यानानुवादः ॥

८८ **सु०— अन्ये पुनरन्यथैतानि सूत्राणि वर्णयन्ति । तथा हि ।**

भावे चोपलब्धेः । मृदादेः कारणस्य भाव एव, घटादेः कार्यस्योपलब्धेः, च, अनन्यत्वं कारणात्कार्यस्य । न हि यद्यतो भिन्नं तत्तद्भाव एवोपलभ्यते । न ह्यश्वो गोतोऽन्यो गोर्भाव एवोपलभ्यते; किञ्च, भावे तिलादौ कारणे, तैलाद्युपलभ्यते । कार्ये च भावे कुण्डलादौ सुवर्णादिकम् । अतश्च तदभेदसिद्धिः ।

सत्वाच्चावरस्य । अवरकालीनस्य कार्यस्य प्रागुत्पत्तेः 'सदेव सोम्येदमग्र आसीदि'ति **सत्त्वा**वधारणा**च्चा**नन्यत्वं कारणात्कार्यस्य ।

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् । 'असदेवमग्र आसीत्', 'असद्वा इदमग्र आसीदि'ति प्रागुत्पत्तेः कार्यस्य **असत्त्वव्यपदेशान्नेति चेन्न** । भवेदेतद्यदि कार्यस्वरूपाभिप्रायेणायं व्यपदेशः स्यात्किन्तु व्यक्तत्वलक्षण**धर्मान्तरा**भिप्रायेण । कुतः । **वाक्यशेषात्** । 'असदेवेदमग्र आसीत्' इत्यसच्छब्देनोपक्रमे निर्दिष्टं पुनः 'तत्सदासीदि'ति वाक्यशेषे निर्दिशति । 'असद्वे'त्यत्रापि 'तदात्मानं स्वयमकुरुते'ति । तेन ज्ञायते नासत्कार्यं धर्मान्तरेणैवासत्त्वव्यपदेश इति ।

युक्तेः शब्दान्तराच्च । युक्तेश्च कार्यस्य प्रागुत्पत्तेः सत्त्वं कारणादनन्यत्वं च गम्यते । शब्दान्तराच्च । युक्तिस्तावत् 'असदकरणादि'त्यादिका साङ्ख्योक्ता । वृत्ति-

विकल्पानुपपत्त्यादिका च सौगतोक्ता । शब्दान्तरं चासद्व्यपदेशादन्यः 'सदेव सोम्येदमग्र आसीदि'त्यादिसद्व्यपदेशः ।

पटवच्च । संवेष्टितप्रसारितपटन्यायेन इदं कारणात् कार्यस्यानन्यत्वं प्रागुत्पत्तेः सत्त्वं च प्रतिपत्तव्यम् ।

यथा प्राणादिः । प्राणायामेन निरुद्धा प्राणापानादयो यथा तथा चेति ।

परि०— आद्यसूत्रापव्याख्यानस्य प्राङ्निरासादवशिष्टसूत्रापव्याख्यानमनुवदति **भावे चेत्यादिना अत्र सूत्रेतिपर्यन्तेन** । भावपदस्य कारणं कार्यं चार्थमुपेत्य व्याख्यानान्तरं **किञ्चेति** । भाव इत्यनुवादः । **सुवर्णादिकमिति** । उपलभ्यत इत्यन्वयः । **अवरकालीनस्येति** । पश्चाद्भाविनः अग्रे उत्पत्तेः प्राक् इदं कार्यजातं सदेवासीदिति सत्त्वावधारणादित्यर्थः । **न चेदिति** । कार्यं प्राक् सन्नेति चेदित्यर्थः । **अकुरुतेतीति** । निर्दिशतीत्यनुषङ्गः । **असदकरणादित्यादिकेति** । 'असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्यमि'ति साङ्ख्योक्तेत्यर्थः । असतः कृतिविषयत्वाभावात्प्रागपि कार्यं सदेवेत्यन्वयः । समग्रश्लोकार्थः साङ्ख्य-नये सुधायां व्यक्तः । वैभाषिकनये वक्ष्यमाणां युक्तिमाह **वृत्तिविकल्पेति** । स्थितिविषयविकल्पेषु सर्वकल्पानामनुपपन्नत्वादिकेत्यर्थः । कार्यकारणयोर्भेदेन कार्यं कारणाश्रितं चेत् किं कार्यं कारणेषु तन्त्वादिकेष्वेकदेशेन वृत्तिमदुत कात्स्न्येन । आद्ये कारणीभूतावयवा(न्यैक)नामेकदेशाभावात् । अन्त्ये तु एकैकतन्तुषु कात्स्न्येनावस्थाने कार्यस्यानेकत्वप्रसङ्गः । एकतन्तुचलने सति चलनं तन्त्वन्तरस्याचलनादचलत्वमिति विरुद्धधर्मवत्त्वमित्यादियुक्तिरिति भावः । **संवेष्टितेति** । यथा संवेष्टनदशायामव्यक्तः । पटः प्रसारितो व्यक्तः तथा प्रागुत्पत्तेरव्यक्ततया सदेव कार्यं कर्तृव्यापारेण पश्चाद्व्यज्यत इति कारणादनन्यत्वं कार्यस्येत्यर्थः । एतेन प्राणादिदृष्टान्तोऽपि व्याख्यातः ।

गु०दी०— मृदादेः कारणस्य भाव एव इत्यत्र श्रवणादिकारणस्य भाव एवोपलब्धं ब्रह्मापि तदुपादानकं स्यात् । चक्षुरादिकारणस्य भाव एव रूपाद्युपलब्धेस्तदपि चक्षुराद्युपादानकं स्यात् । किञ्च कार्यादभिन्नस्यापि मृदादेः कार्यं विनैवोपलब्धेः सहोपलब्धिर्नभेदसाधिका । किं त्वप्रयोजिकैवेत्यादि-दूषणमूहनीयम् । **भावे तिलादौ कारणे तैलाद्युपलभ्यत** इत्यत्र तैलादेस्तिलांकुरमूलासिक्तजलाद्युपादानत्वेन तिलोपादानत्वाभावात् स्वरूप्याप्यसङ्गतोऽयं दृष्टान्त इति ज्ञेयम् । **असदकरणादित्यादिका** इत्यस्य असतः शशशृङ्गस्याकरणात्कार्यं कारणे सदेवेत्यर्थः । **वृत्तिविकल्पानुपपत्त्यादिका** इत्यत्र कार्यं कारणे वर्तते चेत्कुण्डबदरवदुपलभ्येत । अन्यत्र वर्तते चेन्न कार्यकारणभावः । अतस्तदात्मकतैवेति वक्तव्यमित्यर्थः ।

शब्दान्तराच्च इति सूत्रखण्डस्य योऽर्थ उक्तः प्रतिवादिना सोऽपि श्रुतिद्वयबलेन कार्यस्य सदसत्त्वापादक एव न तु त्वदभिलषितसत्त्वस्यैव साधकः । '**पटवच्च**', '**यथा प्राणादिः**' इति सूत्रद्वयमाकुञ्चनप्रसारणाख्यावस्थाविशेषं विना कार्यकारणभावस्य परमतेऽप्यभावादनुपयुक्तमेव ।

यादु०— अनेनेति । उक्तश्रुतिद्योतकेन हिशब्देनेत्यर्थः । उदाहृतशब्दविलक्षणः शब्दः शब्दान्तरमिति व्याख्यानमत्र न सङ्गतमत आह **शब्दान्तरं शब्दविशेष इति** । नन्वेवं व्याख्यानेऽपि कथं सङ्गतिरित्यत आह **विवक्षितार्थेति** । **अवरकालीनस्येति** । नीचकालीनस्येत्यर्थः । पश्चाद्भाविन इति यावत् । **सत्त्वावधारणाच्चेति** । अग्र इदं सदेवासीदितीदंशब्दगृहीतस्य कार्यस्य कारणेन सत्तासामानाधिकरण्येन निर्देशादिति भावः । **असत्त्वव्यपदेशादिति** । इदंशब्दगृहीतस्य कार्यस्यासता सामानाधिकरण्येन व्यपदेशादिति भावः । **उपक्रमे निर्दिष्टमिति** । उपक्रमे निर्दिष्टं यत्तदेव पुनस्तच्छब्देन परामृश्य सदिति निर्दिशति 'तत्सदासीदि'ति वाक्यमित्यर्थः । **तदात्मानं स्वयमकुरुतेति** । निर्दिशतीत्यन्वयः । तथा चैवं वाक्यशेषे विशेषणान्नात्यन्तासत्त्वमुपक्रमे निर्दिष्टस्येत्यर्थः । **साङ्ख्योक्तेति** । यथाऽऽह साङ्ख्यः 'असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमि'ति । असदकरणादित्यस्यायमर्थः । कार्यं तावत्करणव्यापारात्प्रागपि सदित्यङ्गीकार्यम् । असदकरणात् । असच्चेत्कारणव्यापारात्पूर्वं कार्यं नास्य सत्त्वं कर्तुं शक्यम् । न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यमिति । शिष्टं साङ्ख्यपरीक्षायां स्पष्टम् । **सौगतोक्तेति** । यथाहुः सौगताः । अवयवी किमवयवेषु प्रत्येकं कार्त्स्न्येन वर्तते किं वैकदेशेन । आद्येऽनेकत्वप्रसङ्गः । न द्वितीयः । तस्यावयवान्विहायैकदेशाभावात् । भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गात् । किञ्च केषुचित्तन्तुषु चलत्सु तद्गतोऽवयवी चलति न वा । नेति पक्षे युतसिद्धिप्रसङ्गः । आद्ये निश्चलावयवाश्रितो न चलतीति चलाचलत्वलक्षणो विरुद्धधर्माध्यासोऽतो न कारणातिरिक्तोऽवयवी नामास्तीति । अत्र साङ्ख्योक्ता सौगतोक्तेति वचनं यद्यपि न परभाष्येऽस्ति तथाऽप्यत्र तदुक्ता युक्तिः साङ्ख्यादिभिरुक्तैव न नूतना तथा चैवं व्याख्याने सूत्रकारस्यासुज्ञत्वप्रसङ्ग इतिं सूचनाय स्वेनोक्तमिति ज्ञातव्यम् । **संवेष्टितेत्यादि** । यथा संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किंवाऽन्यद्द्रव्यमिति स एव प्रसारितो यत्संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते । एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं स्पष्टं गृह्यत इत्यर्थः । **प्राणापानादयो यथेत्यादि** । यथा लोके प्राणापानादिषु प्राणप्रभेदेषु प्राणायामेन निरुद्धेषु कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते । नाकुञ्चनप्रसारणादिकं कार्यान्तरं तेष्वेव प्राणप्रभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते । न च प्राणप्रभेदानां प्रभेदवतः प्राणादन्यत्वम्, समीरणस्वभावाविशेषात् । तथा कारणादनन्यत्वं कार्यस्येत्यर्थः ।

वं०प०— कारणे तिलादौ **भावे** सति इत्यर्थः । कुण्डलादौ कार्ये **भावे** सति तत्र कार्ये सुवर्णादिकं कारणं दृश्यते इत्यर्थः । **तदिति** । तस्य कार्यस्य तेन कारणेनेत्यर्थः । **यथा तथेति** । तथा च ते यथा सन्त्येव विरोधापगमने व्यज्यन्ते तथा कार्यमपीत्यर्थः ।

कं०टा०— ननु का वा युक्तिः कार्यस्योत्पत्तेः प्राक् सत्त्वं कारणानन्यत्वं च गमयतीत्यत आह **युक्तिरिति** । असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्यमित्यादिना साङ्ख्योक्ता असच्चेत्कारणव्यापारात्सर्वं कार्यं नास्य सत्त्वं कर्तुं शक्यम् । न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यम् । किञ्च कार्येण सम्बन्धं कारणं कार्यस्य जनकमसम्बद्धं वा । आद्ये त्वसता कार्येण सम्बन्धानुपपत्तिः कार्यस्य सत्त्वमङ्गीकार्यम् । न द्वितीयः असम्बद्धत्वाविशेषेण सर्वस्मात्सर्वसम्भवापत्तेः असम्बद्धत्वेऽपि कारणं तदेव जनयति । यत्र शक्तमतो नातिप्रसङ्ग इति चेत् सा शक्तिः शक्यविषया वा स्यात् सर्वत्र वा सर्वत्र चेत्सैवाव्यवस्था । आद्ये त्वसति शक्ये कथं शक्तिस्तद्विषया स्यादिति सदेव कार्यम् । न च कारणादन्यत्कार्यं सदुपलभ्यत इति कार्यकारणयोरभेदाङ्गीकार्यः । किं च पटस्तन्तुभ्यो न भिद्यते तन्तुधर्मत्वात् यद्यतो भिद्यते तत् तस्य धर्मो न भवति यथा गौरश्वस्य उपादानोपादेयभावाच्च ययोर्भेदः न तयोरुपादानोपादेयभावः यथा घटपटयोः संयोगाप्राप्त्यभावाच्च भिन्नत्वे हि संयोगो दृष्टः यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हि भवद्विन्ध्ययोः न कार्यकारणयोः संयोगाप्राप्ती दृश्यते तस्मान्न तयोर्भेदः गुरुत्वान्तरकार्यस्यावनतिभेदस्याग्रहणाच्चेत्येवंरूपा युक्तिः । सौगतोक्ता अवयवी किमवयवेषु प्रत्येकं कार्त्स्न्येन वर्तत किं चैकदेशेन आद्येऽनेकत्वप्रसङ्गः न द्वितीयः अवयविनोऽवयवातिरिक्तैकदेशाभावात् भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गादित्यादिरूपा चोत्पत्तेः प्राक्कार्यस्य सत्त्वं कारणादन्यत्वं च गमयतीति भावः । शब्दान्तराच्च कार्यस्योत्पत्तेः प्राक् सत्त्वं कारणादन्यत्वं च गम्यत इत्युक्तं किं तच्छब्दान्तरमित्यतस्तदुदाहरति **शब्दान्तरं चेति** ।

श्रीनिधि०— मृदादिभाव एव घटाद्युपलम्भोऽपि मृदः पूर्वसंस्थानापगमेनाकारान्तरता प्राप्तावेव नैवम् । वक्ष्यमाणस्थल इत्यतो भेदः सुज्ञान इत्याशयेनाह **किञ्चेति** । भावे तिलादाविति किञ्चिन्नबाधिततिलादेः छेदने कृत इति भावः । **अवरकालीनस्येति** । पश्चात्कालीनस्येत्यर्थः ।

शे०वा०— 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम्' इत्युत्तरभाष्ये कार्यस्य निमित्तकारणेन भेद एव नाभेदः । उपादेयस्य चोपादानेन भेदाभेदावेव नाभेद इति प्रतिपादनानर्थक्यमाशङ्क्य 'भावे चोपलब्धेः' इत्यादिसूत्रीयापव्याख्यानप्रत्याख्यानार्थत्वान्न तदिति भावेन तन्निराकरणपरतयोत्तरभाष्यं योजयितुं भावे चेत्यादिसूत्राणामपव्याख्यानमनुवदति **अन्ये पुनरित्यादिना** ।

कार्यस्य कारणानन्यत्वेऽनुमानप्रमाणमाह **भावे चोपलब्धेरिति** । कार्यं कारणादभिन्नं, तद्भाव उपलब्धेरित्यापातसिद्धसूत्रार्थे दोषं दृष्ट्वा व्याख्याति **मृदादेः कारणस्य भाव एवेत्यादिना** । मृदादेरित्यादिपदेन तन्त्वादिपरिग्रहः । घटादेरित्यादिपदेन च पटादिपरिग्रहः । भावे चेति चशब्दो भिन्नक्रम इत्यभिप्रेत्योक्तम् **उपलब्धेश्चेति** । नन्वन्तरेणैव कार्यस्य कारणानन्यत्वं तद्भावे भावस्तदुपलब्धावुपलब्धिश्च भविष्यति । सत्यपि घटाभावे पटाभावस्य घटोपलम्भे पटोपलम्भस्य च दर्शनात् । ततश्चाप्रयोजकत्वान्नोक्तहेतुना कार्यस्य तदनन्यत्वसाधनं सम्भवतीत्याशङ्क्य अनन्यत्वमन्तरेणापि तत्तद्भावोपलम्भसम्भवेऽपि नियततद्भावोपलम्भा-

नुपपत्त्या हेतूच्छित्तिरेव विपक्षे बाधिकेति नाप्रयोजकत्वमित्याशयेनाह **न हीति** । अन्यस्य भावोपलम्भयोरन्यस्य भावोपलम्भावनियतावित्यत्र दृष्टान्तमाह **न हीति** । न च गवाश्वयोरकार्यकारणत्वात् तद्भावोपलम्भानियमेऽपि कार्यकारणयोरनन्यत्वमन्तरेणैव कार्यकारणभावमात्रेण तद्भावोपलब्धिनियमोऽपि स्यादिति वाच्यम् । कुलालघटयोः सत्यपि निमित्तनैमित्तिकभावे तद्भावोपलम्भानियतेरेव दर्शनेन कार्यकारणभावमात्रेण तद्भावोपलम्भनियमानुपपत्त्याऽनन्यत्वमन्तरेण नियमघटितहेतुसमर्थनायोगादिति भावः । परस्परस्वभावानुगतिदर्शनादपि तयोरभेद इति सूत्रस्यार्थान्तरमाश्रित्याह **किञ्चेति** । परिणामिवादिमतेनापि सूत्रार्थमाह **किञ्चेतीति** ।

कार्यस्य कारणानन्यत्वे श्रुतार्थापत्तिमपि प्रमाणमाह **सत्त्वाच्चेति** । परिणामिवादिमतेनापि सूत्रार्थमाह **अवरकालीनस्य** पश्चाद्भाविनः कार्यस्येति यावत् । न प्रागुत्पत्तेः सत्त्वं कारणस्यैवात्र श्रूयते न कार्यस्येति कथमेतस्य तत्र प्रमाणीकरणमिति वाच्यम् । अग्रे सृष्टेः पूर्वमिदं यदिदानीं स्थूलं कार्यं दृश्यते तत्सदेवासीदितीदंशब्दगृहीतस्य कार्यस्य कारणेन सता सामानाधिकरण्येन निर्देशात् तदन्यथाऽनुपपत्त्या तत्तादात्म्यावगमेन वस्तुभेदो नास्तीत्याशयात् । प्रागुत्पत्तेः सत्त्वं कारणात्मना कार्यस्येत्युक्तमर्थमाक्षिप्य समाधत्ते **असदिति** । तत्र चोद्यं विभजते **असदेवेत्यादिना** । इदंशब्दगृहीतस्य कार्यस्य असता सामानाधिकरण्यदर्शनात् । तदन्यथाऽनुपपत्त्याऽसत्त्वसिद्धिरिति भावः । परिहारभागमवतारयति **नेति** । नञर्थमाह **भवेदेतदिति** । तर्हि केनाभिप्रायेणायमसद्व्यपदेश इत्याशङ्क्य धर्मान्तरेणेति व्याचष्टे **किन्त्विति** । तत्र प्रश्नपूर्वकं गमकं कथयति **कुत इत्यादिना** । सूत्रावयवं व्याख्याति **असदेवेदमिति** । यथा 'अक्ताः शर्करा उपदधाती'त्यत्र केनेति तैलघृतादौ सन्देहे 'तेजो वै घृतमि'ति वाक्यशेषात् घृतेनेति निश्चीयते तथा 'असदेवेदमि'त्यत्राप्यसच्छब्देन तुच्छमुच्यते, किंवा सदेवानभिव्यक्तनामरूपमिति सन्देहे तत्सदासीदिति वाक्यशेषात् तुच्छव्यावृत्तं सदेवानभिव्यक्तनामरूपमसच्छब्दमिति निश्चीयते । तस्य तच्छब्देन परामृष्टस्य सच्छब्देन निर्देशादित्यर्थः । 'असद्वा इदमग्र आसीदि'त्यत्र तत्सदासीदिति वाक्यशेषाभावात् कुतो निश्चय इत्याशङ्क्याह **असद्वा इति** । वाक्यशेषस्य सत्कार्यविषयत्वे फलितमाह **तेनेति** ।

कासौ कार्यस्य प्रागुत्पत्तेः सत्त्वं कारणादनन्यत्वं च साधयन्ती युक्तिरित्यतः साङ्ख्योक्तां तामाह **युक्तिस्तावदिति** । **असदकरणादित्यादिकेति** । असदकरणादित्यादिकेत्यर्थः । सा चेत्थम् । कार्यं तावत्कारणव्यापारात्प्रागपि सदित्यङ्गीकार्यम् । असदकरणात् । असच्चेत्करणव्यापारात्पूर्वं कार्यं नास्य सत्त्वं शक्यं कर्तुम् । न हि नीलं शिल्पिसहस्रेण पीतं कर्तुं शक्यमिति । आदिपदेन कार्येण सम्बद्धं कारणं कार्यस्य जनकमसम्बद्धं वा । आद्ये त्वसता सम्बन्धानुपपत्तेः सत्त्वमङ्गीकार्यम् । नान्त्यः । असम्बद्धत्वाविशेषेण सर्वस्मात्सर्वसम्भवापत्तेरित्यादियुक्तिपरिग्रहः । **साङ्ख्योक्तेति** । 'असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्' इति तद्वचनादिति भावः । **वृत्तिविकल्पानुपपत्त्यादिका चेति** । अवयवी अवयवेषु किं प्रत्येकं कार्त्स्न्येन वर्तते किं वैकदेशेन । आद्ये अनेकत्वप्रसङ्गः । नान्त्यः । तस्यावयवान्विहायैकदेशाभावात् । भावे वाऽत्रापि वृत्तिविकल्पप्रसङ्गात् । तथा चानवस्थेत्येवं वृत्ति-

विकल्पानुपपत्तिरित्यर्थः । आदिपदेन केषुचित्तन्तुषु चलत्सु तद्गतोऽवयवी चलति न वा । नेति पक्षेयुतसिद्धिप्रसङ्गः । आद्ये निश्चलावयवाश्रितो न चलतीति चलाचलत्वलक्षणो विरुद्धधर्माध्यासः स्यादित्यस्य परिग्रहः । साङ्ख्याद्युक्तयुक्त्युपजीवनात् स्वातन्त्र्येण युक्तेरिति सूत्रखण्डोक्तयुक्त्युत्प्रेक्षामात्रेऽप्यसमर्थस्य परस्य न तद्भाष्यकर्तृत्वमिति सूचयितुं साङ्ख्योक्तेति चोक्तम् । ननु युक्तेरिव शब्दादपि कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च सिद्ध्यतीति वक्तव्ये कथमन्तरपदमन्तराले प्रयुज्यत इत्यतः शब्दान्तरं विभजते **शब्दान्तरं चेति** ।

संवेष्टितप्रसारितपटन्यायेनेति । यथा हि संवेष्टितपटो न व्यक्तं गृह्यते किमयं पटः किंवाऽन्यद्द्रव्यमिति । स एव प्रसारितो यत्संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते । तथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते । स एव च प्रसारणसमये विशिष्टायामविस्तारो गृह्यते न संवेष्टितरूपादन्योऽयं भिन्नः पट इति । एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं स्पष्टं गृह्यत इति । संवेष्टितप्रसारितपटन्यायेनेत्यर्थः ।

प्राणायामेनेत्यादेरयमर्थः । प्राणायामेन निरुद्धाः प्राणापानादयः प्राणप्रभेदाः कारणमात्ररूपेण वर्तमाना जीवनमात्रं कार्यं निर्वर्तयन्ति नाकुञ्चनप्रसारणादिकं कार्यान्तरमपि । त एव च प्राणप्रभेदाः पुनः प्रवृत्ता जीवनादधिकमाकुञ्चनप्रसारणादिकं कार्यान्तरमपि निर्वर्तयन्ति । न च प्राणप्रभेदानां प्रभेदवतः प्राणादन्यत्वं समीरणस्वभावाविशेषात् । एवं कार्यस्य कारणादनन्यत्वमिति ।

वा०२०— कल्पतरूक्तरीत्यावतारयति **कार्यं कारणादभिन्नमित्यादि । दोषं दृष्ट्वेति** । 'पक्षसद्भावे यत् उपलभ्यते तत् तेनाभिन्नम्' इति नियमोऽस्ति । गोभवि उपलभ्यमानस्यापि अश्वादेः तदभेदाभावादिति दोषं दृष्ट्वेत्यर्थः । **व्याख्यातीति** । मृदादेः कारणस्य भाव एवेति अवधारणेन व्याख्यानात् गोभवि उपलभ्यमानस्याप्यश्वादेः तद्भाव एव उपलभ्यमानत्वाभावेन व्यभिचाराप्रसङ्गात् युक्तं कारणभूतमृदादेः भाव एवोपलभ्यमानस्य घटादिरूपकार्यस्य तदनन्यत्वमस्तीति भावः प्रतीयते इत्याशयः । भाव एवेत्यादिनेति प्रतीकोपादानपाठः स्वरसः । **तद्भावे तद्भावः तदुपलब्धौ उपलब्धिश्चेति** । यद्यपि कारणस्य भाव एव कार्यस्योपलब्धेरिति परभाष्यानुसारिमूलग्रन्थे कारणस्य भावे भाववत्वे सति तदुपलब्धौ उपलभ्यमानत्वरूपविशिष्टहेतुर्न प्रतीयते इति तद्भावे तद्भावः तदुपलब्धौ उपलब्धिश्चेत्यर्थद्वयस्य हेतुशरीरान्तर्गत्यभावात् तदप्रयोजकत्वशङ्कानवकाशमर्हति । तथापि अलं प्रपञ्चेनेति वक्ष्यमाणमूलाशयकथनपरटीकोक्तरीत्या अत्राभाव उपलब्धिशब्दयोः कारणकार्यनिष्ठभावोपलब्धिमात्रपरता न । किन्तु भावपदं उपलब्धिमपि कारणे प्रतिपादयति । उपलब्धिपदं च कार्ये भावमपि प्रतिपादयति । उपलब्धिविषयरूपा भाववाचिपदस्य विषयविषयिपरत्वात् । विषयिवाचि उपलब्धिपदस्यापि विषयिविषयपरत्वात् । तथा च कारणाभाव उपलम्भयोः विद्यमानयोः कार्यभावोपलम्भौ इत्यर्थलाभे विशिष्टहेतुलाभात् तद्विवरणरूपेण तद्भावे भावश्चेत्यादिकथनं युक्तम् । उक्तं च भामत्याम् । विशिष्टहेतुशरीरं व्युत्पाद्य तत्र यथोक्तस्य हेतोरेकदेशाभिधानेव न उपक्रमते भाष्यकारः । इतश्च

कारणात् अनन्यत्वं इत्यादि । एवं च यथा भाव इत्येव सूत्रे उक्तावपि भाव एवेति सूत्राभिप्रेतमवधारणं भाष्ये दर्शितम् । तथा भाष्ये भावोपलब्ध्योः एकदेशकीर्तनेऽपि एकदेशान्तरं भाष्याभिप्रेतं भामतिकृता स्पष्टीकृतमस्ति इति तदनुसारेण विशिष्टहेतुः भाष्याभिप्रेत एवात्र टीकायां आशङ्कित इत्यदोषः । अत एव सत्यपीत्यनेनापि विशिष्टहेतोरेवाप्रयोजकत्वोपपादनम् । दर्शनादित्युक्त्या मुखतः प्रतिपाद्यं अप्रयोजकत्वमेव । तदुन्नेयश्च दोषो व्यभिचारः सोऽप्यर्थाल्लभ्यः इति सूचितम् । वक्ष्यमाणरीत्या सत्यपीति वाक्यस्य कुण्डलीकाकारेण मूलकोशे नाशितस्याभाव इति पक्षे तु एतद्वाक्यस्य योजनाश्रयाभावः । अप्रयोजकत्वोन्नेयी व्यभिचारस्तु स्थलान्तर इव बहिरेव ज्ञेयो भविष्यति । तथा विपक्षे बाधकत्वभावप्रयुक्ताप्रयोजकत्वशङ्कापरिहाराय हेतूच्छित्तिरूपविपक्षे बाधककथनं च मूलकारीयं युज्यते । तन्नियमोक्त्यैव चाप्रयोजकत्वोन्नेयव्यभिचारपरिहारस्यापि लाभोपपत्तिः । अप्रयोजकत्वपरिहारमुखसत्त्वादेवान्तरेणैवेति पूर्वशङ्कानुसारेणानन्यत्वमन्तरेण इत्यादेरपि अधिकस्य सार्थक्यम् । न हि यत् इति हेतूच्छित्यभिधान एव तात्पर्य इतीति न तदभिधानशङ्कावकाशोऽपि । शिष्टं व्युत्पादनं वक्ष्यमाणभामत्यनुवादावसरे भविष्यतीति ज्ञेयम् । नन्वत्र मूले कारणस्य भाव एवेत्यवधारणप्रयोगात् तदनुसारेणाकारणस्य भाव एव भावः । तथा तदुपलब्धावेव उपलब्धिः इत्येवं लब्धमिति तथैव प्रयोगः कार्यः । अतः तद्भावे तद्भावः इत्यादिः निरवधारणप्रयोगायोगः । सावधारणे तात्पर्याङ्गीकारेऽपि न वक्ष्यमाणव्यभिचारसूचकाप्रयोजकत्वोपपादनं सम्भवति । न हि घटाभावपटभावादिकमस्ति । तथा व्यभिचारफलकाप्रयोजकत्वोपपादनपरसत्यपीति वाक्येऽपि निरवधारणप्रयोगायोग एव । न च तत्रापि अवधारणे तात्पर्यमस्तु इति वक्तुं शक्यम् । उक्तानुपपत्तेरेव । तथा सति नियतेति विशेषणेनोत्तरपरिहारायोगश्चेति चेत् । अत्र ब्रूमः । तद्भावे भाव इत्यादौ सावधारणप्रयोगस्यैवाभिप्रेतत्वात् नाद्यः तावद्दोषः । नापि तथा सति घटभाव एव पटभावादिकं नास्तीति व्यभिचारोक्तिः अनुपपन्नेति द्वितीयः । कस्यचित् घटादिविशेषस्य काकतालीयन्यायेन तद्भाव एव तदन्यस्य भावादेरपि उपपत्त्या व्यभिचारचोदनस्य युक्तत्वात् । नापि तत्रावधारणप्रयोगाभावलक्षणो दोषः तृतीयः । काकतालीयन्याये कदाचिद्घटाभावादावेव भावोपलम्भवत् पटादेः उपादानेनैवाधारणार्थस्य प्रतीतेः । न हि कदाचित् घटभावोपलम्भ एव पटादिभावोपलम्भ इत्युक्ते कदाचित् घटाभावोपलम्भे पटादिभावोपलम्भः इत्युक्ते च कश्चिदतिशयो नातिशयश्च प्रतीयते । ततोऽवधारणोक्तावपि तदर्थावभासाद्वा तत्र तात्पर्याद्वा न दोषः । सत्यपीत्यस्य सत्येवेत्यर्थात् घटभाव एव सतीति लभ्यते इत्याहुः । वस्तुतोऽन्यभावेऽपीति भामत्यनुसारेण अपिपदं काकतालीयन्यायेन कदाचित् तद्भावादावेव तद्भावादिकमाश्रित्य व्यभिचारचोदनात् उक्तानुपपत्तिरेवेति चतुर्थोऽपि न दोषः । नियतेति विशेषणेन परिहारस्तु स्पष्ट एव । कदाचित् घटाभावादावेव पटादिभावसत्त्वेऽपि नियमेन तद्भावादौ तद्भावादेरभावात् । नियमेनेत्यनेनाशङ्कितकादाचित्कत्वव्युदासेन सार्वकालिकत्वप्रतिपादनेन तद्व्यावृत्तिसम्भवात् । अत एवोत्तरग्रन्थे निपातादिपदं कादाचित्कत्वसार्वकालिकत्वपरमिति परिहारसम्भवः । अत एव चोत्तरग्रन्थानुसारेण मूलेऽपि नियतपदार्थो योज्यः । एवकारप्रयोगेऽपि काकतालीयकादाचित्कनियमव्यावर्तनायावश्यकत्वादिति द्रष्टव्यम् । इदं च ननु अन्तरेण एवेत्यादिना इत्याशयेनाहेति न हीत्यवतारसद्भावे व्युत्पादनम् । यदि पुनः मूलकोशस्थ यद्यप्यकारणस्येतिग्रन्थस्येवास्यापि कुण्डकुलीकाकारेण नाशः । भावाच्चेति

चशब्दो भिन्नक्रमः इत्यभिप्रेत्य उक्तं उपलब्धेश्चेतीति वाक्यानन्तरं नन्वित्यादि भविष्यतीति अनन्तरं ततश्च प्रयोजकत्वात् इत्यादिरेव पाठः । सत्यपीत्यादि दर्शनात् इत्यन्तं वाक्यमात्रभावः । तदापि तद्भावावधारण-तात्पर्यमात्रे कल्पनेऽपि इतरप्रयासाभावः इत्याहुः । केचित्तु एवकारसार्थक्यं दर्शयितुं व्यतिरेकेण गमकत्व-प्रदर्शनेनाप्रयोजकत्वशङ्कानिराकरणस्पष्टत्वायेति प्रतिपादयति । मम तु प्रवृत्तमूले एवकारातिरेकेणावशिष्टस्य व्यभिचाराद्याशङ्कनेनाप्रयोजकत्वाभिधानं एवकारसाहित्यलब्धनियतपदार्थप्रदर्शनेन प्रतिभाति । मूले तावद्भाष्या-नुसारेण तद्भाव एव उपलम्भमात्रमेव हेतुतया उक्तम् । यदि तस्य तद्भाव एव भाववत्त्वे सतीत्यादिविशिष्टहेतुकरणं टीकाकृतः सम्मतं स्यात् कथं तर्हि धूमादिवत् व्याप्यव्यापकभावेनान्यथासिद्धिमूलोक्तं उद्धर्तुं अधिकरणान्ते अलं प्रपञ्चेनेत्येतदर्थकथनावसरे विशिष्टहेतौ तात्पर्यं टीकाकृदभिदध्यात् । विशिष्टस्य हेतोः मूलाभिप्रेतत्वमुपवर्णयता तस्यैवान्यथासिद्धिः मूलकृता उक्ता इत्यङ्गीकर्तव्यतया तादृशान्यथासिद्ध्युद्धाराय पुनः विशिष्टहेतुकरणत्वं कथं कुर्यात् । कथं च तेनान्यथासिद्धिनिरासो भवेत् । तस्मात् भाव एवोपलभ्यमानत्वमात्रहेतोः एव व्याप्य-व्यापकभावेन अन्यथासिद्धिव्युत्पादनं मूलटीकयोः अभिप्रेतमिति परोक्तानुवादावसरे विशिष्टहेतोः अकल्पनीय-त्वात् । तस्याप्रयोजकत्वशङ्कायाः चायोगात् । तन्निरासाय न हीत्युत्तरवाक्यप्रवृत्तेः अपि टीकाकृदसम्मतत्वात् विशिष्टहेतुयुक्तपाठः टीकाकृदसम्मत एव । किन्तु प्रथमतो विशिष्टहेतुतात्पर्याशयेन यद्यप्यत्रेत्यादि ग्रन्थः आसीत् तच्छेषभूतोऽयमपि ग्रन्थश्चासीत् । टीकाकृता वक्ष्यमाणग्रन्थमर्यादामालोच्य विशिष्टहेतुतात्पर्यादिकं अलं इत्येतदर्थतया एवोक्तम् । अत्रत्यो यद्यपीत्यादि ग्रन्थस्तु शिष्यं प्रति नाशनाय विहितः । तत्र शिष्येण यद्यपीत्यादिकं कुण्डलीकाकारेण विनाश्यापि ननु अन्तरेणैवेत्यादिकं न विनाशितं न वा तदा वाचितं येन वाचनोत्तरमेवंविधविन्यासनाशनाय विधान्तरेण विन्यासलेखनाय वा नियुज्येत किं तु न हीत्युत्तरवाक्याव-तारस्यावश्यकत्वबुद्ध्या तावन्मात्रमेव विशेषितवान् इत्याद्यकामैरपि वाच्यमिति तत्पाठपरित्यागेन पाठान्तरं कृत्वा टीकाकृतोऽभिप्रेतं प्रदर्श्यते । ननु अन्तरेणैवानन्यत्वं तद्भावे एवोपलभ्यमानत्वं भवतु विपक्षे बाधकाभावात् इत्यतो हेतूच्छित्तिरेव विपक्षे बाधका इत्याशयेन व्यतिरेकमुखेनास्य गमकत्वमुपपादयति **न हि इति** । अन्यस्य भावे अन्यस्योपलम्भो न नियत इत्यत्र दृष्टान्तमाह **न हीतीति** । अत एव भामत्यां न हीति प्रथमवाक्यं व्यतिरेकमुखेनास्य गमकत्वमाहेति एवावतरितम् । गवाश्वयोः अकार्यकारणत्वात् तद्भावेत्याद्युत्तरत्र ये तु गोभवि अश्वस्योपलब्धिः इत्याद्यर्थोपपत्तेः यथाश्रुत एव पाठ इति इति सुधीभिः आकलनीयम् । कार्यकारणाभिन्नं तद्भावादावेव भावादिति विवक्षितप्रयोगस्वरूपं सिद्धवत्कृत्य तत्रान्वयव्याप्तौ दृष्टान्तस्याप्रतीतेः सामान्यतो व्यतिरेकव्याप्तिमभिप्रेत्योक्तं **न हि बचत** इत्यादि मूलम् । तद्व्याप्तौ दृष्टान्तानुक्तेः तत्प्रदर्शनाय न हीति द्वितीयं वाक्यं इत्याशयेन तथा तद्योजयति **अन्यस्य भावेति** । अत्र साध्याभावहेत्वभावयोः मेलनेनान्यस्येत्याद्युक्तावपि यत् तयोरन्यत् तद्भावादावेव भावादिमन्नेति व्यतिरेकव्याप्तिशरीरं तत्र गोतोऽन्यः इत्यनेन गवाश्वरूपं दृष्टान्तमाहेत्यर्थः । अश्वोहितोऽन्यो भवतीति तत्र साध्याभावकीर्तनम् । गोतो भावात् अश्वभावादिमात्रेत्यनेन साधनाभावकीर्तनमिति विवेकः । तथा चोक्तव्याप्तिग्रहणस्थलगवाश्वरूपं अनेनोक्तमिति ज्ञेयम् । कुलालघटयो-रिति न च कार्यकारणभावमात्रेण तद्भावोपलम्भनियमासम्भवेऽपि मृद्घटादौ उपादानोपादेयभावस्य सत्त्वात्

तन्मात्रेणोक्तनियमोपपत्तिरिति अप्रयोजकत्वशङ्का दुर्वारेति वाच्यम् । न च कुलालभाव एव चेत्यादि-भाष्याद्यनुसारेण कार्यकारणभावमात्राश्रयणेन हेतोरप्रयोजकत्वशङ्का । तत्परिहारयोः आवश्यकत्वेऽपि उपादानोपादेयभावेनान्यथासिद्धिशङ्कातत्परिहारयोः परभाष्यादौ अप्रवृत्तत्वेन तच्छङ्कायाः ग्रन्थकृताप्यप्रवर्तनेन च तथा शङ्कायाः अकर्तव्यत्वात् । किं च एतत् योजनादूषणावसर एव मूलेऽन्योपरोक्तबुद्धिर्वा सामानाधिकरण्यबुद्धिर्वेति शङ्किताया: बुद्धेरप्यभेदमात्रेण चरितार्थ्येनात्यन्ताभेदसाधकत्वमित्यादिदूषणस्य वक्ष्यमाणत्वेन तत्प्रकारेणैव तद्भाव एव उपलम्भस्य उपादानोपादेयभावमात्रेण उपपत्तेः नानन्यत्वसाधकत्वमिति दूषणस्याप्यभिप्रेतत्वेन सिद्धान्तोक्तदूषणस्य इहाशङ्क्य परिहारायोगेन शङ्कामात्रस्याकर्तव्यत्वात् इति ज्ञेयम् । उक्तव्याख्यानस्य भाष्येऽनुपलम्भात् पूर्वं समुच्चयेन व्याख्याने अरुचिं मनसि निधायाह **परिणामवादिमतेनापीति** । न केवलं श्रुतिः उपपत्तिश्च अत्र भवतीति भामती अवरकालीनस्य कार्यस्य श्रूयते सदेव सोम्यमग्र आसीत् इति भाष्यं च मनसि निधाय आह **श्रुतार्थापत्तिमपीति** । इदंशब्दगृहीतस्येत्यादिभाष्यविवरणरूपेणाशङ्क्य निराकरोति **न प्रागुत्पत्तेरित्यादिना** । **समाधत्ते इति** । समादधत्सूत्रमुपन्यस्य व्याचष्टेत्यर्थः । तथैव पाठस्तु स्वरस एव । आनन्दगिर्यानुसारेणाह **तत्र चोद्यमित्यादि** । **गमकमिति** । सोऽत्र गमकमित्यर्थः । साङ्ख्यपरीक्षा-व्याख्यानानुसारेण आह **असच्चेत्कारणव्यापारादित्यादि** । उपादानग्रहणात् इत्येतद्व्याख्यानरूपसाङ्ख्यपरीक्षा-व्याख्यानानुसारेण उपादानग्रहणरूपहेतुम् आदिपदेन दर्शयन् सर्वसम्भवाभावादिहेतूनप्याह **आदिपदेन कार्येणेति** । उपादानानि कारणानि तेषां ग्रहणं कार्येण सम्बन्धः । उपादानैः कार्यस्यासम्बन्धादिति यावत् । एतदुक्तं भवति । कार्येण सम्बन्धं इत्यादेरुत्तरत्रोक्तत्वात् इति ज्ञेयम् । **अवयवी अवयवेष्विति** । इयं चानुपपत्तिः वैभाषिकसौत्रान्तिकनिरासक समुदायउभयहेतुकेऽपीत्यधिकरणे व्युत्पादितेति ज्ञेयम् । **केषुचित्तन्तुषु इत्यादि** । इयमपि विकल्पानुपपत्तिरुक्तस्थल एवोक्ता ज्ञेया । **सिद्ध्यतीति वक्तव्य इति** । सिद्ध्यतीत्येतत् प्रतिपादनाय शब्दाच्चेति । वक्तव्यं इत्यर्थः । पटवच्चेति सूत्रवृत्तिकारोक्तरीत्या व्याख्याने यः संवेष्टितप्रसारितपटन्याय उपपादितः तत्प्रकारेणोक्तन्यायमुपपादयति **यथा हि संवेष्टित इति** । यथा हीत्युक्तग्रहणोत्तरभावितया प्राप्तं यद्ग्रहणं तत्प्रदर्शनपरं शाङ्करभाष्यम् । अतः उक्तं संवेष्टितपटग्रहणानन्तरभावि-संवेष्टितपटग्रहणप्रकारमपि शाङ्करभाष्योक्तरीत्याह **तथा चेति** । पूर्वपक्षे पटो वाऽन्यत् द्रव्यं वेति सन्देहे सति प्रसारणेन पट एवेति ज्ञानेन सन्देहनिवृत्तिः भवतीति फलितम् । अत्र पक्षे तु पट एवेति ज्ञानेऽपि तत्पटीयायामविस्तराविशेषस्य प्रसारणात् पूर्वमव्यक्तस्य किं यत् आयामादिविशिष्टः इति जिज्ञासितस्य प्रसरणेन ज्ञाने सति यत् पटगतयामादिकं विवक्षितम् । तद्भावाऽन्यत् वेति सन्देहनिवृत्तिर्भवतीति विवेकः । तदेवं ग्रहणद्वयस्य पूर्वोत्तरभावित्वेन द्वितीयग्रहणप्रकारमात्रस्य भाष्ये प्रदर्शनेऽपि प्रथमप्रकारस्यापि पूर्वभावितया भाष्यसम्मतत्वस्य वक्तुं शक्यत्वात् भाष्योक्तरीत्या सूत्रार्थकथनावसरे वृत्तिकारान्तरोक्तन्यायप्रकारस्यापि प्रदर्शनं युक्तम् । अत एव मूलेऽनन्यत्वमिति भाष्योक्तरीत्योक्ता प्रागुत्पत्तेः सत्त्वं च प्रतिपत्तव्यं इत्यधिकं चोक्तम् । अत एव च 'भावे चे'ति सूत्रव्याख्यानावसरे किं च भावे तिलादौ कारणे तैलाद्युपलभ्यते । कार्ये च भावे कुण्डलादौ सुवर्णादिकम्, अतश्च तदभेदसिद्धिरिति भावे चोपलब्धेरित्यस्य वृत्तिकारान्तरोक्तं व्याख्यानमपि मूलकृता प्रदर्शित

इति द्रष्टव्यम् । **न संवेष्टनरूपादन्य इति** । अत्र संवेष्टितरूपादन्यः इत्येतत् दृष्टान्ततयोपात्तम् । यथाऽयं विशिष्टायामविस्तारविशिष्टः पटः संवेष्टितरूपात् अन्यो न भवति । यथेति पूर्वोक्तं दृष्टान्ततयोक्तम् । तथा भिन्नो न भवति आयामविस्तारान्तरयुक्तो यः पटः न भवतीत्यर्थः । विशिष्टायामविस्तारो यः पटः सम्मतः । स एवायम् । न त्वन्यः पटः इति यावदिति शाङ्करवाक्यस्य योजना ज्ञेया । टीकायामुदाहृतत्वात् एतद्वाक्य-योजनाकृत्येत्यर्थः । दोषः इतीत्यनन्तरं गृह्यत इति वर्तते । पटन्यायेनेत्यनन्तरं कारणात् कार्यस्यानन्यत्वादिकं प्रतिपत्तव्यं इत्येतदनन्तरं इत्यर्थः इति पाठः । यद्यपि शाङ्करीयेऽनन्यकारणात् कार्यमित्यर्थः । इत्येकमेवोक्तं तथापि वृत्तिकारान्तरोक्तस्यापि मूलकृता तत्र तत्रापेक्षितस्य व्यवहारात् प्रागुत्पत्तेः सत्त्वं चेत्यधिकमुक्तमिति । तदनुसारेण टीकायां आद्यादिपदमिति न दोषः । यथा प्राणादित्येतत्सूत्रीयभाष्यानुसारेणार्थमाह **प्राणायामेने-त्यादि** । तदभिमतत्वेनोपपादनेन तु द्वयमित्येव पाठः । द्वितीयनकारो लेखकागतः । उपादानेन तु द्वयमित्यनेनेति इति उत्तरभाष्यखण्डेनेत्यर्थः । **नित्यभेद** इत्युत्तरभाष्यखण्डेति वक्ष्यमाणानुसारात् । तेन नित्यभेदेत्यस्य उपपादनेन तु द्वयमित्येतत् उत्तरत्वप्रतीतिः निराकृता ।

स०व्र०— असदकरणादित्यादिकेति । 'असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्' इति युक्तिरित्यर्थः । एतच्च साङ्ख्यपरीक्षायां स्पष्टयति । अवयवी किमवयवेषु प्रत्येकं कार्त्स्न्येन वर्तते एकदेशेन वा । आद्ये अनेकत्वप्रसङ्गः । नान्त्यः । तस्यावयवा-न्विहायैकदेशाभावात् । भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गादित्येवंरूपयुक्तिरित्यर्थः ।

स०ना०— नित्यभेदो निमित्तेनेति मूलसन्नभरसुधायां **मृदादेः कारणस्येति** । मृदादेः कारणस्य भावे स्वभावे कार्यस्य घटादेरुपलब्धेः तयोरैक्यमित्यर्थः । प्रागुत्पत्तेः मृत्स्वभावे घटानुपलब्धेरसिद्धिरित्यत उक्तम् **एवेति** । न ब्रूमो वयं मृत्स्वभावे सर्वदा घटोपलम्भ इति । किं नाम यदोपलभ्यते तदा मृत्स्वभाव एवेति अतो न दोषः । कारणस्याविकृतत्वदशायामपि कारणे कार्यस्य कार्ये च कारणस्योपलम्भात् तयोरैक्यमिति भावेन सूत्रं व्याचष्टे **किंचेत्यादिना** ।

विट्ठल०— अत्राद्यसूत्रापव्याख्यानस्य प्रागुक्तत्वात्पुनरित्युक्तं भावपदस्य कारणत्वं पदार्थपरत्वं कार्यरूपपदार्थपरत्वं चाभ्युपेत्याह **किञ्चेति** । **अवरकालीनस्येति** । नीचकालीनस्य पश्चाद्भावित इति । **सदेवेति** । इदं कार्यजातं अग्रे उत्पत्तेः पूर्वं सदेवासीदिति श्रुत्यर्थोऽत्राभिप्रेतः । **असदकरणादिति** । असतः करणशतेनापि कर्तुमशक्यत्वादित्यर्थः । असदकरणादुपादानग्रहणात्सर्वसम्भवादित्यादि समग्रं श्लोकं तु साङ्ख्याधिकरणे उदाहरिष्यतीति नेह प्रपञ्चते **वृत्तिविकल्पेति** । किं पटः प्रत्येकं स्वावयवेषु सामस्त्येन वर्तते उतैकदेशेन । आद्ये अनेकत्वप्रसङ्गः । न द्वितीयः तदतिरिक्तावयवाभावात् । भावे तत्रापि कथं वर्तत इति उक्तविकल्पप्रसरात् । एकदेशमनेकत्वेन तदभेदस्य वक्तुमशक्यत्वाच्च । आदिपदेन केषुचित्तन्तुषु चलत्सु पटश्चलति न वेत्यादि विकल्पो ग्राह्यः । एतच्च बौद्धाधिकरणे स्पष्टीभविष्यति । अत्र यद्यपि साङ्ख्योक्ता

सौगतोक्तेति न परभाष्येऽस्ति तथाप्यत्र तदुक्ता युक्तिः साङ्ख्यादिभिः उक्तैव न नूतना । तथा चैवं व्याख्याने सूत्रकारस्य सुज्ञानत्वप्रसङ्ग इति सूचनाय स्वेनैवोक्तं ज्ञातव्यम् । **प्राणापानादयो यथा तथा चेति** यथा लोके प्राणापानादिषु प्राणप्रभेदेषु प्राणायामेन निरुद्धेषु कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं वर्तते । नाकुञ्चनप्रसरणादिकं कार्यान्तरम् । तेष्वेव प्रभेदेषु पुनः प्रोक्तेषु जीवनादिकमाकुञ्चनप्रसरणादिकमपि कार्यान्तरं प्रवर्तते । तथा कारणानन्यत्वं कार्यस्येत्यर्थः ।

॥ इति अन्योक्तव्याख्यानानुवादः ॥

* * *

॥ अथ तन्निराकरणम् अनुव्याख्यानोक्तम् ॥

॥ अथ तत्रादौ कारणात्कार्यस्यानन्यत्वनिराकरणम् ॥

८९ सु०— अत्र सूत्राक्षराणामार्जवानार्जवादिचिन्ता शिष्यैरेव क्रियतामित्याशयवान् यदुक्तं 'कारणात् कार्यस्यानन्यत्वं' तत्तावन्निराकरिष्यन् किमनेन प्रबन्धेन निमित्तकारणानन्यत्वं कार्यस्योपपादितम्, उतोपादानकारणानन्यत्वमिति विकल्पं चेतसि निधायाद्यं निराकरोति नित्यभेद इति ।

अनु०— नित्यभेदो निमित्तेन हि

नित्यशब्दो नियमार्थः, भेद एवेति । कार्यस्येति शेषः । हि इति सर्वप्रमाणप्रसिद्धिं सूचयति । तथाच सर्वमिदं बाधितविषयमिति ।

न द्वितीयः, प्रकृतानुपयोगात् ।

परि०— **आर्जवानार्जवेति** । यथाक्रमं स्वपरपक्षयोरिति भावः । **शिष्यैरिति** । सा च चिन्ता चन्द्रिकाकारैः कृता ध्येया । अत्राप्यग्रे अनवस्थेतिवाक्यव्याख्यानान्तरं करिष्यते । **प्रबन्धेनेति** । तदनन्यत्वमित्यादिसूत्रसन्दर्भेणेत्यर्थः ।

यादु०— **आर्जवानार्जवादिचिन्तेति** । अस्मन्मते आर्जवं परमते त्वनार्जवमिति चिन्तेत्यर्थः । आदिपदेन प्रकृतानुगुण्यागतार्थत्वादिपरिग्रहः । **उक्तप्रायमिति** । प्रकृत्यधिकरण इति शेषः ।

कं०रा०— नित्यशब्दस्य नियमार्थत्वे सति फलितमर्थमाह **भेद एवेति** ।

शे०वा०— ननु 'नित्यमेदो निमित्तेन ह्युपादानेन तु द्वयम्' इत्युत्तरभाष्ये 'भावे च' इत्यादिसूत्राणामार्जवानार्जवादिचिन्ता न क्रियत इति कथमस्यापव्याख्याननिरासकत्वम् । न च सूत्राक्षराणामार्जवानार्जवादिचिन्ताकरणस्य तस्य दूषणत्वेऽपि न तदेव तद्दूषणं किन्नाम प्रमेयनिराकरणमपि । तथा च नित्यभेद इत्युत्तरभाष्यस्य सूत्राक्षराणामार्जवानार्जवादिचिन्ताकरणरूपत्वाभावेऽपि कार्यस्य कारणानन्यत्वरूपतत्प्रमेयनिरासकत्वाद्युक्तमस्य तत्प्रत्याख्यानत्वमिति वाच्यम् ॥ प्रमेयनिराकरणापेक्षयाऽऽर्जवानार्जवादिचिन्ताकरणस्यान्तरङ्गतया सति सम्भवे तत्परित्यागेन प्रमेयमात्रनिराकरणायोगात् । उपादेयस्योपादानादनन्यताया एव भावे चेत्यादिसूत्रप्रमेयतया परस्याभिमतत्वेन कार्यस्य निमित्तकारणादन्यतायास्तदभिमतत्वेन 'उपादानेन तु द्वयमि'त्येतावतैवाभिमतप्रमेयनिरासासिद्ध्या कार्यस्य निमित्तकारणेनात्यन्ताभेदाभावोपपादकस्य नित्यभेदो निमित्तेन हि' इति भाष्यखण्डस्यानर्थक्यानिस्ताराच्चेत्यतोऽन्तरङ्गत्वेऽप्यार्जवानार्जवादिचिन्तायाः स्पष्टत्वेन शिष्यैरेव कर्तुं शक्यत्वान्न स्वयं तत्करणमुचितमित्याशयवतो भाष्यकारस्य तत्परित्यागेन प्रमेयमात्रनिराकरणं न दोषायेत्यभिप्रेत्य भाष्यकारीयमार्जवानार्जवादिचिन्ताऽकरणं तावदुपपादयति **अत्रेति** । स्पष्टत्वादिति शेषः । कार्यस्योपादानानन्यतायाः सूत्रप्रमेयतया परस्याभिमतत्वेऽपि कार्यस्य कारणानन्यत्वमिति परोक्तेः सामान्यत्वेन तदुक्त्या प्रसक्तस्य कार्ये उपादानानन्यत्वस्य 'उपादानेन तु द्वयम्' इत्यनेन निरासासिद्धावपि तदुक्त्यैव प्रसक्तस्य निमित्ताभेदस्य तेनानिरस्ततया तन्निरासार्थत्वान्न नित्यभेद इत्युत्तरभाष्यखण्डवैयर्थ्यमपीत्यभिप्रेत्य प्रसक्तपक्षद्वयनिरासकतया भाष्यखण्डं योजयितुं सम्भावितविकल्पप्रदर्शनपूर्वकं तदनुक्त्याऽपि प्रसक्तां भाष्ये न्यूनतां परीहरति **यदुक्तमित्यादिना** । भेदस्य नित्यताकथनस्य प्रकृतानुपयोगात्प्रकृतोपयुक्तमर्थमाह **नित्यशब्द इति** । तदेव दर्शयति **भेद एवेतीति** । प्रतिबन्धनुक्तेराह **कार्यस्येति शेष इति** । भाष्ये हिशब्दस्यानर्थक्यमाशङ्क्य कार्यस्य निमित्तेनात्यन्तभेदप्रतिपादकप्रमाणसिद्धिसूचनार्थत्वान्न तदित्याह **हीति सर्वेति** । उक्तार्थस्य सर्वप्रमाणप्रसिद्धत्वसूचनेनापि किमित्यत आह **तथा चेति** । **सर्वमिदमिति** । कार्यस्य कारणानन्यत्वसाधकतयोपन्यस्तं युक्तिजातमित्यर्थः । अत्र पक्षे प्रकृतानुपयोगरूपस्पष्टदोषानुक्तिर्भाष्यकाराणामयुक्ता इत्यत उक्तप्रायत्वात् पृथक् तदनुक्तिर्न दोषायेत्यभिप्रेत्य स्वयं प्रकृतानुपयोगमाह **प्रकृतेति** ।

वा०र०— **उत्तरभाष्येति** । उत्तरभाष्यपूर्वखण्डेत्यर्थः । तमेव दर्शयति । भेद एवेतीति पाठः । तदेवेति पाठे नियमार्थत्वमेवेत्यर्थः । मूले खलु अस्योपन्यास इति पाठानुसारेण तस्येति प्रतीकोपादानमपि न दुष्यति ।

विठ्ठल०— **आर्जवानार्जवादीत्यत्रापिपदेन** प्रकृतानुपयोगगतार्थत्वादि सङ्ग्रहः । **शिष्यैरिति** । अनवस्थेति वाक्यव्याख्यानानन्तरं तत्स्पष्टयिष्यति । विस्तरस्तु चन्द्रिकातोऽवसेयः । नित्यशब्दस्य नियमार्थत्वे

फलितमाह **भेद एवेति** । **तथा चेति** । निमित्तकारणेन कार्यस्य भेद एवेति प्रमाणसिद्धत्वादनेन प्रबन्धेनोपपादितुं इदं सर्वं बाधितविषयमित्यर्थः ।

॥ इति कारणात्कार्यस्यानन्यत्वनिराकरणम् ॥

* * *

॥ अथ तत्र स्वल्पोपन्यासस्य प्रयोजनम् ॥

९० **सु॰— 'वियदादिप्रपञ्चस्य ब्रह्मानन्यत्वमुपपादयितुं स्वल्वस्योपन्यासः । तद्यदि नाम उपादानानन्यत्वं कार्यस्य तदा किमायातं प्रकृते । न हि ब्रह्म प्रपञ्चोपादानमित्येतदुक्त-प्रायमि'ति मन्वानो दूषणान्तरमाह उपादानेनेति ।**

अनु॰— उपादानेन तु द्वयम् ।

हि इत्यनुवर्त्यते । उपादानेन कार्यस्य, द्वयं भेदाभेदौ, प्रमितौ । ततोऽस्मिन्नपि पक्षे बाधितविषयत्वमिति ।

परि॰— ननु प्रपञ्चस्योपादानादनन्यत्वोक्तौ ब्रह्मानन्यत्वमेव सेत्स्यति ब्रह्मण एवोपादान-त्वादित्यत आह **न हि ब्रह्म प्रपञ्चोपादानमिति** । प्रकृतिनये निराकृतत्वादिति भावः । **इत्येत-दिति** । न द्वितीय इत्यादिनोक्तं द्वितीयपक्षदूषणमित्यर्थः । **उक्तप्रायमिति** । प्रकृत्यधिकरण इति भावः । **दूषणान्तरमिति** । प्रकृतानुपयुक्तत्वापेक्षया बाधितविषयत्वरूपाधिकदोषं चेत्यर्थः । **हीत्य-नुवर्तत इति** । स च प्रमाणप्रसिद्धिद्योतक इत्युक्तमेवेति भावेनाह **प्रमिताविति** ।

श्रीनिधि॰— न हि ब्रह्मप्रपञ्चोपादानमित्येतदुक्तप्रायमिति । ब्रह्मप्रपञ्चोपादानं न हीत्येदतदुक्त-प्रायमित्यर्थः ।

शे॰वा॰— कथमुपादानानन्यत्वं कार्यस्येत्युपपादनस्य प्रकृतानुपयोग इत्यतो यदर्थसाधकतया-ऽस्योपन्यासस्तत्साधनाक्षमत्वादित्यभिप्रेत्य साध्यमर्थं तावद्दर्शयति **वियदादीति** । **ब्रह्मानन्यत्वमिति** । पूर्वसूत्रे तस्यैव प्रतिज्ञातत्वादिति भावः । **अस्येति** । उपादानानन्यत्वं कार्यस्येत्यस्येत्यर्थः । तथाऽपि कथमेतस्य तदनुपयोग इत्यतस्तद्दर्शयति **तद्यदीति** । **किमायातं प्रकृत इति** । अनेनोपादानोपादेयभावस्थले कार्यस्यो-पादानानन्यत्वप्राप्तावपि प्रपञ्चस्य ब्रह्मानन्यत्वाप्राप्तेरिति भावः । ननु चोपादानोपादेयभावस्थले कार्यस्योपा-

दानानन्यत्वप्राप्तौ प्रपञ्चस्यापि ब्रह्मानन्यत्वप्राप्तिरवर्जनीयैव । ब्रह्मणोऽपि प्रपञ्चोपादानत्वेन ब्रह्मजगतोरपि तद्भावादित्यतो भवेदेतदेवं यदि ब्रह्मणः प्रपञ्चोपादानत्वं स्यात् । न चैतदस्ति । साधकाभावादिना प्रकृत्यधिकरणे निरस्तत्वादित्याशयेनाह **न हीति** । **उक्तप्रायमिति** । तथा च प्रकृतानुपयोग इति कण्ठरवेणानभिधानेऽपि तदुपपादकस्य प्रपञ्चं प्रति ब्रह्मण उपादानत्वाभावस्य कथनेनार्थतः प्रकृतानुपयोगसिद्धेर्न पृथगत्र साक्षात्तदभिधानं कृतमिति भावः । तर्हि प्रकृतानुपयोगयुक्तिमात्रेण द्वितीयपक्षदोषसिद्धेः 'उपादानेन तु द्वयम्' इति तन्निरासपरोत्तरवाक्यानर्थक्यमित्यतो दूषणान्तरोपदर्शनार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयति **दूषणान्तरमिति** । बाधितविषयत्वाख्यमित्यर्थः । **हीत्यनुवर्तत इति** । अन्यथाऽत्र भाष्ये कार्यस्योपादानेन भेदाभेदयोः प्रमितत्वानुक्त्या कार्यस्योपादानानन्यत्वसाधकयुक्तिजातस्य दूषणानुक्तिप्रसङ्गेनास्य भाष्यस्य तत्पक्षदूषणत्वं न स्यादिति भावः । **प्रमिताविति** । अनेन हिशब्दः प्रमाणसिद्धिसूचकः इत्युक्तं भवति । कार्यस्योपादानेन भेदाभेदयोः प्रमितत्वोक्तेः प्रयोजनमाह **तत इति** ।

वा०र०— उपादानत्वाभावकथनेनेति । प्राक्कथितोपादानत्वाभावस्यात्राभिप्रेतत्वेनेत्यर्थः । उक्तप्रायत्वस्य प्राचीननिराकरणमूलकत्वस्यैव स्पष्टत्वादिति ज्ञेयम् । **दूषणानुक्तिप्रसङ्गेनेति** । भेदाभेदसाधकप्रसारणबाधरूपदूषणानुपपत्तिप्रसङ्गेनेत्यर्थः । प्रमाणस्यैवानुपन्यासादिति भावः ।

स०व्र०— उक्तप्रायमिति । प्रकृत्यधिकरणे इति शेषः ।

विठ्ठल०— ननु प्रपञ्चस्य ब्रह्मोपादानकत्वात् तदनन्यत्वमेव प्रकृते आयातमित्यत आह **न हीति** । **उक्तप्रायमिति** । प्रकृत्यधिकरणमिति शेषः ।

॥ इति स्वल्पोपन्यासस्य प्रयोजनम् ॥

* * *

॥ अथ तत्र 'असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि' इत्यनुव्याख्यानस्य द्वेधा व्याख्यानम् ॥

॥ अथ तत्रादौ प्रथमव्याख्यानम् ॥

९१ **सु०—** कथं कार्यं कारणेन भिन्नाभिन्नं प्रमितमित्यत आह **असदिति** ।

अनु०— असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि ।

यत् घटादिकं मृदादि**कारणात्मतया** प्रागुत्पत्तेः **अस्ति** इति प्रमितं परेणाङ्गीकृतं च, तदेव पृथुबुध्नोदराकारादिना **कार्यरूपेण** प्रागुत्पत्तेः **असत् हि** यस्मात्, तस्मादुपादानेन भिन्नाभिन्नमिति निश्चीयते ।

एतदुक्तं भवति । परो हि घटादेः कार्यस्य प्रागुत्पत्तेः सत्त्वमभ्युपगच्छति, तत्किं पृथगेवोत मृदादिकारणात्मतयेति वक्तव्यम् । नाद्यः, अनभ्युपगमात्, अनुपलब्धेश्च । द्वितीये तु कार्यस्योपादानाभेदस्तावदङ्गीकृतः, न चात्यन्ताभेदः, घटादेः कार्याकारेण प्रागुत्पत्तेरसत्त्वात् । यदा हि घटादिकं मृदादिनाऽत्यन्ताभिन्नं स्यात्, तदा प्रागुत्पत्तेर्घटादिरूपेण सत्स्यात्, मृदादेस्तदा सत्त्वात् । न चैवम् । तेन जानीमो घटादिकं मृदादिना भिन्नाभिन्नमिति ।

अत्यन्तासत्कार्यवादिनं प्रति भेदाभेदसमर्थनं विरोधपरिहारश्चोत्तरत्र विधास्यत इति ।

परि०— यदिति, श्रवणादाह **तदेवेति** । **अत्यन्तासदिति** । असतः सत्तासम्बन्धो जनिरिति, वक्तारं तार्किकं प्रतीत्यर्थः । **भेदाभेदेति** । उपादानोपादेययोरिति भावः । **विरोधेति** । भेदाभेदयोरिति योज्यम् । उत्तरत्र वैशेषिकनये समवायनिरासप्रस्तावे । इतिशब्दस्यैतदुक्तं भवतीति पूर्वेणान्वयः ।

यादु०— **विरोधपरिहार इति** । भेदाभेदयोरङ्गीकार इति शेषः । **उत्तरत्रेति** । वैशेषिकपरीक्षायामित्यर्थः ।

वं०प०— **पृथगेवेति** । कारणादभिन्नतयेत्यर्थः । **अनभ्युपगमात्** पृथक् सत्त्वस्येति शेषः । **अनुपलब्धेश्चेति** । पृथक् सत्त्वस्येति शेषः ।

कं०रा०— **कार्याकारणेति** । पृथुबुध्नोदराद्याकारेणेत्यर्थः ।

शे०वा०—विकल्पितपक्षद्वयदूषणेनापव्याख्याननिरासस्य 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम्' इत्येतावता भाष्येणैव सिद्धेरुत्तरस्यानर्थक्यमाशङ्क्य कार्यस्योपादानेन भेदाभेदयोः प्रमितत्वस्य 'ह्युपादानेन तु द्वयम्' इत्यनेनोक्तस्य समर्थनार्थत्वान्न तदिति भावेन तत्समर्थनपरतया भाष्यं योजयितुं शङ्कामुत्थापयति **कथमिति** । यद्घटादिकं प्रागुत्पत्तेः कार्यरूपेणासत्तदेव मृदादिकारणात्मना प्रागुत्पत्तेरस्तीति यथाश्रुतक्रमेण योजनायामसिद्धस्यानुवादः सिद्धस्य विधानं भवतीत्यतो व्यत्यासेन वाक्यं योजयति **यदित्यादिना** । बुद्ध्यारोहाय यत्कारणात्मना कार्यरूपेणेति विशेषनिष्ठतया व्याख्याति **घटादिकमित्यादिना** । **प्रागुत्पत्तेरिति** । योग्यतयोभयत्राध्याहारेण व्याख्यानं **प्रमितमिति** । अनेन मूले हिशब्दः कार्यस्य कारणात्मना सत्तायाः

प्रमाणसिद्धत्वसूचनार्थ इत्युक्तं भवति । मूले यदिति यच्छब्दश्रवणात्तदिति लभ्यत इत्याशयेनोक्तं तदेवेति । मूले हिशब्दस्य न यथाश्रुत एव सम्बन्धः । तथा सति कार्याकारेणासत्त्वस्योपादानेन कार्यस्य भिन्नाभिन्नत्वे हेतुत्वसमर्पकाभावेन तस्याहेतुत्वप्रसङ्गात् । किन्त्वसदित्यनेनापीत्यमिप्रेत्य हिशब्दप्रदर्शनपूर्वकं हेत्वर्थतया तं व्याचष्टे असिद्धिर्यस्मादिति । यस्मादित्यनुरोधादाह तस्मादिति । मूले साधनानुक्त्या साकाङ्क्षत्वेन प्रसक्तवाक्याभासताशङ्कापनुत्तये पूर्वेण सम्बन्धमाह उपादानेनेति । ननु कार्यस्य प्रागुत्पत्तेः सत्त्ववादिना परेण, कार्यरूपेणैव सत्त्वस्य वक्तुं शक्यत्वात् कारणात्मतया सतीति हेतुविशेषणासिद्धिः । तथा कार्याकारेणासत्त्वादिति हेतुविशेष्यासिद्धिरपि । तथा कार्यस्य कारणेनात्यन्ताभेदेऽपि कारणात्मना प्रागुत्पत्तेः सत्त्वे सति कार्यरूपेणासत्त्वोपपत्तेरप्रयोजकत्वं च । सत्कार्यवादिनं प्रत्युक्तहेतुना कार्यस्योपादानेन भेदाभेदसाधनसम्भवेऽप्यत्यन्तासत्कार्यवादिनं वैशेषिकादिकं प्रति भेदाभेदसाधनानुपपत्तिश्च तेन प्रागुत्पत्तेः कार्यस्य सत्त्वस्यैवानङ्गीकारेण कारणात्मना सत्त्वस्यासिद्धत्वाद्भेदाभेदयोः परस्परपरिहारेणैव वृत्तिदर्शनेनैकत्र तदुभयस्य विरुद्धतया साधनायोगाच्चेत्यतो अभिप्रायमाह एतदुक्तं भवतीति । 'कारणात्मतयाऽस्ति हि' इत्यत्र कारणात्मतया सत्त्वस्य प्रमितत्वाङ्गीकृतत्वसूचकहिशब्दोक्तयुक्त्या कार्याकारेण सत्त्वपक्षं दूषयति अनभ्युपगमादिति । अभ्युपगमे त्वाह अनुपलब्धिश्चेति । ततश्च न विशेष्यासिद्धिरिति भावः । अङ्गीकृत इति । ततश्च न विशेषणासिद्धिरिति भावः । हेतूच्छित्तिरेव विपक्षे बाधिकेति नाप्रयोजकत्वमित्यभिप्रेत्याप्रयोजकशङ्कोत्थापनपूर्वकं तामुपपादयति न चेत्यादिना । मृदादिनाऽत्यन्ताभिन्नत्वेऽपि घटादेः कुतः प्रागुत्पत्तेर्घटरूपेण सत्त्वप्रसङ्गः । तदा मृदाद्यभावेन तत्परिहारसम्भवादित्यत उक्तम् मृदादेरिति । इष्टापत्तिमाशङ्क्यानुपलम्भबाधान्नैवमित्याह न चैवमिति । किमेतावताऽपीत्यतो विशेषणविशेष्यासिद्ध्यप्रयोजकत्वशङ्कानामनवकाशात्, कार्यमुपादानेन भिन्नाभिन्नं प्रागुत्पत्तेः कारणात्मतया सत्त्वे सति कार्याकारेणासत्त्वाद्व्यतिरेकेण कारणवदिति सूचितानुमानेन भेदाभेदसिद्धिः सम्पन्नेत्युपसंहरति तेनेति । उत्तरत्रेति । वैशेषिकपरीक्षायां 'भेदो नाशे भवेत्तथा' इत्यादिनोपादानोपादेययोर्भेदाभेदसमर्थनं विधास्यत इत्यर्थः । तथोत्तरत्र विशेषमेव संश्रित्य 'विशेष बलवान्यतः' इत्यादिनोपादानोपादेययोर्भेदाभेदयोर्विरोधपरिहारश्च विधास्यत इत्यर्थः । इतीत्यस्येत्येतदुक्तं भवतीति पूर्वेण सम्बन्धः ।

वा०२०— ह्युपादानेन त्विति । हीत्यस्यानुवृत्तेः आश्रयणात् । अनुवृत्तिसिद्धिर्हि शब्दान्तभविन ह्युपादानेनेति व्यवहृतमिति ज्ञेयम् । व्यत्यासेन वाक्यमिति । कारणात्मतयाऽस्ति हीति खण्डस्य पूर्वं असत् इत्यादि खण्डस्य पश्चादिति व्यत्यासेनेत्यर्थः ।

स०व०— उपादानेन भिन्नाभिन्नमिति निर्धीयत इति । अत्रायं सिद्धान्तनिष्कर्षः । कार्यस्य उपादानेन भेदाभेदौ कार्यसत्त्वदशायामेव । नष्टे भेदाभेदचिन्ताऽयोगात् । उपादाननिरूपितभेदाभेदौ कार्ये । तन्निरूपितभेदाभेदौ उपादाने । न तु एक एव भेदोऽभेदो वा उभयनिष्ठः । कार्ये नष्टेऽपि तन्निरूपितभेदाभेदौ उपादानस्वरूपभूतौ तिष्ठत एव । धर्मिसत्त्वस्यानावश्यकत्वादिति ।

एतदुक्तं भवति । परो हि घटादेः कार्यस्य प्रागुत्पत्तेः सत्त्वमभ्युपगच्छति, तत्किं पृथगेवोत मृदादिकारणात्मतयेति वक्तव्यम् । नाद्यः, अनभ्युपगमात्, अनुपलब्धेश्च । द्वितीये तु कार्यस्योपादानाभेदस्तावदङ्गीकृतः, न चात्यन्ताभेदः, घटादेः कार्याकारेण प्रागुत्पत्तेरसत्त्वात् । यदा हि घटादिकं मृदादिनाऽत्यन्ताभिन्नं स्यात्, तदा प्रागुत्पत्ते-र्घटादिरूपेण सत्स्यात्, मृदादेस्तदा सत्त्वात् । न चैवम् । तेन जानीमो घटादिकं मृदादिना भिन्नाभिन्नमिति ।

अत्यन्तासत्कार्यवादिनं प्रति भेदाभेदसमर्थनं विरोधपरिहारश्चोत्तरत्र विधास्यत इति ।

परि०— यदिति, श्रवणादाह **तदेवेति** । **अत्यन्तासदिति** । असतः सत्तासम्बन्धो जनिरिति, वक्तारं तार्किकं प्रतीत्यर्थः । **भेदाभेदेति** । उपादानोपादेययोरिति भावः । **विरोधेति** । भेदाभेदयोरिति योज्यम् । उत्तरत्र वैशेषिकनये समवायनिरासप्रस्तावे । इतिशब्दस्यैतदुक्तं भवतीति पूर्वेणान्वयः ।

यादु०— **विरोधपरिहार इति** । भेदाभेदयोरङ्गीकार इति शेषः । **उत्तरत्रेति** । वैशेषिकपरीक्षाया-मित्यर्थः ।

वं०प०— **पृथगेवेति** । कारणादभिन्नतयेत्यर्थः । **अनभ्युपगमात्** पृथक् सत्त्वस्येति शेषः । **अनुपलब्धेश्चेति** । पृथक् सत्त्वस्येति शेषः ।

कं०रा०— **कार्याकारणेति** । पृथुबुध्नोदराद्याकारेणेत्यर्थः ।

शे०वा०—विकल्पितपक्षद्वयदूषणेनापव्याख्याननिरासस्य 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम्' इत्येतावता भाष्येणैव सिद्धेरुत्तरस्यानर्थक्यमाशङ्क्य कार्यस्योपादानेन भेदाभेदयोः प्रमितत्वस्य 'ह्युपादानेन तु द्वयम्' इत्यनेनोक्तस्य समर्थनार्थत्वान्न तदिति भावेन तत्समर्थनपरतया भाष्यं योजयितुं शङ्कामुत्थापयति **कथमिति** । यद्घटादिकं प्रागुत्पत्तेः कार्यरूपेणासत्तदेव मृदादिकारणात्मना प्रागुत्पत्तेरस्तीति यथाश्रुतक्रमेण योजनायामसिद्धस्यानुवादः सिद्धस्य विधानं भवतीत्यतो व्यत्यासेन वाक्यं योजयति **यदित्यादिना** । बुद्ध्यारोहाय यत्कारणात्मना कार्यरूपेणेति विशेषनिष्ठतया व्याख्याति **घटादिकमित्यादिना** । **प्रागुत्पत्तेरिति** । योग्यतयोभयत्राध्याहारेण व्याख्यानं **प्रमितमिति** । अनेन मूले हिशब्दः कार्यस्य कारणात्मना सत्तायाः

प्रमाणसिद्धत्वसूचनार्थ इत्युक्तं भवति । मूले यदिति यच्छब्दश्रवणात्तदिति लभ्यत इत्याशयेनोक्तं तदेवेति । मूले हिशब्दस्य न यथाश्रुत एव सम्बन्धः । तथा सति कार्याकारेणासत्त्वस्योपादानेन कार्यस्य भिन्नाभिन्नत्वे हेतुत्वसमर्पकाभावेन तस्याहेतुत्वप्रसङ्गात् । किन्त्वसदित्यनेनापीत्यभिप्रेत्य हिशब्दप्रदर्शनपूर्वकं हेत्वर्थतया तं व्याचष्टे असिद्धिर्यस्मादिति । यस्मादित्यनुरोधादाह तस्मादिति । मूले साधनानुक्त्या साकाङ्क्षत्वेन प्रसक्तवाक्याभासताशङ्कापनुत्तये पूर्वेण सम्बन्धमाह उपादानेनेति । ननु कार्यस्य प्रागुत्पत्तेः सत्त्ववादिना परेण, कार्यरूपेणैव सत्त्वस्य वक्तुं शक्यत्वात् कारणात्मतया सतीति हेतुविशेषणासिद्धिः । तथा कार्याकारेणासत्त्वादिति हेतुविशेष्यासिद्धिरपि । तथा कार्यस्य कारणेनात्यन्ताभेदेऽपि कारणात्मना प्रागुत्पत्तेः सत्त्वे सति कार्यरूपेणासत्त्वोपपत्तेरप्रयोजकत्वं च । सत्कार्यवादिनं प्रत्युक्तहेतुना कार्यस्योपादानेन भेदाभेदसाधनसम्भवेऽप्यत्यन्तासत्कार्यवादिनं वैशेषिकादिकं प्रति भेदाभेदसाधनानुपपत्तिश्च तेन प्रागुत्पत्तेः कार्यस्य सत्त्वस्यैवानङ्गीकारेण कारणात्मना सत्त्वस्यासिद्धत्वाद्भेदाभेदयोः परस्परपरिहारेणैव वृत्तिदर्शनेनैकत्र तदुभयस्य विरुद्धतया साधनायोगाच्चेत्यतो अभिप्रायमाह एतदुक्तं भवतीति । 'कारणात्मतयाऽस्ति हि' इत्यत्र कारणात्मतया सत्त्वस्य प्रमितत्वाङ्गीकृतत्वसूचकहिशब्दोक्तयुक्त्या कार्याकारेण सत्त्वपक्षं दूषयति अनभ्युपगमादिति । अभ्युपगमे त्वाह अनुपलब्धिश्चेति । ततश्च न विशेष्यासिद्धिरिति भावः । अङ्गीकृत इति । ततश्च न विशेषणासिद्धिरिति भावः । हेतूच्छित्तिरेव विपक्षे बाधिकेति नाप्रयोजकत्वमित्यभिप्रेत्याप्रयोजकशङ्कोत्थापनपूर्वकं तामुपपादयति न चेत्यादिना । मृदादिनाऽत्यन्ताभिन्नत्वेऽपि घटादेः कुतः प्रागुत्पत्तेर्घटरूपेण सत्त्वप्रसङ्गः । तदा मृदाद्यभावेन तत्परिहारसम्भवादित्यत उक्तम् मृदादेरिति । इष्टापत्तिमाशङ्क्यानुपलम्भबाधान्नैवमित्याह न चैवमिति । किमेतावताऽपीत्यतो विशेषणविशेष्यासिद्ध्यप्रयोजकत्वशङ्कानामनवकाशात्, कार्यमुपादानेन भिन्नाभिन्नं प्रागुत्पत्तेः कारणात्मतया सत्त्वे सति कार्याकारेणासत्त्वाद्व्यतिरेकेण कारणवदिति सूचितानुमानेन भेदाभेदसिद्धिः सम्पन्नेत्युपसंहरति तेनेति । उत्तरत्रेति । वैशेषिकपरीक्षायां 'भेदो नाशे भवेत्तथा' इत्यादिनोपादानोपादेययोर्भेदाभेदसमर्थनं विधास्यत इत्यर्थः । तथोत्तरत्र विशेषमेव संश्रित्य 'विशेष बलवान्यतः' इत्यादिनोपादानोपादेययोर्भेदाभेदयोर्विरोधपरिहारश्च विधास्यत इत्यर्थः । इतीत्यस्येत्येतदुक्तं भवतीति पूर्वेण सम्बन्धः ।

वा०र०— ह्युपादानेन त्विति । हीत्यस्यानुवृत्तेः आश्रयणात् । अनुवृत्तिसिद्धिर्हि शब्दान्तर्भाविन ह्युपादानेनेति व्यवहृतमिति ज्ञेयम् । व्यत्यासेन वाक्यमिति । कारणात्मतयाऽस्ति हीति खण्डस्य पूर्वं असत् इत्यादि खण्डस्य पश्चादिति व्यत्यासेनेत्यर्थः ।

स०व०— उपादानेन भिन्नाभिन्नमिति निश्चीयत इति । अत्रायं सिद्धान्तनिष्कर्षः । कार्यस्य उपादानेन भेदाभेदौ कार्यसत्त्वदशायामेव । नष्टे भेदाभेदचिन्ताऽयोगात् । उपादाननिरूपितभेदाभेदौ कार्ये । तन्निरूपितभेदाभेदौ उपादाने । न तु एक एव भेदोऽभेदो वा उभयनिष्ठः । कार्ये नष्टेऽपि तन्निरूपितभेदाभेदौ उपादानस्वरूपभूतौ तिष्ठत एव । धर्मिसत्त्वस्यानावश्यकत्वादिति ।

(न च विशेषबलेन इच्छाया एवाभावः कुतो नोच्यते इति वाच्यम् । इच्छायाः स्वेन निर्विशेषाभेदस्य सत्त्वेन तत्र वक्तुमशक्यत्वात् व्यक्तेश्चेच्छया सविशेषाभेदसत्त्वात् तदभावादिति वक्तुं शक्यत इति भावः । तस्मिन्सत्यप्यसत्त्वादित्यत्र असत्त्वं नाम प्रागभावप्रतियोगित्वं, ध्वंसप्रतियोगित्वं विवक्षितम् । एवं च इच्छाव्यक्तौ न व्यभिचारः । तत्र विवक्षितासत्त्वस्याभावात् (न च) व्यक्त्यभावादित्यस्य कोऽर्थ इति वाच्यम् । इच्छात्वरूपेण सत्त्वेऽपि व्यक्तिरूपेणासत्त्वस्य विशेषबलेनाभिप्रेतत्वात्)

ननु सत्कार्यवादिनं प्रति सत्त्वं पृथगेव उत मृदादिकारणतयेत्यादिविकल्पेन भेदाभेदसमर्थनसम्भवेऽपि अत्यन्तासत्कार्यवादिनं प्रति कथं तत्समर्थनं सङ्गच्छते । तं प्रति उक्तविकल्पस्य कर्तुमशक्यत्वात् । एकत्रैव विरुद्धभेदाभेदसमर्थने विरोधश्च स्यादित्यत आह **अत्यन्तेति** । **उत्तरत्र विधास्यत इति** । वैशेषिकपरीक्षायामिति शेषः ।

स०ना०— **असद्यत्कार्यरूपेणेति** मूलसुधायां **अनभ्युपगमादिति** । अपसिद्धान्तादित्यर्थः । एतेन तदङ्गीकर्तारं प्रति अनभ्युपगमादित्यभिधानमयुक्तमिति परास्तम् ।

विठ्ठल०— ननु घटादिकं कार्याकारेणैव प्रागुत्पत्तेः सदिति ब्रूमः । तथा च तदसत्त्वेन कार्यकारणयोर्भेदसाधनमनुपपन्नमित्यत आह **एतदुक्तं भवतीति** । **कार्याकारेणेति** । पृथुबुध्नोदराकारेणेत्यर्थः । **विरोधपरिहार इति** । भेदाभेदयोरिति शेषः । **उत्तरत्र** वैशेषिकपरीक्षायाम् ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ द्वितीयव्याख्यानम् ॥

९२ **सु०— यच्च कार्यस्य प्रागुत्पत्तेः सत्त्वमुक्तं तदपि नोपपन्नमित्याह असदिति ।**

यत् घटादिकं प्रागुत्पत्तेरस्तीत्यावयोः सम्मतम्, तदेव तदाऽसच्च यस्मात्तस्मात् सदसदेवेति सत्कार्यवादोऽनुपपन्न एव । 'तस्यैव तदैव तत्रैव सत्त्वमसत्त्वं च विरुद्धमिति चेन्न, रूपभेदेन अविरोधात्' इत्याशयेनोक्तं कारणात्मतया कार्यरूपेणेति ।

नन्वेवं सति किञ्चित्सदेव, किञ्चित् असदेव, सदसत्तु न किमपि स्यात् । न स्यात् । तयोरपि रूपयोरत्यन्तभेदाभावादिति ।

परि०— चशब्दाध्याहारेणार्थमाह **असच्चेति** । हेरर्थो **यस्मादिति** । **किञ्चिदिति** । कारणमित्यर्थः । पुनः किञ्चिदित्यस्य कार्यमित्यर्थः । निराह **न स्यादिति** । अनवस्था स्यादित्यनूदितस्यार्थ इति सर्वजनसम्मता व्यवस्था न स्यादिति ।

वं०प०— **सत्त्वमुक्तम्** अत्यन्तसत्त्वमुक्तम् । **किञ्चित्** कारणरूपम् । **किञ्चित्** कार्यरूपम् । **किमपीति** । एकं वस्त्वित्यर्थः । **अत्यन्तेति** । तथा च कार्यात्मकत्वकारणात्मकत्वरूपयो रूपिणः सकाशादभेदस्यापि सत्त्वेनैकमेव वस्तु सदसदात्मकमित्यर्थः ।

शे०वा०— उक्तयोजनायां कार्यस्य कारणानन्यत्वरूपप्रमेयैकदेशस्य भाष्ये निरासेऽपि सत्कार्यवादरूपप्रमेयैकदेशस्यानिरस्ततयाऽधिकरणप्रमेयस्य प्रागुत्पत्तेः कार्यस्य सत्त्वं कारणानन्यत्वं चेत्यस्य निरासो न सिद्ध्यतीत्यतस्तत्सिद्ध्यर्थमसद्यदिति भाष्यमेव तन्निरासपरतयाऽपि योजयति **यच्चेति** । अत्र पूर्वयोजना न सङ्गतेत्यर्थतः सत्कार्यवादनिरासोपयोगितया भाष्यं योजयति **यद्घटादिकमिति** । एवं प्रयोजनायां कार्यरूपेण कारणात्मतयेति विशेषणनैरपेक्ष्येणैव सत्कार्यवादनिरासतिद्धेस्तद्वैयर्थ्यमित्यतो विरोधशङ्कापरिहारार्थत्वान्न तदिति भावेन विरोधशङ्कानिवर्तकतया तद्योजयितुं तच्छङ्कामुत्थापयति **तस्यैवेति** । अत्र तस्यैवेति प्रतियोगिभेदनिराकरणम् । तदैवेति कालभेदनिराकरणं तत्रैवेत्याश्रयभेदनिराकरणम् । अयमर्थः । भेदो हि विरोधशान्तिहेतुः । तथा हि । क्वचित्प्रतियोगिभेदः । यथा गवयो गोघटाभ्यां सदृशो विसदृशश्चेति । क्वचित्कालभेदो यथा मधुरायामेव देवदत्तस्य भावाभावौ । क्वचिदाश्रयभेदो यथा मधुरायां देवदत्तस्य भावः सृघ्ने तदभावः । न चात्र विरोधशान्तिहेतुभूतः क्वचिदपि भेदोऽस्ति । तत्कथं न विरोध इति । न देशकालप्रतियोगिभेदमात्रं विरोधशान्तिहेतुः । एकस्यैव घटस्यैकत्रैकदैव घटत्वेन रूपेण सद्भावस्य पटत्वेन रूपेणासद्भावस्य च दर्शनेन देशादिभेदस्यैव रूपभेदस्यापि विरोधशान्तिहेतुत्वेन क्लृप्तत्वात् तदिहापि प्रतियोग्यादिभेदाभावेऽपि रूपभेदेन भावाभावयोरुपपत्तेरित्याशयेनाह **रूपेति** । कार्यकारणाकारयोरत्यन्तभेदं मन्वानश्शङ्कते **नन्विति** । भवेदेतदेवं यदि तयो रूपयोरत्यन्तभेदः स्यान्न चैवमित्याह **न स्यादिति** ।

वा०र०— **सत्कार्यवादरूपप्रमेयैकदेशस्येति** । एकदेशान्तरस्येत्यर्थः । विशेषमेव संश्रित्य विशेषो बलवान् इत्येतत् वैशेषिकपरीक्षानुव्याख्यानव्याख्यानरूपमूलोक्तव्युत्पादनानुसारेणाह **अयमर्थः भेदो हीति** । अभेदवादिशङ्कात्यागायोगादाह **अत्यन्तभेदं मन्वान इति** ।

स०व्र०— **तस्मात्सदसदेवेति** । अस्मन्मते कार्यस्य सत्त्वं नाम येन कारणेन स्वयमभिन्नं तस्य कारणस्यैव सत्त्वं, न तु कार्यस्य पृथक् सत्त्वमस्तीति ध्येयम् ।

विठ्ठल०— **अस्तीत्यावयोः सम्मतमिति** कारणात्मतयेत्याशयः । **तदेव तदाऽसच्चेति** । घटादिकमेव प्रागुत्पत्तेः कार्यरूपेणासदिति भावः । अविदिताशयः शङ्कते **तस्यैव तदेवेति** । स्वाशयमुद्घाटयति

रूपभेदेनेति । नन्वेवं सदसत्त्वाङ्गीकारे मृदादेः कारणरूपेण सत्त्वं घटादेः कार्यरूपेणासत्त्वमित्यवस्थात्सदसत्वं न कस्यापि । न तावन्मृदः तस्याः सत्त्वेनोभयसम्मतत्वात् नापि घटस्य पृथबुध्नोदराकारादिविशिष्टस्यासत्त्वाङ्गीकारादित्याशयेन शङ्कते नन्विति । तथापि मृत्वादिरूपविशिष्टस्य पृथुबुध्नोदरादिविशिष्टस्य चात्यन्तभेदाभावान्मृत्वावस्थायां घटादेः सदसत्त्वमुपपन्नमित्याशयेन परिहरति न स्यादिति ।

॥ इति द्वितीयव्याख्यानम् ॥

॥ इति 'असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि' इत्यनुव्याख्यानस्य द्वेधा व्याख्यानम् ॥

* * *

॥ अथ चान्ते 'अनवस्थाऽन्यथा हि स्यात्सर्वत्रोत्पत्तिनाशयोः' इत्यनुव्याख्यानस्य १२धा व्याख्यानम् ॥

॥ अथ तत्रादौ प्रथमव्याख्यानम् ॥

९३ **सु०**— स्यादेतदुक्तम् यद्यसत्त्वं प्रागुत्पत्तेः कार्यस्य स्यात्, तदेव कुतः, तथा चात्यन्ताभिन्नं कार्यमुपादानेन; इत्यतो विपक्षे बाधकप्रदर्शनेन, कार्यस्य प्रागुत्पत्तेरसत्त्वमुपादानाद्भेदं चोपपादयति **अनवस्थेति** ।

अनु०— अनवस्थाऽन्यथा हि स्यात्सर्वत्रोत्पत्तिनाशयोः ।

अन्यथा कार्यस्य प्रागुत्पत्तेरात्यन्तिके सत्त्वे कारणेनात्यन्ताभेदे चाङ्गीकृते, **सर्वत्रोत्पत्तिनाशयोरनवस्था** अव्यवस्था **स्यात्** । यथा **हि** । पटस्तन्त्वात्मकः प्रागपि सन्नेव, तथा तन्तवोऽपि स्वकारणात्मकाः सन्त एव, इत्यनेन क्रमेण सर्वस्य मूलकारणात्मकत्वेन आत्यन्तिकं सत्त्वं स्यात् । न च मूलकारणमुत्पद्यते विनश्यति च; इति पटादीनामप्युत्पत्तिविनाशौ न स्याताम् । तथा च पटादय उत्पत्तिविनाशवन्त, आत्मादयस्तद्रहिता इति लोकवेदप्रसिद्धोत्पत्तिनाशव्यवस्था न स्यादिति । उपलक्षणं चैतत् । पटादीनामुत्पत्तिविनाशाभावे तत्कारकव्यापारवैफल्यं स्यादित्यपि द्रष्टव्यम् ।

वं०प०— **आत्यन्तिकसत्त्वे** कार्यात्मनाऽपि सत्त्वे । **तथा चेति** । उत्पत्तेः प्रागसत्त्वाभावे सतीत्यर्थः । **आत्यन्तिकेति** । कार्यात्मनाऽपीत्यर्थः ।

श्रीनिधि०— **न च मूलकारणमिति** । सूक्ष्मरूपमित्यर्थः । परमाणुर्वा प्रधानं वा तेजोबन्नानि वेति द्रष्टव्यम् ।

शे०वा०— नन्वनवस्थाऽन्यथा हीत्युत्तरभाष्यमनर्थकम् । न चात्यन्तिकसत्त्वे कारणेनात्यन्ताभेदे चोत्पत्तिनाशयोरव्यवस्थाप्रसङ्गोपदर्शनार्थमेतदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न च प्रागुत्पत्तेः कार्यस्यासत्त्वोपपादनार्थत्वान्न तदुपदर्शनानर्थक्यमिति वाच्यम् । प्रागुत्पत्तेः कार्यस्यात्यन्तासत्त्वेऽपि बाधकाभावेनासत्त्वोपपादनस्यापि निष्फलत्वादित्यतः कार्यस्य कारणात्प्रागसत्त्वेन कार्यस्योपादानेन भिन्नाभिन्नत्वसाधनस्य प्रागुक्तस्य समर्थनार्थत्वान्न तद्वैयर्थ्यमित्यभिप्रेत्य हेत्वसिद्धिव्युत्पादनपूर्वकं भिन्नाभिन्नत्वसाधनानुपपत्तिशङ्कामुत्थापयति **स्यादेतदिति** । उक्तं कार्यस्योपादानेन भिन्नाभिन्नत्वम् । **तदेव कुत इति** । सत्त्वे बाधकाभावादिति भावः । यद्यपि पृथगेव कार्यस्य सत्त्वमनुपलब्धिबाधितम्, इति पूर्वमेव सत्त्वे बाधकस्योक्तेर्न पुनरेतच्छङ्कावकाशः । तथाऽपि बाधकान्तरं वक्तुमियं शङ्केति ध्येयम् । नन्वत्रात्यन्तिकसत्त्वादिवाचिपदाश्रवणात् कथमात्यन्तिकसत्तास्वीकारे कार्यस्य बाधकोपदर्शनत्वमित्यतोऽत्रान्यथेतिपदमेव तत्परम् । तस्योक्तार्थविपरीताभ्युपगमे व्युत्पन्नत्वात् । प्रागुत्पत्तेः कारणाकारेण सत्त्वे सति कार्याकारेणासत्त्वादेरेव पूर्वत्रोक्तत्वेनात्यन्तसत्त्वादिस्वीकारस्यैवोक्तार्थविपरीताभ्युपगमरूपत्वादिति भावेनान्यथेतिपदं विपक्षोपदर्शकतया व्याचष्टे **अन्यथेति** । तथाऽपि व्यवस्थाभावरूपाऽऽपाद्यार्थवाचकाभावेन तत्समर्पणासम्भवान्नास्य बाधकोपदर्शनपरत्वमित्यतोऽनवस्थापदमेव तत्समर्पकं बाधितत्वेन प्रसिद्धानवस्थापरतायाः प्रकृतेऽयोगादिति भावेन तत्परतया तद्व्याचष्टे **अनवस्थेति** । नन्वात्यन्तिकसत्तास्वीकारे कारणेनात्यन्ताभेदाङ्गीकारेऽपि चोत्पत्तिनाशाव्यवस्थोपपत्तेरप्रयोजकत्वमित्यतो नात्रात्यन्तिकसत्तादिस्वीकारेण साक्षादव्यवस्थामापादयामः किन्तु पटादीनामुत्पत्तिनाशाभावापादनद्वारा ततो नाप्रयोजकत्वमित्यभिप्रेत्य कथमात्यन्तिकसत्तादिस्वीकारे तेषामुत्पत्तिनाशाभावप्रसङ्ग इत्यतस्तमुपपादयति **यथा हीति** । एवमुत्पत्तिनाशाभावापादनमुपपाद्य तेनाव्यवस्थापादनमव्यवस्थाप्रकारदर्शनेन दर्शयति **तथा चेति** । नास्त्येव तादृशी व्यवस्थेति तदभावापादनं नानिष्टमित्याशङ्क्य भाष्ये हिशब्देनोक्तव्यवस्थायाः प्रामाणिकत्वदर्शनेन तदभावस्य प्रामाणिकहानरूपत्वेनानिष्टत्वसूचनात् तदापादनमनिष्टमेवेत्यभिप्रेत्य हिशब्दाभिप्रायमाह **लोकवेदप्रसिद्धेति** । मूले, पटादीनामुत्पत्तिविनाशाभावे तद्व्यवस्थाऽभावापादनं तस्यापि सम्भवमात्राभिप्रायेण न तु दोषान्तराभावात् इत्यभिप्रेत्यान्तरदोषोपलक्षणपरतया भाष्यं व्याचष्टे **उपलक्षणं चैतदिति** ।

वा०र०— **हेत्वसिद्धिरिति** । हेतुविशेष्यासिद्धीत्यर्थः । **आत्यन्तिकसत्तादीति** । आदिपदेन कारणेनात्यन्ताभेदपरिग्रहः । **कथमस्येति** । कार्यस्यात्यन्तसत्तास्वीकारे कथमस्य बाधकोपदर्शनत्वमिति सम्बन्धः । **कार्याकारेणासत्त्वादेरेवेति** । आदिपदेन भेदाभेदपरिग्रहः । प्रसिद्धानवस्थार्थकस्यानवस्थापदस्य कथं व्यवस्थाभावार्थत्वमित्यत आह **बाधितत्वेनेति** । अत्यन्तसत्त्वादीत्यादिपदेनात्यन्ताभेदपरिग्रहः । अनवस्थापदस्येति वचनविपरिणामेनानुवर्तते । तत्परतयेत्यत्रानवस्थापदमिति यथाश्रुतमेव मण्डूकप्लुत्या अनुवर्तते । अत्यन्ताभेदाङ्गीकारेऽपि चेति पाठः । **आत्मादयस्त्विति मूलम्** । महदादिसृष्टावात्मनः उपादानत्वं मन्यमानानामिव प्रकृत्यादेरुपादानत्वं मन्यमानानामपि अत्यन्ताभेदाङ्गीकारे एतद्दूषणनिस्तार इत्याशयेनात्मादयः इत्यादिपद-

प्रयोगः । एतेन उपादानानन्यतायाः एव परेणाभिधानात् उपादानतायाश्चात्मन्येव सत्त्वेन तन्मात्रोपादानं उचितमिति शङ्का निरस्ता भवति । **तस्यापि सम्भवेऽपि** । तद्व्यवस्थाभावापादनरूपदूषणस्यापि सम्भवमात्रेणेत्यर्थः । एतदपि दूषणं अत्र सम्भवतीत्याशयेनेति यावत् । भाष्यस्थोत्पत्तीत्यतः प्राक् एवमिति शेषः ।

विट्ठल०— आत्यन्तिकं सत्त्वं स्यादिति । सायंकालिकसत्त्वं नित्यत्वमिति यावत् । एतदेव विवृणोति **न चेति** ।

॥ इति प्रथमव्याख्यानम् ॥

* * *

॥ अथ तत्त्रयोदशधा व्याख्याने द्वितीयव्याख्यानम् ॥

९४ सु०— यद्वा उत्पत्तिनाशशब्दाभ्यां सत्त्वमसत्त्वं चोपलक्ष्यते । ततश्चायमर्थः । यदि पटस्तन्त्वात्मकः प्रागुत्पत्तेरपि सन्नेव तदा(तदा)ऽप्युपलभ्येत तन्तुवत् । यदि चानुपलभ्यमानोऽपि सन्नभ्युपेयते, तदा सर्वत्रोत्पत्तिनाशयोस्सदसत्त्वयोरनवस्था स्यात् । उपलभ्यमानं घटादिकमस्त्यनुपलभ्यमानं खरविषाणादिकं नास्तीति सर्वजनसम्मता व्यवस्था न स्यात् ।

वं०प०— तदा उत्पत्तेः प्राक् । **न स्यादिति** । अनुपलभ्यमानस्यापि खरविषाणस्य सत्त्वप्रसङ्गादिति भावः ।

शे०वा०— भाष्यस्थोत्पत्तिनाशशब्दस्वारस्यानुरोधेनात्यन्तिकसत्तास्वीकारे उक्तविधोत्पत्तिनाशव्यवस्थानुपपत्तिरूपबाधकप्रदर्शनपरतया वाक्यं योजितम् । अधुनाऽऽत्यन्तिकसत्तास्वीकारे सम्भावितव्यवस्थान्तरानुपपत्तीनां बाधकतया भाष्ये सङ्गृहीतत्वलाभायोत्पत्तिनाशशब्दयोरमुख्यार्थत्वमाश्रित्य योजनां दिदर्शयिषुरादौ तावत्सदसत्त्वव्यवस्थानुपपत्तिरूपबाधकान्तरसङ्ग्रहाय तस्या भाष्यारूढतासिद्ध्यर्थमुत्पत्तिविनाशशब्दौ तदुपलक्षकतया व्याचष्टे **यद्वेति** । कथमात्यन्तिकसत्तास्वीकारे सदसत्त्वव्यवस्थानुपपत्तिरित्यतोऽपेक्षितप्रतिज्ञादिपूरणेन सदसत्त्वव्यवस्थाऽनुपपत्त्युपपादकतया वाक्ययोजनामाह **ततश्चेति** । तत्रापेक्षितप्रतिज्ञापूरणं यदि पट इत्यादितन्तुवदित्यन्तम् । अन्यथेत्यस्य व्याख्यानं यदि चानुपलभ्यमानोऽपि सन्नभ्युपेयत इति । अनवस्थापदोक्ताव्यवस्थाप्रकारोपदर्शनमुपलभ्यमानमित्यादि । भाष्ये हिशब्दः सर्वजनसम्मतत्वसूचनेनोक्तव्यवस्थाभावस्यानिष्टत्वसमर्थनार्थ इति भावेन तदभिप्रायमाह **सर्वेति** ।

वा०र०— सत्तास्वीकार इति । सत्तादिस्वीकार इत्यर्थः । सत्तामात्रग्रहणं तु उत्तरपक्षद्वये सत्तास्वीकार एव बाधककथनेन तस्या एव प्रकृतायाः ग्रहणमत्र विवक्षितमित्याशयेनेति ज्ञेयम् । तृतीयपक्षे तु सत्तास्वीकारे उपादानभेदस्वीकारे च बाधककथनं विवक्षितं इति सत्तादीत्येव वाच्यम् । एवं च सत्तादिस्वीकारे च उक्तं दूषणं उत्तरत्र पक्षद्वये सत्तास्वीकार एव दूषणम् । तृतीये तु आत्यन्तिकसत्तोपादानात्यन्ताभेदयोः दूषणमिति विवेको बोध्यः । अत एव प्राचीनपक्षे प्रागुत्पत्तेः असत्त्वमुपादानात् भेदं चेत्युक्तम् । उत्तरपक्षत्रयमध्ये प्रथमे प्रागुक्तेरपि सन्नेवेत्येव । द्वितीये च सत्कार्यवादे इत्येवोक्तम् । तृतीये तु यदि कार्यमुपादानात्मकमेव सदेव चेति एवोक्तमिति ज्ञातव्यम् । **अमुख्यार्थत्वमिति** । तृतीययोजनायां उत्पत्तिनाशयोरपि विरुद्धधर्मतया ग्रहणेऽपि विरुद्धधर्मोपलक्षणमिति मूलानुसारेणाजहत्स्वार्थलक्षणं अङ्गीकारेणामुख्यार्थत्वमेव प्राप्तं तृतीययोजनायामपीति ज्ञेयम् । **सदसत्त्वव्यवस्थानुपपत्तीति** । कार्यस्यात्यन्तिकसत्तास्वीकार इति वर्तते ।

विठ्ठल०— कार्यस्य प्रागुत्पत्तेरसत्वाङ्गीकारेषु स्पष्टानेकतर्कबाधोक्तिपरतयापि योजयति **यद्वेति** ।

॥ इति द्वितीयव्याख्यानम् ॥

* * *

॥ अथ तत्त्वोद्योता व्याख्याने तृतीयव्याख्यानम् ॥

९५ **सु०— अथवा उत्पत्तिविनाशशब्दाभ्यां तदुपपादनस्योपलक्षणम् । तथा चैवं योजना । आस्तां तावदन्यत् । सत्कार्यवादे सर्वत्र शिष्यं प्रतिवादिनं वा प्रति उत्पत्तिनाशयोः 'नासदुत्पद्यते न सद्विनश्यती'त्येवंरूपोपादनस्यापि अनवस्था अवस्थानाभावः स्यात् ।**

तथा हि । इदमुपपादनं किमर्थमिति वाच्यम् । शिष्यादेर्विद्योत्पत्तयेऽविद्यानाशाय वादे, जल्पादौ तु ख्यात्याद्युत्पादायेति चेत् । तद्विद्यादिकं सच्चेन्नोत्पाद्यम्, सत्त्वादात्मवत्; असच्चेन्नोत्पादयितुं शक्यम्, अन्यथा सत्कार्यवादभङ्गप्रसङ्गात् । एवमविद्या सती चेन्न विनाश्या, अन्यथाऽपसिद्धान्तापत्तेः; असती चेत् (नितरां) न तराम्, नित्यनिवृत्तत्वात् । ततः सर्वथा प्रतिपादनासम्भव एवेति ।

परि०— आस्तां तावदन्यदिति । तिष्ठतु तावदुक्तं बाधकान्तरोपदर्शनम् । शिष्यादिबोधनमेवायुक्तं यदर्थमयं प्रयासस्तवेत्यर्थः । **सर्वत्रेति** । त्वदभिमतसर्वप्रमेयविषय इत्यर्थः । तथा च

कस्यापि **प्रमेयस्य** शिष्यादिकं प्रति प्रतिपादनं न स्यादिति यावत् । **अवस्थानाभावः** स्यादित्यस्य विवरणं सर्वथा प्रतिपादनासम्भवं एवेति ।

वं०प०— अन्यथेति । असतोऽप्युत्पादयितुं शक्यत्वे । **न विनाश्येति** । सत आत्मनो विनाशादित्यर्थः । **अन्यथा** सतोऽपि विनाशे । **नितरां** न विनाश्येति वर्तते ।

कं०रा०— अविद्या सती चेदिति । अविद्या सतीति चेन्न विनाश्या सत्त्वादात्मवदिति भावः । **अन्यथेति** । सतोऽपि विनाशाङ्गीकारे न सद्विनश्यतीति परेणाङ्गीकृतयापसिद्धान्तापत्तेरित्यर्थः । **असतीति** । असती चेदविद्या नितरां न विनाश्यः अत्यन्ताभावप्रतियोगित्वाच्छशविषाणवदिति भावः ।

श्रीनिधि०— आस्तामन्यदिति । उत्पत्तिनाशसत्त्वासत्त्वव्यवस्थादिकम् । **अन्यथा सत्कार्यवाद-भङ्गप्रसङ्गादिति** । असतोऽप्युत्पाद्यत्व इत्यर्थः । **अन्यथाऽपसिद्धान्तापत्तेरिति** । सतोऽपि विनाशाङ्गीकार इत्यर्थः । न सद्विनश्यतीत्येवं तेनाङ्गीकारादिति भावः ।

शे०वा०— उत्पत्तिविनाशोपपादनानवस्थारूपतद्बाधकसङ्ग्रहाय तस्य भाष्यारूढतासिद्ध्यर्थमुत्पत्ति-नाशोपपादनोपलक्षणतयाऽपि तौ व्याचष्टे **अथवेति** । आत्यन्तिकसत्तास्वीकारे कथमुत्पत्तिनाशोपपादना-नवस्थेत्यतस्तदुपपादकतया भाष्यं योजयति **तथा चैवमिति** । तत्रान्यथेत्यस्यार्थः **सत्कार्यवाद इति** । कार्यस्यात्यन्तिकसत्तास्वीकार इति च तदर्थः । 'सर्वत्र' इत्यनुवादेन 'शिष्यं प्रतिवादिनं वा प्रति' इति व्याख्यानम् । 'उत्पत्तिविनाशयोः' इत्यस्यार्थः **उपपादनस्येति** । उपपादनप्रकारप्रदर्शनम् **न सदित्यादि** । शिष्यादेरित्यादिपदेन सखिसब्रह्मचारिणां सङ्ग्रहः । जल्पादावित्यादिपदेन वितण्डापरिग्रहः । ख्यात्यादीत्यादिपदेन परखिलीकरणादेः परिग्रहः । **आत्मवदिति** । सतोऽपि विद्यादेरुत्पत्तौ सन्नात्माऽप्युत्पद्येतेति भावः । असतो-ऽप्युत्पादयितुं शक्यत्वे बाधकमाह **अन्यथेति** । **अन्यथेति** । सतोऽपि विनाशे इत्यर्थः । न सद्विनश्यतीति तत्सिद्धान्तादिति भावः । **न तरां** नैवेत्यर्थः । विनाश्येत्यनुवर्तते । तत्र हेतुमाह **नित्येति** । अन्यथा नरविषाणस्यापि विनाशप्रसङ्गादिति भावः ।

वा०र०— उत्पत्तिविनाशोपादानेति । अत्रापि कार्यस्यात्यन्तिकसत्तास्वीकारे इति पूरणीयम् । सत्या अपि विनाशः इति पाठः स्वरसः । सतः इति पाठे सामान्याकारेण उक्तिरिति ज्ञेयम् ।

स०व्र०— नितरामिति । नैवेति शेषः ।

विट्ठल०— सत्त्वपक्षे शास्त्रानारम्भरूपबाधकपरतयापि योजयति **अथवेति** । **आस्तां तावदिति** । तिष्ठतु तावदुक्तबाधकान्तरोपदर्शनं शिष्यं प्रति बोधनमेवायुक्तम् । ततः शास्त्रवैयर्थ्यमेवेति भावः । सर्वत्र

त्वदभिमतप्रमेयेषु किमपि प्रमेयं न शिष्यं प्रत्युपदेष्टुं शक्यमिति यावत् । **अन्यथेति** । असतोऽप्युत्पादाङ्गीकार इत्यर्थः । **अन्यथाऽपसिद्धान्तापत्तेरिति** । सतोऽपि विनाशाङ्गीकारे न सद्विनश्यतीति परेणाङ्गीकृतत्वादपसिद्धान्तापत्तिरित्यर्थः ।

॥ इति तृतीयव्याख्यानम् ॥

* * *

॥ अथ तत्त्वबोधरत्या व्याख्याने चतुर्थव्याख्यानम् ॥

९६ सु०— यदि वा उत्पत्तिनाशयोः इति विरुद्धधर्मोपलक्षणम् । तथा हि । यदि कार्यमुपादानात्मकमेव सदेव च प्रागुत्पत्तेः स्यात्, तदोत्पत्तिविनाशादिधर्माणामनवस्था स्यात् । तन्तवः प्रागेव सन्तो नेदानीमुत्पद्यन्ते, पटस्तूत्पद्यते । तन्तुष्वविनष्टेष्वेव पटो विनश्यति । तन्तवो बहवः पटस्त्वेकः । एवमाकाराभिधानबुद्धिकार्यभेदोऽपि द्रष्टव्यः । सैषा व्यवस्था न स्यादिति ।

परि०— एवमाकारेति । अनुत्पन्नत्वोत्पन्नत्वनष्टत्वानष्टत्वबहुत्वैकत्वरूपविरुद्धधर्मभेद इव तन्तवः सूक्ष्मदीर्घाकाराः पटस्त्वातानविताताकारः एते तन्तवः अयं पट इत्यभिधानभेदः तन्तुत्वपटत्वप्रकारकरूपबुद्धिभेदः शीतानिवर्तकत्वतन्निवर्तकत्वादिकार्यभेदेऽपि ध्येय इत्यर्थः ।

यादु०— एवमाकारेति । तन्तुपटयोराकारभेदस्तन्तुपट इत्यभिधानभेदोऽयं तन्तुरयं पट इति बुद्धिभेदस्तन्तुषु पटजनकत्वं पटे हिमनिवारकत्वमिति कार्यभेद इत्यर्थः ।

वं०प०— तन्तुष्वविनष्टेष्वेवेति । असमवायिकारणेन कार्यनाशस्थल इत्यर्थः । पट आतानाद्यात्मकः तन्तुस्तु नैवमित्याकारभेदः । अयं पट इति पटो व्यवह्रियते, तन्तुस्त्वन्यथेत्यभिधानभेदः । पटबुद्धिः पटविषयिणी तन्तुबुद्धिस्तन्तुविषयिणीति बुद्धिभेदः । पटः शीतमपनुदति तन्तुस्तु नेति कार्यभेदो द्रष्टव्यः ।

श्रीनिधि०— बुद्धिकार्यभेद इति । बुद्धिभेदस्तावत्पटत्वप्रकारकप्रतीतिविषयत्वं पटे तन्तुत्वप्रकारकप्रतीतिविषयत्वं तन्तुषु शीतनिवारणक्षमत्वं पटादौ तदभावः । तन्तुष्विति कार्यभेदः ।

शे०वा०— विरुद्धधर्मानुपपत्तिरूपविपक्षे बाधकस्यापि भाष्यारूढतासिद्ध्यर्थं तदुपलक्षणतयाऽप्युत्पत्तिनाशशब्दौ व्याचष्टे **यदि वेति** । कथं सत्कार्यवादे विरुद्धधर्माव्यवस्थेत्यतस्तदुपपादकतयाऽपि वाक्ययोजनां सूचयति **तथा हीति** । तत्रान्यार्थेत्यस्यार्थप्रदर्शनं **यदीत्यादिना स्यादित्यन्तेन** । उत्पत्तिनाशयो-

रित्यस्यार्थः **उत्पत्तिनाशाविधर्माणामिति** । अनवस्था स्यादिति व्यवस्था न स्यादित्युक्तं तत्कथमेतदित्यतो धर्मव्यवस्थाप्रदर्शनपूर्वकं तदनुपपत्तिमाह **तन्तव इति** । **एवमाकारेति** । पिण्डाकारं कारणं, पृथुबुध्नोदराकारं कार्यमित्याकारभेदः । तन्तुः पट इत्यभिधानभेदः अयं तन्तुरयं पट इति बुद्धिभेदः । तन्तुकार्यं पटः, पटकार्यं हिमनिवारणमिति कार्यभेदः; इति द्रष्टव्यम् । **सेति** । अत्यन्ताभेदादिति भावः ।

वा०र०— विरुद्धधर्मानुपपत्तीति । अत्र तु कार्यस्य कारणेनात्यन्ताभेदस्यात्यन्तिकसत्त्वस्य चाङ्गी-कार इति पूरणीयं इति विवेकः । **कथं सत्कार्येति** । अत्र सत्कार्यवाद इति कार्यस्यात्यन्तिकसत्तावादवत् कारणेनात्यन्ताभेदवादोऽपि ग्राह्यः । उपादानात्मकत्वमित्यप्युक्तत्वादिति **बोध्यम्** ।

स०व्र०— एवमिति । तन्तुपटयोराकारभेदात्, तन्तुपटावित्यभिधानभेदात्, एकत्र तन्तुरिति अपरत्र पट इति बुद्धिभेदात्, हिमनिवारकत्वतदभावादिरूपकार्यभेदाच्च तयोर्भेद इत्यर्थः ।

विट्ठल०— प्रत्यक्षावगतविरुद्धधर्मासिद्धिरूपबाधकोक्तिपरतयापि योजयति **यदि वेति** । यद्वेत्यर्थः । **उत्पत्तिविनाशादीति** । उत्पत्त्यनुपपत्तिविनाशादिविरुद्धधर्माणामित्यर्थः । एवमाकारेऽपि तन्तुपटयोराकारभेदः तन्तुपटावित्यभिधानभेदः । तन्तुपटविषयबुद्ध्योर्भेदः तन्तूनां पटजनकत्वं पटस्य शीतनिवर्तकत्वमिति कार्यभेद इत्यर्थः ।

॥ इति चतुर्थव्याख्यानम् ॥

* * *

॥ अथ तत्त्रयोदशधा व्याख्याने पञ्चमव्याख्यानम् ॥

९७ **सु०— नन्वेतत्सकलमपि 'पटवच्च, यथा प्राणादिरि'ति व्यक्त्यव्यक्त्यवष्टम्भेन परिहृतम् । तथा हि । व्यक्त्यपेक्षयोत्पत्तिः पटादीनामव्यक्त्यपेक्षया च विनाशो युज्यते । व्यक्त्यव्यक्त्यर्थमेव च कारकाण्युपयुज्यन्ते । व्यक्त्यव्यक्तिभ्यामेवोपलब्ध्यनुपलब्धी भवतः । अत एव प्रतिपादनं सङ्गच्छते ।**

व्यक्ताव्यक्तरूपेणैव विरुद्धधर्मा व्यवतिष्ठन्ते । यथा हि संवेष्टितः पटो न स्फुटं पट इति प्रतीयते, न प्राव्रियते न शीतमपनुदति, न बहुदेशव्यापी भवति; प्रसारितस्तु स्फुटप्रतीत्यादिमान् । न चैतावता भेदः । नापि प्रसारितः प्रागसन् । यथा च प्राणायामेन निरुद्धः शारीरो वायुर्जीवनमात्रं करोति नोत्क्षेपणादि, निरोधापगमे त्वासादितव्यक्ति-

स्तदपि करोति । न तावन्मात्रेण भिद्यते, प्रागसत्त्वा । तथैवैतदपि व्यक्त्यव्यक्तिभ्यां समञ्जसमिति ।'

अत्र ब्रूमः । केयं पटस्य प्रागुत्पत्तेरूर्ध्वं च विनाशादव्यक्तिर्मध्ये च व्यक्तिः । अनुपलब्धिरव्यक्तिरुपलब्धिर्व्यक्तिरिति चेत्तत्राह **अनवस्थेति** ।

यद्युपलब्ध्यनुपलब्धी एवोत्पत्तिविनाशौ, तदा सर्वत्रोत्पत्तिनाशयोरनवस्था स्यात् । यद्यदोपलब्धं तत्तदैवोत्पन्नम्, अनुपलब्धं च विनष्टमिति स्यादिति यावत् ।

किञ्च 'प्रागुत्पत्तेस्सत्त्वे पटस्य कस्मान्नोपलब्धिः, कथं चोर्ध्वमुपलब्धिरि'ति प्रश्नस्य उपलब्ध्यनुपलब्धि(अनुपलब्ध्युपलब्धि)भ्यामेवेति परिहारं वदन् देवानां प्रियः श्लाघनीय-प्रश्नः स्यात् । अपि च प्रागूर्ध्वं च तन्तूपलब्धौ कथं तन्मात्रस्य सतः पटस्यानुपलब्धिः, अन्यथा तन्तूनामपि सा स्यात् ।

परि०— **एतत्सकलमपीति** । प्रागुक्तबाधकचतुष्टयमपीत्यर्थः । केयमित्यादि-प्रश्नस्योत्तरमाशङ्कते **अनुपलब्धिरव्यक्तिरित्यादि** । **देवानांप्रिय इति** । अनभिज्ञेत्यर्थः । देवानां-प्रियो मूर्ख इत्यलुक्समासः । श्लाघनीयेत्यपहासः । कुतो नोपलभ्यत इत्यादिप्रश्नस्यानुपलभ्य-मानत्वात् नोपलभ्यत इत्याद्युक्तावात्माश्रयापत्तेरिति भावः । **प्रागूर्ध्वं चेति** । पटोत्पत्तेरित्यनुषङ्गः ।

वं०प०— **अत एव** विद्यमानादेर्व्यक्त्याद्यर्थम् । **तदपि** उत्क्षेपणाद्यपि । **उत्पत्तिविनाशाविति** । व्यक्त्यव्यक्ती इत्यर्थः । **परिहारं वदन्निति** । पटस्योत्पत्तेः प्राक् सत्त्वे कस्मान्नोपलब्धिः । **उपलब्धिः** व्यक्तिः । **सा कुतो न** अव्यक्तिः कुत इति यावदिति प्रश्नस्यानुपलब्धेरिति परिहारो न सङ्गच्छते । अनुपलब्धिर्नामाव्यक्तिः । तथा चाव्यक्तेरव्यक्तिरित्युक्तं स्यात् । कथञ्चोत्पत्तेरूर्ध्वमनन्तरमुपलब्धिर्व्यक्तिरिति प्रश्नस्योपलब्धेरिति परिहारो न सङ्गच्छते । उपलब्धिर्नाम व्यक्तिः । तथा च व्यक्तेर्व्यक्तिरित्युक्तं स्यात् । तथा चैवं परिहारं वदन् देवानांप्रियो मूर्खः स्यादित्यर्थः । देवानांप्रिय इति च मूर्ख इति वचनादिति ध्येयम् । **अन्यथेति** । केवलं तन्तुमात्रस्यापि पटस्यानुपलब्धौ । **सा** अनुपलब्धिः ।

श्रीनिधि०— **नोत्क्षेपणादीति** । आदिपदेनापक्षेपणम् । वायोर्नासिकायां ऊर्ध्वमधश्च सञ्चारे उदरादिप्रदेशे ऊर्ध्वमधश्चलनं जायते । निरोधे तु तन्नास्तीति भावः ।

शो०वा०— भाष्ये 'पटवच्च', 'यथा प्राणादिः' इति सूत्रार्थतया परोत्प्रेक्षितव्यवस्थोपपादकयुक्त्या-भागानिरासप्रयुक्तन्यूनतापरिहारायेदमेव भाष्यं तन्निरासपरतया योजयितुं व्यवस्थोपपादकयुक्तिप्रदर्शनपूर्वकं व्यवस्थोपपत्तिमाशङ्कते **नन्विति** । **व्यत्त्यपेक्षयेति** । तथा च सत्कार्यवादेऽपि पटादीनामुत्पत्तिविनाशयो-रुक्तविधयोः सत्त्वात्पटादय उत्पत्तिविनाशवन्त आत्मादयस्तद्रहिता इति लोकवेदसिद्धोत्पत्तिविनाशव्यवस्थोप-पत्तेर्न तदनुपपत्तिर्बाधिकेति भावः । **व्यत्त्यव्यत्त्यर्थमेवेति** । तथा च व्यत्त्यव्यक्तिरूपोत्पत्तिनाशयोः सत्त्वान्न तत्कारकवैफल्यप्रसङ्गेऽपीति भावः । **व्यत्त्यव्यक्तिभ्यामेवेति** । तथा च न सत्त्वासत्त्वानुपपत्तिरपीति भावः । उपपादनानुपपत्तिं परिहरति **अत एवेति** । व्यत्त्यव्यत्त्यर्थत्वादेवेत्यर्थः । यदि वेत्युक्तबाधकमपि परिहरति **व्यत्त्यव्यक्तिरूपेणैवेति** ।

व्यत्त्यव्यंत्त्योरेव दुर्निरूपत्वान्न व्यत्त्यव्यत्त्यवष्टम्भेनोक्तव्यवस्थानिर्वाह इत्यभिप्रेत्य तत्स्वरूपं विकल्पयति **केयमिति** । किमत्राव्यक्तिव्यक्ती अनुपलब्ध्युपलब्धिरूपा(वा)त्मधर्मावभिमते किंवा तदतिरिक्तावेव पटधर्माविति किंशब्दार्थः । आद्यपक्षनिरासपरतया मूलं योजयितुं तमुत्थापयति **अनुपलब्धिरिति** । अन्यथे-त्यस्यार्थो **यदीत्यादि** । अव्यवस्थाप्रकारदर्शने **यद्यदेति** । ननु यद्यदोपलब्धं तस्य तदोत्पत्तिः नानिष्ट-मुपलब्धिरेवोत्पत्तिरिति वदतोपलब्धत्वरूपोत्पन्नत्वस्याङ्गीकृतत्वात् । एवमनुपलब्धिरेव विनाश इत्यङ्गीकारेणा-नुपलब्धत्वरूपविनष्टत्वस्याप्यभ्युपगतत्वात् । अनुपलब्धस्य तद्रूपमनुपलब्धत्वं च नानिष्टमिति कथं तदापादन-मित्यरुचेराह **किञ्चेति** । **देवानांप्रियः** पशुः । कस्मादुपलब्ध्यनुपलब्धी इत्युपलब्ध्यनुपलब्धिनियामकप्रश्नोत्तर-तया नियम्यभूतोपलब्ध्यनुपलब्धी एव नियामकतया वदतोऽलौकिकं बुद्धिवैशद्यमित्याशयेन श्लाघनीयप्रज्ञ इति परिहासः । असत्त्वाच्चानुपलब्धेर्न नियामकतया तदुपन्यासो युक्त इत्याह **अपि चेति** । **तन्मात्रस्य सतः** न तन्तुमात्रस्य सत इति हेतुगर्भविशेषणम् । **अन्यथेति** । तन्तुमात्रस्य सतोऽपि पटस्यानुपलब्धावित्यर्थः । अविशेषादिति भावः ।

वा०र०— योजनाभेदेनोक्तानवस्थाप्रकाराणां क्रमेण उद्धारः इत्याशयेन तत्तदंशोपयोगं विशदयति **तथा च सत्कार्येत्यादिना** । **पशुरिति** । मूर्ख इत्यर्थः । अजेर्व्यघञपोरिति सूत्रभाष्ये प्रातिज्ञो देवानां प्रियः इत्युक्तस्य विवरणरूपकैयटे च देवशब्दो मूर्खवाची । मूर्खाणां च प्रियो मूर्ख एवेत्युक्तम् । अव्याकृतभाष्ये तु 'सम्यक् ज्ञानी तु देवानां पशुरित्युच्यते'ति । 'अतो देवानां प्रियो ज्ञान्यपि । तस्मात् त्वं देवाः तत्त्वं विदेत् प्रियं कुर्वन्त्यतन्द्रितां चे'ति प्रतिपादितं भिन्नविषयमिति ज्ञेयम् । **तत्तत्कारकेति** । अनेन मूले कारणपदं उत्पत्तिकारणविनाशकारणपरमिति व्याख्यानं द्रष्टव्यम् । नोपलब्ध्यनुपलब्धित्वपक्षेति । व्यक्ति-अव्यक्त्योरिति शेषः ।

स०व्र०— **यद्यदोपलब्धमिति** । ननु च कुलालव्यापारानन्तरं जायमानप्रतीतेरेवोपलब्धिशब्देन विवक्षणात् विनाशव्यापारानन्तरानुपलब्धेरेव च नाशत्वेनाभिप्रेतत्वात् नोक्तदोष इति चेत्, उत्पत्तिविनाश-शब्दयोरुपलब्ध्यनुपलब्ध्यर्थकत्वेन सङ्केतापत्त्या प्रमेयाविरोधादिति भावः ।

विठ्ठल०— न प्राव्रियत इति । न शरीरादिप्रावरणतां प्राप्नोतीत्यर्थः । **नोत्क्षेपणादीति** । उच्छ्वास-निश्वासकनिमित्तकशरीरोत्क्षेपणेन करोतीत्यर्थः । **देवानां प्रिय इत्यत्र षष्ठ्या** आक्रोश इत्यलुक् मूर्ख इत्यर्थः । **श्लाघनीयप्रज्ञ** इति परिहासः । आत्माश्रयस्य स्फुटत्वादिति भावः ।

॥ इति पञ्चमव्याख्यानम् ॥

* * *

॥ अथ तत्त्वबोदमथा व्याख्याने षष्ठव्याख्यानम् ॥

९८ **सु०— अथ पटधर्मावेव व्यक्तव्यक्ती, तदा तावपि तन्तूनां विद्येते न वा । न चेन्न कार्यकारणयोरत्यन्ताभेदः । विद्येते चेत्तत्राह अनवस्थेति । उत्पत्तिनाशव्यवहार-हेतू व्यक्तव्यक्ती यदि तन्तुष्वपि विद्येते तदा सर्वत्रोत्पत्तिनाशयोरनवस्था स्यात् । 'तन्तवो नोत्पन्ना न नष्टाः, किन्तु पट एवे'त्युत्पत्तिविनाशव्यवस्था न स्यादिति ।**

परि०— पटधर्माविवेति । न तूपलब्ध्यनुपलब्धी । येन (अपि च) यद्युपलब्धीत्यादिना प्रागुक्तदोषः स्यादित्येवकारार्थः ।

यादु०— अथ पटधर्माविवेति । न तूपलब्ध्यनुपलब्धिरूपे येनोक्तदोषः स्यादित्यर्थः ।

वं०प०— तौ पटधर्मभूतावपि व्यक्तव्यक्ती इत्यर्थः ।

कं०रा०— पटधर्माविवेति । न तूपलब्ध्यनुपलब्धिरूपपुरुषधर्मावित्यर्थः ।

शे०वा०— ननु व्यक्तव्यक्ती नोपलब्ध्यनुपलब्धिरूपावात्मधर्मौ किन्नाम पटधर्माविति नोप-लब्ध्यनुपलब्धित्वपक्षोक्तदोष इत्यभिप्रेत्य द्वितीयं शङ्कते **अथेति** । ननु चोत्पत्तिनाशव्यवहारहेतुव्यक्तव्यक्त्योः पट इव तन्तुष्वपि सत्त्वात्तन्तवो नोत्पन्ना न नष्टाः; किन्तु पट एवेत्युत्पत्तिनाशव्यवस्थाभावापादनं मूलकारीय-मनुपपन्नम् । पटधर्मीभूतव्यक्तव्यक्त्योस्तन्तुषु सत्त्वे तदापादबसम्भवेऽपि तयोः पटमात्रवृत्तित्वेन तन्तुष्वभावं वदन्तं प्रति व्यक्तव्यक्त्यभावेनैवोक्तव्यवस्थोपपत्तेरित्यतोऽत्र सम्भावितविकल्पद्वयं प्रदर्श्य द्वितीयं बहिरेव प्रदूष्याद्यपक्षनिरासपरत्वादस्य ग्रन्थस्य न तदापादनानुपत्तिरित्यभिप्रेत्य तत्पक्षनिरासकतया भाष्यं योजयितुं विकल्पमाह **तदेति** । **न चेदिति** । तन्तुपटयोरत्यन्ताभेदे पटे तत्सत्त्वेन तन्तुष्वपि तदापत्त्या तन्तुषु तदभावेन पटेऽपि तदभावस्यैव प्राप्त्या पटे तत्सद्भावस्य तन्तुषु तदभावस्य चायोगादिति भावः । अन्यथेत्यस्यार्थः **उत्पत्तीति** । अनवस्थाप्रकारदर्शनं **तन्तव इत्यादि** ।

वा०र०— उक्तव्यवस्थोपपत्तेरिति । इतः व्यवस्थाभावापादनायोगादिति शेषः । तथा च तन्तुषु अभावं वदन्तं प्रति उक्तव्यवस्थोपपत्त्या तदभावापादनायोगात् भाष्यकारीयमापादनं अनुपपन्नमिति योजना । **आद्यपक्षेति** । तन्तुषु व्यक्त्यव्यक्तिसत्त्वपक्षेत्यर्थः ।

स०न्न०— अथेति । तथा च न तन्तूनामनुपलब्धिप्रसङ्ग इति भावः ।

विठ्ठल०— अथ पटधर्माविवेति । न तूपलब्ध्यनुपलब्धी रूपे इत्यर्थः । **अथेत्यस्य** यदेत्यर्थः । **सर्वत्रेति** । सर्वकार्येष्वित्यर्थः ।

॥ इति षष्ठव्याख्यानम् ॥

* * *

॥ अथ तत्त्वप्रदीपगाथा व्याख्याने सप्तम-अष्टम-व्याख्याने ॥

९९ **सु०—** किञ्चेयमभिव्यक्तिरुत्पत्त्यादिव्यवहारकारणतयोपादीयते । सा किं चक्रचीवरादिभिः प्रागसत्येवोत्पद्यते मुद्गराभिघातादिना च नश्यति, उत प्रागपि सत्येवाविनाशिनी च । एवमव्यक्तिरपि किं प्रागसती मुद्गराभिघातादिनोत्पद्यते, किंवा प्रागपि सती ।

उभयत्राद्यौ दूषयति **अनवस्थेति** । व्यक्त्यव्यक्त्योरुत्पत्तिनाशवत्त्वे **सर्वत्रोत्पत्तिनाशयोरनवस्था** व्यवस्थाभावः स्यात् । न किञ्चिदसदुत्पद्यते न किञ्चित्सद्विनश्यतीति सिद्धान्तविरोधः(हानिः) स्यादित्यर्थः ।

द्वितीयौ दूषयति **अनवस्थेति** । व्यक्त्यव्यक्त्योः सदा सत्त्वे **सर्वत्रोत्पत्तिनाशयोरनवस्था** अव्यवस्थितिः स्यात् । तथा हि । एतावन्तं कालमनुत्पन्नो घट इदानीमुत्पन्न इति तावन्न स्यात्, उत्पत्तिव्यवहारहेतोरभिव्यक्तेः प्रागपि सत्त्वात् । तथा मुद्गराभिघाताद्युत्तरकालमपि घटसत्त्वव्यवहारः स्यात्, तद्धेतोरभिव्यक्तेरविनष्टत्वात् । तथा इदानीमेव नष्टो घट इत्यपि न स्यात्, विनाशव्यवहारकारणानभिव्यक्तेः प्रागपि सत्त्वादिति । कारकव्यापारवैफल्यतादवस्थ्यं स्फुटमेव ।

परि०— **उभयत्रेति** । व्यक्त्यव्यक्त्योरित्यर्थः । **आद्याविति** । व्यक्तिरसत्येवोत्पद्यते नश्यति चेति पक्षं असत्येवाव्यक्तिरुत्पद्यत इति पक्षं चेत्यर्थः । **द्वितीयाविति** । सत्त्वपक्षावित्यर्थः । उभयत्रेत्यनुषङ्गः ।

वं०प०— **उभयत्राद्याविति** । अभिव्यक्तिश्चक्रचीवरादिभिः प्रागसत्येवोत्पद्यते उत्पत्त्यनन्तरं सत्त्ववती सती मुद्गराभिघातेन नश्यतीति व्यक्तिपक्षे कृतमाद्यं विकल्पम् । तथाऽव्यक्तिरपि प्रागसत्येव मुद्गराभिघातादिनोत्पद्यत इत्येवमव्यक्तिपक्षे कृतमाद्यविकल्पं च दूषयतीत्यर्थः । **स्यादिति** । असत एवोत्पत्त्यङ्गीकारात् सत एव नाशाङ्गीकारादित्यर्थः । **तद्धेतोः** सत्त्वव्यवहारहेतोः । **कारकेति** । व्यक्त्यव्यक्त्योः सदसत्त्व इति शेषः । चक्रादिमुद्गरादिरूपकारकेत्यर्थः ।

कं०रा०— **विनाशव्यवहारेति** । विनाशव्यवहारे कारणीभूताया अनभिव्यक्तेः प्रागपि सत्त्वादित्यर्थः । **कारकेति** । उत्पत्तिविनाशशब्दितयोर्व्यक्त्यव्यक्त्योः सदासत्त्वे कारकव्यापारवैफल्यतादवस्थ्यं स्फुटमेवेत्यर्थः ।

श्रीनिधि०— **व्यक्त्यव्यक्त्योरुत्पत्तिविनाशत्व इति** । अत्र उत्पत्तिनाशौ व्यक्तेः । अव्यक्तेस्तूत्पत्तिमात्रमवधेयम् । अत एव विकल्पे अव्यक्तिकोत्पत्तौ उत्पद्यत इत्येवोक्तम् । **सिद्धान्तहानिरिति** । उत्पत्तिनाशयोर्विषये यः सिद्धान्तः तत् हानिः स्यादित्यर्थः ।

शे०वा०— उक्तरीत्या भाष्ययोजनास्वनवस्थाशब्दस्य प्रसिद्धार्थपरित्यागेनास्वारस्यं भवतीत्यतस्तत्स्वारस्येनापि वाक्यं योजयितुं तत्प्रसञ्जकीभूतार्थान्तरपरतया तावद्वाक्ययोजनां दिदर्शयिषुर्विकल्पमाह **किञ्चेति** । **अविनाशिनी चेति** । मुद्गरप्रहारादिना न नश्यति चेत्यर्थः । **उभयत्रेति** । उक्तपक्षद्वय इत्यर्थः । **आद्याविति** । उत्पत्त्यादिव्यवहारकारणमभिव्यक्तिः प्रागसत्येव चक्रचीवरादिभिरुत्पद्यते मुद्गरप्रहारादिना च नश्यतीति, अव्यक्तिः प्रागसती मुद्गरप्रहारादिनोत्पद्यत इति चाद्यावित्यर्थः । अन्यथेत्यस्यार्थमाह **व्यक्त्यव्यक्त्योरुत्पत्तिनाशवत्व इति** । अत्रासत्योरिति शेषः । **सिद्धान्तविरोध इति** । असत्योरेव व्यक्त्यव्यक्त्योरुत्पत्तेरुत्पन्नत्वेन सत्यव्यक्तेश्च विनाशाभ्युपगमादिति भावः । **द्वितीयाविति** । अभिव्यक्तिः प्रागपि सत्येव न नश्यति चेति, अव्यक्तिः प्रागपि सतीति चेति द्वितीयावित्यर्थः । तत्कथमित्यतोऽभिव्यक्तिः प्रागपि सत्येवेत्यंशं दूषयति **एतावन्तमिति** । अविनाशिनी चेत्यंशमपि दूषयति **तथा मुद्गरेति** । अव्यक्तिः प्रागपि सतीति पक्षमपि दूषयति **तथेदानीमेवेति** । इतीत्यस्यैवाव्यवस्थितिः स्यादिति पूर्वेण सम्बन्धः । **कारकव्यापारवैफल्यतादवस्थ्यमिति** । व्यक्त्यव्यक्त्योरुत्पत्तिविनाशशून्यत्वादिति भावः ।

वा०र०—— तत्स्वारस्येनापीति । व्यक्त्यव्यक्त्योरपि अव्यक्तव्यक्तीत्यादिपरम्परापक्षे । अथ एतत् वा उपेत्यादिना विषयसप्तमीत्यन्तेनेति शेषः । प्रथमविकल्पीयप्रथमपक्षस्य उत्पत्तिविनाशघटितया किं चक्रेत्यारभ्य नश्यतीत्यन्तं रूपत्वं स्पष्टयितुं आद्यपदार्थत्वेन सम्पूर्णमनुवादयति **उप्तत्ताविति** । सिद्धान्तविरोधस्फोरणाय विकल्पानुसारेण शेषं पूरयति **अत्रासत्योरिति** शेष इति । **व्यक्त्यव्यक्त्योरुत्पत्तेरिति** । उत्पत्तेरभ्युपगमात् इति बुद्ध्या विवेकेन सम्बन्धः । सत्यव्यक्तेरित्युक्तम् । कुतो व्यक्ते सत्त्व इत्यतः उक्तं **उत्पन्नत्वेनेति** । उत्पन्नस्य सत्त्वावश्यम्भावेन उत्पत्त्यनन्तरं विनाशाङ्गीकारे सत्यविनाशः प्राप्नोति इति भावः ।

विठ्ठल०—— आद्याविति । व्यक्तिरसत्ये वोत्पद्यते नश्यति चेति पक्षं असत्ये वा व्यक्तिरुत्पद्यत इति पक्षं चेत्यर्थः । **सिद्धान्तहानिः स्यादिति** । असत्योर्व्यक्त्यव्यक्त्योरुत्पत्त्यङ्गीकारात् सत्योस्तयोर्विनाशाङ्गीकाराच्च न किञ्चित्सद्विनश्यतीत्यादि स्वाभ्युगतनियमभङ्गादिति भावः । **द्वितीयाविति** । सत्त्वपक्षाविति भावः ।

॥ इति सप्तम-अष्टम-व्याख्याने ॥

* * *

॥ अथ तत्त्रयोदशधा व्याख्याने नवम-दशम-व्याख्याने ॥

१०० सु०—— अथैतद्दोषपरिहाराय व्यक्त्यव्यक्त्योरपि व्यक्त्यव्यक्ती स्वीक्रियेते, तदा तयोरप्युक्तविकल्पदोषानुषङ्गः स्यात् । अथ तत्रापि व्यक्त्यव्यक्त्यन्तराङ्गीकारस्तदाऽनवस्था स्यादित्याह अनवस्थेति । उत्पत्तिनाशयोरिति विषयसप्तमी ।

'सन्त्वनन्ता व्यक्तयोऽव्यक्तयश्च, मूलक्षयाभावान्नानवस्था दोष' इत्यत आह अनवस्थेति । अन्यथा अनवच्छिन्नव्यक्त्यव्यक्तिपरम्पराङ्गीकारे सर्वत्र घटादौ उत्पत्ति-नाशयोरनवस्था अनवक्लृप्तिः स्यात् । उत्तरोत्तरव्यक्त्यव्यक्तिसिद्धौ हि पूर्वपूर्वव्यक्त्य-व्यक्तीनामुत्पत्तिनाशव्यवहारनिदानत्वम् । ततः प्रयोजनपरिक्षयहेतुत्वादनवस्था दूषणमेव ।

परि०—— स्वीक्रियेते इति । उत्पत्तिविनाशव्यवहारहेतुतयेति योज्यम् । **उक्त-विकल्पदोषेति** । या व्यक्त्यव्यक्त्योरुत्पत्तिव्यवहारहेतुतया कारकव्यापारवैफल्यनिरासाय च व्यक्ति-रङ्गीकृता सापि किं प्रागसत्येवोत्पद्यते मुद्गरप्रहारदिना नश्यति च उत प्रागपि सत्येव अविनाशिनी च । एवं व्यक्तेः विनाशव्यवहारहेतुतया अङ्गीकृता व्यक्तिरपि प्रागसती मुद्गराभिघातादिनोत्पद्यते किं वा प्रागपि सतीति विकल्पस्य व्यक्त्यव्यक्त्योरुत्पत्तिविनाशवत्त्व इत्यादिनोक्तदोषस्य चानुषक्तिः

स्यादित्यर्थः । **अथ तत्रापीति** । व्यत्तयव्यक्तिनिष्ठव्यत्तयव्यत्तयोरपीत्यर्थः । **अनवक्लृप्तिरिति** । असिद्धिरित्यर्थः ।

गु०दी०— उत्तरोत्तरव्यत्तयव्यक्तिसिद्धौ इत्यत्र अनवस्थायां हि कल्पनामूलभूतं बीजादिकं पूर्वमित्युच्यते । तद्धेतुपरम्परतया कल्प्यमाना बीजाङ्कुरादिपरम्परा उत्तरोत्तरेत्युच्यते । तदिहापि मूलीभूतं पूर्वव्यत्तयव्यक्तिनिर्वाहाय कल्प्यमानोत्तरोत्तरव्यत्तयव्यक्तिपरम्परायाः असिद्धौ तदभिलषिते अप्रामाणिके घटोत्पत्ति-विनाशतयाऽङ्गीकृते मूलीभूतव्यत्तयव्यक्ती अपि न सिद्ध्यतः । अतो मूलक्षयो दुष्परिहर एव । सकलसम्मत्या प्रमाणसिद्धे तु मूले नायं दोष इति भावः । किञ्च व्यत्तयर्थं कारणचक्रमिति वदन् प्रष्टव्यः । सा च व्यक्तिः कार्या चेत्प्रागपि सत्येवेति पुनः कारणचक्रवैयर्थ्यम् । अकार्या चेद्गगनवत्कारणशतैरपि नोत्पाद्येति कारण-चक्रवैयर्थ्यमेव । अतः परस्याज्ञानविजृम्भणमूलैवेयं शङ्केति ज्ञेयम् ।

वादु०— पूर्वपूर्वव्यत्तयव्यक्तीनामिति । अत्र घटव्यत्तयव्यक्ती पूर्वे, व्यत्तयव्यत्तयोर्व्यत्तयव्यक्ती उत्तरे, तन्निर्वाहायोत्तरोत्तरं कल्प्यमानत्वात् । तथा चोत्तरोत्तरं कल्प्यमानपरम्पराया अप्रामाणिकत्वे व्यवहारहेतुतया कल्प्यमानयोः पूर्वव्यत्तयव्यत्तयोरसिद्धिरिति मूलक्षय इति भावः ।

वं०प०— एतद्दोषेति । इदानीमुत्पन्न इति न स्यात् । प्रहाराद्युत्तरं घटसत्त्वस्य व्यवहारः स्यात् । इदानीं नष्ट इति न स्यात् । वैफल्यं चेत्युक्तदोषेत्यर्थः । **व्यत्तयव्यत्तयोरिति** । तथा च घटोत्पत्तिव्यवहार-हेतुभूतव्यक्तेरपि व्यत्तयङ्गीकारेणेदानीमुत्पन्न इति सम्भवति । व्यक्तिव्यत्तयर्थमेव चक्रादिकारकसाफल्यम् । तथो-त्पत्तिव्यवहारहेतुभूतव्यक्तेरप्यव्यक्तिस्वीकारेण प्रहाराद्युत्तरमपि घटसत्त्वव्यवहारो न भवति । व्यक्तेरव्यत्तयर्थमेव मुद्गरादिकारकसाफल्यम् । तथाऽव्यक्तेरपि व्यक्तिस्वीकारेणेदानीं नष्ट इति सम्भवति । पूर्वं विद्यमानाया अप्य-व्यक्तेस्तदा व्यक्तत्वात् । यदा त्वव्यक्तेरप्यव्यक्तिस्तदा नष्ट इति न व्यवहार इत्यर्थः । न तु व्यक्तेर्व्यक्ति-रव्यक्तेरव्यक्तिरित्यर्थः । तथा सत्यव्यक्तेः केवलाव्यक्तिस्वीकारवैयर्थ्यात् । अतो व्यक्तेरपि व्यत्तयव्यक्ती अव्यक्तेरपि व्यत्तयव्यक्ती इत्युक्तरीत्या व्याख्येयम् । **तयोरिति** । घटोत्पत्त्यादिव्यवहारहेतुभूतव्यत्तय-व्यक्तिनिष्ठव्यत्तयव्यत्तयोरपीत्यर्थः । **तत्रापीति** । व्यत्तयव्यक्तिनिष्ठव्यत्तयव्यत्तयोरपीत्यर्थः । **अङ्गीकार इति** । तत्रैव कालपर्यवसानादित्यर्थः । **सिद्धौ हीति** । तत्सिद्धावेव च कालपर्यवसानादिति भावः । **प्रयोजनेति** । घटादावुत्पत्तिविनाशरूपेत्यर्थः ।

श्रीनिधि०— अवच्छिन्नव्यत्तयव्यक्तीति । अपर्यवसितव्यत्तयव्यक्ती इत्यर्थः । **अनवक्लृप्तिः** असम्भावना ।

शे०वा०— व्यत्तयव्यत्तयोरुत्पत्त्याद्यभावेऽपि व्यत्तयव्यक्तिसत्त्वात् तदर्थमेव कारणतयोपयोगान्न कारकव्यापारवैफल्यमित्याशङ्कते **अथेति** । **उक्तविकल्पेति** । येयं व्यत्तयव्यत्तयोरभिव्यक्तिरुत्पत्त्यादिव्यवहार-

कारणतयोपादीयते सा प्रागसत्येव कारकचक्रेणोत्पद्यते विनश्यति चोत प्रागपि सत्येव न नश्यति च, एवमव्यक्तिरपि प्रागसती कारकचक्रेणोत्पद्यते प्रागपि सतीति । नाद्यौ । व्यक्तत्वव्यक्तिसम्बन्धिव्यक्तत्वव्यक्त्योरसत्योरेवोत्पत्तिविनाशित्वे न किञ्चिदसदुत्पद्यते न किञ्चित्सद्विनश्यतीति सिद्धान्तविरोधात् । नान्त्यौ । कारकव्यापारवैफल्यादित्युक्तरीत्या विकल्पदोषयोरनुषक्तिः स्यादित्यर्थः । व्यक्तत्वव्यक्तिसम्बन्धिव्यक्तत्वव्यक्त्योरपि व्यक्तत्वव्यक्तिस्वीकारेण तदर्थत्वान्न कारकचक्रवैयर्थ्यमित्याशङ्कते **अथेति** । **विषयसप्तमीति** । अनेनोत्पत्तिविनाशविषय इत्यर्थः सूचितो भवति । **मूलक्षयाभावादिति** । 'मूलक्षयकरीं प्राहुरनवस्थां हि दूषणम्' इति तत्कारिण्या एव दूषणत्वोक्तेरिति भावः । **मूलक्षय इति** कोऽर्थः । किं कल्पकाभावः किंवा प्रयोजनपरिक्षयः । नाद्यः । घटसम्बन्ध्युत्पत्तिनाशयोर्व्यक्तत्वव्यक्तिरूपत्वस्य प्रामाणिकत्वे हि तदुपपत्त्यर्थं व्यक्तत्वव्यक्तिसम्बन्ध्युत्पत्तिनाशयोरपि व्यक्तत्वव्यक्तिरूपत्वं परम्पराकल्पनं स्यात् । न चैतदस्ति । घटसम्बन्ध्युत्पत्तिनाशयोर्व्यक्तत्वव्यक्तिरूपत्वस्याप्रामाणिकत्वेन कल्पकाभावस्य स्पष्टत्वादिति मनसि निधाय द्वितीयं दूषयति **उत्तरेति** । अत्र व्यक्तत्वव्यक्तिसम्बन्धिव्यक्तत्वव्यक्त्योः कल्प्यमानत्वात् ततश्चोत्तरोत्तरकल्प्यमानव्यक्तत्वव्यक्तिपरम्पराया अप्रामाणिकत्वेनासिद्धौ व्यवहारहेतुतया कल्प्यमानयोर्घटसम्बन्धिव्यक्तत्वव्यक्त्योरप्यसिद्धिरिति घटव्यक्तत्वव्यक्तिसिद्धिरूपप्रयोजनपरिक्षयोऽप्यस्त्येवेत्यर्थः ।

स०व्र०— अथेति । **एतद्दोषपरिहाराय** कारकव्यापारवैफल्यपरिहाराय । व्यक्तेरपि व्यक्तत्वर्थं कारकापेक्षा, नाशव्यवहारार्थं च अव्यक्तिः । एवम् अव्यक्तिव्यक्तत्वर्थं कारकापेक्षेति भावः । **तयोरपीति** । कारकादिवैकल्यपरिहारार्थं व्यक्तत्वव्यक्त्योरेवाङ्गीकृतव्यक्तत्वव्यक्ती प्रागसती उत सती । आद्ये अपसिद्धान्तः । द्वितीये पुनः कारकवैकल्यमेव । **उत्तरोत्तरेति** । अयं भावः । घटो नष्टः उत्पद्यते इति व्यवहारकारणत्वं घटाव्यक्तिव्यक्त्योः व्यक्तत्वव्यक्तिनिष्ठाव्यक्तिव्यक्त्योः कदा सिद्ध्यति । व्यक्तिर्नष्टा उत्पद्यते चेति व्यवहारार्थं व्यक्तत्वव्यक्त्योरपि व्यक्त्यन्तरस्य सिद्धौ । अन्यथा व्यक्तिर्नष्टा उत्पद्यते चेति व्यवहारनिदानस्य व्यक्तत्वव्यक्तिनिष्ठव्यक्त्यन्तरस्याभावेन घटो नष्टः उत्पद्यते चेति व्यवहारनिदानत्वमपि घटनिष्ठव्यक्तत्वव्यक्त्योरपि न सिद्ध्यति व्यभिचारात् । व्यक्तत्वव्यक्त्यन्तरसिद्धिश्च कदा । घटो नष्ट इत्यादिव्यवहारनिदानत्वे घटनिष्ठाव्यक्तिव्यक्त्योः प्रमाणेन सिद्धेः । न चात्र प्रमाणमिति मूलक्षय इति । **प्रयोजनपरिक्षयहेतुत्वादिति** । अत्र प्रयोजनशब्देन मूलं ग्राह्यम् । तथा च मूलक्षयहेतुत्वादित्यर्थः । मूलस्यैवाप्रामाणिकत्वात् तन्निर्वाहार्थं किमित्यप्रामाणिकानि कल्प्यन्ते । तस्मात् मूलमेव परित्याज्यमिति मूलक्षयहेतुत्वात् अनवस्था दूषणमेवेति भावः । केचित् अत्र घटव्यक्तत्वव्यक्ती उत्तरे । व्यक्तिव्यक्तत्वव्यक्ती पूर्वे । तथा च घटव्यक्तत्वव्यक्त्योरेव उत्पत्तिनाशत्वसिद्धौ कार्यस्य सिद्धत्वेन कल्प्यमानव्यक्तिव्यक्तत्वव्यक्त्यादेरपि सिद्धत्वेन मूलक्षयाभावो वाच्यः । न चैवम् । घटव्यक्तत्वव्यक्त्योरेव उत्पत्तिनाशत्वासिद्ध्या कार्यस्यैवासिद्धत्वादिति भावः ।

विठ्ठल०— उक्तविकल्पदोषानुषङ्ग इति । येयमभिव्यक्तिरित्यादिनोक्तविकल्पदोषानुषङ्गः स्यादित्यर्थः । **तत्रापीति** । व्यक्तत्वव्यक्त्योरपीत्यर्थः । **उत्तरोत्तरव्यक्तत्वव्यक्तिसिद्धाविति** । पटव्यक्तत्वव्यक्ती पूर्वे

पटव्यक्तयव्यक्तयोर्व्यक्तव्यक्तीरुत्तरे तन्निर्वाहायोत्तरोत्तरं कल्प्यमानत्वात् । तथा चोत्तरं कल्प्यमानपरम्पराया अप्रामाणिकत्वे व्यवहारहेतुतया कल्प्यमानयोः पूर्वव्यक्तयव्यक्तयोरप्रसिद्धिरिति मूलक्षय इति भावः ।

॥ इति नवम-दशम-व्याख्याने ॥

* * *

॥ अथ तत्त्वप्रदीपोदशधा व्याख्याने एकादश-द्वादशतमव्याख्याने ॥

१०१ सु०— 'नन्विदं भवतामपि समानम् । प्रागसतः सत्तासमवायो हि जनिरिष्यते । सत्तासमवायौ च सदा सन्ताविति प्राग्विनाशोत्तरमपि जनिः स्यात् । विनाशश्च न स्यात्' इत्यत आह अनवस्थेति । इयं सर्वत्रोत्पत्तिविनाशयोः अनवस्था अव्यवस्थितिः अन्यथा समवायस्य जनित्वाङ्गीकृतावेव हि स्यात् । नास्मन्मते । प्रकारान्तरेण जनेर्वक्ष्यमाणत्वादिति ।

'ननु जनिः किं प्राक् सती उत कारकव्यापारजन्या । आद्ये प्रागुक्त एव दोषः । द्वितीये जनेर्जनिरपि तथेत्यनवस्था । एवं विनाशोऽपी'त्यत आह अनवस्थेति । सर्वत्रोत्पत्तिनाशयोः इयमुक्ता अनवस्था । अन्यथा घटजनेरन्या जनेर्जनिरित्यङ्गीकार एव स्यात् । न त्वेवमङ्गीक्रियते, अपि तर्हि घटजन्मैव जन्मनो जन्मेति । यथाऽऽहुः 'यथा जनेर्जनिर्नान्या तस्या वस्तुजनिर्जनिः' इति । घटो जायते, घटजन्म जायत, इत्यनयोरेकार्थतैव हि लौकिकपरीक्षकसम्मता । न च व्यक्तयव्यक्तयोरप्येवमङ्गीकर्तुमुचितम्, जन्मविनाशावुपलब्ध्यनुपलब्धी वा विहाय व्यक्तयव्यक्तयोरेवाप्रामाणिकत्वादिति ।

परि०— नास्मन्मत इति । 'एवमेवासतः सत्तासमवायो जनिर्मता । तत्रापि ह्युक्तदोषाणां नैव किञ्चिन्निवारकम्' इति दूषणादिति भावः । **वक्ष्यमाणत्वादिति** । 'महदाद्याश्च जायन्ते पराधीनविशेषतः' इत्यादिना वियत्पादीयाद्याधिकरणे पराधीनविशेषावाप्तिरूपजनेर्वक्ष्यमाणत्वादित्यर्थः । **प्रागुक्त एव दोष इति** । 'एतावन्तं कालं प्रागनुत्पन्नो घट इदानीमुत्पन्न इति तावन्न स्यादि'त्यादिनोक्तदोष इत्यर्थः । **एवं विनाशोऽपीति** । यदि विनाशः प्रागपि सन् तदा 'घट इदानीमेव नष्ट इति न स्यादि'त्यादिनोक्तदोषः । यद्यसन् तर्हि तज्जनिपरम्परयोक्तदोष इति ध्येयमित्यर्थः । **यथाहुरिति** । आद्याध्याये बृहदारण्यके भाष्ये ।

यादु०— प्रकारान्तरेणेति । मृदादीनां घटाद्याकारेण परिणाम एव जनिरिति वैशेषिकपरीक्षायां वक्ष्यमाणत्वादित्यर्थः । **प्रागुक्त एव दोष इति** । कारकव्यापारवैयर्थ्यरूपो दोष इत्यर्थः । **एवं नाशोऽपीति** । विनाशोऽपि किं कारकव्यापारात्प्राक् सन्नेवोताविद्यमान एव तेन जायते । आद्ये कारकव्यापारवैयर्थ्यम् । द्वितीये नाशजनेर्जनिरपि तथेत्यनवस्थेति नाशोऽपि विकल्प्य दूषणीय इत्यर्थः । नाशेऽपीति पाठे नाशविषये जनिर्विकल्प्य दूषणीयेत्यर्थः ।

वं०प०— प्राक् उत्पत्तेः । **अङ्गीकृताविति** । वार्तिकमत इति भावः । **विनाशश्चेति** । सत्तासमवाययोः सदा सत्त्वेन तदवगमासम्भवात् । तस्यैव च विनाशत्वादिति भावः । **जन्येति** । जनिमतीत्यर्थः । **प्रागुक्तेति** । इदानीं घटो जनिमानिति न स्यात् । कारकव्यापारवैफल्यं चेत्यर्थः । **तथेति** । जनिमतीत्यर्थः । ननु तर्हनेनैव न्यायेन घटजन्मादेरेव व्यक्तयव्यक्तिजन्मादित्वाद्व्यक्तयव्यक्तयोरपि व्यक्तयव्यक्त्यन्तरानङ्गीकारान्नानवस्थेत्यत आह **न चेति** । **जन्मविनाशाविति** । तथा च घटजन्मन एव व्यक्तित्वाद्घटजन्मैव व्यक्तेरपि जन्मेति न सम्भवति । घटजन्मातिरिक्तव्यक्तेरेवाप्रामाणिकत्वात् । जनी प्रादुर्भाव इति धातोर्जनेरेव व्यक्तित्वात् । तथोपलब्ध्यनुपलब्धी च विहाय व्यक्तयव्यक्ती न स्तः । तथा चोपलब्ध्यादेरेव व्यक्त्यादित्वे घटजन्मैवोपलब्धेर्जन्मेति न सम्भवति । न हि घटो जायते घटोपलब्धिर्जायते इत्यनयोरेकार्थत्वं भातीत्यर्थः ।

कं०रा०— सत्तासमवायाविति । सत्ताजातेः समवायस्य च नित्यत्वमतौ सदा सन्ताविति भावः । **विनाशश्चेति** । सत्तासमवायरूपजनेरेव सदासत्त्वाद्विनाशश्च न स्यादिति भावः । **प्रकारान्तरेणेति** । न सत्तासमवायो जनिः किन्तु मृदादीनां घटाद्याकारतापत्तिरूपविशेष एव घटादिजनिरिति जनिशब्दार्थस्य प्रकारान्तरेण 'अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतः । नास्ति शेष' इत्यत्र वक्ष्यमाणत्वादित्यर्थः । **आद्य इति** । जनिः प्राक् सतीत्याद्यपक्षे कारकव्यापारवैयर्थ्यमिति प्रागुक्त एव दोष इत्यर्थः ।

श्रीनिधि०— प्रकारान्तरेण वक्ष्यमाणत्वादिति । स्वरूपविशेषावाप्तिरुत्पत्तिरिति वक्ष्यमाणत्वादित्यर्थः । **प्रागुक्त एव दोष इति** । कारकव्यापारवैफल्यलक्षणः । **न च व्यक्तयव्यक्त्योरिति** । तथा च नानवस्थेति भावः । जन्मविनाशावुपलब्ध्यनुपलब्धी च विहायेत्यर्थः । **व्यक्तयव्यक्त्योरेवाप्रामाणिकत्वादिति** । तथा च यदि जन्मविनाशावेव व्यक्तयव्यक्ती तदा व्यक्तिः प्राक् सती पक्षहानिः । एवमव्यक्तेरपि । व्यक्ताया विनाशव्यवहारहेतुत्वे तस्या उत्पत्तिरिति । अनुत्पत्तिः पक्षत्यागः स्यात् । उपलब्ध्यनुपलब्धित्वे व्यवहारहेत्वोरुपलब्ध्यनुपलब्ध्योः व्यक्तयव्यक्ती ते एवेति तयोश्च नित्यत्वात् । एतावन्तं कालमनुत्पन्न इदानीमुत्पन्न इति न स्यात् । तथेदानीमेव नष्टो घट इति च न स्यादिति द्रष्टव्यम् ।

शे०वा०— एवं परपक्षेऽव्यवस्थोपपादकतया वाक्ययोजनामभिधाय स्वपक्षे प्रसक्ताव्यवस्थाशङ्कापरिहारकतयाऽपि तद्योजयितुमव्यवस्थाशङ्कामुत्थापयति **नन्विति** । **प्रागिति** । उत्पत्तेरिति शेषः । स्वपक्षे

व्यवस्थाभावोपपादकतासिद्ध्यर्थं तदनुगुणतया व्याचष्टे **इयमिति** । **प्रकारान्तरेणेति** । मृदादीनां घटाद्याकारेण परिणाम एव जनिर्न त्वसतः सत्तासम्बन्ध इत्यस्मत्पक्षे 'विशेषस्य सर्वत्राङ्गीकृतत्वतः । नास्ति दोषः' इत्यादिना वैशेषिकपरीक्षायां प्रकारान्तरेण जनेर्वक्ष्यमाणत्वादित्यर्थः । **प्रागुक्त एवेति** । कारकव्यापारवैयर्थ्यरूप एवेत्यर्थः । **एवमिति** । नाशः किं प्राक् सन्नुत कारकव्यापारजन्यः । आद्ये कारकव्यापारवैयर्थ्यम् । द्वितीये नाशजनिरपि किं प्राक् सन्युत कारकव्यापारजन्या । आद्ये प्रागुक्त एव दोषः । द्वितीये नाशजनेर्जनिरपि तथेत्यनवस्थेत्यर्थः । यथा घटजनिरेव जनेर्जनिरिति नानवस्थेति त्वयोच्यते । तथा च घटव्यक्त्यव्यक्ती एव व्यक्त्यव्यक्त्योर्व्यक्त्यव्यक्ती न तु व्यक्त्यव्यक्त्यपेक्षया व्यक्त्यव्यक्तिसम्बन्धिन्यौ व्यक्त्यव्यक्ती अन्ये इति मयाऽपि वक्तुं शक्यत्वान्न मत्पक्षेऽप्यनवस्थेति भावेनाशङ्क्य निषेधति **न चेति** । **जन्मेति** । तत्र च दोषस्योक्तत्वादिति भावः ।

वा०र०— तदनुगुणतयेति । पूर्वयोजनासु अन्यथा एवं भवताङ्गीकारे त्वत्पक्षे अनवस्था स्यात् । तस्मात् त्वया तथा नाङ्गीकार्यं इति पदयोजना । इदानीं तु यावत् त्वयोक्तानवस्था सा अन्यथा हि स्यात्, मया त्वदुक्तप्रकाराश्रयणे हि सा स्यात् । न च मया स प्रकारोऽङ्गीक्रियते । अतो नानवस्थेति योजनात्रयं क्रियते इति भावः । **इत्यस्मत्पक्षे** इत्यत्र इतिशब्दस्य प्रकारान्तरेण इत्युत्तरेण सम्बन्धः । तत्र च दोषस्योक्तत्वादिति भावः । इति । जन्मविनाशयोः अर्थत्वाङ्गीकारे असत्योरपि अभिव्यक्ति-अव्यक्त्योः उत्पत्तिः । सत्याव्यक्तेश्च विनाशः इत्यभ्युपगमेन असत्किञ्चिदुत्पद्यते इति । सन्न विनश्यति इति च त्वदङ्गीकृद्विरोधः । व्यक्त्यव्यक्त्योः सत्त्वे च कारकव्यापारवैय्यर्थ्यम् । उपलब्धि-अनुपलब्ध्योरेव व्यक्त्यव्यक्तिसंव्यक्ताव्यक्तिरूपत्वाङ्गीकारे च व्यक्त्यव्यक्त्योः उपलब्ध्यनुपलब्धि इति प्रश्नस्य व्यक्त्यव्यक्त्योरुपलब्ध्यनुपलब्धिभ्यां इति वदन् देवानां प्रिय इत्यादि दूषणस्योक्तत्वादित्यर्थः ।

स०व्र०— प्रकारान्तरेण जनेर्वक्ष्यमाणत्वादिति । **प्रागुक्त एवेति** । कारकवैयर्थ्यलक्षण इत्यर्थः । **एवं विनाशोऽपीति** । नाशः किं प्राक् सन्, उत कारकव्यापारजन्यः । नाद्यः । कारकवैयर्थ्यापत्तेः । द्वितीये नाशजनेर्जनिरपि तथेत्यनवस्थेति भावः । **न च व्यक्त्यव्यक्त्योरिति** । घटव्यक्त्यतिरिक्तयोर्व्यक्त्यव्यक्त्योरनङ्गीकारादिति भावः ।

विठ्ठल०— सत्तासमवायाविति । सूत्राजातः समवायस्य च नित्यत्वाङ्गीकारात्सदा सत्तावित्युक्तमिति ज्ञेयम् । **विनाशश्च न स्यादिति** । सत्तासमवाययोर्नित्यत्वे घटादेः सत्ताभावरूपविनाशाभावप्रसङ्गादिति भावः । **प्रकारान्तरेणेति** । मृदादीनां घटाद्याकारतापत्तिरेव जनिरिति वैशेषिकपरीक्षायां वक्ष्यमाणत्वादित्यर्थः । **उक्तदोष एवेति** । कारकव्यापारवैयर्थ्यमित्युक्तदोष एवेत्यर्थः । **एवं नाशोऽपीति** । नाशोऽपि किं प्राक् सन्नेव उत कारकव्यापारजन्यः आद्ये कारकवैयर्थ्यम् । द्वितीये नाशजनेर्जनिरपि तथेत्यनवस्थेति । नाशोऽपि विकल्प्य

दूषणीय इत्यर्थः । **नाशोऽपीति** । पटनाशविषये जनिर्दूषणीयेत्यर्थः । हिशब्दसूचितं बृहद्भाष्यं प्रमाणमभिधाय तत्सूचितां लौकिकादिसम्मतिमप्याह **घटो जायत इति** ।

॥ इति एकादश-द्वादशतमव्याख्याने ॥

* * *

॥ अथ तत्त्रयोदशधा व्याख्याने त्रयोदशतमव्याख्यानम् ॥

१०२ **सु०— 'ननु यद्यसदुत्पद्येत सच्च विनश्येत तदा सर्वत्रोत्पत्तिनाशयोरनवस्थैव स्यात् । एवं सति हि (खर)शशविषाणमप्युत्पद्येत, आत्मा च नश्येदि'त्यत आह अनवस्थेति । अन्यथा कारणशक्त्यनादरणे हि इयम् उत्पत्तिविनाशयोरनवस्था स्यात् । न चैवम्; किन्तु यस्योत्पत्तिकारणमस्ति तदसदप्युत्पद्यते, यस्य च विनाशकारणं विद्यते तत्सदपि निरुध्यते । न च खरविषाणजन्मन्यात्मविनाशे वा कारणमस्तीति तयोर्जनन-विनाशाभावः । कारणस्वभावाननुगमे तु सत्कार्यवादिनोऽप्यतिप्रसङ्ग एवेति ।**

अथवा स्यादियमनवस्था यद्यत्यन्तासदेवोत्पद्यते सन्मात्रं विनश्यतीति ब्रूमः । सदसदेवोत्पद्यत इति चोक्तम्, विनाशकारणवदेव च विनश्यतीति ।

परि०— अतिप्रसङ्ग एवेति । आत्मवद्घटादेरपि सत्त्वाज्जनिर्न स्यादिति वा घटादेरिव आत्मनोऽपि जनिः स्यादिति वा अतिप्रसङ्ग इत्यर्थः । **अत्यन्तासदेवेति** । केनाप्याकारेण सत्त्व-रहितमित्यर्थः । **सन्मात्रमिति** । केनचिद्रूपेणासत्त्वशून्यमित्यर्थः ।

यादु०— अतिप्रसङ्ग एवेति । आत्मनोऽपि पूर्वं सत्त्वाविशेषाद्घटादिवदुत्पन्नत्वव्यवहारास्पदत्वं स्यादित्यतिप्रसङ्ग इत्यर्थः । **सन्मात्रमिति** । विनाशकारणशून्यं सदित्यर्थः । विनाशकारणवदेवेत्यत्र सदिति शेषः ।

वं०प०— एवं हि सति असत उत्पत्तौ सतश्च नाशे । **अननुगमे** अननुसरणे । **अतिप्रसङ्ग एवेति** । पूर्वं सत एवोत्पत्तावात्मनोऽप्युत्पत्तिः स्यादित्यर्थः । **सन्मात्रमिति** । विनाशकारणशून्यमपीत्यर्थः । **सदसदेवोत्पद्यत इति** । खरविषाणादेश्च कारणात्मना सत्त्वाभावान्नोत्पत्तिरिति भावः । **विनाशेति** । आत्मनश्च तदभावान्न विनाश इति भावः ।

श्रीनिधि०— निरुध्यते विनश्यति । ननु कारणशक्त्या चेदुत्पत्तिस्तदा तन्तुना घटाद्युत्पत्तिरपि स्यादित्यतिप्रसङ्ग इति चेन्न । तेषां तेषां कारणानां तत्तन्मात्रजननस्वभावाभ्युपगमात् । विपक्षे बाधकमाह **कारणस्वभावानभ्युपगमेऽपीति** ।

शे०वा०— अव्यवस्थामेवोपदर्शयति **एवमिति** । सत्कार्यवादे कारणस्वभावानभ्युपगमे आत्मादीनामप्युत्पत्त्यापत्त्या तत्स्वभावाभ्युपगम आवश्यक इत्याह **कारणेति** ।

ननु कारणसामग्रीसद्भावेऽपि बाधादेवासत्त्वमिति स्वप्नाधिकरणे वक्ष्यमाणत्वात् कथमत्र कारणाभावेन तदसत्त्ववर्णनम् । तथा सति तद्ग्रन्थविरोधापातादित्यत आह **अथवेति** । **सन्मात्रमिति** । विनाशकारणशून्यमपि स्यादित्यर्थः । विनाशकारणवदेवेत्यतःपरं सदिति शेषः ।

वा०र०— कारणसामग्रीति । कारणसामग्र्यमित्यर्थः । औचितीत्यादिवत्साधुत्वमनेकधा प्राक् व्युत्पादितम् ।

स०व्र०— सत्कार्यवादपक्षे कारणस्वभावानभ्युपगमे आत्मादीनामप्युत्पत्त्यापत्त्या तत्स्वभावाभ्युपगम आवश्यक इत्याह **कारणस्वभावेति** । ननु स्वप्नाधिकरणे सामग्रीसद्भावमङ्गीकृत्य बाधेनासत्त्वमुच्यत इत्युक्तत्वात् कारणाभावेन तदसत्त्ववर्णने तद्ग्रन्थविरोध इत्यत्राह **अथवेति** ।

विठ्ठल०— अतिप्रसङ्ग एवेति । आत्मनोऽपि सत्त्वाविशेषाद्घटादिवदुत्पन्नत्वं व्यवहारास्पदत्वं स्यात् । आत्मवद्घटादेरपि जनिः न स्यादिति भावः । **सदसदेवोत्पद्यत इति चोक्तमिति** । कारणात्मना सत्कार्यात्मना असदेवोत्पद्यते न तु केनाप्याकारेण सत्त्वरहितमिति चोक्तमित्यर्थः । **विनाशकारणवदेवेति** । इति चोक्तमित्यर्थः । तथा चात्मविनाशकारणाभावान्नोक्तदोष इति भावः ।

॥ इति त्रयोदशतमव्याख्यानम् ॥

॥ इति 'अनवस्थान्यथा हि स्यात्सर्वस्योत्पत्तिनाशयोः' इत्यनुव्याख्यानस्य १३धा व्याख्यानम् ॥

* * *

॥ अथ अन्योक्तव्याख्याननिराकरणे
अन्योक्तव्याख्यानगत'भावे चोपलब्धेः'इत्यादिसूत्राणामार्जवानार्जवाविष्करणम् ॥

१०३ **सु०— यच्चोक्तं भावे चोपलब्धेरिति सूत्रार्थत्वेन, तद्व्याप्यव्यापकभावेनैवोपपन्नं नात्यन्ताभेदसाधकम् ।**

अथ कारणोपरक्तबुद्धिः सामानाधिकरण्यबुद्धिर्वाऽत्राभिमतेति मतम्, साऽपि अभेदमात्रेण चरितार्था नात्यन्ताभेदसाधनायालम् । किञ्चैतद्युक्तेश्चेत्यनेनैव शक्यसङ्ग्रहं न पुनरभिधातव्यम् । अथानेन प्रत्यक्षमुपन्यस्यते तदपि नात्यन्ताभेदसाधकम् ।

अत एव भावाच्चोपलब्धेरिति सूत्रविपरिणामोऽपि निरस्तः ।

सत्त्वाच्चावरस्येति युक्तिश्चेद्युक्तेश्चेत्येतेनैव गतार्थता, श्रुतिश्चेच्छब्दान्तराच्चेत्यनेन ।

असद्व्यपदेशादिति तु परिचोदनैव असङ्गता, परमार्थतो ब्रह्मकारणतापरत्वेन आपाततस्तु शून्यस्याभावस्य वा कारणभावप्रतिपादकताप्रतिभासेन कार्यासत्त्वस्य श्रुतावप्रतीतेः ।

'युक्तेः' इत्युक्तयुक्तिं तूत्तरत्रापाकरिष्यामः ।

शब्दान्तरं त्वाचार्येणैवान्यत्रान्यथैव व्याख्यातम् ।

पटे प्राणादौ च नात्यन्तानुपसञ्जातविशेषत्वमित्यनुदाहरणमेव इत्यलं प्रपञ्चेन ॥

परि०— सूत्राक्षराणां आर्जवानार्जवचिन्ता शिष्यैरेव क्रियतामित्युक्तम् । तत्राद्यसूत्राक्षरार्जवचिन्ता पूर्वमेव कृता । द्वितीयादिसूत्राक्षरार्जवं दर्शयति **यच्चोक्तमिति** । मृदादेः कारणस्य भाव एव घटादेः कार्यस्योपलब्धेश्चानन्यत्वं कारणात्कार्यस्येति यदुक्तं तन्न । आलोके सत्येव रूपोपलब्धिरन्यथा तु नेत्यादौ यथा तथाऽविनाभावेनैवोपपन्नमित्यर्थः । यदत्रोक्तं भामत्यां तच्चन्द्रिकायां निरस्तं ध्येयम् । ननु मृद्घट इति कारणानुविद्धत्वेन सामानाधिकरण्येन वा प्रतीयमानत्वादनन्यत्वं कार्यकारणयोरित्येवं सूत्रतात्पर्यमित्याशङ्क्य निराह **अथेति** । **इत्यनेनैव शक्यसङ्ग्रहमिति** । असदकरणादित्यादिसाङ्ख्यसौगतोक्तयुक्तेरनन्यत्वं कार्यकारणयोरितिवत् मृद्घट इति कारणानुविद्धत्वादिना प्रतीयमानत्वरूपयुक्तेरनन्यत्वं तयोरपि सुवचमिति 'भावे' इति सूत्रं नारभ्यम् । अन्यथा पुनरभिधाने पुनरुक्तिदोषः स्यादिति भावः । ननु भावाच्चोपलब्धेरिति पाठान्तरमाश्रित्य आतानवितानवन्तस्तन्तव एव पट इति प्रत्यक्षोपलब्धेर्भावाच्च अनन्यत्वं कार्यकारणयोरित्युक्तत्वान्न युक्तेरित्यनेन गतार्थत्वमित्याशङ्क्य निराह **अथानेनेति** । भेदाभेदेनाप्युपपन्नमिति भावः । **अत एवेति** । अत्यन्ताभेदासाधकत्वादेवेत्यर्थः । **सत्त्वाच्चेति** । अवरस्यावरकालीनस्य कार्यस्य

प्रागुत्पत्तेः सदेव सोम्येत्यादिसत्त्वावधारणाद्वानन्यत्वं कार्यकारणयोरित्यत्र सत्त्वावधारणरूपयुक्तिरभिमता उत सत्त्वश्रवणादिति श्रुतिः; इति द्वयमपि क्रमेण निराह **युक्तिश्चेदिति** । इत्यनेनेति गतार्थतेत्यनुषङ्गः । शब्दान्तरादित्यस्य सदेव सोम्येति शब्दान्तरादिति व्याख्यानादिति भावः । **ब्रह्मकारणतेति** । 'असदेव', 'सन्मनोऽकुरुते'त्यादिवाक्यशेषादिति भावः । वाक्यशेषस्थासच्छब्दस्य सन्मनोऽकुरुतेत्यादेरयोगेन तुच्छार्थत्वासम्भवेऽपि शून्याभावान्यतरार्थत्वसम्भवादाह **शून्यस्येति** । **कारणभावः** कारणत्वम् । पञ्चमसूत्रार्थं च निराह **युक्तेरित्युक्तेति** । **उत्तरत्रेति** । साङ्ख्यनये असदकरणादिति युक्तिं सौगतोक्तयुक्तिं वैभाषिकनये निराकरिष्याम इत्यर्थः । **अन्यत्रेति** । षष्ठछान्दोग्यभाष्यादौ सदेव सोम्येति श्रुतेर्विष्णुपरतया व्याख्यानात् तस्याः वियदादिकार्यसत्त्वपरत्वाभावादिति भावः । दार्ष्टान्तिकवैषम्येण दृष्टान्तोक्तिपरसूत्रद्वयार्थं निराह **पटे प्राणादौ चेति** । प्रकृते जगतोऽत्यन्तोपसञ्जातविशेषवत्त्वं तत्र तु सङ्कोचविकासमात्रमिति वैषम्यादनुदाहरणमित्यर्थः । विशेषेण प्रपञ्चनं चन्द्रिकायां ध्येयम् ।

वावु०— यदुक्तं सूत्राक्षराणामार्जवानार्जवादिचिन्ता शिष्यैरेव क्रियतामिति तामिदानीं दर्शयति **यच्चोक्तमित्यादिना** । **तद्व्याप्यव्यापकेति** । अन्यत्वेऽपि धूमभावनियमेनाग्नेरुपलब्धेरिति भावः । **कारणोपरक्तेति** । मृद्घट इति कारणानुविद्धत्वेन कार्यबुद्धिरित्यर्थः । इयमेव सामानाधिकरण्यबुद्धिः । **शक्यसङ्ग्रहमिति** । न हि यद्यतो भिन्नं तत्तद्भाव एवोपलभ्यते, यद्यदनुविद्धतया प्रतीयते तत्तदभिन्ने, यौ च सामानाधिकरण्यप्रतीतिविषयौ तावभिन्नौ इत्येतेषामपि युक्तित्वादिति भावः । तथा चोक्तप्रत्यक्षलाभायोपलब्धेर्भावाच्चेति सूत्रेऽन्वय इति भावः । किञ्च भावे तिलादावित्यादिपरिणामवादिनो व्याख्यानमवलम्ब्य शङ्कते **अथानेनेति** । सङ्करेण तु सूत्रविपरिणामेन प्रत्यक्षोपन्यासो व्याख्यातः । तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो नैवोपलभ्यत इति । तदप्यतिदेशेन दूषयति **अत एवेति** । अत्यन्ताभेदसाधकत्वाभावादेवेत्यर्थः । **सूत्रविपरिणाम इति** । उपलब्धेः प्रत्यक्षरूपाया भावात् सद्भावादिति विपरिणतसूत्रार्थः । **उत्तरत्रेति** । समयपाद इत्यर्थः । **अन्यत्रेति** । सच्छब्दस्य ब्रह्मपरत्वमेव न जायमानकार्यपरतेति छान्दोग्यभाष्यादौ व्याख्यातमित्यर्थः । **पटे प्राणादौ चेति** । तत्राप्यवस्थान्तरवत्त्वरूपो विशेषो जायत एवेति नात्यन्ताभेदाद्युदाहरणं पटादीत्यर्थः । किञ्च भावे चेत्यत्र विभक्तिविपरिणामः कारणस्य कार्यस्येति पदद्वयाध्याहारश्च । सत्त्वाच्चेत्यत्र सत्त्वादित्यस्य त्वदभिप्रेतानृतत्वविरोधित्वमुपपत्तेः प्रागेवेत्यस्याध्याहार्यत्वं च युक्तेरित्यत्र परोक्तयुक्त्युपजीवनं शब्दान्तरादित्यस्य सत्त्वाच्चेत्यनेन गतार्थत्वं पटप्राणदृष्टान्तौ तु विवर्तवादिनोऽननुगुणौ जगतो ब्रह्मणीव प्रसारणादेः पटादावनध्यस्तत्वात् मन्मत इव प्रमेयविशेषाभावेन दृष्टान्तद्वयवैयर्थ्यं चेत्याद्यभिप्रेत्याह **इत्यलं प्रपञ्चेनेति** ।

चं०प०— व्याप्येति । मृदादेः कारणस्य भाव एव कार्यस्योपलब्धिरित्युक्ते वह्निसद्भाव एव धूम उपलभ्यते । अन्यथा तु नेत्यत्रेव 'व्याप्यव्यापकभावेनैवोपपन्नमित्यर्थः । **अथेत्यादि** । यदा घटो ज्ञायते तदा मृदादिकारणोपरक्ततयैव ज्ञायते । न हि घटं विहाय पटवन्मृदं विहाय घटः प्रतीयते । ततश्च कार्यं घटादि मृदादिकारणादत्यन्ताभिन्नं तदुपरक्तबुद्धिविषयत्वात् सामानाधिकरण्येन च ज्ञायमानत्वात्, अभेदबुद्धिविषयत्वादिति यावत्, यथा घटः, इत्यनुमानद्वयमत्र सूत्रेऽभेदसाधकत्वेनाभिमतमित्यर्थः । अनेन 'भावे च' इति सूत्रे 'उपलब्धेरि'ति प्रत्यक्षस्योक्तत्वादित्यर्थः । तथा च 'युक्तेश्चे'त्यनेन सङ्ग्रहो न शक्य इत्यर्थः । तदपि प्रत्यक्षं कथञ्चिदभेदसाधकत्वेऽपि नात्यन्ताभेदसाधकमित्यर्थः । **अत एव** प्रत्यक्षस्यात्यन्ताभेदसाधकत्वादेव । **परमार्थ इति** । वास्तवार्थविचार इत्यर्थः । **श्रुतौ** 'असदेवेदमग्र आसीदि'त्यादौ । **अनुपसञ्जातविशेषत्वम्** उभयोरपि दृष्टान्तयोरत्यन्तमनुपसञ्जातोऽविद्यमानो विशेषो भेदो यत्र सोऽनुपसञ्जातविशेषोऽत्यन्ताभेद इति यावत्, तत्त्वं तद्वत्त्वं नास्तीत्यर्थः । अवस्थान्तरत्वरूपविशेषस्य तत्रापि जायमानत्वेन कार्यकारणयोर्नात्यन्ताभेदोदाहरणत्वमनयोरिति भावः ।

कं०रा०— यच्चोक्तमिति । मृदादेः कारणस्य भाव एव घटादेः कार्यस्योपलब्धेरनन्यत्वं कारणात्कार्यस्येति भावे चोपलब्धेरिति सूत्रार्थत्वेन तद्भाव एव तदुपलब्धिरूपं कार्यकारणाभेदसाधकं यदुक्तं तद्वह्न्यादेर्भाव एवोपलभ्यमानधूमादिसाधारणतया कार्यकारणयोर्व्याप्यव्यापकभावेनैवोपपन्नम् । अभेदसाधकमित्यर्थः । **सेति** । कारणोपरक्तकार्यबुद्धिः कार्यकारणयोः सामानाधिकरण्यबुद्धिश्चाभेदमात्रेणोपपन्ना न तयोरत्यन्ताभेदसाधनायालमित्यर्थः । **अत एवेति** । **भावाच्चोपलब्धेरिति** । भावशब्दस्य पञ्चम्यन्तत्वेन पाठमाश्रित्य आतानवितानवन्तस्तन्तव एव पट इति प्रत्यक्षोपलब्धेर्भावाच्चेति यः परेणास्य च सूत्रस्यान्योऽर्थ उक्तः सोऽपि प्रत्यक्षोपलब्धिरभेदमात्रेण चरितार्था न ब्रह्मानन्यत्वसाधनायालमित्युक्तदूषणेनैव निरस्त इत्यर्थः ।

श्रीनिधि०— श्रुतौ कार्यासत्त्वं प्रतीयत इति वदता वक्तव्यम् । किं परमार्थतः । उतापाततः । नोभयथापीत्याह **परमार्थत इत्यादिना** । **उत्तरत्र** समयचरणे ।

शे०वा०— एवं भाष्योक्तरीत्या प्रमेयनिरासेनापव्याख्यानं निराकृतम् । इदानीं स्पष्टत्वाच्छिष्यैरेव क्रियतामिति भावेन भाष्यकारोऽपेक्षितसूत्राक्षरार्जवानार्जवादिव्युत्पादनेनापि तदपाकरोति **यच्चोक्तमित्यादिना** । **व्याप्यव्यापकभावेनैवेति** । अन्यत्वेऽप्युपादानोपादेययोरुपादेयस्योपादानव्याप्यतयोपादानभाव एवोपलम्भो युक्तः । अग्निधूमयोरन्यत्वेऽपि व्याप्यव्यापकभावमात्रेणाग्निभाव एव धूमोपलम्भदर्शनात् । अन्यथा तद्भाव एवोपलब्ध्या धूमस्याग्न्यभेदप्रसङ्ग इति भावः । नन्वत्र कारणस्य भाव एव कार्यस्योपलभ्यमानत्वं यथाश्रुतमेव कार्यकारणयोरत्यन्ताभेदसाधकतया न विवक्षितं किन्तु कारणस्वभावानुरक्ततया कार्यस्योपलभ्यमानत्वं कारणसमानाधिकरणतयोपलभ्यमानत्वं वा तथा विवक्षितम् । अस्ति च कारणस्वभावानुरक्ततया तत्समानाधिकरणतया च कार्यस्य प्रतीतिर्मृद्घट इत्येवमाकारेति नासिद्धिः । नाप्यसावग्निधूमयोरस्ति । अग्निर्धूम इत्यप्रतिभासादिति

न व्याप्यव्यापकभावमात्रेणोक्तहेत्वोरन्यथासिद्धिरिति युक्तं ताभ्यां कार्यस्य कारणानन्यत्वसाधनमित्याशङ्कते **अथेति** । कार्यकारणयोरत्यन्ताभेदाभावेऽप्यभेदस्य सत्त्वात्तन्मात्रेणैव कारणस्वभावानुरक्ततया तत्समानाधिकरणतया वा **मृद्घट** इति प्रतिभासोपपत्त्याऽत्यन्ताभेदरूपसाध्यं विनाऽप्युक्तद्विविधप्रतिभासोपपत्तेरन्यथासिद्धिरत्राप्यविकलैवेति नानन्यत्वसाधनसम्भव इत्याशयेन परिहरति **साऽपीति** । **शक्यसङ्ग्रहमिति** । असदकारणादिवत् तद्भाव एवोपलभ्यमानत्वतत्स्वभावानुरक्ततयोपलभ्यमानत्वतत्समानाधिकरणतयोपलभ्यमानत्वानामपि युक्तित्वादिति भावः । **अथेति** । ततश्च कार्यकारणयोरनन्यत्वे प्रत्यक्षरूपप्रमाणोपदर्शकत्वादस्या न युक्तिरूपप्रमाणोपदर्शकेन युक्तेरित्यनेन शक्यसङ्ग्रहत्वमिति न पुनरुक्तिरिति भावः । दूषयति **तदपीति** । कार्यकारणयोरभेदमात्रेणोक्तविधप्रत्यक्षस्य चरितार्थत्वादिति भावः । भावे चोपलब्धेरित्यस्य भावाच्चोपलब्धेरिति विपरिणाममाश्रित्य आतानवितानवन्तस्तन्तव एव पट इति प्रत्यक्षोपलब्धेर्भावाच्च कार्यस्य कारणानन्यत्वमिति कार्यकारणयोरनन्यत्वे प्रत्यक्षरूपप्रमाणान्तरसद्भावप्रदर्शनार्थत्वेन युक्तिसमर्पकत्वाभावान्न युक्तेरित्यनेन शक्यसङ्ग्रहत्वमिति यदुक्तं सङ्करेण तदप्यतिदेशेन दूषयति **अत एवेति** । उक्तप्रत्यक्षस्यापि कार्यकारणयोरभेदमात्रावगाहित्वेनात्यन्ताभेदानवगाहिततया तेन तदसिद्धेरेवेत्यर्थः । उपलक्षणं चैतत् । उपलब्धेरित्यस्य पञ्चम्यन्तत्वेऽपि विवक्षितसिद्धेर्भावादित्यस्य वैयर्थ्यञ्चेत्यपि द्रष्टव्यम् ।

शब्दान्तराच्चेत्यनेनेत्यतःपरं गतार्थतेत्यनुवर्तते । **ब्रह्मकारणतापरत्वेनेति** । तदसदेव सन्मनोऽकुरुतेति वाक्यशेषादिति भावः । **कार्यासत्त्वस्येति** । उदाहृतश्रुतौ तत्प्रत्यायकाभावादिति भावः । न च कार्यकारणयोरनन्यत्वाङ्गीकारेण कार्यासत्त्वशङ्केति वाच्यम् । कार्यसत्त्वस्याप्यनन्यत्वसिद्ध्यर्थत्वेनानन्यत्वाङ्गीकारेणासत्त्वशङ्कायोगादित्याशयात् । **युक्तिमिति** । साङ्ख्योक्तामसदकरणादित्युक्तिं बौद्धोक्तां वृत्तिविकल्पानुपपत्त्यादियुक्तिमित्यर्थः । **उत्तरत्रेति** । समयपादे साङ्ख्यपरीक्षायां बौद्धपरीक्षायां चेत्यर्थः । **शब्दान्तरं त्विति** । सदेव सोम्येदमग्र आसीदिति शब्दान्तरमित्यर्थः । **अन्यत्र** छान्दोग्यभाष्ये । **अन्यथा** ब्रह्मपरत्वेन । **अनुदाहरणमेवेति** । तत्रावस्थान्तरवत्त्वरूपविशिष्टोत्पत्त्यङ्गीकारेणात्यन्ताभेदस्यास्माकमसम्मतत्वादिति भावः । ननु भावे चोपलब्धेरित्यत्र सूत्रे यद्यपि कारणस्य भाव एव प्रतीयते कार्यस्य चोपलब्धिस्तथाऽपि भावोपलब्धिशब्दावत्र न भावोपलब्धिमात्रपरौ किन्तु भावशब्दः कारणस्य सत्त्वोपलम्भरूपोभयपरः । उपलब्धिशब्दोऽपि कार्यस्य सत्त्वासत्त्वोपलम्भरूपोभयपरः । ततश्च कार्यं, कारणानतिरिक्तं, कारणसत्त्व एव सत्त्वे सति तदुपलब्धावेवोपलभ्यमानत्वात् कारणस्वरूपवत् इत्यनुमानमेवात्र कार्यकारणयोरनन्यत्वसाधकतया विवक्षितम् । न तु कार्यं कारणानतिरिक्तम्, तद्भाव एवोपलभ्यमानत्वादिति । ततश्च न व्याप्यव्यापकभावमात्रेणान्यथोपपत्तिरूपं वर्णयितुं शक्यते । अत्र च तदुपलब्धावेवोपलभ्यमानत्वादित्येव हेतूकारे प्रभोपलब्धावेवोपलभ्यमानेन रूपेण व्यभिचारः स्यात् । तस्य प्रभाया अनतिरेकाभावात् । तन्निवृत्त्यर्थं भावे भावादिति विशेषणम् । ततश्च रूपस्य प्रभाया भाव एव भावाभावान्न व्यभिचारः । यदि चात्र कारणस्य सत्त्व एव सत्त्वादित्येव हेतुः क्रियेत । तर्हि वह्निसत्त्व एव सता विशिष्टधूमेन व्यभिचारः । तन्निवृत्त्यर्थं तदुपलब्धावेवोपलभ्यमानत्वादित्युक्तम् । ततश्च विशिष्टधूमस्य

वह्निसत्त्व एव सत्त्वेऽपि तदुपलब्धावेवोपलब्धिरिति नियमाभावान्न व्यभिचार इति भामत्युक्तानुमानदूषणसङ्ग्रहायाह **इत्यलमिति** । अयमाशयः । एवं योजनायामपि भावोपलब्धिशब्दयोः आवृत्तिः । विभक्तिविपरिणामः । कार्यस्य कारणस्येति पदद्वयाध्याहारः । कारणसत्त्व एव सत्त्वरूपस्य हेतुविशेषणस्य त्वदभिमतानृतत्वरूपानन्यत्व-विरोधश्च । शब्दैकसमधिगम्यनिर्विशेषचिन्मात्ररूपस्य शुद्धस्य सर्वज्ञत्वादिविशिष्टस्य सगुणस्य च ब्रह्मणो-ऽनुपलब्धावेव प्रपञ्चोपलम्भेनोक्तहेत्वसिद्ध्या तेन प्रस्तुतब्रह्मप्रपञ्चानन्यत्वस्यासिद्धिश्चेति । न केवलं भामत्युक्त्याऽनुमाननिरासकन्यायसङ्ग्रहायेदं किन्नाम सत्त्वाच्चावरस्येत्यत्र सत्त्वस्य त्वदभिप्रेतानृतत्वविरोधः । उत्पत्तेः प्रागित्यस्याध्याहारश्च । तत्तेजोऽसृजतेति वाक्यशेषेण सदेवेत्यस्य कारणपरत्वेन कार्यकारणाभेदस्य चाद्याप्यसिद्धेस्तेन कार्यसत्त्वासिद्धेश्च । युक्तेः शब्दान्तराच्चेत्यत्र सत्त्वाच्चावरस्येत्यनेन गतार्थत्वं पटवच्चे-त्यादिसूत्रद्वये संवेष्टितप्रसारितपटप्राणादिदृष्टान्तौ न विवर्तवादिनोऽनुगुणौ । जगतो ब्रह्मणीव प्रसारणादेः पटादावध्यस्तत्वात् । मन्मत इव प्रमेयविशेषाभावेन दृष्टान्तद्वयस्य वैयर्थ्यं चेत्यादिसम्भावितदोषान्तरसूचना-यापीत्यलमित्युक्तमित्यवधेयम् ।

वा०र०— प्रमेयनिरासेनेति । सूत्राक्षरानानुगुण्यं स्पष्टत्वात् शिष्यैरेवोह्यतां इत्याशयेन तदनुपपाद्यैव प्रमेयमात्रं भाष्यकृता निराकरणं कृतमिति प्राक्तत्वात् तदनुसारेण इदम् । अयमर्थः । एतावत्पर्यन्तं परोक्तसूत्रार्थदूषणं भाष्योक्तदूषणव्यापारेण कृतम् । इदानीं तु भाष्यकृतोपेक्षितसूत्रार्थं दूषणं स्वयं व्यक्तीकरणेन तदीयसूत्राक्षरार्थं निराकरोतीति । **अन्यत्वेऽपीति** । उपादानोपादेययोः अन्यत्वेऽपीति सम्बन्धः । मृदादि-घटादिरूपयोः इति पूरणीयम् । अन्यत्वेऽपीत्यनेनानन्यत्वरूपसाध्याभावेऽपि इत्युक्तम् । उक्तसाध्याभावेऽपि हेतोः व्याप्यव्यापकभावमात्रेण उपपत्तिमेव दृष्टान्तेन दृढयति **अग्निधूमयोरिति** । अग्निभाव एवेत्यनेन धूमभाव एवेति अन्यथाख्यातिग्रन्थोऽपरामर्शमूलः इत्यपि सूचितम् । इदमेव विपक्षे बाधकप्रदर्शनेन उपपादयति **अन्यथेति** । कारणोपरक्तबुद्धिरित्यत्र बुद्धेरेव कारणस्वभावानुरक्तत्वं उक्तमिति भ्रान्तिसामानाधिकरण्ययुधि-रित्यत्र च केवलसामानाधिकरण्यविषयकबुद्धिरित्युच्यते इति भ्रान्तिं च निराकुर्वन् कार्यकारणोपरक्ततया कारणसमानाधिकरणतया च बुद्धिरित्यर्थो मूलेऽभिप्रेत इति दर्शयति **कारणस्वभावेनेत्यादिना** । **तथेति** । कार्यकारणयोरत्यन्ताभेदे साधकतयेत्यर्थः । घटादिरूपे कार्ये पक्षीभूते उक्तं हेतुसत्त्वमुपपादयति **अस्ति चेति** । एकैव मृद्धटः इत्याकारा प्रतीतिः । कारणस्वभावानुरक्ततया कार्यं विषयीकरोति । तथा तत्समानाधिकरणतया च कार्यं विषयीकरोतीति तद्बलात् कारणस्वभावेत्यादि वक्ष्यमाणहेतुद्वयसिद्धेः नासिद्धिरिति भावः । यस्याः कारणाभाव एव कार्यस्योपलब्धेः अन्यथासिद्धिरुक्ता । न साऽत्र विवक्षिता, या च अत्र विवक्षिता न तस्याः अन्यथासिद्धिः । अग्निधूमयोः तदभावेन कल्पकाभावादित्याशयेनाह **नाप्यसाविति** । इतीत्यस्य इत्यतः इत्यर्थः । कारणस्वभावानुरक्ततया उपलभ्यमानत्वकारणसमानाधिकरणतया उपलभ्यमानत्वरूपहेतोरित्यर्थः । **बुद्धिपूर्वेति** मूलस्य विशेषणीभूते प्रतीतिस्वरूपमात्रप्रदर्शकत्वेऽपि तद्विषयत्वरूपोपलभ्यमानत्व एव पर्यवसन्न-त्वादिति ज्ञेयम् । **साधनमिति** । घटादिकार्यं मृदादिकारणादन्यत्स्वभावानुरक्ततयोपलभ्यमानत्वात् तत्समाना-

धिकरणतयोपलभ्यमानत्वात् वा । व्यतिरेकेण गवाश्ववदिति साधनमित्यर्थः । अन्यथासिद्धिः । **विकल्पैर्वेति** । उपलक्षणं चेदम् । भाति घटः इति ज्ञानानुरक्ततया प्रतीयमाने घटे ज्ञानानन्यत्वाभावेन व्यभिचार इति ज्ञेयम् । **सापीतीति** । अत्र मूलेऽपि तादृशा बुद्धिः विषयत्व एव पर्यवसानमभिप्रेतमिति ज्ञेयम् । **विपरिणाममाश्रित्येति** । सप्तमीविभक्ते पञ्चम्याः विपरिणाम इत्यर्थः । एतच्च भाष्यभामत्यादिकं चन्द्रिकां चानुसृत्याधिकं व्युत्पादनं च कुर्वता शङ्कारूपेण कथितम् । **सङ्क्षेण** इत्युक्तिरपि सङ्क्षेपोक्तौ उपयुक्तप्रतिपादनस्यापि सङ्क्षेपोक्तत्वमस्तीति सिद्धिं कृत्वा अतः सङ्क्षेणाविभक्तिविपरिणामादेरनुक्तावपि न दोष इति ज्ञेयम् । चन्द्रिकानुसारेणाह **उपलक्षणं चेति** । पञ्चम्यन्तत्वेऽपि परेण हि उपलब्धेरिति षष्ठीत्याश्रित्य भावादित्यनेन सम्बन्ध आश्रितः तावता लभ्यार्थश्चोपलब्धेरित्यस्य पञ्चमीत्वाश्रयणमात्रेण लभ्यत इति सूत्राल्पाक्षरत्वाय भावादित्यधिकस्याप्रयोक्तव्यत्वात् सूत्रे तद्वैय्यर्थ्यमिति भावः । **आसीदितिशब्दान्तरमित्यर्थ इति** । इत्यादिशब्दान्तरमित्यर्थः । पूर्वमित्यादीत्युक्तेरिति ज्ञेयम् । एतदुक्तं भवति । विषयपदं विषयविषयीपरं, विषयीपदं विषयविषयीपरं तेन कारणोपलम्भभावयोरुपादेयलम्भभावाविति सूत्रार्थः सम्पद्यते इत्यादि भामती । न तु कारणस्य भाव एव सूत्रे प्रतीयते इत्यादि कल्पतरुं च मनसि कृत्वा व्याप्यव्यापकभावेन उपपत्तेः इत्येतत् फलं आक्षिप्य तत्परिहारः तथेत्यलं इत्येतत् योजयति । न तु भावे चोपलब्धेः इत्येतत्सूत्र इत्यादिना भावशब्दः कारणस्य सत्त्वोपलम्भेति । अयमाशयः । भावो हि उपलम्भविषय इति विषयवाचकस्वभावपदस्य दण्डीन्यायेन विषयीविषयपरता इत्येवं भावोपलब्धिशब्दावुभयपराविति । तथा च प्रमारूपानुविद्धेत्यादि भामतीव्याख्यानरूपोपलब्ध्यनुपलब्धेरिति हेतुकारक इत्यादि कल्पतरुं मनसि कृत्वा विशेषणविशेष्यकृत्यमाह **अत्र च तदुपलब्धावेवेत्यादि** । चाक्षुषज्ञानविषयालोकसन्निकर्षस्य कारणतया विषयोपलब्धेः प्रागेव लोकोपलम्भः इन्द्रियेणेति भावेनोक्तं **प्रभोपलब्धावेवेति** । धूममात्रस्य वह्निं विनापि स्थलान्तरे सत्त्वात् आह **विशिष्टेति** । एतत् भामत्युक्तमपि चन्द्रिकोक्तरीत्या दूषयति **एवं योजनायामपि इत्यादिना** । चन्द्रिकानुसारेणाह **किन्नाम सत्त्वाज्ञावरस्येत्यादि** ।

स०व्र०— **अत एव** अत्यन्ताभेदासाधकत्वादेवेत्यर्थः । **उत्तरत्रेति** । असदकरणादित्यादियुक्तिं साङ्ख्यपरीक्षायां वृत्तिविकल्पानुपपत्तिरूपयुक्तिं तु बौद्धाधिकरणे अपाकरिष्याम इत्यर्थः । **शब्दान्तरं त्विति** । 'सदेव सौम्येदमग्र आसीत्' इति सत्त्वप्रतिपादकं शब्दान्तरं तु छान्दोग्यभाष्ये अन्यथाव्याख्यातमित्यर्थः ।

विठ्ठल०— यदुक्तं सूत्राक्षराणामाजिवानाजिवक्षिता च शिष्यैरेव क्रियतामिति तामिदानीं दर्शयति **यच्चोक्तमित्यादिना** । मृदादेः कारणस्य भाव एव घटादेः कार्यस्योपलब्धेरनन्यत्वं कारणात्कार्यस्येति भावे वेति सूत्रार्थत्वेन यच्चोक्तं तत्प्रमेयत्वरूपादिभाव एवाभिधेयत्वरसाबुपलब्धेरिति व्याप्यव्यापकभावेनैवोपपत्तेर्नभेदसाधकमित्यर्थः । **कारणोपरक्तबुद्धिरिति** । कारणोपरक्तबुद्धेरित्यस्यैव विवरणं सामानाधिकरण्यबुद्धेर्वेति । **मृद्घट** इव सामानाधिकरण्यबुद्ध्यतिरेकेण कारणोपरक्तबुद्धेरन्यस्याभावात् । वाशब्दस्तु दूषितपक्षापेक्षयास्य पक्षस्य

पक्षान्तरत्वद्योतकः अथवा मृदात्मको घट इति कारणोपरक्तबुद्धिः मृद्धटसामानाधिकरण्यबुद्धिरिति भेदः । **इति मतमिति** । एवमेव कारणात्कार्यस्यानन्यत्वं भावे चेति सूत्रार्थत्वेन सूत्रकाराभिप्रेतं न तूक्तरीत्या अतो नोक्तदोष इति मतमित्यर्थः । **शक्यसङ्ग्रहमिति** । एतत्सूत्रार्थत्वेनाभिप्रेतस्यापि युक्तिरूपत्वेनास्यापि युक्तेरसदकरणा-दित्यादि साङ्ख्याद्युक्तयुक्तिवद्युक्तिरिति सूत्रेणैव गृहीतुं शक्यत्वेन तत्सूत्रस्य गतार्थतापत्तेरिति भावः । किं च भावे तिलादाविति परिणामवादिनो यद्व्याख्यानं तदाशङ्क्य परिहरति **अथानेनेति** । यदपि भावे चोपलब्धेरिति पाठं आश्रित्य आतानादिरूपास्तन्तव एव पट इति प्रत्यक्षरूपाया उपलब्धेः भावात्सद्भावादिति व्याख्यातं तदप्यतिदेशेन निराकरोति **अत एवेति** । प्रत्यक्षोपलब्धिरभेदमात्रेण चरितार्था । नात्यन्ताभेदसाधनायालमिति दूषणादेवेत्यर्थः । **सत्त्वाच्चेति** । अत्रावरकालीनस्य कार्यस्य प्रागुत्पत्तेः सदेव सोम्येति सत्त्वावधारणाच्चानन्यत्वं कार्यकारणयोरिति श्रुत्यनुगृहीतसत्त्वावधारणरूपयुक्तिरभिमता उत सत्त्वश्रवणादिति श्रुतिरिति विकल्प्य हृदि निधाय द्वयमपि क्रमेण दूषयति **युक्तिश्चेदिति** । **ब्रह्मकारणतेति** । तम आसीदिति वाक्यशेषे निर्देशानुसारे वस्तुतो ब्रह्मण एव जगत्परत्वप्रतीतेरिति भावः । सममेवं तथाऽप्यापातप्रतीतमर्थमाश्रित्य कार्यस्या-सत्त्वव्यपदेशादिति परचोदना उक्तैवेत्यत उक्तम् **आपाततस्त्विति** । पञ्चमसूत्रार्थं निराह **युक्तेरिति** । उत्तरत्र साङ्ख्यादिनये शब्दान्तरं त्वाचार्यैरेवान्यत्रान्यथा व्याख्यातमिति । 'आगम्यत्वाद्यसन्नाम ब्रह्म नारायणाभिधम् । प्रलये वासुदेवाख्यं गम्यं सदभवद्विदाः । अनासाद्य स्वसन्नामपूर्वं नारायणाभिधः । स आसाद्यस्तु सन्नाम वासुदेवोऽभवद्विभुरि'त्यादिना अन्यत्र छन्दोगतैत्तरीयभाष्यादावसदादिशब्दस्य परमात्मपरत्वमेव न तु जायमान-जगदुत्पत्तिपरमिति व्याख्यातमित्यर्थः । पञ्चमषष्ठसूत्रार्थं निराह **पटे प्राणादौ चेति** । तत्राप्यवस्थान्तरत्व-रूपविशेषो जायत एवेति । सर्वात्मनानुपसञ्जातविशेषत्वाभावात् पटादिकं कार्यकारणयोरत्यन्ताभेदेनोदाहरण-मेवेत्यर्थः । किञ्च घटप्राणादिदृष्टान्तौ मायावादिमते सर्वथानुपपत्तौ जगतो ब्रह्मणीव प्रसारणादेः पटादा-वनध्यस्तत्वादित्यभिप्रेत्याह **इत्यलं प्रपञ्चेनेति** ।

॥ इति अन्योक्तव्याख्याननिराकरणम् अनुव्याख्यानोक्तम् ॥

॥ इति अन्योक्तव्याख्यानगत'भावे चोपलब्धेः'इत्यादिसूत्राणामार्जवानार्जवादिव्युत्पादनम् ॥

॥ इति अन्योक्तव्याख्याननिराकरणम् ॥

* * *

॥ अथ 'युक्तेःशब्दान्तराच्च'इतिसूत्रव्याख्याने
अभ्यधिकाशङ्कानिरासकतया 'शक्तोऽपि', 'नित्यभेदः'
इत्यनुव्याख्यानोक्तविषयस्य श्रुत्याऽपि साधनम् ॥

१०४ **सु०**— यदुक्तं 'शक्तोऽपि ही'ति यच्च 'नित्यभेद' इति तदुभयं श्रुत्याऽपि साधयति **शक्तोऽपीति** ।

अनु०— 'शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा ।
स्वभिन्नं कारणाभिन्न(न्नं)भिन्नं विश्वं करोत्यजः ।'
इति श्रुतेरवसित उक्तोऽर्थोऽयमशेषतः ॥

अकर्तुं शक्तोऽपि करोति । अन्यथा विना कारणैस्तद्व्यत्यासेन च **कर्तुं शक्तोऽपि** नियतैः कारणैः **करोति** इच्छयेति योज्यम् । **स्वस्मान्निमित्तकारणात् भिन्नम्** । उपादानकारणेन **अभिन्नं भिन्नं च** । संसारिणो हि विष्टिगृहीता इवेश्वरप्रेरिता अनिष्टमपि धारकप्रयत्नेनाकृत्वा न स्थातुमीशते, न च भगवांस्तथा; इति 'अत्यकर्तुं शक्तोऽपी'-त्युक्तम् । **अशेषतः** प्रागिदानीं चोक्तो न तु सन्निहित एवेत्यर्थः ॥

परि०— व्यवहितानामन्वयं दर्शयति **अकर्तुं शक्तोऽपि करोतीति** । **अन्यथेति** अनुवादः । **विना कारणैरिति तद्व्यत्यासेन कारणव्यत्यासेन चेति** व्याख्या । शक्तोऽपि हीति प्रागुक्तार्थे संवादित्वलाभाय शेषोक्त्या योजनामाह **नियतैः कारणैः करोतीच्छयेति योज्यमिति** । अकर्तुं श(क्तेः)क्तिः को महिमेत्यत आह **संसारिणो हीति** । **विष्टिगृहीता इति** । वेतनमदत्त्वैव बलाद्राजभटैः कर्म कर्तुं गृहीता इत्यर्थः । **धारक(ण)प्रयत्नेनेति** । अकरणानुकूलदार्ढ्यसम्पादक-प्रयत्नेन अकृत्वेत्यर्थः । धारकेति पाठे स्वस्य स्तब्धतापादकप्रयत्नेनाकृत्वेत्यर्थः । अशेषत इत्यनु-वादः, प्रागिदानीं चेति व्याख्या । शक्तोऽपीति प्रागुक्तेऽर्थे नित्यभेद इतीदानीमुक्तेऽर्थे इत्यर्थः । नान्यदन्यत्वमापन्नं इति प्रागुक्तेऽर्थे इति वा । असदित्याद्यनेकाधिकरण इति वार्थः ।

यादु०— ईश्वरप्रेरिता इत्यस्य विवरणं **धारकप्रयत्नेनेति** ।

वं०प०— **अनिष्टमपि** अकृत्वेत्यर्थः ।

कं०रा०— इति श्रुतेरवसित उक्तार्थोऽयमित्यत्रोक्तार्थपदेन 'नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयमि'ति सन्निहितत्वेनोक्तार्थ एव प्रतीयते तन्निरासार्थमशेषत इति पदमित्याशयेन व्याचष्टे **अशेषत इति** । तथा च शक्तोऽपि ह्यन्यथाकर्तुमित्यादिना प्रागुक्तः । नित्यभेदो निमित्तेनेत्यादिनानुपदसूक्तस्याप्यर्थ इति श्रुतेरवसित इति मूलस्यार्थ इति भावः ।

श्रीनिधि०— अकर्तुं शक्तत्वं कथमैश्वर्यमित्यत आह **संसारिणो हीत्यादिना** ।

शे०वा०— शक्तोऽपीत्यादिभाष्यकारीयश्रुत्युपन्यासस्यानर्थक्यमाशङ्क्योक्तार्थसमर्थनार्थत्वान्न तदित्यभिप्रेत्योक्तार्थप्रदर्शनपूर्वकं तत्समर्थनपरतयोत्तरभाष्यं योजयति **यदुक्तमित्यादिना** । 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदा' इत्यादिनोक्तस्य सर्वस्याप्यर्थस्य प्रमाणारूढतासिद्ध्यर्थं तदुपयोगितया श्रुतिं योजयति **अकर्तुमित्यादिना** । नन्वन्यथा विना कारणैस्तद्व्यत्यासेन च कर्तुं शक्तोऽपि भगवान्नियतैः कारणैरेव करोतीत्येतावतैवोक्तस्याशेषार्थस्य प्रामाणिकत्वसिद्ध्योक्तसर्वाक्षेपसमाधानात् 'अकर्तुं शक्तोऽपि करोति' इत्यंशवैयर्थ्यमित्यतस्तत्तात्पर्यकथनपूर्वकं प्रयोजनमाह **संसारिणो हीति** । **धारकप्रयत्नेनेति** । स्वप्रयत्नेनेत्यर्थः । भाष्येऽशेषत इत्यस्य वैयर्थ्यमाशङ्क्य तत्प्रयोजनप्रदर्शनपूर्वकं तत्तात्पर्यमाह **अशेषत इत्यादिना** ।

विठ्ठल०— एवं व्यवहितपदानामन्वयं दर्शयित्वा प्रागुक्तादर्थसङ्गत्यादि लाभाय दोषोक्त्या योजयति **नियतैः कारणैः करोतीच्छयेति योज्यमिति** । अकर्तुं शक्तिः कथं महिमेत्यत आह **संसारिणो हीति** । ईश्वरप्रेरिता इत्यस्यैव विवरणं **धारकप्रयत्नेनेति** ।

॥ इति एतत्सूत्रव्याख्याने अभ्यधिकाशङ्कानिरासकतया 'शक्तोऽपि', 'नित्यभेदः' इत्यनुव्याख्यानोक्तविषयस्य श्रुत्याऽपि साधनम् ॥

॥ इति 'युक्तेः शब्दान्तराच्च' इतिसूत्रस्य व्याख्यानम् ॥

॥ इति ब्रह्मणो जगज्जन्मादिकारणत्वे प्राप्तस्य बाहुल्यलक्षणबलवद्युक्तिविरोधस्य परिहारः ॥

॥ इति आरम्भणाधिकरणम् ॥

॥ २-१-६ ॥

* * *

॥ अथ इतरव्यपदेशाधिकरणम् ॥

॥ २-१-७ ॥

ब्र०सू०— ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥

॥ अथ एतदधिकरणीयभाष्योक्तार्थे अभ्यधिकाशङ्काप्रदर्शनम् ॥

१०५ सु०— 'अस्मिन्नधिकरणे जीवकर्तृत्वपक्षः श्रुतिप्राप्तो विस्तरान्निराक्रियत' इति भाष्यम् । अत्र वक्तव्यम् "किमत्र जीवस्य सर्वथा कर्तृत्वं निराक्रियते, उतेश्वराधीनं तदङ्गीकृत्य स्वातन्त्र्यमात्रम् ।

नाद्यः । तथा सति **कर्ता शास्त्रार्थवत्त्वात्** इत्यादिवक्ष्यमाणविरोधापत्तेः । स्वतःकर्तृत्वानुपपत्तिरित्यादिविशेषणवैयर्थ्यप्रसङ्गाच्च ।

न द्वितीयः । **हिताकरणादिदोषप्रसक्तिः** इत्यादिसूत्राणां स्वातन्त्र्यनिराकरणपरत्वेन शक्ययोजनत्वेऽपि **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा** इत्यस्य सूत्रस्य अशक्यव्याख्यानत्वात् ।

इदं हि सूत्रं सर्वथा कर्तृत्वं निराकुर्वदुपलभ्यते ॥ तथा हि । कर्तृत्वं कृत्स्नैकदेशाभ्यां व्याप्तम् । तत्र कृत्स्नप्रसक्तावनुभवविरोधः । एकदेशाङ्गीकारे च 'अथ यः स जीवः स नित्यो निरवयवः' इत्यनंशत्वश्रुतिव्याकोपः स्यात् । न हि सामर्थ्यापरपर्यायं प्रयत्नादिरूपं कर्तृत्वमस्माकं जीवाद्भिन्नम्, येन तस्य विचित्रत्वेऽपि जीवस्य निरंशत्वं न व्याहन्येत । ततो व्यापकनिवृत्त्या व्याप्यं कर्तृत्वमपि निवर्तत इति खल्वस्य(त्र) तात्पर्यं प्रतीयते, प्रसङ्गस्य विपर्यये पर्यवसानावश्यम्भावात् ॥ अथ जीवकर्तृत्वस्येश्वराधीनतानङ्गीकार एवैतौ प्रसङ्गावुक्तौ न कर्तृत्वमात्रे, तथा चेश्वराधीनत्वमेव विपर्ययपर्यवसानलभ्यं भविष्यतीति चेन्न । स्यादप्येवं यदि जीवकर्तृत्वस्येश्वराधीनत्वाङ्गीकारेणेमौ प्रसङ्गौ शक्यसमाधानौ स्याताम् । न चैवम् । पराधीनेनापि खल्वनेन कृत्स्नेन वा कर्तव्यमेकदेशेन वा, तृतीयप्रकाराभावात्, भावे वा तेनैवापराधीनत्वेऽपि कर्तृत्वोपपत्तेः । अतो

विपर्ययापर्यवसानान्नैवं व्याख्यानं युक्तमिति कर्तृत्वाभाव एव तात्पर्यम् । तथा च वक्ष्यमाणविरोधः ॥ अथ वस्तुतो नास्त्येव जीवस्य कर्तृत्वम्, आभिमानिकं तु तदिति अविरोधः । मैवम् । विहारोपदेशात् इत्यादिना वास्तवस्यैव तस्य साधयिष्यमाणत्वात् ॥ अतो दुर्घटमेतदधिकरणम्'' इति ।

परि०— 'स्वयं कृतापि तद्व्याख्ये'त्याद्युक्तेर्भाष्यविवरणपरमेतदनुभाष्यमिति व्याकरिष्यन् भाष्यवाक्यं पठित्वा तद्विवरणबीजानुपपत्तिं दर्शयति **अस्मिन्नित्यादिना** । **इत्यादिविशेषणेति** । भाष्योक्तस्वत इति विशेषणेत्यर्थः । आदिपदेन जीवे दृश्यमानोऽपि कार्योपसंहारोऽस्वातन्त्र्यात्परकृत एवेति भाष्यवाक्योक्तविशेषणग्रहः । **शक्ययोजनत्वेऽपीति** । भाष्य(उक्त)दिशेति भावः । **कृत्स्नप्रसक्ताविति** । तृणोद्धरणादौ कार्य इति योज्यम् । प्रयत्नादिरूपमित्यत्रादिपदेन जीवे दृश्यमानेच्छाबुद्ध्योर्ग्रहः । **व्यापकेति** । कृत्स्नप्रसत्त्येकदेशरूपव्यापकेत्यर्थः । **अत्रेति** । कृत्स्नेति सूत्रे । नन्वत्र सूत्रे आपाद्यमात्रोक्तेः कथं कर्तृत्वनिवृत्तिरित्यन्ततात्पर्योक्तिरित्यत आह **प्रसङ्गस्येति** । **विपर्ययापर्यवसानादिति** । विपर्यये पर्यवसन्नस्य पराधीनकर्तृत्वस्यापि कृत्स्नप्रसत्त्यादियुक्तिबाधि-(पराह)तत्वादिति भावः । **नैवमिति** । अथ जीवेत्यादिनोक्तव्याख्यानमित्यर्थः । **वक्ष्यमाणेति** । 'कर्ता शास्त्रार्थवत्त्वादि'ति वक्ष्यमाणेत्यर्थः । **वास्तवस्यैवेति** । विहारकर्तृत्वस्य मुक्तिगतस्य तत्रोक्तेरिति भावः ।

यादु०— **स्वतःकर्तृत्वेति** । इदम् 'अश्मादिवच्च तदनुपपत्तिरि'ति सूत्रभाष्यम् । तत्र स्वत इति विशेषणवैयर्थ्यप्रसङ्गादित्यर्थः । आदिपदेनाश्मादिवदस्वतन्त्रत्वमित्युक्तास्वातन्त्र्यपरिग्रहः । अन्यथाऽकर्तृत्वमिति वक्तव्यत्वात् । **सामर्थ्यापरपर्यायमिति** । अत्रागमविसंवादपरिहाराय सामर्थ्यापरपर्यायमित्युक्तम् । जीवकर्तृत्वनिराकरणस्यैतदधिकरणप्रतिपाद्यतया भाष्ये उक्तत्वात् । तद्विसंवादपरिहाराय कर्तृत्वमित्युक्तम् । अनुव्याख्यानानुसारेणाप्रयत्नादिरूपमित्युक्तम् । प्रयत्नपूर्वककार्योत्पादनस्यैव कर्तृत्वरूपत्वात् यद्यपि 'इच्छापूर्वं क्रियादानं कर्तृत्वमि'ति श्रुतिरस्ति तथाऽप्यनिष्टार्थेऽपि जीवस्य कर्तृत्वदर्शनात् । तत्सङ्ग्रहाय प्रयत्नादिरूपमित्युक्तम् । **वक्ष्यमाणेति** । कर्ता शास्त्रार्थवत्त्वादित्यत्र वक्ष्यमाणेत्यर्थः । **वास्तवस्यैवेति** । मुक्तेषूपदिष्टस्यावास्तवत्वानुपपत्तेरिति भावः ।

वं०प०— **तत्** कर्तृत्वम् । **विशेषणेति** । स्वत इत्युक्तस्वातन्त्र्यरूपेत्यर्थः । **अनुभवविरोध इति** । तृणोद्धारात् कृत्स्नसामर्थ्यप्रयोगस्यानुभवविरुद्धत्वादिति भावः । **तस्य** उक्तरूपकर्तृत्वस्य । **परेति** । पराधीनकर्तृत्वोपेतेनाप्यनेन जीवेनेत्यर्थः । **तेनैव** कर्तृत्वघटकेन तृतीयप्रकारेणैव । **वक्ष्यमाणेति** । 'कर्ता

शास्त्रार्थवत्त्वादि'ति **वक्ष्यमाणे**त्यर्थः । **आभिमानिकम्** आविद्यकम् । **अवास्तवं** मिथ्याभूतमित्यर्थः । **वास्तवस्येति** । न हि निवृत्तावविद्यायां मुक्तौ विद्यमानमवास्तवं भवतीति भावः ।

कं०रा०— तथा सतीति । जीवस्य सर्वथा कर्तृत्वनिराकरणे 'कर्ता शास्त्रार्थवत्त्वात्', 'विहारोपदेशादि'त्यादिसूत्रेषु जीवस्यास्वातन्त्र्येण कर्तृत्वस्य वक्ष्यमाणतया तद्विरोधापत्तेरित्यर्थः । **स्वत इति** । जीवस्य सर्वथा कर्तृत्वनिराकरणे चेतनत्वेऽप्यस्मदादिवदस्वातन्त्र्यात्स्वतःकर्तृत्वानुपपत्तिर्जीवस्येति भाष्यवाक्ये स्वत इति विशेषणस्य वैयर्थ्यप्रसङ्गाच्चेत्यर्थः । **हिताकरणेति** । हिताकरणादिदोषप्रसक्तिः पटादिवच्च तदनुपपत्तिः उपसंहारदर्शनान्नेति चेत् क्षीरवद्धीत्येषां सूत्राणां जीवस्वातन्त्र्यनिरासपरत्वेन व्याख्यातुमशक्यत्वादित्यर्थः । **कर्तृत्वाभाव इति** । कृत्स्नप्रसक्तिरिति सूत्रस्य जीवस्वातन्त्र्यनिरासपरत्वेन व्याख्यातुमशक्यत्वादस्याधिकरणस्य सर्वथा जीवकर्तृत्वनिरास एव तात्पर्यं वाच्यं तथा च कर्ता शास्त्रार्थवत्वादिति वक्ष्यमाणविरोध इत्यर्थः । ननु जीवस्य वस्तुतः कर्तृत्वाभावेऽप्याभिमानिककर्तृत्वपरं कर्ता शास्त्रार्थवत्वादित्यधिकरणं तथा चात्र जीवस्य सर्वथा कर्तृत्वनिरासेन तेन विरोध इति शङ्कते **अथेति** । विहारोपदेशादिति गुणसूत्रे स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वेत्यादिना मुक्तौ विहारकर्तृत्वोपदेशेन वास्तवस्यैव कर्तृत्वस्य साधयिष्यमाणत्वान्न तदधिकरणमारोपितकर्तृत्वाभिप्रायमतोऽत्र जीवस्य सर्वथा कर्तृत्वनिरासे तद्विरोधो दुष्परिहर इत्याशयेन समाधत्ते **मैवमिति** ।

श्रीनिधि०— ननु नानंशत्वश्रुतिविरोधः । तस्य जीवविषयत्वात् सामर्थ्यरूपकर्तृत्वस्य सांशत्वेन एकदेशतः प्रवृत्तिसम्भवेन नानुभावविरोधोऽपीत्यत आह **न हि सामर्थ्यापरपर्यायमिति** । **एतौ प्रसङ्गाविति** । यदि कार्त्स्न्येन करोतीत्यभ्युपगमः तदानुभवविरोधः स्यात् । यदि चैकदेशेन करोतीत्यभ्युपगमः तदा अनंशत्वश्रुतिव्याकोपः स्यादिति प्रसङ्गौ । **वक्ष्यमाणविरोध इति** । कर्ता शास्त्रार्थवत्त्वादिति वक्ष्यमाणविरोध इत्यर्थः । **वास्तवस्यैव तस्यैवेति** । **तस्यैव** जीवस्यैव । **वास्तवस्यैव** कर्तृत्वस्य कर्तृत्वं जीवस्यैव नान्तःकरणस्य । **तच्च वास्तवमिति** । साधयिष्यत इत्यर्थः । स्त्रीभिर्वा यानैर्वेति मुक्तौ तत्प्रतीतेरिति भावः ।

शे०वा०— ननु समयप्राप्तस्य जीवकर्तृत्वस्य समयपादे 'अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात्' इत्यत्र निराकरिष्यमाणत्वात् । श्रुतिसंवादियुक्तिप्राप्तस्य च 'एतेन शिष्टा' इत्यत्र निषिद्धत्वादनर्थकमेतदिति गतार्थताशङ्कापरिहारेणाधिकरणारम्भस्याधिकरणान्तर इवेहाप्यवश्यं समर्थनीयत्वात् तदसमर्थनं दोषायेत्यतो भाष्य एव तस्य समर्थितत्वान्न तदसमर्थनमात्रं दोषायेत्यभिप्रेत्य गतार्थताशङ्कानिरासकं भाष्यमेवोदाहरति **अस्मिन्नधिकरण इति** । ननु 'अनंशस्यापी'त्याद्युत्तरभाष्यमनर्थकम् । न चागमोदाहरणार्थं तदिति वाच्यम् । तस्याप्यानर्थक्यात् । न चेश्वराधीनत्वाङ्गीकारे कर्तृत्वस्य प्रसङ्गनिवृत्तिप्रकारोपदर्शनार्थत्वान्न तदिति वाच्यम् । कर्तृत्वस्येश्वराधीनत्वाङ्गीकारे प्रसङ्गनिवृत्तिप्रकारोपदर्शनस्याप्यनर्थकत्वात् । न च जीवकर्तृत्वस्येश्वरानधीनत्वे 'कृत्स्नप्रसक्तिरि'ति सूत्रोक्तप्रसङ्गस्य श्लिष्टत्वसिद्धयर्थत्वान्न तदुपदर्शनस्यानर्थक्यमिति वाच्यम् । जीवस्य कर्तृत्वमात्रेऽपि

सूत्रोक्तस्य **प्रसङ्गस्य श्लिष्टत्वेन** तत्परित्यागेनेश्वराधीनत्वे कर्तृत्वस्य सूत्रोक्तप्रसङ्गव्युत्पादने निमित्ताभावा-दित्याशङ्कयैतदधिकरणदुर्घटत्वशङ्काप्रनिरासार्थत्वात् तत्पर्यन्तधावनोपपत्तेरित्यभिप्रेत्य, स्यादेतदेवं यद्यधिकरणस्य दुर्घटत्वमेव भवेत् । तदेव कथमित्यतस्तद्दर्शयितुं तावद्विकल्पयति **अत्र वक्तव्यमिति । तथा सतीति ।** आदिपदेन 'विहारोपदेशादि'ति सूत्रपरिग्रहः । तत्र कर्तृत्वस्य तत्सत्यत्वस्य च समर्थयिष्यमाणत्वादिति भावः । **विशेषणवैयर्थ्येति** । 'अश्मादिवच्च तदनुपपत्तिरि'त्येतत्सूत्रभाष्य इति शेषः । तत्रादिपदेनाश्मादिवदस्वतन्त्र-त्वादित्युक्तास्वातन्त्र्यपरिग्रहः । कर्तृत्वमात्रनिरासकत्वेऽकर्तृत्वादित्यवक्ष्यदिति भावः । अस्तु तर्हि स्वातन्त्र्यं निराक्रियते इति द्वितीयः, तत्रोक्तदोषाप्रसरादित्यत आह **नेति । शक्ययोजनत्वेऽपीति** । यदि जीवः स्वतन्त्रकर्तेत्युच्यते, तर्हि हिताकरणमहितकरणं च न स्यात् । न हि स्वतन्त्रः प्रेक्षावान् स्वहितं न करोति स्वाहितं च करोतीति सम्भवति । तथा च सकलस्यापि जनस्य (निज)निर्दुःखपूर्णानन्दत्वप्रसक्तिरित्यतो न स्वतन्त्रकर्तेत्यादिरूपेण शक्ययोजनत्वेऽपीत्यर्थः । **अशक्यव्याख्यानत्वादिति** । स्वातन्त्र्यनिराकरणपरत्वेनेति शेषः । तत्कथमित्यतः सर्वथाकर्तृत्वनिरासकत्वप्रतीतेरित्याह **इदं हीति** ।

नन्वत्र सूत्रे सर्वथा न कर्तेत्यश्रवणात् कथमस्मात् तथा प्रतीतिरित्यतः साक्षात् तथाऽप्रतिभासेऽप्यर्थतः तथा प्रतिभासान्नानुपपत्तिरित्यभिप्रेत्य तथा प्रतिभासमुपदर्शयति **तथा हीति** । कर्तृत्वमित्यादेरयमर्थः । जीवः किं स्वकार्येषु सर्वसामर्थ्येन प्रवर्तते उतांशेनेति । नाद्यः । तथा सत्येकेनाङ्गुलिमात्रेण तृणादानादावपि पूर्णशक्त्या प्रवृत्त्यापत्तेरित्यभिप्रेत्य तत्रेष्टापत्तिं परिहरति **तत्रेति** । नान्त्यः अंशाभावादित्यभिप्रेत्य सांशत्वे बाधकमाह **एकदेशेति** । ननु च जीवस्य निरंशत्वेऽपि सामर्थ्यस्य सांशत्वात् सामर्थ्यांशेन प्रवृत्तिर्नानुपपन्ना । न च निरंशजीवाभिन्नसामर्थ्यस्य कथं सांशत्वमपीति वाच्यम् । तस्य जीवभिन्नत्वेन तत्सम्भवादित्यतो येषां पक्षे सामर्थ्यं जीवाद्भिन्नं तेषां पक्षे जीवस्य निरंशत्वेऽपि सामर्थ्यस्य सांशत्वोपपत्त्यैकदेशेन प्रवृत्तावुक्तश्रुतिविरोधा-भावेऽप्यस्माकं मते तस्य निरंशजीवाभिन्नत्वेन सांशत्वानुपपत्त्योक्तदोषतादवस्थ्यमेवेत्याह **न हीति । व्यापक-व्यावृत्त्येति** । कृत्स्नैकदेशरूपव्यापकव्यावृत्त्येत्यर्थः । **अवश्यम्भावादिति** । विपर्ययपर्यवसानहीनस्य प्रसङ्गा-भासत्वादिति भावः ।

उक्ताविति । स्वतन्त्रकर्तृत्वं कृत्स्नैकदेशाभ्यां व्याप्तम् । तत्र कृत्स्नप्रसक्तावनुभवविरोधः । एक-देशाङ्गीकारे चानंशत्वश्रुतिविरोध इति जीवकर्तृत्वस्येश्वराधीनत्वानङ्गीकारे प्रसङ्गावुक्तावित्यर्थः । **न कर्तृत्वमात्र इति** । येनोक्तरीत्या विपर्ययपर्यवसाने कर्तृत्वनिवृत्त्या सूत्रस्य सर्वथा कर्तृत्वमात्रनिरासकत्वं प्रसज्येतेति भावः । ईश्वराधीनत्वानङ्गीकारे प्रसङ्गोक्तावपि किं सिद्ध्यतीत्यत आह **तथा चेति** । तथा च स्वातन्त्र्यं निराक्रियत इति द्वितीये नैतत्सूत्रानुपपत्तिरिति भावः । अस्तूक्तरीत्या कृत्स्नप्रसक्तिसूत्रस्य सर्वथा कर्तृत्वाभाव एव तात्पर्यं किं तावताऽपीत्यतः तथा सति 'कर्ता शास्त्रार्थवत्त्वादि'ति वक्ष्यमाणविरोधः' स्यादित्याह **तथा चेति । अथेति** । युक्तिविरुद्धस्याविचारितरमणीयतया वास्तवत्वायोगादिति भावः । तर्हि कर्ता शास्त्रार्थ-वत्त्वादिति वक्ष्यमाणविरोधः स्यादित्यत आविद्यककर्तृत्वपरत्वात् तस्य न विरोधकत्वमित्याह **आभिमानिकं**

त्विति । अत्र तदित्यतःपरं कर्ता शास्त्रार्थवत्त्वादित्यत्रोच्यत इति शेषः । **वास्तवस्यैवेति** । विगलिताखिलकल्पने कैवल्येऽप्युपदिष्टस्य विहारादिकर्तृत्वस्य काल्पनिकत्वायोगात् । अन्यथाऽऽत्मनोऽपि तत्प्रसङ्गादिति भावः । आदिपदेन 'उपादानात्' इति सूत्रपरिग्रहः ।

वा०र०— अस्मिन्नधिकरणे **जीवेति** मूलं उत्तरग्रन्थोपक्षेपाय प्रवृत्तमिति न तस्य वैयर्थ्यमित्येव, अपि तु गतार्थरूपताशङ्कानिरसनेन एतदधिकरणारम्भसमर्थनस्यानुव्याख्यानेऽभावप्रयुक्तन्यूनताशङ्कापरिहारायापि प्रवृत्तम् इत्यतः तद्वैय्यर्थ्याभावः इत्याशयेन गतार्थशङ्काप्रदर्शनपूर्वकं तन्निरासाभावप्रयुक्तन्यूनताशङ्कामुत्थाप्य तत्परिहाराय उत्तरमूलस्य पर्याप्तत्वाय तदभिप्रायं कथयन्नेव च तच्छङ्कानिरासकतयोत्तरमूलं तत्त्वप्रकाशिकां चन्द्रिकां च मनसि निधायावतारयति **ननु समवेत्यादिना** । शङ्कान्तरनिरासकेनाप्यनेन मूलेन जीवकर्तृत्वनिरासरूपे प्रमेये उपक्षिप्ते सति अस्योत्तरग्रन्थावकाशः इत्याशयेन पूर्वमूलसङ्गततया उत्तरमूलं योजयति **ननु अनंशस्यापीत्यादिना** । **न चेति** । कर्तृत्वस्येश्वरेति पूर्वेण सम्बन्धः । **प्रसङ्गेति** । ततश्च कर्तृत्वस्य ईश्वराधीनत्वानङ्गीकारे यौ प्रसङ्गौ कृत्स्नप्रसक्तिनिरवयवत्वशब्दकोपप्रसङ्गौ तयोः कर्तृत्वस्य ईश्वराधीनत्वानङ्गीकारे यो निवृत्तिप्रकारः इति योजना । तावत् ईश्वराधीनताङ्गीकारे प्रसङ्गनिवृत्ती इत्युत्तरमूलानुवादरूपत्वात् स्पष्टं प्रसङ्गनिरूपणाभानदोषाय इति ज्ञेयम् । एवं उत्तरत्रापि प्रसङ्गनिवृत्तिपदस्य अर्थो ज्ञेयः । **सूत्रोक्तेति** । अत्र कृत्स्नप्रसक्तिरित्यस्य प्रतीकग्रहणतया सम्पूर्णसूत्रपरत्वात् तत्सूत्रोक्तो यः प्रसङ्गः तस्येति जातावेकवचनम् । प्रसङ्गयोरिति यावत् । एवमुत्तरत्रापि । **तत्पर्यन्तेति** । ईश्वरानधीनत्वपर्यन्तेत्यर्थः । निराकुर्वन् उपलभ्यते इत्येतन्मूलानन्तरं तथाहि इत्यादिपर्यन्तं प्रतीयन्ते इत्यन्तं मूलम् । तत्र तात्पर्यस्य प्रतीयमानत्वात् सूत्रस्य निराकुर्वत् उपलभ्यमानतया विवक्षितत्वेन तात्पर्यं प्रतीयते इत्यस्य तात्पर्यप्रतीतेः इति हेत्वर्थकत्वं निराकुर्वत् उपलभ्यत इति प्रतिज्ञायां हेतुलाभात् तदनुक्तिशङ्कानवकाश इति बोध्यम् । खलु इत्यस्यैव हीशब्दवत् हेत्वर्थकत्वात् तात्पर्यप्रतीतेरित्यर्थलाभः इत्यप्याहुः । **कर्तृत्वमित्यादेरेवायमर्थः** इत्यस्य एकदेशेत्यत्रत्य इतिशब्देन सम्बन्धः । तत्रेति शब्दावृत्तेः अभिप्रेतत्वात् । इतिशब्दद्वययुक्तपाठस्तु स्पष्ट एव । आद्यस्य प्रतीकोपादानार्थत्वम् । द्वितीयस्य तु अयमर्थः इत्यनेन इति अयमर्थः इत्यर्थकथनसमाप्त्यर्थत्वमिति विवेकोऽपि तत्र स्पष्ट एवेति बोध्यम् । इदं चार्थकथनं तत्त्वप्रकाशिका एतन्मूलयोः एकार्थत्वकथनाय अन्यथा तत्रोक्ते केनाङ्गुलिमात्रेण इत्यादि दूषणस्यात्राभावेन न्यूनताशङ्का स्यात् ततोऽवश्यं वक्तव्यं अधिकं तत्त्वप्रकाशिकानुसारेणात्र ज्ञेयमित्याशयेन विकल्पविवरणपूर्वकं अधिकांशस्य स्वयमभिधानपूर्वकं इतरांशकथनपरतया मूलं योजितमिति द्रष्टव्यम् । उत अंशेनेति पाठः मूलकोशे सत्त्वात् तत्त्वप्रकाशिकायां अंशेन वा इत्युक्तत्वाच्च इति ज्ञेयम् । उत नेति पाठस्तु लेखकागतः । **तेषां पक्ष इति** । उक्तश्रुतिविरोधाभावेऽपीति सम्बन्धः । ....सारेणाह **विगलिताखिलेति** । कर्तृत्वस्य ईश्वराधीनत्वेति सम्बन्धः ।

स०व०— **तथा च वक्ष्यमाणेति** । 'कर्ता शास्त्रार्थवत्त्वात्' इत्यादिवक्ष्यमाणविरोध एवेत्यर्थः ।

विट्ठल०— उत्तरमूले कृत्स्नप्रसक्तिरिति सूत्रानुपपत्तिसमाधायकतया सङ्गमयन्नुपोद्घातमारचयति **अस्मिन्नधिकरण इति** । **स्वतःकर्तृत्वेति** । चेतनत्वेऽप्यस्मदादिवदस्वान्तत्र्यात्स्वतःकर्तृत्वानुपपत्तिर्जीवस्येति भाष्यवाक्ये स्वत इत्यादि विशेषणवैय्यर्थ्यप्रसङ्ग इत्यर्थः । आदिपदेन स्वातन्त्र्यपरिग्रहः । ननु सामर्थ्यैकदेशेन प्रवृत्त्यङ्गीकारेऽपि सामर्थ्यस्य जीवाद्भिन्नत्वान्न जीवस्यानंशत्वविरोध इत्यतः प्रयत्नादिरूपस्य तस्य जीवाभिन्नत्वमेव सिद्धान्त्यभिमतमिति भवत्येव विरोध इत्याह **न हीति** । प्रयत्नादिरूपमित्यत्र इच्छाप्रयत्नग्रहणम् । **व्यापकेति** । कृत्स्नैकदेशरूपव्यापकेत्यर्थः । सूत्रे आपाद्यमात्रोक्तेः कथं कर्तृत्वनिवृत्तिपर्यन्तं तात्पर्योक्तिरित्यत आह **प्रसङ्गस्येति** । **विपर्यये पर्यवसानादिति** । विपर्यये पर्यवसन्नस्य पराधीनकर्तृत्वस्य कृत्स्नप्रसक्त्यादियुक्तिबाधितत्वादिति भावः । **वक्ष्यमाणेति** । कर्ता शास्त्रार्थवत्त्वादिति वक्ष्यमाणविरोध इत्यर्थः । कर्तेत्यत्र काल्पनिककर्तृत्वाभिधानादविरोध इत्याशङ्क्य समाधत्ते **अथेति** ।

॥ इति एतदधिकरणीयभाष्योक्तार्थे अभ्यधिकाशङ्काप्रदर्शनम् ॥

* * *

॥ अथ तदभ्यधिकाशङ्कानिरसनम् ॥

॥ अथ तत्रादौ उपोद्घातप्रक्रियया विपर्ययपर्यवसानोपपत्तिः ॥

१०६ सु०— अतो द्वितीयपक्षमङ्गीकृत्य प्रसङ्गौ जीवकर्तृत्वस्येश्वराधीनतानङ्गीकारविषयौ व्याकरिष्यन्नादौ तावदीश्वराधीनताङ्गीकारे प्रसङ्गनिवृत्तिप्रकारमागमवाक्योदाहरणेन दर्शयति अनंशस्यापीति ।

अनु०— अनंशस्यापि जीवस्य किञ्चित्सामर्थ्ययोजनाम् ।
कार्येषु यः करोत्यद्धा नमस्तस्मै स्वयम्भुवे ।

किञ्चित्सामर्थ्ययोजनां कार्यानुरूपसामर्थ्यप्रयोगम् । **स्वयम्भुवे स्वतन्त्राय** । 'इति वचनादवसितोऽयमभिप्रेतः अर्थ' इत्यनुवर्तते ।

ततश्चैतदुक्तं भवति । यदि जीवः परमेश्वराधीनतया कर्ताङ्गीक्रियते । तदोपपद्यते एव तस्य कर्तृत्वम् । प्रसङ्गयोः समाधातुं शक्यत्वात् । अनंशत्वस्याभ्युपगमेन हि न निरवयवत्वशब्दकोपः, अनंशस्यापि परमेश्वराचिन्त्यशक्तिवशेन कार्यानुरूपसामर्थ्यप्रयोगसम्भवान्न कृत्स्नप्रसक्तिरिति । एतच्चानुपदं स्फुटीभविष्यति ।

परि०— प्रसङ्गनिवृत्तीति । कृत्स्नप्रसक्त्यादियुक्तिबाधरूपानिष्टापादाननिवृत्तीत्यर्थः । **प्रसङ्गयोरिति** । कृत्स्नप्रसक्तिर्निरवयवत्वश्रुतिव्याकोपरूपयोरित्यर्थः । **अनुपदमिति** । 'नैवमेव हि चेतनाः' इत्यादौ । तथा च 'व्यतिरेको गन्धवदि'त्यत्र वक्ष्यमाणसांशत्वविरोधो न शङ्क्य इति भावः ।

यादु०— ननु 'व्यतिरेको गन्धवदि'त्यत्र जीवानां सांशत्वस्य वक्ष्यमाणत्वात् कथमनंशस्यापीत्युक्तमित्यत आह **एतच्चानुपदमिति** । 'अंशिनो हि पटाद्या ये' इत्यत्रेत्यर्थः ।

वं०प०— द्वितीयपक्षमिति । ईश्वराधीनं कर्तृत्वमङ्गीकृत्य स्वातन्त्र्यमात्रं निराक्रियत इति द्वितीयपक्षमित्यर्थः । जीवेऽचिन्त्यशक्त्यभावमुपपादयितुमाह **न हीति** ।

श्रीनिधि०— एतच्चानुपदमिति । अत्रानुपदं विजातीयप्रमेयव्यवधानमन्तरेण । यद्वा एतत् अनंशस्यापि किञ्चित्सामर्थ्ययोजनं व्याहतिपरिहारेणाभिन्नांशाङ्गीकारेणांशिनो हीत्यादिना स्फुटं भविष्यतीति । एतत्प्रसङ्गस्य ईश्वरानधीनकर्तृत्वविषयत्वम् । **अनुपदं** 'यदि भागेन कार्येष्वित्यव्यवहितग्रन्थ' इत्यर्थः । **अनंशस्यापीत्यनेन** तु ईश्वराधीनकर्तृत्वाङ्गीकारे प्रसङ्गनिवृत्तिप्रकारकथनेनैतत्सूचितमिति भावः ।

शे०वा०— द्वितीयपक्षं स्वातन्त्र्यमात्रं निराक्रियत इति द्वितीयपक्षम् । **व्याकरिष्यन्निति** । 'यदि भागेन कार्येषु' इत्यादिनेति शेषः । **प्रसङ्गनिवृत्तिप्रकारमिति** । तेन विनेश्वरानधीनत्वे कर्तृत्वस्य प्रसङ्गयोर्विपर्ययापर्यवसानादिति भावः ।

ननु तृणादानादौ किञ्चित्सामर्थ्ययोजनसम्भवेऽपि महाशिलोद्धरणादौ सम्पूर्णसामर्थ्ययोजनस्याप्यवश्यम्भावाद्भाष्ये किञ्चिदिति कथमुक्तमित्यतः सर्वसङ्ग्राहकतया तत्तात्पर्यमाह **कार्यानुरूपेति** । नन्वनंशस्य जीवस्य किञ्चित्सामर्थ्ययोजनाकरणमस्मदादिष्वदृष्टं कथं तस्यापीत्यत उक्तस्य **मूले स्वयम्भुव** इत्यस्य प्रकृतोपयोगितयाऽर्थमाह **स्वतन्त्रायेति** । जीवकर्तृत्वस्येश्वराधीनत्वाङ्गीकारे प्रसङ्गनिवृत्तिप्रकारस्यागमसिद्धत्वलाभाय भाष्येऽपेक्षितमनुवृत्त्या पूरयति **इति वचनादित्यादि** । श्रुतिपदं वचनमात्रपरमित्यभिप्रेत्य वचनादित्युक्तम् । कथमेतावताऽपि कर्तृत्वस्येश्वराधीनत्वे प्रसङ्गद्वयनिवृत्तिसिद्धिरित्यतो विशेषणतात्पर्योक्त्या तत्सिद्धिं दर्शयति **ततश्चेति** । ननु 'व्यतिरेको गन्धवत्' इत्यत्र जीवानां सांशत्वस्य वक्ष्यमाणत्वादनंशस्यापीत्यनंशत्ववचनस्य तद्विरोध इत्यत आह **एतच्चेति** । **अनुपदमिति** । 'अंशिनो हि पटाद्या ये' इत्यत्रेत्यर्थः ।

वा०र०— प्रकृतोपयोगितयेति । अन्यथा हेतुकथनाभावप्रसङ्गेन तथा व्याख्येयत्वाभावात् इति भावः । न च स्वयम्भूत्वमपि जीवव्यावृत्तमिति वाच्यम् । उत्पादशून्यत्वादिरूपस्य तस्य जीवेऽपि स्वरूपापेक्षया

सम्भवेन तस्य तद्व्यावर्तकत्वायोगादिति तात्पर्यम् । **आगमसिद्धत्वलाभायेति** । आगमसिद्धत्वलाभायेत्यर्थः । **अनंशत्वाभ्युपगमेन हीति मूलम्** । अनंशत्वस्यैवाङ्गीकारात् न निरवयवत्वशब्दव्याकोपः इत्यर्थः ।

स०व्र०— अनुपदमिति । 'अंशिनो हि पटाद्या ये भिन्नैरेव परस्परम्' । इत्यादिनेति शेषः ।

विट्ठल०— प्रसङ्गाविति । कृत्स्नप्रसक्तिर्निरवयवत्वश्रुतिव्याकोपावित्यर्थः । कथमनेन कृत्स्न-प्रसक्त्यादियुक्तिबाधरूपानिष्टप्रसङ्गनिवृत्तिरित्यत आह **ततश्चेति** । व्यतिरेको गन्धवदित्यत्र जीवानां सांशत्वस्य वक्ष्यमाणत्वात् कथमनंशस्यापीत्युक्तमित्यत आह **एतच्चानुपदमेवेति** । अंशिनो हि पटाद्या ये इत्यत्रेत्यर्थः ।

॥ इति उपोद्धातप्रक्रियया विपर्ययपर्यवसानोपपत्तिः ॥

* * *

॥ अथ तत्रान्ते विवक्षितार्थे सूत्रयोजना ॥

१०७ **सु०— एवमुपोद्धातप्रक्रियया विपर्ययपर्यवसानोपपत्तिमुक्त्वेदानीं विवक्षितार्थे सूत्रं योजयति— यदीति ।**

अनु०— यदि भागेन कार्येषु जीवशक्तिं न योजयेत् ।
हरिस्तदा हि सर्वत्र कृत्स्नयत्नोंऽशिताऽपि वा ।

भागेन कार्यानुगुणांशेन । अत्र यदीश्वराधीनतया कर्ता न स्यादिति वक्तव्ये यदि भागेन इत्यादिवचनं प्रसङ्गस्फुटीकरणार्थम्, ईश्वराधीनत्वप्रकारप्रपञ्चनार्थं च । सर्वत्र तृणादानादावपि । कृत्स्नयत्नोऽशितापि वा प्रसज्येत । 'तथा चानुभवश्रुतिविरोधः । तस्मात् परमेश्वराधीन एव जीवः कर्ते'ति शेषः ।

परि०— पर्यवसानोपपत्तिं पर्यवसानस्योपपन्नत्वम् । **सर्वत्र** इत्यनुवादः, **तृणा-दानादावपि** इति व्याख्यानम् । **अंशितापि वेति** । एकदेशेन प्रवृत्तौ इति योज्यम् । **अनुभव-श्रुतीति** । अनुभवश्रुतिभ्यां यथाक्रमं विरोध इत्यर्थः ।

श्रीनिधि०— विपर्ययपर्यवसानोपपत्तिमुक्त्वेति । तस्मादीश्वराधीनकर्तृत्ववानिति विपर्यये पर्यव-सानस्य उपपत्तिं पराधीनत्वे तु एकदेशेन करणस्य प्रमाणे प्रतीतेरिति भावः । **प्रसङ्गस्फुटीकरणार्थमिति** ।

ईश्वराधीनकर्ता न स्यादित्युक्ते प्रसक्ता न स्फुटं प्रतीयते । उपपादनसापेक्षत्वात् । तथा हि यदीश्वराधीनतया कर्ता न स्यात्तर्हि कर्तैव न स्यात् । कृत्स्नैकदेशविकल्पप्रसरात् । भवति च कर्ता तस्मादीश्वराधीनतया कर्तेति विपर्यये पर्यवसाने अत्रापि कुतो न विकल्पप्रसङ्ग इत्याशङ्कायां ईश्वराधीनत्वेन एकदेशेन सामर्थ्य-योजनसम्भवादित्युपपादनीयम् । यथोक्ते तु नोपपादनापेक्षेति प्रसङ्गः स्फुटो भवति । तथा हि यदि भागेन हरिः जीवशक्तिं योजयेत् । तर्हि कर्ता न स्यात् । कृत्स्नैकदेशविकल्पप्रसङ्गात् । भवति च कर्ता तस्मात् हरिर्भागेन जीवशक्तिं योजयेत् इति विपर्यये पर्यवसाने शङ्कानुदयात् । **ईश्वराधीनत्वप्रकारप्रपञ्चनार्थं चेति** । भागेन कार्येषु जीवशक्तियोजनेन ईश्वरः कर्तृत्वं स्ववशं करोतीति प्रकारप्रपञ्चनार्थमित्यर्थः । यः येन कारयति सः तत्र स्वतन्त्र इति प्रसिद्धम् । **तस्मादिति** । यस्मात् हरिः भागेन कार्येषु जीवं योजयति तस्मादित्यर्थः ।

शे०वा०— ननु जीवकर्तृत्वस्येश्वरानधीनत्वे प्रसङ्गवादादावुक्त्वा तद्विपर्ययापर्यवसानशङ्कायां विपर्यय-पर्यवसानोपपत्तिं वक्तुमागमोदाहरणं कर्तव्यं तत्कथमादावेव तदुपपत्तिकथनमित्यत उक्तम् **उपोद्घातप्रक्रिययेति** । **विवक्षितार्थ** जीवकर्तृत्वस्येश्वराधीनत्वे । भागेन कार्यानुगुणांशेनेत्येतत्किञ्चित्सामर्थ्ययोजनं कार्यानुगुण-सामर्थ्यप्रयोगमितिवद्व्याख्येयम् । **प्रसङ्गस्फुटीकरणार्थमिति** । यदि जीवः स्वतः कर्ता स्यात् तदा कृत्स्नप्रयत्नः अंशिता वा प्रसज्यत इत्युक्ते स्वतःकर्तृत्वेऽपि कुतः कृत्स्नप्रयत्नांशिते इत्याशङ्कया प्रतिबन्धेन निमित्त-नैमित्तिकभावस्यास्फुटत्वात् प्रसङ्गस्यास्फुटत्वम् । यदि भागेन कार्येषु जीवशक्तिं न योजयेद्धरिः तदा हि सर्वत्र कृत्स्नप्रयत्नोंऽशिता वा स्यादित्युक्ते तु निमित्तनैमित्तिकभावस्य स्फुटत्वेन तच्छङ्काविरहात् प्रसङ्गस्य स्फुटत्वमिति तदर्थं यदि भागेनेत्याद्येवोक्तमित्यर्थः । **ईश्वराधीनत्वप्रकारेति** । यदि जीवः ईश्वराधीनतया कर्ता न स्यादित्युक्ते जीवकर्तृत्वस्येश्वराधीनत्वमात्रप्राप्तावपि कथं जीवकर्तृत्वस्येश्वराधीनत्वमिति कथमाकाङ्क्षापूरकतत्प्रकारविशेषानुक्तेः 'यदि भागेन कार्येषु जीवशक्तिं न योजयेत्' इत्युक्ते तु जीवनिष्ठकर्तृतायां कार्यानु(रूप)गुणांशरूपप्रकारस्य कथमाकाङ्क्षापूरकस्य समर्पणलाभाच्च तत्समर्पणार्थं यदि भागेनेत्याद्येवोक्तमित्यर्थः । महाभारशिलोद्धरणादौ कृत्स्नप्रयत्न इष्ट एवेत्यतः सर्वत्रेत्यस्य तात्पर्यमाह **तृणादानादावपीति** । अस्तु कृत्स्नप्रयत्नत्वादीत्यत आह **तथा चेति** । कृत्स्नप्रयत्नेऽनुभवविरोधः । अंशितायां श्रुतिविरोध इत्यर्थः । प्रसङ्गप्रदर्शनरूपे भाष्ये विपर्ययपर्यव-सानानुक्त्या प्रसक्तां न्यूनतां शेषोक्त्या परिहरति **तस्मादिति** ।

वा०र०— **विवक्षितार्थ इति** मूलम् । तत्रार्थे बाधककथनपरतयेत्यर्थः । **भागेन कार्यानुगुणां-शेनेत्येतदिति** । ननु तृणादानादौ किञ्चित् सामर्थ्यत्यादि प्रागुक्तरीत्या आशङ्कापरिहाराय सर्वसङ्ग्राहकतया तात्पर्यकथनमेतदिति व्याख्येयमित्यर्थः । **कृत्स्नप्रयत्नांशितेति** । कृत्स्नप्रयत्नांशितावित्यर्थः । **प्रतिबन्धेन** इत्यतः पूर्वनयेति शेषः । **निमित्तनैमित्तिकभावस्य स्फुटत्वेनेति** । स्वतःकर्तृत्वे तृणादानादिषु सम्पूर्णसामर्थ्यं योजयति । एकदेशेन वा प्रयोजयतीति पक्षद्वयप्राप्त्या कृत्स्नप्रसक्त्यादि प्राप्तमेवेति निमित्तनैमित्तिकभावस्य स्फुटत्वमित्यर्थः । तस्याविधिकत्वसाधकत्वेनेति पाठः स्वरसः । अविधात्मकत्वेति पाठोऽपि आविधकत्व-

मेवार्थः । उपादानोपादेययोः :अभेदाशयेन तथोक्तिरित्यवधेयम् । साधकत्वं तु प्रपञ्चानिर्वचनत्वाङ्गीकारेण प्रपञ्चान्तर्गतकर्तृत्वे युक्तिविरोधेऽनिर्वचनीयतां उपपादयति । युक्त्या घटमानत्वे विधात्ववत् कर्तृत्वस्य दुर्घटत्वोपपत्तेः इत्याशयः ।

विठ्ठल०— इति वक्तव्य इति । अन्यथा सामानाधिकरण्यालाभादिति भावः । **प्रसङ्ग-स्फुटीकरणार्थमिति** । यदि जीव ईश्वराधीनतया कर्ता न स्यात् तदा कृत्स्नप्रसक्त्यादिमान्न स्यादिति तर्कस्यानुभवविरुद्धकृत्स्नप्रयत्नवत्वं श्रुतिविरुद्धं सावयवत्वं च नाङ्गीकर्तुं शक्यते । अत ईश्वराधीनतयेति वायं कर्ता न च तथाङ्गीकारे उक्तदोषः । ईश्वराचिन्त्यशक्त्या निरंशस्यापि भोगेन प्रवृत्तिसम्भवादिति प्रसङ्गस्य विपर्यये पर्यवसानस्फुटीकरणार्थमित्यर्थः । **अनुभवश्रुतिविरोध इति** । कृत्स्नप्रयत्नाङ्गीकारे अनुभवविरोधः । अंशत्वे निरवयवत्वश्रुतिविरोध इत्यर्थः ।

* * *

॥ अथ तत्राप्यादौ अभ्यधिकाशङ्काद्वयनिरासः ॥

॥ अथ तत्र चादौ प्रथमाभ्यधिकाशङ्कानिरासः ॥

१०८ सु०— न चोपाधिकृतांशकल्पनया कर्तृत्वस्याविद्यकत्वेन (वो)चोपपत्तिः, अनंशस्यापीत्यादिप्रमाणसिद्धोपपन्नोपपादकपरित्यागेन अप्रामाणिकानुपपन्नस्वीकारस्य अयुक्तत्वात् ।

शे०वा०— ननु जीवस्य स्वतःकर्तृत्वेऽपि नोक्तदोषावकाशः तस्योपाधिकृतांशवत्त्वेन कृत्स्न-प्रसक्त्ययोगात् । स्वाभाविकांशाभावेन श्रुतिविरोधाभावात् । यद्वा जीवे कर्तृत्वमाविद्यकमस्तु । न च युक्ति-विरोधः । तस्याविद्यात्मकत्वसाधकत्वेन तदबाधकत्वादिति शङ्कते **न चेति** । **उपपादकपरित्यागेनेति** । भगवदधीनत्वरूपोपपादकपरित्यागेनेत्यर्थः । **अप्रामाणिकेति** । जीवस्योपाधिकृतांशवत्तायां जीवकर्तृत्वस्या-विद्यकतायां च प्रमाणाभावेन तयोरप्रामाणिकत्वादिति भावः । किं जीवः समस्तोऽप्युपहितस्तदंशो वा । यद्याद्यस्तर्ह्युपाधिकृतांशो न स्यात् । सर्वस्योपाधिग्रस्तत्वात् । नाप्यंश उपहित इति युक्तम् । उपाधिसम्ब-न्धार्थं स्वाभाविकद्वित्वापेक्षत्वात् । तथा च श्रुतिविरोधः । तस्याप्यौपाधिकत्वे त्वनवस्थेत्युपाधिकृतांशत्वस्य; आविद्यकत्वेऽपि कर्तृत्वस्य जीवस्वरूपत्वेन मोक्षेऽप्यनुवृत्तेस्तत्राविद्या(ऽ)प्रसक्त्या मुक्तत्वव्याघातेनाविद्यकत्वस्य च अनुपपन्नत्वादिति भावः ।

वा०र०— एवमप्रामाणिकेत्युक्तं अप्रामाणिकत्वं व्याख्यायानुपपन्नेत्युक्तानुपपन्नत्वे चोपपादयति **किं जीवेति** । **उपाधिकृतांशस्येति** । अनुपपन्नत्वादिति वक्ष्यमाणेनान्वयः । आविद्यकत्वस्य च सेति चशब्दयुक्तः

पाठः । अनुपपन्नत्वाच्चेति भाव इति पाठः । ततश्च निर्दुःखेति स्वहिताकरणाभावे स्वहितकरणस्यैव सर्वदा प्राप्त्या पूर्णानन्दः स्यात् । स्वहितचरणाभावेन नित्यदुःखकारणशून्यतया नित्यनिर्दुःखत्वं स्यात् इति विवेको बोध्यः ।

॥ इति प्रथमाम्बिकाशङ्कानिरासः ॥

* * *

॥ अथ तदन्ते द्वितीयाम्बिकाशङ्कानिरासः ॥

१०९ सु०— ननु जीवशक्त्यैवेदं घटताम् । मैवम् । तस्याघटितघटकाचिन्त्यशक्त्य-भावात् । भावे वा हिताकरणादिदोषप्रसक्तिः । न ह्यत्राधिकरणे पूर्वपक्षिणा महदादिसकल-कार्यकर्तृत्वं जीवस्याशङ्कितम्, किन्तु घटादिकर्तृत्वम् । तत्तावदनुभवसिद्धत्वात्कुलालादीनां न त्यक्तुं शक्यम् । तत्रेश्वरस्यापि कर्तृत्वाङ्गीकारे कल्पनागौरवं स्यात् । इत्यतो नेश्वरस्य सर्वकर्तृत्वमिति । तथा च कथमचिन्त्यशक्तिप्रसक्तिः ।

परि०— हिताकरणादिदोषप्रसक्तिरिति । हिताकरणाहितकरणयोर्दोषत्वमयुक्तत्वं प्रसज्येतेत्यर्थः । न ह्यचिन्त्यशक्तिमतो हिताकरणादिकं युज्यत इति भावः । ननु महदादिसकल-कार्यकर्तृत्वं जीवस्य पूर्वपक्षयतः पूर्ववादिनो मते कथं जीवस्याचिन्त्यशक्त्यभावः इत्यत आह **न हीति** । **किन्त्विति** । इत्याशङ्कितमित्यन्वयः । **तथा चेति** । सर्वकर्तृत्वे सतीत्यर्थः । न चैवं 'देवादिवदपि लोके' इति सूत्रविरोधः । तत्रेश्वराभावसूचनेन सर्वत्र जीवकर्तृत्वपूर्वपक्षस्य सूचनात् । टीकायां स्पष्टं सर्वत्र जीवकर्तृत्वेन पूर्वपक्षकरणेन तद्विरोधश्चेति वाच्यम् । न हीत्यादिग्रन्थस्य चन्द्रिकायां महदादिकार्यकर्तृत्वाङ्गीकारे अनुभवविरोध इत्येतत्पक्षे अपरितोषमात्रं, न तु सर्वथा महदादौ जीवकर्तृत्वपक्षो नाभिप्रेत इति तात्पर्योक्तेः ।

गु०दी०— महदादिसकलकार्यकर्तृत्वं जीवस्याशङ्कितम् इत्यत्र जीवस्याशङ्कितमिति वदतोऽयं भावः । यद्यपि 'जीवाद्भवन्ति भूतानी'ति पूर्वपक्ष्युदाहृतश्रुतौ जीवस्य पञ्चमहाभूतादिसकलकार्यकर्तृत्वश्रवणा-न्महदादिसर्वकर्तृत्वमेव पूर्वपक्षिणोऽभिमतमिति ज्ञायते । तथापि प्रत्यक्षसिद्धजीवबाहुल्यत्यागायोगेन सर्व-कर्तुरेकस्य जीवस्य परमतेऽप्यभावाज्जीवादिति जातावेकवचनमङ्गीकृत्य महत्तत्त्वं ब्रह्मणो जायते । अहङ्कारतत्त्वं रुद्राज्जायते । एवं तानि तानि कार्याणि तत्तज्जीवेभ्यो जायन्त इति नानाकार्याणां नानाजीवकर्तृत्वे नेश्वरस्य सर्वकर्तृत्वसिद्धिरिति । चेतनमात्रेऽप्ययं न्यायः इति वदतो जीवव्यतिरिक्तेश्वरतत्त्वे लक्ष्मीतत्त्वे चायं न्याय इत्यभिसन्धिः ।

यादु०— ननु जीवस्य महदादिकर्तृत्वादचिन्त्यशक्तित्वमित्यत आह **न ह्यत्राधिकरण इति**। न चैवं दृश्यमानकार्याणां स्वतन्त्रजीवकर्तृत्वे समस्तजगतोऽपि तथात्वं सिद्ध्यतीति तत्त्वप्रकाशिकाविरोधः। घटादि-कार्याणां जीवकर्तृकत्वदर्शनात् तद्दृष्टान्तेन महदादेरप्यदृष्टद्वारा जीवकर्तृकत्वमेव नेश्वरकर्तृकत्वं तस्याप्रामा-णिकत्वस्य कल्पने कल्पनागौरवप्रसङ्गादित्यभिप्रायेण तत्त्वप्रकाशिकायाः प्रवृत्तत्वेऽपि सुधाया अस्तु वेश्वरः प्रामाणिकस्तथाऽपि न तस्य सकलकारणत्वं किन्तु महदादिकार्यकर्तृत्वमेव न तु घटादिकर्तृत्वमपि उभयोरपि तदङ्गीकारे गौरवप्रसङ्गादित्यभ्युपगमवादेन प्र(कृत)वृत्तत्वेनाविरोधात्। तथा चात्र पूर्वपक्षिणेत्यस्य तुष्यत्विति न्यायेनेश्वरमभ्युपगम्य पूर्वपक्षं कुर्वतेत्यर्थो बोध्यः।

वं०पं०— **आशङ्कितमिति**। येन जीवस्याचिन्त्यशक्त्यङ्गीकारः स्यादिति भावः। **तथा चेति**। कुलालादेर्घटादिकर्तृत्वे काऽचिन्त्यशक्त्यपेक्षेति भावः।

शे०वा०— ननु तथाऽपि जीवस्य स्वतःकर्तृत्वे नोक्तदोषानुषङ्गः। अनंशत्वाभ्युपगमेन निरव-यवत्वशब्दव्याकोपाप्रसङ्गात्। अनंशस्यापि जीवस्य स्वाचिन्त्यशक्तिवशेन कार्यानुरूपसामर्थ्यप्रयोगसम्भवेन कृत्स्नप्रसक्तेरप्यभावात्। तथा च किं जीवकर्तृत्वस्य परमेश्वराधीनत्वाङ्गीकारेणेति भावेन शङ्कते **ननु चेति**। परमेश्वरस्याघटितघटकाचिन्त्यशक्तिसद्भावेन तया कार्यानुरूपसामर्थ्यप्रयोगसम्भवात् यद्यपि न कृत्स्नप्रसक्तिरापद्यते तथाऽपि जीवस्य तादृशाचिन्त्यशक्तेरभावेन तया कार्यानुरूपसामर्थ्यप्रयोगासम्भवात् कृत्स्नप्रसक्तिरवर्जनीयैवेति स्वतःकर्तृत्वानुपपत्तेर्जीवकर्तृत्वस्येश्वराधीनत्वमवश्यं वाच्यमित्याशयेन परिहरति **मैवमित्यादिना**। बाधक-सद्भावात् साधकाभावाच्चेति भावः। तत्कथमित्यतो बाधकसद्भावं तावदाह **भाव वेति**। **हितेति**। स्वतन्त्रस्य प्रेक्षावतः स्वहिताकरणस्वाहितकरणयोरनुपपत्तेरित्यर्थः। ततश्च निर्दुःखपूर्णानन्दप्रसङ्ग एवेत्युक्तं भवति। ननु महदादिसर्वप्रपञ्चकारणताया एवाचिन्त्यशक्तिसाधकत्वात् कथं साधकाभाव इत्यतो भवेदेवं कथञ्चिद्यदि महदादिसर्वप्रपञ्चकारणत्वं जीवस्य स्यात्। न चैतदस्ति। वास्तवस्य तस्यासिद्धेस्तथा पूर्वपक्षासम्मत्या नाभिमानिकमपीत्याह **न हीति**। यद्वा ननु यदि जीवस्याचिन्त्यशक्तिरेव नास्ति। कथं तर्ह्यत्र महदादि-सर्वप्रपञ्चकारणं जीव इति पूर्वपक्षोऽचिन्त्यशक्तिहीनस्य सर्वकारणत्वायोगात्। तथा चाचिन्त्यशक्तिरवर्जनीयेति नानुपपत्तिरित्यतो भवेत्पूर्वपक्षानुपपत्त्याऽचिन्त्यशक्तिसिद्धिर्यदि तादृशः पूर्वपक्ष एवात्राभिमतो भवेत्। न चैव-मस्तीत्याह **न हीति**।

नन्वेवं भाष्यटीकाविरोधः। तत्र दृश्यमानकार्याणां स्वतन्त्रजीवकर्तृत्वे सर्वस्यापि जगतस्तथात्वं सिद्ध्यतीत्यादिना महदादिसमस्तकर्तृत्वेन पूर्वपक्षकरणादिति चेत्। उच्यते। अत्राधिकरणे घटादेर्जीवैककर्तृकत्वे तद्दृष्टान्तेन महदाद्यपि जीवैककर्तृकमित्येकः पूर्वपक्षः। द्वितीयस्तु महदादीशकर्तृकं घटादिस्तु जीवैककर्तृक इति। अत्र च पक्षद्वये ईश्वरपरित्यागेन जीवस्यैव कर्तृत्वाङ्गीकारे कल्पनालाघवमिति न्यायविवरणं मूलम्। सर्वथेश्वरत्यागेन महदादिकार्ये जीवस्यैव कर्तृत्वाङ्गीकार इति योजनयाऽऽद्यपक्षप्रापकत्ववत् घटादिकार्ये

ईश्वरत्यागेन जीवस्यैव कर्तृत्वाङ्गीकार इति योजनया द्वितीयपक्षप्रापकत्वेन तस्य पक्षद्वयसाधारणत्वात् । तत्राद्यपक्षमाश्रित्य न्यायविवरणतात्पर्यं तथा हीत्यादिना टीकायामुक्तम् । तथा हि । ईश्वरोऽयोग्यश्चेत् कदापि प्रत्यक्षो न स्यात् । योग्यश्चेत् तदा सर्वत्र सत्त्वादिहेदानीमुपलभ्येत । न चाभिमानिदेवतासाम्यम् । ईश्वरस्य व्यक्तस्वभावत्वाङ्गीकारात् । तस्मादप्रामाणिक एवेश्वरः । तस्य घटादौ महदादौ च कर्तृत्वप्रामाणिकं कल्प्यम् । जीवस्तु प्रामाणिकः । तस्य घटादौ कर्तृत्वं च क्लृप्तं महदादावप्यदृष्टद्वारा कर्तृत्वं क्लृप्तम् । युक्तं च महदाद्युपादानापरोक्षज्ञप्तिरहितस्यापि जीवस्य महदादिकर्तृत्वम् । शब्दोपादानभूताकाशगोचरापरोक्षज्ञप्तिचिकीर्षा-कृतिशून्यस्यापि चैत्रस्य चैत्रः शब्दं करोतीत्यादौ तत्कर्तृकत्वदर्शनादिति । अत्र तु द्वितीयपक्षमाश्रित्य कुलालादीनां तावत् घटादिकर्तृत्वमनुभवसिद्धम् । तत्रेश्वरस्यापि कर्तृत्वे गौरवमिति तात्पर्यमुक्तम् । यद्यप्यत्र न ह्यत्राधिकरणे पूर्वपक्षिणा महदादिसकलकार्यकर्तृत्वं जीवस्य शङ्कितमित्यनेन ग्रन्थेनात्राधिकरणे द्वितीयपक्ष एवाभिप्रेतो न त्वाद्य इत्युक्तम् । तदप्याद्य एव जीवस्य महदादिकर्तृत्वपक्षेऽनुभवविरोधो न तु द्वितीये किन्तु तदानुकूल्यमेवेत्याद्येऽपरितोषमात्रमभिप्रेत्य । जीवस्य महदादिकर्तृत्वे तस्यैवाचिन्त्यशक्तिः स्यात् । तथा च यथा जीवस्य कर्तृत्वमीशतन्त्रमिति सिद्धान्ते ईशाचिन्त्यबलान्न कृत्स्नप्रसक्त्यादिदोषः । तथा तत्स्वतन्त्रमिति पूर्वपक्षेऽपि जीवाचिन्त्यबलादेव न कृत्स्नप्रसक्त्यादिदोष इत्याद्यपक्षे कृत्स्नप्रसक्त्यादेरप्राप्तेर्द्वितीय एवेष्ट इत्यभि-प्रेत्य वोक्तम् । अत एव टीकायामप्याद्येऽपरितोषाद्वेत्यादिनाऽधिकरणान्ते द्वितीय उक्तः । नन्वेतद्ग्रन्थानु-रोधेनाद्यस्य सर्वथाऽप्यत्रानभिमतत्वमिति कल्प्यम् । तथा सति देवादीत्युत्तरसूत्रे ईश्वरस्यादृश्यत्वोक्त्ययोगा-दित्यविरोध इति ।

केचित्तु श्रुतिप्राप्तमप्याद्यमनुभवविरोधेन दूषयित्वा तदविरुद्धं द्वितीयं परिशिष्य तत्र कृत्स्नप्रसक्त्या-द्युक्तिः । तथा च कृत्स्नेति सूत्रे आद्यो न दूष्यः किन्तु द्वितीय एवेति वाऽदृष्टद्वारा महदादिकर्तृत्वेऽपि नाचिन्त्यशक्तिरनुभवविरोधात् । तथा च कृत्स्नेति सूत्रे आद्योऽपि दूष्य इति वा न हीत्यादेरभिप्रायः । न त्वाद्यस्य सर्वथाऽप्यत्रानभिमतत्वम् । तथा सति 'अधिकं त्वि'ति सूत्रे ईशस्य कर्तृत्वमात्रे यः श्रमादिदोषः तदुद्धारायोगादित्यविरोध इत्याहुः । भावबोधे तु देवादिवदपि लोके इति सूत्रनिवर्तनीयतयाऽप्रामाणिकेश्वराङ्गीकारे कल्पनागौरवप्रसङ्गेनेश्वरस्यैवाभावान्महदादिकार्येऽपि जीव एव कर्तेति पूर्वपक्ष्यभिप्रायेण भाष्यटीकायाः प्रवृत्तिः । अत्र च अस्तु वा ईश्वरः प्रामाणिकस्तथाऽपि न तस्य जन्मादिसूत्रोक्तं सकलजगत्कर्तृत्वं किन्तु 'महदा-दिकर्तृत्वमेव न तु घटादिकर्तृत्वमपि । उभयोरपि तदङ्गीकारे गौरवप्रसङ्गादित्यभ्युपगमवादेन प्रवृत्तेर्न विरोधशङ्केत्युक्तम् । **तथा चेति** । प्रसञ्जकस्य महदादिकर्तृत्वस्य पूर्वपक्षिणं प्रत्यनभिमतत्वादिति भावः ।

वा०१०— पूर्वपक्षासम्मत्येति । पूर्वपक्षे सम्मत्यभावेन पूर्वपक्षिणोऽसम्मतत्वेनेति यावत् । **अचिन्त्यशक्तिसाधकत्वादिति** । अचिन्त्यशक्तिहीनस्य सर्वकारणत्वादिति वक्ष्यमाणरीत्या साधकत्वं द्रष्टव्यम् । मूले 'किन्तु घटादिकर्तृत्वं तावत् अनुभवसिद्धत्वात् कुलालादीनां न वक्तुं शक्यते' इत्येव पाठः ।

किन्तु एतत्परिहारपरिसमाप्तिः नेश्वरस्य सर्वकर्तृत्वं इत्यत्रत्येतिशब्देन । तथा च किं च ईश्वरस्य सर्वकर्तृत्वं इत्याशङ्कितमिति सम्बन्धः । किन्तु घटादिकर्तृत्वं तत् तावदिति तत्पदघटितभिन्नवाक्यताश्रयणेन पाठं महदादिकार्यकर्तृत्वं जीवस्य नाशङ्कितं किन्तु घटादिकर्तृत्वमाशङ्कितमिति सम्बन्धभ्रान्त्या सर्वकर्तृत्वमिती-त्यत्रत्य इतिशब्दसम्बन्धानुपपत्तिप्रतिसन्धानाभावेन च व्याख्यातृपरिकल्पितमूलं कोशे तत्पदरहित एकवाक्य-तयैव पाठसत्त्वाच्चेत् कुलालादीनां तावत् घटादीति टीकायां उक्तेश्चेति ज्ञेयम् । **जीवस्याशङ्कितमिति मूलम्** । अत्रापि जीवस्य महदादिसकलकार्यकर्तृत्वे ईश्वरस्य सर्वकर्तृत्वं नास्तीति आशङ्कितमिति अर्थात् निषेध्यनु-मतपक्षयोः एकपर्यवसानं इत्यवधेयम् । एतद्योजनायां महदादिकार्यकर्तृत्वाभाव इत्येव वक्तव्यत्वापत्त्या आश-ङ्कितपदस्यास्वारस्यमिति मत्वा तत्स्वारस्याय योजनान्तरमाह **यद्वा नन्विति** । पूर्वं महदादिकारणत्वसत्त्वात् अचिन्त्यशक्तिसिद्धिरिति महदादिकारणत्वं सिद्धं कृत्वा आशङ्कोत्थापिता इदानीं तु महदादिकारणत्वाशङ्का-नुपपत्त्या अचिन्त्यशक्तिसिद्धिरिति विवक्षितमिति स्पष्ट एव पूर्वोत्तरयोजनयोः विषयभेदः । **भाष्यटीकेति** । तत्त्वप्रकाशिकाविरोधः इत्यर्थः । **तत्रेति** । अयं च परिदृश्यमानकार्याणां स्वतन्त्रजीवकर्तृत्वे समस्तजगतोऽपि तथात्वं सिद्ध्यतीति तत्त्वप्रकाशिकावाक्यार्थानुवादः इत्यदोषः । अत्र घटादेः जीवैककर्तृकत्वे इत्यादि चन्द्रिकाग्रन्थं मनसि निधाय तत्र तत्र तद्विवरणं कुर्वन् तेन समाधत्ते । **उच्यते अत्राधिकरणे इत्यादिना** । न्यायविवरणवाक्यस्य पक्षद्वयप्रापकत्वाप्रतीतेः आह **सर्वथेश्वरत्यागेन इत्यादि** । तथा हि । ईश्वरस्तावत् अनुपलभ्यमानः इत्येतत् भाष्यटीकाविवरणरूप ईश्वर; अयोग्यश्चेत् कदापि इत्यादि चन्द्रिकां मनसि कृत्वा किञ्चित् पूरयन्नाह **तथाहि ईश्वर इत्यादिना** । नाहं अत्राधिकरणे इत्यादिमूलवाक्ये उपयोगानुसारेणाह **कुला-लादीनामित्यादि** । चन्द्रिकानुसारेणायं अर्थानुवादः न यथास्थितस्यानुवादः इत्यदोषः । तत्राद्ये जीवस्येत्यादि चन्द्रिकानुसारेणाह **तदप्याद्य इति** । अभिप्रेतेत्यस्य उक्तमिति वक्ष्यमाणेनान्वयः । चन्द्रिकोक्तपक्षस्योपलक्षण-त्वाश्रयणेन पक्षान्तरमाह **जीवस्य महदादीति** । प्राचीनटीकानुसारेण इदमुपलक्षणम् । एवं चन्द्रिकानुसारेण स्वपक्षमभिधाय प्राचीनटीकास्थपक्षान्तरमाह **केचित्त्विति** । अभिनवचन्द्रिकायां तु परिदृश्यमानकार्याणां स्वतन्त्रजीवकर्तृत्वे समस्तजगतोऽपि तथात्वं सिद्ध्यतीति तत्त्वप्रकाशिकावाक्येन जीवस्य महदादिकर्तृत्वप्रति-पादनलाभो नास्ति । येन तत्कारणतानिषेधकसुधया विरोधः स्यात् । अपि तु तथात्वं सिद्ध्यतीत्यस्य जीवकर्तृत्वं सिद्ध्यति । अनीश्वरकर्तृकत्वमिति यावत् । घटादिकार्याणां स्वतन्त्रकर्तृकत्वे सिद्धे महदादिकार्यकर्तुः परमेश्वरस्य कुलालादिनियामकत्वरूपपरमैश्वर्यवैधुर्यात् जीवत्वं स्यात्, नेश्वरत्वम् । ततश्च जीववत् महदादि-कार्यकर्तुः ईश्वरस्य जीवतुल्यत्वं स्यात् इत्यर्थः सुलभ एव । एतदर्थपरत्वे तु महदादिकर्तृतां जीवतुल्येश्वर-स्याङ्गीकृत्य घटादिमात्रकर्तृकत्वं जीवस्येत्येवं पूर्वपक्षप्रवृत्तिवर्णनलाभात् न सुधाविरोधप्रसक्तिरिति प्रतिपादितम् । परन्तु घटादिकर्तारं जीवमङ्गीकृत्य महदादिकर्तुरन्यस्य ईश्वरस्य तत्राङ्गीकारस्याप्रतीतेः । तस्य जीवत्वा-पादनपरतया योजना कथमित्यादि पूर्वोत्तरग्रन्थविचारणाय शोधनीयम् । अत्र पक्षेषु आहुरित्यादि स्वारस्यं लेख्यमस्ति ।

विठ्ठल०— ननु जीवस्यापि महदादिसकलकार्यकर्तृत्वादस्त्येवाचिन्त्यशक्तिरित्यत आह **न ह्यत्रेति** । **सर्वकर्तृत्वमिति** । शङ्कितशङ्किनमिति आवृत्तेन शङ्कितमितिपदेनान्वयः । ततश्च महदादिकर्तृत्वस्यैवाभावाज्जीवस्याचिन्त्यशक्तिप्रसक्तिरेव नास्तीत्याह **तथा चेति** ।

॥ इति द्वितीयाप्यधिकाशङ्कानिरासः ॥

॥ इति तत्राप्यधिकाशङ्काद्वयनिरासः ॥

* * *

॥ अथ च विवक्षितार्थे सूत्रयोजनायां 'निरवयवत्वशब्दकोपो वा' इत्यापादनस्योपपादनम् ॥

॥ अथ तत्रादौ गूढाभिसन्धेराशङ्कया अविदितामिप्राय इव परिहारः ॥

११० **सु०**— ननु च '**व्यतिरेको गन्धवदिति** जीवानामनेकरूपतां सूत्रकार एव वक्ष्यति, **उत्क्रान्तिगत्यागतीनामिति** अणुत्वं च । न चाणोर्युगपदनेकरूपत्वं विना सांशतयोपपद्यत इति सांशताऽपि तत एव सिद्धा । तत्कथमत्र **निरवयवत्वशब्दकोपो वा** इत्यवादीत्' इति गूढाभिसन्धेराशङ्कामविदिताभिप्राय इव परिहरति **अंशिनो हीत्यादिना सार्धेन श्लोकद्वयेन** ।

अनु०— अंशिनो हि पटाद्या ये भिन्नैरेव परस्परम् ।
अंशैरंशिन उच्यन्ते नैवमेव हि चेतनाः ।
अतोऽनंशिन इत्येव श्रुतिरेतेषु वर्तते ।
अप्यनेकस्वरूपेषु विशेषादेव केवलम् ।
बहुस्वरूपताख्या तु तेष्वस्त्येव हि सांशता ।

तत्र **बहुस्वरूपताख्या** इत्यनेन वक्ष्यमाणमभ्युपैति । **बह्वित्यनेकत्वोपलक्षणम्** । बहुस्वरूपतया ख्यायत इति बहुस्वरूपताख्या । तुशब्दः श्रुतिनिषेध्याया वैशिष्ट्यद्योतकः । तेषु चेतनेषु । हिशब्दः प्रमाणप्रसिद्धिं द्योतयति । अत एव **अस्त्येव** इत्यवधारणम् ।

ततश्चायमर्थः । अस्त्येव वक्ष्यमाणानेकस्वरूपता, अणुत्वं च, तदन्यथानुपपत्तिसिद्धा सांशता च; प्रामाणिकस्य त्यक्तुमशक्यत्वादिति । तर्हि कथमत्र तद्विरुद्धमुक्तमित्यत

उक्तम् अंशिन इत्यादि । आद्यो हिशब्दः प्रमाणप्रसिद्धौ, द्वितीयो यस्मादित्यर्थे । ये पटाद्या अंशिनः प्रसिद्धास्ते परस्परं भिन्नैरेवांशैरंशिना च वक्ष्यमाणप्रकारेण भिन्नाभिन्नैरेव न त्वत्यन्ताभिन्नैः तन्त्वादिभिरंशैरंशिन उच्यन्ते । चेतनास्त्वेवमेव पटादिवदुक्तरूपैरंशैरंशिनो न भवन्ति, किन्तु परस्परमंशिना चात्यन्ताभिन्नैः । यस्मादेवमतः प्रसिद्धांशिवैधर्म्यादिवानेकस्वरूपेषु तत एव सांशेष्वप्येतेषु चेतनेषु अनंशिन इति श्रुतिर्वर्तते । न तु सर्वथा अंशराहित्याभिप्रायेण । अतो न विरोध इति ।

ननु यदि भेदो नास्ति, कथं तर्ह्यनेकत्वं, तस्य भेदव्याप्तत्वात्; कथं चांशित्वम्, मत्वर्थस्य भेदेन विनाऽनुपपत्तेरित्यत उक्तम् विशेषादेवेति । भेदाभावेऽपि केवलं तत्प्रतिनिधेः विशेषादेवानेकस्वरूपेषु इति योजना । यद्वा 'अप्यनेकस्वरूपेषु' इत्यनेनैव वक्ष्यमाणमङ्गीकृत्य, 'अंशिन' इत्यादिना विरोधः परिहृतः । तत्र भेदाभावे कथमनेकत्वमंशित्वं चेत्याशङ्कां विशेषादेवेत्यादिपादत्रयेण परिहरति । केवलम् एवं भेदेन विनैव तेषु बहुस्वरूपता, तया ख्याप्यमाना सांशता चास्ति । कथम् । विशेषादेवेति । 'कुत एतत्कल्प्यते, श्रुतिद्वयविरोधादेवे'ति हिशब्देनाह । अत्र जीवस्येति प्रकृतेऽपि यत् चेतना इति सामान्येनोक्तम्, तेन 'चेतनमात्रेऽप्ययं न्याय' इति सूचयति । अथवा 'यद्यंशिनो जीवास्तर्हि पटादिवदेव स्युः' इत्यस्याचेतनत्वमुपाधिमनेन द्योतयति ।

परि०— वक्ष्यतीति । तृतीयपादे वक्ष्यतीत्यर्थः । **गूढाभिसन्धेरिति** । वक्ष्यमाणबहुरूपत्वाणुत्वोभयान्यथानुपपत्तिसिद्धसांशत्वभिन्नांशत्वराहित्याभ्यां कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपरूपदोषद्वयपरिहारसम्भवेन स्वत एव जीवस्य कर्तृत्वसम्भवे व्यर्थमीश्वराधीनत्वकल्पनमित्यभिप्रायो गूढ इति ज्ञातव्यम् । **अविदिताभिप्राय इवेति** । (अ)विदिताभिप्रायत्वे बहुत्वेनाविनाभावादित्यादिकमेवोच्येत सार्धश्लोकद्वयं न वक्तव्यं स्यादिति भावः । **वक्ष्यमाणमिति** । अणुत्वं बहुत्वं तल्लभ्यसांशत्वं चेत्यर्थः । द्विरूपस्यापि परिग्रहायाह **बह्वित्यनेकत्वोपलक्षणमिति** । अत एवानेकस्वरूपेष्वित्युक्तिर्मूल इति भावः । ख्याप्यत इति कर्मणि बहुस्वरूपत्वोक्त्यन्यथानुपपत्त्या ज्ञाप्यमानेत्यर्थः । सांशताविशेषणमेतत् । **श्रुतीति** । 'अथ यः स जीवः स नित्यो निरवयव, इति श्रुतिनिषेध्यायाः सांशतायाः परस्परमंशिना च भिन्नांशत्वरूपवैशिष्ट्यद्योतक इत्यर्थः । बहुस्वरूपतेत्युपलक्षणमिति भावेनोक्तम् **अणुत्वं चेति** । ख्यापदार्थमाह **तदन्यथेति** । अत्रानुक्तमंशिना

भिन्नाभिन्नैरित्येतत्कुत उच्यत इत्यत आह **वक्ष्यमाणप्रकारेणेति** । 'अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदा । सर्वप्रत्यक्षविषयः कथमेव ह्यपोह्यते' इति वैशेषिकनये समवायनिरासप्रस्तावे वक्ष्यमाणप्रकारेणेत्यर्थः । हस्तवितस्त्याद्यंशैरत्यन्ताभेदादाह **तन्त्वादिभिरिति** । **अनंशिन इति श्रुतिरिति** । पूर्वोक्तनिरवयवत्वश्रुतिरित्यर्थः । **श्रुतिद्वयेति** । 'अथ यः जीवः स नित्यो निरवयव' इति । एवं 'अंशिनो जीवादंशा पृथक् गच्छन्ती'ति निरंशत्वसांशत्वबोधकश्रुतिद्वयविरोधादेवेत्यर्थः । **चेतनमात्रेऽपीति** । तेनेश्वरश्रीतत्वयोरप्ययं न्यायो ज्ञेय इत्युक्तं भवति । **पटादिवदेवेति** । उत्पादविनाशादिमन्तः स्युरित्यर्थः । **अनेनेति** । चेतना इति कथनेनेत्यर्थः ।

यादु०— गूढाभिसन्धेराशङ्कामिति । सांशत्वे किं जीवकर्तृत्वस्येश्वराधीनत्वकल्पनया तदभावेऽपि स्वतो बहुत्वसद्भावेनैकदेशतः क्रियोपपत्तौ कृत्स्नप्रसक्तेरभावात् । विभिन्नांशाभावेन निरवयवत्वशब्दकोपस्यापि परिहारात् । एतदतिरिक्तस्य चेश्वरकृत्यस्यादर्शनादिति पूर्वपक्षिणोऽभिप्रायोऽत्र गूढ इति द्रष्टव्यम् । एतस्याभिप्रायस्यात्रैवोद्घाटने तु 'अंशिनो ही'त्यादिमूलस्यानुत्थानमेव स्यात् । अत एवमवतारिकेति ध्येयम् । **वक्ष्यमाणमिति** । व्यतिरेको गन्धवदित्यादिना वक्ष्यमाणमित्यर्थः । अनेकस्वरूपेष्विति मूलानुसारेण व्याख्याति **अनेकत्वोपलक्षणमिति** । **ख्यायत इति** । ज्ञायत इत्यर्थः । तथा चाणोर्युगपदनेकरूपतया ज्ञायमानेत्युक्तं भवति । **श्रुतिनिषेध्याया इति** । भिन्नांशताया इत्यर्थः । **वक्ष्यमाणप्रकारेणेति** । समयपाद इति शेषः । **श्रुतिद्वयविरोधादिति** । सांशत्वनिरंशत्वप्रतिपादकश्रुतिद्वयविरोधादेवेत्यर्थः । **चेतनमात्रेऽपीति** । परमात्मन्यप्ययं न्यायोऽस्तीति सूचयितुमित्यर्थः । **अनेनेति** । चेतनग्रहणेनेत्यर्थः ।

वं०प०— तत एवेति । अणुत्वानेकत्वयोः प्रतिपादनस्य सांशतां विनाऽनुपपन्नत्वादेवेत्यर्थः । स्वतो बहुरूपत्वसद्भावे कृत्स्नप्रसक्त्यादेरभावात्किमीश्वराधीनत्वकल्पनयेत्यभिप्रायो गूढः । **वक्ष्यमाणम्** व्यतिरेक इति सूत्रेण वक्ष्यमाणमनेकरूपत्वम् । 'अप्यनेकस्वरूपेषु' इत्येतदनुसारेणाह **बह्विति** । मूले बहुस्वरूपताख्या तन्नामिकेति बहुस्वरूपत्वसांशत्वयोरैक्याप्रतीतेराह **ख्यायत इति** । ज्ञायते इत्यर्थः । तथा च बहुस्वरूपतया ज्ञायमानेत्यर्थः । **श्रुतीति** । निरवयव इति श्रुत्या निषिद्धं यद्भिन्नांशोपेतत्वरूपं सावयवत्वं तन्नाङ्गीक्रियते । बहुस्वरूपताख्या सांशता त्वस्त्येवेति तदपेक्षया वैलक्षण्यद्योतनार्थ इत्यर्थः । **अत एव प्रमाणप्रसिद्धत्वादेव** । **कथमत्रेति** । अत्र **निरवयवत्वशब्दव्याकोपो वेति** सूत्रे **वक्ष्यमाणानेकरूपत्वविरुद्धं निरवयवत्वं** कथमुक्तमित्यर्थः । **प्रसिद्धेति** । तन्त्वादीत्यर्थः । **वैधर्म्यादिति** । भिन्नांशराहित्यमेव **तद्वैधर्म्यम्** । **तत एव** अनेकरूपत्वादेव । **तस्य** अनेकत्वस्य । **यद्वेति** । पूर्वं बहुरूपताख्येत्यनेन व्यतिरेक इति वक्ष्यमाणमङ्गीकरोतीत्युक्तम्, इदानीमन्यथेति भेदः । **इत्यादिना** भिन्नांशराहित्यकथनेन । **विरोधो** निरवयवत्वशब्दविरोधः । **एतत्** सांशत्वं भिन्नांशराहित्यं चेत्यर्थः । **श्रुतिद्वयेति** । सांशत्वनिरंशत्वप्रतिपादकश्रुतिद्वयेत्यर्थः । **चेतना**

इति । तथा च जीवस्येत्येकवचनं समुदायापेक्षमित्युक्तं भवति । **मात्र इति** । अयं न्यायो विशेषेणानेकरूपत्वोपपादनरूपो न जीवमात्रे, किन्तु परमात्मन्यपीत्यभिप्रायेणेत्यर्थः । समस्तानामपि चेतनानामभिन्नांशवत्त्वं वर्तत एव । तथाऽपि हरेर्देवानां योगिनां चाभिन्नानामप्यंशानामतिरेकोऽस्ति । बहिर्निर्गमोऽस्तीति यावत् । नैवं मानुषाणामिति विशेषो द्रष्टव्यः । स्युः भिन्नांशोपेता इति शेषः । तथा च जीवा भिन्नांशोपेताः सांशत्वात् पटवदित्यनुमानस्येत्यर्थः ।

कं०रा०— वक्ष्यमाणमिति । व्यतिरेको गन्धवदित्यत्र वक्ष्यमाणं जीवानामनेकरूपत्वमित्यर्थः । **श्रुतिनिषेध्याया इति** । अनंशत्वश्रुतिनिषेध्यायाः सांशताया इत्यर्थः । **अत एवेति** । हिशब्दद्योतितप्रमाणप्रसिद्धेः सत्त्वादेवेत्यर्थः । **यदि भेदो नास्तीति** । चेतनांशानां यदि परस्परं भेदो नास्तीत्यर्थः । **कथं चांशित्वमिति** । अंशिना चेतनेन तदंशानां भेदो यदि नास्ति तदा कथमंशित्वमित्यर्थः । **अनेनेति** । चेतना इत्यनेनेत्यर्थः ।

श्रीनिधि०— उत्क्रान्तिगत्यागतीनामणुत्वं चेति । एवंरूपेण हेतूनां सकाशादिति शेषः । **न चाणोर्युगपदनेकरूपत्वमिति** । अणोरपि क्रमेणानेकरूपत्वं सम्भवत्येव । एकस्यैव स्वर्णमाषस्य माषत्व-अङ्गुलीयत्व-कर्णभूषणत्वादेः कालभेदेन दर्शनात् । अतः युगपदित्युक्तम् । गगनादेर्महतोऽनेकरूपत्वं युगपदेव सम्भवति । घटाद्युपाधिभेदेन तद् दर्शनादतः अणोरित्युक्तम् । **गूढाभिसन्धेरिति** । अभिन्नांशाभ्युपगमे किमीश्वरेणेति गूढाभिसन्धेरित्यर्थः । **वक्ष्यमाणम्** । व्यतिरेको गन्धवदिति वक्ष्यमाणम् । न **ह्यनेकेति** बहूपलक्षणमिति कुतो नोक्तमिति चेन्न । बहुस्वरूपाख्येत्यनेन सांशताप्रतीतौ बहुस्वरूपत्वमेव कारणमिति प्रतीयते । तदयुक्तम् । द्वयोरप्यंशांशीभावदर्शनादित्यपि अनेकस्वरूपेष्वित्यनुसारेणाह **बह्वित्यनेनेति** । **निषेध्याया इति** । भेदपूर्विकाया इत्यर्थः । **अत एव** प्रसिद्धेरेव ।

शे०वा०— नन्वंशिनो हीत्युत्तरभाष्यमनर्थकम् । न चैतत् 'व्यतिरेको गन्धवत्' इति वक्ष्यमाणाभ्यनुज्ञापकमिति वाच्यम् । तस्याप्यनर्थकत्वात् । न च निरवयवत्वशब्दकोपोक्तेर्वक्ष्यमाणविरोधशङ्कानिरासार्थमिनि वाच्यम् । प्रापकाभावेन तच्छङ्काया एवानुत्थानात् । कथञ्चिदुत्थानेऽपि बहुरूपेत्यादिनैव वक्ष्यमाणाभ्युपगमसिद्ध्या 'अंशिनो ही'त्याद्यभाष्यवैयर्थ्यानिस्तारादित्यतो वक्ष्यमाणविरोधपरिहारायानंशित्वश्रुतिप्रदर्शनार्थत्वान्नानुपपत्तिरित्यभिप्रेत्योक्तरूपेण वाक्यं योजयितु विरोधशङ्कां तावदुत्थापयति **नन्विति** । **गूढाभिसन्धेरिति** । सांशत्वे जीवस्य किं जीवकर्तृत्वस्येश्वराधीनत्वकल्पनया तदभावेऽपि स्वतो बहुत्वसद्भावेनैकदेशतः क्रियोपपत्तौ कृत्स्नप्रसक्तेरभावात् । विभिन्नांशाभावेन निरवयवत्वशब्दकोपस्यापि परिहारादतिरिक्तस्य चेश्वरकृत्यस्याभावादिति पूर्वपक्षिणोऽभिप्रायोऽत्र गूढः । एतस्याप्यत्रोद्घाटने 'अंशिनो हि' इत्यादिमूलस्यानुत्थानमेव स्यात् । अतो गूढत्वाश्रयणमिति भावः । **वक्ष्यमाणमिति** । 'व्यतिरेको गन्धवत्' इति वक्ष्यमाणमित्यर्थः । अनेकस्वरूपेष्विति मूलानुरोधेनाह **बह्वित्यनेकत्वोपलक्षणमिति** । भाष्ये तुशब्दानर्थक्यमाशङ्क्यानंशत्व-

प्रतिपादकश्रुत्यविरोधाय अनेकस्वरूपताख्याया: सांशताया 'अथ य: स जीव:' इति श्रुतिनिषेध्यसांशतापेक्षया वैशिष्ट्यद्योतनार्थत्वान्न तदिति भावेन तुशब्दार्थमाह **तुशब्द इति** । **अत एव** प्रमाणप्रसिद्धत्वादेव ।

यस्मादित्यर्थ इति । अत इत्युत्तरत्र श्रवणादिति भाव: । ननु 'अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदे'त्यत्र पटादीनामंशिनामेकैकेनांशेन भेदाभेदयो: सर्वैरंशैश्चाभेदस्य व्यवस्थितत्वात् कथमत्र सर्वेषां तन्तूनां पटेन भेदाभिधानमित्यतो व्यतिषक्तविशेषविशिष्टै: सर्वतन्तुभि: पटस्यात्यन्ताभेदेऽप्यविवक्षितव्यतिषङ्गै: सर्वतन्तुभिरपि परस्परभेदाभेदावेवेति तत्रैव वक्ष्यमाणत्वात् तेन रूपेण भिन्नाभिन्नत्वमत्रानुसन्धेयमित्याशयेनोक्तं **वक्ष्यमाणप्रकारेणेति** ।

भाष्ये विशेषादेवेति विशेषोपन्यासस्यानर्थक्यमाशङ्क्यानेकत्वाद्युपपादकत्वान्न तदिति भावेनानेकत्वाद्यनुपपत्तिशङ्कापरिहारकतया तद्योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **नन्विति** । **तस्येति** । व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वादिति भाव: । मत्वर्थस्य सम्बन्धस्य भेदव्याप्तत्वात् सम्बन्धस्येति भाव: । उक्तयोजनायामनेकस्वरूपेष्वित्यस्यानुवृत्तिर्भवतीत्यपरितोषात् पक्षान्तरमारचयति **यद्वेति** । अस्त्येवेत्येवशब्दस्य केवलमित्यनेन सम्बन्धमाश्रित्य प्रकृतोपयोगितया तदर्थमाह **केवलेत्यादि** । **श्रुतिद्वयेति** । सांशत्वनिरवयवत्वप्रतिपादकश्रुतिद्वयेत्यर्थ: । **चेतनमात्रेऽपीति** । न केवलं जीव एवायं न्याय: किन्तु परमात्मन्यपीति सूचयितुं चेतना इति सामान्येनोक्तमित्यर्थ: । परमात्मन्यप्ययं न्याय इति सूचनस्यापि न प्रकृतोपयोगोऽस्तीत्यपरितोषादाह **अथवेति** । **पटादिवदेवेति** । यथा पटादय: परस्परं भिन्नैरंशिना च भिन्नाभिन्नैरंशैरंशिन:, तथा जीवा अपि परस्परं भिन्नैरंशिना च भिन्नाभिन्नैरंशैरेवांशिन: स्युरित्यर्थ: । ततश्च प्रसिद्धांशवैधर्म्याभावादनंशत्वश्रुतिविरोध इति भाव: । **अचेतनत्वमुपाधिमिति** । उक्तरूपैरंशै: अंशिषु पटादिष्वचेतनत्वसद्भावेन साध्यव्यापकत्वादंशित्वरूपसाधनवत्सु चेतनेषु चाचेतनत्वाभावेन साधनाव्यापकत्वाच्चेत्यर्थ: । **अनेनेति** । चेतना इत्यनेनेत्यर्थ: ।

वा०र०— वक्ष्यमाणाभ्यनुज्ञापकमिति । तदभ्यनुज्ञापनप्रतिपादनाय सार्थकमित्यर्थ: । निरासार्थमित्यनन्तरं तदिति शेष: । **अभ्युपगमसिद्धत्वेति** । तत्प्रतिपादनं अभ्युपगमेन ग्राह्यम् । अनुपपत्ति: भाष्यवैय्यर्थ्यरूपा । वक्ष्यमाण 'नन्वेवं तर्हि' इत्यादिमूलानुसारेण गूढाभिसन्धिमाह **सांशत्वेति** । **उत्तरत्र श्रवणादिति** । उत्तरत्र हेतुप्रतिपादकश्रवणात् हेतुसमर्पणापेक्षिततया यस्मादित्यर्थकतया हिशब्दो योज्य: इत्याशयो **मूले** इति पाठ: । ननु अंशिनोंऽशै: अभेदोऽयं इत्यस्यार्थो वैशेषिकपरीक्षामूलटीकायां प्रतिपत्तव्य: । तद्विचारोऽपि तद्विवरणावसरे अस्मत्कृतो बोध्य: । **मत्वर्थस्य** इत्यनूद्य सम्बन्धस्येति शेषपूरणम् । अनुपपत्त्युपपादनं **भेदेत्यादि** । **अपरितोषादाहेति** । चेतना इत्यस्य प्रयोजनान्तरमाहेत्यर्थ: । जीवकर्तृकत्वेत्यस्य पूर्वेण सम्बन्ध: ।

इति । तथा च जीवस्येत्येकवचनं समुदायापेक्षमित्युक्तं भवति । **मात्र इति** । अयं न्यायो विशेषेणानेकरूपत्वोपपादनरूपो न जीवमात्रे, किन्तु परमात्मन्यपीत्यभिप्रायेणेत्यर्थः । समस्तानामपि चेतनानामभिन्नांशवत्त्वं वर्तत एव । तथाऽपि हरेर्देवानां योगिनां चाभिन्नानामप्यंशानामतिरेकोऽस्ति । बहिर्निर्गमोऽस्तीति यावत् । **नैवं** मानुषाणामिति विशेषो द्रष्टव्यः । स्युः भिन्नांशोपेता इति शेषः । तथा च जीवा भिन्नांशोपेताः सांशत्वात् पटवदित्यनुमानस्येत्यर्थः ।

कं०रा०— वक्ष्यमाणमिति । व्यतिरेको गन्धवदित्यत्र वक्ष्यमाणं जीवानामनेकरूपत्वमित्यर्थः । **श्रुतिनिषेध्याया इति** । अनंशत्वश्रुतिनिषेध्यायाः सांशताया इत्यर्थः । **अत एवेति** । हिशब्दद्योतितप्रमाणप्रसिद्धेः सत्त्वादेवेत्यर्थः । **यदि भेदो नास्तीति** । चेतनांशानां यदि परस्परं भेदो नास्तीत्यर्थः । **कथं चांशित्वमिति** । अंशिना चेतनेन तदंशानां भेदो यदि नास्ति तदा कथमंशित्वमित्यर्थः । **अनेनेति** । चेतना इत्यनेनेत्यर्थः ।

श्रीनिधि०— उत्क्रान्तिगत्यागतीनामणुत्वं चेति । एवंरूपेण हेतूनां सकाशादिति शेषः । **न चाणोर्युगपदनेकरूपत्वमिति** । अणोरपि क्रमेणानेकरूपत्वं सम्भवत्येव । एकस्यैव स्वर्णमाषस्य माषत्व-अङ्गुलीयत्व-कर्णभूषणत्वादेः कालभेदेन दर्शनात् । अतः युगपदित्युक्तम् । गगनादेर्महतोऽनेकरूपत्वं युगपदेव सम्भवति । घटाद्युपाधिभेदेन तद् दर्शनादतः अणोरित्युक्तम् । **गूढाभिसन्धेरिति** । अभिन्नांशाभ्युपगमे किमीश्वरेणेति गूढाभिसन्धेरित्यर्थः । **वक्ष्यमाणम्** । व्यतिरेको गन्धवदिति वक्ष्यमाणम् । **न ह्यनेकेति** बहूपलक्षणमिति कुतो नोक्तमिति चेन्न । बहुस्वरूपाख्येत्यनेन सांशताप्रतीतौ बहुस्वरूपत्वमेव कारणमिति प्रतीयते । तदयुक्तम् । द्वयोरप्यंशांशीभावदर्शनादित्यपि अनेकस्वरूपेष्वित्यनुसारेणाह **बहित्यनेनेति** । **निषेध्याया इति** । भेदपूर्विकाया इत्यर्थः । **अत एव** प्रसिद्धेरेव ।

शे०वा०— नन्वंशिनो हीत्युत्तरभाष्यमनर्थकम् । न चैतत् 'व्यतिरेको गन्धवत्' इति वक्ष्यमाणाभ्यनुज्ञापकमिति वाच्यम् । तस्याप्यनर्थकत्वात् । न च निरवयवत्वशब्दकोपोक्तेर्वक्ष्यमाणविरोधशङ्कानिरासार्थमिति वाच्यम् । प्रापकाभावेन तच्छङ्काया एवानुत्थानात् । कथञ्चिदुत्थानेऽपि बहुरूपेत्यादिनैव वक्ष्यमाणाभ्युपगमसिद्ध्या 'अंशिनो ही'त्याद्यभाष्यवैयर्थ्यानिस्तारादित्यतो वक्ष्यमाणविरोधपरिहारायानंशित्वश्रुतिप्रदर्शनार्थत्वान्नानुपपत्तिरित्यभिप्रेत्योक्तरूपेण वाक्यं योजयितुं विरोधशङ्कां तावदुत्थापयति **नन्विति** । **गूढाभिसन्धेरिति** । सांशत्वे जीवस्य किं जीवकर्तृत्वस्येश्वराधीनत्वकल्पनया तदभावेऽपि स्वतो बहुत्वसद्भावेनैकदेशतः क्रियोपपत्तौ कृत्स्नप्रसक्तेरभावात् । विभिन्नांशाभावेन निरवयवत्वशब्दकोपस्यापि परिहारादतिरिक्तस्य चेश्वरकृत्यस्याभावादिति पूर्वपक्षिणोऽभिप्रायोऽत्र गूढः । एतस्याप्यत्रोद्घाटने 'अंशिनो हि' इत्यादिमूलस्यानुत्थानमेव स्यात् । अतो गूढत्वाश्रयणमिति भावः । **वक्ष्यमाणमिति** । 'व्यतिरेको गन्धवत्' इति वक्ष्यमाणमित्यर्थः । अनेकस्वरूपेष्विति मूलानुरोधेनाह **बहित्यनेकत्वोपलक्षणमिति** । भाष्ये तुशब्दानर्थक्यमाशङ्क्यानंशत्व-

प्रतिपादकश्रुत्यविरोधाय अनेकस्वरूपताख्यायाः सांशताया 'अथ यः स जीवः' इति श्रुतिनिषेध्यसांशतापेक्षया वैशिष्ट्यद्योतनार्थत्वान्न तदिति भावेन तुशब्दार्थमाह **तुशब्द इति** । **अत एव** प्रमाणप्रसिद्धत्वादेव ।

यस्मादित्यर्थ इति । अत इत्युत्तरत्र श्रवणादिति भावः । ननु 'अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदे'त्यत्र पटादीनामंशिनामेकैकेनांशेन भेदाभेदयोः सर्वैरंशैश्चाभेदस्य व्यवस्थितत्वात् कथमत्र सर्वेषां तन्तूनां पटेन भेदाभिधानमित्यतो व्यतिषङ्गविशेषविशिष्टैः सर्वतन्तुभिः पटस्यात्यन्ताभेदेऽप्यविवक्षितव्यतिषङ्गैः सर्वतन्तुभिरपि परस्परभेदाभेदावेवेति तत्रैव वक्ष्यमाणत्वात् तेन रूपेण भिन्नाभिन्नत्वमत्रानुसन्धेयमित्याशयेनोक्तं **वक्ष्यमाणप्रकारेणेति** ।

भाष्ये विशेषादेवेति विशेषोपन्यासस्यानर्थक्यमाशङ्क्यानेकत्वाद्युपपादकत्वान्न तदिति भावेनानेकत्वाद्यनुपपत्तिशङ्कापरिहारकतया तद्योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **नन्विति** । **तस्येति** । व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वादिति भावः । मत्वर्थस्य सम्बन्धस्य भेदव्याप्तत्वात् सम्बन्धस्येति भावः । उक्तयोजनायामनेकस्वरूपेष्वित्यस्यानुवृत्तिर्भवतीत्यपरितोषात् पक्षान्तरमारचयति **यद्वेति** । अस्त्येवेत्येवशब्दस्य केवलमित्यनेन सम्बन्धमाश्रित्य प्रकृतोपयोगितया तदर्थमाह **केवलेत्यादि** । **श्रुतिद्वयेति** । सांशत्वनिरवयवत्वप्रतिपादकश्रुतिद्वयेत्यर्थः । **चेतनमात्रेऽपीति** । न केवलं जीव एवायं न्यायः किन्तु परमात्मन्यपीति सूचयितुं चेतना इति सामान्येनोक्तमित्यर्थः । परमात्मन्यप्ययं न्याय इति सूचनस्यापि न प्रकृतोपयोगोऽस्तीत्यपरितोषादाह **अथवेति** । **पटादिवदेवेति** । यथा पटादयः परस्परं भिन्नैरंशिना च भिन्नाभिन्नैरंशैरंशिनः, तथा जीवा अपि परस्परं भिन्नैरंशिना च भिन्नाभिन्नैरंशैरेवांशिनः स्युरित्यर्थः । ततश्च प्रसिद्धांशवैधर्म्याभावादनंशत्वश्रुतिविरोध इति भावः । **अचेतनत्वमुपाधिमिति** । उक्तरूपैरंशैः अंशिषु पटादिष्वचेतनत्वसद्भावेन साध्यव्यापकत्वादंशित्वरूपसाधनवत्सु चेतनेषु चाचेतनत्वाभावेन साधनाव्यापकत्वाच्चेत्यर्थः । **अनेनेति** । चेतना इत्यनेनेत्यर्थः ।

वा०२०— वक्ष्यमाणाभ्यनुज्ञापकमिति । तदभ्यनुज्ञापनप्रतिपादनाय सार्थकमित्यर्थः । निरासार्थमित्यनन्तरं तदिति शेषः । **अभ्युपगमसिद्धत्वेति** । तत्प्रतिपादनं अभ्युपगमेन ग्राह्यम् । अनुपपत्तिः भाष्यवैय्यर्थ्यरूपा । वक्ष्यमाण 'नन्वेवं तर्हि' इत्यादिमूलानुसारेण गूढाभिसन्धिमाह **सांशत्वेति** । **उत्तरत्र श्रवणादिति** । उत्तरत्र हेतुप्रतिपादकश्रवणात् हेतुसमर्पणापेक्षिततया यस्मादित्यर्थकतया हिशब्दो योज्यः इत्याशयो मूले इति पाठः । ननु अंशिनोंशैः अभेदोऽयं इत्यस्यार्थो वैशेषिकपरीक्षामूलटीकायां प्रतिपत्तव्यः । तद्विचारोऽपि तद्विवरणावसरे अस्मत्कृतो बोध्यः । **मत्वर्थस्य** इत्यनूद्य सम्बन्धस्येति शेषपूरणम् । अनुपपत्त्युपपादनं **भेदेत्यादि** । **अपरितोषादाहेति** । चेतना इत्यस्य प्रयोजनान्तरमाहेत्यर्थः । जीवकर्तृकत्वेत्यस्य पूर्वेण सम्बन्धः ।

स०न्न०— गूढाभिसन्धेरिति । सांशत्वे किं जीवकर्तृत्वस्येश्वराधीनत्वकल्पनया । स्वतो बहुरूपत्वसद्भावेन एकदेशतः क्रियोपपत्तौ कृत्स्नप्रसक्तेरभावात् । विभिन्नांशाभावेन निरवयवत्वशब्दव्याकोपस्यापि परिहारात् । एतदतिरिक्तस्य चेश्वरकृत्यस्यादर्शनादित्यभिप्रायसद्भावेन गूढाभिसन्धिरित्युक्तम् । **वक्ष्यमाणमभ्युपैतीति** । 'व्यतिरेको गन्धवत्' इत्यादिवक्ष्यमाणं बहुरूपतेत्यनेनाभिप्रैतीत्यर्थः । अनेकस्वरूपेषु इत्येतदनुसारेणाह **अनेकत्वोपलक्षणमिति** । **अत एवेति** । प्रमाणप्रसिद्धत्वादेवेत्यर्थः । **यद्वेति** । पूर्वं बहुस्वरूपताख्येत्यनेन 'व्यतिरेको गन्धवत्' इत्यादिवक्ष्यमाणमभ्युपैतीत्युक्तम् । इदानीं तु अनेकस्वरूपेष्वित्यनेनैव व्यतिरेको गन्धवदित्यादिवक्ष्यमाणमभ्युपैतीत्युच्यत इति भावः । **श्रुतिद्वयविरोधादिति** । सांशत्वनिरंशत्वप्रतिपादकश्रुतिद्वयविरोधान्निमित्तादित्यर्थः । **चेतनमात्रेति** । न केवलं जीव एवायं न्यायः किन्तु परमात्मन्यपीति द्योतयितुमित्यर्थः ।

विट्ठल०— गूढाभिसन्धेराशङ्कामिति । सांशत्वेन जीवकर्तृत्वस्येश्वराधीनत्वं कुतः कल्प्यम् । अत एव स्वतो बहुरूपत्वसद्भावेन एकदेशतः प्रवत्त्युपपत्तौ कृत्स्नप्रसक्तेरभावात् । विभिन्नांशभावेन निरवयवत्वशब्दकोपस्यापि परिहारात् । एतदतिरिक्तस्य चेश्वरव्यापारस्यादर्शनादिति पूर्वपक्षिणाभिप्रायो गूढ इति । **वक्ष्यमाणमिति** । व्यतिरेको गन्धवदित्यादिना वक्ष्यमाणमित्यर्थः । द्विरूपस्यापि परिग्रहादित्याह **बहित्यनेकोपलक्षणमिति** । **निषेध्याया इति** । अनंशत्वश्रुतिनिषेध्याया इत्यर्थः । **वैशिष्ट्येति** । प्रामाणिकत्वरूपातिशयेत्यर्थः । **तद्विरुद्धमिति** । सांशताविरुद्धमनंशत्वमित्यर्थः । अत्रानुक्तमंशिना भिन्नाभिन्नमित्येतत्कुत इत्यत आह **वक्ष्यमाणप्रकारेणेति** । 'अंशिनांशैरभेदोऽयं अंशेनेतु भिधाभिधेति' वक्ष्यमाणेत्यर्थः । **श्रुतिद्वयविरोधादेवेति** सांशत्वनिरंशप्रतिपादकश्रुतिद्वयविरोधादेवेत्यर्थः । **चेतनमात्रेऽपीति** । ईशलक्ष्मीपरिग्रहायैवमुक्तः । **अनेनेति** । चेतना इत्यनेनेत्यर्थः ।

चषक— मत्वर्थस्येति । मतुबर्थसमानार्थक'इनि'प्रत्ययार्थस्येत्यर्थः ।

॥ इति गूढाभिसन्धेराशङ्कया अविदिताभिप्राय इव परिहारः ॥

* * *

॥ अथ च तत्रान्ते पूर्वपक्षिणा स्वाभिसन्धावुद्घाटिते व्यक्ततया तत्परिहारः ॥

१११ **सु०—** 'नन्वेवं तर्हि किं जीवकर्तृत्वस्येश्वराधीनत्वकल्पनया, तदभावेऽपि स्वतो बहुरूपत्वसद्भावेनैकदेशतः क्रियोपपत्तौ कृत्स्नप्रसक्तेरभावात्, विभिन्नांशाभावेन निरवयवत्वशब्दकोपस्यापि परिहारात्, एतदतिरिक्तस्य चेश्वरकृत्यस्यादर्शनादि'ति पूर्वपक्षिणा स्वाभिसन्धावुद्घाटिते सत्याह **बहुत्वेनेति** ।

अनु०— बहुत्वेनाविनाभावाद्भिन्नता नियमाद्भवेत् ।
यदि नैवं नियमकृद्भगवान् पुरुषोत्तमः ॥

यदि भगवान् पुरुषोत्तम एवं न नियमकृत् 'बहुत्वेऽपि भेदो जीवेषु मा भूदि'ति व्यवस्थायाः कर्ता न स्यात्, तदा **बहुत्वेन** हेतुना जीवेष्वपि **भिन्नता भवेत्** । बहुत्वसङ्ख्याया भिन्नत्वेनाविनाभावलक्षणात् **नियमात्** । यथोक्तम् 'तदनुविधानात्पृथ-त्त्वमि'ति ।

एतदुक्तं भवति । परमेश्वरानपेक्षस्य जीवस्य कर्तृत्वाङ्गीकारे, न सर्वथोक्तप्रसङ्गद्वय-परिहारः । तथा हि । कृत्स्नप्रसक्तिस्तावत्कथं परिहरणीया । बहुत्वसद्भावेनेति चेत्, तर्हि बहुत्वस्य लोके भेदाविनाभूतत्वेन जीवस्य बहुत्वे भिन्नत्वमप्यापद्येत, तथा च दुरात्मा निरवयवत्वशब्दकोपो दुष्परिहरः । अथ तत्परिहारार्थं भेदो नेष्यते, तदा व्यापकनिवृत्त्या व्याप्यनिवृत्तेरावश्यकत्वाद्बहुत्वसङ्ख्याऽपि त्याज्या स्यात्, तथा च पुनः सैव कृत्या कृत्स्नप्रसक्तिरास्कन्देत । अथ जडेष्वेव 'यत्र बहुत्वं तत्र भेद' इति नियमो न चेतनेष्विति चेत्, कुत एतत् । तथा दर्शनादिति चेन्न, यतः कारकप्रश्नोऽयं न प्रमाणप्रश्नः । स्वभावोऽयं पदार्थानामिति चेन्न, अनीश्वरवादपादप्रसारिकापातात् । किञ्च विरुद्धश्च स्वभावश्चेति कथम्, न हि 'स्वयमेव स्वेन सद्वितीय' इति युक्तम्, 'प्रमितत्वान्न विरोध' इति तु प्रत्यु-क्तम् । चैतन्यसामर्थ्यादिदं घटत इति चेत्, धूमवानपि कश्चिन्निरग्निको घटताम् । अथ विशेषशक्त्येदमुपपद्यत इति चेत्, घटेऽप्युपपद्यताम्, न हि तत्र विशेषो नास्ति । विशेषवैचित्र्यान्नेति चेत्, तदेव कुतः । तस्माद्भगवानेव स्वरूपस्वभावविशेषाणां नियामकश्चैतन्यमवच्छेदकं विधाय विशेषं निमित्तीकृत्य विरुद्धे अप्यभेदबहुत्वे समावेश्याभेदेन निरवयवत्वशब्दकोपमपास्य बहुत्वेन कृत्स्नप्रसक्तिं न्यक्कृत्य कार्यानुरूपं सामर्थ्यविशेषं (नि)योजयञ्जीवेन कारयतीत्यङ्गीकर्तव्यमिति ।

नन्वेतत्सर्वं जीवसामर्थ्यादिनाऽशक्यसम्पादनं कथं भगवानपि सम्पादयेदित्यत आह **तस्य त्विति** ।

अनु०— तस्य त्वशेषशक्तित्वाद्युज्यते सर्वमेव हि (च) ।

तदेवमस्य सूत्रस्यैवं तात्पर्यव्याख्याने न कश्चिद्विरोध इति स्थितम् ॥

परि०— 'एवं नियमकृदि'त्यनुवादः । 'बहुत्वेऽपी'त्यादि व्याख्या । **यथोक्तमिति** । तार्किकैः तदनुविधानाद्बहुत्वसङ्ख्याविधानात्पृथक्त्वं भेद इत्यर्थः । **भिन्नत्वमपीति** । अंशानामंशिना परस्परं च भिन्नत्वमप्यापद्येतेत्यर्थः । **दुरात्मा** दुष्टस्वरूपः । **कृत्येति** । अभिचाररूपेत्यर्थः । चेतन-पदप्रयोगसूचितं समाधिमाशङ्कते **अथ जडेष्विति** । **यतः कारकप्रश्नोऽयमिति** । कुत एतदिति प्रश्नः कुतो ज्ञापकादिति भावेन न भवति येन तथा दर्शनादिति समाधिः सङ्गतः स्यात् । किन्तु कुतः कारणात् किं कृतमेतज्जडयोरेतद्वैषम्यमिति भावेन प्रश्नः । तस्य तूत्तरं एतस्मान्निमित्तादिति वाच्यमित्यर्थः । तत्तत्स्वभाव एव एतद्वैषम्यकारक इति स्वभाववादमाशङ्क्य निराह **स्वभावो-ऽयमिति** । **प्रसारिकेति** । ग्रहणेत्यर्थः । पादप्रक्षेप इति वाऽर्थः । **सद्वितीय इति** । अनेकरूप इत्यर्थः । **प्रत्युक्तमिति** । यतः कारकप्रश्नोऽयं न प्रमाणप्रश्न इत्यनेनेति भावः । **इदमिति** । स्वेनैवानेकरूपत्वं सद्वितीयत्वं घटत इत्यर्थः । क्लृप्ताविनाभावानादरेण प्रयोजकान्तरशङ्कायां अतिप्रसङ्गमाह **धूमवानपीति** । **इदमिति** । स्वेनैव सद्वितीयत्वमित्यर्थः । न हि तत्र विशेषो नास्तीति काकुः । अस्त्येव खलु तत्रापि विशेष इत्यर्थः । **नेतीति** । घटेऽप्युपपद्यतामित्येत-न्नेत्यर्थः । **तदेवेति** । विशेषवैचित्र्यमेव कुतः कारणादित्यर्थः । **अङ्गीकर्तव्यमितीति** । इति-शब्दस्यैतदुक्तं भवतीति पूर्वेणान्वयः । अशक्यसम्पादनमिति विभागः । विक्षिप्तत्वादुपसंहरति **तदेवमिति** ।

यादु०— अविनाभावलक्षणादिति । तथा च मूले न पुनरुक्तिरिति भावः । **सद्वितीय इति** । अनेक इत्यर्थः । **प्रत्युक्तमिति** । यतः कारकप्रश्नोऽयं न प्रमाणप्रश्न इति प्रत्युक्तमित्यर्थः । **विशेषं निमित्ती-कृत्येति** । एतेन विशेषाचिन्त्यशक्त्योरुभयोरङ्गीकारो न युक्तोऽन्यतरमात्रेण निर्वाहोपपत्तेरिति शङ्काऽपि परास्ता वेदितव्या । शक्तोऽपि भगवान्नियतैरेव कारणैरिदं स्वेच्छया करोतीत्युक्तत्वादिति भावः ।

वं०प०— तदभावेऽपि ईश्वराधीनत्वाभावेऽपि । **स्वतः** ईश्वरनैरपेक्ष्येण । **एतदतिरिक्तस्येति** । कृत्स्नप्रसक्तिपरिहारनिरवयवत्वशब्दव्याकोपपरिहारद्वयातिरिक्तस्येत्यर्थः । तथा चैतदुभयपरिहारस्तु स्वत इति मदुक्तरीत्याऽन्यथासिद्ध इति किमीश्वरकृत्यमिति भावः । **आहेति** । त्वदुक्तरीत्या द्वयोः परिहारेऽपि त्वदङ्गी-कृतबहुरूपत्वेन प्राप्तभिन्नत्वरूपानर्थपरिहारायापीश्वरोऽङ्गीकार्य इत्यस्तीश्वरकृत्यमित्याहेत्यर्थः । बहुत्वेनेत्यस्य

विपरिणामेन सङ्ख्याया इत्युक्तम् । तदिति । बहुत्वस्यानुविधानात् पृथक्त्वव्याप्तत्वादित्यर्थः । पृथक्त्वं भेदः । प्रसङ्गद्वयेति । कृत्स्नप्रसक्तिनिरवयवत्वशब्दव्याकोपद्वयरूपेत्यर्थः । बहुत्वेति । बहुरूपत्वेत्यर्थः । व्यापकेति । व्यापकीभूतभेदेत्यर्थः । व्याप्येति । बहुत्वेत्यर्थः । कारकेति । चेतनेषु बहुत्वेऽपि भेदो नेत्येतत्कुतः कारणादिति नियमकारकप्रश्ने दर्शनादिति प्रमाणोपन्यासोऽसङ्गत इत्यर्थः । अयं जडेष्वेव बहुत्वेऽपि भेदः स्वभावः । चेतनेषु बहुत्वेऽपि भेदाभाव एव स्वभाव इति जडानां चेतनानां च पदार्थानां स्वभावः कारकप्रश्नोत्तरमित्यर्थः । अनीश्वरवादे पादप्रसारिकेत्यर्थः । किञ्चेति । बहुत्वं भेदाभावश्चेति विरुद्धं तच्चेतने कथं स्वभाव इत्यर्थः । युक्तमिति । चेतनेषु भेदाभावेऽपि बहुत्वमस्तीत्युक्ते स्वयमेव स्वेन सद्वितीय इति प्राप्तं तच्च न युक्तमित्यर्थः । प्रमितत्वादिति । चेतनेषु भेदाभावेऽपि बहुत्वस्येति शेषः । प्रत्युक्तं चेतनेषु भेदाभावे बहुत्वं केन कारणेनेति कारकप्रश्ने प्रमितत्वादिति प्रमाणोपन्यासोऽसङ्गतो, यतः कारकप्रश्नोऽयमिति निराकृतमित्यर्थः । इदं भेदाभावेऽपि चेतनेषु बहुत्वम् । ननु तत्र विशेषाभावात् कथं घटे भेदाभावेऽपि चेतनेष्विव बहुत्वमुपपद्यतामित्युच्यत इत्यत आह न हीति । 'सोऽस्ति वस्तुष्वशेषतः' इत्युक्तत्वादिति भावः । ननु यद्यपि घटादावप्यस्ति विशेषस्तथाऽपि चेतननिष्ठविशेषस्यैव भेदाभावेऽपि बहुत्वोपपादकत्वसामर्थ्यं न घट-निष्ठविशेषस्येति विशेषस्य विचित्रस्वभावत्वाद्घटे भेदाभावेऽपि न बहुत्वमुपपन्नमित्याशयेन शङ्कते विशेषेति । तदेव चेतनघटरूपजडनिष्ठविशेषयोर्वैचित्र्यमेवेत्यर्थः । अवच्छेदकमिति । अन्यथा घटादावपि जडेऽभेदबहुत्वयोः समावेशं कुतो न घटयेदिति शङ्कापरिहाराय चैतन्यं घटादिव्यावृत्त्यर्थमवच्छेदकं करोति, चेतनेष्वेवेत्थं करोतीति यावदित्यर्थः ।

कं०रा०— बहुत्वसद्भावेनेति । अंशबहुत्वसद्भावेनेत्यर्थः । बहुत्वस्येति । बहुत्वस्य लोके भेदा-विनाभूतत्वेन दृष्टत्वाज्जीवस्यांशतो बहुत्वेंशानां परस्परमंशिनो जीवाच्च भिन्नत्वमापद्येत तथा च निरवयवत्वश्रुतेः भिन्नांशराहित्यपरताया वक्तुमशक्यत्वात् दुरात्मा निरवयवत्वशब्दकोपो दुष्परिहार इत्यर्थः । प्रत्युक्तमिति । यतः कारणप्रश्नोऽयं न प्रमाणप्रश्न इत्युक्तन्यायेन प्रत्युक्तमित्यर्थः । विशेषशक्त्येति । भेदाभावेऽपि भेदप्रतिनिधि-विशेषशक्त्या जीवांशबहुत्वमुपपद्यत इत्यर्थः ।

श्रीनिधि०— यथोक्तं परकीयग्रन्थ इति शेषः । तदनुविधानात बहुत्वस्य भेदव्याप्तेः । तेन पृथक्त्वं सिद्धमित्यर्थः । अनीश्वरवादेति । सर्वत्र कारकप्रश्ने स्वभावादित्युत्तरसम्भवेन ईश्वरकार्यं न किञ्चिदिति तदपलापः स्यादित्यर्थः । विरुद्धस्वभावश्चेति । भेदाभावबहुत्वविरुद्धे तथा चान्यतरस्य स्वभावत्वं न युज्यत एव । येनाविरोधः स्यादिति भावः । धूमवानपीति । व्याप्यवत्यपि व्यापकाभावसम्पादन इति भावः । तदेव कुत इति कारकप्रश्नः । तात्पर्यव्याख्याने तात्पर्यवर्णने ।

शे०वा०— ननु 'बहुत्वेनाविनाभावादि'त्यादिनेश्वराधीनत्वे जीवकर्तृत्वस्य बहुत्वेन भेदापादनं क्रियते तदनर्थकम् । न च कृत्स्नप्रसक्त्याद्युपपादनार्थं तदिति वाच्यम् । तस्य पूर्वमेव व्युत्पादिततया पुनस्त-

द्वयुत्पादनानर्थक्यादित्यतः पूर्वपक्ष्यभिसन्धिनिराकरणार्थत्वान्न तदिति भावेन तन्निरासपरतयोत्तरभाष्यं योजयितुं पूर्वपक्षिणोऽभिसन्धिमुद्घाटयति **नन्विति** । **एवं तर्हीति** । सांशत्वाज्जीवस्य यदि न वक्ष्यमाणविरोधस्तर्हीत्यर्थः । अविनाभावान्नियमादित्यनयोरन्यतरेण **मूले** विवक्षितसिद्धेरन्यतरवैयर्थ्यमित्यतो योजयति **अविनाभावेति** । बहुत्वसङ्ख्याभेदाविनाभावसिद्धावेतद्भवेत्स एव कुत इत्यतस्तत्र वैशेषिकसूत्रं प्रमाणयति **यथोक्तमिति** । यद्यपि च तदनुविधानादेकपृथक्त्वमिति द्वितीयाध्यायस्याद्ये आह्निके पठितम् । तथाऽप्याकाशादिप्रकरणे सर्वत्र तदनुविधानात् पृथक्त्वमित्येव प्रशस्तपादाचार्यैः पठितत्वात् तथैवोदाहृतम् । अत्र सूत्रे भेदापरपर्यायस्य पृथक्त्वस्यैव पृथक्त्वपदेन ग्रहणान्नियमेन पृथक्त्वं तदनेकत्वमनुविधत्त इत्यनेकत्वाद्भेदसिद्धिरित्यर्थपर्यवसानाद्बहुत्वादिसङ्ख्याया भेदाविनाभूतत्वसिद्धिरिति ध्येयम् ।

ननु परमेश्वरानपेक्षस्य जीवस्य कर्तृत्वाङ्गीकारे बहुत्वेन भिन्नत्वमात्रमापाद्यते न कृत्स्नप्रसक्त्यादिकमिति कथमस्योक्तदोषोपपादकत्वम् । न च भिन्नत्वापादनमुखेन निरवयवत्वशब्दव्याकोपसूचनात् तत्सिद्धिरिति वाच्यम् । तावताऽपि कृत्स्नप्रसक्त्यप्राप्त्योक्तप्रसङ्गद्वयोपपादकत्वायोगादित्यतस्तदुपपादयति **एतदुक्तं भवतीति** । **अथेति** । ततश्च बहुत्वसद्भावान्न कृत्स्नप्रसक्तिर्भेदाभावाच्च न निरवयवत्वशब्दव्याकोपोऽपीति भावः । उक्तरूपनियमस्यान्यकृतत्वानुपपत्त्याऽवश्यमीश्वरकर्तृकत्वस्याङ्गीकर्तव्यतया तन्नियमकर्तृत्वेनैवेश्वराधीनत्वप्राप्तेर्न तदनपेक्षस्य जीवस्य कर्तृत्वमित्यभिप्रेत्योत्तरमाह **कुत एतदिति** । एतदपि कुतोऽन्यस्मात्, न कुतोऽपि, किन्त्वीश्वरादेवेत्यर्थः । अभिप्रायमजानानः शङ्कते **तथेति** । अचेतनेष्वेव बहुत्वभेदयोर्दर्शनाच्चेतने चादर्शनादुक्तनियमसिद्धिरित्यर्थः । भवेदेतदेवं यदि कुत एतदिति नियमज्ञापकप्रमाणप्रश्नः स्यात् । न चैवम् । किन्नामोक्तरूपनियमकारकवस्तुप्रश्नः । तत्र च दर्शनोपन्यासस्य न सङ्गतिरिति परिहरति **न यत इति** । ननूक्तनियमस्य पदार्थस्वभावत्वात् स्वभावस्य चान्याधीनत्वे स्वभावत्वहानेरनन्याधीनत्वान्न तत्कारकप्रश्नः सङ्गत इति शङ्कते **स्वभाव इति** । तथा सत्यपसिद्धान्त इत्याशयेन परिहरति **अनीश्वरेति** । अङ्गीकृत्य चेदमुक्तम् । वस्तुतस्तूक्तनियमस्य विरुद्धत्वात् स्वभावत्वमेव न सम्भवतीत्याह **किञ्चेति** । विरुद्धत्वमेवोपपादयति **न हीति** । **सद्वितीय इति** । अनेक इत्यर्थः । **प्रत्युक्तमिति** । यतः कारकप्रश्नोऽयं न प्रमाणप्रश्न इति प्रत्युक्तमित्यर्थः । ततश्च विरुद्धस्यापि स्वभावत्वकारकतया तत्रेश्वराधीनत्वस्यावश्याभ्युपेयत्वान्न तदनपेक्षस्य जीवस्य कर्तृत्वमिति भावः । अस्तूक्तविधनियमस्य कारकापेक्षत्वं तथाऽपि नेश्वराधीनत्वसिद्धिः । अन्यस्याप्युक्तनियमकारकत्वसम्भवादित्यतस्तदनुपपत्तिं दर्शयितुं तत्किं चैतन्यसामर्थ्यमभिमतं विशेषशक्तिर्वा विशेषशक्तिवैचित्र्यं वेति विकल्पान्मनसि निधायाद्यं शङ्कते **चैतन्येति** । दूषयति **धूमवानिति** । पर्वतसामर्थ्यादिति शेषः । अविशेषादिति भावः । द्वितीयमुत्थाप्य दूषयति **अथेति** । तृतीयमाशङ्कते **विशेषेति** । **तदेव कुत इति** । तथा च तद्वैचित्र्यकारकतयाऽपीश्वरस्याभ्युपगमनीयत्वान्न तदनपेक्षस्य कर्तृत्वमुपपद्यतेति भावः । ननु च विशेषाचिन्त्यशक्त्योरन्यतरमात्रेणैव निर्वाहोपपत्तेरन्यतरवैयर्थ्यमित्याशङ्कामुभयकार्योपदर्शनेन परिहरन्नुक्तनियमस्यान्यप्रयुक्तत्वनिरासेन लब्धमर्थं दर्शयन्नुपसंहरति **तस्मादिति** । **अस्य सूत्रस्येति** । कृत्स्नप्रसक्तीत्यादि-

सूत्रस्येत्यर्थः । **एवं तात्पर्येति** । यदि भागेनेति वाक्योक्ततात्पर्येत्यर्थः । **न कश्चिदिति** । 'कर्ता शास्त्रार्थवत्त्वादि'ति वक्ष्यमाणविरोधो वा 'व्यतिरेको गन्धवदि'त्यादिना विरोधो वेत्येवं न कोऽपि विरोध इत्यर्थः ।

वा०१०— **वैशेषिकसूत्रमिति** । यद्यपि द्वितीयस्याद्याह्निके तत्त्वम्भावेनेति सूत्रे भावशब्दाभिमतसत्तापातत्वं एकत्वं यथा तथा एवाकाशस्य एकत्वं व्याख्यानं इत्यर्थके एकत्वस्य प्रकृततया तदनुविधानात् इत्येतत्सूत्रीय तच्छब्दस्य एकत्वपरामर्शकतया तदनुविधानादित्यस्य एकत्वानुविधानात् इत्यर्थकतया मूले विवक्षितस्यानेकत्वानुविधानस्य न तेन सूत्रेण लाभः । किं च न चाकाशस्य एकत्वं तावदस्तु इत्याद्युक्त्वा एकपृथक्त्वं तु कथं इत्यत आहेति तदनुविधानात् इत्येतत्सूत्रस्य सूत्रोपस्कारे अवतारात् तदनुसारेण पृथक्त्वसिद्ध्यै प्रमाणोपदर्शकस्यास्य सूत्रस्य न बहुत्वपृथक्त्वेन विना भावसिद्धौ प्रमाणतयोपन्यासो युक्तः इत्याभाति । तथापि सूत्रस्य वक्ष्यमाणरीत्या वर्णकान्तरमाश्रित्यात्र तदुदाहरणं न दोषाय । यथा चैतत् तथा अनुपदमेव वक्ष्यामः । **एकपृथक्त्वमितीति** । यद्यपि तदनुविधानात् एकपृथक्त्वं चेत्येवाह्निकान्तिमं सूत्रम्, तथापि एकत्वसमुच्चयार्थकश्चशब्दस्याविवक्षया आह्निकसमाप्त्यर्थक इतिशब्दस्यापि प्रकृतानुपयोगेन विवक्षया तदनुविधानात् एकपृथक्त्वमित्येव उदाहृतं इत्यदोषः । **आकाशादि** इत्यादिपदेन कालदिक्प्रकरणसङ्ग्रहः । **सर्वत्रेति** । यद्यपि प्रशस्तपादभाष्ये आकाशकालप्रकरणयोः एव एतद्वाक्यमस्ति तथापि कालवत् एतत्सिद्धा इति दिक्प्रकरणे वचनस्यापि तदनुविधानात् पृथक्त्वमित्यर्थस्यापि भासनात् । तदनुसारेण सर्वत्रेत्युक्तमित्यवधेयम् । तथा एव उदाहृतम् । न तु तदनुविधानात् एकपृथक्त्वमिति शेषः । ननु अस्य सूत्रानुसारिप्रशस्तपादाचार्यवाक्यशब्दलिङ्गाविशेषादेकत्वं सिद्धमिति पूर्ववाक्ये एकत्वस्य प्रकृततया तदनुविधानात् एकत्वानुविधानात् पृथक्त्वं एकपृथक्त्वं सिद्धं इत्यर्थकतया तेन नानेकत्वविधानात् । पृथक्त्वमित्यर्थलाभः इत्यत **आह अत्र सूत्र इति** । पृथक्त्वपदेनेति पाठः । अस्य वाक्यस्य तद्ग्रन्थप्रकृतप्रमेयानुसारेण यत् विवक्षितार्थकत्वं तदाशयेन मूलकृता न प्रमाणीकरणं अपि तु भेदापरपर्यायपृथक्त्वस्यानेकत्वानुविधानरूपार्थान्तरं यद्विवक्षयात्रोदाहरणमिति न दोष इत्याशयः । ननु तथापि अनेकत्वेन भेदसाधनस्यासङ्गततया तत्रार्थान्तरवर्णनानुपपत्तिरिति चेत् अत्र ब्रूमः । नेदं अर्थान्तरं तत्रोपयुक्तं इत्यतः तदर्थतया वर्ण्यते इत्याशयो ग्रन्थकारस्यापि तु यथा एकपृथक्त्वं कुतः इत्याशङ्कापरिहारकतया तदनुविधानात् पृथक्त्वं इत्यस्य एकत्वव्यापकत्वात् पृथक्त्वं सिद्धं इति विवक्षितार्थसमर्पणं अनेन भवति । तथानेकत्वस्यानुविधानात् अनेकत्वव्यापकत्वात् अनेकत्वेन पृथक्त्वपदाभिहितभेदसिद्धिरिति विवक्षितार्थसमर्पणं भवतीति तद्वाक्यसमानन्यायतया विवक्षितार्थपरमिति वाक्यानुकरणमात्रमत्र विवक्षितं इत्याशयो ग्रन्थकारस्येति भावेन तथा वर्णनं क्रियते । अत एव सूत्रोपस्कारे नियमेन एकपृथक्त्वं एकत्वमनुविधत्ते इति एकपृथक्त्वसिद्धिः इत्येव व्याख्यानेऽपि टीकाकृता प्रकृतप्रमेयानुसारेण नियमेन पृथक्त्वं तदनेकत्वं अनुविधत्ते इत्यनेकत्वात् भेदसिद्धिः इत्येव व्याख्यातम् । यदत्र वैशेषिकैः पृथक्त्वस्वगुणत्वव्यवस्थापनाय पृथक्त्वं नान्योन्याभावः । अन्योन्याभावस्य घटः पटो न भवतीत्यादौ पञ्चम्यनपेक्षतया पृथक्त्वस्य

च घटात् पटः पृथक् इति पञ्चम्यपेक्षत्वेन विरुद्धस्वभावत्वेन तद्रूपत्वानुपपत्तेः इत्यादि कुसृष्टिं कल्पयद्भिः पृथक्त्वस्यान्योन्याभावरूपता नेत्युक्तम् । तदसत् । तैरपि पृथक् अन्यत् इतरत् भिन्नं अर्थान्तरं इत्येतेषां पर्यायत्वं इत्यभ्युपेतम् । तथैव सूत्रोपस्कारं किरणावल्योः अभिधानात् । अन्यत्वादिव्यवहारासाधारणकारणं पृथक्त्वमिति गङ्गापुरीव्याख्यानावसरे आदिपदेन भिन्नत्वादिपर्यायग्रहः षट्सहस्र्यां चोक्तेः । तथा चान्यत् भिन्नं पृथक् इत्यादेरेव कार्यत्वे घटात् पटो भिन्नः अन्यः इत्यत्रेव घटात् पटः पृथक् इत्यत्रापि पञ्चमीप्रयोगसम्भवेन अन्योन्याभावरूपतैव पृथक्त्वस्यास्तु । न हि अन्यदित्यादेः अन्योन्याभाववदित्यर्थात् अन्योऽर्थोऽस्ति । न च तत्रापि पृथक्त्वमेवार्थः । अत एवोक्तं किरणावल्याम् । तस्मात् पृथगित्यादीनां च योऽर्थः तत् पृथक्त्वं धर्मान्तरं आस्थेयमिति वाच्यम् । पञ्चमीप्रयोगतदभावरूपसाधकस्यान्यथासिद्धत्वात् । तथाहि । घटः पटो न भवति इत्याकारप्रतीतौ पञ्चम्यभावेऽपि न क्षतिः । नञर्थतयोल्लेखे तदभावेऽपि अन्यादिपदैरभिधाने अन्यारादित्यादिविधिप्राप्ततया पञ्चम्याः आवश्यकत्वोपपत्तेः । नञ्प्रयोगे समानाधिकरणसमासस्य नञि सूत्रेण विधानात् पञ्चम्याः अभावोपपत्तेश्च । अन्यथा घटो नास्तीति घटो भविष्यतीति च प्रतीत्योरपि नञर्थोल्लेखतदभावाभ्यां प्रागभावविषयत्वतदभावयोः आपातात् । मुद्गरेण घटो नष्टो ध्वस्तः इत्यादौ मुद्गरेण इत्यादेः प्रयोगेऽपि घटो नास्तीत्यत्र तदप्रयोगेण नष्टः इत्यप्रतीतेः । ध्वंसाविषयत्वापाताच्च । अन्ततः अघटः पटः घटो न भवति पटः इत्यादौ नञो लोपादिकृतवैलक्षण्यमाश्रित्य भिन्नविषयत्वमित्यपि स्यात् प्रलयादिशब्दानां नञपि अघटितत्वाभावेन अभाववाचकत्वानुपपत्तेश्च । अपि चान्यारादितरर्तेत्येतत्सूत्रीयान्यग्रहणस्य अर्थग्रहणतां व्याकुर्वाणैः वैयाकरणैरितरग्रहणस्य च प्रपञ्चार्थतां आश्रित्यान्यग्रहणेनान्यभिन्न इतर इत्येतेषां ग्रहणस्य व्याख्याततया तेषां पर्यायत्वेन कार्यतायाः भवताऽपि आश्रयणेन च पर्यायत्वसंरक्षणाय तद्योगे भिन्नविभक्तिराहित्यस्य वक्तव्यतया पृथक्शब्दे च अन्यारादित्यनेन पञ्चम्या इव पृथक्विना नानाभिरिति सूत्रेण पृथगादिशब्दयोगे तृतीयायाः पक्षे पञ्चमीद्वितीययोश्च विधानेन पृथक् रामेण रामात् रामं चेत्यादौ विभक्तित्रयदर्शनेनान्यादिशब्दयोगे च तृतीयाद्यभावेन तच्छब्दानामपि एकार्थतानुपपत्त्या पृथक्शब्दार्थात् अन्य एवान्यादिशब्दार्थोऽपि स्यात् इत्यादि बहुविकल्पावधानतः । गुणसङ्ख्यादिसूत्रेषु पृथक्त्वस्येव अन्यत्वादेरपि गणनायाः कर्तुं योग्यतया पर्यायेण अन्यत्वादेरपि प्रयोगापाताच्च । तस्मात् तदप्रयोजक एवंविधवैलक्षण्यस्य प्रयोजकेनावक्तव्यतया घटात् पटः पृथक् इति पृथक्शब्देनान्योन्याभावप्रतीतिदशायां पञ्चमीप्रयोगेऽपि घटः पटो न भवतीति नञा अन्योन्याभावप्रतीतिकाले पञ्चम्यप्रयोगोपपत्त्या या सर्वमुत्सार्य पृथक्त्वं अन्योन्याभावरूपं इत्यङ्गीकार्यम् । तदेतदाह **भेदापरपर्यायस्येति** । यद्वा स्वरूपभेद एव पृथक्त्वमस्तु । यदत्रोक्तम् । किरणावल्यां स्वरूपस्यावध्यनपेक्षत्वादित्यादि । तदसाधु । अस्मद्रीत्या भेदकार्यकारिविशेषमङ्गीकृत्य स्वरूपस्यावध्यनपेक्षत्वेऽपि तदात्मकभेदस्यावधिसापेक्षायाः उपपादयितुं शक्यत्वेन पृथक्त्वस्य भेदरूपत्वे बाधकाभावात् । तदेतदप्याह **भेदापरपर्यायस्येति** । पराभिमतस्वरूपभेदापरपर्यायस्येत्यर्थः । तदेवं भेदरूपत्वेऽनुपपत्त्यभावात् न गुणत्वं पृथक्त्वस्याग्रहेण स्वीकार्यमिति परकीयगुणत्वव्युत्पादनप्रकारायोगः इत्यलम् । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक्' इत्यत्र अन्योन्यभेदौ पृथक्पृथक्त्वं च अविदारणेऽपि वाक्यस्येत्यादौ च प्रतिपादयितुं प्रमेया-

नुसारेण अदृश्यत्वाधिकरणीयमूलानुसारेण च इदं प्रमेयं स्पष्टमपि बुद्धिपरीक्षार्थं पृथगेव योजितमेवेति क्षन्तुमर्हन्ति सन्तः । **तदुपपादयति इति** । तदुपपादकतया भाष्यं योजयति इत्यर्थः । **उक्तरूपेति** । **जडेष्वेव** इत्युक्तरूपेत्यर्थः । चैतन्यसामर्थ्यस्यैव धूमवान् इत्युक्तप्रसङ्गोपपादकत्वायोगात् तदनुरूपं घटकमाह **पर्वतेति** । व्याप्त्यभावशङ्कां अनुवदति **अविशेषादिति** । **अन्यतरमात्रेणेति** । अनेन तस्य तु इत्युत्तरभाष्येऽचिन्त्यशक्त्यभिधानं व्यर्थं इत्यादिराक्षेपः सूचितः । **परिहरन्निति** । अचिन्त्यशक्त्युक्तिपरस्य तु इत्येतत् अवतारव्याजेन तत्परिहारप्रतीतेः इति भावः । यद्यपि अविशेषाश्रयणप्रयोजनकथनपरतया एतद्ग्रन्थयोजनोत्तरं तस्य तु इत्येतदवतारो व्याख्येयः । तथापि सङ्गतिसौकर्यात् एवमुक्तम् ।

स०व्र०— प्रत्युक्तमिति । यतः कारकप्रश्नोऽयं न प्रमाणप्रश्न इत्यादिना प्रत्युक्तमित्यर्थः ।

विठ्ठल०— यथोक्तमिति । तार्किकैरित्यर्थः । तदनुविधानाद्बहुत्वसङ्ख्यानुविधानात्पृथग्भेद इत्यर्थः । नन्वीश्वरनियमनाभावे कृत्स्नप्रसक्त्यादिदोष इति वक्तव्यं प्रकृतत्वात् । तद्विना भिन्नाभिन्नता भवेदिति कथमुक्तमित्यतः पर्यवसानेन कृत्स्नप्रसक्त्यादिनोक्तमिति वक्तुमाह **एतदुक्तं भवतीति** । **कृत्येति** । आभिचारिकपिशाच इत्यर्थः । तर्हि तत्स्वभाव एव कारणमिति शङ्कते **स्वभाव इति** । विरुद्धश्चेत्युक्तमुपपादयति **न हीति** । **सद्वितीय इति** । अनेक इत्यर्थः । **प्रत्युक्तमिति** । यतः कारणप्रश्नो न प्रमाणप्रश्न इति प्रत्युक्तमित्यर्थः । कारणान्तरमाशङ्कते **चैतन्येति** । **इदमिति** । यत्र बहुत्वं तत्र भेदनियमेन चेतनेष्वित्येतदित्यर्थः । एवं तर्हि यत्र धूमवत्त्वं तत्र वह्निमत्त्वमिति नियमोऽन्यत्रैव न विवक्षितमहानसादौ । कुत एतदिति चेत् विवक्षितमहानसादिसामर्थ्यादिवेत्यपि वक्तुं शक्यत्वात् धूमवानपि कश्चिन्महानसो निरग्निको घटतामित्यभिप्रसङ्गः स्यादिति । परिहरति **धूमवानपीति** । **विशेषशक्त्येति** । भेदाभावेऽपि भेदप्रतिनिधिभूतविशेषेण बहुत्वमुपपद्यते । अतोऽतिप्रसङ्ग इति शङ्कते **विशेषशक्त्येति** ।

॥ इति पूर्वपक्षिणा स्वाभिसन्धावुद्घाटिते व्यक्ततया तत्परिहारः ॥

॥ इति 'निरवयवत्वशब्दकोपो वा' इत्यापादनस्योपपादनम् ॥

॥ इति विवक्षितार्थे सूत्रयोजना ॥

॥ इति एतदधिकरणीयभाष्योक्तार्थे अभ्यधिकाशङ्कानिरसनम् ॥

॥ इति इतरव्यपदेशाधिकरणम् ॥

॥ २-१-७ ॥

* * *

॥ अथ श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥

॥ २-१-८ ॥

ब्र०सू०— ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥

॥ अथ तत्रासम्भविताशङ्कानिरासकतया पूर्वाधिकरणशेषानुव्याख्यानयोजना ॥

११२ सु०— 'नन्वीश्वरस्यापि कर्तृत्वं न युज्यते, जीववत्कृत्स्नप्रसक्तेः । न हि ब्रह्माण्ड-पिपीलिका(ण्ड)निर्माणे समं सामर्थ्यं प्रयुञ्जानः प्रेक्षावान् भवति । गत्यन्तराभावान्न दोष इति चेन्न, ईश्वरत्वव्याघातात् । अथैतत्परिहारार्थमेकदेशेन प्रवृत्तिरङ्गीक्रियते तदा 'नेह नानेत्यादि' निरवयवत्वशब्दकोपः स्यात् ॥ शरीरेन्द्रियादिविकलत्वाच्च न कर्तृत्वम्, न हि कश्चिच्छरीरादिविकलः कर्तोपलब्धः; भूम्याद्याधारविधुरत्वाच्च । एवं दौर्घट्येऽपि यदि कर्तृत्वमीश्वरस्य स्यात् तदा जीवस्यापि किन्न स्यात्, विशेषादर्शनात् । एवञ्च सर्वकर्तृत्वं दूरनिरस्तमि'त्ययं पूर्वपक्षोऽत्राधिकरणे निरस्यते । तस्य तात्पर्यमाह तस्य त्विति ।

(अनु०— तस्य त्वशेषशक्तित्वाद्युज्यते सर्वमेव हि (च) ।)

तुशब्दो जीवाद्विशेषं द्योतयति । चशब्दो हेतुसमुच्चये । ईश्वरस्यालौकिकत्वश्रुते-रागमैकगम्यत्वेन युक्तिविरोधानवकाशात्; 'विचित्रशक्तिः पुरुषः', 'सर्वैर्युक्ता शक्तिभिर्देवता सा' इत्यादिश्रुतिभिर्विचित्राशेषशक्तित्वावगमाच्च । सर्वं भिन्नांशरहितस्यापि कार्येषु कृत्स्नप्रसक्त्यभावः, स्वरूपांशबाहुल्येऽपि भेदाभावः, अंशतः कार्यकरणेऽपि निरवयवत्वशब्दकोपाभावः, देहादिरहितस्यापि कर्तृत्वनिर्वाह इत्यादि, युज्यत इति ।

ननु दुर्घटमपि जीवकर्तृत्वमीश्वरशक्त्या घटत इत्यतीताधिकरणेऽभिहितम् । तथा च कथमत्र पूर्वपक्षावकाशः । यो हि परत्र प्रमितं घटयितुमीष्टे स स्वस्मिन्न ईष्टे इत्यसम्भावितम् । उच्यते । नैषोऽर्थः सूत्रकृताऽतीताधिकरणेऽभिहितः, किन्त्वागामिनमर्थं

मनसि निधाय जीवकर्तृत्ववादनिरास एव विहितः । भाष्यकारेण तु शिष्यहितैषिणा वक्ष्यमाणमप्यर्थमाकृष्य पूर्वोत्तरविरोधः परिहृत इति ।

परि०— 'तस्य त्वि'त्यादिना तात्पर्योक्तेः कः प्रसङ्ग इत्यतो व्यावर्त्यमाह **नन्वित्यादिना** । आद्यसूत्रव्यावर्त्यमाह **जीववत्कृत्स्नप्रसक्तेरिति** । एतेन पूर्वसिद्धान्तन्यायेन प्राप्तः पूर्वपक्षोऽत्रापोद्यते इत्यापवादिकी सङ्गतिरपि सूचिता । अस्तु को दोष इत्यत आह **न हीति** । **एकदेशेनेति** । पिपीलिकाण्डनिर्माणादाविति योज्यम् । विकरणत्वान्नेति चेदिति सौत्रशङ्काभागं व्यनक्ति **शरीरेति** । 'आत्मनि चैवं विचित्राश्च ही'ति सूत्रव्यावर्त्यमाह **एवं दौर्घट्येऽपीति** । **हेतुसमुच्चय इति** । 'आत्मनि चैव'मिति सूत्रोक्तविचित्राशेषशक्तित्वादिहेतुना सह श्रुतेस्त्विति सूत्रोक्तालौकिकत्वश्रवणागमैकगम्यत्वहेतोर्मूलानुक्तयोः समुच्चये वर्तत इत्यर्थः । तदेव व्यञ्जयन् श्रुतेरिति सूत्रहेत्वर्थमाह **ईश्वरस्यालौकिकत्वश्रुतेरिति** । योऽसौ विरुद्धोऽविरुद्ध इत्यादिभाष्योक्तश्रुतावलौकिकत्वश्रवणादित्यर्थः । 'शब्दमूलत्वादि'ति सूत्रांशतात्पर्यार्थमाह **आगमैकेति** । **युक्तिविरोधेति** । एतेन 'शास्त्रयोनित्वादि'त्यत्र युक्तेरलौकिकार्थे साधकता नेत्युक्तमिह तु विरोधकत्वं नेत्युच्यत इत्यगतार्थता च सूचिता । 'आत्मनि चैवं विचित्राश्च हि', 'सर्वोपेता च तद्दर्शनादि'ति सूत्रद्वयोक्तं मूलोपात्तहेतुं सप्रमाणकमाह **विचित्रेति** । इत्यादिश्रुतिभिर्भाष्योक्ताभिरिति योज्यम् । सर्वमिति अनुवादः भिन्नेत्यारभ्य इत्यादीत्यन्तं व्याख्या । **वक्ष्यमाणमिति** । श्रुतेस्त्वित्यत्र नये वक्ष्यमाणमित्यर्थः । **पूर्वोत्तरेति** । कृत्स्नप्रसक्त्यादिनोक्तकर्तृत्वाक्षेपस्य 'कर्ता शास्त्रार्थवत्त्वादि'ति वक्ष्यमाणकर्तृत्वस्य च विरोधः अचिन्त्यशक्तिकेश्वराधीनकर्तृत्वतात्पर्यकत्वं कर्तृत्वाक्षेपस्येति वर्णनेन परिहृत इत्यर्थः ।

यादु०— तुशब्दसूचितं श्रुतेस्त्वित्यस्य व्याख्यानं दर्शयति **अलौकिकत्वश्रुतेरिति** । शब्दमूलत्वादित्यस्य व्याख्यानं दर्शयति **आगमैकगम्यत्वेनेति** । इदमपि तुशब्देनैव सूचितमिति ज्ञातव्यम् । 'आत्मनि चैवं विचित्राश्च हि', 'सर्वोपेता च तद्दर्शनादि'ति सूत्रद्वयतात्पर्यप्रदर्शकतयाऽशेषशक्तित्वादित्येतद्व्याचष्टे **विचित्रशक्तिरित्यादिना** । **वक्ष्यमाणमिति** । आत्मनि चैवमित्यादिना वक्ष्यमाणमित्यर्थः । **पूर्वोत्तरविरोध इति** । कृत्स्नप्रसक्तिरिति पूर्वस्य, कर्ता शास्त्रार्थवत्त्वादित्युत्तरस्य च विरोधः परिहृत इत्यर्थः ।

वं०प०— **हेतुसमुच्चय इति** । 'आत्मनि चैवम्', 'सर्वोपेता चे'ति सूत्रद्वयलब्धहेतुप्रदर्शनमशेषशक्तित्वादित्यनेन कृतम् । श्रुतेस्तु शब्दमूलत्वादिति सूत्रोक्तयोरलौकिकत्वश्रुतिशब्दमूलकत्वेन युक्तिविरोधा-

नवकाशरूपहेत्वोः समुच्चये चशब्द इत्यर्थः । **कर्तृत्ववादेति** । स्वातन्त्र्येण कर्तृत्ववादेत्यर्थः । **वक्ष्यमाणमिति** । 'आत्मनि चैवमि'त्यादिनेति शेषः । **पूर्वोत्तरेति** । 'इतरव्यपदेशादि'ति पूर्वस्य 'कर्ता शास्त्रार्थवत्त्वादि'त्युत्तरस्य च विरोधः परिहृत इत्यर्थः ।

कं०रा०— एतत्सूत्रनिरसनीयपूर्वपक्षं दर्शयति **नन्वित्यादिना** । **नेह नानेति** । 'नेह नानास्ति किं च ने'त्यादिनेश्वरे गुणगुण्यवयवावयव्यादिभेदस्य निषिद्धत्वादीश्वरस्यैकदेशेन पिपीलिकाण्डनिर्माणादौ प्रवृत्त्यङ्गीकारे नेहनानेत्यादिशब्दव्याकोप इति भावः । **शरीरेन्द्रियादिविकलत्वाच्चेति** । ईश्वरस्य शरीरेन्द्रियादिविकलत्वाच्च न कर्तृत्वमित्यर्थः । **तस्येति** । श्रुतेस्तु शब्दमूलत्वादित्यधिकरणस्येत्यर्थः ।

श्रीनिधि०— **भूम्याद्याधारेति** । आदिसृष्टौ भूम्यादेरभावादिति भावः । हेतुसमुच्चयं दर्शयति **ईश्वरस्यालौकिकत्वेत्यादिना** । अयं श्रुतेरिति सूत्रभागस्यार्थः । आगमैकगम्यत्वेनेत्यादि तु शब्दमूलत्वादित्यंशस्य सर्वमित्यनेन सङ्गाहं दर्शयति **भिन्नांशरहितस्यापीति** ।

शे०वा०— श्रुतेस्त्वित्यधिकरणस्य मूलेऽव्याख्यातत्वात् स्वव्याख्यानदृढीकरणार्थापव्याख्याननिराकरणपरोत्तरभाष्यानर्थक्यमाशङ्क्य पूर्वाधिकरणदोषतया योजितस्य 'तस्य त्वि'त्यादिभाष्यस्यैवैतदधिकरणव्याख्यानरूपत्वान्न भाष्ये स्वव्याख्यानदृढीकरणार्थापव्याख्याननिराकरणपरोत्तरभाष्यानर्थक्यमित्यभिप्रेत्यैतदधिकरणतात्पर्यकथनरूपतया भाष्यं योजयितुमेतदधिकरणपूर्वपक्षमनुवदति **नन्विति** । कृत्स्नप्रसक्तावनुभवविरोधस्य पूर्वत्रिवात्रायोगात् तत्प्रयुक्तदोषान्तरमाह **न हीति** । **न दोष इति** । समसामर्थ्यप्रयोगो नाप्रेक्षावत्त्वप्रसङ्गरूपदोषहेतुरित्यर्थः । नन्वेकदेशेन प्रवृत्तावपि 'नेह नाने'त्यादिश्रुतिविरोधः । एकदेशस्य भेदानङ्गीकारादित्यतो 'विकरणत्वादि'त्यादिना बाधकतया शङ्कितं 'सम्बन्धानुपपत्तेरि'त्यादिनाऽन्यत्रोपपादितं हेत्वन्तरमाह **शरीरेति** । 'अधिष्ठानानुपपत्तेश्चे'ति सूत्रोक्तं हेतुमाह **भूम्यादीति** । यद्यप्यारम्भणाधिकरणे स्वाधीनसत्ताशक्त्यादिमदुपादानादिकमस्तीति समर्थितं तथाऽपि स्वाधीनसत्ताशक्त्यादिमति स्वयं कथं तिष्ठेदित्याशयेनेदमुक्तमिति ध्येयम् । ननु चैतेषां जीवपक्ष एव दोषत्वं नेश्वरपक्षेऽपीति न तस्य कर्तृत्वानुपपत्तिरित्यत आह **विशेषेति** । ईश्वरे तदस्पर्शे निमित्तस्य जीवादतिशयस्यादर्शनादित्यर्थः । ततश्च विशेषमन्तरेणापि दोषासंस्पर्शे किं जीवेनापराद्धमिति भावः । भाष्ये तुशब्दस्यानर्थक्यमाशङ्क्येश्वरे दोषास्पर्शे निमित्तभूतस्य जीवापेक्षयाऽतिशयस्य तदभावशङ्कापरिहाराय द्योतनार्थत्वान्नानर्थक्यमित्यभिप्रायेण तदर्थमाह **तुशब्द इति** । अनेन तुशब्दो विशेषार्थ इत्युक्तं भवति । 'श्रुतेस्तु शब्दमूलत्वादि'ति सूत्रे श्रुतेरित्यनेन श्रुतिमूलत्वादित्यनेन चोक्तहेतुभ्यां सह 'आत्मनि' इति, 'सर्वोपेता' इति सूत्रद्वयकथितयुक्तेः समुच्चये भाष्ये एवशब्द इत्याह **चशब्द इति** । अनेनाशेषशक्तित्वाच्चेति भिन्नक्रमतया चशब्दसम्बन्ध उक्तो भवति । समुच्चयहेतुरूपं दर्शयन् प्रकृताशेषाक्षेपसमाधानपरतया वाक्यं योजयति **ईश्वरस्येत्यादिना** । देहादीत्यादिपदेनेन्द्रियादिपरिग्रहः । इत्यादीत्यादिपदेन भूम्याधाररहितस्यापि कर्तृत्वनिर्वाहपरिग्रहः ।

'तस्य त्वशेषशक्तित्वादि'ति भाष्यानुरोधादशेषशक्तित्वयुक्तिः पूर्वाधिकरणोक्तैवेति मत्वाऽधिकरणारम्भमाक्षिपति **नन्विति** । उक्तयुक्तेः पूर्वाधिकरणे सूत्रकारेणानुक्तेर्न गतार्थत्वमित्याह **उच्यत इति** । कथं तर्हि पूर्वाधिकरणसिद्धान्तनिर्वाह इति शङ्कते **किन्त्विति** । परिहरति **आगामिनमिति** । कथं तर्हि भाष्येऽशेषशक्तित्वोपन्यास इत्यत आह **भाष्यकारेण त्विति** । **पूर्वोत्तरविरोध इति** । कृत्स्नप्रसक्तिरिति पूर्वस्य कर्ता शास्त्रार्थवत्त्वादित्याद्युत्तरेण विरोध इत्यर्थः ।

बा०र०— उत्तरभाष्येति । विरोधसर्ववैशिष्ट्यः इत्युत्तरभाष्येत्यर्थः । **आनर्थक्यमिति** । आनर्थक्यमित्याशङ्क्येत्यर्थः । **भाष्यमिति** । तस्य तु इत्येतद्भाष्यमित्यर्थः । **कृत्स्नप्रसक्ताविति** । अस्तु कृत्स्नप्रसक्तिः इति इष्टापत्तिरूपायाः परिहारः पूर्वं तथा चानुभवविरोधः । **इत्यनुभवविरोध इति** । अनुभवविरोधेन कृतः । तथात्र नेष्टापत्तिः परिहारः सम्भवति इत्यर्थतः इत्यर्थः । ईश्वरविषयेऽस्मदनुभवाप्रसरात् इति भावः । दोषपदं तद्धेतुत्वार्थपरतया त्रायित इति बोधयितुं तथैव व्याचष्टे **दोषहेतुरित्यर्थ इति** । **विकरणत्वादित्यादिनेति** । आदिपदेन नेति चेत् इत्यंशपरिग्रहः । सम्बन्धानुपपत्तेरित्यादिनेत्यादिपदेन तत्सूत्रीयभाष्यपरिग्रहः । सूत्रैकदेशोपादानत्वात् न च शब्दानुपादानदोषः । **अन्यत्रेति** । पत्युरसामञ्जस्यादित्यधिकरणेत्यर्थः । सूत्रोक्तमित्यत्रापि अन्यत्रेत्येतद्योज्यम् । उक्त एवार्थः । **श्रुतिमूलत्वादित्यनेन चेति** । सौत्रशब्दस्य श्रुतिपदेन व्याख्यानं तु मूले शब्दपदस्यागमार्थतया व्याख्याकृतं न तत्तावन्मात्रेव पर्यवसायि । किन्तु 'औपनिषदः पुरुषः' इत्यादिश्रुतिभिः भगवतः औपनिषदत्वप्रतिपादनात् अपौरुषेयागमपर्यवसन्नम् । पौरुषेयागमोऽपि अपौरुषेयागममूलकतया एव प्रमाणमिति न दोष इति सूचयितुमिति ज्ञेयम् । तस्य त्वशेषशक्तित्वादिति भाष्यानुरोधादिति शक्तिपदयुक्तः पाठः । कर्तृपदं लेखकागतम् । **इत्याहेति** । इति समाधत्ते इत्यर्थः ।

स०व्र०— ईश्वरत्वव्याघातादिति । अल्पं सामर्थ्यं प्रयोक्तुं सामर्थ्याभावे ईश्वरत्वमनुपपन्नमित्यर्थः । **वक्ष्यमाणमिति** । 'श्रुतेस्तु शब्दमूलत्वात्' इत्यत्र वक्ष्यमाणमित्यर्थः । **पूर्वोत्तरविरोध इति** । 'इतरव्यपदेशात्' इति पूर्वस्य, 'कर्ता शास्त्रार्थवत्त्वात्' इत्युत्तरस्य च विरोधः परिहृत इत्यर्थः ।

विठ्ठल०— 'तस्य त्वि'त्यादिना अधिकरणतात्पर्योक्तेः प्रसञ्जकमाह **नन्वित्यादिना** । आद्यसूत्रव्यावृत्तिमाह **जीवकृत्स्नप्रसक्तेरिति** । 'विकरणत्वान्नेति चेदि'ति श्रौत्रशङ्काभागं व्यनक्ति **शरीरेति** । 'आत्मनि चैवं', 'सर्वोपेतेति' सूत्रद्वयं व्यावृत्त्यर्थम् । **एवं दौर्घट्येऽपीति** । **हेतुसमुच्चय इति** । 'आत्मनि चैवमि'त्यादिसूत्रोक्तविचित्राशेषशक्तिहेतुना सह श्रुतेस्त्विति सूत्रोक्तालौकिकत्वश्रवणागमैकगम्यत्वहेतोर्मूलानुक्तयोः समुच्चये वर्तत इत्यर्थः । एतदेव दर्शयन् तुशब्देन दर्शितं सूत्रव्याख्यानं दर्शयति **ईश्वरस्यालौकिकत्वश्रुतेरिति** । योऽसौ विरुद्धोऽविरुद्ध इत्यादि श्रुतेऽपीत्यर्थः । ननु श्रुतिप्रतिपाद्यत्वेऽपि नेदमङ्गीकर्तुं शक्यं युक्तिविरुद्धत्वादित्यतः शब्दमूलत्वादित्यंशतात्पर्यमाह **आगमेति** । 'आत्मनि चैवं विचित्राश्च हि', 'सर्वोपेता च तद्दर्शनादिति' सूत्रद्वयतात्पर्यदर्शकतया शेषशक्तित्वादित्येतद्व्याख्याति **विचित्रशक्ति-**

रित्यादिना । इत्यादि सर्वं युज्यत इति सम्बन्धः । **पूर्वोत्तरविरोध इति** । कृत्स्नप्रसक्तिरिति पूर्वस्य कर्ता शास्त्रार्थवत्त्वात् व्यतिरेको गन्धवत् उत्क्रान्तिगत्यागतीनामित्युत्तरत्र विरोधः परिहृत इत्यर्थः ।

॥ इति तत्राभ्यधिकाशङ्कानिरासकतया पूर्वाधिकरणशेषानुव्याख्यानयोजना ॥

* * *

॥ अथ उक्तार्थस्योपपादनम् ॥

॥ अथ तत्रादौ परोक्तसूत्रार्थे असङ्गत्यादिमूलकानुपपत्तिप्रदर्शनम् ॥

॥ अथ तत्राप्यादौ परिणामवाद्युक्तसूत्रार्थानुपपत्तिप्रदर्शनम् ॥

११३ सु०— परिणामवादिनो विवर्तवादिनश्च 'ब्रह्मणो जगदुपादानत्वं कृत्स्नप्रसक्तिरित्यनेनाक्षिप्य श्रुतेस्त्वित्यादिना समाधीयत' इति व्याचक्षते । तथा हि । न ब्रह्म जगदुपादानम्, यतस्तथात्वे कृत्स्नस्यापि ब्रह्मणः कार्याकारताप्रसक्तिः स्यात्, स्थितौ च ब्रह्माभावे तद्दर्शनोपदेशानर्थक्यादि स्यात् । अथैतद्दोषपरिजिहीर्षया ब्रह्म एकदेशेन परिणमते एकदेशेन चावतिष्ठत इत्युच्यते तदा 'निष्कलं शान्तमि'त्यादिनिरवयवत्वशब्दकोपः स्यादिति । अत्रोच्यते । नायं दोषः, 'तदात्मानं स्वयमकुरुते'त्यादिश्रुतेर्ब्रह्मणो जगदुपादानत्वस्य कृत्स्नपरिणामाभावस्य चावगमात्, शब्दमूलत्वेन युक्तिविरोधानवकाशाच्च । अपि च सर्वशक्त्युपेता च परदेवता श्रूयते, 'सर्वकर्मा सर्वकामः' इत्यादि । ततो निरवयवस्यापि ब्रह्मणः कृत्स्नप्रसक्त्यभावेनैव जगदुपादानत्वमुपपन्नमित्यादि ।

तदेतद्व्याख्यानमनुपपन्नम्, एवं सति एषां सूत्राणामेतदध्यायान्तर्भावलक्षणसङ्गत्यभावप्रसङ्गात् ।

तत्कथमित्यत आह **विरोध इति** ।

अनु०— विरोधः सर्ववैशिष्ट्ये यो द्वितीये निरस्यते ।
नारायणस्य त्वध्याये

तुशब्दोऽवधारणे । परब्रह्मणो नारायणस्य सर्वस्माच्चेतनादचेतनाच्च वैशिष्ट्ये वैलक्षण्ये परमोत्कृष्टत्वेऽत्यन्तव्यावृत्तत्वे च यो युक्त्यादिविरोधः स एवात्र द्वितीये

अध्याये निरस्यते । सकलजगदुपादानत्वेन सर्वात्मकत्वं तु न सर्ववैशिष्ट्यम्, नापि तदुपयुक्तम्; प्रत्युत विरुद्धमेव । तत्कथं तत्र विरोधपरिहारोऽत्रान्तर्भावमासादयेत् ।

परि०— परमते कृत्स्नप्रसक्तिरिति पूर्वपक्षसूत्रं श्रुतेस्त्वित्यादीनि त्रीणि सिद्धान्तसूत्राणि सर्वोपेता चेति सूत्रद्वयमधिकरणान्तरं तत्र सूत्रचतुष्टयतात्पर्यार्थमनुवदति **परिणामेत्यादिना** । पूर्वपक्षसूत्रार्थमनुवदति **न ब्रह्मेति** । **तद्दर्शनोपदेशेति** । 'आत्मा वा अरे द्रष्टव्यः' इति ब्रह्मदर्शनार्थं श्रवणाद्युपदेशस्य 'सत्यं ज्ञानमि'त्यादिब्रह्मस्वरूपोपदेशस्य च वैयर्थ्यादित्यर्थः । आदिपदेन ब्रह्म-भावापत्तिरूपमोक्षाभावादिग्रहः । **अत्रोच्यत इति** । एवं पूर्वपक्षे सिद्धान्त उच्यत इत्यर्थः । पररीत्या सूत्रार्थव्यक्तीकरणेन तदीयसिद्धान्तमनुवदति **नायं दोष इत्यादिना** । श्रुतेस्त्विति सूत्रार्थमनूद्य सर्वोपेतेत्येतदर्थमनुवदति **अपि चेति** । ब्रह्मतन्त्रे नारायणस्य का प्रसक्तिरित्यत आह **परब्रह्मण इति** । 'स एव ब्रह्मशब्दार्थो नारायणपदोदित' इति प्रागेवोक्तेरिति भावः । 'पञ्चमी भयेने'त्यत्र योगविभागात्समास इति भावेन सर्ववैशिष्ट्य इत्यस्यार्थमाह **सर्वस्मादिति** । **वैलक्षण्य इति** । जगज्जनकत्वादिविशिष्टलक्षणवत्त्वे । यद्वा लोकानन्तर्गतत्वेनालौकिकत्व इत्यर्थः । अत्यन्तव्यावृत्तत्वे च अत्यन्तभिन्नत्वे चेत्यर्थः । भेदाभेदव्यावृत्त्यर्थमत्यन्तपदम् । तुशब्दार्थः स एवेति । **विरुद्ध-मेवेति** । सर्वाभेदे सर्वस्माद्वैशिष्ट्यमित्यस्यायोगादिति भावः ।

यादु०— **कृत्स्नपरिणामाभावस्य चेति** । तदिति कर्तृतया निर्दिष्टस्यापरिणतभागस्यापि श्रवणादिति भावः ।

वं०प०— **कृत्स्नपरिणामाभावस्येति** । तदात्मानमित्यत्र निमित्तोपादानत्वस्य प्रतिपादनेन यदा तदिति निमित्तत्वं कथ्यते तदैकदेशेनावस्थितमिति प्राप्त्या कृत्स्नपरिणामाभावो गम्यत इत्यर्थः । **प्रत्युतेति** । उच्चनीचवस्त्वाकारेण परिणमनवतः सर्वोत्तमत्वानुपपत्तेरित्यर्थः ।

कं०रा०— **निष्कलमिति** । निर्गताः कला अवयवाः यस्मात् तन्निष्कलमिति निष्कलशब्देन निरवयवत्वप्रतीतेरयं शब्दो निरवयवत्वप्रतिपादक इति भावः । **तदात्मानमिति** । अत्र तदात्मानमिति ब्रह्मणः कृतिकर्मत्वश्रवणादुपादानत्वमकुरुतेति कर्तृत्वश्रवणात् कृत्स्नपरिणामाभावश्चावगम्यत इति भावः । **सर्वकर्मा सर्वकाम इत्यादीति** । इत्यादीति क्रियाविशेषणम् । अत्र सर्वकामपदेन परमात्मनो अवाप्तसकलकामत्वोक्तेः सर्वशक्त्युपेतत्वं श्रूयत इति भावः ।

श्रीनिधि०— वैशिष्ट्य इत्यस्यार्थः **परमोत्कृष्टत्व इति**। उपलक्षणतया तेन ज्ञाप्यं च गृह्यत इत्याह **अत्यन्तव्यावृत्तत्वे चेति**।

शे०वा०— 'विरोधः सर्ववैशिष्ट्ये' इत्याद्युत्तरभाष्यानर्थक्यमाशङ्क्य कृत्स्नप्रसक्तिरित्याद्ये तदधिकरणीयापव्याख्याननिरासार्थत्वान्न तदिति भावेन तन्निरासकतया तद्योजयितुं तदनुवदति **परिणामवादिन इत्यादिना**। यदि क्षीरमिव दध्यात्मना ब्रह्म जगदाकारेण परिणमेत् तदा साकल्येन वैकदेशेन वा परिणमेदिति विकल्पं मनसि निधायाद्यं दूषयति **यतस्तथात्व इति**। अस्तु कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः किं तावतेत्याह **स्थितौ चेति**। कृत्स्नस्यापि ब्रह्मणः कार्याकारताप्रसक्तौ स्थितायामित्यर्थः। ततश्च ब्रह्माभावः स्यादित्याशयः। अस्त्वेवं ब्रह्माभावस्ततोऽपि किमित्याह **ब्रह्माभाव इति**। 'आत्मा वा अरे द्रष्टव्यः' इति तद्द्रष्टव्यतोपदेशानर्थक्यं स्यादित्यर्थः। कार्यस्यायवदृष्टत्वात् तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादिति भावः। आदिपदेन ब्रह्मणः साकल्येन कार्यात्मना जन्माभ्युपगमे 'न जायते न म्रियत' इत्यजत्वादिप्रतिपादकश्रुतिस्मृतिव्याकोपपरिग्रहः। अस्तु तर्हि द्वितीयस्तत्रोक्तदोषाप्रसरादिति शङ्कते **अथेति**। इत्यादीत्यादिपदेन 'निरवद्यं निरञ्जनं', 'दिव्यो ह्यमूर्त इत्यादिवाक्यपरिग्रहः। 'तदात्मानं स्वयमकुरुते'त्यादिश्रुतेरित्यत्रादिपदेन 'सेयं देवतैक्षत हन्ताहम्', 'इमास्तिस्रो देवता' इत्यादिश्रुतिपरिग्रहः। **कृत्स्नपरिणामाभावस्य चेति**। तदिति कर्तृतया निर्दिष्टस्यापरिणतभागस्यापि श्रवणादिति भावः। ननु विरोध इत्युत्तरभाष्ये परकीयसूत्रव्याख्याननिरासो न प्रतीयत इति न तत्परतया भाष्ययोजनमुचितमित्यतो न सूत्रार्थनिराकरणमेव तन्निराकरणम् अपि त्वसङ्गतिनिरूपणमपि। तथा चासङ्गतिनिरूपणपरस्यास्य युक्तं तन्निरासकत्वमिति भावेनासङ्गत्युपपादकतया तद्योजयितुमध्यायासङ्गतिं तावदुद्भावयति **एवं सतीति**।

वा०र०— **उत्तरभाष्येति**। प्रागुक्ताप्याशङ्काप्रघटकविशेषव्यावृत्ततया अत्रोक्तेति पुनराशङ्कोक्तिर्युक्तेति ज्ञेयम्। **प्रसक्तिरित्यादीति**। आदिपदेनावृत्तेन सूत्रशेषपरिग्रहः। तथा च कृत्स्नेत्येतत् सूत्रं आदिर्यस्य तत्तथोक्तं एवंविधं यदेतदधिकरणं तदीयेति योजना। अनेन परपक्षे कृत्स्नेति सूत्रे एतच्छेष इति स्वीकारोऽस्तीति अस्मन्मतवैलक्षण्यं दर्शितम्। ब्रह्मैकदेशेन परिणामत इति उत्तरकल्पानुसारेण न ब्रह्म जगदुपादानं इति सामान्यविशेषे पर्यवसानं दर्शयितुं कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति। निरवयवत्वात् इत्यादिभाष्याद्यनुसारेण विकल्पयति **यदि क्षीरमिवेत्यादिना**। कृत्स्नपरिणामप्रसक्तौ सत्यां इत्येतद्भाष्यानुरोधेन व्याचष्टे **कृत्स्नस्यापीति**। मूलोच्छेदः प्रसज्यतेति भाष्यानुसारेणोक्तम्। **ततश्च ब्रह्माभावः इति**। भाष्यानुसारेणाह **आत्मा वेत्यादि**। अतत्वादिशब्दव्याकोपश्चेति भाष्यानुसारेणाह **आदिपदेनेति**। प्रत्येकं नशब्दसम्बन्धाश्रयणं तद्ग्रन्थेऽस्ति। भाष्योक्तश्रुत्यन्तरमाह **इत्यादीत्यादिपदेनेति**। एवंजातीयकान् इति भाष्योक्तश्रुतिरेव तदात्मानं इति एषा मूले उक्ता। मुखतो भाष्योक्तश्रुत्यन्तरमादिपदेन ग्राह्यं इत्याशयेनाह **तदात्मानं स्वयमिति**। 'आत्मकृतेः परिणामादि'ति सूत्रे कर्तृत्वं कर्मत्वं चेति भगवतः इत्यर्थे इयं श्रुतिः भाष्ये

अध्याये निरस्यते । सकलजगदुपादानत्वेन सर्वात्मकत्वं तु न सर्ववैशिष्ट्यम्, नापि तदुपयुक्तम्, प्रत्युत विरुद्धमेव । तत्कथं तत्र विरोधपरिहारोऽत्रान्तर्भावमासादयेत् ।

परि०— परमते कृत्स्नप्रसक्तिरिति पूर्वपक्षसूत्रं श्रुतेस्त्वित्यादीनि त्रीणि सिद्धान्तसूत्राणि सर्वोपेता चेति सूत्रद्वयमधिकरणान्तरं तत्र सूत्रचतुष्टयतात्पर्यार्थमनुवदति **परिणामेत्यादिना** । पूर्वपक्षसूत्रार्थमनुवदति **न ब्रह्मेति** । **तद्दर्शनोपदेशेति** । 'आत्मा वा अरे द्रष्टव्यः' इति ब्रह्मदर्शनार्थं श्रवणाद्युपदेशस्य 'सत्यं ज्ञानमि'त्यादिब्रह्मस्वरूपोपदेशस्य च वैयर्थ्यादित्यर्थः । आदिपदेन ब्रह्म-भावापत्तिरूपमोक्षाभावादिग्रहः । **अत्रोच्यत इति** । एवं पूर्वपक्षे सिद्धान्त उच्यत इत्यर्थः । पररीत्या सूत्रार्थव्यक्तीकरणेन तदीयसिद्धान्तमनुवदति **नायं दोष इत्यादिना** । श्रुतेस्त्विति सूत्रार्थमनूद्य सर्वोपेतेत्येतदर्थमनुवदति **अपि चेति** । ब्रह्मतन्त्रे नारायणस्य का प्रसक्तिरित्यत आह **परब्रह्मण इति** । 'स एव ब्रह्मशब्दार्थो नारायणपदोदित' इति प्रागेवोक्तेरिति भावः । 'पञ्चमी भयेने'त्यत्र योगविभागात्समास इति भावेन सर्ववैशिष्ट्य इत्यस्यार्थमाह **सर्वस्मादिति** । **वैलक्षण्य इति** । जगज्जनकत्वादिविशिष्टलक्षणवत्त्वे । यद्वा लोकानन्तर्गतत्वेनालौकिकत्व इत्यर्थः । अत्यन्तव्यावृत्तत्वे च अत्यन्तभिन्नत्वे चेत्यर्थः । भेदाभेदव्यावृत्त्यर्थमत्यन्तपदम् । तुशब्दार्थः स एवेति । **विरुद्ध-मेवेति** । सर्वाभेदे सर्वस्माद्वैशिष्ट्यमित्यस्यायोगादिति भावः ।

यादु०— **कृत्स्नपरिणामाभावस्य चेति** । तदिति कर्तृतया निर्दिष्टस्यापरिणतभागस्यापि श्रवणादिति भावः ।

वं०प०— **कृत्स्नपरिणामाभावस्येति** । तदात्मानमित्यत्र निमित्तोपादानत्वस्य प्रतिपादनेन यदा तदिति निमित्तत्वं कथ्यते तदैकदेशेनावस्थितमिति प्राप्त्या कृत्स्नपरिणामाभावो गम्यत इत्यर्थः । **प्रत्युतेति** । उच्चनीचवस्त्वाकारेण परिणमनवतः सर्वोत्तमत्वानुपपत्तेरित्यर्थः ।

कं०रा०— **निष्कलमिति** । निर्गताः कला अवयवाः यस्मात् तन्निष्कलमिति निष्कलशब्देन निरवयवत्वप्रतीतेरयं शब्दो निरवयवत्वप्रतिपादक इति भावः । **तदात्मानमिति** । अत्र तदात्मानमिति ब्रह्मणः कृतिकर्मत्वश्रवणादुपादानत्वमकुरुतेति कर्तृत्वश्रवणात् कृत्स्नपरिणामाभावश्चावगम्यत इति भावः । **सर्वकर्मा सर्वकाम इत्यादीति** । इत्यादीति क्रियाविशेषणम् । अत्र सर्वकामपदेन परमात्मनो अवाप्तसकलकामत्वोक्तेः सर्वशक्त्युपेतत्वं श्रूयत इति भावः ।

श्रीनिधि०— वैशिष्ट्य इत्यस्यार्थः **परमोत्कृष्टत्व इति**। उपलक्षणतया तेन ज्ञाप्यं च गृह्यत इत्याह **अत्यन्तव्यावृत्तत्वे चेति**।

शे०वा०— 'विरोधः सर्ववैशिष्ट्ये' इत्याद्युत्तरभाष्यानर्थक्यमाशङ्क्य कृत्स्नप्रसक्तिरित्याद्ये तदधिकरणीयापव्याख्याननिरासार्थत्वान्न तदिति भावेन तन्निरासकतया तद्योजयितुं तदनुवदति **परिणामवादिन इत्यादिना**। यदि क्षीरमिव दध्यात्मना ब्रह्म जगदाकारेण परिणमेत् तदा साकल्येन वैकदेशेन वा परिणमेदिति विकल्पं मनसि निधायाद्यं दूषयति **यतस्तथात्व इति**। अस्तु कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः किं तावतेत्याह **स्थितौ चेति**। कृत्स्नस्यापि ब्रह्मणः कार्याकारताप्रसक्तौ स्थितायामित्यर्थः। ततश्च ब्रह्माभावः स्यादित्याशयः। अस्त्वेवं ब्रह्माभावस्ततोऽपि किमित्याह **ब्रह्माभाव इति**। 'आत्मा वा अरे द्रष्टव्यः' इति तद्द्रष्टव्यतोपदेशानर्थक्यं स्यादित्यर्थः। कार्यस्यायद्दृष्टत्वात् तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादिति भावः। आदिपदेन ब्रह्मणः साकल्येन कार्यात्मना जन्माभ्युपगमे 'न जायते न म्रियते' इत्यजत्वादिप्रतिपादकश्रुतिस्मृतिव्याकोपपरिग्रहः। अस्तु तर्हि द्वितीयस्तत्रोक्तदोषाप्रसरादिति शङ्कते **अथेति**। इत्यादीत्यादिपदेन 'निरवद्यं निरञ्जनं', 'दिव्यो ह्यमूर्त इत्यादिवाक्यपरिग्रहः। 'तदात्मानं स्वयमकुरुते'त्यादिश्रुतेरित्यत्रादिपदेन 'सेयं देवतैक्षत हन्ताहम्', 'इमास्तिस्रो देवता' इत्यादिश्रुतिपरिग्रहः। **कृत्स्नपरिणामाभावस्य चेति**। तदिति कर्तृतया निर्दिष्टस्यापरिणतभागस्यापि श्रवणादिति भावः। ननु विरोध इत्युत्तरभाष्ये परकीयसूत्रव्याख्याननिरासो न प्रतीयत इति न तत्परतया भाष्ययोजनमुचितमित्यतो न सूत्रार्थनिराकरणमेव तन्निराकरणम् अपि त्वसङ्गतिनिरूपणमपि। तथा चासङ्गतिनिरूपणपरस्यास्य युक्तं तन्निरासकत्वमिति भावेनासङ्गत्युपपादकतया तद्योजयितुमध्यायासङ्गतिं तावदुद्भावयति **एवं सतीति**।

वा०र०— **उत्तरभाष्येति**। प्रागुक्ताप्याशङ्काप्रघटकविशेषव्यावृत्ततया अत्रोक्तेति पुनराशङ्कोक्तिर्युक्तेति ज्ञेयम्। **प्रसक्तिरित्यादीति**। आदिपदेनावृत्तेन सूत्रशेषपरिग्रहः। तथा च कृत्स्नेत्येतत् सूत्रं आदिर्यस्य तत्तथोक्तं एवंविधं यदेतदधिकरणं तदीयेति योजना। अनेन परपक्षे कृत्स्नेति सूत्रे एतच्छेष इति स्वीकारोऽस्तीति अस्मन्मतवैलक्षण्यं दर्शितम्। ब्रह्मैकदेशेन परिणामत इति उत्तरकल्पानुसारेण न ब्रह्म जगदुपादानं इति सामान्यविशेषे पर्यवसानं दर्शयितुं कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति। निरवयवत्वात् इत्यादिभाष्याद्यनुसारेण विकल्पयति **यदि क्षीरमिवेत्यादिना**। कृत्स्नपरिणामप्रसक्तौ सत्यां इत्येतद्भाष्यानुरोधेन व्याचष्टे **कृत्स्नस्यापीति**। मूलोच्छेदः प्रसज्यतेति भाष्यानुसारेणोक्तम्। **ततश्च ब्रह्माभावः इति**। भाष्यानुसारेणाह **आत्मा वेत्यादि**। अतत्वादिशब्दव्याकोपश्चेति भाष्यानुसारेणाह **आदिपदेनेति**। प्रत्येकं नशब्दसम्बन्धाश्रयणं तद्ग्रन्थेऽस्ति। भाष्योक्तश्रुत्यन्तरमाह **इत्यादीत्यादिपदेनेति**। एवंजातीयकान् इति भाष्योक्तश्रुतिरिव तदात्मानं इति एषा मूले उक्ता। मुखतो भाष्योक्तश्रुत्यन्तरमादिपदेन ग्राह्यं इत्याशयेनाह **तदात्मानं स्वयमिति**। 'आत्मकृतेः परिणामादि'ति सूत्रे कर्तृत्वं कर्मत्वं चेति भगवतः इत्यर्थे इयं श्रुतिः भाष्ये

उपन्यस्तेति मनसि निधायात्रोदाहरणं **मूले** । तेन परिणतभागस्य सेयं देवतं ऐक्षत इत्यादावप्रतीतेः । इयमेव एकदेशेन परिणामप्रतिपादिका श्रुतिरुपन्यसनीया इति परभाष्ये मुखतः उपादानाभावायोगः इत्यपि सूचितं भवतीति ज्ञेयम् । तदेतन्मनसि कृत्वा आह **तदितिकर्तृतयेति** । जगदुपादानत्वमुपपन्नं इत्यादीत्येतन्मूलगतादिपदेन अविद्याकल्पितरूपभेदाभ्युपगमात् इत्यादिना स्वीकृतपरिणामपक्षे आविद्यकरूपे भेदादिव्युत्पादनेन विवर्तवाद उक्तः तद्ग्रहणं बोध्यम् । तदुभयपूर्वपक्षदूषणाय **सकलजगदुपादानत्वेनेत्यादि मूलम्** । न । किन्तु परिणामवादनिरासकम् । विवर्तवादे तु सर्वथेत्यादिना तद्वादस्य प्रकारान्तरेण निरसिष्यमाणत्वात् । विवर्तवादे उपादानोपादेयाभेदप्रसक्त्यभावेनोत्तरमूलासङ्गतश्च परिणामवादनिरासपरतया एतद्योजने तु नानुपपत्तिरिति ज्ञेयम् ।

स०व्र०— स्थितौ चेति । स्थितिकाले इत्यर्थः । **कृत्स्नपरिणामाभावस्येति** । 'तदात्मानं स्वयमकुरुत' इति वाक्ये तदिति कर्तृत्वेनोक्तस्य 'आत्मानमि'ति कर्मत्वाभिधानात् कृत्स्नस्य कर्तृत्वे तस्यैव कर्मत्वस्यैवाङ्गीकार्यत्वात् तस्य कर्तृकर्मविरोधापत्त्या असम्भवेन एकदेशस्य कर्तृत्वम्, एकदेशस्य कर्मत्वमित्यवश्यं कल्पनीयत्वादस्य वाक्यस्य कृत्स्नपरिणामाभावप्रतिपादकत्वं द्रष्टव्यम् ।

विठ्ठल०— परमते कृत्स्नप्रसक्तिरिति पूर्वपक्षसूत्रम् । श्रुतेस्त्वित्यादीनि सिद्धान्तसूत्राणि । **परिणामवादिन इति** । पूर्वपक्षसूत्रार्थमाह **न ब्रह्म इति** । **स्थितौ चेति** स्थितिकालकार्यप्रपञ्चातिरिक्तब्रह्मणोऽभावे तद्दर्शनार्थकस्य तपसा ब्रह्मविजिज्ञासस्वेत्याद्युपदेशस्य वैयर्थ्यं स्यादित्यर्थः । आदिपदस्य ब्रह्माभावोपपत्तिरूपमोक्षाभावः स्यादित्यभिप्रायः । **निष्कलमिति** । निर्गताः कलाः यस्मात्तन्निष्कलमिति निष्कलशब्दो निरवयवत्वप्रतिपादक इति ज्ञेयम् । सिद्धान्तसूत्रार्थं वक्तुमाह **अत्रोच्यत इति** । **तदात्मानमिति** । आत्मानमित्युपादानत्वं स्वयमकुरुतेति कर्तृत्वश्रवणात् कृत्स्नपरिणामभावोऽप्यवगम्यत इति भावः । **वैलक्षण्य इति** । अलौकिकत्व इत्यर्थः । तद्विवरणं **परमोत्कृष्टत्वे अत्यन्तव्यावृत्तत्व इति** । अत्यन्तभिन्नत्व इत्यर्थः । तुशब्दार्थः **स एवेति** ।

* * *

॥ अथ च तत्र शङ्कात्रयनिरासः ॥

॥ अथ तत्रादौ प्रथमशङ्कानिरासः ॥

११४ सु०— ननु जगदुपादानत्वादेव सर्ववैशिष्ट्यं ब्रह्मणः, न हि जगज्जगदुपादानमिति चेत्; तत्किमुपादानोपादेययोर्भेदं मन्यसे, तथा च तदनन्यत्वमित्युक्तविरोधः । जगत् ब्रह्मणो न भिद्यते, ब्रह्म तु जगतो भिद्यत इति चेत् । न । उक्तोत्तरत्वात् ।

परि०— उक्तविरोधपरिहारमाशङ्कते **ननु जगदिति** । **उक्तोत्तरत्वादिति** । भोक्त्रापत्तेरिति नये 'नान्यदन्यत्वमापन्नं **क्वचिद्दृष्टं कथञ्चने**'त्येतद्व्याख्यावसरे, 'यः कदाचित् यतोऽत्यन्तं भिद्यते नासौ कदाचित् तदैक्यमापद्यते, यथा घटः पटेने'त्युक्तत्वादिति भावः ।

यादु०— **उक्तोत्तरत्वादिति** । न हि यद्यतोऽत्यन्तभिन्नं तत्तेनात्यन्ताभिन्नमिति सम्भवत्यतिप्रसङ्गात् इत्युक्तोत्तरत्वादित्यर्थः ।

वं०प०— जगत्यविद्यमानधर्मवत्त्वमेव सर्ववैशिष्ट्यम् । जगदुपादानत्वं तु न जगत्यस्ति । अभेदाद्ब्रह्मणि तु सम्भवति । अतस्तेन धर्मेण युक्तं सर्ववैशिष्ट्यमिति शङ्कते **नन्विति** । **तत्किमिति** । जगदुपादानत्वं जगति न सम्भवति । अभेदाद्ब्रह्मणि तु सम्भवतीत्युक्तेर्जगदपेक्षया भेदोऽस्तीति लभ्यत इति ध्येयम् । ओमिति चेत् तत्राह **तथा चेति** ।

कं०रा०— **उक्तोत्तरत्वादिति** । यदि ब्रह्म जगतोऽन्यदेव तदा कथं ब्रह्मानन्यता जगतः स्यात् न हि यद्यतोऽत्यन्तभिन्नं तत्तेनाभिन्नमिति सम्भवति अतिप्रसङ्गादित्युक्तोत्तरत्वादित्यर्थः ।

श्रीनिधि०— **तदनन्यत्वमित्युक्तविरोध इति** । त्वया तत्र तदभेदस्यैव व्याख्यानादिति भावः । **उक्तोत्तरत्वादिति** । न हि यद्यतोऽत्यन्तभिन्नं तत्तेनाभिन्नमिति युज्यते । विरोधादित्युक्तमारम्भणाधिकरण इति भावः ।

शे०वा०— उपादानोपादेययोरभेदेन जगदुपादानस्य ब्रह्मणो जगदुपादानत्वे तदुपादेयस्य जगतोऽपि जगदुपादानत्वावश्यम्भावान्न जगदुपादानत्वं सर्ववैशिष्ट्ये हेतुः अन्यथोपादानोपादेययोर्भेदप्रसक्तेरित्याशयेन परिहरति **तत्किमिति** । इष्टापत्तिं निरस्यति **तथा चेति** । जगतो ब्रह्माभेदेन जगन्निष्ठविशेषणस्य ब्रह्मणि प्रसक्तावपि ब्रह्मणो जगद्भिन्नत्वेन ब्रह्मनिष्ठस्य जगदुपादानत्वस्य जगत्यप्राप्तेर्युक्तं तस्य वैशिष्ट्योपपादकत्वमिति शङ्कते **जगदिति** । **उक्तोत्तरत्वादिति** । ब्रह्मणो जगदन्यत्वे जगतोऽपि न तदनन्यत्वं स्यात् । न हि यद्यतोऽत्यन्तभिन्नं तत्तेनात्यन्ताभिन्नमिति सम्भवत्यतिप्रसङ्गादिति 'कथं च तदनन्यते'त्येतद्व्याख्यानावसरे उक्तोत्तरत्वादित्यर्थः ।

वा०र०— एतमर्थं मनसि कृत्वैव तत् किं इत्येतत् योजयति **उपादानोपादेययोरिति** । **जगदुपादानस्येति** । तत्त्वेनाभिमतस्येत्यर्थः ।

स०न्र०— **उक्तोत्तरत्वादिति** । 'कथं च तदनन्यता' इत्येतद्व्याख्यानावसरे यदि ब्रह्म जगतोऽन्यदेव तदा च कथं च तदनन्यत्वं जगतः स्यात् । न हि यत् यतोऽत्यन्तभिन्नं तत् तेनात्यन्ताभिन्नमिति सम्भवति अतिप्रसङ्गात् इत्यादिनोक्तोत्तरत्वादित्यर्थः ।

विठ्ठल०— ननु जगदुपादानत्वादेव सर्ववैशिष्ट्यं चेद्ब्रह्मणस्तर्हि जगतोऽपि स्यादित्यत आह **न हि जगज्जगदुपादानमिति** । यद्वा जगदुपादानत्वे सर्ववैलक्षण्यं कथमित्यतो जगदुपादानत्वस्यान्यत्राभावादित्याह **न हीति** । **तदनन्यत्वमित्युक्तविरोध इति** । तदनन्यत्वमित्यस्योपादानोपादेययोः भेदसमर्थनपरत्वेन भवता व्याख्यातत्वादिति भावः । **उक्तोत्तरत्वादिति** । न हि यद्यतोऽत्यन्तभिन्नं तत्तेनात्यन्ताभिन्नमिति सम्भवति । अतिप्रसङ्गादित्युक्तोत्तरत्वादित्यर्थः ।

॥ इति प्रथमशङ्कानिरासः ॥

* * *

॥ अथ तत्र द्वितीयशङ्कानिरासः ॥

११५ सु०— प्राग्ब्रह्मोपादानत्वस्यानुक्तत्वात् कृत्स्नप्रसक्त्यादिपरिचोदनैव अनवकाशा । परिणामप्रतिपादकश्रुतेरभावेन गगनादिप्रपञ्चात्मकस्य तदसम्भविशब्दमूलत्वसर्वशक्तित्वाद्यसम्भवेन च समाधानमप्ययुक्तम् । विवर्तवादे तु सर्वथाऽपि नैषा शङ्काऽवकाशमश्नुते । शुक्त्यादिकमिव रजताद्यारोपस्य ब्रह्माविद्यकप्रपञ्चारोपस्याधिष्ठानमिति स्पष्टमारम्भणाधिकरणेऽभिहितम्, तत्र कथं कृत्स्नैकदेशविचारः । उक्तानवधानाच्छङ्केति चेत्, तर्ह्युक्तं स्मरेति वक्तव्यम् । स्पष्टं चारोपितत्वं प्रपञ्चस्य ब्रह्मण्युपपादनीयम् । श्रुतेस्त्वित्यादेस्तु का सङ्गतिः ।

परि०— अनुक्तत्वादिति । प्रकृत्याद्यधिकरणानामप्यन्यथाव्याख्यानादिति भावः । **श्रुतेरभावेनेति** । 'तदात्मानं स्वयमकुरुते'त्यस्य 'आत्मकृतेरि'त्यत्रान्यथैव व्याख्यानादिति भावः । शङ्काऽनवकाशमेव व्यनक्ति **शुक्त्यादिकमिवेति** । **आरम्भणेति** । तदनन्यत्वमारम्भणेत्यत्र ।

वं०प०— श्रुतिशब्दमूलत्वविचित्रशक्तिभ्यो हेतुभ्यः समाधानं त्वन्मते न युक्तमित्याह **परिणामेति** । श्रुतेरभावेन समाधानमयुक्तमित्यन्वयः । **श्रुतेरभावेनेति** । तदात्मानमिति श्रुतेरन्यार्थत्वादिति भावः । **तदसम्भवीति** । गगनादिप्रपञ्चेऽसम्भावितेत्यर्थः । **उक्तेति** । तदनन्यत्वमित्यत्रोक्तार्थविस्मरणाच्छङ्केत्यर्थः । **तत्रेति** ? । आरोपाधिष्ठान इत्यर्थः ।

कं०रा०— परिणामप्रतिपादकेति । तदात्मानं स्वयमकुरुतेति श्रुतेर्वासुदेवः स्वात्मानं सङ्कर्षणादिरूपेणाकरोदित्यर्थप्रतिपादकतया ब्रह्मणो जगदाकारपरिणामप्रतिपादकत्वात्परिणामप्रतिपादकश्रुत्यभावेन त्वद्रीत्या

गगनादिप्रपञ्चात्मकस्य ब्रह्मणो गगनादावसम्भावितशब्दमूलत्वसर्वशक्तित्वाद्यसम्भवेन च समाधानमप्युक्त-मित्यर्थः । अपिपदं न केवलं कृत्स्नप्रसक्त्यादि परिचोदनैवायुक्ता किं तु समाधानमपीत्यर्थे किं च कृत्स्न-प्रसक्तिरिति ब्रह्मणः कात्स्न्येन कार्याकारणपरिणामे स्थितौ ब्रह्माभावेन तद्दर्शनोपदेशानर्थक्यादेरीवाविद्यायाः कात्स्न्येन परिणामकस्य चिद्दोषस्याभावात् ब्रह्मण एकदेशेन परिणामे निष्कलमित्यादि निरवयवत्वशब्दकोप-स्येवाविद्याया एकदेशेन परिणामे कस्यचिद्दोषस्याभावाच्चाविद्यायां कृत्स्नप्रसक्तिः सावयवत्वं च न किञ्चि-त्करिष्यतीति भावः ।

श्रीनिधि०— ब्रह्मोपादानत्वस्यानुक्तत्वादिति । प्रकृत्यधिकरणापव्याख्यानस्य निरासादिति भावः । **परिणामप्रतिपादकश्रुतेरिति** । वाचारम्भणमिति श्रुत्यर्थस्यान्यथावर्णितत्वादिति भावः । **अभिहितं** मायिना । **कथं कृत्स्नैकदेशविचार इति** । न हि शुक्तिरजतारोपाधिष्ठानमित्युक्ते शुक्तिः किमेकदेशेन परिणमते उत कात्स्न्येनेति विचारं लौकिकः परीक्षको वा करोतीति भावः । **अनवधानात्** विस्मरणात् ।

शे०वा०— ननु पूर्वपक्षसिद्धान्तानुपपत्तिव्युत्पादनेनाप्यपव्याख्यानस्य निराकर्तुं शक्यत्वात् किमि-त्यसङ्गतिमात्रव्युत्पादनेन तन्निराकरणं भाष्यकाराणामित्यतस्तदनुपपत्तिप्रदर्शनपूर्वकं तदनुक्तौ निमित्तं वदन्नेव भाष्यकृदुद्भावितासङ्गत्युक्तिं समर्थयते **प्रागित्यादिना** । यद्वा तत्किमसङ्गतिरेव दोषो व्याख्यानं तु परोक्त-मदुष्टमेवेत्यत आह **प्रागिति** । 'न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यते' इत्यादिना प्रकृत्यधिकरणस्य ब्रह्मो-पादानत्वानभिधायकत्वस्य तदधिकरणव्याख्यानावसरे उपपादितत्वादिति भावः । **परिणामप्रतिपादकश्रुते-रभावेनेति** । 'सच्च त्यच्चाभवदिति नास्य विश्वत्वमुच्यते' इत्यादिना ब्रह्मणो जगदुपादानत्वे प्रमाणतया पराभिमतश्रुतीनां तत्परत्वाभावव्युत्पादनान्न परिणामप्रतिपादिका श्रुतिरस्तीति भावः । **असम्भवेन चेति** । अन्यथोपादानोपादेययोर्भेदप्रसक्त्या तदनन्यत्वमित्युक्तविरोधापत्तेरिति भावः । अनवकाशमेवोपपादयति **शुक्त्यादिकमेवेति** । उक्तानवधानादित्युपलक्षणम् । पूर्वोक्तक्षीरादिदृष्टान्तात्परिणामित्वभ्रमाच्चेत्यपि द्रष्टव्यम् । **का सङ्गतिरिति** । सिद्धान्ते विवर्तविवक्षायां द्वितीयसूत्रे शब्दगम्यत्वतर्कागम्यत्वेन वाच्ये तयोर्भ्रान्त्य-धिष्ठानतायामनुपयुक्तत्वादिति भावः ।

वा०र०— एवं कृत्स्नेत्येतत्सूत्रोक्तशङ्कापरिहारयोः परिणामवादे अनुपपत्तिं प्रदर्श्य विवर्तवादे तदयोगं दर्शयति **विवर्तवादे त्विति मूलम्** । कृत्स्नप्रसक्त्यादिशङ्केत्यर्थः । पूर्वपक्ष इति वक्तव्ये पूर्वपक्षोऽपि सूत्र-व्यावृत्त्यशङ्कैवेत्याशयेन शङ्केत्येवोक्तम् । पूर्वाधिकरणोक्तक्षीरदृष्टान्तात् परिणामित्वभ्रमे तन्निरासात् सङ्गतिमाहेति कल्पतरौ क्षीरादिदेवादिदृष्टान्तेन पुनः तद्वास्तवत्वप्रसङ्गः इत्येतद्धामतिग्रन्थाशयो निरूपितः तमाह **उक्तानव-धानादित्युपलक्षणमिति** । **द्वितीयसूत्रे इति** । श्रुतेस्त्वित्येतत् सूत्रे इत्यर्थः । **शब्दगम्यत्वेति** । शब्दमूल-त्वात् इत्येतत्सूत्रखण्डो हि भाष्ये एवं व्याख्यातः । शब्दमूलं च ब्रह्मशब्दप्रमाणकम् । नेन्द्रियादिप्रमाणमितीति भावः ।

स०व्र०— परोक्तव्याख्यानमदूष्यै(दूषयित्वै)व असङ्गतिमात्रस्यैव भाष्यकारेणाभिहितत्वात् सूत्रव्याख्यानं दुष्टमित्यतः स्पष्टत्वात् शिष्यैरेवोह्यमिति भावेन तदनुक्त्वैवासङ्गतिमात्रमुक्तमिति भावेन स्वयं तद्दूषयति **प्रागिति** । सर्वतो वैलक्षण्यप्रदर्शनेन सर्वोत्कृष्टत्वं सर्वस्मात् व्यावृत्तत्वं च प्रतिपादितमित्युक्तम्, तत्क्रमेणोपपादयति सजातीयेत्याद्युक्तप्रबन्धेन 'तत्तु समन्वयादि'त्यादिना 'एतेन सर्वे व्याख्याता व्याख्याता' इत्यन्तेनेत्यर्थः । सामान्यतः समन्वयसूत्रे विशेषतः 'आनन्दमयोऽभ्यासात्', 'अन्तरस्तद्धर्मोपदेशात्' इत्यादावित्यर्थः । **तदसम्भवीति** । गगनादिप्रपञ्चे असम्भवीत्यर्थः ।

विठ्ठल०— **अनुक्तत्वादिति** । प्रकृत्याद्यधिकरणे अन्यथाव्याख्याततत्वादिति भावः । **परिणामप्रतिपादकश्रुतेरिति** । तदात्मानमिति श्रुतेरर्थान्तरस्यैव विद्यमानत्वेन परिणामप्रतिपादकत्वाभावादिति भावः । **तदसम्भविशब्दमूलत्वेति** । गगनादिप्रपञ्चात्मकस्य ब्रह्मणस्तत्र गगनादावसम्भविशब्दमूलत्वसर्वशक्तित्वाद्यसम्भवेन चेत्यर्थः ।

॥ इति द्वितीयशङ्कानिरासः ॥

* * *

॥ अथ तत्रान्ते तृतीयशङ्कानिरासः ॥

११६ सु०— कश्चित्परिहारादर्शनसम्भ्रान्तचित्त आह 'अविद्यासंवलितं खलु ब्रह्म जगदुपादानम्, तत्राविद्योपादानत्वस्यायमाक्षेपः परिहारश्चे'ति । तदतीव मन्दम् । न हि अविद्याया उपादानत्वमपि वास्तवम्, तस्याविचारितरमणीयतयैव शङ्काऽविषयत्वात् । किञ्च कृत्स्नप्रसक्तिः सावयवत्वं चाविद्यायां किं करिष्यति । समाधानं तु सर्वथाऽप्यसङ्गतमेव ।

परि०— शङ्काऽविषयत्वादिति । शङ्काया अविषयत्वादित्यर्थः । **किं करिष्यतीति** । कृत्स्नप्रसक्तौ तद्दर्शनोपदेशाभावेन तदानर्थक्यभयाभावात् । निरवयवत्वश्रुतेरभावेन तद्व्याकोपस्याप्यभावादिति भावः । **सर्वथाप्यसङ्गतमेवेति** । शब्दमूलत्वादेः 'औपनिषदः पुरुष' इत्यादिश्रुत्या ब्रह्मणीवाविद्यायामभावादिति भावः ।

वं०प०— परिहारेति । असङ्गतिपरिहारादर्शनादित्यर्थः । **अयमाक्षेप इति** । अविद्या किं कात्स्न्र्येन परिणमते एकदेशेन वा । आद्ये स्थितिकालेऽविद्याभावः स्यात् । द्वितीये तस्या अखण्डत्वेन एकदेशाभाव

इत्यविद्योपादानत्वविषयोऽयमाक्षेप इत्यर्थः । **समाधानमिति** । **श्रुतेस्त्विति** सूत्रोक्तमित्यर्थः । **असङ्गतमेवेति** । न ह्यविद्यायाः शब्दमूलकत्वमस्तीति भावः । केचित्तु श्रुतेस्त्वित्यादिना क्रियमाणोऽविद्यायां दूषणपरिहारोऽसङ्गतः स्यात् । 'दुर्घटत्वमविद्याया भूषणं न तु दूषणम् । कथञ्चिद्घटमानत्वेऽविद्यात्वं दुर्घटं भवेदि'त्युक्तत्वादिति भाव इत्याहुः ।

कं०रा०— समाधानं त्विति । अविद्यायां शब्दमूलत्वाद्यभावेन समाधानं सर्वथा असङ्गतमेवेत्यर्थः ।

श्रीनिधि०— तस्य अविद्योपादानत्वस्य । अनेनारोपितार्थविचारो असङ्गत इत्युक्तं भवति । **किं करिष्यतीति** । अनुभवविरोधाभावात् । निरवयवत्वश्रुत्यभावेन तद्व्याकोपभावाच्चेति भावः । **समाधानं त्विति** । समाधानमपीत्यर्थः । न हि भ्रमाधिष्ठानमारोपितं रजतं करोति । नापि भ्रमाधिष्ठानत्वम् । सर्वशक्तिं विना नोपपद्यत इति भावः ।

शे०वा०— किं करिष्यतीति । कार्त्स्न्येन परिणामे कृत्स्नस्य ब्रह्मणः कार्याकारतापत्तौ ब्रह्माभावेन तद्द्रष्टव्यत्वोपदेशानर्थक्यादिवदेकदेशेन परिणामे सावयवत्वापत्त्या निरवयवत्वश्रुतिव्याकोपवच्चाविद्यायाः कार्त्स्न्येन परिणामे कृत्स्नाविद्यायाः कार्याकारताप्रसक्तावप्येकदेशेन परिणामे च सावयवत्वप्रसक्तावपि पूर्ववत् तत्प्रयुक्तदोषान्तराप्रसरात् स्वरूपेणैव च कृत्स्नप्रसक्तिसावयवत्वयोरदोषत्वादिति भावः । **समाधानं त्विति** । ब्रह्मणः शब्दगम्यत्वतर्कागम्यत्वोक्तेः तदुपादानत्वाक्षेपपरिहारकत्वेऽप्यविद्योपादानत्वाक्षेपपरिहारार्थत्वाभावात् तद्वर्णनं सर्वथाऽप्यसङ्गतमिति भावः ।

विठ्ठल०— अविचारितरमणीयतयैवेति । अविचारितरमणीयमेवोपादानत्वं उपादेयं प्रपञ्चस्याप्य..स्त..वत्वात् । न ह्येवम्भूताविद्योपादानत्वस्य विचाररूपशङ्काविषयत्वं सम्भवतीति । **करिष्यतीति** । कृत्स्नप्रसक्तावपि बाधकाभावात् । तन्निरवयवत्वश्रुत्यभावाच्चेति भावः । **समाधानमिति** । अविद्यायाः शब्दमूलत्वाद्यभावेनेति भावः ।

॥ इति तृतीयशङ्कानिरासः ॥

॥ इति तत्र शङ्कात्रयनिरासः ॥

॥ इति परोक्तसूत्रार्थे अतज्ञत्वादिमूलत्वानुपपत्तिप्रदर्शने परिणामवादयुक्तसूत्रार्थानुपपत्तिप्रदर्शनम् ॥

* * *

स०व०— परोक्तव्याख्यानमदूष्यै(दूषयित्वै)व असङ्गतिमात्रस्यैव भाष्यकारेणाभिहितत्वात् सूत्रव्याख्यानं दुष्टमित्यतः स्पष्टत्वात् शिष्यैरेवोह्यमिति भावेन तदनुक्त्वैवासङ्गतिमात्रमुक्तमिति भावेन स्वयं तद्दूषयति **प्रागिति** । सर्वतो वैलक्षण्यप्रदर्शनेन सर्वोत्कृष्टत्वं सर्वस्मात् व्यावृत्तत्वं च प्रतिपादितमित्युक्तम्, तत्क्रमेणोपपादयति सजातीयेत्याद्युक्तप्रबन्धेन 'तत्तु समन्वयादि'त्यादिना 'एतेन सर्वे व्याख्याता व्याख्याता' इत्यन्तेनेत्यर्थः । सामान्यतः समन्वयसूत्रे विशेषतः 'आनन्दमयोऽभ्यासात्', 'अन्तस्तद्धर्मोपदेशात्' इत्यादावित्यर्थः । **तदसम्भवीति** । गगनादिप्रपञ्चे असम्भवीत्यर्थः ।

विठ्ठल०— **अनुक्तत्वादिति** । प्रकृत्याद्यधिकरणे अन्यथाव्याख्याततत्वादिति भावः । **परिणामप्रतिपादकश्रुतेरिति** । तदात्मानमिति श्रुतेरर्थान्तरस्यैव विद्यमानत्वेन परिणामप्रतिपादकत्वाभावादिति भावः । **तदसम्भविशब्दमूलत्वेति** । गगनादिप्रपञ्चात्मकस्य ब्रह्मणस्तत्र गगनादावसम्भविशब्दमूलत्वसर्वशक्तित्वाद्यसम्भवेन चेत्यर्थः ।

॥ इति द्वितीयशङ्कानिरासः ॥

* * *

॥ अथ तत्रान्ते तृतीयशङ्कानिरासः ॥

११६ सु०— कश्चित्परिहारादर्शनसम्भ्रान्तचित्त आह 'अविद्यासंवलितं खलु ब्रह्म जगदुपादानम्, तत्राविद्योपादानत्वस्यायमाक्षेपः परिहारश्चे'ति । तदतीव मन्दम् । न हि अविद्याया उपादानत्वमपि वास्तवम्, तस्याविचारितरमणीयतयैव शङ्काऽविषयत्वात् । किञ्च कृत्स्नप्रसक्तिः सावयवत्वं चाविद्यायां किं करिष्यति । समाधानं तु सर्वथाऽप्यसङ्गतमेव ।

परि०— **शङ्काऽविषयत्वादिति** । शङ्काया अविषयत्वादित्यर्थः । **किं करिष्यतीति** । कृत्स्नप्रसक्तौ तद्दर्शनोपदेशाभावेन तदानर्थक्यभयाभावात् । निरवयवत्वश्रुतेरभावेन तद्व्याकोपस्याप्यभावादिति भावः । **सर्वथाप्यसङ्गतमेवेति** । शब्दमूलत्वादेः 'औपनिषदः पुरुष' इत्यादिश्रुत्या ब्रह्मणीवाविद्यायामभावादिति भावः ।

वं०प०— **परिहारेति** । असङ्गतिपरिहारादर्शनादित्यर्थः । **अयमाक्षेप इति** । अविद्या किं कात्स्न्र्येन परिणमते एकदेशेन वा । आद्ये स्थितिकालेऽविद्याभावः स्यात् । द्वितीये तस्या अखण्डत्वेन एकदेशाभाव

इत्यविद्योपादानत्वविषयोऽयमाक्षेप इत्यर्थः । **समाधानमिति** । **श्रुतेस्त्विति** सूत्रोक्तमित्यर्थः । **असङ्गत-मेवेति** । न ह्यविद्यायाः शब्दमूलकत्वमस्तीति भावः । केचित्तु श्रुतेस्त्वित्यादिना क्रियमाणोऽविद्यायां दूषणपरिहारोऽसङ्गतः स्यात् । 'दुर्घटत्वमविद्याया भूषणं न तु दूषणम् । कथञ्चिद्घटमानत्वेऽविद्यात्वं दुर्घटं भवेदि'त्युक्तत्वादिति भाव इत्याहुः ।

कं०रा०— **समाधानं त्विति** । अविद्यायां शब्दमूलत्वाद्यभावेन समाधानं सर्वथा असङ्गत-मेवेत्यर्थः ।

श्रीनिधि०— तस्य अविद्योपादानत्वस्य । अनेनारोपितार्थविचारो असङ्गत इत्युक्तं भवति । **किं करिष्यतीति** । अनुभवविरोधाभावात् । निरवयवत्वश्रुत्यभावेन तद्व्याकोपभावाच्चेति भावः । **समाधानं त्विति** । समाधानमपीत्यर्थः । न हि भ्रमाधिष्ठानमारोपितं रजतं करोति । नापि भ्रमाधिष्ठानत्वम् । सर्वशक्तिं विना नोपपद्यत इति भावः ।

शे०वा०— किं करिष्यतीति । कात्स्न्येंन परिणामे कृत्स्नस्य ब्रह्मणः कार्याकारतापत्तौ ब्रह्माभावेन तद्द्रष्टव्यत्वोपदेशानर्थक्यादिवदेकदेशेन परिणामे सावयवत्वापत्त्या निरवयवत्वश्रुतिव्याकोपवच्चाविद्यायाः कात्स्न्येंन परिणामे कृत्स्नाविद्यायाः कार्याकारताप्रसक्तावप्येकदेशेन परिणामे च सावयवत्वप्रसक्तावपि पूर्ववत् तत्प्रयुक्त-दोषान्तराप्रसरात् स्वरूपेणैव च कृत्स्नप्रसक्तिसावयवत्वयोरदोषत्वादिति भावः । **समाधानं त्विति** । ब्रह्मणः शब्दगम्यत्वतर्कागम्यत्वोक्तेः तदुपादानत्वाक्षेपपरिहारकत्वेऽप्यविद्योपादानत्वाक्षेपपरिहारार्थत्वाभावात् तद्वर्णनं सर्वथाऽप्यसङ्गतमिति भावः ।

विठ्ठल०— अविचारितरमणीयतयैवेति । अविचारितरमणीयमेवोपादानत्वं उपादेयं प्रपञ्च-स्याप्य..स्त..वत्वात् । न ह्येवम्भूताविद्योपादानत्वस्य विचाररूपशङ्काविषयत्वं सम्भवतीति । **करिष्यतीति** । कृत्स्नप्रसक्तावपि बाधकाभावात् । तन्निरवयवत्वश्रुत्यभावाच्चेति भावः । **समाधानमिति** । अविद्यायाः शब्दमूलत्वाद्यभावेनेति भावः ।

॥ इति तृतीयपक्षनिरासः ॥
॥ इति तत्र पक्षत्रयनिरासः ॥
॥ इति परोक्तसूत्रार्थे असङ्गत्वादिमूलकानुपपत्तिप्रदर्शने परिणामवादयुक्तसूत्रार्थानुपपत्तिप्रदर्शनम् ॥

* * *

॥ अथ परोक्तसूत्रार्थे असङ्गत्यादिमूलकानुपपत्तिप्रदर्शने विवर्तवाद्युक्तसूत्रार्थानुपपत्तिप्रदर्शनम् ॥

११७ सु०— एतेन विकरणत्वात् इत्याक्षेपपरिहारावप्यसङ्गतौ वेदितव्यौ । न हि भ्रमाधिष्ठानता शरीरादिकमपेक्षते । ईश्वरविषयं तदिति चेन्न, तस्य विकरणत्वाभावेनाक्षेपानुदयादित्यादिकं स्वयमेव शिष्यैरवगन्तव्यमित्यसङ्गतिरेवाचार्येणोक्ता ।

परि०— विवर्तवादिमते सूत्रान्तरार्थं च निराह **एतेनेति** । तदेव व्यनक्ति **न हीति** । **तदितीति** । विकरणत्वादिति सूत्रं मायाशबलविशिष्टब्रह्मस्वरूपेश्वरविषयं न भ्रमाधिष्ठानोदासीनब्रह्मविषयं येनाक्षेपपरिहारावसङ्गताविति भावः । **विकरणत्वाभावेनेति** । ऐच्छिकमायामयविग्रहत्वादिति भावः । **इत्यादिकमिति** । विशेषप्रपञ्चनं चन्द्रिकायाम् ।

यादु०— ईश्वरविषयं तदिति । शबलब्रह्मविषयमित्यर्थः ।

वं०प०— न हीति । निर्गुणस्य शुद्धब्रह्मण इति शेषः । **ईश्वरविषयं तदिति** । विकरणत्वाद्विशिष्टस्य न भ्रमाधिष्ठानत्वं युक्तमित्याक्षिप्य तदुक्तमिति सकरणत्वेन परिहारोऽभिहितः इत्येवं तद्विकरणत्वादित्याक्षेपादिकमीश्वरविषयं विशिष्टब्रह्मविषयं न शुद्धब्रह्मविषयम् । येनाक्षेपपरिहारयोरसङ्गतिः स्यादित्यर्थः । **तस्येति** । शबलस्य शरीरेन्द्रियादिमत्त्वेनाक्षेपस्यैवानुदयादित्यर्थः । **इत्यादिकमिति** । विशिष्टस्य भ्रमाधिष्ठानत्वस्यैवाभावात् । भ्रमाधिष्ठानत्वस्य शरीरेन्द्रियाद्यनपेक्षत्वाच्च । **तदुक्तमिति** । परिहारोऽप्यनुपपन्न इति भावः ।

कं०रा०— विकरणत्वादिति । विकरणत्वान्नेति चेत्तदुक्तमित्याक्षेपपरिहारावप्यसङ्गता वेदितव्याविर्त्यथः । **न हीति** । न हि भ्रमाधिष्ठानता शरीरादिकमपेक्षते येन विकरणत्वाद्ब्रह्मणोऽधिष्ठानत्वमनुपपन्नमित्याक्षेपस्तदुक्तमिति समाधानं च सङ्गच्छतेति भावः । ननु शुद्धस्य भ्रमाधिष्ठानत्वेऽपि विशिष्टस्येश्वरस्य कर्तृत्वात् तस्य च शरीराद्यपेक्षतया विकरणत्वादित्याक्षेपादिकमीश्वरविषयं सङ्गच्छत इति शङ्कते **ईश्वरेति** ।

श्रीनिधि०— ईश्वरविषयमिति । तथा च न तस्य भ्रमाधिष्ठानत्वमाक्षिप्यते येनोक्तदोषः स्यात्किन्तु कर्तृत्वमिति भावः । वैलक्षण्यप्रदर्शनेन जन्मादिकारणत्वोक्त्येति शेषः ।

शे०वा०— एतेनेत्युक्तमेव दर्शयति **न हीति** । येन शरीरेन्द्रियादिराहित्येन भ्रमाधिष्ठानत्वमाक्षिप्येतेति भावः । उपलक्षणं चैतत् । शक्तिविशेषेण तत्समाधानानुपपत्तेश्चेत्यपि द्रष्टव्यम् । ननु विकरणत्वादित्याक्षेपपरिहारौ न शुद्धब्रह्मविषयौ ब्रूमो येन ब्रह्माधिष्ठानत्वस्य विकरणत्वेनाक्षेपः शक्तिविशेषेण च समाधानमयुक्तं भवेत् किन्नाम विशिष्टब्रह्मविषयावेवेति नासङ्गतिरिति शङ्कते **ईश्वरेति** । **तस्य विकरणत्वा-**

भावेनेति । अचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमिति विकरणत्वबोधकप्रमाणानां शुद्धविषयत्वेन विशिष्टाविषयत्वात् तैस्तस्य विकरणत्वासिद्धेरिति भावः । नन्वेवं भाष्यकारेणाप्युक्तमार्गेणैवापव्याख्याननिरासो विधेयः तत्किमित्यसङ्गतिव्युत्पादनेन तन्निरासो विहित इत्यत आह इत्यादिकमिति । स्पष्टत्वादिति शेषः । अस्पष्टतया स्वयमेव शिष्यैरवगन्तुमशक्यत्वादध्यायासङ्गतिरेव भाष्यकृतोक्तेति भावः ।

वा०र०— विकरणत्वाभावसिद्धेरिति भाव इति । उपलक्षणं चैतत् । तस्य कर्तृत्वाचेत्यपि ज्ञेयम् । विरोधपरिहारप्रकारकत्वस्येत्यादिषष्ठ्यन्तानां असिद्धश्चेत्युत्तरेण सम्बन्धः ।

विठ्ठल०— ईश्वरविषयमिति । शबलब्रह्मविषयमित्यर्थः ।

॥ इति विवर्तवादयुक्तसूत्रार्थानुपपत्तिप्रदर्शनम् ॥

* * *

॥ अथ तत्र परोक्तसूत्रार्थे प्रदर्शितायां उक्तासङ्गतौ शङ्काद्वयनिरासः ॥
॥ अथ तत्र प्रथमशङ्कानिरासः ॥

११८ सु०— स्यादेवमसङ्गतिर्यदि ब्रह्मणः सर्ववैशिष्ट्ये विरोधपरिहारोऽध्यायार्थः स्यात्, तदेव कुत इत्यत आह तदन्य इति ।

अनु०— तदन्ये तत्र तत्रगाः ।

तस्मात् सर्ववैशिष्ट्यविषयात् अन्ये विरोधाः तत्रतत्रैवाधिकरणेषु गताः परिहृताः ।

एतदुक्तं भवति । "अविरोधलक्षणो द्वितीयोऽध्याय इति तावत्सम्मतम् । न च अनुक्तेऽर्थे विरोधपरिहारः सङ्गत इति प्रथमाध्यायार्थेऽविरोधो द्वितीयस्यार्थः ।

प्रथमे चादिसूत्रेण शास्त्रीयविषयप्रयोजनप्रदर्शनमुखेन ब्रह्मजिज्ञासायाः कर्तव्यत्वमुक्तम् । तच्चतुरध्यायीपरिसमाप्यं नैकत्र पर्यवस्यति । ततः, 'किं तद्ब्रह्म, किं जीवोऽथ जडमि'ति स्वरूपजिज्ञासायां शृङ्गग्राहिकया प्रदर्शयितुमशक्यत्वात्, द्वितीयसूत्रे सर्वतो वैलक्षण्यप्रदर्शनेन सर्वोत्कृष्टं सर्वस्माद्व्यावृत्तं चेति प्रतिपादितम्, सजातीयविजातीयासम्भावितधर्मस्य लक्षणत्वात्, सकलेतरव्यावृत्तेश्च तत्प्रयोजनत्वात् ।

तृतीयसूत्रे शास्त्रं तत्र प्रमाणमभिधाय तस्योत्तरप्रबन्धेन सामान्यतो विशेषतश्च सकलजीवजडव्यावृत्तवस्तुविषयता समर्थिता ।

एवञ्च द्वये विरोधाः परिहरणीया भवन्ति । द्वितीयसूत्रसिद्धसर्ववैशिष्ट्यविषयाः शास्त्रसमन्वयविषयाश्च । तत्र द्वितीया विकारशब्दादित्यादिना तत्रतत्रैवाधिकरणे परिहृता इति परिशेषात्सर्ववैशिष्ट्यविषयविरोधपरिहार एव द्वितीयार्थ इति ज्ञायत" इति ।

परि०— चतुरध्यायीति द्विगोरिति ङीप् । **भृङ्गग्राहिकयेति** । धात्वर्थे ण्वुल्वक्तव्य इति ण्वुलि अत उपधाया इत्युपधावृद्धौ प्रत्ययस्थादितीत्वे अकादेशे शब्दस्वाभाव्यात् स्त्रीलिङ्गत्वं भृङ्गग्रहणेनेत्यर्थः । **वैलक्षण्येति** । सर्वतो व्यावृत्तासाधारणधर्मोपदर्शनेनेत्यर्थः । **तस्येति** । शास्त्रस्येत्यर्थः । **सामान्यत इति** । तत्तु समन्वयादित्यनेन सामान्यतः आनन्दमय इत्यादिना विशेषतश्चेत्यर्थः । **द्वय इति** । बहुवचनान्तं विरोधविशेषणम् । द्विरूपा इत्यर्थः । तदेव व्यनक्ति **द्वितीयेति** ।

गु०दी०— तदन्ये तत्र तत्रगाः इति वदता प्रथमाध्याये प्रत्यधिकरणं ये ये विरोधाः प्राप्नुवन्ति ते तत्रगाः तत्राधिकरण एव परिहरणीयाः । न तु द्वितीयेऽध्याये । एवं ब्रह्मणो जगदुपादानत्वे प्राप्तशङ्केयं परमते ब्रह्मणो जगदुपादानत्वप्रतिपादकप्रकृत्यधिकरण एव परिहरणीया । न तु द्वितीयेऽध्याये । अतोऽपीदमसङ्गतमिति च सूचितम् ।

वं०प०— सर्वोत्कृष्टं ब्रह्म द्वितीयसूत्रे प्रतिपादितमित्येतदुपपादयति **सजातीयेति** । सर्वस्माद्व्यावृत्तं प्रतिपादितमित्येतदुपपादयति **सकलेति** । उत्तरप्रबन्धेन तत्तु समन्वयादिनाऽध्यायसमाप्तिपर्यन्तम् । समन्वयसूत्रे सामान्यतः । 'आनन्दमय' इत्यादिना विशेषतः । **द्वय इति** । सर्ववैशिष्ट्यसमन्वयरूपप्रमेयद्वये तद्विषय इति यावदित्यर्थः ।

कं०रा०— द्वितीया इति । विकारशब्दान्नेति चेन्न प्राचुर्यादित्यादिभिर्गुणसूत्रैः शास्त्रीयानन्दमयादि-शब्दसमन्वयविषयविरोधानां परिहृतत्वाच्छास्त्रसमन्वयविषयाविरोधाः तत्र तत्राधिकरणे विकारशब्दादित्यादिना परिहृता इति भावः ।

श्रीनिधि०— वैलक्षण्यप्रदर्शनेन कथमुभयं लभ्यत इत्यत आह **सजातीयेत्यादिना** । सर्वस्माद् उत्कर्षो नाम सजातीयविजातीयव्यावृत्तधर्मप्रयुक्त इति भावः ।

शे०वा०— ननु 'तदन्ये तत्र तत्रगाः' इत्युत्तरभाष्यमनर्थकम् । न च तत्समन्वयविषयविरोधानामन्यत्र परिहृतत्वोपपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च प्रसक्तप्रतिषेधप्रदर्शनेन परिशेषतः सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थत्वोपवर्णनार्थत्वान्न तदिति वाच्यम् । सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थत्वोपवर्णनस्य प्रकृतानुपयोगादित्याशङ्क्य प्रागुक्ताध्यायासङ्गतिरूपापव्याख्यानदोषोपपादनार्थत्वात्तद्वर्णनस्य प्रकृतानुपयोग इत्यभिप्रेत्य असङ्गत्यनुपपत्तिशङ्कापरिहारकतया तद्योजयितुं तदसिद्ध्या असङ्गत्यनुपपत्तिशङ्कामुत्थापयति **स्यादेवमिति** । भाष्यस्यतच्छब्दस्य यत्किञ्चिदर्थपरत्वे परिशेषतः सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थत्वासिद्ध्या तत्सिद्ध्यर्थं पूर्वप्रकृतसर्ववैशिष्ट्यविरोधपरत्वमेवेति भावेनाह **तस्मादिति** । ननु भवेदेवं परिशेषतः सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थत्वसिद्धिः । यदि सर्ववैशिष्ट्यविरोधसमन्वयविरोधयोरेव परिहर्तव्यतया प्रसक्तत्वम् । तत्रापि समन्वयविरोधस्यान्यत्र परिहृतत्वं च सिद्धं स्यात् । न चैतदस्ति । प्रतिपाद्यान्तरसम्भावनया विरोधपरिहारकत्वस्य तत्परिहारकत्वसिद्धावप्युक्तेऽर्थ एव तत्परिहारकत्वस्य, तत्सिद्धावपि समन्वयविरोधस्यान्यत्र परिहृतत्वस्य चासिद्ध्या तदयोगात् इत्यतोऽध्यायस्याविरोधोपपादकत्वम्, उक्तार्थे तत्प्रतिपादकत्वं, सर्ववैशिष्ट्यादेरुक्तत्वं, विरोधद्वयस्यैव परिहर्तव्यत्वं, तत्रापि समन्वयविरोधस्यान्यत्र परिहृतत्वं चोपदर्शयन् परिशेषेण सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थतामुपपादयति **एतदुक्तं भवतीत्यादिना** । अविगानेन प्रसिद्धेरेव विरोधपरिहारस्य द्वितीयाध्यायार्थत्वे प्रमाणमिति भावेन सर्वसम्मतमित्युक्तम् । **भृङ्गेति** । भृङ्गे कर्णे वा गृहीत्वेयं गौरितीतिवत् अतीन्द्रियत्वाद्ब्रह्मण इदं ब्रह्मेति तत्स्वरूपोपदर्शनस्याशक्यत्वादित्यर्थः । लक्षणाभिधानमात्रेण कथं सर्वोत्कृष्टत्वस्य सर्वस्माद्व्यावृत्तत्वस्य च सिद्धिरित्यत एकस्य प्रतिपाद्यतयैकस्य च फलतयेति भावेन सर्वोत्कर्षसिद्धिं तावद्दर्शयति **सजातीयेति** । सर्वव्यावृत्तिसिद्धिं दर्शयति **सकलेतरेति** । **प्रमाणमभिधायेति** । अनिर्धारितस्य लक्षणस्य स्वरूपावधारणासमर्थत्वादिति भावः । **उत्तरप्रबन्धेनेति** । तत्त्वित्यादिनेत्यर्थः । तत्त्विति सामान्यतः, आनन्दमय इत्यादिविशेषतः । **द्वये विरोधा इति** । द्वाववयवौ येषामिति वर्गद्वयापेक्षयाऽन्यपदार्थस्य समुदायस्यैकत्वेऽप्युद्भूतावयवभेदत्वावयवबहुत्वानुगतं बहुवचनम् । अत्र सङ्ख्याया अवयवे तयबिति द्विशब्दात् तयप्प्रत्यये तस्य द्वित्रिभ्यां तयबित्यनेनायजादेशे द्विशब्देकारस्य यस्येति चेत्यनेन लोपे सति निष्पन्नद्वयशब्दाज्जसि प्रथमचरमतयाऽल्पार्धेति तयब्निबन्धनसर्वनामताविकल्पानुसारेण जसः शीति तस्य शीभावेन गुणे च सति द्वये द्वया इति बहुवचननिष्पत्तिरिति ज्ञेयम् । **तत्र तत्रैवेति** । आनन्दमयोऽभ्यासादित्यादावेवेत्यर्थः ।

वा०र०— अवयवभेदोद्भवविवक्षायां द्वौ विरोधावित्येव प्राप्नोति । समुदायैक्यविवक्षायां तु द्विविधो विरोधः इत्येव वाच्यम् । इतो द्वये इति बहुवचनायोगः इत्यतो न समासादवयवभूतविरोधवर्गविवक्षया इदं बहुवचनम् । येन द्विवचनप्रसङ्गः । नापि अनुद्भूतावयवभेदसमासार्थरूपसमुदायविवक्षया इदं बहुवचनं ब्रूमः । येन तस्य एकतया तदयोग इति वाच्यं स्यात् । अपि तर्हि समासावयवभूतवर्गान्तर्गतावयवविवक्षया इदं बहुवचनमिति वदामः । तेन न कोऽपि दोषः इत्याशयेनाह **द्वाववयवाविति** । एकत्वेऽपीति उपलक्षणम् ।

अवयवभूतवर्गयोः द्वित्वेऽपीत्यपि द्रष्टव्यम् । **अवयवबहुत्वेति** । यद्यपि वर्गाविवावयवौ न च तयोः बहुत्वम् । अत एव द्वावयवौ इत्येव विष्टगृहीतम् । तथा चावयवबहुत्वेत्येतत् न युक्तमिति भाति । तथापि वर्गान्तर्गतविरोधानामपि वर्गत्वमेव । वर्गस्य वर्गिव्यतिरेकेणाभावात् इत्याशयेनावयत्वेत्युक्तमिति न दोषः इति द्रष्टव्यम् । द्वये इत्येतत् साधुत्वाप्रतीतेराह **अत्र सङ्ख्याया इत्यादिना** । अत्र सूत्रे अस्य तदस्य सञ्जातं तारकादिभ्य इतच् इति सूत्रस्य पदम् इति अधिकारात् प्रत्ययार्थोऽनुवर्तत एव इति अवयव इति सङ्ख्यायाः विशेषणम् । ततश्च यः सङ्ख्याशब्दो अवयवस्य सङ्ख्याने वर्तते अवयविनः । तादृशसङ्ख्याशब्दादस्येति षष्ठ्यर्थे अवयविनियतेषु तयप्प्रत्ययः स्यात् इति सूत्रार्थः । **पञ्च** अवयवाः अस्य पञ्चतयं दारु इत्याद्युदाहरणम् । तथा च द्वौ अवयवौ तेषां इति द्वये इत्यत्रावयवे वर्तमानद्वीति सङ्ख्याया अवयविनि अभिधेये यत्प्रत्यये सतीत्यर्थः । तावता द्वितयेति प्राप्तमित्यत आह **द्वित्रिभ्यामिति** । द्वित्रि इत्येताभ्यां तयस्यायजादेशो वा स्यात् इति सूत्रार्थः । द्वयं द्वितयं त्रयं त्रितयं इत्युदाहरणम् । एवं च द्विशब्दात्परस्य तस्यायजादेशाभावपक्षे द्वितयमिति रूपप्राप्तावपि अयजादेशपक्षे तथारूपप्राप्तिः नेत्युक्तं भवति । अयजादेशपक्षे द्वयमिति भ्रान्तिं वारयन् तावता द्वयेत्यत्र सर्वे इत्यादाविव कथं सर्वनामकार्यं इत्याशङ्कां च परिहरति **द्विशब्देकारस्येत्यादिना** । **तयब्निबन्धन इति** । प्रथमचरमतयाल्पार्धकतिपयनेमाश्चेति सूत्रे हि प्रथमादीनां जसि वा सर्वनामसंज्ञाविधानात् द्वितये द्वितयाः इत्यत्रेव यदादेशः तद्वत् भवतीति न्यायेनायजोऽपि तयस्वेन तयपः प्रत्ययतया तदन्तर्ग्रहणस्य स्थितत्वात् तयबन्तद्वयशब्दस्य जसि सर्वनामसंज्ञायाः विकल्पनेन प्राप्तौ शीभावे द्वये इति तदभावे च द्वया इति रूपद्वयमित्यर्थः । तयप् निबन्धनः इत्यनेन इदमपि सूचितम् । द्वित्रिभ्यां तयस्यायज्वेति सूत्रे तयप् ग्रहणं अनर्थकम् । यावता तयबित्यस्य प्रकृततया षष्ठ्यन्तया परिणामे तयपः अयजादेशः इति विवक्षितार्थसिद्धेरिति शङ्कायां तथात्वे अयज्प्रत्यय एव विधीयत इत्यपि विज्ञायेत । न च तदिष्टम् । द्विशब्दात् अयज्प्रत्यये द्वयशब्दनिष्पत्तावपि द्वयी गतिः इत्यत्र 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तमप्ठक्ठञ्क्करपः' इति सूत्रेण स्त्रियां टिदादिभ्यो ङीप् विधायकेन द्वयशब्दस्य तयबन्तत्वाभावे न ङीप्प्राप्तिः स्यात् । द्वये द्वयाः इत्यादि तयप्प्रयुक्त सर्वनामकार्यं न स्यादित्यादिति (?) मञ्जरीशेषीकृत्यनुसारात् । तथा चायजन्तत्वमात्रे द्वयेत्येतद्रूपाप्राप्तावपि तयस्यायजादेशे सर्वनामकार्योपपत्त्या द्वय इति रूपं सम्भवत्येवेति । शिष्टं स्थले स्थले चन्द्रिकानुसारेण शोध्यमस्ति ।

विठ्ठल०— वैलक्षण्यप्रदर्शनेनेति । सर्वतोव्यावृत्तासाधारणधर्मप्रदर्शनेनेत्यर्थः । **सामान्यतो विशेषतश्चेति** । समन्वयसूत्रेक्षत्यधिकरणाभ्यां सामान्यतः आनन्दमय इत्यादिभिर्विशेषत इत्यर्थः । **द्वय इति** । बहुवचनान्तविरोधविशेषणं द्विधोच्यत इत्यर्थः । एतदेव व्यनक्ति **द्वितीय इति** । व्यवहितान्वयं वाक्यं योजयति **यो द्वितीयेति** ।

॥ इति प्रथमशङ्कानिरासः ॥

* * *

॥ अथ चान्ते तत्र द्वितीयपक्षनिरासः ॥

११९ सु०— ननु च श्रुतीनां परस्परविरोधोऽपि द्वितीयेऽध्याये **न वियदश्रुतेः** इत्यादिना परिहृतः, तत्कथमुच्यते ब्रह्मणः सर्ववैशिष्ट्ये विरोधो द्वितीये निरस्यत इति तत्राह **सृष्टीति** ।

अनु०— सृष्टिसंहारवाक्यानां जीवरूपाभिधायिनाम् ।
अप्यन्योन्याविरोधस्तु द्वितीयाध्यायगोचरः ।

जीवरूपाभिधायिनां वाक्यानाम् । उपलक्षणमेतत्, प्राणादिविषयाणां चेत्यपि द्रष्टव्यम् । सृष्ट्यादिविशेषणमुपपत्तिसूचनार्थम् । तुशब्दो विशेषार्थः । यो **द्वितीयाध्याय-गोचरो** वाक्यानाम् **अन्योन्याविरोधः** सः **अपि** पारमेश्वरसर्ववैशिष्ट्यविरोधपरिहार एव, किन्तु प्रथमद्वितीयपादयोः साक्षात्, तृतीयचतुर्थयोस्तु व्यवधानेनेति विशेषः ।

तथा हि । श्रुतीनां परस्परविरोधपरिहारः किं तत्प्रामाण्यनिर्णयमात्रफलः किंवा प्रमेयनिर्णयफलः । नाद्यः, मीमांसाया न्यायशास्त्रत्वापत्तेः । किञ्चैवं सति वियदादि-सृष्ट्यादिविषयवाक्यविरोधपरिहार एव कस्मात्क्रियते, उदितहोमादिवाक्यानामपि न्याय-दर्शन इवोपादानोपपत्तेः, आकाशवाय्वादिक्रमश्चात्र नात्यन्तमुपयुज्यते ।

द्वितीयेऽपि किं सृष्ट्यादिकमेव प्रमेयमुत तदङ्गिभूतमन्यत् । नाद्यः, तस्य स्वरूपतोऽप्रयोजनत्वात्, प्रथमाप्रतिपाद्यत्वाच्च । अन्यथा पुनरुदितहोमादिवाक्यविरोध-परिहारोऽपि कार्यः स्यात्, सृष्ट्यादिविषयनिष्कर्षोऽपि निर्हेतुकः । अतो द्वितीय एव परिशिष्यते । न चान्यदस्ति सृष्ट्यादिप्रमेयस्याङ्गि प्रथमोक्तं द्वितीयसूत्राभिहिताद्ब्रह्मणः सर्ववैशिष्ट्यात् । अतो युक्तमुक्तम् ।

तदेवं परोक्तसूत्रार्थस्य द्वितीयाध्यायान्तर्भावलक्षणसङ्गत्यभावाद्विरोधाच्चोक्त एव सूत्रार्थ इति सिद्धम् ।

परि०— वाक्यानामिति पदस्य बुद्धिविभागेनोत्तरत्राप्यन्वय इति भावेनाह **वाक्याना-मिति** । **उपपत्तीति** । सा किञ्चैवमित्यादिनाऽग्रे व्यक्ता । **विशेषार्थ इति** । सोऽपि किन्तु

प्रथमद्वितीयपादयोरित्यादिनाऽग्रे विवरिष्यते । वाक्यं योजयति **य इति** । अविरोधपदं विरोधपरिहारपरमिति भावेनाह **सोऽपीति** । **व्यवधानेनेति** । वाक्यानामन्योन्यविरोधनिरासद्वारेत्यर्थः । सोऽपीत्यादिनोक्तं व्यनक्ति **तथा हीत्यादिना** । **उदितहोमेति** । 'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाच्च जुह्वति येऽग्निहोत्रम् । दिवा कीर्त्यमदिवा कीर्तयन्तं' इति । 'यथाऽतिथये प्रद्रुतायान्नं हरेयुः तादृक् तद्यदुदिते जुहोति' इति परस्परनिन्दयोदितानुदितहोमवाक्ययोर्विरोधस्य प्रतीतेस्तन्निरासाय तादृशवाक्यानामपि अत्रोपादानं स्यादित्यर्थः । एवं सतीत्यापादकानुकर्षः । आकाशेति, न वियदिति, एतेन मातरिश्वेति, तेजोऽत इति, आप इति, पृथिव्यधिकाररूपेति यः क्रमः सः प्रामाण्यनिर्णयमात्रफलत्वेऽनुपयुक्तः स्यात् । प्रमेयनिर्णयफलत्वे तु अस्ति भाष्याद्युक्तदिशा भगवतः स्वातन्त्र्यादिनिर्णयार्थत्वादस्त्युपयोग इति भावः । **तदङ्गिभूतमिति** । सृष्ट्यादिप्रमेयमङ्गं कृत्वा यत्प्रधानतया वर्तते प्रमेयं तदित्यर्थः । **स्वरूपतोऽप्रयोजनत्वादिति** । सृष्टिलयादिस्वरूपमात्रनिर्णयस्य मुक्त्यनुपायत्वादिति भावः । **प्रथमेति** । सृष्टिलयादिरूपप्रमेयमात्रस्य प्रथमाध्यायाप्रतिपाद्यत्वाच्चेत्यर्थः । प्रथमाध्यायप्रतिपादितप्रमेयनिर्णयस्यैव द्वितीयेऽध्याये विरोधनिरासेन कार्यत्वादिति भावः । **अन्यथेति** । प्रथमाध्यायानुक्ते प्रमेयविरोधनिरासे सतीत्यर्थः । **द्वितीय एवेति** । तदङ्गिभूतमन्यदस्तीति पक्ष इत्यर्थः । अस्त्वेवं तावता तत्सर्ववैशिष्ट्यमिति कुत इत्यत आह **न चेति** । प्रथमाध्यायोक्तमङ्गि सर्ववैशिष्ट्यादन्यन्न चास्ति किन्तु तदेवेत्यर्थः । **विरोधाच्चेति** । सर्वोपादानत्वेन सर्वात्मकत्वरूपार्थस्य पूर्वाध्यायोक्तसर्ववैशिष्ट्यविरोधादिति वा प्रकृत्याद्यधिकरणेषु पराभिप्रेतविवर्तवादविरोधादिति वा कृत्स्नप्रसक्त्यादिसूत्रोक्तोपादानादिविरोधादिति वार्थः । विवर्तवादे कृत्स्नप्रसक्त्यादिचोदनानवकाशस्योक्तत्वात् ।

यादु०— न्यायदर्शन इवेति । ब्रह्मतर्कशास्त्र इवेत्यर्थः । **प्रथमेति** । प्रथमाध्यायाप्रतिपाद्यत्वाच्चेत्यर्थः ।

वं०प०— जीवरूपेति । जीवस्वरूपेत्यर्थः । **प्राणादीति** । 'तथा प्राणाः' इत्यादिचतुर्थपादीयानामित्यर्थः । किन्त्वित्यनेन विशेषार्थमित्युक्तं प्रदर्शितम् । सृष्ट्यादिग्रहणमुपपत्तिसूचनार्थमित्युक्तं प्रदर्शयति **तथा हीत्यादिना** । **तदिति** । श्रुतीत्यर्थः । **न्यायेति** । ब्रह्मतर्केत्यर्थः । **एवं सति** श्रुतिप्रामाण्यनिर्णयमात्रफलकत्वेन न्यायशास्त्रत्वस्येष्टत्वे । **न्यायदर्शन इवेति** । यथा ब्रह्मतर्कशास्त्रे उदितहोमादिवाक्यस्य विरोधपरिहारेण तत्प्रामाण्यं समर्थितमेवमत्रापि स्यादित्यर्थः । **अत्यन्तमिति** । यदि प्रमेयनिर्णयः फलं तर्ह्येव 'न वियत्', 'एतेन मातरिश्वा', तेजोऽत', 'आपः', 'पृथिवी'त्यादिक्रमेणोपादानं युज्यते तथोत्पन्नत्वादिति युक्तम् । अत्र श्रुतिप्रामाण्यमात्रनिर्णयफलकपक्षे व्यत्यासेनापि कुतो न निर्णीतमिति भावः ।

आकाशाद्वायुरिति श्रौतक्रममपेक्ष्यैवं क्रमेण विरोधः परिहृत इति चेत् । सत्यम् । अत एवात्यन्तेत्युक्तम् । **तदङ्गि** तस्य सृष्ट्यादिप्रमेयस्याङ्गि प्रधानभूतमित्यर्थः । **तस्य सृष्ट्यादिप्रमेयस्य** । **प्रथमेति** । अध्यायेत्यर्थः । यतोऽत्र प्रथमाध्यायोक्तार्थ एव विरोधः परिह्रियते । न हि केवलं सृष्ट्यादि तत्प्रतिपाद्यम् । किन्तु तत्कारणत्वमेवेत्यर्थः । **अन्यथेति** । प्रथमाप्रतिपादितेऽपि प्रमेये यदि विरोधः परिह्रियत इत्यर्थः । **निष्कर्षः** निष्कृष्य सृष्ट्यादिविषयवाक्योपादानमित्यर्थः । प्रथमाध्यायोक्तं सृष्ट्यादिप्रमेयस्याङ्गि द्वितीयसूत्राभिहिताद्ब्रह्मणो वैशिष्ट्यादन्यत्र चास्तीत्यन्वयः । **विरोधाच्चेति** । सकलजगदुपादानत्वेन सर्वात्मकत्वं तु न सर्ववैशिष्ट्यम् । नापि तदुपयुक्तम् । प्रत्युत विरुद्धमेवेत्युक्तरीत्या विरोधाच्चेत्यर्थः ।

कं०रा०— मीमांसाया इति । श्रुतीनां परस्परविरोधपरिहारस्य श्रुतिप्रामाण्यनिर्णयार्थत्वे 'प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रत' इत्युक्तन्यायेन तर्कशास्त्रकर्तव्यस्य प्रामाण्यनिर्णयस्य मीमांसायां करणात् तस्या न्यायशास्त्रत्वापत्तिरिति भावः । **प्रथमेति** । इह द्वितीये प्रथमाध्यायप्रतिपाद्ये विरोधपरिहारेण तन्निर्णयस्यैव कर्तव्यत्वात् सृष्ट्यादेश्च प्रथमाध्यायप्रतिपाद्यत्वान्न तन्निर्णयः फलमिति भावः । **न चान्यदस्तीति** । जन्माद्यस्य यत इति द्वितीयसूत्राभिहिता ब्रह्मणः सर्वोत्कृष्टत्वादेरन्यत्प्रथमाध्यायोक्तं सृष्ट्यादिप्रमेयस्याङ्गी नैवास्तीत्यर्थः ।

श्रीनिधि०— उपपत्तिसूचनार्थमिति । परमेश्वरसर्ववैशिष्ट्यविरोधपरिहारत्वे उपपत्तिसूचनार्थमित्यर्थः । तुशब्दोक्तं विशेषं दर्शयति **यो द्वितीयाध्यायगोचर** इत्यादि । **व्यवधानेन** श्रुतिविरोधपरिहारव्यवधानेन । **न्यायदर्शन इवेति** । ब्रह्मतर्कादि न्यायशास्त्र इवेत्यर्थः । **आकाशवाय्वादिक्रमश्चेत्यत्रेति** । अत्र प्रामाण्यनिर्णयमात्रफल इति पक्षे । तृतीयपाद इति वा । आकाशवाय्वादिविषयकवाक्यविरोधपरिहारक्रम इत्यर्थः । प्रमेयनिर्णयफलत्वे तु ब्रह्मण आकाशादिक्रमेणैव तत्तत्सृष्टत्वं नान्यथेति महिमाविशेषसूचनार्थत्वमिति भावः । **प्रथमाध्याये अप्रतिपाद्यत्वाच्चेति** । प्रथमाध्यायानुक्तार्थेऽपि विरोधपरिहारे अध्यायसङ्गतिः स्यादिति भावः । **निर्हेतुको** निर्निमित्तनिष्प्रयोजन इति यावत् ।

शे०वा०— नन्‌ सृष्टिसंहारवाक्यानामिति श्रुतीनां परस्परविरोधपरिहारस्य द्वितीयाध्यायार्थत्ववर्णनमनर्थकमित्यतः सर्ववैशिष्ट्यविरोधपरिहारस्य प्रागुक्तद्वितीयाध्यायार्थत्वसमर्थनार्थत्वान्न तदिति भावेन तदुपपादकतया तद्योजयितुं सर्ववैशिष्ट्यविरोधपरिहारस्य द्वितीयाध्यायार्थत्वानुपपत्तिशङ्कामुत्थापयति **ननु चेति** । सृष्टिसंहाराभ्यां समस्तस्यापि वाक्यपदस्य योग्यत्वात् बुद्ध्या विवेकेन जीवरूपाभिधायिनामित्यत्रापि विशेष्यतया सम्बन्ध इत्यभिप्रेत्याह **जीवरूपाभिधायिनां वाक्यानामिति** । 'तथा प्राणा' इत्यादेरपि सङ्ग्रहार्थमाह **उपलक्षणं चैतदिति** । **उपपत्तीति** । वाक्यविरोधपरिहारस्य प्रामाण्यमात्रनिर्णयफलकत्वाभावे प्रमेयनिर्णयफलकत्वे सृष्ट्यादेरेव प्रधानप्रमेयत्वाभावे वेति शेषः । भाष्ये तुशब्दानर्थक्यमाशङ्क्य तृतीयचतुर्थपादप्रतिपाद्यवाक्यद्वयाविरोधस्य अत्रोक्तसर्ववैशिष्ट्यविरोधपरिहारकत्वोपपादकविशेषसूचनार्थत्वान्नानर्थक्यमिति भावेन तदर्थकथनपूर्वकं तत्सूचितविशेषं च दर्शयति **तुशब्द इत्यादिना** । ननु तृतीयचतुर्थयोर्वाक्यद्वयविरोध-

परिहारकत्वमेवास्तु किं व्यवधानेन सर्ववैशिष्ट्यविरोधपरिहारकत्वकल्पनयेत्यतोऽन्यथा आनर्थक्यप्रसक्तेरिति भावेन तदुपपादयति **तथा हीति** । **न्यायशास्त्रत्वेति** । प्रमाणशास्त्रत्वेत्यर्थः । ततश्च प्रमेयशास्त्रत्वभङ्ग इति भावः । **उपपत्तेरिति** । वाक्यप्रामाण्यफलकत्वस्योभयत्र साम्येनैकमात्रस्वीकारस्य निर्हेतुकत्वादिति भावः । **स्वरूपत इति** । ततश्च न स्वरूपेण जिज्ञास्यतेति भावः । **प्रथमेति** । प्रथमाध्यायेत्यर्थः । ततश्चोक्तेऽर्थे विरोधपरिहारकत्वाभावादसङ्गतिः स्यादिति भावः । **अन्यथेति** । स्वरूपतोऽप्रयोजनस्य प्रथमाध्यायाप्रतिपाद्यस्यापि सृष्ट्यादेरेव प्रधानप्रमेयत्वे इत्यर्थः । तत्राप्युदितहोमादेरेव स्वप्रधानप्रमेयत्वोपपत्त्या प्रमेयनिर्णयफलकत्वाविशेषादिति भावः । अस्तु सृष्ट्याद्यङ्गिभूतमन्यत् । तत्तु सर्ववैशिष्ट्यमिति कस्मादवसीयत इत्यतस्तदन्यस्य कस्यचित्सृष्ट्याद्युपयोगित्वेनोक्ताङ्गत्वादन्यस्य च प्रथमोक्तत्वादिगुणविशिष्टस्याभावात् सर्ववैशिष्ट्यमेव तदित्याह **युक्तमुक्तमिति** । तृतीयचतुर्थयोर्व्यवधानेन सर्ववैशिष्ट्यविरोधपरिहारकत्वं यदुक्तं तद्युक्तमित्यर्थः ।

स०व्र०— उपपत्तिसूचनार्थमिति । हरेः सर्ववैशिष्ट्ये इति शेषः । आकाशादेरुत्पत्त्यादिमत्त्वे तत्कारणत्वसम्भवेन सर्ववैशिष्ट्यसम्भवादिति भावः । विशेषार्थत्वमेवोपपादयति **य इति** । **न्यायेति** । **न्यायशास्त्रं** ब्रह्मतर्कः । **आकाशेति** । श्रुतीनां परस्परविरोधपरिहारो यदि प्रामाण्यमात्रफलकः, तदा 'न वियदश्रुतेः' इत्यादिना क्रमेण आकाशवाक्यादिवाक्यानामेव विरोधपरिहारोऽनुपपन्न इति भावः । **प्रथमेति** । प्रथमाध्याये अप्रतिपादितत्वाच्चेत्यर्थः । **सृष्ट्यादीति** । उदितहोमादिवाक्यविरोधपरिहारमकृत्वा सृष्ट्यादिविषयवाक्यनिष्कर्ष एव कर्तव्य इति नियामकं नास्तीत्यर्थः ।

विठ्ठल०— वाक्यानामन्योन्याविरोधः कथं सर्ववैशिष्ट्यविषयकः स्यादिति शङ्कते **किन्त्विति** । उत्तरतया तुशब्दसूचितं विशेषं दर्शयति **प्रथमेति** । **न्यायशास्त्रत्वापत्तेरिति** । 'प्रमाणन्यायसच्छिक्षा क्रियत' इत्युक्तत्वेन प्रामाण्यनिर्णयमात्रफलत्वे तर्कशास्त्रत्वापत्तिः स्यादिति भावः । उपपत्तिसूचनार्थमित्युक्तं व्यनक्ति **किञ्चैवमिति** । **न्यायदर्शन इवेति** । ब्रह्मतर्क इवेत्यर्थः । **आकाशेति** । 'न वियदिति' 'एतेन मातरिश्वेति' 'तेजोऽत' इत्यादिर्य आकाशवाय्वादिक्रमेणाधिकरणक्रमः स प्रामाण्यनिर्णयमात्रफलकत्वेन युक्तः स्यात् । प्रमेयनिर्णयफलकत्वे त्वस्ति भाष्याद्युक्तदिशोपयोग इति भावः । **अन्यथेति** । प्रथमाध्यायानुक्तेऽपि प्रमेये विरोधनिरासे सतीत्यर्थः । **विरोधाच्चेति** । सर्वोपादानत्वे सर्वात्मकत्वरूपार्थस्य पूर्वाध्यायोक्तसर्ववैशिष्ट्यविरोधादिति वा । कृत्स्नप्रसक्त्या सूत्रोक्तोपादानादिविरोधादिति भावः ।

॥ इति द्वितीयशङ्कानिरासः ॥

॥ इति उक्तासङ्गती शङ्काद्वयनिरासः ॥

॥ इति परोक्तसूत्रार्थे असङ्गत्यादिमूलकानुपपत्तिप्रदर्शनम् ॥

॥ इति उक्तार्थस्योपपादनम् ॥

* * *

॥ अथ 'विकरणत्वान्नेति चेत्तदुक्तम्' इति सूत्रस्य
अनारम्भणीयत्वशङ्कानिरासः ॥

१२० सु०— `अत्रेश्वरस्य शरीरेन्द्रियादिकरणरहितत्वात्कर्तृत्वं नोपपद्यते इत्याक्षेपसमाधानार्थं सूत्रम्— **ॐ विकरणत्वान्नेति चेत्तदुक्तम् ॐ** इति । एतदनारम्भणीयम्, पुनरुक्तत्वात्, **'श्रुतेस्तु शब्दमूलत्वात्, आत्मनि चैवं विचित्राश्च हि, सर्वोपेता च तद्दर्शनादि'** ति सूत्रैरेवालौकिकत्वशब्दैकसमधिगम्यत्वविचित्रानन्तशक्तित्वादियुक्तिभिः सर्वस्यापि दौर्घट्यस्य परिहृतत्वात् । यो हि साक्षात्कारकाधिष्ठानस्य नेष्टे स शरीरव्यवधानमपेक्षते, यस्य चागन्तुकं ज्ञानं स तदर्थमिन्द्रियाणि, यश्च गुरुशरीरो नावस्थातुं शक्नोति स क्षित्यादिकमाधारम्, भगवांस्तु सर्वशक्तिः सर्वज्ञः किमर्थमपेक्षेतेति । न च क्वचिदभ्यधिका शङ्काऽस्ति येन पुनरारम्भः स्यादित्यत आह **मानेति** ।

अनु०— मानमेयविशेषेण पुनरुक्तिर्न जायते ॥

यथा अत एव प्राण इत्यादौ मानैक्येऽपि मेयविशेषेण न पुनरुक्तिदोषस्तथाऽत्र मेयैक्येऽपि मानविशेषेण न पुनरुक्तिदोषः ।

एतदुक्तं भवति । किमुक्तार्थोक्तिमात्रं दोषः । किं वोक्तानतिरिक्तोक्तिः । नाद्यः, उक्तपरिहारातिदेशोक्तेरपि दोषत्वानुषङ्गात् । द्वितीयस्तु प्रकृते न सिद्धः, प्रमेयैक्येऽपि प्रमाणभेदस्य सत्त्वात् । इह हि चिदानन्दाद्यात्मकदिव्यमङ्गलविग्रहवतो महापुरुषस्य प्राकृतशरीराद्यभावेऽपि सकलकार्यकर्तृत्वमपाणिपाद इत्यादिश्रुतिमाश्रित्योक्तमिति ।

यद्वा **मानमेययोर्विशेषेण** इति योज्यम् । तथा चायमर्थः । पूर्वसूत्रैः सामान्यविषयप्रमाणान्याश्रित्य सामान्यत एव सर्वानुपपत्तिपरिहारो विहितः, इह तु विशेषविषयेणैव प्रमाणेन विशेषानुपपत्तिपरिहारः क्रियत इति कथं पुनरुक्तिदोषावकाश इति । तथाऽप्याक्षेपो नोपपद्यत इति चेन्न । विशेषजिज्ञासयोपपत्तेरिति ॥

परि०— अत्रेति । श्रुतेस्त्वित्यधिकरण इत्यर्थः । सूत्रमिति । चरमसूत्रम् । परिहृतत्वमेव व्यनक्ति **यो हीति** । इन्द्रियाणीत्यादावपेक्षित इत्यनुषङ्गः । मेयविशेषणेत्युक्तेरिहानुपयोगेऽपि

दृष्टान्तोक्त्यर्थतयोपयोगमाह **यथेति** । इत्यादावित्यादिपदेन 'ज्योतिश्चरणाभिधानात् छन्दोभिधानादि'त्यादेर्ग्रहः । मानैक्येऽपि तद्धर्मोपदेशात्तल्लिङ्गादिति पूर्वनयद्वये निरवकाशलिङ्गरूपमानेन निर्णयः । तथाऽत एव प्राण इत्यादावपि निरवकाशलिङ्गेनैव निर्णयः कृत इति निरवकाशलिङ्गत्वेन निर्णायकमानैक्येऽपि पूर्वत्राधिदैवाधिभूतगतशब्दप्रवृत्तिनिमित्तमीश्वरगतमन्यगतं च तदधीनमित्युक्त्या तच्छब्दानां भगवति शक्तितात्पर्यरूपप्रमेयैरुपपादितम् । अत एवेत्यादौ तु जीवनहेतुत्वादिरूपमध्यात्मादिगतशब्दप्रवृत्तिनिमित्तमीश्वरगतम्, अन्यगतं च तदधीनं चेत्युक्त्या तच्छब्दानां भगवति शक्तितात्पर्ये स्त इत्युच्यत इति प्रमेयविशेषेण न पुनरुक्तिरित्यर्थः । **मेयैक्येऽपीति** । तच्च प्रकटितं प्राक् यो हीत्यादिना किमर्थमपेक्षत इत्यन्तेन । **मानविशेषेणेति** । स चापाणिपाद इत्यादिनाऽग्रे व्यक्तः । यथेति दृष्टान्तोक्तितात्पर्यं उक्तं **परिहारेत्यादि** । सत्त्वादित्युक्तं व्यनक्ति **इह हीति** । मेयेत्यस्य प्रकृतोपयुक्ततयैव योजयति **यद्वेति** । **विशेषविषयेणेति** । देहेन्द्रियादिविशेषविषयेण मानेन देहादिहीनस्य न कर्तृत्वमिति एवंरूपविशेषानुपपत्तेः परिहारः क्रियत इत्यर्थः । **तथापीति** । अपुनरुक्तावपि सर्वानुपपत्तेः परिहारात् विकरणत्वादिति चेत् इत्याक्षेपो न युक्त इत्यर्थः । **विशेषजिज्ञासयेति** । मानविशेषमेयविशेषबुभुत्सयोपपत्तेरित्यर्थः ।

यादु०— मेयैक्येऽपीति । अघटितमपि सर्वं भगवति विचित्रशक्त्या घटत इति मेयैक्येऽपीत्यर्थः । **विशेषविषयेणैवेति** । शरीरेन्द्रियादिरूपविशेषविषयेणैवेत्यर्थः । **तथाऽप्याक्षेप इति** । सर्वस्यापि दौर्घट्यस्य परिहृतत्वादिति भावः ।

वं०प०— कारकाधिष्ठानस्य दण्डचक्रादिकारकप्रेरणस्य । **आगन्तुकम्** उत्पत्तिमत् । **अपेक्षेतेति** शरीरव्यवधानं वेन्द्रियाणि वा क्षित्याधारं वेत्यर्थः । **उक्तानतिरिक्तोक्तिः** उक्तापेक्षयाऽधिकोक्त्यभावः । **प्रमेयैक्ये** अघटितमपि भगवतः कर्तृत्वं विचित्रशक्त्या घटत इत्येवंरूपे । प्रमाणभेदस्येत्युक्तं प्रमाणभेदं दर्शयति **इह हीत्यादिना** । **सामान्येत्यादि** । भगवतः कर्तृत्वं न युक्तं कृत्स्नप्रसक्त्यादेरिति सामान्यतोऽनुपपत्तौ चोदितायां सर्वशक्तित्वाद्युक्तमित्यतीतसूत्रैः सामान्यतः प्रतिपादितम् । इह तु करणाभावान्न कर्तृत्वमिति विशेषानुपपत्तौ सत्यां करणाभावेऽपि कर्तृत्वं युक्तमिति विशेषविषयकप्रमाणोदाहरणेन परिहारः क्रियत इति प्रमेये प्रमाणे च विशेषोऽस्तीत्यर्थः । **तथाऽपीति** । सर्वस्यापि दौर्घट्यस्य परिहृतत्वादिति भावः ।

श्रीनिधि०— तस्य स्वरूपतो प्रयोजनत्वादिः सृष्ट्यादिविशेषणसूचिता उपपत्तिरिति द्रष्टव्यम् । **सर्वस्यापि दौर्घट्यस्य परिहृतत्वादित्युक्तम्** । तदुपपादयति **यो हि साक्षादित्यादिना** । **मानैक्येऽपीति** ।

तल्लिङ्गादिति पूर्वाधिकरणोक्तब्रह्मलिङ्गस्यैव मानत्वात् इत्यर्थः । **मेयविशेषेणेति** । पूर्वाधिकरणे अधिभूत-शब्दविचारः । प्राणाधिकरणे अधिदैवशब्दविचार इति मेयभेद इत्यर्थः । **आक्षेपो नोपपद्यत इति** । श्रुतेस्त्वित्यादिनाधिकरणत्वप्रयुक्तदौर्घट्यस्यापि परिहारात् । सामान्यन्यायस्य सर्वविशेषविषयत्वादिति भावः । **विशेषजिज्ञासयेति** । विशेषप्रमाणजिज्ञासयेत्यर्थः ।

शे०वा०— 'मानमेयविशेषेणे'त्यादेरपव्याख्याननिरासपरत्वभ्रमनिवारणाय अपव्याख्याननिराकरण-मुपसंहरति **तदेवमिति** । तर्हि 'तस्य त्वि'त्यादिनैवाधिकरणतात्पर्यकथनात् विरोध इत्यादिनैवापव्याख्यान-निराससिद्धेः किं मानमेयेत्युत्तरग्रन्थेनेत्यतो विकरणत्वादिति सूत्रारम्भसमर्थनार्थं तदितिभावेन प्रागनुक्ता-भिधायकस्य तस्य पूर्वेण गतार्थताप्रसक्तेरेवाभावात् किं तदारम्भसमर्थनेनापीत्यतः तत्सूत्रप्रतिपाद्यप्रदर्शनपूर्वकं सूत्रमुपन्यस्य श्रुतेस्त्वित्यादिसूत्रेर्गतार्थतां दर्शयति **अत्रेत्यादिना** । नन्वत्र मानविशेषसद्भावेऽपि मेयैक्येन तद्विशेषाभावात् कथं मानमेयविशेषमाश्रित्य पौनरुक्त्यपरिहार इत्यतो न प्रकृते मानमेयविशेषेण पौन-रुक्त्यपरिहारोऽभिमतः किन्तु क्वचिन्मेयविशेषेणेव प्रकृते प्रमाणविशेषेण तत्परिहार इति नानुपपत्तिरिति भावेनोक्तार्थसमर्पणायापेक्षितयथातथेत्याद्यध्याहारेण वाक्यं योजयति **यथेत्यादिना** । **मानैक्येऽपीति** । भूतादिषु मुख्यया वृत्त्या प्रवृत्तानामप्याकाशादिशब्दानां महायोगविद्वद्रूढिभ्यामीश्वरवाचित्वसमर्थनात् पूर्वपक्षसिद्धान्तप्रापक-प्रमाणैक्यमित्यर्थः । **प्रमेयविशेषेणेति** । अघटितमपि सर्वं भगवदचिन्त्यशक्त्या घटत इत्यस्यैव पूर्वोत्तरसूत्र-प्रतिपाद्यतया तद्रूपप्रमेयैक्येऽपीत्यर्थः । नन्वस्तु मानविशेषस्तथाऽप्युक्तार्थोक्तिमात्रमस्त्येवेति पौनरुक्त्य-मवर्जनीयमेवेत्यतः तस्यादोषत्वादुक्तमात्रोक्तेरेव दोषत्वात् प्रकृते च तदभावान्न पौनरुक्त्यमित्यभिप्रेत्य कुतो नोक्तार्थोक्तिमात्रस्य दोषत्वं कथं चात्रोक्तमात्रोक्त्यभाव इत्यतस्तदुभयं दर्शयितुं विकल्पयति **एतदुक्तं भवतीति** । प्रमाणभेदमेव दर्शयति **इह हीति** । अत्र पक्षे यथातथेत्यध्याहारो भवतीत्यपरितोषात् पक्षान्तरमाह **यद्वेति** । कथमेतावता पूर्वोत्तरवैलक्षण्यं येनापौनरुक्त्यमित्यत आह **तथा चेति** । **विशेषविषयेणैवेति** । शरीरेन्द्रियादिरूपविशेषविषयेणैवेत्यर्थः । **तथाऽप्याक्षेप इति** । सर्वस्यापि दौर्घट्यस्य सामान्यतः परिहृत-त्वादिति भावः । **विशेषजिज्ञासयेति** । विशेषप्रमाणजिज्ञासयेत्यर्थः । इतीत्यस्य इत्ययमर्थ इति पूर्वेण सम्बन्धः ।

स०व्र०— **मेयविशेषेणेति** । 'अत एव प्राणः' इत्यत्र अन्वयव्यतिरेकसिद्धप्राणादिहेतुत्वविशिष्ट-प्राणादिशब्दानां समन्वयः । 'प्राणस्तथाऽनुगमात्' इत्यत्र प्राणादिशब्दानामिति प्रमेयभेद इत्यर्थः । **प्रमेयैक्ये** करणाद्यभावेऽपि कर्तृत्वमित्येवं साध्यैक्येऽपीत्यर्थः । **तथाऽपीति** । करणादिरहितस्य कर्तृत्वं नोपपद्यत इति आक्षेपो न सम्भवति । करणादिरहितस्यापि कर्तृत्वप्रतिपादकप्रमाणस्याभिहितत्वादिति भावः । **विशेषेति** । पादादिरहितस्य कथं कर्तृत्वं तादृशप्रमाणाभावादिति विशेषजिज्ञासयेत्यर्थः ।

विठ्ठल०— कारकाधिष्ठानस्येति । कारकनियमनस्येत्यर्थः । **मेयैक्येऽपीति** । सत्यताघटितमपि कर्तृत्वे सर्वं परमात्मनि विचित्रशक्त्या घटत इति मेयैक्येऽपीत्यर्थः । एवं मेयपदं दृष्टान्तकथनार्थमुपात्तमिति व्याख्यातम् । प्रकारान्तरेणापि व्याख्याति **यद्वेति** ।

॥ इति 'विकरणत्वान्नेति चेत्तदुक्तम्' इति सूत्रस्य अनारम्भणीयत्वशङ्कानिरासः ॥

॥ इति श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥
॥ २-१-८ ॥

* * *

॥ अथ नप्रयोजनाधिकरणम् ॥

॥ २-१-९ ॥

ब्र०सू०— ॐ न प्रयोजनवत्त्वात् ॐ ॥

ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥

॥ अथ भाष्योक्ततदधिकरणीयप्रयोजने अम्वविकाशङ्का, तन्निरासः, तदुपपादनम्, तत्समर्थनञ्च ॥

॥ अथ तत्रादौ सा शङ्का, तन्निरासश्च द्विविधः ॥

१२१ सु०— 'यत्प्रयोजनार्थं सृष्ट्यादिः तदूनत्वादपूर्णते'त्याक्षेपपरिहाराय इदमधिकरणमारभ्यते । तदेतदनुपपन्नमिव आभाति । तथा हि ।

यद्यत्र कर्तृत्वेन प्रयोजनवत्त्वं प्रसाध्य अपूर्णत्वसाधनं पूर्वपक्षिणो विवक्षितं स्यात्तदा प्रथमसूत्रमयुक्तं स्यात्, अपूर्णतासाधकं प्रति प्रयोजनवत्त्वहेतोरसिद्धत्वात् । अथ 'कर्ता चेत्प्रयोजनवान् स्यात् तथा चापूर्णः स्यादि'त्यापादनं विवक्षितम्, तदा व्यर्थमेवेदं सूत्रम्, 'न चापूर्णस्ततो न प्रयोजनवानि'ति परेणैवाङ्गीकृतत्वात्, अन्यथा विपर्ययापर्यवसानात् । लोकवत्तु लीलाकैवल्यमिति द्वितीयसूत्रं तु पक्षद्वयेऽप्ययुक्तम्, साधनापादनदूषणस्यानुद्भावनादिति ।

मैवम् । 'ईश्वरस्य सृष्ट्यादिना प्रयोजनमस्ति न वा । आद्येऽपूर्णत्वं प्रसज्येत, द्वितीये तु कर्तृत्वानुपपत्तिः, तस्य प्रयोजनव्याप्तत्वात्, इत्युभयथाऽपीश्वरस्य जगत्सृष्ट्यादि कर्तृत्वानुपपत्तिः' इति अत्र पूर्वपक्षिणो विवक्षितम् । तत्र प्रथमसूत्रेण प्रयोजनाभावपक्षं सयुक्तिकमुपादत्ते, तत्रोक्तदोषपरिहारार्थं द्वितीयं सूत्रम् ।

यद्वा कर्तृत्वेन प्रयोजनस्य तेन चापूर्णत्वस्य इदं साधनं विवक्षितमुतापादनमिति सिद्धान्ती विकल्प्याद्यमाद्येन निराचष्टे, "न कर्तृत्वेन प्रयोजनवत्त्वं साध्यम्, कृतकृत्यत्वेन प्रयोजनाभावस्यैव निश्चितत्वात् । न चासिद्धो हेतुः, 'अथैष एव परम आनन्दो निरनिष्टो

निरवद्य' इति श्रुतेः । प्रयोजनवत्त्वेनापूर्णतानुमानं तु गर्भस्रावेणैव ग(लि)तमि''ति । आद्यस्य दूषणान्तरं वदन् द्वितीयं द्वितीयेन निराकरोतीति ।

परि०— 'स्वयं कृतापि तद्व्याख्या क्रियते स्पष्टतार्थतः' इति स्वप्रतिज्ञामनुरुध्य 'सदा प्रवृत्तिरि'त्यादिना भाष्योक्तस्य विवरणं क्रियत इति भावेन विवरणहेतुबीजभूतां भाष्योक्तेरनुपपत्तिं भाष्यवाक्यमेवाधिकरणार्थोक्तिव्याजेन पठित्वा दर्शयति **यत्प्रयोजनार्थमित्यादिना मैवमित्येतत्पर्यन्तेन** । **प्रयोजनवत्त्वहेतोरित्यादि** । तस्य सृष्ट्यादिना प्राप्तव्यप्रयोजनस्य प्रागेवाप्तत्वादित्यर्थस्य भाष्येऽभिधानादिति भावः । न प्रयोजनवत्त्वादित्यत्र न समानैकपद्यमाश्रित्य सृष्ट्यादिलभ्यं यत्प्रयोजनं तादृशप्रयोजनवत्त्वाभावादिति भाष्याभिमतार्थान्तरेऽप्यनुपपत्तिं पक्षभेदेन दर्शयति **अथेत्यादिना** । **साधनेति** । साधनापादनयोर्दूषणस्येत्यर्थः । सूत्रद्वयतात्पर्यं तावन्मूलकाराभिमतं द्वेधा स्वयमाह **ईश्वरस्येत्यादिना निराकरोतीत्यन्तेन** । सृष्ट्यादिनेश्वरस्य प्रयोजनं नास्ति प्रागेव सृष्ट्यादिलभ्यप्रयोजनवत्त्वात् आप्तकामत्वादिति यावदितिसूत्रार्थं हृदि कृत्वाह **प्रयोजनाभावपक्षं सयुक्तिकमुपादत्त इति** । **तत्रोक्तदोषेति** । प्रयोजनाभावपक्षोक्तकर्तृत्वानुपपत्तिरूपदोषपरिहारार्थमित्यर्थः । स च परिहारोऽग्रे मूलव्याख्यावसरे व्यक्तः । **आद्येनेति** । सूत्रेणेत्यनुषङ्गः । निराचष्ट इत्येतत्सूत्रार्थोक्त्या व्यनक्ति **न कर्तृत्वेनेति** । प्रयोजनवत्त्वादित्यस्यार्थः **कृतकृत्यत्वेनेति** । तात्पर्यार्थः **प्रयोजनेत्यादि** । यद्वा सूत्रे नेत्येतद्व्यस्तं समस्तं चेत्युपेत्य व्यस्तस्यार्थो **न कर्तृत्वेनेत्यादि** । समस्तस्यार्थः **प्रयोजनाभावस्य निश्चयादिति** । तत्र हेतुः **कृतकृत्यत्वेनेति** । तथा च बाधितमनुमानमिति भावः । अपूर्णतासाधननिरासः सूत्रे न प्राप्त इत्यत आह **प्रयोजनवत्त्वेनेति** । हेतोरेवासिद्धेरिति भावः । **आद्यस्येति** । आद्यस्य कर्तृत्वेन प्रयोजनसाधनपक्षस्य प्रागुक्तबाधरूपदोषादनैकान्तिकत्वरूपदूषणान्तरं वदन्नित्यर्थः । द्वितीयमापादनपक्षं द्वितीयेन सूत्रेण निराकरोति । स प्रकारोऽग्रे व्यक्तः ।

गु०दी०— **प्रयोजनवत्त्वहेतोः** इत्यत्र 'न प्रयोजनवत्त्वादि'ति हेतोरित्यर्थः । सृष्ट्यादिनेश्वरस्य प्रयोजनासत्त्वादिति सूत्रार्थः । तथा चासिद्धो हेतुरित्यर्थः । यद्वा योऽवाप्तयत्प्रयोजनः स स्वार्थं न तदुद्दिशतीति टीकाकृतैव वक्ष्यमाणत्वाज्जगत्सृष्ट्यादौ नेश्वरस्य स्वप्रयोजनम् ।

यादु०— **प्रयोजनवत्त्वहेतोरिति** । सूत्रे प्रयोजनवत्त्वादित्यस्य हि कृतकृत्यत्वादित्यर्थो विवक्षितः सिद्धान्तिनः तस्यासिद्धत्वादित्यर्थः । अत्र सूत्रगतमेव प्रयोजनवत्पदं कृतकृत्यपरम् । प्रयोजनवत्त्वं प्रसाध्येत्यादिसुधागतं यत्तत्प्रसिद्धार्थकमेवेति द्रष्टव्यम् । **गर्भस्रावेणैवेति** । हेतोरसिद्धत्वादिति भावः ।

वं०प०— जिज्ञासयेति । यद्यपि सर्वं दौर्घट्यं परिहृतमित्याक्षेपो न युक्तस्तथाऽपि करणाभावे कथं कर्तृत्वं तज्ज्ञातव्यमिति विशेषप्रमाणजिज्ञासया विकरणत्वान्नेत्याक्षेपो युक्त इत्यर्थः । **कर्तृत्वेनेति** । सृष्ट्यादिप्रवृत्तिरूपकर्तृत्वेनेत्यर्थः । **साधनं** तेन हेतुनेति शेषः । **परेणैवेति** । आपादयित्रा पूर्वपक्षिणेत्यर्थः । एतत्सूत्रे यत्प्रतिपादिते प्रयोजनवत्त्वात्पूर्णत्वात्प्रयोजनं नेति तत्पूर्वपक्षिणाप्यङ्गीकृतमेवेति तं प्रति सूत्रेण प्रतिपादनं **व्यर्थम्** । एवं परेण नाङ्गीकृतमिति चेत् तत्राह **अन्यथेति** । विपर्ययपर्यवसानानुपपत्तिप्रसङ्गा-दित्यर्थः । कुत इत्यत आह **साधनेति** । साधनानुमानपक्षे दूषणानुमानपक्षे चेत्यर्थः । **उक्तदोषेति** । प्रयोजनाभावे कर्तृत्वानुपपत्तिः । तस्य कर्तृत्वस्य प्रयोजनव्याप्तत्वादित्युक्तदोषेत्यर्थः । **आद्यं पक्षम्** । **आद्येन सूत्रेण** । भगवान् प्रयोजनवान् कर्तृत्वादिति साधने बाध इत्याह **कृतकृत्यत्वेनेति** । आप्तकामत्वेनेत्यर्थः । निश्चितत्वात् । तथा च बाध इति भावः । **गर्भेति** । ईश्वरोऽपूर्णः प्रयोजनवत्त्वादित्यत्र प्रयोजनवत्त्व-हेतोरसिद्धत्वादेवेत्यर्थः । **आद्यस्य** साधनपक्षस्य । **दूषणान्तरम्** बाधं, तदतिरिक्तमनैकान्तिकत्वरूपं च । **द्वितीय** आपादनमिति द्वितीयं पक्षम् । **द्वितीयेन** सूत्रेण ।

कं०रा०— प्रयोजनवत्त्वमिति । प्रयोजनोद्देशवत्त्वमित्यर्थः । **अपूर्णतासाधकं प्रतीति** । ईश्वरस्य कर्तृत्वेन प्रयोजनोद्देशवत्त्वं प्रसाध्य तेनापूर्णत्वं साधयन्तं प्रति नेश्वरस्य कर्तृत्वेन प्रयोजनोद्देशवत्त्वं साधयितुमर्हं तस्य प्रयोजनवत्त्वादवाप्तप्रयोजनवत्त्वादित्यस्य हेतोरसिद्धत्वादित्यर्थः । **साधनापादनेति** । कर्तृत्वेनेश्वरस्य प्रयोजनवत्त्वं प्रसाध्यते नापूर्णत्वसाधने चाकर्ता यदीश्वरः प्रयोजनवान् स्यात् तथा चापूर्णः स्यादित्यापादने वा कस्यचिद्दूषणस्य लोकवत्तु लीलाकैवल्यमिति सूत्रेणानुद्भावनादित्यर्थः । आद्यपक्षनिरासपरत्वेन सूत्रं योजयति **न कर्तृत्वेनेति** । ईश्वरस्य कर्तृत्वेन प्रयोजनोद्देशवत्त्वं न साधयितुमर्हं तस्यावाप्तकामत्वेन प्रयोजनोद्देशाभाव-स्यैव निश्चितत्वादित्यर्थः । **न चेति** । ईश्वरस्यापूर्णत्वसाधकपूर्वपक्षिणं प्रति योजनवत्त्वादित्यनेनोक्तावाप्तकाम-त्वादिरूपहेतुरसिद्ध इति । न च 'अथैष एव परमानन्दः निरनिष्टो निरवद्य' इति श्रुत्येश्वरस्य परानन्दवत्त्व-स्यानिष्टनिवृत्तेश्च प्रतिपादितत्वेनावाप्तकामत्वस्य श्रुतिसिद्धत्वादित्यर्थः । यदोदाहृतश्रुत्येश्वरस्यावाप्तकामत्वसिद्धेः प्रयोजनोद्देशाभावस्यैव निश्चितत्वाकर्तृत्वेन प्रयोजनोद्देशवत्त्वसाधनमेव न सम्भवतीति तदा प्रयोजनोद्देशवत्त्वेने-श्वरस्यापूर्णत्वानुमानं गर्भस्रावेण गतमित्याह **प्रयोजनवत्त्वेनेति** । **आद्यस्येति** । कर्तृत्वेनेश्वरस्य प्रयोजनत्वं साध्यत इत्याद्यस्यानैकान्तिकत्वादिरूपदोषान्तरं वदन् कर्ता चेदीश्वरः प्रयोजनोद्देशवान् स्यात् तथा चापूर्णः स्यादित्यापाद्यत इति । **द्वितीयपक्षं** लोकवत्त्विति द्वितीयसूत्रेण निराकरोति सूत्रकार इत्यर्थः ।

श्रीनिधि०— प्रयोजनवत्त्वं प्रसाध्येति । प्राप्तव्यप्रयोजनवत्त्वमित्यर्थः । **व्यर्थमिति** । विपर्यये पर्यवसानलभ्यार्थस्यैव बोधनात्तत्प्रयुक्तकर्तृत्वाभावस्यासमाहितत्वादिति भावः । **अन्यथा** एवमनङ्गीकारे । **प्रयोजनाभावपक्षमिति** । प्राप्तव्यप्रयोजनाभावपक्षमित्यर्थः । **सयुक्तिकमिति** । प्राप्तव्यसमस्तवत्त्वादिति युक्ति-साहित्येनेत्यर्थः । **तत्रोक्तदोषपरिहारार्थमिति** । कर्तृत्वानुपपत्तिदोषपरिहारमित्यर्थः । नन्वस्मिन् पक्षे असिद्धि-

रित्युक्तमित्यत आह **न चासिद्धो हेतुरिति** । **गर्भप्रसवेनैवेति** । तत्साधकस्यैव असिद्धत्वादिति भावः । **आद्यस्य** साधननिमित्तपक्षस्य । **दूषणान्तरम्** सत्प्रतिपक्षापेक्षया दूषणान्तरम् । अनैकान्त्यादीति भावः । द्वितीयमापादनमिति पक्षम् । **द्वितीयेन** लोकवदिति सूत्रेण ।

शे०वा०— ननु सर्वविरोधानां परिहृतत्वादनर्थकमेतत् । न चाभ्यधिकाशङ्कानिरासार्थमेतदिति वाच्यम् । तथा सत्यधिकरणान्तर इव गतार्थताशङ्कानिरासायाभ्यधिकाशङ्काप्रदर्शनप्रसङ्गादित्यतो भाष्य एव तत्प्रदर्शनादत्र अप्रदर्शनमित्यभिप्रेत्य भाष्योक्तप्रकारेणैतदधिकरणनिरसनीयपूर्वपक्षं दर्शयति **यत्प्रयोजनार्थमिति** । ननु सदा प्रवृत्तिरित्युत्तरभाष्यमनर्थकम् । न च लोकवत्तु लीलाकैवल्यमिति सूत्रस्य साधनापादनपक्षयोर्बाधा-युद्भावकत्वोपदर्शनपरत्वान्न तदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वादित्यतः साधनापादनदूषणस्यानु-द्भावकतया प्राप्तद्वितीयसूत्राद्युक्तत्वशङ्कानिरासार्थत्वान्न तदिति भावेन तच्छङ्कापरिहारकतया तद्योजयितुं साधनापादनपरत्वानुपपत्त्या भाष्योक्तपूर्वपक्षानुपपत्तिशङ्कामुत्थापयति **तदेतदनुपपन्नमिवाभातीत्यादिना** । किमत्र कर्तृत्वादिना प्रयोजनवत्त्वादिसाधनं विवक्षितमुतापादनमिति विकल्पं मनसि निधायाद्यमनूद्य दूषयति **यद्यत्रेत्यादिना । प्रयोजनवत्त्वहेतोरसिद्धत्वादिति** । कृतकृत्यत्वान्न प्रयोजनाय सृष्टिरिति भाष्यानुसारेण तस्य कृतकृत्यत्वरूपत्वादिति भावः । द्वितीयमुत्थाप्य दूषयति **अथेति** । **इदं सूत्रमिति** । आद्यं सूत्रमित्यर्थः । **परेणैवेति** । पूर्वपक्षिणैवेत्यर्थः । पूर्वपक्षिणस्तदङ्गीकारमेव विपक्षे बाधकोपदर्शनेन दर्शयति **अन्यथेति** । **पक्षद्वयेऽपीति** । साधनापादनरूपपक्षद्वयेऽपीत्यर्थः । एवं साधनापादनपरत्वानुपपत्त्या भाष्योक्तं पूर्वपक्षमाक्षिप्य प्रकारान्तरेण तदाशयवर्णनेन सूत्रारम्भमुपपाद्य तत्परिहारकतया सूत्रद्वयं योजयति **मैवमिति** । **तत्रोक्तदोषेति** । प्रयोजनाभावे कर्तृत्वानुपपत्तिस्तस्य प्रयोजनव्याप्तत्वादिति द्वितीयपक्षोक्तदोषेत्यर्थः । अस्मिन्पक्ष उत्तर-भाष्यनैरपेक्ष्येणैव सूत्रद्वयेन पूर्वपक्षनिवृत्तेस्तदानर्थक्यमित्यतस्तत्सङ्गमयितुं तदुपयुक्तार्थोपदर्शकतयाऽपि सूत्रद्वयं योजयति **यद्वेति** । **निश्चयादिति** । तथा च बाधितविषयत्वमिति भावः । **असिद्धो हेतुरिति** । अपूर्णत्व-साधकं प्रतीति शेषः । तथा च न तेन प्रयोजनाभावसाधनमुपपद्यत इति न बाधितविषयतेति भावः । **गर्भस्रावेणैवेति** । अपूर्णत्वसाधकस्य प्रयोजनवत्त्वहेतोरेवासिद्धत्वादिति भावः । इतीत्यस्येत्याद्यमाद्येन निराचष्ट इति पूर्वेणान्वयः । **आद्यस्येति** । साधनपक्षस्येत्यर्थः । द्वितीयमापादनपक्षं द्वितीयेन सूत्रेणेति शेषः । निराकरोतीत्यत्रत्यस्य इतिशब्दस्य इति यद्वेति पूर्वेण सम्बन्धः ।

वा०र०— अनर्थकमेतदिति । 'न प्रयोजनवत्त्वादि'त्यधिकरणं अनर्थकमित्यर्थः । अधिकरणान्तर इवेत्युत्तरत्रोक्तेः एतदधिकरणस्य बुद्धिस्थत्वात् । एवमुत्तरमपि एतत्पदं व्याख्येयम् । सूत्रोपादानानन्तरं एतच्छङ्काप्रवृत्तेः एकसूत्रोदाहरणेन च सम्पूर्णाधिकरणस्योपादानसिद्धेः तत्परामर्शग्रन्थप्रकृतपरामर्श एवेत्यपि केचित् अवतार्य मूले इदं अधिकरणमित्युक्तेः तद्दृष्ट्वा शङ्कोत्थापनात् एतत् एतत् इति सामान्यतः उक्तमि-त्यपरे । प्रसङ्गादित्यत्र वक्ष्यमाणस्यानुभाष्ये इत्यर्थकस्यात्रेत्यस्याकर्षणं ज्ञेयम् । अत्र अप्रदर्शितं इत्यत्र

अत्रेत्यतःपरं बुद्ध्या विविक्तं तदिति वर्तते । अप्रदर्शनं इत्यनन्तरं न दोषायेति शेषः । **साधनापादानपक्षयोरिति** । पूर्वपक्षिकृते कर्तृत्वेन प्रयोजनवत्त्वस्य साधनपक्षे अपादानपक्षे वा यत् बाधादीति योजना । तद्योजयितुं इत्यतःपरं साधनापादानपरत्वपक्षयोः प्रथमसूत्रायुक्तत्वादिशङ्कान्तरस्य च स्पष्टनिराशयत्वाशयेन भाष्यकारोपेक्षितस्य स्वयं निरासप्रकारं दर्शयितुं च तावत् इति पूरणीयम् । **परत्वानुपपत्त्येति** । पूर्वपक्षस्य साधनपरत्वे अपादानपरत्वे वा या 'न प्रयोजनवत्त्वात्' इत्यादिसूत्रद्वयस्यानुपपत्तिः प्रयोजनवत्त्वादिहेतोरसिद्ध्यादिप्रयुक्ता तयेत्यर्थः । अत्र हि सूत्रनिवर्त्यशङ्कारूपः पूर्वपक्षो वक्तव्यः । न चायं तथा । साधनापादानविवक्षया पूर्वपक्षस्य सूत्रद्वयेनापि परिहाराभावेनास्य पूर्वपक्षस्य निरस्यताङ्गीकारे सूत्रद्वयायोगप्रसङ्गेन एतत्पूर्वपक्षायोगः इत्याशयो मूलकारस्य इति भावः । **तस्येति** । प्रयोजनवत्त्वस्येत्यर्थः । अनेन सृष्ट्यादिसाध्यप्रयोजनाभावः साध्यः कृतकृत्यरूपं प्रयोजनवत्त्वं हेतुरित्युक्तं भवति । अपूर्णतां साधयता कर्तृत्वेन सृष्ट्यादिसाध्यप्रयोजनवत्त्वस्य साधनेन कृतकृत्यत्वानङ्गीकारात् कृतकृत्यत्वरूपप्रयोजनवत्त्वेन सृष्ट्यादिसाध्यप्रयोजनत्वस्याभावसाधनं अनुपपन्नमिति भावः । अनुपपत्त्या भाष्योक्तमित्यत्रापि साधनापादानपक्षे सूत्रारम्भानुपपत्त्येत्यर्थः । **प्रकारान्तरेणेति** । साधनापादानपरत्वरूपप्रकारापेक्षया प्रकारान्तरेणेत्यर्थः । **तदाशयेति** । पूर्वपक्षभाष्याशयेत्यर्थः । पूर्वपक्षभाष्याशये हि यथा वर्णिते सूत्रारम्भः सम्भवति । सूत्रयोः पूर्वपक्ष्यभिप्रेतनिरासकतया साधनापादानपरत्वपक्षयोरिवायुक्तत्वादिदोषाभावात् । तथा सूत्रारम्भोपपादकाशयवर्णनेन सूत्रारम्भं उपपादयितुमित्यर्थः । अत्र सूत्रारम्भं उपपादयितुं इति पाठः । उपपाद्येति पाठेऽपि मुखं व्यादाय स्वपितीत्यादौ क्त्वो ल्यपः पूर्वकालवाचितापरित्यागेन स्वयोत्तरं मुखव्यादानं यथार्थः । तथा योजनेन उपपादयतीति प्रकृतेऽपि अर्थो ज्ञेयः । उपपादने पाश्चात्यस्य विवक्षितत्वात् । यद्वा तत्कालेऽपि क्त्वा क्वचित् । मुखं व्यादाय स्वपिति नेत्रे निमील्य हसति इति कृदन्तप्रक्रियानुसारेण अधिकरणारम्भं उपपादयन् कथमस्य तत्परिहारकत्वं इत्यतः तत्परिहारकतया इति योजना । अनेन मूले विवक्षितमित्यनन्तरं ततो न सूत्रद्वयं व्यर्थमिति पूरणीयं इति सूचयतीति ज्ञेयम् । **तत्परिहारकतयेति** । पूर्वपक्ष्यभिप्रेतानुपपत्तिपरिहारकतयेत्यर्थः । आशयस्य प्रकृतत्वेन तद्विषयस्यापि प्रकृतत्वात् । **प्रयोजनवत्त्वहेतोरिति** । सृष्ट्यादिसाध्यप्रयोजनवत्त्वरूपहेतोरित्यर्थः । **दूषणान्तरं वदन्निति** मूलम् । यद्यपि प्रवृत्त्या प्रयोजनसाधनं अनैकान्तिकं बाधितविषयं च इत्युत्तरमूलानुसारेणाद्येऽपि बाधितविषयत्वप्रतिपादनपरतोत्तरसूत्रस्यापि प्राप्तैवेति पक्षद्वयनिरासपरत्वे विशेषाभावेनाद्यद्वितीयावपि निराकरोतीत्येव वक्तव्यम् । तथा देवस्यैष स्वभावोऽयमित्येतदुक्त्या प्रयोजनाभावस्य प्रमितत्वप्रयुक्तं यत् बाधितविषयत्वं तस्य द्वितीयसूत्रादपि प्राप्तावपि पूर्वोक्तप्रकारेणापि तस्य प्राप्ततया अनैकान्तिकताया इव सर्वथाऽप्राप्तत्वाभावेन तल्लाभेन बाधितविषयत्वपरित्यागेनानैकान्तिकत्वरूपद्वयदूषणान्तरविवक्षया दूषणान्तरं इत्येवोक्तमिति मन्तव्यम् ।

स०व्र०— प्रयोजनवत्त्वहेतोरसिद्धत्वादिति । सिद्धान्त्यभिप्रेतकृतकृत्यत्वरूपस्य प्रयोजनवत्त्वस्यापूर्णत्वसाधकं प्रत्यसिद्धत्वादित्यर्थः । **तत्रोक्तदोषेति** । प्रयोजनाभावे कर्तृत्वानुपपत्तिः । तस्य प्रयोजन-

व्याप्तत्वादित्युक्तदोषेत्यर्थः । **गर्भस्रावेणैवेति** । अपूर्णत्वसाधकस्य प्रयोजनवत्त्वहेतोरेवासिद्धत्वादिति भावः । द्वितीयसूत्रं पक्षद्वयेऽप्ययुक्तम् इत्युक्तं दूषयति **आद्यस्येति** । **आद्यस्य** साधनपक्षस्येत्यर्थः । **द्वितीयम्** आपादनपक्षम् । **द्वितीयेन** द्वितीयसूत्रेण ।

विट्ठल०— भाष्योक्तरीत्या अधिकरणार्थं सिद्धवत्कृत्य तत्रानुपपत्तिसमाधानपरतयोत्तरमूलं गमयितुं भाष्यरीत्याधिकरणाभिप्रायमाह **यत्प्रयोजनार्थमित्यादिना** । अनुपपत्तिप्रकारमेवोपपादयितुं यत्प्रयोजनार्थ-मित्यादिना पूर्वपक्ष्यभिहितम् । ईश्वरः प्रयोजनवान् कर्तृत्वादत एवापूर्ण इति साधनानुमानत्वेन विवक्षितत्वात् पूर्वपक्षिणा दूषणमुच्यते । उक्तकर्ता चेत्प्रयोजनवान् स्यात् तथा च अपूर्णस्यादित्यापादनत्वेन विवक्षितत्वेनेति विकल्पं मनसि निधायाद्यं निराकरोति **यद्यत्रेति** । **प्रयोजनवत्त्वमिति** । प्राप्यप्रयोजनवत्त्वमित्यर्थः । **प्रयोजनवत्त्वहेतोरिति** । सर्वदा प्राप्तप्रयोजनवत्त्वादिति सूत्रगतहेतोः वादिरीत्याऽसिद्धत्वादित्यर्थः । कर्तृत्वेन प्राप्यप्रयोजनवत्त्वं प्रसाध्य तेनापूर्णत्वं साधयन् वादी सर्वदावाप्तप्रयोजनवत्त्वेनाङ्गीकरोतीति भावः । द्वितीयं निराकरोति **अथ कर्ता चेदिति** । **साधनापादनेति** । साधनानुमानदूषणस्य तर्कदूषणस्य नेत्यर्थः । सूत्र-द्वयतात्पर्यं तावन्मूलकाराभिमतं द्वेधा स्वयमाह **ईश्वरस्येत्यादिना** । **सयुक्तिकमिति** । सर्वदा प्राप्तप्रयोजन-त्वान्न तस्य सृष्ट्यादिना प्रयोजनमिति सयुक्तिकमित्यर्थः । **तत्रोक्तेति** । प्रयोजनाभावपक्षोक्तकर्तृत्वानुपपत्ति-रूपदोषपरिहारार्थमित्यर्थः । स चाग्रे व्यक्तः । **निराचष्टे न कर्तृत्वेनेति** । साध्यमित्येतन्नञोऽर्थः (?) । प्रयोजनवत्वादित्यस्य **कृतकृत्यत्वेनेति** । प्राप्तप्रयोजनवत्वेनेति यावत् । अभिप्रेतार्थमाह **प्रयोजनाभावस्येति** । यद्वा न प्रयोजनवत्त्वाय तस्य सृष्टिरिति विशिष्टसूत्रार्थकथनं साध्यमित्यर्थः । अपूर्णतानिरासो न सूत्रप्राप्त इत्यत आह **प्रयोजनवत्त्वेनेति** । **गर्भस्रावेणेति** । हेतोरेवासिद्धत्वादिति भावः । **निराकरोतीति** । निराकरण-प्रकारश्चानुपदमेव स्पष्टीभविष्यति ।

॥ इति सा शङ्का, तन्निरासश्च द्विविधः ॥

* * *

॥ अथ तत्र तदुपपादनम् ॥

॥ अथ तत्रादौ 'लोकवत्तु'इत्यादिद्वितीयसूत्रार्थनिरूपणम् ॥

॥ अथ तत्राप्यादौ 'लोकवत्तु'इत्यादिद्वितीयसूत्रार्थे शङ्का, तन्निरसनञ्च ॥

१२२ **सु०—** 'ननूक्तमत्र लोकवदिति सूत्रेण साधनस्यापादनस्य वा न किञ्चिद् दूषण-मुद्भाव्यत इति । मैवम्, बाधादेरुद्भावनादि'त्याशयवान् द्वितीयसूत्रस्य तात्पर्यमाह **सदेति** ।

अनु०— सदा प्रवृत्तिरीशस्य स्वभावादेव केवलम् ।

यथा लोके ज्वलनपवनादीनां तथेशस्यापि सदा सृष्ट्यादौ केवलं प्रयोजनेन विना स्वभावादेव प्रवृत्तिः प्रमितेति शेषः ।

तदनेन 'ईश्वरस्य प्रवृत्त्या प्रयोजनसाधनमनैकान्तिकं बाधितविषयं च । प्रसङ्गस्तु व्याप्तिविकलो विपर्ययापर्यवसायी च' इत्युक्तं भवति ।

परि०— ज्वलनेति । अग्निवायुप्रभृतीनामूर्ध्वगमनतिर्यग्गमनादिप्रवृत्तिः स्वभावादित्यर्थः । **प्रमितेति** । 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा' इति वक्ष्यमाणश्रुतेरिति भावः । **अनैकान्तिकमिति** । ज्वलनादिप्रवृत्ताविति भावः । **बाधितविषयं चेति** । प्रमितेत्युक्तत्वादिति भावः । **प्रसङ्गस्त्विति** । कर्ता चेत् प्रयोजनवान् स्यान्न चैव अतो न कर्तेति प्रसङ्ग इत्यर्थः । **व्याप्तीति** । ज्वलनादिकृतौ व्याप्तिभङ्गः, ईश्वरकृतेः प्रमितत्वेन बाधापत्त्या विपर्ययपर्यवसायी चेत्यर्थः ।

यादु०— अनैकान्तिकमिति । ज्वलनपवनादिप्रवृत्तावित्यर्थः । अत्रैव व्यभिचारमभिप्रेत्य व्याप्ति-विकल इत्युक्तम् । **विपर्ययापर्यवसायीति** । प्रयोजनाभावेऽपि कर्तृत्वस्य प्रमितत्वादिति भावः ।

वं०प०— तदेवोपपादयितुं शङ्कते **ननूक्तमत्रेति** । अनेन साधनानुमाने दूषणद्वयमुक्तं भवतीत्याह **तदनेनेति** । अनैकान्तिकं ज्वलनादिप्रवृत्तौ । स्वभावादेवेत्युक्त्या बाधितत्वमुक्तमिति ध्येयम् । **व्याप्तीति** । यदि प्रवृत्तिमान् स्यात् तदा प्रयोजनवान् स्यादित्यत्र ज्वलनादिप्रवृत्तावेव व्यभिचाराद्व्याप्त्यभावः । न भवति प्रयोजनवांस्तस्मान्न कर्तेति विपर्ययपर्यवसानं च ज्वलनादिप्रवृत्तावेव व्यभिचारान्न सम्भवतीत्यर्थः ।

श्रीनिधि०— बाधितविषयं चेति । 'अथैष एव परम आनन्दो निरनिष्टो निरवद्य' इति श्रुत्या बाधितादिति भावः । तत्र निरनिष्ट इति अनिष्टसामान्याभाव उच्यते । प्राप्तव्यप्रयोजनवत्त्वं चानिष्टमिति भावः ।

शे०वा०— एवं भाष्योक्ताक्षेपपरिहारकतया सूत्रद्वययोजनामभिधाय द्वितीयसूत्रोक्तसाधनापादन-दूषणोपदर्शनपरतयोत्तरमूलं योजयितुं तत्पक्षदूषणानुक्त्योत्तरसूत्रायुक्तताशङ्कामनुवदति **नन्विति** । बाधादे-रित्यादिपदेनानैकान्तिकत्वादिपरिग्रहः । **अनैकान्तिकमिति** । ज्वलनपवनादिप्रवृत्ताविति शेषः । प्रयोजनानुद्देशो-

ऽप्यग्न्यादेरूर्ध्वज्वलनादौ प्रवृत्तिदर्शनादिति भावः । **सृष्ट्यादौ स्वभावादेवेश्वरप्रवृत्तेः** प्रमितत्वात् **प्रयोजनोद्देशसाधनं** बाधितविषयमित्याह **बाधितेति** । **व्याप्तिविकल इति** । ज्वलनपवनादिप्रवृत्तौ व्यभिचारादेवेति भावः । **विपर्ययापर्यवसायीति** । प्रवृत्तेः प्रमितत्वेन विपर्ययपर्यवसाने बाधादिति भावः ।

वा०र०— अनैकान्तिकत्वादीति । आदिपदेन व्याप्तिवैकल्यादिपरिग्रहः । **ईशप्रवृत्तिः प्रयोजनो-** **द्देशवती** । प्रवृत्तित्वात् यज्ञदत्तप्रवृत्तिवदिति प्रयोगः पूर्वपक्षिसम्मततया विवक्षित इत्याशयं व्यञ्जयन् आह **ज्वलनादीति** ।

स०व्र०— बाधादेरिति । आदिपदेनानैकान्तिकत्वादिपरिग्रहः ।

विठ्ठल०— ज्वलनपवनादीनामिति । ऊर्ध्वज्वलनतिर्यग्गमनादिप्रवृत्तिः स्वभावादेव यथा तथे-त्यर्थः । **प्रमितेति** । 'देवस्यैष स्वभावोऽयमि'ति वक्ष्यमाणश्रुतेरिति भावः । **अनैकान्तिकमिति** । ज्वलनादि-प्रवृत्तावित्यर्थः । **बाधितविषयमिति** । प्रमितेत्युक्तेरिति भावः । प्रसङ्गस्य व्याप्तिविकलत्वमप्यत एवेति बोध्यम् । **विपर्ययापर्यवसायीति** । प्रयोजनाभावेऽपि कर्तृत्वस्य प्रमितत्वादिति भावः ।

॥ इति 'लोकवत्तु'इत्यादिद्वितीयसूत्रार्थे शङ्का, तन्निरसनञ्च ॥

* * *

॥ अथ तद्द्वितीयसूत्रार्थोत्थशङ्कानिरसनस्योपपादनम् ॥

॥ अथ तत्र उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासः, तदुपपादनञ्च ॥

॥ अथ तत्रादौ उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासश्च ॥

१२३ सु०— अथ मन्येत, 'चेतनप्रवृत्तिः न प्रयोजनेन विना दृष्टा, अतो नानैकान्त्यादि' इति; तदपि नास्ति, मत्तस्य सुखोद्रेकादेव नृत्तगानादिप्रवृत्तिदर्शनात् ।

परि०— 'नृत्तगानादिका सुखादि'त्यानन्दमयनयानुव्याख्यानं हृदि कृत्वाह **मत्तस्येति** ।

वं०प०— नात इति । अतो नानैकान्त्यादीत्यन्वयः । तथा चेश्वरः प्रयोजनवांश्चेतनत्वे सति प्रवृत्तिमत्त्वादिति हेतौ विशेषणं विवक्षितम् । ततश्च न ज्वलनाद्यचेतनप्रकृतौ व्यभिचार इत्यर्थः । **दर्शना-दिति** । तथा च तत्प्रवृत्तौ विशिष्टस्यापि हेतोर्व्यभिचार इत्यर्थः ।

शे०वा०— अथ मन्येतेति । इयं च चेतनप्रवृत्तिरतः प्रयोजनोद्देशवतीति साधनमापादनं वा क्रियते न तूक्तरीत्येत्यर्थः । किं तावताऽपीत्यत आह **अत इति** । अग्न्यादेरूर्ध्वज्वलनादौ प्रवृत्तेश्चेतनप्रवृत्तित्वाभावादिति

भावः । आदिपदेन व्याप्तिविकलत्वपरिग्रहः । न तु बाधितविषयत्वस्यापि । तस्यात्राप्यविशिष्टत्वादिति ध्येयम् । माऽस्त्वग्न्यादेरूर्ध्वज्वलनादौ व्यभिचारः । उदाहरणस्यानादरणीयत्वादन्यत्र तु स्यादेवेति न साधनमापादनं वा सम्भवतीत्याशयेनाह **मत्तस्येति** । तदीयनृत्तगानादिप्रवृत्तेश्चेतनप्रवृत्तित्वस्यापि सत्त्वादिति भावः ।

वा०र०— **व्याप्तिविकलत्वपरिग्रह इति** । तन्मात्रपरिग्रहः इत्यर्थः । तत्परिहारस्यैव शङ्कावाक्यात् प्रतीतेरिति भावः । **बाधितविषयत्वस्यापीति** । उपलक्षणं चैतत् । विपर्ययापर्यवसानस्यापीत्यपि ज्ञेयम् । **ऊर्ध्वज्वलनादाविति** । प्रवृत्तेरिति विभक्तिविपरिणामेन प्रवृत्त इत्येवमनुवर्तते । प्रवृत्ताविति शेषो वा । ततश्च ज्वलनादिप्रवृत्तावित्यर्थः ।

वि०ल०— **अनैकान्त्यादीति** । अङ्गचेष्टादिप्रवृत्तावनैकान्त्यम् । आदिपदेन बाधप्रसङ्गपक्षे व्याप्तिवैकल्यसङ्ग्रहः ।

॥ इति उक्ते तच्छङ्कानिरसने पुनरन्यथिकाशङ्का, तन्निरासश्च ॥

* * *

॥ अथ तद्द्वितीयसूत्रार्थोक्तशङ्कानिरसनोक्तपुनरन्याधिकाशङ्कानिरासस्योपपादनम् ॥

॥ अथ तत्र तन्निरसनेऽपि पुनरन्यान्तरशङ्का तन्निरासश्च ॥

१२४ **सु०—** ननु च प्रेक्षावत्प्रवृत्तिर्न प्रयोजनोद्देशेन विनोपलब्धा, इयं च प्रेक्षावत्प्रवृत्तिः; अतः प्रयोजनोद्देशवती स्यादिति साध्यमापाद्यं चेत्यत आह **अङ्गेति** ।

अनु०— अङ्गचेष्टा यथा पुंसः काश्चिदुद्देशवर्जिताः ।

काश्चित् व्याख्यानादावङ्गुलिचालनादिकाः । **उद्देशवर्जिताः** प्रयोजनोद्देशवर्जिताः । 'तथा ईशस्यापि प्रवृत्तिरि'ति पूर्वेणान्वयः । तथाऽप्यनैकान्त्याद्यनिस्तार इति भावः ।

परि०— मत्तो न प्रेक्षावानिति भावेन शङ्कते **ननु चेति** । **तथापीति** । प्रेक्षावत्प्रवृत्तित्वेन प्रयोजनसाधकहेतोर्विशेषणेऽप्यङ्गचेष्टादिप्रवृत्तावनैकान्त्यबाधयोः प्रसङ्गपक्षे च व्याप्तिवैकल्यविपर्ययापर्यवसानयोरनिस्तार इत्यर्थः ।

गु०दी०— अङ्गुलिचालनादिका इत्यत्र आदिपदेन चक्षुरुन्मीलननिमीलनादिकं गृह्यते ।

वं०प०— प्रेक्षावदिति । मत्तश्च न प्रेक्षावानिति न तत्प्रवृत्तौ व्यभिचार इति भावः । प्रयोजनोद्देशवर्जिता इत्यत्र वस्तुगत्या स्वप्रयोजनमेवात्र नेति द्रष्टव्यम् । शिष्यबोधनादिरूपपरप्रयोजनोद्देशास्त्वस्त्येवेति ध्येयम् ।

शे०वा०— नन्वङ्गचेष्टा इत्याद्युत्तरभाष्यमनर्थकम् । न च विशिष्टहेतोरनैकान्त्योपदर्शनार्थं तदिति वाच्यम् । मत्तप्रवृत्तौ विशिष्टव्यभिचारस्यापि स्पष्टत्वेन व्याख्यानादावङ्गुलिचालनादिप्रवृत्तिपर्यन्तधावनानर्थक्यादित्यतो मत्तप्रवृत्तौ व्यभिचारपरिहारार्थं परोत्प्रेक्षितहेत्वन्तरस्यापि व्यभिचारव्युत्पादनार्थत्वान्न तत्पर्यन्तधावनानर्थक्यमित्याशयेन मत्तप्रवृत्तावव्यभिचारोपपादकहेत्वन्तराशङ्कामुत्थापयति **नन्विति** । **साध्यमापाद्यं वेति** । मत्तप्रवृत्तेः प्रेक्षावत्प्रवृत्तित्वाभावेन तत्रानैकान्त्याद्यप्रसङ्गादिति भावः । साकाङ्क्षतया वाक्याभासत्वपरिहारायाह **तथेत्यादि** । तथाऽपि साधनापादनयोः किं दूषणमनेनोक्तमित्यतोऽभिप्रायमाह **तथाऽपीति** । प्रेक्षावत्प्रवृत्तित्वस्य हेतुत्वाश्रयणेनोक्तसाधनादिपक्षेऽपीत्यर्थः । **अनैकान्त्यादीति** । व्याख्यानादावङ्गुलिचालनादिप्रवृत्तेः प्रेक्षावत्प्रवृत्तित्वेऽपि प्रयोजनोद्देशरहितत्वादिति भावः । अत्राप्यादिपदेन व्याप्तिवैकल्यमात्रपरिग्रहः ।

वा०र०— परिहारार्थं परेति । परिहारार्थं परेण उत्प्रेक्षितं यत् हेत्वन्तरं तस्यापीति योजना । प्रयोजनवती स्यात् इत्यत्र स्यात् पदानन्तभवि तदन्तर्भावाभ्यां साधनापादानपरत्वं अभिप्रेतमिति साधने स्यात् इति पदायोगः इत्यादि दोषो न । साध्यं आपाद्यम् । वेत्यस्य मूले एवं साधनं कर्तुं आपादनं वा कर्तुं इत्यर्थं मनसि निधायायोगपरिहारं दर्शयति **मत्तप्रवृत्तेरिति** । **व्याप्तिवैकल्यमात्रेति** । न तु बाधितविषयत्वपर्यायापर्यायत्वयोरपि । तयोरत्रापि अविशिष्टत्वादिति भावः ।

॥ इति तन्निरसनेऽपि पुनरवान्तरशङ्का तन्निरासश्च ॥

॥ इति उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासः, तदुपपादनश्च ॥

॥ इति तद्द्वितीयसूत्रोत्थशङ्कानिरासस्योपपादनम् ॥

* * *

॥ अथ द्वितीयसूत्रार्थोत्थशङ्कानिरसनोपपादनोक्तार्थे प्रमाणोदाहरणम् ॥

१२५ सु०— यदुक्तमीश्वरस्य प्रवृत्तिः प्रयोजनेन विना स्वभावादेव प्रमितेति, तत्प्रमाणमिदानीमाह देवस्येति ।

अनु०— 'देवस्यैष स्वभावोऽयमि'त्याह श्रुतिरञ्जसा ।

'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा' इति श्रुतिरञ्जसा स्फुटमुक्तमर्थमाह । देवस्यायं सृष्ट्यादिविषयः, एषः इच्छा, तत्पूर्विका प्रवृत्तिरिति यावत् । स्वभाव एव न प्रयोजनाय । कुतः । आप्तकामस्य प्रयोजनस्पृहाऽसम्भवादित्यर्थः ।

परि०— श्रुत्यर्थमाह **देवस्येति** । **एष** इत्यनुवादः । **इच्छा** इति व्याख्या । इषु इच्छायामित्यस्माद्भावे घञि पुगन्तलघूपधस्य चेति गुणे रूपम् । अन्यथाऽयमेष इति पुनरुक्तिः स्यादिति भावः ।

वं०प०— **तत्प्रमाणमिति** । स्वभावादेव प्रवृत्तिः प्रमितेति शेष इत्युक्तत्वात् तेन यत्प्रमाणमुक्तं तदाहेत्यर्थः । **एष इच्छेति** । इषु इच्छायामिति धातोरित्यर्थः । अच्प्रत्यये गुणे च एषेति रूपम् । अत्रेच्छायाः स्वभावत्वलाभेन प्रवृत्तेः तदलाभादसङ्गतिः अत आह **एतत्पूर्विकेति** ।

कं०रा०— **एष इच्छेति** । 'देवस्येषः स्वभावोऽयमि'ति श्रुतावेष इत्यस्येतच्छब्दरूपत्वे अयमेष इत्यनयोर्वैयर्थ्यप्रसङ्गादेष इति शब्दः । इषु इच्छायामित्यस्मात् घञन्त इच्छार्थक व्याख्यान इति ध्येयम् । नन्वेवं सृष्ट्यादिविषयेच्छाया एव स्वभावत्वमनया श्रुत्योक्तं स्यान्न त्वीश्वरप्रवृत्तेरित्यत इच्छावाचिनैषशब्देन तत्पूर्विका प्रवृत्तिर्लक्ष्यत इत्याशयेनाह **तत्पूर्विकेति** ।

श्रीनिधि०— एष इत्यस्यार्थः **इच्छेति** ।

शे०वा०— भाष्यकारीयस्य श्रुत्युदाहरणस्यानर्थक्यमाशङ्क्य भाष्ये पूर्वोक्तस्य स्वभावादेवेश्वरप्रवृत्तेः प्रमितत्वस्य तादृशप्रमाणाभावेनासिद्धिशङ्कानिरासार्थत्वान्न तदिति भावेनोक्तार्थप्रदर्शनपूर्वकं तत्समर्पकप्रमाणोपदर्शनपरतयोत्तरभाष्यं योजयति **यदुक्तमिति** ।

वा०र०— मूले **देवस्यायं सृष्ट्यादीति** । तत्त्वोद्योतटीकाव्याख्यानप्रपञ्चावसरे चतुर्थाध्यायगीताभाष्यतत्तात्पर्यटीकाभ्यां अविरोधेनोपयुक्तव्याख्यानं अस्माभिः कृतमस्ति । तदनुसारेणात्रापि लेख्यमवकाशानुसारेण पत्रान्तरे ।

विठ्ठल०— **एष इच्छेति** । इषु इच्छायामित्यस्य पचाद्यचि कृते रूपमेतदिति भावः ।

॥ इति उक्तार्थे प्रमाणोदाहरणम् ॥

* * *

वं०प०— प्रेक्षावदिति । मत्तश्च न प्रेक्षावानिति न तत्प्रवृत्तौ व्यभिचार इति भावः । प्रयोजनोद्देशवर्जिता इत्यत्र वस्तुगत्या स्वप्रयोजनमेवात्र नेति द्रष्टव्यम् । शिष्यबोधनादिरूपपरप्रयोजनोद्देशस्त्वस्त्येवेति ध्येयम् ।

शे०वा०— नन्वङ्गचेष्टा इत्याद्युत्तरभाष्यमनर्थकम् । न च विशिष्टहेतोरनैकान्त्योपदर्शनार्थं तदिति वाच्यम् । मत्तप्रवृत्तौ विशिष्टव्यभिचारस्यापि स्पष्टत्वेन व्याख्यानादावङ्गुलिचालनादिप्रवृत्तिपर्यन्तधावनानर्थक्यादित्यतो मत्तप्रवृत्तौ व्यभिचारपरिहारार्थं परोत्प्रेक्षितहेत्वन्तरस्यापि व्यभिचारव्युत्पादनार्थत्वान्न तत्पर्यन्तधावनानर्थक्यमित्याशयेन मत्तप्रवृत्तावव्यभिचारोपपादकहेत्वन्तराशङ्कामुत्थापयति **नन्विति** । **साध्यमापाद्यं वेति** । मत्तप्रवृत्तेः प्रेक्षावत्प्रवृत्तित्वाभावेन तत्रानैकान्त्याद्यप्रसङ्गादिति भावः । साकाङ्क्षतया वाक्याभासत्वपरिहारायाह **तथेत्यादि** । तथाऽपि साधनापादनयोः किं दूषणमनेनोक्तमित्यतोऽभिप्रायमाह **तथाऽपीति** । प्रेक्षावत्प्रवृत्तित्वस्य हेतुत्वाश्रयणेनोक्तसाधनादिपक्षेऽपीत्यर्थः । **अनैकान्त्यादीति** । व्याख्यानादावङ्गुलिचालनादिप्रवृत्तेः प्रेक्षावत्प्रवृत्तित्वेऽपि प्रयोजनोद्देशरहितत्वादिति भावः । अत्राप्यादिपदेन व्याप्तिवैकल्यमात्रपरिग्रहः ।

वा०र०— परिहारार्थं परेति । परिहारार्थं परेण उत्प्रेक्षितं यत् हेत्वन्तरं तस्यापीति योजना । प्रयोजनवती स्यात् इत्यत्र स्यात् पदानन्तभवि तदन्तर्भावाभ्यां साधनापादानपरत्वं अभिप्रेतमिति साधने स्यात् इति पदायोगः इत्यादि दोषो न । साध्यं आपाद्यम् । वेत्यस्य मूले एवं साधनं कर्तुं आपादनं वा कर्तुं इत्यर्थं मनसि निधायायोगपरिहारं दर्शयति **मत्तप्रवृत्तेरिति** । **व्याप्तिवैकल्यमात्रेति** । न तु बाधितविषयत्वपर्यायापर्यायत्वयोरपि । तयोरत्रापि अविशिष्टत्वादिति भावः ।

॥ इति तन्निरसनेऽपि पुनरवान्तरशङ्का तन्निरासश्च ॥
॥ इति उक्ते तच्छङ्कानिरसने पुनरभ्यधिकाशङ्का, तन्निरासः, तदुपपादनञ्च ॥
॥ इति तद्द्वितीयसूत्रोत्थशङ्कानिरासस्योपपादनम् ॥

* * *

॥ अथ द्वितीयसूत्रार्थोत्थशङ्कानिरसनोपपादनोक्तार्थे प्रमाणोदाहरणम् ॥

१२५ **सु०— यदुक्तमीश्वरस्य प्रवृत्तिः प्रयोजनेन विना स्वभावादेव प्रमितेति, तत्प्रमाणमिदानीमाह देवस्येति ।**

अनु०— 'देवस्यैष स्वभावोऽयमि'त्याह श्रुतिरञ्जसा ।

'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा' इति श्रुतिरञ्जसा स्फुटमुक्तमर्थमाह । देवस्यायं सृष्ट्यादिविषयः, एषः इच्छा, तत्पूर्विका प्रवृत्तिरिति यावत् । स्वभाव एव न प्रयोजनाय । कुतः । आप्तकामस्य प्रयोजनस्पृहाऽसम्भवादित्यर्थः ।

परि०— श्रुत्यर्थमाह **देवस्येति** । **एष** इत्यनुवादः । **इच्छा** इति व्याख्या । इषु इच्छायामित्यस्माद्भावे घञि पुगन्तलघूपधस्य चेति गुणे रूपम् । अन्यथाऽयमेष इति पुनरुक्तिः स्यादिति भावः ।

वं०प०— तत्प्रमाणमिति । स्वभावादेव प्रवृत्तिः प्रमितेति शेष इत्युक्तत्वात् तेन यत्प्रमाणमुक्तं तदाहेत्यर्थः । **एष इच्छेति** । इषु इच्छायामिति धातोरित्यर्थः । अच्प्रत्यये गुणे च एषेति रूपम् । अत्रेच्छायाः स्वभावत्वलाभेन प्रवृत्तेः तदलाभादसङ्गतिः अत आह **एतत्पूर्वकेति** ।

कं०रा०— एष इच्छेति । 'देवस्यैषः स्वभावोऽयमि'ति श्रुतावेष इत्यस्यैतच्छब्दरूपत्वे अयमेष इत्यनयोर्वैयर्थ्यप्रसङ्गादेष इति शब्दः । इषु इच्छायामित्यस्मात् घञन्त इच्छार्थक व्याख्यान इति ध्येयम् । नन्वेवं सृष्ट्यादिविषयेच्छाया एव स्वभावत्वमनया श्रुत्योक्तं स्यान्न त्वीश्वरप्रवृत्तेरित्यत इच्छावाचिनैषशब्देन तत्पूर्विका प्रवृत्तिर्लक्ष्यत इत्याशयेनाह **तत्पूर्विकेति** ।

श्रीनिधि०— एष इत्यस्यार्थः **इच्छेति** ।

शे०वा०— भाष्यकारीयस्य श्रुत्युदाहरणस्यानर्थक्यमाशङ्क्य भाष्ये पूर्वोक्तस्य स्वभावादेवेश्वरप्रवृत्तेः प्रमितत्वस्य तादृशप्रमाणाभावेनासिद्धिशङ्कानिरासार्थत्वान्न तदिति भावेनोक्तार्थप्रदर्शनपूर्वकं तत्समर्पकप्रमाणोपदर्शनपरतयोत्तरभाष्यं योजयति **यदुक्तमिति** ।

वा०र०— मूले **देवस्यायं सृष्ट्यादीति** । तत्त्वोद्योतटीकाव्याख्यानप्रपञ्चावसरे चतुर्थाध्यायगीताभाष्यतत्तात्पर्यटीकाभ्यां अविरोधेनोपयुक्तव्याख्यानं अस्माभिः कृतमस्ति । तदनुसारेणात्रापि लेख्यमवकाशानुसारेण पत्रान्तरे ।

विठ्ठल०— एष इच्छेति । इषु इच्छायामित्यस्य पचाद्यचि कृते रूपमेतदिति भावः ।

॥ इति उक्तार्थे प्रमाणोदाहरणम् ॥

* * *

॥ अथ उक्तस्य द्वितीय(लोकवत्तु लीलाकैवल्यं)इति सूत्रार्थस्य समर्थनम् ॥

॥ अथ तत्र एतत्सूत्रीयापव्याख्याननिरासः ॥

॥ अथ तत्रादौ श्रुतिविरोधः ॥

१२६ सु०— केचिदिदं सूत्रमन्यथा व्याचक्षते, 'यथा लोके सप्तद्वीपां मेदिनीमधितिष्ठतः सम्पूर्णशौर्यवीर्यपराक्रमस्यापि महाराजस्य केवललीलैकप्रयोजनाः कन्दुकाद्यारम्भा दृश्यन्ते, तथैव परस्यापि ब्रह्मणः स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनम्' इति । तदेतन्निराकरोति क्रीडामिति ।

अनु०— क्रीडां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी ।

'भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे' इति क्रीडाप्रयोजनां भगवतः सृष्ट्यादिप्रवृत्तिं वदतः पूर्वपक्षीकृत्य 'देवस्यैष स्वभावोऽयमि'ति सयुक्तिकं प्रयोजनलेशाभावः श्रुत्या सिद्धान्तितः । अतः श्रुतिविरुद्धत्वादपव्याख्यानमेवैतत् ।

परि०— केचिदिति । मायावादिनो रामानुजीयाश्चेत्यर्थः । सयुक्तिकमिति । 'आप्तकामस्य का स्पृहे'ति युक्तेरुक्तेरिति भावः ।

वं०प०— वदतः वादिन इति द्वितीयाबहुवचनम् ।

श्रीनिधि०— कन्दुकाद्यारम्भाः कन्दुकक्रीडनाद्यारम्भाः । स्वसङ्कल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेरिति बहुव्रीहिः । लीलैव प्रयोजनं प्राप्तव्यमिति शेषः ।

शे०वा०— ननु जगत्सृष्टेः क्रीडाप्रयोजनकत्वस्य श्रुतिविरुद्धत्ववर्णनमनर्थकमिति तत्परोत्तरभाष्यानर्थक्यमाशङ्क्य लोकवदित्येतत्सूत्रीयापव्याख्याननिरासार्थत्वान्न तदिति भावेन तन्निरासकतया तद्योजयितुमेतत्सूत्रीयापव्याख्यानमनुवदति केचिदिति । रामानुजा इत्यर्थः ।

विठ्ठल०— केचित् मायावादिनः । रामानुजाश्चेति भावः । श्रुतिविरोधिनीत्येतदुपपादयति भोगार्थमित्यादिना । सयुक्तिकेति । आप्तकामस्य का स्पृहेति युक्तेरुक्तत्वादिति भावः ।

॥ इति श्रुतिविरोधः ॥

* * *

॥ अथ तत्रान्ते सूत्राक्षराननुगुण्यम् ॥

१२७ सु०— सूत्राक्षराऽननुगुणं चैतद्व्याख्यानमित्याह **इतीति** ।

अनु०— इति केवललीलैव निर्णीता प्रभुणा स्वयम् ।

यत एवं 'क्रीडां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी' इति तस्मात्, श्रुत्यनुसारिणा प्रभुणा स्वयं साक्षात्स्पष्टं **केवललीलैव** सृष्ट्यादिप्रवृत्तिः **निर्णीता** लीलाकैवल्यमिति, न तु लीलार्थेति; ततोऽप्ययुक्तमिदं व्याख्यानमिति ।

परि०— इतिर्हेतावित्युपेत्याह **इति तस्मादिति** ।

शे०वा०— 'क्रीडां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी'त्येतावतैव परव्याख्यानस्य श्रुतिविरुद्धत्ववर्णनेनापव्याख्यानत्वसिद्धेः किमिति केवलेत्युत्तरार्धेनेत्यतोऽपव्याख्यानस्य सूत्राक्षराननुगुणत्वरूपदूषणान्तरोपदर्शनार्थत्वान्नानर्थक्यमिति भावेन तथा योजयति **सूत्रेति** । भाष्ये इतिशब्दस्य वैयर्थ्यमाशङ्क्य पूर्वार्धोक्तार्थग्योत्तरार्धार्थे हेतुसमर्पकत्वान्न तदिति भावेन पूर्वोक्तार्थानुवादपूर्वकं तस्य हेतुत्वसमर्पकतया तं व्याचष्टे **यत इत्यादिना** ।

वा०र०— सूत्राक्षराननुगुणत्वरूपेति रूपपदघटित एव पाठः । मूलकोशे तथैव सत्त्वात् हेतुत्वसमर्पकत्वादिति पाठः । हेतुत्वेत्युत्तरग्रन्थात् हेतुसमर्पकत्वादिति पाठेऽपि भावप्रधाननिर्देश इत्यप्याहुः ।

विठ्ठल०— इतिशब्दो हेत्वर्थ इत्याशयेन तत्परामर्शविषयतया पूर्वार्धोक्तमनुवदन् योजयति **यत एवमिति** ।

१२८ सु०— **यद्वा पूर्ववाक्योक्तो हेतुः, अयं साध्यनिर्देशः । यस्माल्लीलां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी, तस्मादेतत्सूत्रे केवललीलैव** सूत्रकृता **निर्णीता** व्याख्याता, न पुनर्लीलार्थेति ।

परि०— यद्वेत्यादिनोक्तं व्यनक्ति **यस्मादिति** । **कृत्वा सृष्टिरिति** । प्रवर्तत इति वाक्यशेषः । तेन क्त्वाप्रत्ययोपपत्तिः ।

वं०प०— **यद्वेति** । पूर्वं क्रीडां प्रयोजनं कृत्वेत्यर्थो भिन्नवाक्यं कृत्वा योजितम् ।

श्रीनिधि०— यद्वेति । पूर्वं सूत्रकृता एवं निर्णीतेति वस्तुस्वरूपमुक्तम् । न तु तस्य साध्यत्वम् । इदानीं पूर्ववाक्येन हेतुरुच्यत इति समम् । उत्तरवाक्येन साध्यमुच्यत इति विशेष इति भावः । **केवललीलैव**त्यादि प्रवृत्तिरिति वर्तते । तथा च प्रवृत्तिसूत्रकृता केवललीलैव निर्णीतेति व्याख्यातव्या । प्रख्यापनीया **न पुनर्लीलार्थेति** निर्णीतेति योजना ।

शे०वा०— इति केवललीलैवेत्यस्य सूत्राक्षराननुगुणत्वरूपदोषान्तरसमर्पकत्वेन योजनायां पूर्वार्धानुवृत्तिर्भवतीत्यपरितोषादेकवाक्यतामङ्गीकृत्य पक्षान्तरमाह **यद्वेति** । हेतुसाध्यनिर्देशपरतया योजनप्रकारमाह **यस्मादिति** । उत्तरार्धे तस्मादित्यर्थकितिशब्दश्रवणादाह **यस्मादिति** ।

विठ्ठल०— दूषणान्तरपरत्वेन भिन्नवाक्यतया योजितं पूर्वं इदानीं पूर्ववाक्यदोषतया योजयितुमाह **यद्वेति** । कृत्वेत्यतःपरं प्रवृत्तेति शेषः । तेन त्क्वाप्रत्ययोपपत्तिः ।

॥ इति सूत्राक्षराननुगुण्यम् ॥
॥ इति एतत्सूत्रीयापव्याख्याननिरासः ॥
॥ इति उक्तस्य द्वितीय(लोकवत्तु लीलाकैवल्यं)इति सूत्रार्थस्य समर्थनम्॥
॥ इति 'लोकवत्तु'इत्यादिद्वितीयसूत्रार्थनिरूपणम् ॥

* * *

॥ अथ भाष्योक्ततदधिकरणीयप्रयोजने अभ्यधिकाशङ्कया द्वितीये निरासे पुनरभ्यधिकाशङ्का, तन्निरासः, तदुपपादनश्च ॥

॥ अथ तत्रादौ तदभ्यधिका शङ्का, तन्निरासश्च ॥

१२९ **सु०—** किञ्च कर्तृत्वेन प्रयोजनवत्त्वां साधयन्नापादयन्वा प्रष्टव्यः, 'किं प्रयोजनं स्वसम्बन्धि विवक्षितम्, उत परसम्बन्धि, अथ साधारणम् ।

आद्ये साधनेऽनैकान्त्यम् । आपादने व्याप्त्यभावः । विपर्ययपर्यवसाने व्यभिचार एव, दृश्यन्ते हि कृपालवः स्वप्रयोजनमनुद्दिश्य परप्रयोजनार्थमेव प्रवर्तमानाः । न चादृष्टार्थमिति वाच्यम्, पशूनां पशुप्रायाणां चापत्यपालनादौ प्रवृत्तिदर्शनात् । न च प्रयोजनोद्देशिता कृपालुता चेति सम्भवति ।

द्वितीयेऽप्यनैकान्त्यादिकमेव, स्वप्रयोजनार्थं प्रवृत्तेर्बहुलमुपलम्भात् । भगवतोऽपि स्वप्रयोजनाभावेऽपि परप्रयोजनोद्देशिताङ्गीकारेण क्रमेण सिद्धसाधनेष्टापादनासिद्धत्वप्रसङ्ग(ङ्गा)श्च ।

अत एव न तृतीयोऽपि ।

अत एव (येन) केनचित्कर्तृत्व(त्वे)विशेषणं, प्रवृत्तिस्वभावत्वे सदा प्रवर्तेतेत्यतिप्रसञ्जनं च प्रत्युक्तम् ।

स्यादेतदेवम्, यदीश्वरप्रवृत्तौ परप्रयोजनोद्देशः स्यात् । न चासावङ्गीकर्तुमुचितः । का स्पृहा न काऽपीति श्रुत्या, नेति सूत्रकारेण च सर्वथा प्रयोजनोद्देशस्य निवारितत्वात्' इति । अत आह आत्मेति ।

अनु०— आत्मप्रयोजनार्थाय स्पृहां श्रुतिरवारयत् ।

श्रुतिरिति सूत्रकृतोऽप्युपलक्षणम् । परप्रयोजनार्थतां त्वङ्गीकुरुत एवेति शेषः ।

परि०— अङ्गचेष्टा इत्यस्य दयापूर्वं प्रवृत्तय इत्यर्थं उद्देशेत्यस्य प्रयोजनोद्देशवर्जिता इत्यर्थं चोपेत्य व्याख्यानान्तरमारभते **किञ्चेति** । **साधारणमिति** । उभयसम्बन्धीत्यर्थः । **आद्य इति** स्वसम्बन्धीति पक्ष इत्यर्थः । अनैकान्त्यादिदोषत्रयं व्यनक्ति **दृश्यन्ते हीति** । कृपालव इत्यस्य साधुत्वमुक्तं जिज्ञासानये 'यथा दृष्ट्या प्रसन्नः सन्नि'त्यत्र । **द्वितीयेऽपीति** । परसम्बन्धीति पक्ष इत्यर्थः । कुत्रेत्यत आह **स्वप्रयोजनार्थमिति** । एतेन कश्चिदङ्गचेष्टा आत्मकार्यमात्रार्थं प्रवर्तमानानां प्रवृत्तयः । उद्देशवर्जिताः परप्रयोजनोद्देशहीना इति मूलार्थः सूचितः । 'भूत्यै निजाश्रितजनस्य हि सृज्यसृष्टावीक्षा बभूवे'त्युक्त्यनुरोधेनेशस्य सदा प्रवृत्तिः स्वीयानां प्रयोजनभावादेवेति मूलार्थमुपेत्याह **भगवतोऽपीति** । **क्रमेणेति** । साधनपक्षे परप्रयोजनस्योपगमेन सिद्धसाधनत्वं आपादने चेष्टापादनं विपर्यये चापाद्यप्रयोजनस्याभावरूपहेतोरसिद्धिरित्यर्थः । **अत एवेति** । स्वपरान्यतरमात्रप्रयोजनोद्देशात्सुदयालुमूर्खयोः प्रवृत्तिष्वनैकान्त्यादिदोषादेव तृतीयोऽपि नेत्यर्थः । यदा साधारणमित्यस्य स्वपरेतिविशेषमविवक्षित्वा प्रयोजनवत्त्वमात्रमित्यर्थः । तदा परप्रयोजनवत्त्वोपगमेन सिद्धसाधनादिदोषादेवेत्यर्थः । **अत एवेति** । सविशेषणत्वेऽपि व्यभिचारादिप्रदर्शनादेव । ज्वलनादावव्यभिचाराय चेतनत्वे सतीत्युक्तौ नृत्तगानादिकर्तरि व्यभिचारात् । प्रेक्षावत्त्वे सतीत्युक्तावप्यङ्गुलिचालनादिकर्तरि व्याख्यात्रादौ व्यभिचारात् । दयालुत्वे सतीति विशेषणेऽपि स्वप्रयोजनोद्देशहीनलौकिकेषु दयया प्रवर्तमानेषु व्यभिचारादेव तथा स्वपरेति विशेषाविवक्षया

प्रयोजनवत्त्वमात्रसाधने सिद्धसाधनाद्युक्तदोषादेव चेतनत्वादिना केनचित्कर्तृत्वविशेषणं निरस्तम् । ज्वलनादौ व्यभिचारादेव सर्वदा प्रवर्तत इत्यपि निरस्तमित्यर्थः ।

यादु०— उत्तरानुव्याख्यानमुत्थापयितुमाह **किञ्चेति** । साधनेऽनैकान्त्यं विपर्ययपर्यवसाने च व्यभिचारं च उपपादयति **दृश्यन्ते हीत्यादिना** । **कृपा चेति** । निरुपाधिपरदुःखप्रहाणेच्छाया एव कृपात्वादिति भावः । **क्रमेण सिद्धसाधनेति** । साधने सिद्धसाधनता । परसम्बन्धिप्रयोजनस्याङ्गीकृतत्वात् । अत एवापादने इष्टापत्तिः । विपर्ययपर्यवसानेऽसिद्धत्वप्रसङ्गश्चेत्यर्थः । **येन केनचिदिति** । अङ्गचेष्टादौ व्यभिचारवारणाय चिकीर्षापूर्वकत्वादिना प्रवृत्तिरूपकर्तृत्वविशेषणं प्रत्युक्तमित्यर्थः । भगवतः स्वप्रयोजनाभावेऽपि परप्रयोजनोद्देशिताङ्गीकारेण विशेषणे दत्तेऽपि क्रमेण सिद्धसाधनेष्टापादनादिप्रसङ्गात् । भगवत्प्रवृत्तेः स्वभावत्वेऽपि प्रयोजनानुसारेण क्रमात् सृत्यादिकर्तृत्वस्याङ्गीकृतत्वेन सदा प्रवृत्त्यापादनस्याप्यसम्भवादिति भावः । यथाऽऽहुः 'स्वभावभूताऽपीशस्य क्रमात्सृष्ट्यादिकर्तृता । चूतादीनां वसन्तादौ पुष्पितत्वादिकं यथा । देवस्यैष स्वभावोऽयमिति हि श्रुतिरब्रवीदि'ति ।

वं०प०— अनैकान्त्यव्याप्त्यभावादेः स्थलमाह **दृश्यन्ते हीति** । **न चेति** । तथा च तेष्वप्यदृष्टरूपस्वप्रयोजनसत्त्वान्न व्यभिचार इति भावः । **पशूनामिति** । अदृष्टानुसन्धानशून्यानाम् । कृपामात्रेणेति शेषः । तथा च पश्वादिषु व्यभिचार इत्यर्थः । ननु च तत्रापि स्वप्रयोजनोद्देशिताऽस्त्येवेत्यत आह **न चेति** । **कृपालुता चेति** । निरुपाधिकपरदुःखप्रहाणेच्छा कृपा, तद्वानित्यर्थः । **अङ्गीकुरुतः** श्रुतिसूत्रकारौ ।

कं०रा०— **कृपालव इति** । कृपां लातीति कृपालुः ला आदन इत्यस्मात् डुप्रकरणेमितद्र्वादिभ्य उपसङ्ख्यानमिति डुप्रत्ययः । टिलोपः षिद्भिदादिभ्यो ङित्यत्र क्रपेः सम्प्रसारणं चेति कृपकृपायामित्यस्मादङ्प्रत्ययस्य सम्प्रसारणस्य च विहितत्वात् कृपाशब्दो निष्पन्न इति द्रष्टव्यम् । उक्तं च धातुवृत्तौ यनः क्रपे सम्प्रसारणं चेति भिदादि पाठात् तत्फलमङ् सिद्ध्यति कृपेतीति । उक्तं च कैयटे कृपेत्येत्तु क्रपेः सम्प्रसारणं चेति भिदादिषु पाठाद्भवतीति केचित् 'कृपालवः पङ्कजनाभतीर्था' इत्यत्र कृपालव इति पदं गृहीत्वा यद्यपि स्पृहि गृहीत्यादिना कृपेरालुच्प्रत्ययो न विहित इति कृपालुशब्दस्यासाधुत्वमाशङ्क्य तथापि लुशमविधायालुच्करणमन्यत्रापि यथा स्यात् तेन कृपालुरित्यादि सिद्ध्येदिति वैयाकरणवचनादेतत्साध्विति कृपालुशब्दरूपस्य साधुत्वमुक्तवन्तस्तदयुक्तं महाभाष्ये 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुजिति सूत्रे किमर्थमालुज्विधीयते न लुशेवोच्येत का रूपसिद्धिः । स्पृहयालुः शपि कृते अतो दीर्घो यञीति दीर्घो भविष्यति । एवं तर्हि यदालु च शास्ति तत् ज्ञापयत्याचार्यः । अन्येभ्योऽप्ययं भवतीति क्रमे तस्य ज्ञापने प्रयोजनम् । आलुचि शीङ् ग्रहणं चोदयिष्यति । तन्न वक्तव्यम् । आलुचि शीङ् ग्रहणं न कर्तव्यम् । शयालुरिति लुशमविधायालुज्विधानस्य शयालुरिति रूपसिद्धिरेव प्रयोजनत्वेनोक्तत्वात् पदमञ्जर्यां च अथ किमर्थमालुज्विधीयते न लुशे वोच्येत का रूपसिद्धिः । स्पृहयालुः शपि कृते अतो दीर्घो यञीति दीर्घो भविष्यति । तत्र तुरुस्तु शम्यमः सार्वधातुक

इत्यतः सार्वधातुकग्रहणमनुवर्तते न तु तिङ्ग्रहणं लकारस्येत्संज्ञाप्रयोजनाभावान्न भवति यकारादित्वाद्वा किं य न श्रूयते लुप्तनिर्दिष्टो यकारः एवमपि श्रद्धालुर्न सिद्ध्यति । कथं शपः श्लुः द्विर्वचनं श्नाभ्यस्तयोरातः श्रद्धुरिति प्राप्नोति । अथापि संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं न प्रवर्तिष्यत इत्युच्येत । एवमपि ज्ञापनार्थमालुज्विधीयते एतत् ज्ञापयति यत्रालुचः एवं रूपं सिद्धं ततोऽप्ययं भवतीति तेन आलुचि शीङो ग्रहणं कर्तव्यमित्येतन्न कर्तव्यं भवतीति लुप्तमविधायालुज्विधानस्य शयालुरिति रूपसिद्धिरेव प्रयोजनत्वेनोक्तत्वात् कथञ्चित् कृपेरालुच्प्रत्ययेऽपि लघूपधगुणरपरत्वलत्वावश्यम्भावेन कृपालुरिति रूपासिद्धेश्च । कृपेः कृपालुशब्दो निष्पन्न इत्यस्य धातुवृत्तिकारेणानुक्तत्वाच्च गीताभाष्यटीकायां नष्टधर्मज्ञानलोककृपालुभिरित्येतद्व्याख्यानावसरे यद्यपि स्पृहिगृहीत्यादिना कृपेरालुच्प्रत्ययो न विहितस्तथापि व्याकरणान्तरादवगन्तव्य इत्येवोक्तम् । न तु कैश्चिदुक्तं मार्गान्तरं गीताभाष्यटीकावाक्यस्य त्वयमर्थः । स्पृहिगृहीत्यादिना कृपेरालुच्प्रत्ययो न विहितः कथञ्चिदालुच्प्रत्ययेऽपि लघूपधगुणाद्यवश्यम्भावात् कृपालुशब्दो न सिद्ध्यतीति यद्यपि, तथापि विप्रसंभ्योड्वसंज्ञायां डुप्रत्यये टिलोपे कृपालुशब्दः साधुरित्यवगन्तव्य इति । न च वाच्यं कृपेरौणादिके आलुच्प्रत्यये कृपालुशब्दो निष्पन्न इति कस्मान्न व्युत्पाद्यत इति कृपालुशब्दस्य कृपेरौणादिकालुच्प्रत्ययान्तत्वे धातुवृत्तौ कृपेर्निष्पन्नानां शब्दरूपाणां कथनावसरे कृपालुशब्दरूपस्याप्युक्तिप्रसङ्गात् अस्मदुक्तरीत्या लोके कृपालुशब्दप्रयोगस्योपपत्तौ औणादिके आलुच्प्रत्ययकल्पनस्य जघन्यत्वाच्च आलुचप्रत्ययकल्पनेन गुणाद्यभावेऽपि कृपो रो ल इति ऋकारस्यैकदेशविकारद्वारा लकाराभावेनेष्टरूपासिद्धेश्च । उक्तं च यः केवलो रेफो यश्चकारस्थः तयोर्द्वयोरपि ग्रहणं ल इत्यपि सामान्यमेव । ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो भवति । ऋकारस्याप्येकदेशविकारद्वारेण लकारः तथा च लुटि च क्लृप इत्येवमादयो निर्देशा उपपद्यन्त इति एकदेशविकारद्वारेणेत्यादिवाक्यार्थश्चावतारिकापूर्वकं पदमञ्जर्यामुक्तः न तु सत्यपि द्वयोरपि ग्रहणे ऋकारस्थस्य रेफस्य लकार आदेशोऽभवत् कथं तु कृत्स्नरूपवर्णस्य कृत्स्नो वर्णो लभ्यत इत्याशङ्क्योक्तं **एकदेशविकारद्वारेणेति** । एकदेशः ऋकारस्थो रेफः तस्य विकार एकदेशविकारः । यद्वा एकदेशः लकारस्थलकारः स एव विकार एकदेशविकारः तद्वारेण । एतदुक्तं भवति । अज्भक्तिसम्पुटयोः रेफलकारयोर्निष्कर्षस्य कर्तुमशक्यत्वात् समुदायस्य समुदाय इति यदि निष्कर्षो शक्यक्रियः मा भूत्तयोरुपादानं न पुनरेतावता सूत्रेऽनुपात्तयोः समुदाययोः स्थान्यादेशभावो युज्यत इत्यत आह **तथा चेति** । **एवमादय इति** । आदिशब्देन तासि च क्लृपः अक्लृपि चृतेः अनवक्लृप्त्यमर्षयोरित्यादेर्ग्रहणमिति । एतेन यदुक्तं लुप्तमविधायालुज्विधानेनान्येभ्योऽप्ययं प्रत्ययो भवतीति ज्ञापित्वादुदाहरणस्य चानादरणीयत्वात् कृपेरप्यालुच्प्रत्यये संज्ञापूर्वको विधिरनित्य इति गुणाभावे च कृपालुरिति रूपं सिद्ध्यतीति तदपि निरस्तम् । कृपे रो ल इति लत्वावश्यम्भावेन कृपालुरिति रूपसिद्ध्यनुपपत्तेः । न च वाच्यं कृपेत्यत्रापि कृपे रो ल इति लत्वं कस्मान्न भवतीति क्रपेः सम्प्रसारणं चेति भिदादिषु पाठात् क्रपेरङि सम्प्रसारणे च कृपाशब्दस्य निष्पन्नत्वात् कृतसम्प्रसारणस्य च लाक्षणिकत्वेन कृपो रो ल इत्यत्र कृपिशब्देन ग्रहणाभावात् । उक्तं च काशिकायां कृपेत्यत्र क्रपेः सम्प्रसारणं चेति भिदादिषु पाठादङ् भवति । तस्य हि कृतसम्प्रसारणस्य लाक्षणिकत्वादिह कृप इति ग्रहणं नास्तीति भाष्ये कृपो रो ल इति

पठितत्वात् तदनुसारेण कृप इति ग्रहणं नास्तीत्युक्तम् । उक्तं च कैयटे कृपो रो ल इत्येतद्व्याख्यानावसरे कृपेत्येतत्तु क्रपेः सम्प्रसारणं चेति भिदादिषु पाठाद्भवति ततो लाक्षणिकत्वाद्ग्रहणाभाव इति । वस्तुतस्तु कृपाशब्दात् हृदयाच्चालुजन्यतरस्यां वक्तव्य इत्यत्र चशब्देन मत्वर्थीये आलुच्प्रत्यये कृपालुशब्दो निष्पन्नः हृदयाच्चेत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाभावे फलबर्हाभ्यामितज्वक्तव्य इतिवत् हृदयादालुजन्यतरस्यां वक्तव्य इत्येवावक्ष्यत् । एवं च गीताभाष्यटीकावाक्यं यद्यपि स्पृहिगृहीत्यादिना कृपेरालुप्रत्ययो न विहितः.... लुच्प्रत्यययाद्यगुणाद्यवश्यम्भावात् संज्ञापूर्वकविधेरनित्यत्वेन गुणाभावेऽपि ऋकारस्य कृपो रो ल इति लत्वावश्यम्भावात् कृपालुशब्दोऽनुपपन्नः तथाप्यनुक्तसमुच्चयार्थकशब्दयुक्तात् हृदयाच्चालुजन्यतरस्यां वक्तव्य इति वार्तिकरूपव्याकरणान्तरात् कृपाशब्दान्मत्वर्थीय आलुच्प्रत्ययोऽवगन्तव्यस्तथा च कृपालुशब्द उपपन्न इति योजनीयम् । परमार्थतस्तु कृपार्थान् क्रपेरौणादिक आलुच्प्रत्यये तत्सन्नियोगेन सम्प्रसारणे च कृपालुशब्दो निष्पन्नः । कृतसम्प्रसारणस्य लाक्षणिकत्वेन कृपो रो ल इत्यत्र ग्रहणाभावाल्लत्वाभावश्च युक्तः यद्यपि कृप कृपायामिति धातुपाठात् दृश्यते तथापि कृपो रो ल इति लत्वाभावार्थं कृपि स्थाने क्वापि पठितव्य इति भाष्यादौ स्थितमिति धातुवृत्त्युक्तेर्न दोषः । एवं च गीताभाष्यटीकावाक्यमप्येतदर्थपरतया योज्यमित्यलमिति प्रपञ्चेन । कृपो रो ल इति सूत्रव्याख्यानावसरे काशिकायामुक्तस्य कृपणकृपीटकर्पूरादयोऽपि क्रपेरेव द्रष्टव्या इत्यस्य व्याख्यावसरे पदमञ्जर्यां सर्वत्र बहुलवचनात् सम्प्रसारणमित्युक्तत्वात् तन्न्यायेनात्रापि सम्प्रसारणमिति द्रष्टव्यम् । **भगवत इति** । भगवतः स्वप्रयोजनोद्देशाभावेऽपि परप्रयोजनोद्देशितायाः सिद्धान्तिनाऽप्यङ्गीकृतत्वेन कर्तृत्वेनेश्वरस्य परप्रयोजनोद्देशवत्वसाधने सिद्धसाधनप्रसङ्गः यदीश्वरः कर्ता स्यात् तर्हि परप्रयोजनोद्देशवान् स्यादित्यापादनप्रसङ्गः । न च परप्रयोजनोद्देशवानिति विपर्ययपर्यवसाने असिद्धत्वप्रसङ्गश्चेत्यर्थः । **अत एवेति** । स्वपरसाधारणप्रयोजनमात्रोद्देशवत्वसाधने सिद्धसाधनप्रसङ्गात् तदापादन इष्टापादनप्रसङ्गात् तद्विपर्ययपर्यवसाने असिद्धत्वप्रसङ्गाच्च स्वपरसाधारणं प्रयोजनमात्रं विवक्षितमिति तृतीयोऽपि नेत्यर्थः । **अत एव केनचिदिति** । कर्तृत्वेनेश्वरस्य परप्रयोजनोद्देशवत्वसाधनादावुक्तानैकान्त्यादिपरिहाराय कर्तृत्वं केनचित्स्वप्रयोजनेच्छारहितत्वादिना विशेष्यत इत्येतदीश्वरप्रवृत्तेः स्वभावत्वे सर्वदा प्रवर्तेति प्रसञ्जनं च कर्तृत्वस्य केनचिद्विशेषितत्वेन स्वप्रयोजनार्थप्रवृत्तिस्थलेऽनैकान्त्यादिपरिहारोऽपि विशेषितेन कर्तृत्वेनेश्वरस्य परप्रयोजनोद्देशवत्वसाधनापादनयोः सिद्धसाधनेष्टापादनादिप्रसङ्गादीश्वरस्य सदाप्रवृत्तेरङ्गीकृतत्वेन तदापादन-इष्टापादन-प्रसङ्गाच्च प्रयुक्तमित्यर्थः ।

३२१ **श्रीनिधि०— पशूनामित्यादि** । अदृष्टोद्देशत्वे पशुत्वं वा । पशुप्रायत्वं वा न सम्भवतीति भावः । कृपालूनां प्रवृत्तिरदृष्टार्थेत्युक्तशङ्कामभ्युपगम्य पूर्वं स्थलान्तरं अव्यभिचार उक्तः । इदानीं व्याहृत्या परिहरति **न चेति** । **क्रमेणेति** । साधनापादनक्रमेणेत्यर्थः । **असिद्धत्वप्रसङ्गश्चेति** । विपर्यये पर्यवसाने आपाद्य विपर्ययस्यासिद्धिरित्यर्थः । **अत एवेति** । पक्षप्रयुक्तदोषापादनेत्यर्थः । **अत एवेति** । भगवतः परप्रयोजनोद्देशिताङ्गीकारेण प्रवृत्तिस्वभावत्वेऽपि परप्रयोजनानुसारित्वेन चेत्यर्थः ।

शे०वा०— ननु 'आत्मप्रयोजनार्थाय स्पृहां श्रुतिरवारयदि'त्युत्तरभाष्यमनर्थकम् । न च भगवतः स्पृहाभावप्रतिपादकश्रुतिसूत्रयोः स्वसम्बन्धिप्रयोजनाभावमात्रत्वप्रतिपादनार्थं तदिति वाच्यम् । तत्कथनस्य प्रकृतानुपयोगात् । न च भगवत्प्रवृत्तेः स्वसम्बन्धिप्रयोजनोद्देशाभावेऽपि परसम्बन्धिप्रयोजनोद्देशसद्भावप्रतिपादनार्थं तदिति वाच्यम् । तत्सद्भावप्रतिपादनस्याप्यनर्थकत्वात् । न च साधनापादनपक्षयोः परसम्बन्धिप्रयोजनसद्भावेन सिद्धसाधनत्वादिप्रतिपादनार्थं तदिति वाच्यम् । परसम्बन्धिप्रयोजनसाधनापादनपक्षयोः सिद्धसाधनत्वादिप्रसक्तावपि स्वसम्बन्धिप्रयोजनोद्देशसाधनापादनपक्षयोस्तदप्रसङ्गादित्यतोऽत्र तं पक्षं प्रकारान्तरेण प्रदूष्य परसम्बन्धिप्रयोजनोद्देशसाधनापादनपक्षौ सिद्धसाधनत्वादिना निरस्य तदुपपादनार्थं स्पृहाभावप्रतिपादकश्रुतिसूत्रगतिकथनेन परसम्बन्धिप्रयोजनोद्देशसद्भावप्रतिपादनपरत्वान्नोत्तरवाक्यवैयर्थ्यमित्यभिप्रेत्य सिद्धसाधनत्वोपपादकपरसम्बन्धिप्रयोजनोद्देशसद्भावप्रतिपादकतयोत्तरवाक्यं सङ्गमयितुं साधनापादनपक्षयोः सम्भाविततया प्रसक्तान्विकल्पांस्तावद्दर्शयति **किञ्चेति** । साधनेऽनैकान्त्यमापादने व्याप्त्यभावो विपर्ययपर्यवसाने व्यभिचार इत्युक्तदोषत्रयमप्युपपादयति **दृश्यन्ते हीति** । **कृपालव इति** । यद्यपि स्पृहिगृहीत्यादिना कृपेरालुच्प्रत्ययो न विहितस्तथाऽपि व्याकरणान्तरादवगन्तव्यः । कलशवाची वाऽऽलुशब्दः कृपापूर्णाः कलशा इत्यर्थः । उपलक्षणं चैतत् । 'स्पृह्यादेर्लुशमविधायालुच्करणम् अन्यत्रापि यथा स्यात् तेन कृपालुरिति सिध्येत्' इति व्याकरणवचनादपि न तत्सम्भव इत्यपि द्रष्टव्यम् ।

ननु लुश्विधौ न स्पृहयालुरिति रूपं सिद्ध्यति । आलुज्विधौ तु 'अयामन्ताल्वाय्ये'ति णेरयादेशो तत्सिद्धिरिति चेन्न । स्पृहेर्लुशि तस्य शित्वेन तिङ्शित्सार्वधातुकमिति सार्वधातुकतया कर्तरि शबिति शपि सार्वधातुकार्धधातुकयोरिति गुणे अयादेशे अतो दीर्घो यञीति दीर्घतायां सत्यां स्पृहयालुरिति तत्सिद्धिसम्भवात् । ततश्च सत्यप्येवं लुश्विधावपि विवक्षितसिद्धावलुच्करणमन्यत्रापि यथा स्यादित्यस्यार्थस्य ज्ञापकम् । तद्बलाच्च कृपेरालुचि कृपालुशब्दनिष्पत्तिरित्यालुज्विधिनैवास्यार्थस्य ज्ञापितत्वाददोषः । अत एव कौमुद्यां 'हरे कृपालो नः पाही'त्युक्तम् । ननु च लुश्विधौ न विवक्षितरूपसिद्धिः । लुशो ल्कारस्येत्संज्ञाप्रसङ्गात् । स्पृहयालुरिति दीर्घत्वानुपपत्तिश्च । तिङीत्यनुवृत्त्या तिङि परत एवातो दीर्घो यञीति दीर्घत्वविधानात् । श्रद्धालुश्च न सिद्ध्येत् । श्रत्पूर्वाद्धाधातोर्लुशि शपि तस्य जुहोत्यादित्वात् श्लौ सति श्लाविति द्विभवि ह्रस्व इति ह्रस्वत्वे चर्त्वे श्नाभ्यस्तयोरात इत्यालोपे श्रद्दध्लुरिति प्रसङ्गात् । अतो लुश् विधौ स्पृहयालुरिति रूपासिद्ध्या तत्सिद्ध्यर्थत्वादालुच्करणस्य नान्यथाऽनुपपत्त्याऽन्यत्राप्यालुच्प्रत्ययविधायकत्वसिद्धिरिति चेत् । मैवम् । लुश्विधावपि यादित्वादित्संज्ञाभाव उच्यते । यकारश्चात्र लुप्तनिर्दिष्टः क्रियते । प्रयोजनाभावाद्वा इत्संज्ञाभावः । न ह्यत्र लित्स्वरप्रत्ययस्वरयोर्विशेषोऽस्ति । उभयत्र 'एकादेश उदात्तेनोदात्त' इत्युदात्तत्वस्य भावात् । नापि स्पृहयालुरिति दीर्घानुपपत्तिः । 'अतो दीर्घो यञी'त्यत्र 'तुरस्तुशम्यमः सार्वधातुके' इत्यतः सार्वधातुकग्रहणस्यैवानुवृत्त्या तिङ्ग्रहणाननुवृत्तेः । नाप्यन्त्यः । अनेकार्थत्वाद्धातूनाम् । अत्र विषये दधात्यर्थे वर्तमानस्य धेटो भविष्यति । न च शिदाश्रयेऽशितीत्यात्वप्रतिषेधात् तदनुपपत्तिः (पा.सू. ६-१-४५ आदेच

उपदेशोऽशिति । सि.कौ. सू.क्र. २३७०) । एवं तर्हि श्रद्धा आश्रद्धेत्याकारप्रश्लेषादात्वं भविष्यति । अथवा धातोरेव संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं न प्रवर्तिष्यते । ततश्च लुश्विधिनैवोपपत्तावपि ज्ञापनार्थमेवालुच्करणम् । एतज्ज्ञापयत्याचार्यः । यत्रालुचैव रूपसिद्धिस्ततोऽप्ययं भवतीति कृपेरप्यालुच्प्रत्यय इत्यन्यत्र विस्तरः । ततश्च कृपालुप्रवृत्तौ सत्यपि प्रवृत्तित्वे स्वसम्बन्धिप्रयोजनवत्त्वाभावादनैकान्त्यं साधने । आपादने च तत्रैव प्रवृत्तित्वरूपापादकवति स्वसम्बन्धिप्रयोजनवत्त्वरूपापाद्यविरहादापादकस्यापाद्येन व्याप्त्यभावः । न भवति च स्वसम्बन्धिप्रयोजनवान् । तस्मान्न प्रवृत्तिमानिति विपर्ययपर्यवसाने कृपालुप्रवृत्तावेव व्यभिचारश्चेति पूर्वोक्तदोषत्रयमुपपादितं भवति ।

न चेति । तथा च कृपालुप्रवृत्तौ साध्यस्यापि सत्त्वान्न व्यभिचार इति भावः । माऽस्तु तर्हि कृपालुप्रवृत्तौ व्यभिचारः पश्वादीनामपत्यपालनादिप्रवृत्तौ तु व्यभिचारः स्यादेवेत्याशयेन परिहरति **पशूनामिति** । अङ्गीकृत्य चैतदुक्तम् । वस्तुतस्तु कृपालुप्रवृत्तेरदृष्टार्थताया एवायोगात् तत्र व्यभिचारो दुर्वार एवेत्यभिप्रेत्य तत्रादृष्टार्थत्वाभावमुपपादयति **न चेति** । निरुपाधिकपरदुःखप्रहाणेच्छाया एव कृपालुत्वादिति भावः । अस्तु तर्हि परसम्बन्धिप्रयोजनमेवात्र प्रयोजनमिति द्वितीयपक्ष इत्यत आह **द्वितीयेऽपीति** । **अनैकान्त्यादिकमिति** । साधनेऽनैकान्त्यमापादने व्याप्त्यभावो विपर्ययपर्यवसाने व्यभिचारश्चेत्यर्थः । त्रितयमप्युपपादयति **स्वप्रयोजनार्थेति** । स्वप्रयोजनार्थप्रवृत्तौ सत्यपि प्रवृत्तित्वे परसम्बन्धिप्रयोजनोद्देशाभावात् साधनेऽनैकान्त्यमापादने च तत्रैव सत्यपि प्रवृत्तित्वरूपे आपादके परसम्बन्धिप्रयोजनवत्त्वरूपापाद्यविरहाद्व्याप्त्यभावः । न भवति च परसम्बन्धिप्रयोजनवांस्तस्मान्न प्रवृत्तिमानिति विपर्ययपर्यवसाने **स्वप्रयोजनार्थप्रवृत्तौ** व्यभिचार इति भावः । **क्रमेणेति** । साधने सिद्धसाधनताभावात्प्रवृत्तेः परसम्बन्धिप्रयोजनोद्देशवत्त्वाभ्युपगमात् । आपादने च तत एवेष्टापत्तिः । विपर्ययपर्यवसाने चासिद्धत्वमिति क्रमेण सिद्धसाधनत्वादिप्रसङ्ग इत्यर्थः । **अत एवेति** । सिद्धसाधनत्वादिप्रसङ्गादेवेत्यर्थः । परसम्बन्धिप्रयोजनवत्त्वस्य भगवत्प्रवृत्तावप्यस्माकं सम्मतत्वात् तदादाय स्वपरसाधारणप्रयोजनवत्त्वस्य सिद्धत्वात् साधने सिद्धसाधनम् । तत एवापादने इष्टापत्तिः । विपर्ययपर्यवसानेऽसिद्धत्वं चेति भावः । **अत एवेति** । चिकीर्षापूर्वकत्वेन प्रवृत्तिविशेषणेन मत्तप्रवृत्तौ व्याख्यानादावङ्गचेष्टादौ चानैकान्त्यपरिहारेऽपि भगवत्प्रवृत्तेः परप्रयोजनोद्देशिताङ्गीकारेण क्रमेण सिद्धसाधनेष्टापादनासिद्धत्वानामपरिहारादेव केनचित्कर्तृत्वविशेषणम् । भगवत्प्रवृत्तेस्तत्स्वभावत्वेऽपि परप्रयोजनोद्देशवत्त्वात्प्रयोजनानुसारेणैव प्रवृत्त्या कादाचित्कपरप्रयोजनानुरोधेन कादाचित्कत्वोपपत्त्या सर्वदा प्रवृत्त्यापादनं च प्रत्युक्तमित्यर्थः । एवं सिद्धसाधनत्वादीनां परसम्बन्धिप्रयोजनवत्त्वसाधनापादनपक्षौ प्रदूष्य स्पृहाभावप्रतिपादकश्रुतिसूत्रगतिकथनमुखेन परसम्बन्धिप्रयोजनवत्त्वोपपादकतयोत्तरं वाक्यं योजयितुमीश्वरप्रवृत्तेः परप्रयोजनोद्देशिताङ्गीकारे श्रुतिसूत्रविरोधशङ्कामुत्थापयति **स्यादेतदेवमिति** । न प्रयोजनवत्त्वेनेत्यत आह **यदीति** । जगद्गुरुरित्युत्तरग्रन्थे ज्ञापकविशेषकथनेन सौत्रप्रयोजननिषेधस्य स्वसम्बन्धिप्रयोजनविषयत्वसमर्थनात् तदनुरोधेनाह **श्रुतिरितीति** । ईश्वरप्रवृत्तेः परप्रयोजनोद्देशसद्भावानुक्तेः कथमनेनोक्तशङ्कापरिहार इत्यतोऽपेक्षितशेषमाह **परेति** ।

वा०८०— ननु च कृपालव इति कथम् । न च कृपेरालुचि संज्ञापूर्वकविधेरनित्यत्वपरिभाषायां ओर्गुण इत्यत्र ज्ञापनात् लघूपधगुणाभावे व्यत्ययविधानेन कृपेश्च स्पृह्यादिषु अपाठेन तदनुपपत्तिरिति शङ्कते यद्यपि स्पृहीति । उदाहृतव्याकरणेन तदसिद्धावपि चान्द्रादिव्याकरणान्तरात् तत्सिद्धिरप्रत्यूहेति समाधत्ते तथापीति । अयं च पक्षो व्याकरणान्तरं, नाम पाणिनिव्याकरणापेक्षया अन्यत् व्याकरणं चान्द्रादीति व्युत्पत्तिमभिप्रेत्य गीताभाष्यटीकानुवादरूपः । व्याकरणस्य स्पृहिगृहीत्यादेरनन्तरं लुशमविधाय आलुचविधानरूपम् । तस्मादित्यर्थस्तु उपलक्षणं चैतत् इत्यादिना वक्ष्यते । हृदयाच्चालुरन्यतरस्यां इत्यनेन मत्वर्थे आलुप्रत्यये विकल्पेन प्राप्ते हृदयालुः हृदयीति रूपद्वयदर्शनात् । तद्धिता इति बहुवचनबलात् कृपालुरिति अपि समाधानं भाति । परन्तु अत्र गीताभाष्यटीकोक्तरीत्या आलुजनुपपत्तिपरिहारेणालुजन्तकृपालुशब्दनिष्पत्तिं प्रकारान्तरेण वदताऽयं पक्षः अपहस्तितो भवति । कृपां लातीति कृपापूर्वकलातेः मितद्र्वादित्वात् डुप्रत्यये मृगय्वादयश्च इत्यनेन मृगय्वादेराकृतिगणत्वेन मृगयुरित्यादाविव कुप्रत्यये वा कृपालुशब्दनिष्पत्तिं अङ्गीकारे वा श्रद्धादेर्लुरिति मत्वर्थीयलुप्रत्ययान्तत्वाश्रयणेन तन्निष्पत्त्यङ्गीकारे वा अर्थानुगमाभावात् । न हि दयालुशब्दादिवत् आलुचि निष्पन्नकृपालुशब्दात् योऽर्थः प्रतीयते तस्य उक्तपक्षद्वये प्रतीतिरस्ति । ततो भवन्तु नामानेकलक्षणानि एकत्र प्रवृत्तिमन्ति । न च तावता तदुक्तोऽर्थः स्वीकार्यः । लक्षणानां पर्जन्यस्येव उपयोगानुपयोगाविवक्षयेव प्रवृत्तिरिति भाष्यादावेव स्थितत्वात् । ततश्च कृपापूर्णत्वरूपार्थविशेषस्य लाभाय कृपां लातीत्यादि व्युत्पत्तिः नाश्रयणीया । कृपाशब्दस्य पृथगेव सिद्धयङ्गीकारे गौरवं चेति । 'इन्द्रश्चन्द्रः काशकृत्स्नः पिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिका' इति केशिकल्पद्रुमाख्ययोपदेवविरचितधातुपाठस्थश्लोकसङ्गृहीतचन्द्रादिनिर्मितव्याकरणं चान्द्रादिव्याकरणं बोध्यम् । अथ व्याकरणान्तरात् इत्येतावत् गीताभाष्यटीकोक्तमेकं समाधानमुक्तम् । तत्रोक्तं समाधानान्तरमाह यद्वा कलशेति । अत्र च पक्षे प्रतिपत्तिगौरवं पूर्वपक्ष इव नास्तीति हृदयम् । आलुशब्द इति । न तु आलुच्प्रत्यय इति भावः । आलुशब्दनिष्पत्तिस्तु गीताभाष्यटीकाव्याख्यानावसरे गुरुराजचरणैरेव व्युत्पादिताऽवधेया । गीताभाष्यटीकाव्याख्याने एवमेवोक्तम् । 'त्रोरश्चल' इति सूत्रे त्रोरिति छित्वा ऋधातोरपि प्रश्लेषात् ऋगतावित्यतः तेन सूत्रेण ञुणि अचो ञ्णितीति वृद्धौ रपरत्वे अस्य लत्वे चालुरिति रूपनिष्पत्तिः । पूर्णत्वस्य वृत्तावन्तर्भावात् तदप्रयोगो न दोषायेति ध्येयमिति । तस्यायं योजनाप्रकारः । न चालुशब्दनिष्पत्तिः कथं इत्यतः त्रोरश्चल इत्यादि उणादिसूत्रे त्रोरित्यस्य षष्ठीद्विवचनान्तस्य तरत्यर्तिरूपधातुद्वयपरतया तेन तरते ञुणि तालु इतिवत् अर्तेरपि ञुणि आलुरित्यपि रूपसम्भवात् इत्याशयेनाह त्रो रश्च ल इति । इति च्छित्वेत्यनेन एकवचनान्ततच्छेदनं च मूलमिति सूचयति । तेन ऋगतौ बाहुलकात् त्रोरश्चलः इत्युणि 'तिरायमुकुटीयं कर्कर्यालुर्गलन्तिके'ति अमरवाक्यव्याख्यानावसरे वचनं प्रत्युक्तं भवति । सूत्रमर्यादयैवोणोर्लाभे बाहुलकस्याकल्पनीयत्वात् । मनोरमायां उक्तसूत्रव्याख्यानावसरे च इति तरतेः षष्ठ्या निर्देश इत्यभिधाय केचित्तु त्रोरिति छित्वा ऋधातोरपि प्रश्लेषात् इयति अर्यते वा आलुः शाकविशेषः घटी चेत्याहुः इति केचित् पक्षत्वेन कथनं च नास्वरसाभिप्रायेण अपि तु तालु इत्येव मूले उदाहरणेन मूलकृतः षष्ठ्येकवचनं अभिप्रेतं विज्ञायते । यदि च 'कर्कर्यालुर्गलन्तिका' इति अमरव्याख्यानोपयोगितया सूत्रस्य

व्याख्यानान्तरं तदापि नानुपपत्तिरित्यभिप्रायेणेति नानुपपत्तिः । एवं च घटी चेति व्याख्यानानुसारेणालुशब्दस्य कलशवाचित्वात् कृपाकलशैरिति सिद्धेऽपि पूर्णैरिति न लभ्यते इत्यत आह **पूर्णत्वस्येति** । समासान्तर्भूतत्वं च शाकपार्थिवादित्वेन मध्यमपदलोपाश्रयणादिति ज्ञेयम् । एवं व्याख्यानव्याजेनैव आलुरिति दीर्घपाठाश्रयणेन क्षीरस्वामिव्याख्यानं च प्रत्युक्तमिति सूचितम् । टीकान्तरे तु 'कर्कर्यालुर्गलन्तिके'ति अमरपाठाश्रयणेन टीकोक्तार्थसाधकत्वेन तस्याभिधानं कृतं तत् विचारणीयम् । ननु कृपो रो लः इति सूत्रस्यायमर्थः । ऋलृक् इति सूत्रीयाविभक्तिको निर्देशः कृपः उः रः लः कृपो रो लः इतीति भाष्यानुसारेण कृपेति लुप्तषष्ठीकं रुकारस्य षष्ठ्येकवचनं उरिति । रः इति षष्ठी लः इति लकारः । अत्र च लत्वस्यासिद्धत्वेन पूर्वमुपधा गुणे रपरत्वे च वर्णरूपरेफस्य तद्रूपलत्वं क्वचित् विधीयते । यथा कल्प्यते इत्यत्र तदा कृपेः रेफस्य लत्वमिति सूत्रार्थः, क्वचिच्च ऋ इत्यत्र एकादेशो रेफसदृशोऽस्ति, तस्य लृ इति वर्णैकदेशो लकारसदृशः आदेशो विधीयते । यथा अक्लृपत् अक्लृप्तेत्यादौ लुटि च क्लृपः इत्यादिसूत्रेषु च तदा कृपेर्धातोः यः ऋकारः तदवयवस्य वर्णैकदेशौ न वर्णावित्युक्तरीत्या अवर्णस्य रेफस्य अवर्णभूत एव लकार इति सूत्रार्थः । एकदेशविकारद्वारेण ऋ इति समुदायस्य लृ इत्यादेशो भवतीत्यङ्गीकारात् । एवं चार्थाश्रयणेन कृपालुशब्दे लत्वापत्तौ कृपालुरिति स्यात् तत्कथं लत्वाभाव इति चेत् । अत्र ब्रूमः । अस्ति तावत् कृपाशब्दे द्वयीगतिः । क्रप कृपायां इति कृपेरेव क्रपेः सम्प्रसारणं चेति काशिकोक्तेः बाहुलकात् सम्प्रसारणे भिदादिगणे अङर्थे पाठात् षिद्भिदादिभ्यो ङिति अङि निष्पन्न इत्येका । कृपेरेव भिदादिषु अङर्थपाठात् उक्तसूत्रेणाङि निष्पन्न इति चापरा । तत्राद्ये पक्षे सूत्रस्थकृप इत्यस्य प्रतिपदोक्तपरत्वेन लाक्षणिकपरत्वाभावात् कृपः इत्यत्र कृपाशब्दस्य न ग्रहणप्रसङ्गः । द्वितीये कृपादौ तु लब्धत्वं नेष्यते इति कौमुद्युक्ते लत्वाभावः । उणादयो बहुलमिति वा कृपेर्लत्वाभावः इति काशिकोक्तेः यद्येवं बाहुलकमाश्रयणीयं कृपेरपि न दोष इति मञ्जर्युक्तेश्च औणादिकाङ् प्रत्यये उणादयो बहुलमिति बहुलग्रहणात् एव लत्वाभावः । पक्षद्वयेऽपि उणभावो ङित्परत्वादेव बोध्यः । एवमेव कृपणकृपणीकपीठकर्पुरादिशब्देष्वपि बाहुलकात् औणादिक-ल्युनादिप्रत्ययान्तेषु उक्तरीत्या द्वैविध्येन लत्वाभावः । मौञ्जनिर्देशे तु नानुपपत्तिः । भाष्यकारस्तु कृपणादीनां प्रतिषेधो वक्तव्यः इति समाहितवान् । एवं च कृपालुशब्देऽपि कृपादौ त्विति प्रक्रिया वा स्याद्वा कृपणादीनां प्रतिषेध इति भाष्यवाक्यात् वा अभियुक्तसंरक्षणार्थाय प्रवृत्तो लत्वाभावः । लघूपधगुणस्तु संज्ञापूर्वकविधेरनित्यत्वादेव नेति प्रागेवोक्तम् । शेषं काशिकामञ्जरीशेषिषु स्पष्टमिति सर्वमनवद्यम् । एवं पाणिनिव्याकरणापेक्षयाऽन्यत् व्याकरणं व्याकरणान्तरं इत्यर्थमभिप्रेत्य गीताभाष्यटीकोक्तः समाधिः प्रथमोऽभिहितः । इदानीं व्याकरणस्य पदान्तरं लुशमविधाय आलुच् करणेनान्यदपि सिद्ध्यतीत्येवं रूपं तस्मादित्यर्थं अभिप्रेत्य स्पृहीगृहीत्येतत् व्याकरणान्तरं अभिदधत् व्याकरणटीकाकारवाक्यमेव व्याकरणान्तरपदेन व्याकुर्वन् पक्षान्तरमाह **उपलक्षणं चैतदिति** । एतदस्माभिरुक्तानुपपत्तिशमनाय उपन्यस्तं गीताभाष्यटीकोक्तं समाधानं तद्वन्ये समाधानान्तरोपलक्षणमित्यर्थः । ततश्चोपलक्षितसमाधानमपि अत्र द्रष्टव्यं इति सूचितमनेन भवतीति ज्ञेयम् । **लुशमविधायेति** । लुशविधानेनैवास्य दयालुरित्यादिरूपप्रसिद्धावपि । यदा लुच् विधानं तत् स्पृह्यादि व्यतिरिक्तधातुभ्यो यथा स्यात् आलुच् प्रत्ययः । इत्येतज्ज्ञापनार्थमिति शेषः । तेन तथा ज्ञापने

प्रयोजनमाह **तेन कृपालुरिति** । स्पृह्यादावाचः लुचः कृत्यभावेऽपि अधिकस्य करणं यत्रालुच अविवक्षितरूपसिद्धिः तदर्थत्वे सिद्धे कृपालु इत्यत्र च लुचा रूपासिद्धेः आलुचैव तथा रूपसिद्धेः आलुच्करणप्रयोजनत्वमित्यर्थः । **आलुच्विधौ तु इति** । अस्य तत्सिद्धिरित्यनेनान्वयः । **अयामन्तेति** । अय्यामन्तेति सूत्रेण आम् अन्तः आलुः आय्यः इष्णुः इत्नुः इत्येतेषु परतः णेरयादेशविधानेन स्पृहेश्च ण्यन्ततया आलौ परतः णेरयादेशे सति इत्यर्थः । अनेन स्पृहीति सूत्रे ण्यन्तोऽयं स्पृहिधातुरुपात्तः । अदन्तस्य चुरादौ पाठेन चुरादिना णौ सति आर्धधातुकपरत्वेन आतो लोप इति आकारलोपे णौकृतस्थानिवत् भवतीति परिभाषया आल्लोपस्य स्थानिवद् भावेन ह्रस्वरूपलघूपधत्वाभावेन उक्तरूपनिष्पत्तिरिति सूचितम् । **यद्यपि स्पृहीति** । सूत्रे निपूर्वकात् नकारान्ततत्पूर्वकाच्च द्रातेः आतश्चोपसर्गे इति सूत्रीयोक्त्यनुसारेण श्रदन्तराः उपसर्गवत् वृत्तेः सत्त्वेन श्रत्पूर्वकधाञश्चाकारान्ततया तत्र लुशेष उपपत्तेः आलुचो नावश्यकत्वेऽपि उक्तरीत्या चुरादावदन्ततया पठित गृहपतेः गौणकृतस्य स्थानिवत्वेन गुणाभावे उक्तरीत्यैव गृहपतेश्च अङ्गस्य उपधायाः विधिविधायकेन अत उपधाया इत्यनेन वृद्ध्यभावे च निष्पत्त्या तयोश्चालु च भावे तस्मिन् परतो णेरयादेशोपपत्त्या गृहयालु इत्यादिरूपसिद्धावपि लुश्विधौ तदनुपपत्तिः । तथा इकानिर्दिष्टदयधातोर्भ्वादिः लुश्पक्षे दयालुरित्यस्यानुपपत्तिरेवेति । स्पृहयालुः इति रूपानुपपत्तिशङ्कावत् उक्तरूपानुपपत्तिरपि शङ्कनीया । तथापि अयामन्तेति सूत्रे आलौ उदाहरणतया स्पृहयालुरित्यस्यैव प्राथमिकस्येतरोपलक्षकतयाऽभिधानात् भाष्यकार-हरदत्तादिभिः अप्यालुश्चोरलुश्यपि रूपोपपत्तिं प्रतिपादयद्भिः स्पृहयालुशब्द एवालुच्करणवैय्यर्थ्यस्योपलक्षण-त्वाभिप्रायेणाभिधानात् अत्रापि उपलक्षणत्वाभिप्रायेण एकत्रैवानुपपत्तिचोदनस्य युक्तत्वम् । एतदभिप्रेत्यैव इत्यादिरूपसिद्धावपि इति प्रागुक्तं वक्ष्यते च तथैवेति ज्ञेयम् । लुश्पक्षेऽपि शयो दीर्घतयैव मध्ये आकारेणोक्तरूपोपपत्तिरित्याह **न स्पृहेर्लुशीति** । सत्यप्येवं इत्यस्यैव विवरणं लुश्विधानेऽपि विवक्षितसिद्धावपि इति स्पृहयालुरिति इति रूपान्तरोपलक्षणं तु प्रागेवोक्तम् । दयालुरित्यत्र तु शपि दीर्घत्वमात्रमिति ज्ञेयम् । लुश्विधानमङ्गीकृत्य दीर्घेण प्रयोगोपपादनं दूषयन् अधिकं च दोषं तत्र हि तुरस्तु शम्यमः सार्वधातुके इत्यादिपदमञ्जर्यनुसारेण निराकर्तुमीशते **ननु चेति** । लशाक्तद्धिते इत्यनेन प्रत्ययादित्वात् इति शेषः । **अनुवृत्त्येति** । भूसुवोस्तिङीति व्यवहितसूत्रादिति शेषः । तदनुवृत्त्यभावे च 'केशवः अङ्गने'त्यादावपि यञ्परत्वात् दीर्घः स्यादिति भावः । श्लौ सति अदिप्रभृतिभ्यः इत्यनेन प्राप्तलुकोपवादेन शेषः । **श्लावितीति** । अनभ्यासधात्ववयव एकाचो द्वित्वस्य श्लौ परतः तेन विधानादिति भावः । **ह्रस्व इतीति** । अभ्यासस्य ह्रस्वविधायकेनेत्यर्थः । चर्त्व इत्यस्याभ्यासे चर्चेत्यनेन शाश्वत्वेन आभि इत्यर्थः । चर्च इत्यनेन तद्विधायकसूत्रसङ्ग्रहाभिप्रायात् । तत्र चशब्देन जश्त्वस्यापि विधानेन प्रकृते उपयोगो ज्ञेयः । जश्त्वा इति पाठस्तु स्वरस एव । उक्तसूत्रे खयां चरो झशां जश इति विधानेन झशत्वात् जशत्वमिति भावः । पाठद्वयेऽपि अभ्यासे चर्चेत्यनेनेति शेषः । **आलोपे चेति** । सार्वधातुके परतः तेन तल्लोपविधानात् इति भावः । मञ्जर्यनुसारेण परिहारं विवृण्वन्नाह **उच्यत इति** । ञमन्ताड्डे विधीयमानेऽपि दण्डो वण्डः इत्यादि-उदाहरणानुसारेण नङस्ये ज्ञा तत् कस्य हेतोः लुप्तनिर्दिष्टयादित्वात् एवं प्रकृतेऽपि लुप्तनिर्दिष्टोपकार इत्याशयेनाह

यकारश्चेति । **प्रयोजनेति** । यत्र हि संज्ञायां स्वरे विशेषः तत्र तदाश्रयणोपपत्तावपि प्रकृते प्रयोजनाभावात् नेत्संज्ञाश्रयणीयेत्यर्थः । अत्रेत्संज्ञाभाव इति पाठः । संज्ञाभाव इत्येव पाठेऽपि पूर्वप्रकृतेत्संज्ञापरं संज्ञापदमिति बोध्यम् । ननु कथं विशेषाभावः । धातोरन्तोदात्तत्वेऽपि प्रत्ययस्वरस्य सति शिष्टस्वरो बलीयान् इति न्यायेन प्रथमावस्थितधातुस्वरापेक्षया पश्चात् शिष्यमाणस्यैवावशेषे प्रत्ययस्वरस्य उदात्तत्वेनानुदात्त इत्यनेन सूत्रेण उदात्तस्वरातिरिक्ता चोनुदात्तत्वेऽपि लित्वे लितीत्यनेन लितिपरतः प्रत्ययात् पूर्वस्योदात्तत्वेन प्रत्ययस्यानुदात्तत्वं प्रसज्यते इति विशेषसत्त्वात् इत्यत आह **न हीति** । ननु कथं नास्ति उक्तरीत्या तत्सत्त्वात् इत्यतः लित्वपक्षेऽपि उकारमात्रप्रत्ययो निष्पन्नः । उकारस्य एव प्रत्ययत्वे चाद्युदात्तत्वेन सति शिष्टस्वरन्यायेन धातोरनुदात्तत्वे प्रत्ययोदात्तत्वे सति एकादेश उदात्तेन उदात्तः इति सूत्रेण उकारप्रत्ययस्य धातोश्चैकादेशस्य औकारस्य उदात्तत्वं सिद्ध्यति तावन्मात्रमेव लित्वपक्षेऽपि । एतावांस्तु विशेषः उकारमात्रप्रत्ययपक्षे प्रत्ययस्योदात्ततया शिष्टानुदात्तत्वम् । लितः प्रत्ययत्वपक्षे धातोरुदात्तत्वं इति । न चायं बाधकः । **एकादेश इति** । सूत्रेण अनुदात्तेनोदात्तस्यैकादेशं विषयीकृत्य तस्योदात्तत्वविधानेऽपि प्रत्ययोदात्तत्वादिविशेषाकारस्या-विषयीकरणेन उक्तविशेषस्याप्रयोजकत्वात् । अन्यथाऽग्निमित्यादौ अमः पूर्वनिपातेऽपि प्रत्ययस्य उदात्तत्वाभावेन एकादेश इति सूत्राप्रवृत्त्यापातात् इत्याशयेनाह **उभयत्रेति** । **ग्रहणस्यैवानुवृत्त्येति** । तावतैव केशवादिपदेषु दीर्घाभावोपपत्तेः इत्याशयः । ननु भवान् इति प्रयोगे दीर्घः स्यादिति तद्वारणार्थं तिङीत्यननुवृत्तिरावश्यकी । काशिकाकारेण उक्तप्रयोगसिद्ध्यर्थं अनुवत्तिं केचित् तिङीत्यस्य कुर्वन्तीत्यभिधानात् । मञ्जरीकारेणापि भवान् इति कसौ सार्वधातुक इति काशिकावाक्यं व्याकुर्वाणेन भवतेः कसुः तस्य छन्दसि उभयथा इति सार्वधातुकत्वात् शप् लिटि धातोरित्यत्र धातुग्रहणात् शबन्तस्य द्विर्वचनाभावः इत्युपपादनात् तत्कथं तिङीत्यस्य नानुवृत्तिरिति चेत् न । केशवादिशब्देषु दीर्घाभावस्य सार्वधातुकानुवृत्तौ वोपपत्तौ भवान् इत्यत्रापि दीर्घाभावस्य छान्दसत्वेनैवोपपत्तौ च तिङीत्यस्यावश्यकत्वात् । उक्तं च मञ्जर्याम् । ये तु सार्वधातुक इत्येवानुवर्तयन्ति तेषां छान्दसत्वादेव दीर्घाभाव इति । तिङीत्यनुवृत्तिकारमतेऽपि शब्दार्थच्छान्दसत्वा-श्रयणस्यावश्यकत्वेन तत एव दीर्घाभावस्यापि उपपत्तौ तिङीत्यस्याननुवर्तनीयत्वात् इति भावः । **अन्त्य इति** । श्रद्धालुरिति रूपानुपपत्तिरित्यर्थः । **अत्र विषये** लुश्विषये । घटो भविष्यति । श्रद्धालुरूपमिति शेषः । सकाशात् इति वा । निष्पन्न इति शेषः । श्रत् पूर्वकात् धेटः पानार्थात् कथं श्रद्धादया प्रतिपत्तिः इत्यत उक्तं **दधात्यर्थे वर्तमानस्येति** । अन्यार्थस्य कथमन्यार्थे वृत्तिरित्यत उक्तं **अनेकार्थत्वादिति** । 'क्रियावाचित्व-माख्यातुं एकैकोऽर्थः प्रदर्श्यते । प्रयोगतोऽनुगन्तव्यानेकार्था हि धातवः' इत्यभियुक्तोक्तेरिति भावः । अनेन श्रत्पूर्वकस्य धेटो अप्रयोगात् श्रद्धालुरिति न धेटो रूपं इत्युक्तिविरोधोऽपि नास्ति । पानार्थस्याप्रयोगेऽपि दधात्यर्थस्य दधातितुल्यतया प्रयोगोपपत्तेः इत्यपि सूचितम् । ननु धाञ्पक्षे आत्वस्य स्वतः सिद्धत्वेऽपि धेट्पक्षे आदेच उपदेशेऽशिति इत्यनेन आत्वेऽङ्गीकर्तव्ये आलुचि अशित्वेनात्वोपपत्तावपि लुश्पक्षे शित्परतया आत्वानुपपत्तेः कथं घटोऽपि एतत् रूपमिति शङ्कते **न चेति** । शिदाश्रय इति सप्तमी । शितो लुश्प्रत्ययस्याश्रयणेत्यर्थः । नात्र लुशवत् धेटो अनन्तरः अपि तु मध्ये ब्रह्म तं शिव इत्यादाविव आकारः

प्रश्लिष्यते ततः आकारस्याशितः परत्वात् युक्तं आत्वं इत्याशयेनाह एवं तर्हीति । आकारप्रश्लेषप्रकार-विवरणार्थं श्रत् धा आ श्रद्धा इतीत्युक्तम् । अस्मिन् पक्षे आकारप्रश्लेषाश्रयणात् वरं आलुविधानमेव स्वरसादाह अथवेति । द्विर्वचनं न प्रवर्तिष्यते इति पाठः । पदमञ्जर्यां तथैवोक्तेः । द्वित्वाश्रयाभ्यस्तलोपनिमित्तकत्वात् प्रदधुः इति रूपप्रसङ्गस्याद्वित्वनिषेधस्यैव वक्तव्यत्वाच्चेति ध्येयम् । अत्र च प्रत्ययस्य लुक् श्लुलुपः इति सूत्रेण प्रत्ययादर्शनविशेषस्य श्लुरिति संज्ञाविधानेन श्लाविति संज्ञाभूतश्लुनिमित्तीकृत्य विधीयमानद्विर्भावस्याश्रयणेन श्रदधुः इति प्रसक्ते सति संज्ञापूर्वको विधिरनित्य इति द्विर्भावविधायकश्लावित्यस्य प्रवृत्त्यभावोपपत्तेः न द्विर्भावप्रसक्तिरित्यर्थः । ननु काशिकाकृता ओर्गुण इति सूत्रे ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्यः यथा स्यात् तेन स्वायम्भुवमिति सिद्धं भवतीति प्रतिपादितं तत्र संज्ञापूर्वको विधिर्नाम विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव । अन्यथा विधेयनिमित्तस्थानादिसमर्पकपदरूपसंज्ञा यतःशब्दोपेत-त्वरूपत्वे ओरोदित्येवोक्ते गुणशब्दरूपसंज्ञाशब्दत्यागेऽपि अत्र सूत्रेऽनुवृत्तस्य भसेत्यस्य तद्धित इत्यस्य च क्रमेण स्थाननिमित्तसमर्पकसंज्ञाद्वयस्य सत्त्वेन संज्ञापूर्वकत्वस्यैव प्राप्त्या गुणशब्दत्यागमात्रेण नित्यत्वज्ञापना-नुपपत्तेः । अतोऽपि इत्येतावतैव सामञ्जस्यात् तत्करणस्योच्चारणार्थत्वे संज्ञाया अभावेऽपि अर्थविशेषसमर्पकत्वे तत्पूरणस्य तत्परः तत्कालस्य इति तत्कालसंज्ञात्वमेव ओरोदिति अपि संज्ञेति । संज्ञात्रयपूर्वकत्वापातः तस्मात् विधेयसमर्पकसंज्ञाभूतपदमेव संज्ञेति विवक्षित्वा गुणग्रहणे सति एतत्पूर्वकत्वमिति वाच्यम् । तादृशं च कथमत्र संज्ञापूर्वकत्वम् । विधेयद्विर्भावसमर्पकस्य द्वे इत्यादेः संज्ञात्वाभावादिति चेत् अत्रोच्यते । यदुक्तं यावत् संज्ञाशब्दपरित्यागोऽपि विवक्षितार्थसिद्धौ सम्भवन्त्यामपि यत्र तावदुपादानं तत्रैवानित्यत्वज्ञापकत्वप्रसङ्गवारणाय संज्ञापदस्य विधेयसमर्पकपदरूपत्वमावश्यकमिति ओरोत् इत्युक्ते स्थानादिसमर्पकसंज्ञापूर्वकत्वेऽपि विधेय-समर्पकसंज्ञापूर्वकत्वाभावेन तथात्वेऽपि विवक्षितसिद्धेः गुण इति संज्ञोपादानमनित्यत्वज्ञापकमिति, तथैव किन्तु यत् प्रधानसमर्पकं पदं तदेव संज्ञापदं विवक्षितम् । न तु सर्वत्र विधेयसमर्पकपदरूपैव संज्ञातिनियमः । तथा सति वक्ष्यमाणबहुषु स्थलेषु तथाविधविधेरनित्यत्वोक्तिः हरदत्तादीनां अयुक्ता स्यात् । अभियुक्तप्रयोगाश्च न सिद्ध्येरन् किन्तु स्वस्यापि स्थानादिसमर्पकेषु अनेकसंज्ञाशब्देषु क्वचित् कश्चिदेव प्रधानसमर्पकम् । क्वचित् कस्यचिदेवमिति तद्विषयस्थानानि अन्यतमस्मिन् प्राधान्यप्रतीतेः । तद्यथा ओर्गुण इत्यत्र भस्येत्यादिसंज्ञासु सत्स्वपि गुणसंज्ञैव गुणस्य प्राधान्यात् प्रधानसमर्पिका प्रतीयते । श्लावित्यत्र चानभ्यासधात्ववयवस्य निषेध-मुखेनैव संज्ञान्तरप्रतीतावपि निमित्तस्यैव प्राधान्यप्रतीतेः तत्समर्पकसंज्ञाया एव प्रधानसमर्पकत्वम् । यथा वा पुगन्तलघूपधस्य चेति सूत्रेऽनुवृत्त गुण इति पदस्य एव प्रधानसमर्पकत्वेऽपि लघूपधस्येति उपधारूप-संज्ञापदस्याप्रधानस्थानसमर्पकत्वमित्यादि तत्र तत्र द्रष्टव्यम् । एवं च प्रधानसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वक इति श्लाविति द्वित्वविधेरपि प्रधानभूतनिमित्तसमर्पकसंज्ञापदोपेतत्वात् युक्तं संज्ञापूर्वकत्वमिति तद्विधेरनित्यत्वात् द्वित्वाभावः । किञ्चान्तोदात्तोपदेशस्य मान्तस्य अनाचामेति इत्येतत्सूत्रीयकाशिकायां उदात्तोपदेशस्य मान्तस्याङ्गस्य चमिवर्जितस्य णिचि कृति ञिति णिति च 'अतः उपधायाः' इत्यनेन प्राप्ता वृद्धिः नेति सूत्रार्थे अभिधाय शनि अतं इत्युदाहरणादिकं च अभिधाय नाचामेरित्यत्र चाचमीकमिव मीनां चेति

वक्तव्यं अभिधाय तदुदाहरणार्थमभिधा पचसूर्पविश्रामभूमिरित्येवमादिकं प्रयोगं अन्याय्यमेव मन्यन्ते इत्यभिहितम् । कैय्यटोऽपि तत्र सूत्रे विश्रामशब्दस्त्वसाधुरेवेत्याह । हरदत्तस्तु विश्रान्तिरिति पठितव्यं क्वचित् प्रयोगेषु इत्याह । नव्यास्तु धूर्यां विश्रामयेत्यादि कालिदासप्रयोगादिषु णिजन्तात् एरच् इत्याह । तत्रार्थानुसारेण तथोक्तिः । धातुवृत्तावपि निशामयेत्यादि प्रयोगव्युत्पादनावसरेऽनेकधा समाहितं परन्तु विश्रामशब्दे नत्रा-निर्दिष्टस्यानित्यत्वात् संज्ञापूर्वको विधिः अनित्य इति वा निषेधाभावः इति टीकाकृतः समादधति । न हि नोदात्तेति सूत्रे वृद्धिपदं विधेयसमर्पकं अस्य निषेधरूपत्वात् । कथञ्चित् योजना तु प्राधान्यमेवास्मदुक्त-मनुस्मरतीति । एवं तत्र तत्र हरदत्तादीनां बहुस्थलेषु उक्तयो ज्ञेयाः इति वयमालोचयामः । लुश्विधेनैव उपपत्तौ एवमपि ज्ञापनार्थमिति पाठे मञ्जर्यानुसारिपाठः स्यात् । तत्रालुच्करणमिति शेष इति ज्ञेयम् । यद्यपि किमेतस्य ज्ञापने इत्यादिभाष्ये आलुचि शीङ् ग्रहम् इति वार्तिकप्रत्याख्यानप्रतीत्याशया आलुरिति रूपमेवाभ्यनुज्ञातमिति प्रतीयते । हरदत्तोऽपि । तेनालुचि शीङ् ग्रहणं इत्यादिना वार्तिकमेव प्रत्याचिख्यौ । तेनापि शयालुरिति रूपमेवाभ्यनुज्ञातं प्रतीयते । न तु कृपालुरितीति तथोक्तिरयुक्तेत्याभाति । तथापि अन्येभ्योऽपीति भाष्ये यत्रालु चैव ततोऽपीति मञ्जर्यां च बहुसङ्ग्रहाभिधानात् कृपालुरिति रूपसिद्धिरपि भाष्यमञ्जरीकारयोः फलत्वेन सम्मतैवेति न कश्चिद्दोषः । ननु भाष्यकारानुक्तेः इयं परिभाषा कुतः काशिकाकृता वक्तव्या येन तद्रीत्यायं समाधिः शक्यकरण इति चेत् । न । स्वायम्भुव इत्यादि बहुलप्रयोगसंरक्षणाय उक्तपरिभाषाश्रयणस्य आवश्यकतायाः ओर्गुणः इत्येतत्सूत्रे हरदत्तेनादितत्वात् । स्वयम्भू ब्रह्मा तस्येदमिति अणि आदिवृद्धौ 'यचि भमि'ति भत्वेऽपि गुणो न भवति । अनेन आत्वं वा किन्तु उवङेवेति स्वायम्भुवमित्येव भवतीति तत्तदा युज्यते । यदि संज्ञापूर्वको विधिः अनित्यः स्यात् एवं प्रयोगान्तरेऽपि । एवं च स्वायम्भुवं इत्याद्यभियुक्तप्रयोगसंरक्षणाय इयं परिभाषा आवश्यकैव । तदेतदाह **अन्यत्रेति** । कृपालुशब्दे गुणाभावस्तु कृपाशब्दात् ल्यादिप्रत्यये पक्षाभिधानात् यङन्तत्वेनाङन्तत्वादेवेति स्पष्ट आलुच्प्रत्यये तु संज्ञापूर्वकविधेः अनित्यत्वादिनिष्ठप्रागेवोक्तमिति दिक् । तदादाय स्वपरेति पाठः । केनचित् कर्तृत्वेत्यत्र केनचित् इत्येतत् विवरणपूर्वकं यद्विशेषणपदोक्तं व्यावर्तकृत्यं च प्रयुक्तत्वप्रदर्शनाव्याजेनैव दर्शयन् प्रवृत्तिस्वभावत्वे इत्युक्तदोषमपि प्रयुक्तत्वोपदर्शनव्याजेनैवोपदर्शयन्नाह **चिकीर्षापूर्वकत्वेत्यादिना** । केनचित् विशेषणेन यत् प्रवृत्ते विशेषणं व्यावर्तनम् । विशिष्टिकरणमिति यावत् । विशेषणमित्यस्य प्रयुक्तमिति वक्ष्यमाणेनान्वयः ।

स०व्र०— आद्ये साधने इति । ज्वलनपवनादावनैकान्त्यमित्यर्थः । **आपादने व्याप्त्यभाव इति** । यद्यपि आपादने अनैकान्त्यमिति वक्तुं शक्यम् । तथापि विशिष्टतर्कस्यैवापादनशब्दार्थत्वात् तत्र चाङ्गवैकल्यमेव स्पष्टं वक्तव्यमित्यभिप्रेत्यैवमुक्तम् । ज्वलनपवनादौ व्यभिचारात् व्याप्त्यभाव इत्यर्थः । विपर्ययपर्यवसाने परार्थं प्रवर्तमानेषु कृपालुषु व्यभिचार इत्यर्थः । तमेवोपपादयति **दृश्यन्ते हीति** । **क्रमेणेति** । साधने सिद्धसाधनता । परप्रयोजनार्थत्वस्याभ्युपगतत्वात् । आपादने चेष्टापादनम् । तत एव विपर्ययपर्यवसाने असिद्धत्वम् । न भवति च परसम्बन्धिप्रयोजनवान् । तस्मान्न कर्तेति विपर्ययपर्यवसाने भगवति परप्रयो-

जनोद्देशिताया मानसिद्धत्वादसिद्धत्वमिति भावः । **अत एवेति** । सिद्धसाधनत्वप्रसङ्गादेवेत्यर्थः । ननु प्रेक्षापूर्वकत्वं हेतुविशेषणम् । तथा च न कुत्रापि व्यभिचार इत्यत आह **अत एवेति** । अत्राप्यनुमाने परसम्बन्धिप्रयोजनवत्त्वसाधने सिद्धसाधनम् । स्वसम्बन्धितत्साधने श्रुत्यादिबाधः । तर्के च विपर्ययपर्यवसाने बाध इति भावः । प्रवृत्तिस्वभावत्वे सदा प्रवर्तेत इत्यापादने दयालुषु प्रवृत्तिस्वभावत्वेऽपि सर्वदा प्रवृत्त्यभावेन व्यभिचारादेवेत्यर्थः ।

विठ्ठल०— अङ्गचेष्टा इति वाक्यसङ्गततया उत्तरमूलमुत्थापयिष्यन् अङ्गचेष्टा इत्यस्य क्रियापूर्ववृत्तय इत्यर्थं उद्देशेत्यस्य स्वप्रयोजनोद्देशेत्यर्थं चोपेत्य प्रकारान्तरेण तदभिप्रायमाह **किञ्चेत्यादिना** । अनैकान्त्यादिकमुपपादयति **दृश्यन्ते हीति** । तथा च कृपालुष्वनैकान्त्यं अत एव व्याप्त्यभावादीति भावः । **कृपालुता चेति** । निरुपाधिकपरोपकारचिकीर्षाया एव कृपालुत्वादिति भावः । **क्रमेण सिद्धसाधनेति** । साधने सिद्धसाधनतापरसम्बन्धिप्रयोजनवत्वस्याङ्गीकृतत्वात् । अत एवापादने इष्टापत्तिः । विपर्ययपर्यवसाने चासिद्धत्वप्रसङ्गश्चेत्यर्थः । अत एव **यत्केनचिदिति** । स्वसम्बन्धिप्रयोजनस्य विवक्षितत्वेऽपि नाप्युपपत्तिपालनादिप्रवृत्तावनैकान्त्यकर्तृत्वे परप्रयोजनरहितत्वे सतीति विवक्षितत्वादिति यत्कर्तृत्वे विशेषणम् । यच्चेश्वरस्य प्रवृत्तिस्वभावत्वे सर्वदा प्रवर्तेतेत्यतिप्रसञ्जनम् । तदुभयमप्यत एव प्रत्युक्तम् । आद्ये अत एव प्रयोजनरहितत्वेति विशेषणसिद्धत्वादेवेत्यर्थः । द्वितीयेव भगवत्प्रवृत्तेः स्वाभाविकत्वेऽपि परप्रयोजनानुसारेण क्रमात्सृष्ट्यादिकर्तृत्वस्वभावस्याङ्गीकृतत्वादेवेत्यर्थः । यद्वा कर्तृत्वेनेश्वरस्य परप्रयोजनोद्देशसाधनादौ उक्तानैकान्त्यापरिहाराय कर्तृत्वं केनचित्स्वप्रयोजनेच्छादिरहितत्वादिना विशेष्यत इत्येतदीश्वरप्रवृत्तेः स्वभावत्वे प्रयोजनार्थप्रवृत्तिस्थलेनेकेत्यादिपरिहारेऽपि विशेषितेन कर्तृत्वेनेश्वरस्य प्रयोजनोद्देशे साधनापादनयोः सिद्धसाधनेष्टापत्त्यादिप्रसङ्गादीश्वरस्य सदा प्रवृत्तेरङ्गीकृतत्वेन तदापादनेष्टापादनप्रसङ्गाच्च प्रत्युक्तमित्यर्थः ।

॥ इति तदन्यथिका शङ्का, तन्निरासश्च ॥

* * *

॥ अथ तत्र तन्निरासोपपादनम् ॥

१३० **सु०—** कुत एतदवगम्यत इत्यत आह नेति ।

अनु०— न प्रयोजनवत्त्वेनेत्यत आह जगद्गुरुः ।

यतः परप्रयोजनमङ्गीकृत्यात्मप्रयोजनार्थतामेव नेति न्यवारयत्, अत एव हि प्रयोजनवत्त्वादिति तत्र हेतुम् आह । अन्यथा नैतं ब्रूयात् ।

एतदुक्तं भवति । यदि नेति सौत्रीप्रतिज्ञा स्वपरप्रयोजनविषया स्यात् तदा प्रयोजनवत्त्वादिति हेतुरनैकान्तिकः स्यात्, स्वयं व्यापारसाध्यप्रयोजनवतोऽपि परप्रयोजनोद्देशेन व्यापारदर्शनात् । स्वप्रयोजनमात्रविषयत्वे तु नायं दोषः, योऽवाप्तयत्प्रयोजनः स स्वार्थं न तदुद्दिशतीति व्याप्तेरनवद्यत्वात् । अतः प्रयोजनवत्त्वादिति हेतुं ब्रुवाणः सूत्रकृदात्मप्रयोजनोद्देशमेव नेति निवारितवान्, न परप्रयोजनोद्देशमपि । तथात्वे तद्व्याप्तमेव कमपि हेतुं ब्रूयात् । स्वप्रयोजननिषेधं कुर्वाणो विशेषनिषेधस्य शेषाभ्यनुज्ञाज्ञापकत्वात्परप्रयोजनस्पृहामभ्युपैतीति(मनुजानातीत्यपि) ज्ञायत इति । उपलक्षणमेतत् । श्रुतिरप्याप्तकामस्येति हेतुगर्भविशेषणं प्रयुञ्जानाऽऽत्मप्रयोजनस्पृहामेवाक्षिपति परप्रयोजनस्पृहामभ्युपैतीति ज्ञायत इत्यपि द्रष्टव्यम् ॥

परि०— एवं हेतूक्तावप्युक्तप्रमेयसिद्धिः कथमित्यत आह **एतदुक्तमिति** । **इति हेतुरनैकान्तिक इति** । प्रयोजनवत्त्वादित्यस्य ह्याप्तप्रयोजनवत्त्वादित्यर्थः । तथा च ईश्वरः न प्रयोजनोद्देशेन व्याप्रियत आप्तप्रयोजनवत्त्वात् यो यद्व्यापारसाध्यप्रयोजनमाप्तवान् स तद्व्यापारसाध्यप्रयोजनोद्देशेन न व्याप्रियत इत्युक्तौ व्यभिचारी हेतुः स्यादित्यर्थः । कुत्रेत्यत आह **स्वयमिति** । आत्मन इत्यर्थः । व्यापारसाध्यप्रयोजनं स्वस्याप्तवतोऽपीत्यर्थः । **इति हेतुमिति** । आप्तप्रयोजनत्वादित्यर्थकं हेतुमित्यर्थः । **तद्व्याप्तं कमपीति** । स्वभाववत्त्वादिकमित्यर्थः । तावता परार्थमिति कथं ज्ञायत इत्यत आह **स्वप्रयोजनेति** । उत्तरवाक्यसङ्गत्यर्थमाह **उपलक्षणमिति** ।

यादु०— न प्रयोजनवत्त्वेनेत्युत्तरमूलोत्थापनायाह **सूत्रकृतोऽपीति** । **तद्व्याप्तमेव कमपीति** । प्रयोजनोद्देशसामान्याभावव्याप्तमानन्दोद्रेकादिकमेव कमपि हेतुं कुर्यादित्यर्थः ।

वं०प०— **स्वयं व्यापारेति** । स्वयं स्वीयव्यापारसाध्यं प्रयोजनं पूर्वमेव लब्धवत इत्यर्थः । कृतकृत्यस्यापीति यावत् । अथवा स्वयं स्वस्येत्यर्थः । **स्वप्रयोजनमात्रविषयत्वे** नेति सौत्रप्रतिज्ञायाः स्वप्रयोजननिषेधमात्रविषयकत्व इत्यर्थः । **तद्व्याप्तमिति** । स्वपरप्रयोजनोभयनिषेधव्याप्तं हेतुं ब्रूयान्न स्वप्रयोजनमात्रनिषेधकमित्यर्थः ।

श्रीनिधि०— **व्यापारसाध्यप्रयोजनवतोऽपीति** । व्यापारसाध्यं यत् प्रयोजनं तत्प्राप्तवतोऽपीत्यर्थः ।

शे०वा०— ननु स्वस्वसम्बन्धिप्रयोजनविषयत्वाच्छ्रौतादिनिषेधस्य भगवत्प्रवृत्तेः स्वसम्बन्धिप्रयोजनोद्देशसिद्ध्या प्रागभिप्रेतसिद्धसाधनत्वादिसमर्थनात् किमुत्तरेणेत्यत उक्तनिषेधस्य स्वसम्बन्धिप्रयोजनविषय-

तायां ज्ञापकविशेषाभिधानार्थत्वात् तस्य नानर्थक्यमिति भावेन तत्कथनरूपतयोत्तरवाक्यं सङ्गमयितुं तदभावप्रयुक्तस्वसम्बन्धिप्रयोजनमात्रविषयत्वानुपपत्तिशङ्कामुत्थापयति **कुत एतदिति** । ननु चात्र 'न प्रयोजनवत्त्वेनेत्यत **आह** जगद्गुरु'रित्येवोच्यते न तु प्रयोजननिषेधस्य स्वसम्बन्धिप्रयोजनमात्रविषयतायां किञ्चिन्नियामकमपीति कथमनेनोक्तशङ्कापरिहार इत्यतोऽपेक्षिताध्याहारेण ज्ञापकविशेषसमर्पकतया भाष्यं व्याचष्टे **यत इत्यादिना** । **अन्यथेति** । नेति सौत्रनिषेधस्य स्वपरसम्बन्धिप्रयोजननिवारकत्व इत्यर्थः । ननु नेति सौत्रप्रयोजननिषेधस्य स्वसम्बन्धिप्रयोजनविषयतायामिव स्वपरसाधारणप्रयोजनविषयतायामपि हेतुत्वादेवोक्तत्वोपपत्तेः कथमनेन निषेधस्य स्वसम्बन्धिप्रयोजनमात्रविषयत्वसिद्धिः, कथञ्चित् तत्सिद्धावपि कथं भगवत्प्रवृत्तेः परप्रयोजनोद्देशसिद्धिरित्यतः प्रयोजनमात्रनिवारकत्वहेतुत्वासम्भवप्रदर्शनपूर्वकं स्वसम्बन्धिप्रयोजनमात्रविषयतायां तत्सम्भवकथनेनावक्तव्यत्ववक्तव्यत्वे व्युत्पादयन्नेव परसम्बन्धिप्रयोजनाभ्युपगमसिद्धिमुपदर्शयति **एतदुक्तं भवतीत्यादिना** । अनैकान्तिकत्वमेव दर्शयति **स्वयमिति** । ज्ञायत इतीत्यत्रत्यस्येतिशब्दस्येत्येतदुक्तं भवतीति पूर्वेण सम्बन्धः । नन्वनेन वाक्येन नेति सौत्रनिषेधस्योक्तरीत्या स्वप्रयोजनमात्रविषयत्वसिद्ध्या सूत्रकृतः परप्रयोजनोद्देशाङ्गीकारसिद्धावपि श्रौतनिषेधस्य तदसिद्ध्या श्रुतौ तदङ्गीकारासिद्धेः कथमनेन वाक्येनोक्तशङ्कानिरास इत्यतो न प्रयोजनवत्त्वेनेत्यादिभाष्यमुपलक्षणतया व्याचष्टे **उपलक्षणमेतदिति** । यद्यप्यत्र मूले आत्मप्रयोजनार्थयेति पूर्ववाक्यानुरोधेन श्रौतनिषेधस्य स्वसम्बन्धिप्रयोजनमात्रविषयत्वं ज्ञापकोक्त्या मुखतो वक्तुमुचितम् । तथाऽपि पूर्ववाक्यस्थश्रुतिशब्दस्य सूत्रकृदुपलक्षणत्वज्ञापनार्थं सौत्रनिषेधस्य तद्विषयत्वं मुखत उपपादितम् । अन्यथा निराकाङ्क्षतया श्रुतिशब्दस्य तदुपलक्षणत्वासम्भवादिति ध्येयम् ।

विठ्ठल०— नप्रयोजनवत्त्वेनेत्युत्तरमूलोत्थापनायाह **सूत्रकृतापीति** । **प्रयोजनवत्त्वादिति तत्र हेतुमाहेति** । अवाप्तादोषप्रयोजनत्वादिति प्रयोजनाभावे हेतुमाहेत्यर्थः । नन्वेतेनैव हेतुना परप्रयोजनाभावोऽपि किं न साध्यो अन्यथा स्वप्रयोजनाभावेऽपि न साध्यताम् । अस्तु वा स्वप्रयोजनाभावसाधनं तावता कथं प्रयोजनवत्वं सिद्ध्यतीत्यत आह **एतदुक्तं भवतीति** । अनैकान्तिकः स्यादित्युक्तमुपपादयति **स्वयं व्यापारेति** । स्वयं स्वभावत एव व्यापारसाध्यं यत्प्रयोजनं तद्वतोऽपि सर्वदा तद्वतोऽपीति । तथा चेश्वरो न प्रयोजनोद्देशेन व्यापारवान् अवाप्तप्रयोजनत्वादित्यस्य परप्रयोजनमात्रोद्देशव्यापारवति व्यभिचार इति भावः । **तद्व्याप्तमेव कमपीति** । प्रयोजनोद्देशसामान्याभावव्याप्तमानन्दोद्रिक्तत्वादिकमेव कमपि हेतुं ब्रूयादित्यर्थः । उत्तरवाक्ये सङ्गमयितुमाह **उपलक्षणमिति** ।

॥ इति तद्विरासोपपादनम् ॥

॥ इति भाष्योक्तैतदधिकरणीयप्रयोजने अन्यधिकाशङ्कया द्वितीये निरासे
पुनरन्यधिकाशङ्का, तन्निरासः, तदुपपादनञ्च॥

॥ इति भाष्योक्तैतदधिकरणीयप्रयोजने अन्यधिकाशङ्कया द्वितीयनिरासस्योपपादनम् ॥

* * *

|| अथ उक्तार्थसमर्थनार्थं उक्तार्थोदाहृतप्रमाणीयापव्याख्यानदूषणं तद्विवरणञ्च ||

|| अथ तत्रादौ तदपव्याख्यानस्य दूषणम् ||

|| अथ तत्राप्यादौ 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरमपव्याख्यानं तन्निरासश्च ||

|| अथ तत्र चादौ अपव्याख्यानम् ||

|| अथ च तन्निरासः ||

|| अथ तत्रादौ चतुर्विधस्तन्निरासः ||

|| अथ तत्रापि चादौ प्रशंसान्यथानुपपत्त्या प्रथमस्तन्निरासः ||

१३१ सु०— "इह हि बुद्धिरेवेश्वरस्याव्याहता क्रियाशक्तिः, तयैव सर्वस्योपपत्तौ किमिच्छाप्रयत्नकल्पनया ।

यद्वा **प्रयत्नः** कर्तृत्वम्, तस्यैवाख्यातार्थतया निर्णीतत्वात् । स च द्वेधा बुद्धिमपेक्षते, उत्पत्त्यर्थं विषयनियमार्थं च । तत्रेश्वरप्रयत्नो यद्यपि नित्यत्वान्नोत्पत्तावपेक्षते बुद्धिम्, तथाऽपि विषयनियमार्थं तामपेक्षत एव । न हि निर्विषय एवासौ, व्यर्थत्वप्रसङ्गात् । न च स्वभावत एवार्थप्रवणः, बुद्धित्वप्रसङ्गात्, बुद्धिरेव हि स्वभावतोऽर्थप्रवणा । अतो ज्ञानप्रयत्नाभ्यामेव सर्वनिर्वाहान्नेश्वरस्येच्छाऽस्ति । न च इच्छया प्रयत्नस्य विषयनियमः । तस्या अपि स्वतो विषयप्रवणताभावात् । तदर्थं बुद्ध्यङ्गीकारे तयैव प्रयत्नस्य विषयनियमोपपत्तेः किमन्तर्गडुनेच्छया ।" इति मन्वा(न्यमा)नाः केचित्, 'का स्पृहे'ति श्रुतिर्नेश्वरस्य प्रयोजनेच्छामात्रनिषेधपरा, किन्त्विच्छालक्षणं गुणमेव निषेधतीति व्याचक्षते । तन्निराकरोति **इच्छामात्रमिति** ।

अनु०— इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
इति प्रशंसया

'का स्पृहे'ति श्रुत्या नेश्वरस्येच्छामात्रं निषि(षे)ध्यते । कुतः । इच्छावत्त्वस्य प्रमाणतः सिद्धत्वात् । तथाहि । 'विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः । स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता । कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः' इति परिणामवादं विवर्तवादं कालादिनिमित्तवादं चान्यमतत्वेनोक्त्वा 'इच्छामात्रमि'ति श्रुत्या स्वमतमुच्यते । ये सृष्टिविषये विशिष्टनिश्चयवन्तस्ते, प्रभोरिच्छामात्राधीना सृष्टिर्न ब्रह्मपरिणामो न च तद्विवर्तो नापि कालादिनिमित्तेति मन्यन्त इति ।

अनया प्रभोरिच्छामात्रायत्ततां सृष्टेर्मन्यमानानां विनिश्चिता इति प्रशंसया तस्येच्छावत्त्वमवगम्यते । यदीश्वरस्येच्छा न स्यात् तदा तदायत्ततां सृष्टेर्मन्यमाना विपर्यस्ताः स्युः, विशिष्टनिश्चयवन्त इत्येषा प्रशंसाऽनुपपन्ना स्यात् । न च प्रशंसा-त्वादेवार्थासिद्धिः, पूर्वोत्तरपक्षावधारणप्रसङ्गे प्रशंसाया अपि याथार्थ्यावश्यम्भावात् । अन्यथा परिणामादिवादा अपि प्रशंस्येरन् ।

परि०— उत्तरवाक्यमवतारयितुं श्रुतेरपव्याख्यानं पराभिप्रेतं युक्तिपूर्वकमनुवदति **इह हीति** । **ईश्वरस्येच्छाविषये** । **केचिदिति** मन्वाना इति व्याचक्षत इत्यन्वयः । इच्छाकृत्योर्द्वयो-रप्यपलापप्रकारं तावदाह **बुद्धिरेवेति** । **क्रियाशक्तिरिति** । अव्याहता निर्माणशक्तिरित्यर्थः । बहुव्रीहिर्वा । इच्छामात्रापलापिनो मतमाह **यद्वेति** । **तस्यैवेति** । प्रयत्नरूपकर्तृत्वस्यैव 'लः कर्मणि च भावे चाकर्मकेभ्य' इत्यत्र चकारेण कर्तरि विहितलकारादेशस्य तिङ्रूपाख्यातस्यार्थत्वेन निर्णीतत्वात् 'भावनैव प्रयत्नात्मा(ख्या) सर्वत्राख्यातगोचर' इत्युक्तेश्चेति भावः । **विषयनियमार्थ-मिति** । यद्विषया बुद्धिः तद्विषयः प्रयत्न इति विषयनियमार्थमित्यर्थः । कुत एवं, घटादिव-न्निर्विषयत्वेन वा स्वत एव विषयप्रावण्यादेवोपपत्तिरस्त्वित्यतो निराह **न हीति** । **व्यर्थत्वेति** । प्रयत्नो हि यद्विषयः तस्योत्पत्त्याद्यर्थमभ्युपगम्यते स चेन्निर्विषयस्तदा तेन साध्यांशाभावाद्व्यर्थ एवायमापद्यत इति भावः । तर्हि इच्छैवोपेयतां किं बुद्ध्येत्यत आह **न चेति** । **तन्निराकरो-तीति** । तद्व्याख्यानं निराकरोतीत्यर्थः । शेषोक्त्या चरमपादं व्याचष्टे **का स्पृहेति** । तत्र हेतुत्वेन प्राक्तनपञ्चपादी व्याचष्टे **कुत इत्यादिना** । **प्रसवं** जगज्जननम् । **विभूतिं** ब्रह्मणो वियदादिरूपेण विविधभवनं मन्यन्त इत्यर्थः । **स्वप्नेति** । स्वाप्नपदार्थगतजाग्रत्त्वस्थौल्यबाह्योपादानकत्वादिकं यथा कल्पितं तथा वा मायाविनिर्मितं गन्धर्वनगरादिकं मायापदगृहीतं यथा मिथ्या तथेश्वरसृष्टं जगदपि मिथ्येति कल्प्यत इत्यर्थः । **विवर्तवादम्** आरोपवादम् । **कालाविति** । एतेन कालादित्युप-लक्षणमिति सूचितम् । विनिश्चिता इति कर्तरि निष्ठान्तं वा भावार्थनिष्ठार्थत्वेऽपि अर्शआद्यच् प्रत्ययान्तं वा । सृष्टाविति च विषयसप्तमीत्युपेत्यार्थमाह **य इति** । राजा राष्ट्रमितिवदभेदोपचार इत्युपेत्याह **इच्छामात्राधीन इति** । इतिपदस्य स्वमतमुच्यत इत्यनेनान्वयः । शङ्कते **प्रशंसात्वादेवेति** । पूर्वतन्त्रे अर्थवादानां स्वार्थे तात्पर्यस्यानङ्गीकारादिति भावः । समाधिमाह **पूर्वोत्तरपक्षेति** । विभूतिप्रसवादिपक्षः पूर्वोक्तः साधुर्वा चरमोक्त इच्छामात्राधीनत्वपक्षः साधुर्वेति चिन्तायां पूर्वोत्तररूपपक्षचतुष्टयमध्ये अयं समीचीन इति निर्धारणप्रसङ्गे प्राप्तप्रशंसाया अपीत्यर्थः ।

॥ अथ उक्तार्थसमर्थनार्थं उक्तार्थोदाहृतप्रमाणीयापव्याख्यानदूषणं तद्विवरणञ्च ॥

॥ अथ तत्रादौ तदपव्याख्यानस्य दूषणम् ॥

॥ अथ तत्राप्यादौ 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरमपव्याख्यानं तन्निरासश्च ॥

॥ अथ तत्र चादौ अपव्याख्यानम् ॥

॥ अथ च तन्निरासः ॥

॥ अथ तत्रादौ चतुर्विधस्तन्निरासः ॥

॥ अथ तत्रापि चादौ प्रशंसान्यथानुपपत्त्या प्रथमस्तन्निरासः ॥

१३१ सु०— "इह हि बुद्धिरेवेश्वरस्याव्याहता क्रियाशक्तिः, तयैव सर्वस्योपपत्तौ किमिच्छाप्रयत्नकल्पनया ।

यद्वा **प्रयत्नः** कर्तृत्वम्, तस्यैवाख्यातार्थतया निर्णीतत्वात् । स च द्वेधा बुद्धिमपेक्षते, उत्पत्त्यर्थं विषयनियमार्थं च । तत्रेश्वरप्रयत्नो यद्यपि नित्यत्वान्नोत्पत्तावपेक्षते बुद्धिम्, तथाऽपि विषयनियमार्थं तामपेक्षत एव । न हि निर्विषय एवासौ, व्यर्थत्वप्रसङ्गात् । न च स्वभावत एवार्थप्रवणः, बुद्धित्वप्रसङ्गात्, बुद्धिरेव हि स्वभावतोऽर्थप्रवणा । अतो ज्ञानप्रयत्नाभ्यामेव सर्वनिर्वाहान्नेश्वरस्येच्छाऽस्ति । न च इच्छया प्रयत्नस्य विषयनियमः । तस्या अपि स्वतो विषयप्रवणताभावात् । तदर्थं बुद्ध्यङ्गीकारे तयैव प्रयत्नस्य विषयनियमोपपत्तेः किमन्तर्गडुनेच्छया ।" इति मन्वा(न्यमा)नाः केचित्, 'का स्पृहे'ति श्रुतिर्नेश्वरस्य प्रयोजनेच्छामात्रनिषेधपरा, किन्त्विच्छालक्षणं गुणमेव निषेधतीति व्याचक्षते । तन्निराकरोति **इच्छामात्रमिति** ।

अनु०— इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
इति प्रशंसया

'का स्पृहे'ति श्रुत्या नेश्वरस्येच्छामात्रं निषि(षे)ध्यते । कुतः । इच्छावत्त्वस्य प्रमाणतः सिद्धत्वात् । तथाहि । 'विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः । स्वप्रमायासरूपेति सृष्टिरन्यैर्विकल्पिता । कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः' इति परिणामवादं विवर्तवादं कालादिनिमित्तवादं चान्यमतत्वेनोक्त्वा 'इच्छामात्रमि'ति श्रुत्या स्वमतमुच्यते । ये सृष्टिविषये विशिष्टनिश्चयवन्तस्ते, प्रभोरिच्छामात्राधीना सृष्टिर्न ब्रह्मपरिणामो न च तद्विवर्तो नापि कालादिनिमित्तेति मन्यन्त इति ।

अनया प्रभोरिच्छामात्रायत्ततां सृष्टेर्मन्यमानानां विनिश्चिता इति प्रशंसया तस्येच्छावत्त्वमवगम्यते । यदीश्वरस्येच्छा न स्यात् तदा तदायत्ततां सृष्टेर्मन्यमाना विपर्यस्ताः स्युः, विशिष्टनिश्चयवन्त इत्येषा प्रशंसाऽनुपपन्ना स्यात् । न च प्रशंसात्वादेवार्थासिद्धिः, पूर्वोत्तरपक्षावधारणप्रसङ्गे प्रशंसाया अपि याथार्थ्यावश्यम्भावात् । अन्यथा परिणामादिवादा अपि प्रशंस्येरन् ।

परि०— उत्तरवाक्यमवतारयितुं श्रुतेरपव्याख्यानं पराभिप्रेतं युक्तिपूर्वकमनुवदति **इह हीति** । **ईश्वरस्येच्छाविषये** । केचिदिति मन्वाना इति व्याचक्षत इत्यन्वयः । इच्छाकृत्योर्द्वयो-रप्यपलापप्रकारं तावदाह **बुद्धिरेवेति** । **क्रियाशक्तिरिति** । अव्याहता निर्माणशक्तिरित्यर्थः । बहुव्रीहिर्वा । इच्छामात्रापलापिनो मतमाह **यद्वेति** । **तस्यैवेति** । प्रयत्नरूपकर्तृत्वस्यैव 'लः कर्मणि च भावे चाकर्मकेभ्य' इत्यत्र चकारेण कर्तरि विहितलकारादेशस्य तिङ्रूपाख्यातस्यार्थत्वेन निर्णीतत्वात् 'भावनैव प्रयत्नात्मा(ख्या) सर्वत्राख्यातगोचर' इत्युक्तेश्चेति भावः । **विषयनियमार्थ-मिति** । यद्विषया बुद्धिः तद्विषयः प्रयत्न इति विषयनियमार्थमित्यर्थः । कुत एवं, घटादिव-न्निर्विषयत्वेन वा स्वत एव विषयप्रावण्यादेवोपपत्तिरस्त्वित्यतो निराह **न हीति** । **व्यर्थत्वेति** । प्रयत्नो हि यद्विषयः तस्योत्पत्त्याद्यर्थमभ्युपगम्यते स चेन्निर्विषयस्तदा तेन साध्यांशाभावाद्व्यर्थ एवायमापद्यत इति भावः । तर्हि इच्छैवोपेयतां किं बुद्ध्येत्यत आह **न चेति** । **तन्निराकरो-तीति** । तद्व्याख्यानं निराकरोतीत्यर्थः । शेषोक्त्या चरमपादं व्याचष्टे **का स्पृहेति** । तत्र हेतुत्वेन प्राक्तनपद्यपादौ व्याचष्टे **कुत इत्यादिना** । **प्रसवं** जगज्जननम् । **विभूतिं** ब्रह्मणो वियदादिरूपेण विविधभवनं मन्यन्त इत्यर्थः । **स्वप्नेति** । स्वाप्नपदार्थगतजाग्रत्त्वस्थौल्यबाह्योपादानकत्वादिकं यथा कल्पितं तथा वा मायाविनिर्मितं गन्धर्वनगरादिकं मायापदगृहीतं यथा मिथ्या तथेश्वरसृष्टं जगदपि मिथ्येति कल्प्यत इत्यर्थः । **विवर्तवादम्** आरोपवादम् । **कालादिति** । एतेन कालादित्युप-लक्षणमिति सूचितम् । विनिश्चिता इति कर्तरि निष्ठान्तं वा भावार्थनिष्ठार्थत्वेऽपि अर्शआद्यच् प्रत्ययान्तं वा । सृष्टाविति च विषयसप्तमीत्युपेत्यार्थमाह **य इति** । राजा राष्ट्रमितिवदभेदोपचार इत्युपेत्याह **इच्छामात्राधीन इति** । इतिपदस्य स्वमतमुच्यत इत्यनेनान्वयः ।' शङ्कते **प्रशंसात्वादेवेति** । पूर्वतन्त्रे अर्थवादानां स्वार्थे तात्पर्यस्यानङ्गीकारादिति भावः । समाधिमाह **पूर्वोत्तरपक्षेति** । विभूतिप्रसवादिपक्षः पूर्वोक्तः साधुर्वा चरमोक्त इच्छामात्राधीनत्वपक्षः साधुर्वेति चिन्तायां पूर्वोत्तररूपपक्षचतुष्टयमध्ये अयं समीचीन इति निर्धारणप्रसङ्गे प्राप्तप्रशंसाया अपीत्यर्थः ।

अन्यथेति । प्रशंसायाः स्वार्थपरत्वाभाव इति वा प्रशंसया चरमपक्षस्याभिमतत्वाभाव इति वार्थः ।

गु०दी०— इच्छावत्त्वस्य प्रमाणसिद्धत्वात् इत्युपलक्षणम् । 'आप्तकामस्ये'ति हेतुगर्भं विशेषणं भगवति ददती श्रुतिः काम्यत इति काम इति व्युत्पत्त्या कामपदोक्तप्रयोजनस्पृहामेव निषेधति न तु स्पृहामात्रमित्यपि द्रष्टव्यम् ।

यादु०— अव्याहतेति । अप्रतिबद्धेत्यर्थः । यदि हि बुद्धिः केनचिद्व्याहता स्यात् तदा परं तन्निवृत्तय इच्छादेरुपयोगो, न चेयं तथेति भावः । **क्रियाशक्तिरिति** । क्रियानुकूला शक्तिर्यस्याः सा क्रियाशक्तिरित्यर्थः । **तस्यैवेति** । 'भावनैव प्रयत्नात्मा सर्वत्राख्यातगोचर' इति वचनादिति भावः । 'एवं च रथो गच्छती'त्यादावाख्यातो गौण एवेति ध्येयम् । **तस्या अपीति** । स्वतो विषयप्रवणतायां च तस्या अपि बुद्धित्वप्रसङ्ग इति भावः । **परिणामवादमिति** । विविधभवनरूपयोगेन विभूतिशब्देन परिणाम उच्यत इति भावः । 'कालात्प्रसूतिं भूतानामि'त्यत्र कालशब्दः कमदिरुपलक्षक इत्याशयेनादिपदम् ।

वं०प०— शङ्कते **इह हीत्यादि** । ईश्वरेच्छाप्रयत्नौ नाङ्गीकारार्हौ । ननु तर्हि सिसृक्षायत्नयोरभावे जगत्सर्जनादिक्रिया न स्यादिति चेन्न । **बुद्ध्यैवोपपत्तेः** । ननु जगत्सर्जनादिक्रियायाः क्रियाशक्तिकार्यत्वात् बुद्धौ च क्रियाशक्तेरभावात् कथं तया सर्वस्य जगत्सर्जनादेरुपपत्तिः अत उक्तम् **ईश्वरस्याव्याहता** कुत्राप्यप्रतिबद्धा बुद्धिरेव क्रियाशक्तिः क्रियाशक्तिमतीति । **तयैव** क्रियाशक्त्युपेतया बुद्ध्यैव । **तस्यैव** यत्नस्यैव । **आख्यातेति** । 'भावेनैव प्रयत्नात्मा सर्वत्राख्यातगोचर' इति वचनात् । 'रथो गच्छती'त्यादौ तु गौण इति भावः । **स च** प्रयत्नः । **नियमार्थमिति** । यत्किञ्चिद्विषयको यत्नो न भवति किन्तु यद्विषयं ज्ञानं तत्रैवेति विषयनियमार्थमित्यर्थः । **असौ** प्रयत्नः । **प्रवणो** अर्थविषयको यत्न इति वर्तते । **प्रसङ्गात्** यत्नस्येति शेषः । **नियम इति** । न ज्ञानेनेति शेषः । तया चेच्छाऽङ्गीकार्येति शेषः । **तस्या अपि** इच्छाया अपि । अन्यथेच्छाया अपि बुद्धित्वप्रसङ्ग इति भावः । **तदर्थम्** इच्छाया विषयनियमार्थम् । 'तद्धेतोरि'ति न्यायादिति भावः । **केचित्** रामानुजाः । **अनया** श्रुत्या । **न चेति** । अर्थवादानां स्वार्थेऽप्रामाण्यादिति भावः । **प्रसङ्ग इति** । नात्र स्तुतिमात्रं प्रसक्तं येनार्थासिद्धिरिति भावः । **अन्यथेति** । यद्यर्थतथात्वाभावेऽपि प्रशंसा क्रियते तर्ह्ययथार्थाः परिणामादिवादा अपि कुतो न प्रशस्यन्ते । तान् अप्रशस्यैतत्प्रशंसनेन ज्ञायते एतत्प्रशंसायाः स्वार्थे तात्पर्यमिति ।

कं०रा०— व्यर्थत्वेति । प्रयत्नस्य निर्विषयत्वे निर्विषयस्य प्रयत्नस्य कार्योत्पत्त्यनुकूलत्वाभावेन तस्य वैयर्थ्यप्रसङ्गादित्यर्थः । **अर्थप्रवण इति** । प्रयत्न इति शेषः । **विभूतिमिति** । अन्ये सृष्टिचिन्तकाः परमात्मनो विभूतिं महदादिरूपेण विविधभवनं प्रसवं सृष्टिं मन्यन्त इत्यनेन परिणामवादः स्वप्नमायास्वरूपेत्यनेन

न विवर्तवादः कालात्प्रसूतिमित्यनेन कालनिमित्तवादश्च मतान्तरत्वेनोक्त इति ध्येयम् । **विशिष्टनिश्चयवन्त इति** । अनेन विनिश्चिता इत्यत्र विशिष्टं निश्चितं निश्चियो ये तु ज्ञानाश्रयत्वादिरूपं तेन ज्ञानवत्वादित्यादेर्न पुनरुक्तिरिति ध्येयम् ।

श्रीनिधि०— विभूतिं प्रसवं त्वन्य इति । महीमहीधराद्यात्मना विविधभवनम् । **प्रसवं** सृष्टिम् । **स्वप्नमायास्वरूपा** स्वाप्नमायासृष्टिस्वरूपा । **मायासृष्टिः** ऐन्द्रजालिकसृष्टिः । **इच्छामात्रम्** । इच्छामात्रात्मं तत्प्राधान्यात् तद्व्यपदेशः ।

शे०वा०— ननु चोत्तरग्रन्थे भगवत इच्छावत्त्वसमर्थनं क्रियते तदनर्थकम् । प्रकृतानुपयोगात् । न च का स्पृहेति श्रुतेरिच्छारूपभगवद्गुणनिषेधार्थत्वपक्षनिराकरणार्थत्वान्न तदिति वाच्यम् । तदनिरासेऽप्यक्षत्या तन्निराकरणस्याप्यानर्थक्यात् । कर्तृत्वान्यथाऽनुपपत्त्या भगवत इच्छावत्त्वस्येश्वरवादिभिरङ्गीकरणीयत्वेनासम्भव-दुक्तिकतया तत्पक्षानुत्थानाच्चेत्यतः स्वाभिमतस्वसम्बन्धिप्रयोजनेच्छामात्रनिषेधकत्वसिद्ध्यर्थत्वान्नानर्थक्यम् । कर्तृत्वस्येच्छामन्तरेणाप्युपपत्त्या का स्पृहेति श्रुतेरिच्छालक्षणगुणनिषेधकत्वपक्षस्य नासम्भवदुक्तिकत्वमपी-त्यभिप्रेत्य तत्पक्षनिरासकतयोत्तरग्रन्थे सङ्गमयितुमिच्छामन्तरेण कर्तृत्वोपपत्तिप्रतिपादनपुरःसरं का स्पृहेति श्रुतेरिच्छालक्षणगुणनिषेधकत्वपक्षमुत्थापयति **इह हीति** । **अव्याहतेति** । अप्रतिबद्धेत्यर्थः । यदि हि केनचित् बुद्धिर्व्याहन्यते तन्निवृत्त्यर्थमिच्छादिकमुपयुज्यत इति व्याहतबुद्धीनां तदपेक्षायामप्यव्याहतबुद्धेरीश्वरस्य न तदपेक्षेति भावः । क्रियाशक्तिः क्रियानुकूला शक्तिर्यस्याः सा तथोक्तेत्यर्थः । **तस्यैवेति** । 'भावनैव प्रयत्नात्मा सर्वत्राख्यातगोचरः' इति वचनादिति भावः । अत एव रथो गच्छतीत्यादावाख्यातो गौण एवेति भावः । **तस्या अपीति** । स्वभावतो विषयप्रवणत्वे च बुद्धित्वप्रसङ्गादिति भावः । नन्विच्छाया बुद्धिवत्स्वतो विषयप्रवण-त्वाभावेऽपि बुद्ध्युपाधिकं विषयत्वप्रवणत्वमस्त्येवेति विषयप्रवणत्वोपपत्तेर्युज्यत एवेच्छयाऽपि जडप्रयत्नस्य विषयनियमः । विषयप्रवणतामात्रस्यैव विषयनियामकतायां प्रयोजकत्वेन स्वतो विषयप्रवणत्वस्य गौरवेणा-प्रयोजकत्वादित्यत आह **तदर्थं चेति** । **तथैवेति** । लाघवादावश्यकत्वाच्चेति भावः । का स्पृहेति श्रुतेरिच्छालक्षणगुणनिषेधकत्वाभावस्य भाष्यारूढत्वसिद्ध्यर्थमपेक्षिताध्याहारेण निषेधकत्वाभावप्रतिपादना-दिच्छामात्रमित्यादिना तस्य प्रामाणिकत्ववर्णनमनर्थकमित्याशङ्क्य नेच्छामात्रं निषिध्यत इति प्रतिज्ञायां हेतुभूतस्येच्छाप्रामाणिकत्वस्योपदर्शनार्थत्वान्नानर्थक्यमित्यभिप्रेत्य हेतोरुपदर्शकतया तद्योजयितुमुक्तप्रतिज्ञायां हेत्वाकाङ्क्षोत्थापनपूर्वकं तद्धेतुं दर्शयति **कुत इत्यादिना** । **परिणामवादमिति** । विचित्रभवनरूपपरिणामस्य श्रुतौ विभूतिपदेनोक्तत्वादिति भावः । **विवर्तवादमिति** । श्रुतौ जगत्सृष्टेः स्वप्नमायासरूपत्वाभिधानेन ब्रह्म-विवर्तत्वाभिधानादिति भावः । कालादीत्यादिपदेन रुद्रादिपरिग्रहः । **अन्यमतेनोक्तत्वमिति** । आद्यवाक्येऽन्य इति द्वितीयवाक्येऽन्यैरिति श्रवणादिति भावः । नन्वत्रेच्छामात्रं सृष्टिरित्येतावदुच्यते न पुनः प्रागनुक्रान्त-पक्षोपमर्दने कश्चित्स्वपक्ष इति कथमस्य स्वपक्षाभिधायकत्वमित्यतस्तत्प्रदर्शनपरतया व्याचष्टे **य इत्यादिना** ।

प्रशंसयेश्वरस्येच्छावत्त्वावगमः कथमित्यतः तदन्यथाऽनुपपत्तेरित्यभिप्रेत्य तां दर्शयति **यदीति** । **न चेति** । प्रशंसायामधिकोक्तेरपि दर्शनादन्यथा तस्यापि सिद्धिप्रसङ्गादिति भावः । यद्वा ननु 'कामस्तदग्रे' इत्याद्युदाहरिष्यमाणवाक्यानामिवेच्छामात्रमित्यस्यापि श्रुतित्वात् 'इति श्रुत्ये'त्येव वक्तव्यं 'तथा प्रशंसये'त्युक्तौ किं निमित्तं कुतश्च श्रुतिभ्यः पृथक्करणमित्यत एतच्छ्रुत्युक्तान्यथाऽनुपपत्त्येच्छासिद्ध्या अस्याः श्रुतितया तदर्थागमकत्वात् प्रशंसाग्रहणं पृथक्करणं च सार्थकमित्यभिप्रेत्यान्यथाऽनुपपत्त्या तदवगतिमुपपादयति **यदीत्यादिना** । **प्रशंसात्वादिति** । अयथार्थत्वादित्यर्थः । प्रशंसायामधिकोक्तेरपि दर्शनादिति भावः । **याथार्थ्येति** । तथा च प्रशंसामात्रस्य याथार्थ्याभावेऽप्युक्तरूपप्रशंसाया याथार्थ्यान्नार्थासिद्धिरिति भावः । **अन्यथेति** । अयथार्थत्वविशेषादिति भावः ।

वा०र०— आद्यवाक्य इति । उपलक्षणं चैतत् । तृतीये कालचिन्तकाः इति श्रवणात् इत्यपि बोध्यम् । **तदन्यथानुपपत्तेरिति** । ईश्वरस्य इच्छावत्वावगम इति वर्तते । प्रशंसान्यथानुपपत्त्योक्तावगम इत्यर्थः । **तस्यापीति** । बुद्ध्या विवेकेनाधिकं तस्येत्यनेन परामर्शति । अनेन प्रशंसापदं तदन्यथानुपपत्तिपरमिति व्याख्यातं भवति । एतद्योजनायां प्रशंसापदप्रयोगभाष्यकारीये नोपपादितो भवतीति अपरितोषात् तत्पदप्रयोगनिमित्तकथनपरतया यदीत्यादिमूलं योजयति **यद्वेति** । **श्रुत्युक्तेति** । श्रुत्युक्तस्य भगवदिच्छाधीनतां सृष्टेर्मन्यमानानां विशिष्टनिश्चयत्वस्य अनन्यथानुपपत्त्येत्यर्थः । **अस्या इति** । अस्येति प्रकृतवाक्यस्यापि श्रुतत्वादिति पूर्वोक्त्यनुसारेणास्या इति श्रुतित्वविवक्षया स्त्रीलिङ्गेन परामर्शः । श्रुतित्वेन प्रतीयमानवाक्यस्येति यावत् । **तदर्थेति** । स चासौ अर्थश्चेति तदर्थः । ईश्वरेच्छावत्वरूप इति योज्यम् । **पृथक्करणं चेति** । काम इत्यादिवाक्यानाम् । श्रुतित्वेनार्थावगमकत्वे वैषम्यादिति भावः । प्रशंसायाः अविद्यमानगुणकथनरूपतया प्रशंसात्वेनायथार्थत्वलाभः इत्याशयेन व्याचष्टे **अयथार्थत्वादित्यर्थ इति** । प्रागुक्तमेव स्मारयति **प्रशंसायामिति** ।

स०व्र०— तस्यैवेति । रथो गच्छतीत्यादौ आख्यातो गौण इति भावः । **तस्या अपीति** । अन्यथा इच्छाया अपि बुद्धित्वप्रसङ्गादिति भावः ।

विठ्ठल०— इदानीमुत्तरवाक्यमवतारयितुं ईश्वरस्य स्पृहामात्रमेव नाङ्गीकार्यमिति शङ्कते **इह हीत्यादिना** । **अव्याहता** अप्रतिबद्धा बुद्धिरेव **क्रियाशक्तिः** कर्तृत्वम् । **इच्छाप्रयत्नेति** । इच्छाप्रयत्नरूपकल्पनयेत्यर्थः । अथ प्रत्यत्नमभ्युपैति **यद्वेति** । 'भावेनैव प्रयत्नात्मा सर्वत्राख्यातगोचरः' इति वचनादिति भावः । **आख्यातार्थतयेति** । तिङ्पदार्थतयेत्यर्थः । लः कर्मणि च भावे चाकर्मकेभ्य इत्यत्र चकारेण कर्तरिविहितलकारादेशस्य तिङ्स्वरूपाख्यातार्थतया निर्णीतत्वादित्यर्थः । तर्हि प्रयत्नमात्रकर्तृत्वमस्तु बुद्धिरपि किमर्थमङ्गीकार्येत्यत आह **स चेति** । **विषयनियमार्थमिति** । यद्विषया बुद्धिस्तद्विषयः प्रयत्न इति नियमार्थमित्यर्थः । कुत एवं घटादिवन्निर्विषयत्वेन वा स्वभावत एव विषयप्रवणतयोपपत्तिरस्त्वित्यत आह

न हीति । कालादिनिमित्तवादमित्यत्र आदिशब्देन कर्मादिपरिग्रहः । **कालात्प्रसूतिमिति** । श्रुतिगत-कालशब्दस्य कर्माद्युपलक्षकत्वादिति ध्येयम् । **न च प्रशंसात्वादेवेति** । प्रशंसाया रोचनार्थकत्वादिति भाव इत्याहुः । **प्रशंसाया अपीति** । अर्थवादस्य तात्पर्यलिङ्गत्वादिति भावः ।

॥ इति 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरमपव्याख्यानम् ॥
॥ इति तदपव्याख्यानस्य चतुर्विधे निरासे प्रशंसान्यथानुपपत्त्या प्रथमस्य तन्निरासः ॥

* * *

॥ अथ तदपव्याख्यानस्य चतुर्विधे निरासे कामश्रुतिभ्यश्च द्वितीयस्तन्निरासः ॥

१३२ सु०—

अनु०— कामश्रुतिभ्यश्चैव

न केवलं श्रुतार्थानुपपत्त्या । अपि तर्हि 'कामस्तदग्रे समवर्तताधि', 'सोऽकामयते'-त्यादिभ्यो भगवतः **कामप्रतिपादकश्रुतिभ्यश्च** इच्छा अवगम्यते । **एवशब्दः** श्रुतीना-मर्थापत्तितः प्राबल्यसूचकः । इच्छाकामशब्दयोर्ज्ञानप्रयत्नोपलक्षणत्वस्य सम्भवान्नार्था-पत्तिश्रुतिभ्यामिच्छासिद्धिरिति चेन्न, मुख्ये बाधकाभावात् ।

परि०— कामश्रुतिभ्यश्चेत्येतद्व्याचष्टे **न केवलमिति** ।

वं०प०— कामश्रुतिभ्य इत्येतद्विवृणोति **न केवलमित्यादिना** । **श्रौतान्यथाऽनुपपत्त्येति** । श्रुत्युक्तप्रशंसान्यथानुपपत्त्येत्यर्थः । **अर्थापत्तितः** पूर्वोक्तप्रशंसारूपार्थापत्तितः । **मुख्ये** इच्छारूपार्थे ।

श्रीनिधि०— **प्राबल्यसूचक इति** । अवधारणेन किञ्चिद् व्यावर्त्यते । तत्र धर्मिण एव व्यावृत्तिर्वा धर्ममात्रस्यैवेति सन्दिह्यते । नाद्यस्य युक्तित इति विरोधात् । तस्मात्तद्गतप्राबल्यस्यैव व्यावृत्तिरिति भावः ।

शे०वा०— भाष्ये उक्तसमुच्चयार्थः कामश्रुतिभ्यश्चेति चशब्द इत्यभिप्रेत्य तत्प्रदर्शनपूर्वकं कामश्रुतेर्विशिष्यानुदाहरणात् काः कामश्रुतय इत्याशङ्कां च परिहरन् ज्ञापकहेत्वनुगुणतयाऽपेक्षितं पूरयति नेति । ननु कामश्रुतिभ्य एवेत्येवशब्देन कामश्रुतीतरप्रमाणनिरासोक्तेः कथं तत्समुच्चयार्थतया च शब्द-व्याख्यानमित्यतोऽर्थान्तरपरत्वेनैवशब्दस्य तद्व्यावर्तकत्वाभावस्य तद्विरोध इति भावेनैवशब्दस्य तदविरुद्ध-

मर्थान्तरमाह **एवेति** । भाष्यकारीययुक्त्युपन्यासस्यानर्थक्यमाशङ्क्यार्थापत्तिश्रुत्योः सावकाशत्वेनेच्छासाधनत्वासम्भवेन । तत्साधनार्थत्वान्न तदिति भावेन तयोः सावकाशत्वशङ्कां तावदुत्थापयति **इच्छेति** । सावकाशत्वशङ्कां स्वयं प्रकारान्तरेण परिहरति **मुख्य इति** ।

वा०र०— **ज्ञापकेति** । मध्ये अस्योक्त्या प्रशंसया इत्यादिपूर्वोत्तरस्थलयोरपि एवं ज्ञातव्यमिति सूचयति **अर्थान्तरमिति** । अव्ययानामनेकार्थत्वादिति भावः । अविरुद्धमित्यनेन विरुद्धार्थकतयोरेकत्रान्वयं परित्यज्य भिन्नक्रमतयान्वयं स्थलान्तरे स्वीक्रियते नैवं प्रकृतोऽस्ति । अर्थान्तरस्याविरुद्धत्वेन उभयोरेकत्र एव सम्बन्धसम्भवादिति सूचितमिति ज्ञेयम् ।

॥ इति तदपव्याख्यानस्य चतुर्विधे निरासे कामश्रुतिभ्यश्च द्वितीयस्तन्निरासः ॥

* * *

॥ अथ तदपव्याख्यानस्य चतुर्विधे निरासे युक्तितस्तृतीयस्तन्निरासः ॥

१३३ **सु०—**

अनु०— **युक्तितः ।**

मा वा सैत्सीदिच्छाऽर्थापत्तिश्रुतिभ्यां, युक्तितस्तावत्सेत्स्यति । तथा हि । ईश्वर इच्छावान् आत्मत्वात् यज्ञदत्तवत् । न च मुक्तादौ व्यभिचारः, तत्रापि तस्याः साधयिष्यमाणत्वात्; ज्ञानवत्त्वात्, प्रयत्नवत्त्वात्, कर्तृत्वाद्वा ।

ईश्वरज्ञानं वेच्छासमानाश्रयं ज्ञानत्वादस्मदादिज्ञानवत् । एवं तत्प्रयत्नमपि पक्षीकृत्य प्रयोक्तव्यम् ।

यद्वा क्षित्यादिकमिच्छावज्जन्यं कार्यत्वाद्घटवत् ।

परि०— अभ्युपेत्याह **मा वा सैत्सीदिति** । नैव सिध्यत्विच्छेत्यर्थः । **साधयिष्यमाणत्वादिति** । 'कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि । इति यल्लक्षणे मुक्तेः श्रुतिराह बलीयसी'त्यादिना तृतीयाध्यायान्त्यपादे । तथा 'अव्यक्तिरेव कामानां न नाशो मोहसुप्तयोरि'ति मूर्छितसुप्तयोरपि तत्रैव पादे साधयिष्यमाणत्वादित्यर्थः ।

यादु०— मुक्तादाविति । आदिपदेन सुप्तमुग्धयोर्ग्रहणम् । **साधयिष्यमाणत्वादिति** । 'कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि । इति यल्लक्षणं मुक्तेः श्रुतिराह बलीयसी'त्यादिना मुक्तेऽपि 'अव्यक्तिरेव कामानां न नाशो मोहसुप्तयोरि'त्यादिना सुप्तादावपि तस्य साधयिष्यमाणत्वादित्यर्थः ।

वं०प०— युक्तिं इत्येतद्विशदयति **मा वेति** । **मा सैत्सीत्** सिद्धा मा भवत्वित्यर्थः । ईश्वर इच्छावानित्यत्र हेत्वन्तरमाह **ज्ञानवत्त्वादित्यादिना** । **प्रयत्नमपीति** । ईश्वरप्रयत्न इच्छासमानाश्रयः प्रयत्नत्वादस्मदादिप्रयत्नवदिति ।

कं०रा०— कर्तृत्वादिति । यद्यपीच्छाप्रयत्नादिरूपा प्रवृत्तिरेव कर्तृत्वमिति प्रागुक्तं यत्कर्तृत्वं तद्विवक्षायां सन्दिग्धसिद्धिः प्रयत्नमात्रविवक्षायां तु प्रयत्नवत्वादित्यनेन पुनरुक्तिस्तथाप्युपादानगोचरकृतिमत्वं कर्तृत्वमिह विवक्षितं तत्र चाखण्डोपाधौ न वैयर्थ्यमिति द्रष्टव्यम् । यदीश्वरस्येच्छा न स्यादिति यथा चेश्वरेच्छाविरहे तस्मिन्सर्वविदानां महातात्पर्यासम्भवस्तथानुपदं स्पष्टीकरिष्यति । **इच्छेति** । प्रयत्नमात्रेणेश्वरस्य कर्तृत्वनिर्वाहादिच्छा निष्प्रयोजनेति भावः ।

शे०वा०— तर्ह्यर्थापत्तिश्रुतिभ्यामेवेश्वरस्येच्छावत्त्वसिद्धेर्भाष्यकारीययुक्त्युपन्यासानर्थक्यमित्यतोऽस्य तत्सावकाशत्वाभ्युपगमेन प्रवृत्तत्वान्नानुपपत्तिरिति भावेन तथा भाष्यं योजयति **मा वेति** । मुक्तादावित्यादिपदेन सुप्तमुग्धयोः परिग्रहः । **साधयिष्यमाणत्वादिति** । 'कामस्य यत्राप्ताः कामाः' इत्यादिना 'अव्यक्तिरेव कामानां न नाशो मोहसुप्तयोरि'त्यादिना तृतीयस्य चतुर्थ इति शेषः ।

स०न्न०— साधयिष्यमाणत्वादिति । तृतीयस्य चतुर्थे इति शेषः ।

स०ना०— इच्छामात्रं प्रभोः सृष्टिरिति मूलसुधायां **न च मुक्तादौ व्यभिचार इति** । मुक्तानां आदिः मुक्तादिः महालक्ष्मीः तत्र व्यभिचार इत्यर्थः । एतेन मुक्त्यवस्थायां साध्याभावेऽपि प्राक् तत्र साध्यसत्त्वान्न व्यभिचार इति परास्तम् ।

विठ्ठल०— मा वा सैत्सीदिति । मा सिध्यतु वेत्यर्थः । **मुक्तादावित्यत्रादिशब्देन** सुप्तमुग्धं ग्रहणं **साधयिष्यमाणत्वादिति** । 'इति यल्लक्षमुक्तेः श्रुतिराह बलीयसी'त्यादिना । मुक्तौ 'अव्यक्तिरेव कामानां न नाशो मोहसुप्तयोरि'त्यादिना सुप्तादावपि तस्य साधयिष्यमाणत्वादिति भावः । **ज्ञानवत्त्वादिति** । न चात्मत्वादित्यनेन पुनरुक्तिः तत्रात्मत्वजातिरूपस्यैव विवक्षितत्वादिति ज्ञेयम् ।

१३४ **सु०— नन्वेवं दुःखादिकमपि साधयितुं शक्यमिति चेत् तत्किमतिप्रसङ्गभीरुणा क्षित्यादेर्बुद्धिमत्कारणकत्वानुमानमपि त्यक्ष्यते । दुःखादिसाधने बाधोऽस्ति न बुद्धिसाधन इति चेत्, समं प्रकृतेऽपि ।**

वं०प०— एवम् एतादृशानुमानेन यदीच्छा साध्यते तर्हि । **शक्यमिति** । क्षित्यादिकं दुःखवज्जन्यं कार्यत्वात् घटवदित्यनुमानेनेत्यर्थः । **त्यक्ष्यत इति** । तत्रापि क्षित्यादिकं **बुद्धिमज्जन्यं** कार्यत्वादित्यनुमानमपि क्षित्यादिकं दुःखादिमज्जन्यमित्यपि साधयितुं शक्यत्वेनातिप्रसक्तित्वात् त्याज्यं स्यादित्यर्थः ।

श्रीनिधि०— तत्किमतिप्रसङ्गभीरुणेति । त्वदुक्तरीत्यैव बुद्धिमत्कारणत्वानुमानेऽपि विमतं दुःखिजन्यं बुद्धिमज्जन्यत्वात् घटवत् इत्यप्यनुमातुं शक्यत्वादिति भावः । अविदिताशयः शङ्कते **दुःखादिसाधन इति** । उदासीनस्य इच्छादिव्यापाररहितस्य । परोपाधिकं विषयप्रवणत्वं तयोरिति बहुव्रीहिः लोक इति भावः । ईश्वरेच्छाया प्रतिपन्नत्वात् **बुद्धेरपि परतो विषयप्रवणतापत्तेरिति** । विषयप्रवणत्वं ज्ञानस्वरूपत्वं तच्चेद् उत्पद्येत । तदा विषयप्रवणत्वमपि कारणाधीनमिति परतः स्यादित्यर्थः ।

शे०वा०— साधयितुं शक्यमिति । क्षित्यादिकं दुःखादिमज्जन्यं कार्यत्वात् घटवदित्यपि प्रयोगसम्भवादिति भावः । **अतिप्रसङ्गभीरुणेति** । क्षित्यादेरिच्छादिमज्जन्यत्व इव बुद्धिमज्जन्यत्वेऽपि क्षित्यादिकं दुःखवज्जन्यं कार्यत्वादिति त्वदुक्तातिप्रसङ्गस्य तुल्यत्वेनातिप्रसङ्गपरिहाराय तत्साधनत्यागे बुद्ध्यादिमज्जन्यत्वसाधनस्यापि परित्यागप्रसङ्गादिति भावः । ननु दुःखादिमज्जन्यत्वसाधने बाधेऽपि बुद्धिमज्जन्यत्वसाधने तदभावेन बाधाबाधकृतवैषम्यान्न कार्यत्वेन बुद्धिमज्जन्यत्वसाधने दुःखादिमज्जन्यत्वसाधनस्यापि प्रसङ्ग इति शङ्कते **दुःखादीति** । तर्हि दुःखादिमज्जन्यत्वसाधने बाधेऽपीच्छावज्जन्यत्वसाधने तदभावेन बाधाबाधकृतवैषम्यादेवेच्छादिमज्जन्यत्वसाधने न दुःखादिमज्जन्यत्वस्यापि साधनप्रसङ्ग इति सममेवेत्याह **सममिति** ।

वा०र०— स्वयमिति । अनेनाभ्युपगमो वक्ष्यमाणोपपादितः **क्षित्यादेरित्यारभ्य सममेवेत्याहत्यन्तम्** । अत्र इच्छानङ्गीकारीच्छाप्रयत्नानङ्गीकारवत् द्वावपि अतिप्रसङ्गशङ्कितारौ तदनुसारेण इच्छादि इत्यादिपदं बुद्धिप्रयत्नावङ्गीकृत्य इच्छामात्रमनङ्गीकुर्वाणं प्रत्यपि बुद्धिमज्जन्यत्वेऽतिप्रसङ्गमात्रोक्त्यैव इष्टसिद्धेः प्रयत्नपदानुपादानम् । अत एव बुद्ध्यादिमज्जन्यत्वस्यापीत्यादिपदम् । तत्र च बुद्धिमज्जन्यत्वस्य बुद्धिप्रयत्नवज्जन्यत्वस्य इति उभयमपि ग्राह्यम् । पूर्वत्राप्येवम् । बुद्धिमज्जन्यत्वसाधने इत्येतत् उभयानङ्गीकारिणं प्रति यथास्थितमेव । एकानङ्गीकारिणं प्रति तु प्रागुक्तरीत्या प्रयत्नपदानुपादानं बोध्यम् । इच्छावज्जन्यत्वसाधने इत्येतत् उभयानङ्गीकारिणं उपलक्षणया व्याख्येयम् । उभयाङ्गीकारिणं प्रति तु यथास्थितमेव इच्छादिमज्जन्यसाधने इत्येतदपि उभयवादिनौ प्रति एकोभयपरतया योज्यम् । सङ्ख्यादयपञ्चप्रयत्नश्चेति षड्गुणवान् ईश्वरः इति वैशेषिकाधिकरणीयमूलोक्तमतान्तरानुसारि ।

॥ इति तदपव्याख्यानस्य चतुर्विधे निरासे युक्तितस्तृतीयस्तन्निरासः ॥

* * *

॥ अथ तदपव्याख्यानस्य चतुर्विधे निरासे महातात्पर्ययुक्तेश्च चतुर्थस्तन्निरासः ॥

१३५ सु०—

अनु०— महातात्पर्ययुक्तेश्च

नन्वीश्वरस्य इच्छाभावे बाधकाभावादप्रयोजकत्वमनुमानानामिति । मैवम् । **महातात्पर्ययुक्तेश्च** । 'यदीश्वरस्य इच्छा न स्यात् तदा तस्मिन्सर्ववेदानां (वेदान्तानां) महातात्पर्यं न स्यादि'ति बाधकसद्भावात् । इच्छा निष्प्रयोजनेति चेत्, स्यादेवं यदि प्रयोजनमनुरुध्य कल्प्यते । अन्यतः सिद्धेऽर्थे किं प्रयोजनगवेषणया ।

परि०— यदीति । अयं च तर्कोऽग्रे व्याप्त्याद्युपपादनेन विवरिष्यते । बुद्ध्यैव सर्वकार्यसिद्धाविच्छाङ्गीकारो व्यर्थ इति शङ्कते **इच्छेति** । प्रमेयाङ्गीकारो न प्रयोजनानुरोधेन किन्तु प्रमाणबलेन । तच्चात्र इच्छावत्त्वे प्रागुक्तमिति भावः । **अन्यतः** प्रमाणतः ।

वं०प०— सममिति । दुःखादिसाधने बाधोऽस्ति नेच्छाया साधन इत्यर्थः । **निष्प्रयोजना** अतो नाङ्गीकार्येत्यर्थः । **कल्प्यते** इच्छेति शेषः । तर्ह्येव निष्प्रयोजनत्वादिच्छा नाङ्गीकार्या स्यादित्यर्थः । **अन्यत इति** । उक्तार्थापत्तिकामश्रुतियुक्तिमहातात्पर्येभ्य इच्छारूपेऽर्थे सिद्धे सति ।

शे०वा०— मूले महातात्पर्ययुक्त्युपन्यासस्यानर्थक्यमाशङ्क्येच्छावत्त्वसाधकानुमानेष्वप्रयोजकताशङ्कापरिहाराय विपक्षे बाधकोपन्यासार्थत्वान्न तदिति भावेन तच्छङ्कानिवर्तकतयोत्तरमूलं योजयितुमप्रयोजकत्वशङ्कामुत्थापयति **नन्विति** । **निष्प्रयोजनेति चेदिति** । बुद्धिप्रयत्नाभ्यामेवोक्तरीत्या कर्तृत्वनिर्वाहादिति भावः ।

विठ्ठल०— अन्यतः सिद्धेऽर्थ इति । प्रमाणान्तरेणैव वस्तुनि सिद्धे प्रयोजनान्वेषणाभावेन प्रयोजनानुसारेणार्थकल्पनमित्यस्याभावात् प्रयोजनशून्यत्वेऽपि प्रमाणमात्रेणेच्छा भवत्विति भावः ।

॥ इति तदपव्याख्यानस्य चतुर्विधे निरासे महातात्पर्ययुक्तेश्च चतुर्थस्तन्निरासः ॥

॥ इति तदपव्याख्यानस्य चतुर्विधो निरासः ॥

* * *

॥ अथ च तत्रान्ते तदूषणोक्तेर्विवरणम् ॥
॥ अथ तत्रादौ इच्छेतरस्यापि निषेध्यत्वम् ॥

१३६ सु०—

अनु०— नेच्छामात्रं निषिध्यते ।

किञ्चैवं सति बुद्धिरपि नाङ्गीकरणीया, स्वरूपसामर्थ्येनैवेश्वरस्य कर्तृत्वोपपत्तेः । लोकवैरूप्यमिति चेत् । तत्किमुदासीनस्य बोद्धुः कर्तृत्वमुपलब्धं लोके, येनानिच्छतोऽपि तदीश्वरस्याङ्गीक्रियते । प्रयत्नवत एव वा कर्तृत्वं भविष्यति, तस्य विषयनियमार्थं बुद्धिरेष्टव्येति चेन्न; बुद्धिवत्स्वतो विषयप्रवणतोपपत्तेः । तथात्वे बुद्धितो भेदो न स्यादिति चेन्न, बुद्धित्वादिनैव तदुपपत्तेः; अन्यथा परोपाधिकविषयप्रवणत्वयोरिच्छाप्रयत्नयोरपि भेदो न स्यात् ।

विषयनियमार्थमिति च कोऽर्थः । किं विषयविशेषसम्बद्धतयोत्पाद(न)ार्थम्, उतोत्पन्नस्य स्थितस्यैव वा तत्सम्बन्धार्थम्, अथ तज्ज्ञानार्थम् । नाद्यः, अनादित्वात् । सादित्वेऽपि क(ा)रणसापेक्ष(त)या बुद्धेरपि परतो विषयप्रवणतापत्तेः । न द्वितीयः, पौर्वापर्याभावात्; न हि प्रयत्नः उत्पद्य स्थित्वा वा पश्चाद्विषयेण सम्बध्यते । न तृतीयः, स्वरूपग्राहकप्रमाणेनैव तद्ग्रहणात्, बुद्धेरपि परापेक्षाप्रसङ्गाच्चेति ।

परि०— उदासीनस्येति । अनिच्छत इत्यर्थः । निष्फलत्वेनेच्छानिरासे बुद्धिप्रयत्नौ द्वावपि न स्यातामिति आपादितम् । अधुना प्रयत्नमुपेत्य बुद्धिं निराह **प्रयत्नवत एवेति** । परोपाधिकेति बहुव्रीहिः । बुद्ध्यधीनविषयप्रवणत्वयोरित्यर्थः । **तज्ज्ञानार्थमिति** । विषयविशेषालिङ्गितत्वेन ज्ञानार्थम् । **बुद्धेरपीति** । इच्छाप्रयत्नतुल्यन्यायत्वादिति भावः ।

यादु०— उदासीनस्येति । इच्छाशून्यस्येत्यर्थः । बुद्धित्वादिनेत्यत्रादिपदेन प्रयत्नत्वसङ्ग्रहः । **पौर्वापर्याभावादिति** । प्रयत्नविषयसम्बन्धयोरित्यर्थः । **तज्ज्ञानार्थमिति** । विषयविशेषसम्बद्धतया प्रयत्नज्ञानार्थं बुद्धिर्विषयप्रत्यासत्तितयाऽङ्गीकार्येति भावः । **स्वरूपग्राहकेति** । प्रयत्नस्यैव तत्प्रत्यासत्तिता भविष्यतीति भावः । न च ज्ञानस्यैव प्रत्यासत्तित्वं न प्रयत्नस्येति वाच्यम् । ज्ञानस्य हि न ज्ञानत्वेन प्रत्यासत्तिता निर्विकल्पकेऽतिप्रसङ्गात् । किन्तु विशिष्टविषयकज्ञानत्वेनेति वाच्यम् । तत्र लाघवाद्विशिष्ट-

विषयकत्वमेव प्रत्यासत्तितावच्छेदकमस्तु । एवं च प्रयत्नादेरप्युपनायकत्वोपपत्तिरित्याशयात् । **बुद्धेरपीति** । अन्यथेति शेषः । सविषयकस्यापि प्रयत्नस्याप्रत्यासत्तित्वेन विषयसम्बद्धतया तज्ज्ञानार्थं बुद्ध्यपेक्षायां बुद्धेरप्यप्रत्यासत्तित्वप्रसङ्गेन विषयसम्बद्धत्वेन ज्ञानायान्यस्योपनायकस्यापेक्षाप्रसङ्गादित्यर्थः ।

वं०प०— एवं सति इच्छानङ्गीकारे । कर्तृत्वान्यथाऽनुपपत्त्या बुद्धिरङ्गीकार्येति चेत् तत्राह **स्वरूपेति** । **लोकेति** । बुद्धिशून्यस्य केवलं स्वरूपसामर्थ्यमात्रवतः कर्तृत्वं नोपलब्धमित्यर्थः । **उदासीनस्य** इच्छाशून्यस्य । **अनिच्छतः** इच्छाशून्यस्यापीति यावत् । **तत्** कर्तृत्वं भविष्यति । तथा च बुद्धिर्माऽस्त्वित्यर्थः । शङ्कते **तस्येति** । प्रयत्नस्येत्यर्थः । **उपपत्तेः** प्रयत्नस्य । **तथात्वे** । स्वतो विषयप्रवणत्वे । **न स्यादिति** । स्वतो विषयप्रवणत्वस्यैव बुद्धित्वादिति भावः । स्वतो विषयप्रवणत्वेन ज्ञानप्रयत्नयोः साम्येऽपि बुद्धित्वप्रयत्नत्वरूपजातिभेदेनैव भेदोपपत्तेरित्याह **बुद्धिस्त्विति** । **अन्यथा** एवं बुद्धित्वादिना भेदाकल्पने । **परेति** । ज्ञानेत्यर्थः । **न स्यात्** तथा च परोपाधिकविषयप्रवणत्वेन साम्येऽपीच्छात्वप्रयत्नत्वरूपजातिभेदेनैव भेदो वाच्यः । तत् समं प्रकृतेऽपीति । **नियमार्थं** बुद्धिरङ्गीकार्येति शेषः । **तदिति** । विषयेत्यर्थः । **तदिति** । विषयसम्बद्धत्वेन ज्ञानार्थमित्यर्थः । **अनादित्वात्** ईश्वरप्रयत्नस्येति शेषः । **सादित्वेऽपीति** । यदीश्वरप्रयत्नस्यापि सादित्वमङ्गीकृत्य तस्य सादिनः कारणसापेक्षत्वनियमात्, विषयसम्बद्धत्वेनोत्पादाय कारणीभूता बुद्धिरवश्यमङ्गीकार्येति यद्युच्यते तर्हीश्वरगुणत्वाविशेषाद्बुद्धेरपि सादित्वं स्यात् । तथा च सादिभूतायास्तस्या बुद्धेः कारणसापेक्षत्वाद्विषयसम्बद्धत्वेनोत्पादाय सन्निकर्षादि किञ्चित्कारणमङ्गीकार्यं स्यात् ततश्च प्रयत्नवत् बुद्धेरपि परतो विषयप्रवणता स्यादित्यर्थः । **स्वरूपेति** । तथा च प्रयत्नो येन प्रमाणेन साक्षिणा गृह्यते तेन विषयसम्बद्धत्वेनैव ग्रहणात् । तथा च तस्य विषयसम्बद्धत्वेन ज्ञानपूर्वविषयनियमार्थं बुद्धिर्नाङ्गीकार्येत्यर्थः । प्रयत्नस्य विषयसम्बद्धतया ज्ञानार्थं बुद्ध्यङ्गीकारे बुद्धेरपि विषयसम्बद्धत्वेन ज्ञानाय परापेक्षा स्यात् । तत्र स्वरूपग्राहकप्रमाणेन साक्षिणा तद्ग्रहणाङ्गीकारे प्रयत्नेऽपि तुल्यमित्याशयेनाह **परेति** ।

कं०रा०— किञ्चैवमिति । प्रकारान्तरेण कर्तृत्वनिर्वाहादीश्वरस्येच्छाया अनङ्गीकारबुद्धिरपि नाङ्गीकरणीया । अपिशब्दात्प्रयत्नोऽपि स्वरूपसामर्थ्येनैवेश्वरस्य कर्तृत्वोपपत्तिरित्यर्थः । स्वरूपसामर्थ्येनैवेश्वरस्य कर्तृत्वाङ्गीकारे उपादानगोचरापरोक्षज्ञानवत एव लोके कर्तृत्वदर्शनाल्लोकवैलक्षण्यं स्यादिति शङ्कते **लोकेति** । **तज्ज्ञापनार्थमिति** । विषयविशेषसम्बन्धज्ञापनार्थमित्यर्थः । **अनादित्वादिति** । ईश्वरप्रयत्नस्यानादित्वेन विषयविशेषसम्बन्धतयोत्पादस्यैवाभावान्न तदर्थं बुद्धिरेष्टव्येति भावः । **सादित्वेऽपीति** । ईश्वरप्रयत्नसादित्वेऽपि तस्य विषयविशेषसम्बन्धतयोत्पादार्थं बुद्धिसापेक्षत्वेन परतो विषयप्रावण्ये लोके बुद्धेरपि विषयविशेषसम्बन्धतयोत्पादार्थं तत्सन्निकृष्टकरणसापेक्षतया परतो विषयप्रवणतापत्तेरित्यर्थः । प्रयत्नतद्विषयसम्बन्धयोः पौर्वापर्याभावमेव दर्शयति **न हीति** । **स्वरूपेति** । प्रयत्ननिष्ठाविषयसम्बन्धस्य प्रयत्नस्वरूपग्राहकेणैव ग्रहणान्नैत-

ज्ज्ञानार्थमन्यापेक्षेति भावः । **बुद्धेरपीति** । स्वविषयके विषयसम्बन्धस्य तद्ग्राहकेणैवाग्राह्यत्वे बुद्धेरपि विषयसम्बन्धग्रहणायान्यापेक्षाप्रसङ्गादित्यर्थः ।

शे०वा०— लोके बुद्धिमत एव कर्तृत्वदर्शनात् तद्रहितस्य कर्तृत्वं लोकविरुद्धमिति शङ्कते **लोकेति** । तर्हीच्छावत एव लोके कर्तृत्वदर्शनात् तद्रहितस्य कर्तृत्वेऽपि लोकवैरूप्यमित्याह **तत्किमिति** । **उदासीनस्येति** । इच्छारहितस्येत्यर्थः । **प्रयत्नवत एवेति** । तस्यैवाख्यातार्थत्वेन निर्णीतत्वादिति भावः । एवञ्च न बुद्ध्याऽपि प्रयोजनमिति हृदयम् । **तथात्व इति** । स्वतो विषयप्रवणत्व इत्यर्थः । बुद्धेरेव स्वभावतोऽर्थप्रवणत्वादिति भावः । न स्वतोऽर्थप्रवणत्वेऽपि प्रयत्नस्य बुद्ध्यभेदः प्रसज्यते । बुद्धित्व-प्रयत्नत्वरूपजातिभेदेनैव तद्भेदोपपत्तेरिति परिहरति **न बुद्धित्वादिनेति** । उक्तजातिभेदस्यैव तत्प्रयोजकत्वं परेणाप्यङ्गीकारयितुं विपक्षे बाधकमाह **अन्यथेति** । **परेति** । परोपाधिकं विषयप्रवणत्वं ययोरिति बहुव्रीहिः । स्वभावतो विषयप्रवणत्वरहितयोरित्यर्थः । स्वभावतो विषयप्रवणत्वे प्रयत्नस्य तत्स्वभावकबुद्ध्यभेदप्रसक्त्या तदनभ्युपगमे परोपाधिकविषयप्रवणत्वे तत्स्वभावकेच्छाऽभेदप्रसक्त्या परोपाधिकविषयप्रवणत्वस्याप्यनभ्युप-गन्तव्यत्वापत्त्या तदङ्गीकुर्वता परोपाधिकविषयप्रवणत्वेऽपीच्छात्वप्रयत्नत्वरूपजातिभेदेनैव तद्भेदस्य वाच्यतया तेनैव न्यायेन स्वतःप्रवणत्वेऽपि तस्य बुद्धित्वप्रयत्नत्वरूपजातिभेदादेव तद्भेदोपपत्तेर्न जातिभेदस्तत्राप्रयोजक इत्याखण्डलार्थः ।

तज्ज्ञानार्थमिति । विषयविशेषसम्बद्धतया प्रयत्नज्ञानार्थमित्यर्थः । **अनादित्वादिति** । तथा च विषयविशेषसम्बद्धतया तदुत्पादस्यैवाभावान्न तदर्थता बुद्धेरिति भावः । ननु च प्रयत्नस्यानादित्वाभावेन विषयविशेषसम्बद्धतया तदुत्पादार्थत्वं बुद्धेर्भविष्यतीत्याशङ्क्य सादित्वेन प्रयत्नस्य विषयविशेषसम्बद्धतयो-त्पादार्थं बुद्धिसापेक्षत्वात् तन्मात्रेण परतो विषयप्रवणत्वे तथा सत्यविशेषेण बुद्धेरपि सादित्वप्रसक्त्या स्वोत्पादककरणसापेक्षत्वात्परतो विषयप्रवणत्वं स्यादिति स्वतो विषयप्रवणत्वं भज्येतेत्याह **सादित्वेऽपीति** । **पौर्वापर्याभावादिति** । प्रयत्नविषयसम्बन्धयोरिति शेषः । एतदेवोपपादयति **न हीति** । तथा सति विरम्य-व्यापारप्रसक्तेरिति भावः । **स्वरूपेति** । प्रयत्नस्वरूपग्राहकप्रमाणेनैव विषयसम्बद्धतया प्रयत्नज्ञानस्यापि सम्भवान्न तदर्थमपि बुद्धेरपेक्षेत्यर्थः । ननु प्रयत्नग्राहकप्रमाणस्य प्रयत्नेन संयुक्तसमवायरूपप्रत्यासत्तेः सत्त्वात् तद्ग्राहकत्वेऽपि तद्विषयेण प्रत्यासन्नत्वेन तद्ग्राहकत्वासम्भवाद्विषयसम्बद्धतया तज्ज्ञानार्थं बुद्धिरपेक्षितैवेति कथं न परतो विषयप्रवणत्वं प्रयत्नस्येत्यतस्तथा सति बुद्धिग्राहकप्रमाणस्यापि बुद्ध्या सह संयुक्तसमवायेन प्रत्यासन्नतया तद्ग्राहकत्वेऽपि तद्विषयेणाप्रत्यासन्नतया तद्ग्राहकत्वाभावेन विषयसम्बद्धतया बुद्धिज्ञानार्थं परापेक्षायाः सत्त्वेन प्रयत्नवत् बुद्धेरपि परतो विषयप्रवणत्वं स्यादित्याशयेनाह **बुद्धेरपीति** । न च ज्ञानस्वरूपग्राहकप्रमाणस्य विषयेण व्यवसायरूपप्रत्यासत्तेः सत्त्वात् तद्ग्राहकत्वमप्यस्त्येव । तथा च विषयसम्बद्धतया ज्ञानग्रहणस्यापि ज्ञानस्वरूपग्राहकेणैव सम्भवान्न तज्ज्ञानार्थमन्यापेक्षेति कथं तद्बुद्धेः परतो विषयप्रवणत्वप्रसञ्जनमिति वाच्यम् । तथा सति प्रयत्नस्वरूपग्राहकप्रमाणस्यापि प्रयत्नविषयेण सह प्रयत्नरूपप्रत्यासत्तेः सत्त्वेन विषयग्राहकतया

विषयसम्बद्धतया प्रयत्नग्रहणस्यापि तेनैव सम्भवान्न तदर्थमन्यापेक्षेति प्रयत्नस्यापि परतो विषयप्रवणत्वाभावापातात् । न च ज्ञानस्य प्रत्यासत्तित्वात् तत्स्वरूपग्राहकस्य तद्ग्राहकत्वमुपपन्नं प्रयत्नस्य तु न प्रत्यासत्तित्वम् । तथा सति दशमप्रत्यासत्तिप्रसङ्गेन तन्नवत्वनियमव्याकोपप्रसङ्गात् । अतो न प्रयत्नग्राहकस्यापि तद्विषयग्राहकत्वमिति वाच्यम् । ज्ञानं प्रत्यासत्तिरिति मते ज्ञानपदेन सविषयकस्यैवोक्त्या प्रयत्नस्य प्रत्यासत्तित्वेऽपि तदाधिक्याप्रसङ्गात् । न चोपनायकतावच्छेदकं ज्ञानत्वमेव जातित्वेन लघुत्वात् । न तु सविषयकत्वमुपाधितया गुरुत्वात् ततश्च कथं प्रयत्नस्योपनायकत्वमिति वाच्यम् । भिन्नविषयज्ञानसाधारणत्वेन ज्ञानत्वमात्रस्योपनायकतावच्छेदकत्वानुपपत्त्या स्वविषयज्ञानत्वमेव तथा वाच्यम् । तत्र च स्वविषयकत्वमेव तथाऽस्तु लाघवात् । तच्च प्रयत्नेऽपीति कथं न तस्योपनायकत्वम् । न च स्वविषयकत्वं नोपनायकतावच्छेदकम् । व्यापारानुबन्धिनीं विषयतामादायात्मादावतिप्रसङ्गादिति स्वविषयज्ञानत्वमेव तथा वाच्यम् । तच्च न प्रयत्नस्येति शङ्क्यम् । स्वविषयकज्ञानत्वमेव नोपनायकतावच्छेदकम् । पक्षज्ञानादीनामप्युपनायकतापत्तेः । व्यापारानुबन्धिनीं विषयतामादाय पक्षज्ञानस्यापि वह्निविषयत्वात् । तस्माद्व्यापाराननुबन्धिविषयकज्ञानत्वं तथा वाच्यम् । तथा च ज्ञानत्वं गुरुभूतमेवेति प्रयत्नस्याप्युपनायकत्वोपपत्तिः । ननु भवतु स्वविषयत्वमेवोपनायकतावच्छेदकम् । तथाऽपि न प्रयत्नस्योपनायकता सम्भवति । तस्य स्वविषयत्वाभावात् । प्रकाशस्य सतस्तदीयमात्रनिबन्धनस्वभावविशेष एव तद्विषयत्वमित्यात्मतत्त्वविवेकपर्यालोचनया तथैव लाभात् । अन्यथा प्रकाशस्य सत इत्यस्य वैयर्थ्यापत्तेरिति चेन्न । प्रयत्नस्यापि सविषयकत्वव्यवहारेण तत्सिद्धेः । न च सविषयकज्ञानजन्यत्वेनैव सविषयकत्वव्यवहार इति वाच्यम् । वैपरीत्यापत्तेः । न चोपेक्षाज्ञानानुरोधान्न वैपरीत्यमिति वाच्यम् । ईश्वरप्रयत्नानुरोधात् । प्रयत्नस्यापि स्वाभाविकमेव सविषयत्वमिति तुल्यत्वात् । यदि चेश्वरेच्छायाः सविषयत्वं नास्त्येवेति मन्यसे तदोपेक्षाज्ञानेऽपि तन्नास्त्येवेति तुल्यमिति सङ्क्षेपः ।

वा०८०— प्रयत्नः कर्तृत्वमिति पूर्वमूलानुसारेण उपपादयति **तस्यैवेति** । प्रयत्नस्यात्र बुद्ध्या विवेकेन परामर्शः । **न बुद्ध्यापीति** । अयमाशयः । कर्तृत्वरूपसामर्थ्येनोपपन्नमिति बुद्धेरनुपयोगः । यदि च घटं करोतीत्यादौ ज्ञानवत्येव कर्त्रर्थकाख्यातप्रयोगात् कुलालादौ ज्ञानवत्येव कर्तेति प्रयोगाच्च न स्वरूपसामर्थ्येन कर्तृत्वोपपत्तिरिति मन्यसे हन्त तर्हि नेदं ज्ञानसाधनेन स्वरूपसामर्थ्यनिराकरणम् । किन्तु प्रयत्नसाधनेनाकृतिरूपप्रयत्नस्यैवाख्यार्थतायाः भावेनैव हि यत्नात्म इति प्रागुपन्यस्तनियामकेन सिद्धतया कुलालादौ करोति कर्तेत्यादिप्रयोगस्य प्रयत्नमादायापि उपपत्त्या ज्ञानसाधनत्वाभावात् । न च एतावता स्वरूपसामर्थ्येनैवेति वाच्यम् । इच्छानङ्गीकारे सर्वथा बुद्धिरपि न स्यात् इति इच्छानङ्गीकारिणं प्रति आपादने तात्पर्येण प्रयत्नानङ्गीकारेणापि बुद्धिनिराकरणोपपत्तेः । अत एव बुद्ध्यापीत्यपिपदं प्रयुक्तमिति । **स्वभावतो विषयेति** । प्रयत्नस्येत्येतत् मध्यदीपिकान्यायेन पूर्वत्रापि सम्बध्यते । तदनभ्युपगम इत्यस्य स्वभावतो विषयप्रवणत्वानभ्युपगम इत्यर्थः । तथा च प्रयत्नस्य स्वभावतो विषयप्रवणत्वाङ्गीकारे तत्स्वभावकबुद्ध्यभेदप्रसङ्गः आयाति । यदि तन्नाङ्गीक्रियते तर्हि परोपाधिकेत्यादि योजना । इष्टापत्तिपरिहारेणैव तन्मुखेनैव समाधिं कथयन्

प्रवृत्तेऽपि समाधिसाम्यमाह **तदङ्गीकुर्वता इत्यादिना** । यद्यपि अस्यां दशायां ईश्वरेच्छायाः असिद्धत्वात् तस्याः परोपाधिकविषयप्रवणत्वं नोदाहर्तुं शक्यं तथाप्यत्र लोके इच्छायाः सिद्धत्वात् लोकविवक्षया सामान्येन प्रयत्नसमकक्षतया इच्छोपि परोपाधिकविषयप्रवणत्वेन मूलटीकयोरुदाहृतेत्यदोषः । वक्ष्यते चैतत् प्रयत्नस्वरूपग्राहकेत्येतदुपपादनावसरे । मूले विषयनियमार्थं इति च कोऽर्थ इत्यादि । यद्यपि तस्य विषयनियमार्थं इत्येतत्प्रकरणे आशङ्कनेऽपि पूर्वमूले स च द्वेधा बुद्धिमपेक्षते । उत्पत्त्यर्थं विषयनियमार्थं च । तत्रेश्वरप्रयत्नो यद्यपि नित्यत्वात् नोत्पत्तौ अपेक्षते बुद्धिम् । तथापि विषयनियमार्थं तामपेक्षत एव इत्यादेरुक्तत्वेन विषयनियमपदेन प्रागुक्तस्यैव प्रत्यभिज्ञायमानत्वात् बुद्धिवत् स्वतो विषयप्रवणत्वोपपत्तेः इत्यादेरुक्तत्वाच्च । विशेषविषयसम्बन्धतया उत्पादार्थ इति पक्षमपक्षस्यावकाशो नेति न तया विकल्पो युक्तः तथापि परो युक्तमेव ब्रवीति इत्याद्याश्वासाभावात् स्थलान्तरे सम्भावितत्वमात्रेण पक्षान्तरशङ्काविकल्पादिवत् इहापि सम्भावितत्वे विकल्पो युक्त इति ज्ञातव्यम् । नित्ये उपादानार्थमिति उत्पन्नस्येति च पक्षद्वयसङ्गतत्वात् नित्यत्वाविरोधिपक्षान्तरमाह **स्थितस्येति** मूलम् । अत्रापि पक्षे विषयसम्बन्धशून्यस्य प्रयत्नस्य किञ्चित्कालं अवस्थानकल्पना भवतीति अपरितोषात् पक्षान्तरमाह **तत्तज्ज्ञापनार्थमिति** । अत्र तच्छब्देन विषयविशेषसम्बन्धमात्रप्राप्तावपि तस्य विषयनियमार्थं इति शङ्कावाक्ये तस्येत्युक्तप्रयत्नस्य पक्षत्रयेऽपि सम्बन्धं सिद्धवत्कृत्यैव विकल्पोत्थापनात् प्रयत्नोऽपि तस्येत्यनेन ग्राह्यः । यद्वा तृतीये कल्पे अनुवृत्त्यैव तच्छब्देन तत्रावृत्त्योः अन्यतराश्रयणेनापि सङ्गच्छते । तथा च तस्य सम्बन्धज्ञानार्थमिति लभ्यते इत्यभिप्रेत्य प्रथमकल्पानुसारेण तत्तज्ज्ञानार्थमित्येतत्तात्पर्यमाह **विषयविशेषेति** । आद्ये कल्पे विशिष्टस्य प्रयत्नस्य तत्पादो विवक्षितः । द्वितीये विशेषणीभूतविषयविशेषसम्बन्धस्य उत्पादो विवक्षितः । तृतीये तु नित्ययोः विशेषणविशेष्ययोः बुद्धिसाध्यत्वायोगेऽपि तद्विशेषणविशिष्टतया प्रयत्नस्य ज्ञानोत्पाद इति पूर्वपक्षोक्तदोषद्वयपरिहारेण अस्य प्रवृत्तिरिति विवेकः । तथा प्राक् इच्छा निष्प्रयोजनेति शङ्कायाः अन्यतः सिद्धेऽर्थे प्रयोजनस्य गवेषणानुपपत्तेः इति परिहारं स्वयमभिधाय तस्य परसम्मतत्वप्रदर्शनाय बुद्धावप्येवं पर्यनुयोगः समानः । तस्यापि प्रयोजनाभावात् इत्यादिकमत्रोपक्रान्तं इत्यस्य विकल्पनिराकरणम् । तस्मात् तथापि प्रमाणान्तरसिद्धायां बुद्धौ न प्रयोजनगवेषणया कृत्यम् । अन्यथा कटकशौक्ल्यादि न सिद्ध्येत् इत्येव परिहारो वाच्यः । स च समो ममापि इत्यत्र तावदस्ति । तथा च सिद्धान्तिषड्गुणत्वमतमाश्रित्य प्रयत्नवत एव कर्तृत्वोपपत्तेः या त्वयाङ्गीकृता बुद्धिः सापि प्रयोजनाभावात् । तत् नाभ्युपेया इत्यादिकं दूषणमुक्त्वा 'प्रतिवादिस्खलितं नापेक्षामर्हति' इत्याशयेन परोक्तं विषयनियमार्थ इत्येतदपि विकल्पं निराकरोति इत्यनेन ग्रन्थेन । इति प्राप्ते तज्ज्ञानमिति विकल्पकोटेः इत्थमर्थः । अर्थसिद्धः । प्रयत्नस्तावत्सविषयः । निर्विषयत्ववैय्यर्थ्यप्रसङ्गात् । परतोऽथ प्रवणश्च । बुद्धिरेव स्वतोऽर्थप्रवणत्वात् । तथा च यथा मृत्पिण्डादिविषयप्रयत्नवानहं इति वा अयं मृत्पिण्डादि विषयप्रयत्नवान् इति वा कुलालादेः अस्मदादीनां वा यत्प्रयत्नविषयकं ज्ञानमस्ति तद्बुध्युपाधिकविषयसम्बन्धाधीनम् । कुलालादेर्हि मृत्पिण्डादिविषयिणीं बुद्धिमनुसृत्य मम यद्विषयीणि बुद्धिः तद्विषयक एवायं प्रयत्नः इति स्वीयबुद्धिसमानविषयतां स्वप्रयत्ने अनुसन्धत्ते । अस्मदादयोऽपि कुलालादीनां चेष्टाविशेषादिना कार्येण यद्विषयिणी कुलालादिबुद्धिः

तद्विषयक एव तदीयप्रयत्नोऽपि इत्येव सामान्येनानुसंहितारो भवाम एवमेव स्वतो विषयप्रावण्ये शून्येश्वरप्रयत्नेऽपि मदीया बुद्धिः जगद्विषयास्तीति मत्प्रयत्नोऽपि तद्विषयक इति स्वबुद्धिसमानविषयकतयेश्वरस्य ईश्वरीया बुद्धिः तद्विषया तद्विषयक एव तदीयः प्रयत्नः इति चास्माकं च अनुमतीश्वरे अनुसन्धानं स्वीकार्यमेव । तदेतत्तदा घटते । यदीश्वरस्य बुद्धिः स्वीकृता स्यात् तदनङ्गीकारे तु तद्द्वारकोक्तानुसन्धानायोगः । इत्येवं प्रयत्नस्य विषयविशेषसम्बन्धतया ईश्वरानीश्वरसाधारणज्ञानार्थमिति । एवं च विषयविशेषसम्बन्धतया प्रयत्नस्योत्पादार्थं बुद्धिरेष्टव्येति । प्रथमकल्पात् भेदोऽपि स्पष्टो जातः । अनेन च जगत्कर्तृत्वोपयोगी जगज्ज्ञानभिन्नं प्रयत्नविषयकज्ञानं उक्तम् । तत्र वैशेषिकाधिकरणमूलोक्तज्ञानस्वप्रकाशत्वानङ्गीकारिस्वीकृतज्ञानरूपत्रयानुसारेण ज्ञानान्तरं अथवा स्वप्रकाशमेकमेव ज्ञानं सर्वविषयं इत्यङ्गीकारानुसारेण गुणत्वेनाङ्गीकृता बुद्धिरेव क्रमेण जगद्विषयिणी प्रयत्नस्य जगद्विषयकत्वविषयिणी च ज्ञानान्तरपदेन विवक्षिता । तथा च ईश्वरस्य बुद्धिमात्रमनङ्गीकुर्वतोक्तप्रयत्नविषयकज्ञानान्तरानङ्गीकारात् ज्ञानान्तरार्थं बुद्धिरेष्टव्येत्युच्यते । **किमिति** । कोटि-प्रसक्तिः कथं इत्यादिशङ्कानवकाशः । ज्ञानैक्यपक्षे यदि बुद्धिरङ्गीकृता स्यात् तर्हि तयैवाङ्गीकृतया सर्वविषयकतानिमित्तेन तदा तदा प्राप्तविषयकत्वोपपत्त्या प्रयत्नविषयकं ज्ञानमपि सिद्ध्येत् इत्याशयात् । ज्ञानद्वयादिपक्षे तु स्पष्ट एवोक्तशङ्कानवकाशः । एत एव बुद्ध्या कापि स्वरूपेत्यादिना ज्ञानान्तरोपपत्तिं एतत्पक्षदोषतया वक्ष्यति । न ह्यत्र वास्तवीं स्थितिं प्रतिपादयितुं प्रवृत्तो मूलकारः । सादित्वस्य करण-सापेक्षत्वस्य च स्वमते परमते वाऽभावात् । अपि तु मार्गान्तरखण्डनेन स्वोक्तसमाधानं परमुखेन वाचयितुं इति प्रागेवोक्तम् । एतेनैव कार्यमात्रं प्रति हेतुमीश्वरज्ञानं अस्माकं जायमानप्रयत्नज्ञानस्य हेतुरिति तदर्थ-मीश्वरे बुद्धिरेष्टव्येति कोट्यर्थं अवलम्बमाना अपि निरस्ताः । अत्रेश्वरबुद्धेः उपनायकतयैव स्वीकार्यतायाः प्रागुपपादितत्वेन कार्यमात्रसाधारणतदुपयोगस्यावाच्यत्वात् । ईश्वरवादे तर्कताण्डवेन च कृतेः विषयप्रत्या-सत्त्यर्थं ज्ञानापेक्षा । कृतिविषययोः ज्ञानस्यैव प्रत्यासत्त्यत्वात् इति वाच्यम् । प्रयत्नजनकज्ञानस्य प्रत्या-सत्तित्वेऽतिप्रसङ्गात् तज्जनकज्ञानस्य च कृतिकाले नष्टत्वेनाप्रत्यासत्तितया ज्ञाने ज्ञानस्वरूपस्यैव कृतावपि कृतिस्वरूपस्य एव प्रत्यासत्तित्वात् इत्याद्युक्त्वा किं चास्तु कृतिप्रत्यासत्तित्वेन ज्ञानसिद्धिः । इच्छा तु कथं सिद्ध्येत् । इत्युक्तमपि पूर्वोक्तोपनायकतया बुद्धिस्वीकारमेव आवेदयति । उपनायकत्वं च परोक्तरीत्या कालदिगादिगतं भिन्नभिन्नरूपमेवेत्यलं प्रसक्तानुप्रसक्त्या । **अनादित्वाभावेनेति** । अनादित्वानङ्गीकारादित्यर्थः । **सादित्वेनेति** । सादित्वमङ्गीकृत्येत्यर्थः । **बुद्धिसापेक्षत्वात्** इत्यत्र ल्यब्लोपनिमित्ता पञ्चमी सापेक्षत्व-मङ्गीकृत्येति । तावन्मात्रेणोपादाय बुद्धिसापेक्षत्वमात्रेण विषयप्रवणत्व इत्यस्य विषयप्रवणत्वं चेत् अङ्गीक्रियते इत्यर्थः । **तथा सति** इत्यस्य तर्हि इत्यर्थः । प्रयत्नसादित्वाङ्गीकारे बुद्धिसादित्वं कुतः इत्यतोऽविशेष-लक्षसामान्यव्याप्त्या तत्प्राप्तिरित्याह **अविशेषणेति** । ईश्वरेऽपि द्वित्वानेकपृथक्त्वसंयोगादेरनेकत्वेऽपि एकत्व-एकपृथक्त्वपरिमाणानां ज्ञानादित्रयस्य च नित्यत्वमिति सिद्धान्तसत्त्वेऽपि तदन्तर्गतप्रयत्नस्य सादित्वाङ्गीकारे प्रयत्नाविशिष्टबुद्धेरपि सादित्वप्रसक्त्या दर्शनज्ञानानित्यत्ववादिरीत्या तस्याः सादित्वमेवाङ्गीकार्यं स्यात् इति यावत् । ततश्च तस्याः स्वोत्पादककरणसापेक्षत्वमपि स्यात् । ततश्च तत्सापेक्षत्वस्वीकृत्या तन्मात्रेणैव

प्रयत्नवत् परविषयत्वं च स्यात् । न चेष्टापत्तिः । तथा सति स्वतो विषयप्रवणत्वं सर्वसम्मतं भाक्तं स्यात् इति योजना । मूले इष्टापत्तिशङ्कानिरासायेति स्वतः इत्यादि पूरितम् । सोपस्कराणि वाक्यानि भवन्तीत्युक्तेः । अत एवास्यार्थस्य मूलोक्तस्य लाभः इत्याशयेनैव इत्याहेत्युक्तम् । अन्यथेत्याशयेनेत्यवक्ष्यत् । **तन्मात्रेणेति** । पूर्वानुसारेण करणात् पूर्वत्र तन्मात्रेण इत्यनेनैव पराङ्गीकारनिमित्तं दूषणमिति सूचनात् इहापि तन्मात्रेणैव परतो विषयप्रवणत्वप्रसङ्ग इत्युक्ते नातिप्रसङ्गशङ्का । अन्ये तु विषयप्रवणस्य स्वतः स्वोत्पादककारणसापेक्षत्वे परतो विषयप्रवणत्वमिति विवक्षणात् घटादौ न व्यभिचारः । न च कुलालादिबुद्धौ व्यभिचारः शङ्कनीयः । तस्यापि पक्षतुल्यत्वात् इत्याहुः । अनेन मूलस्थसादित्वेऽपि इत्येतद्वाक्यस्य एवं योजना सूचिता भवति । **सादित्वेऽपि** सादित्वाङ्गीकारेऽपि तद्वदेव बुद्धेरपि सादित्वापत्त्या **तत एव** विषयसम्बद्धतया स्वोत्पादककरणसापेक्षत्वस्यापि आपत्त्या तस्याः अपि प्रयत्नवत् परतो विषयप्रवणत्वं स्यादिति इत्यवधेयम् । **विरम्येति** । अहं प्रथमतो विषयसम्बन्धशून्य एव सन् पश्चात् तत्सम्बन्धवान् स्याम इत्यबुद्धिपूर्वकव्यापारो विरम्यव्यापार इत्यर्थः । स्वप्नाधिकरणीय मया एतत् ज्ञातमिति त्वित्येतत्तदनुव्याख्यानसम्बन्धिमूलोक्तविरम्यव्यापारस्य टीकायां इच्छापूर्वकव्यापारार्थतया व्याख्यानात् । तस्य च चेतनधर्मस्याचेतनेऽनुपपत्तिरित्यपि तत्रैवोक्तेः अत्राप्यचेतने प्रयत्ने तस्यानुपपत्तिरित्यनिष्टत्वं च उपपादनीयम् । सिद्धौ हि कर्मभेदस्य स्यादुपाधि इत्यादिस्थले लक्षणानुवृत्तिप्रदर्शनपूर्वकं इत्यन्योन्याश्रयः इत्यादिना लक्ष्यदूषणकीर्तनवत् इहापि मूले लक्षणानुगमप्रदर्शनमात्रकरणात् तदभिप्रेतं विरम्यव्यापाराख्यं दूषणं प्रसञ्जनीयतयोक्तम् । न च तर्हि एव च विरम्येत्येव वक्तव्यतया तथा सतीत्यस्यायोग इति वाच्यम् । अत्र तथा सति उत्पद्यच्छित्वा वा पश्चात् विषयेण सम्बध्यते इत्यङ्गीकारे सति किं दूषणं उक्तं भवति इत्युक्ते विरम्यव्यापाराख्यं दूषणमुक्तं भवति इत्यर्थ एवाभिप्रेतः । किं दूषणं प्रसक्तं भवतीत्युक्ते तु विरम्यव्यापारः प्रसक्तः इति प्रसक्तेरित्यनेन विवक्षिता । ननु उक्ताङ्गीकारे एतदतिरिक्तो विरम्यव्यापार आपाद्यतयाऽत्रोच्यते इत्यदोषः । यद्वा नायमेव विरम्यव्यापारः । किन्तु तदापादक एव । पादघटो घटस्य कारणं स्यात् । तर्हि स्वतोऽपि पूर्वभावी स्यात् इत्यादौ आत्माश्रयादिकं ह्यापाद्यम् । तत्र च कारणत्वाङ्गीकारे शरीरान्तर्गतं पूर्वभावित्वादिकमेव यथापाद्यतया उच्यते एवं उत्पद्य स्थित्वा वा पश्चात् विषयेण सम्बध्यते इत्युक्ते तच्छरीरे उक्ते बुद्धिपूर्वकव्यापारस्यानुप्रविष्टस्यैवापाद्यतया उक्तिरस्तु इति न दोषः इत्यवधेयम् । **स्वरूपग्राहकप्रमाणेनैवेति** । तच्च प्रमाणं यद्यपि हि सर्वस्य कर्तेत्यादिश्रुतिरूपमेव ईश्वरे सम्भावितम् । श्रुतेस्तु नेदानीमवसरोऽस्ति परमुखेन तस्याः उद्भाव्यत्वात् यथाकथञ्चित् परमतखण्डने तात्पर्येण वास्तवमतरीतेः उपन्यासस्यानवसरात् । अत एव सादित्वेऽपीति कारणसापेक्षतया इत्यादिकं प्रागुक्तम् । तथापि लोकक्लृप्तानुसारेण एवं ईश्वरीयप्रयत्नज्ञानं तन्मनसैव ईश्वरस्य संयुक्तसमवायप्रत्यासत्या भविष्यतीति किमर्थं उपनायकतया बुद्धिरेष्टव्येति मूलकाराशय इति सिद्धं कृत्वा प्रयत्नग्राहकतया लोकक्लृप्तमनोरूपप्रमाणमङ्गीकृत्यैव स्वरूपग्राहकेत्यस्य व्याख्यानं उत्तरग्रन्थे त्वसतः पुरस्कारेणैव शङ्कासमाधानादिकमिति न दोषः । **अत एव लोके वैरूप्यमिति** । पूर्वमूले लोकोदाहरणम् । अत एव ईश्वरेच्छायाः विप्रतिपन्नत्वेऽपि लोकाभिप्रायेणैव इच्छाप्रयत्नयोः भेदो न स्यात् पूर्वमूलोक्तदूषणप्रवृत्तिः युक्ता । टीकाकृदप्यात्मतत्त्वविवेकाद्युक्तप्रमेयनिराकरणान्ते

ईश्वरीयप्रयत्नानुरोधात् प्रयत्नस्यापीति लोकप्रयत्नपुरस्कारमेव स्पष्टयिष्यति । स्वमते पुनःपुनः मनसावलोकन-रूपध्यानाङ्गीकारेण ईश्वरे जीवमनसः प्रवृत्त्युपपत्त्या संयुक्तसमवायप्रत्यासत्त्यादिवर्णनस्य जीवीयमनोरूपप्रयत्न-स्वरूपग्राहकप्रमाणमादायापि उपपत्तेश्च । उत्तरत्रोपनायकतया ज्ञानस्याशङ्कापि जीवज्ञानपक्षे उपपन्ना । यद्विषयिणी बुद्धिः तद्विषयकप्रयत्नः इति विषयविशेषकसम्बन्धतया प्रयत्नज्ञाने ईश्वरज्ञानस्यापि उप-नायकतोपपत्तिरिति पूर्वमेवोक्तेः । जीवस्यैव प्रयत्नज्ञानं पुरस्कृत्योपनायकविचारे तज्ज्ञानस्य एवोपनायकतया कथञ्चित् विचारं प्रवर्त्य तन्न्यायेन ईश्वरेऽपि ज्ञानमेवोपनायकतया वाच्यमित्यभिप्रायस्योत्तरत्र स्फुटत्वाच्च । न चेश्वरज्ञानाङ्गीकारेण एतद्दूषणस्य प्रवृत्तत्वात् स्वरूपग्राहकप्रमाणजन्यज्ञानाङ्गीकारोक्तौ व्याघात इति वाच्यम् । पूर्वोक्तन्यायेन जगत्कर्तृत्वोपयोगि उपादानादि ज्ञानापेक्षया अतिरिक्तज्ञानस्यैव प्रमाणसाध्यत्वाङ्गीकारात्या व्याघातानवकाशात् । आगमबलेन इच्छाङ्गीकरणीया प्रयोजनाभावस्तु अप्रयोजकः । अन्यथा ज्ञानमपि ईश्वरे प्रयोजनाभावात् नाङ्गीकरणीयमिति दूषणाय प्रवृत्तेन मूलकृतायां काञ्चनरीतिमालम्ब्यैव परोक्तप्रयत्नोपनायकतया बुद्धिस्वीकारपक्षे दूषणस्य क्रियमाणत्वेन बाधकक्लेशाभावादिति प्रागेवोक्तमित्यवधेयम् । **प्रयत्नज्ञानस्यापीति** । न केवलं प्रयत्नमात्रज्ञानस्य अपि तु विषयविशेषसम्बन्धतया यत् प्रयत्नज्ञानं तस्यापि सम्भवादित्यर्थः । अन्ये तु भिन्नक्रममपि पदमाश्रित्य सम्बद्धतयापि प्रयत्नज्ञानसम्भवात् इत्यर्थाश्रयणात् केवलप्रयत्नसमुच्चयेऽपिपद-मित्याहुः । प्रयत्नग्राहकप्रमाणस्य प्रयत्नग्राहकत्ववत् तद्विषयग्राहकत्वस्यापि उपपत्तेः । वैषम्यायोगः इत्यतः प्रत्यासत्तिभावाभावाभ्यां वैषम्याद्युक्तं कार्येऽपि वैषम्यं इत्याशयेनोक्तं **प्रयत्नेन संयुक्तेति** । उक्तरीत्या ईश्वरस्यास्माकं वा यदि ईश्वरप्रयत्नज्ञानं तज्जनकमनोरूपप्रमाणस्य ईश्वरस्य साधारणस्य स्वसंयुक्तात्मनि समवेतप्रयत्नेन संयुक्तसमवेतप्रत्यासत्तेः सत्त्वात् इत्यर्थः । **तद्विषयेणेति** । प्रयत्नस्य यो विषयः तेनैव इत्यर्थः । **असम्भवादिति** । तदग्राहकत्वेन एतत्सम्बद्धतया प्रयत्नज्ञानं न तेन सम्भवतीति शेषः । विषयसम्बद्धतया इत्युक्तस्याक्षेपात् । तज्ज्ञानार्थं बुद्धिरपेक्षितेवेति । अत्र प्रयत्नस्वरूपग्राहकप्रमाणस्य विषय-ग्राहकत्वाभावेन तेन उक्तरूपेण प्रयत्नज्ञानानुपपत्तिरिति सिद्धे बुद्धिः यद्विषयिणीत्यादिपूर्वोक्तरीत्या उपनायक-बुद्ध्यपेक्षयोक्तप्रयत्नज्ञानमसम्भवः इत्यङ्गीकार्यत्वात् प्रमाणसहकारितामपुरस्कृत्य उक्तविधप्रयत्नज्ञानार्थं बुद्धि-रपेक्षितैवेत्यर्थः । तथा सति प्रयत्नस्वरूपग्राहक इत्युत्तरग्रन्थेऽपि प्रमाणसहकारितां अपुरस्कृत्यैव प्रयत्न-विशेषज्ञानार्थं न स्वातन्त्र्येण उपनायकतया बुद्धिरपेक्षिता इत्येव न तदर्थं बुद्ध्यपेक्षा इत्यस्यार्थः इति ज्ञेयम् । एतेन प्रमाणस्य परापेक्षत्वेऽपि प्रयत्नस्य स्वविषयप्रवणत्वाय परापेक्षानापत्तिरिति शङ्का गर्भस्रावेण हता भवति । अथवा प्रयत्नस्वरूपग्राहकप्रमाणेन विषयग्रहणार्थमेव बुद्धिरपेक्षितैवेत्येवार्थः । विषयांशे प्रमाणस्य सामर्थ्याभावे उक्ततत्सामर्थ्यप्रतिपादनीयप्रमाणसहकारित्वेनैव बुद्ध्याभ्युपगमप्रतीतेः । एवं च प्रयत्नस्वरूपग्राहकप्रमाणस्य प्रयत्नेन संयुक्तसमवायप्रत्यासत्त्या प्रयत्नग्राहकताबुद्धिरूपोपनायकेन तु बुद्धिः यद्विषयिणी तद्विषयस्य उपनये अमुकविषयोऽयं प्रयत्न इति विषयविशेषसम्बद्धतया प्रयत्नग्राहकता इत्येवं बुद्धेः प्रमाणसहकृतताया एवात्रोक्तिः । तथा सति प्रयत्नस्वरूपग्राहकेत्युत्तरग्रन्थेऽपि प्रयत्नग्राहकप्रमाणसहकारित्वेनैव बुद्ध्यनपेक्षेत्याद्याशयेन एव प्रतिबन्द्योत्तरम् । न चैवं तर्हि प्रयत्नस्य स्वविषयप्रवणत्वार्थं परापेक्षायाः अप्राप्तेः न परतो विषयप्रवणत्वप्राप्तिः

इति वाच्यम् । परापेक्षप्रमाणेन तथा ज्ञानमात्रेण एव विषयप्रवणत्वप्राप्तेः । अन्यादोषादिसहकारेणा-प्रामाण्यग्राहकता साक्ष्यादेरस्तीति तथा साक्षिग्राह्यमप्रामाण्यमपि परतो न स्यात् इत्याद्यतिप्रसङ्ग इति ज्ञेयम् । एतेनैवेतदपि निरस्तम् । तद्ग्राहकत्वासम्भवात् तज्ज्ञानार्थं बुद्धिरपेक्षितेति अयुक्तम् । केवलस्य प्रयत्नविषयस्य ज्ञानानङ्गीकारेण तदर्थबुद्ध्यपेक्षया अयोगात् । विषयसम्बद्धतयेत्यपि अयुक्तम् । विषयस्य सम्बद्धतया ज्ञानोत्तययोग इति । उक्तं हि प्रागसम्भवादित्यनन्तरं तदग्राहकत्वे च तत्सम्बद्धतया प्रयत्नज्ञानं तेन न सम्भवतीति शेष इति । तथा च तज्ज्ञानार्थ इत्यत्र तच्छब्देन प्रयत्नस्यैव ग्रहणात् नोक्तदूषणद्वयानवकाशः । प्रतिबन्दीवाक्ये बुद्धिज्ञानार्थमिति स्पष्टमुक्तेः । यद्यपि विषयविशेषसम्बद्धतयात्र प्रयत्नस्योत्पादार्थं बुद्धिरेष्टव्ये प्राक्विकल्पितप्रथमपक्षेऽपि परोपाधिकविषयप्रवणत्वप्रयत्नस्योच्यमाने बुद्धेरपि स्वोत्पादककरणसापेक्षतया परतो विषयप्रवणत्वं स्यात् इति दूषणं दत्तम् । तथा चात्र परतो विषयप्रवणत्वोपपादनस्य तद्विरोधः इत्याभाति । तथापि तत्र विशिष्टप्रयत्नोत्पादार्थत्वं बुद्धेरिति प्रमेयं भवतीति तदनुसारेणास्योत्पादकं सापेक्षतयैव परतो विषयप्रवणत्वमुपपादितम् । इह तु विशिष्टप्रयत्नज्ञानार्थत्वं बुद्धेरिति प्रमेयमिति तदनुसारेण उपनायकतया बुद्ध्यपेक्षानिमित्तकं परतो विषयप्रवणत्वं आशङ्क्यते । बुद्धेरपि प्रयत्नप्रतिबद्धस्वातिरिक्त यत्किञ्चित् उपनायकापेक्षया परतो विषयप्रवणत्वं स्यात् इति च तदुत्तरं दीयते इति परतो विषयप्रवणत्वस्य भिन्न-भिन्नप्रकारत्वात् न टीकोक्तपूर्वोपपादनस्यात्र परतो विषयप्रवणत्वोपपादनेन विरोधप्रसक्तिः । अत एव निमित्तात् परतो विषयप्रवणत्वं स्वतो विषयप्रवणत्वविरोधिभूतं सर्वसाधारणं इत्यापादकात् भेदः । एवं उत्तरत्रापीति अवधेयम् । **बुद्ध्या सहेति** । प्रयत्ने उक्तरीत्या ईश्वरस्यास्माकं वा यदीश्वरीयं बुद्धिर्ज्ञानम् । तज्जनक-मनोरूपप्रमाणस्य ईश्वरात्मतत्साधारणस्य स्वयमुक्त्वा आत्मनि समवेतबुद्ध्या संयुक्तसमवायरूपप्रत्यासत्तेः सत्त्वादित्यर्थः । ईशज्ञानानित्यत्वादिरीत्या परमतखण्डनं कथञ्चिदपि कर्तुं हि मूलकारः प्रवृत्तः । न वस्तुस्थितिमवलम्ब्येति न सिद्धान्तविरोधादिशङ्कावकाशः, इति असकृदावेदितः इति न कश्चिद्दोषः । **अप्रत्यासन्नतयेति** । प्रत्यासत्त्यन्तराभावात् व्यवसायरूपं प्रत्यासत्तेश्च इदानीं निराक्रियमाणत्वेन बुद्धि-ग्राहकप्रमाणस्य बुद्धिविषयेणाप्रत्यासन्नत्वम् । बुद्धिग्राहकप्रमाणस्य बुद्ध्या सह सन्निकर्षकथनं च विषयग्रहणे सामग्र्यभावो बुद्धिग्रहणे तु तत्सद्भाव इति वैषम्यप्रतिपादनमुखेन प्रवृत्तत्वात् अप्रत्यासन्नत्वापत्त्या तद्ग्राहक-त्वाभावप्रसङ्गेन इत्यर्थस्य पूर्वोत्तरमर्यादया सिद्धेः न वस्तुस्थितिकथनत्वमस्येति वस्तुतो विषयप्रत्यासन्न-त्वादिसद्भावेऽपि न दोषः । तत्सद्भावस्यापादनेऽनुकूलत्वात् । तत्रत्य अतः इत्यस्य सम्मतविषयसम्बद्धतया बुद्धिज्ञानस्यावश्यकत्वादित्यर्थः । सत्त्वेनेत्यस्यापि अङ्गीकर्तव्यत्वापत्तेरित्यर्थः । आपादनप्रकरणात् । यदि प्रयत्नविशेषेण प्रत्यासत्त्यानुपपत्त्यादिनिमित्तेन प्रयत्नस्य परतो विषयप्रवणत्वमित्युच्यते तर्हि तदनुपपत्त्या-दिनिमित्तेनैव बुद्धेरपि तथात्वं स्यादित्यर्थस्य बुद्धेरपि इति पूर्वमूलानुसारेण परापेक्षप्रसङ्गाच्चेति मूलाभिप्रेततया तदनुसारेण प्रतिबन्दीफलं स्पष्टमुक्तम् । **प्रयत्नवत् बुद्धेरपीति** । आद्यकोटौ बुद्धेरपि इति अपिशब्दसमुच्चयं दर्शयितुं प्रयत्नवत् इत्युक्तम् । यदि पीतं उदकं त्वां अन्तर्धक्षत् तर्हि त्वामिव मामपि दहेत् इत्यादाविव तस्यावश्यकत्वात् । बुद्धेरपि परापेक्षेत्यत्रापि प्रमाणसहकारितां अपुरस्कृत्य ईश्वरप्रयत्नस्य तदीया बुद्धिः

यद्विषयिणी तद्विषयक एव प्रयत्न इति विषयविशेषसम्बद्धतया ज्ञानार्थं बुद्धिरेष्टव्येतिवत् बुद्धावुपनायकं यदङ्गीक्रियते तद्विषयकं तद्विषयिण्येव बुद्धिरिति विषयविशेषसम्बद्धतया बुद्धिज्ञानार्थं परभूतोपनायकान्तरापेक्षा स्वातन्त्र्यैवोच्यते । अथाप्रमाणप्रक्रमानुसारेण तत्सहकारितयोपनायकान्तरापेक्षा इत्येवार्थः । विषयांशे प्रमाणस्य सामर्थ्याभावे उक्ते सति तत्सामर्थ्यप्रतिपादनाय ग्राहकप्रमाणसहकारित्वेनैव उपनायकाभ्युपगमप्रतीतेः । एवं च बुद्धिस्वरूपग्राहकप्रमाणस्य बुद्ध्या संयुक्तसमवायप्रत्यासत्त्या बुद्धिग्राहकता उपनायकान्तरबलवदुपनीतविषय-विशिष्टतयाऽमुकविषयबुद्धिरिति विषयविशेषसम्बद्धतया बुद्धिग्राहकता इति परापेक्षेति व्याख्येयम् । न च ज्ञानस्वरूपग्राहकप्रमाणस्य इत्युत्तरग्रन्थेऽपि सहकारित्वेन स्वातन्त्र्येण च इत्युभयाभिप्रायेणापि योजनायाः शक्यत्वमित्यवगन्तव्यम् । प्रयत्नग्राहकबुद्धिग्राहकयोः वैषम्यमाशङ्कते **न च ज्ञानेति** । मनोरूपप्रमाणस्य ज्ञानविषयेण सह संयोगाद्यन्यतमप्रत्यासत्तिविरहेऽपि ज्ञानरूपाया एव प्रत्यासत्तेः सत्त्वेन ज्ञानग्राहकत्ववत् तद्विषयग्राहकत्वस्यापि उपपत्तेः तत्सम्बद्धतया बुद्धिग्रहणमपि तेन सम्भवतीत्यर्थः । **ज्ञानग्रहणस्यापि इति** अपिशब्दो भिन्नक्रमसम्बद्धतयापीति । यद्वा न केवलं ज्ञानग्रहणसम्भवः । किन्तु विषयसम्बद्धतया यत् ज्ञानग्रहणं तस्यापि सम्भवात् इति योज्यम् । एवं च संयुक्तसमवायप्रत्यासत्त्या ज्ञानग्राहकस्य मनसा ज्ञानेन स्वविषयोपनये कृते सति तद्विषयग्राहकतायां लब्धायां तद्विषयविषयकमिदं ज्ञानमिति तत्सम्बद्धतया ज्ञानग्राहकता संयुक्तसमवायप्रत्यासत्त्यैवेत्युक्तं भवतीति ज्ञेयम् । **न तज्ज्ञानार्थमन्येति** । प्रागाशङ्कितोपनायकान्तररूपान्यापेक्षा नेत्यर्थः । प्रमाणसहकारित्वेन तदुपनायकं यद्विषयकं तद्विषयिणी बुद्धिरिति बुद्धे विषयप्रवणत्वार्थं प्राक् उपनायकान्तरापेक्षा उक्ता । सा बुद्धिरूपप्रत्यासत्त्या तद्ग्राहकप्रमाणं प्रति बुद्ध्या स्वविषयोपनीते तत्सम्बद्धतया तस्यैव ज्ञानस्य तेनैव प्रमाणेन ग्रहणपक्षे तु नोक्तरीत्या विषयप्रामाण्यसम्पादकोपनायकान्तरापेक्षास्तीति शङ्काग्रन्थार्थः । एवं च स्वरूपग्राहकेणैवेत्येवकारः स्वरूपग्राहकतद्विषयातिरिक्तनिषेधकः । प्रयत्नग्राहकस्य तु तदुभयातिरिक्तबुद्ध्यपेक्षेति प्रयत्नबुद्ध्योः वैषम्यमिति सूचितं भवति । लोकवत् ईश्वरेऽपि बुद्धिग्राहकप्रमाणा-ङ्गीकारेण इदं आवेदितमेवेति ज्ञेयम् । प्रयत्नस्वरूपग्राहकेत्यादावपि बुद्धिरिव ईश्वरे प्रयत्नग्राहकरूपप्रमाणमङ्गीकृत्य प्रयत्नत्वाश्रयणेन व्याख्येयम् । **प्रयत्नरूपेति** । प्रत्यासत्त्यन्तराभावे सति इति शेषः । **प्रयत्नग्रहणस्यापीति** । विषयसम्बद्धतया यत् प्रयत्नग्रहणं तस्यापीत्यर्थः । न केवलं संयुक्तसमवायप्रत्यासत्त्या प्रयत्नग्रहणम् । किन्तु प्रयत्नरूपप्रत्यासत्त्या प्रयत्नविषयोन्नयनात् तत्सम्बद्धतयापि प्रयत्नग्रहणमपि तेनैवेति भिन्नक्रमो वा अपिशब्दः । **न तज्ज्ञानार्थमिति** । प्रयत्नस्वरूपग्राहकप्रमाणं प्रयत्नरूपा प्रत्यासत्तिश्च तद्द्वयातिरिक्तज्ञानरूपप्रत्यासत्त्यपेक्षे-त्यर्थः । न ज्ञानप्रतिबद्धाप्रयत्नस्य स्वविषयेण प्रत्यासत्तित्वं अभ्युपगम्य प्रयत्नस्वरूपग्राहकेणैव विषयसम्बद्धतया प्रयत्नग्रहणमपि सम्भवतीत्यङ्गीकर्तुं शक्यम् । लौकिकप्रत्यासत्तेः संयोगादिरूपेण षाड्विध्यं, अलौकिकास्तु ज्ञानयोगसामान्यरूपेण त्रैविध्यं इत्येवं प्रत्यासत्तीनां नवविधतया सिद्धान्तसम्मतेः ज्ञानस्योक्तनवकान्तर्भूततया प्रत्यासत्तित्वस्वीकारोपपत्तावपि प्रयत्नस्य तदन्तर्भावाभावेन तत्प्रत्यासत्तित्वाङ्गीकारे दशमप्रत्यासत्तित्वाङ्गी-कारापत्त्या तत् नवकत्वनियमभङ्गापत्तिरिति बाधकसद्भावेन प्रयत्नस्य प्रत्यासत्तिताया एवासिद्ध्या प्रत्यासत्ति-रूपज्ञानवैषम्यात् स्वरूपग्राहकप्रमाणस्वविषययोः प्रत्यासत्तित्वेन प्रयत्नाङ्गीकारानुपपत्तिरिति वैषम्यमित्याशङ्कते

न च ज्ञानस्येत्यादिना । विषयकत्वम् । ततश्चोपनायकबलात् तत्सम्बद्धतया ज्ञानग्राहकत्वं उपपन्नमिति पूर्वोक्तरीत्या स्पष्टम् । एवं प्रयत्नदलेऽपि पूरणीयम् । सत्यम् । न नैव प्रत्यासत्तय इति । **सिद्धान्तित इति** । न च एतावता प्रयत्नप्रत्यासत्तित्वे कथं न विरोधः । नवसुगणितज्ञानाख्यप्रत्यासत्तौ हि प्रत्यासत्तितावच्छेदकं न ज्ञानत्वम् । येन प्रयत्नसङ्ग्रहः स्यात् किन्तु सविषयकत्वमेव । किन्तु सविषयकत्वमेव तच्च ज्ञाने इव प्रयत्नेऽपि इति युक्तं तस्यापि ज्ञानप्रत्यासत्त्या सङ्गृहीतत्वमित्याह **ज्ञानमिति** । लौकिक्येऽपि च प्रत्यासत्तिः नालौकिक्येऽपि साऽस्तीति मतवारणायेति मत इति युक्तम् । अथवा येन ज्ञानप्रयत्नौ इत्यनुक्त्वा ज्ञानमित्येव प्रत्यासत्ती गणना कृता तन्मतेत्यर्थः । **सविषयकस्येति** । ततश्चोपनायकतया स्वीकृतालौकिकप्रत्यासत्ति-त्रयान्तर्गतज्ञानरूपप्रत्यासत्त्यन्तर्गतप्रयत्नस्यापि उपनायकत्वं युक्तम् । ज्ञानं हि स्वस्य विषयं स्वग्राहकप्रमाणं प्रति सद्वारोपनयति । तच्च प्रमाणं तद्द्वारा प्राप्तं विषयविशिष्टतया साक्षात् स्वविषयं ज्ञानं गृह्णाति एवं हि ज्ञानस्योपनायकतया प्रत्यासत्तिता वाच्या । न तु संयोगादिवत् प्रत्यासत्तिता । तदसम्भवादेव एतत्प्रत्या-सत्तिस्वीकारात् । सा च प्रयत्नेऽपि तुल्या इति भावः । उक्तविधोपनायकतावच्छेदकं ज्ञानत्वमेवेति ज्ञान-मात्रस्यैव प्रत्यासत्तित्वं न तु सविषयकत्वस्येति न तदाक्रान्तस्यापि प्रयत्नस्य प्रत्यासत्तिता इत्याशङ्कते **न चोपनायकतेति** । अत एवाख्यातवाच्यतावच्छेदकं लघुभूतं यत्नत्वमेव न तु व्यापारत्वमिति भावः । न च सामान्यस्य विकासकतया तस्यैवावच्छेदकत्वं युक्तमिति गुरुभूतमपि सविषयकत्वमेवोपनायकतावच्छेदकम् । न तु जातितया लघुभूतमपि ज्ञानत्वम् । कार्यत्वस्य गुरुभूतस्यापि कृतिजन्यतावच्छेदकत्वम् । न तु जाति-तया लघुभूतस्यापि घटत्वादेरिति स्वीकारादिति वाच्यम् । यत्र सामान्यविशेषयोः तुल्यत्वं तत्रैव सामान्ये प्रमाणपक्षपातः । यत्नत्वव्यापारत्वयोः तुल्यत्वेनोक्तव्यवस्थोपपत्तेः । कृतिजन्यतावच्छेदकत्वं तु न घटत्वा-दीनाम् । तेषां जातितया लघुत्वेऽपि बहुत्वेन गौरवात् । ज्ञानत्वस्य तु विषयकत्ववदेव एकत्वेन बहुत्व-रूपगौरवशून्यत्वात् । तदेतदप्युक्तम् । ज्ञानत्वमेवेत्येकवचनेन प्रयत्नस्योपनायकत्वसिद्ध्यर्थमेव यत्ने करणता-दशायां ज्ञानत्वस्य तदवृत्तित्वेन पुनः वृत्तित्वशङ्कानुदयः । अनतिरिक्तवृत्तित्वमात्रेणापि तत्र तत्र तत्तद्दण्डत्व-नीलधूमत्वादाववच्छेदकता दृष्टेति न दोषः इत्यप्याहुः । घटत्वादाविव वह्नित्वगौरवाभावेऽपि विशेषणा-न्तरविशेषितत्वेन गौरवम् । ज्ञानत्वस्य उपनायकतावच्छेदकताभ्युपगमेऽपि समानमित्याह **भिन्नविषयेति** । अयमर्थः । न लाघवेन जातिभूतज्ञानत्वस्यैवोपनायकतावच्छेदकतेति मन्तव्यम् । ज्ञानत्वस्य उपनायक-सुरभिताज्ञानतत्राज्ञानप्रामाण्यघटकतद्वत्त्वादिज्ञानेष्विवानुपनायके ज्ञानेऽपि सत्त्वेनावच्छेद्यातिरिक्तवृत्तितया तदव-च्छेदकत्वानुपपत्तेः । तदेतदाह **भिन्नविषयेति** । यदि घ्राणेन गन्धमात्रज्ञानं प्रथमतो जातं तत्सहकारिवशात् चक्षुः चन्दनमात्रविषयकमपि सुरभित्वमपि विषयीकरोतीति प्रथमजातं सुरभित्वज्ञानं चन्दनग्राहकचक्षुषा समानविषया भवतीति तज्ज्ञानस्य तत्प्रमाणं प्रति उपनायकत्वं उक्तप्रमाणेन भिन्नविषयम् । कोऽर्थः । तदविषयीभूतार्थमात्रविषयकं यज्ज्ञानं पटादिज्ञानरूपं तस्य तत् प्रमाणं प्रति नोपनायकता । तादृशेऽपि च ज्ञाने ज्ञानत्वमस्तीति तत्साधारण्यमित्यर्थः । इदमुक्तं भवति । उपनीतार्थविषयिकत्वेनाभिमतं यन्मानं तस्य यो विषयः तद्भिन्नो यो विषयः तद्विषयत्वानर्हो यो विषयः इति यावत् । तद्विषयकं यज्ज्ञानं तत्साधारण-

त्वेनेति । **स्वविषयेति** । स्वविषयत्वात् स्वं स्वीये विषयः । **तद्विषयो यस्येति स्वविषयं** स्वविषयविषयकमिति यावत् । विषयं वाध्याहार्यम् । तथा च **स्वयमुपनीतार्थ** उपनितार्थः । विषयतया अभिप्रेतं मानं तस्य यो विषयः तद्विषयकज्ञानत्वमेवेत्यर्थः । **वाच्यमिति** । तथा न च तवापि गौरवं समानं इति भावः । किञ्च साम्यमपि किन्तु त्वत्कल्पितावच्छेदशरीरान्तर्गतस्य एव मदुक्तावच्छेदकात् किञ्चिदधिकस्य तदपेक्षया लघुभूतस्य तया तदेव स्वीकार्यमित्याह **तत्र चेति** । तथा सतीन्यर्थः । तथा तदन्तर्भूतमित्यपि सप्तम्यन्तार्थः । **स्वविषयक-त्वमिति** । स्वविषयकत्वमेवेत्यर्थः । यत् यस्य उपनायकतया स्वीक्रियते तत् तत्समानविषयकमेव तदुपनायकं दृष्टमित्युक्तविषयविषयकत्वमेव **प्रयोजकमस्तु** । न च तावन्मात्रस्यातिप्रसङ्गोऽस्ति । येन ज्ञानत्वं अधिकं निवेश्येतेति भावः । **कथं न तस्येति** । किन्तु भवेदेव यतः । ततश्च न वाच्यमिति सम्बन्धात् न न्यूनताशङ्कावकाशः । तदुपनायकत्वस्यैव प्राप्तेरित्यर्थात्र दोष इत्यप्याहुः । स्वविषयविषयत्वमात्रस्य उपनायकताप्रयोजकत्वेऽतिप्रसङ्गेनाधिकविवक्षायाः आवश्यकत्वे मदुक्तोपाधावेव पर्यवसानमिति शङ्कते **न चेति** । स्वविषयकत्वं स्वविषयविषयत्वमात्रमित्यर्थः । आत्मादेः अर्थविषयकत्वं उपपादयितुं युक्तम् । **व्यापारानुबन्धिनीमित्यादि** । ज्ञानं हि 'घटस्य ज्ञानमि'ति प्रतीयते इति घटाज्ञानस्य या प्रतिपत्तिः तदनुबन्धितया ज्ञानविषयो भवतीति घटनिष्ठाज्ञानं प्रति विषयता प्रतिपत्त्यनुबन्धिनीत्युच्यते । तादृश-ज्ञानरूपव्यापारद्वारा यदपेक्षया विषयता सा तत्र व्यापारानुबन्धिनीत्युच्यते । उक्तं च तृतीयसूत्रवर्धमाने । अनुमितिरूपव्यापारविषयतया ज्ञानादिरनुमानस्य विषयः तज्जन्यव्यापारविषयस्यैव तत्त्वादिति । उक्तरूपा च विषयता ज्ञानकारणचक्षुरादिकं प्रति घटादिनिष्ठा यथा भवति तथा आत्मादिकं प्रत्यपि भवतीति घटादिकं आत्मादिकं प्रति व्यापारानुबन्धिविषयः इत्युच्यते । आत्मादिकं च तद्व्यापारात् तद्विषयकमिति उच्यत इति हि स्थितिः । तथा स्वपदोक्तोपनीतार्थगोचरमानभूतचक्षुरादिकं प्रति सौरभ्यतदत्वतत्तादिकं विषयीकुर्वत् यज्ज्ञानं तद्वारा सौरभ्यादिकं विषय इति चक्षुरादिकं सौरभ्यादिनिष्ठा विषयतापि तद्वारा अनुबन्धिनीत्युच्यते । तयोः मध्ये आत्मादेः ज्ञानमात्रकारणतया स्वजन्यज्ञानद्वारा तत्तदर्थविषयकता अस्तीति चक्षुरादिवदेव पूर्वाविषयता आत्मादावपि प्राप्ता । किञ्चिदर्थं साक्षादगोचरयन्तं अन्योपनीतं विषयीकुर्वन्तं प्रमाणविशेषं प्रति तामादाय स्वविषयविषयकत्वमात्मादावपीति तस्यापि उपनायकत्वेनाभियुक्तव्यवहारागोचरस्योपनायकत्वं स्यात् इत्यर्थः । **स्वविषयज्ञानत्वमेवेति** । स्वविषयविषयकज्ञानत्वमेवेत्यर्थः । ज्ञानपदेन च प्रतिपत्त्यनुबन्धिविषयता लब्धेति । उक्तोपनायकतावच्छेदकस्यात्मादावभावात् युक्ता तद्व्यावृत्तिरिति भावः । इदं च विषयताद्वैविध्यं व्यवसायोप-नीतं तद्वत्त्वमनुव्यवसायेन विषयीक्रियते । परमाणुमहं जानामि इत्यादावनुमित्युपनीतपरमाणुज्ञानं मनसा भवति । 'स रामः श्यामः' इत्यादिकं च उपनीतार्थविषयकं ज्ञानं च मनसेत्यादिप्रमेयाङ्गीकारिवादिसम्मतमिति ज्ञेयम् । अत एव व्यापारानुबन्धिविषयताव्यावृत्तये प्रतिपत्त्यनुबन्धित्वविवक्षानुशयेन ज्ञानपदं वर्णयन्ति । तज्ज्ञानाविषयकज्ञानेत्यादि विप्रतिपत्तिलक्षणादिस्थले मण्यादिटीकायाम् । इति न च शङ्क्यमिति सम्बन्धः । **ज्ञानत्वमेवेति** । ज्ञानत्वमात्रमपीत्येवेत्यर्थः । **पक्षज्ञानादीनामिति** । **आदिपदेन** व्याप्तिज्ञानादिपरिग्रहः । **उपनायकत्वापत्तेरिति** । चक्षुरादिप्रमाणस्य वह्निविषयत्वेति शेषः । एतदेवोपपादयति **व्यापारानुबन्धिनी-**

मिति । वह्निविषयकवह्न्यनुमितिरूपज्ञानजनकतया पक्षविषयीकरणे ज्ञानादेरपि वह्निविषयकत्वेन स्वपदोक्तज्ञानविषयविषयकतया उक्तावच्छेदकाक्रान्तत्वेन ज्ञानविषयस्य चक्षुरादिप्रमाणेन पर्वतो वह्निमान् इति विषयीकरणे तस्योपनायकत्वसम्भवादित्यर्थः । व्याप्तिज्ञानादेरुपनायकत्वप्रसङ्गोपपादनमिति उपलक्षणया ज्ञातव्यमिति भावः । **तस्मादिति** । उक्तोऽतिप्रसङ्ग आयातीति तद्वारणायेत्यर्थः । **व्यापारेति** । व्यापारमद्वारीकृत्य तदर्थविषयकेत्यर्थः । वह्न्यादिज्ञानजनकतारूपमन्तरेण प्रतिपत्त्येन रूपेण तदर्थविषयकज्ञानत्वं उपनायकतावच्छेदकं वाच्यमिति यावत् । तथैवोच्यते किं बाधकं इत्यत आह **तथा चेति** । अयमाशयः । ज्ञानं प्रसत्तिरित्यस्य सविषयकं प्रत्यासत्तिरित्यर्थं आश्रित्य प्रयत्नस्याप्युपनायकत्वसम्भवे मयोक्ते त्वया च लाघवेन ज्ञानत्वस्य एव तदवच्छेदकत्वं इति शङ्कते भिन्नविषयकज्ञानातिप्रसङ्गेन तस्य तदवच्छेदकतायाः अयोगेन स्वविषयविषयकत्वे प्रवेशेनावच्छेदकं त्वया वाच्यम् । तच्च गुर्वे वेति पुनः मयोक्ते व्यापारानुबन्धिनीविषयतामादाय स्वविषयविषयकत्वस्यातिप्रसङ्गेन त्वयोक्ते मयापि तामेवादाय उक्तरूपज्ञानत्वस्यापि अतिप्रसङ्गोऽभिहितः । तत्परिहाराय च प्रतिपत्त्यनुबन्धिनीं विषयतां विवक्षित्वा स्वविषयविषयीकत्वं त्वया विवक्षणीयम् । तथा चोक्तस्वविषयविषयकत्वमेवोक्तावच्छेदकं अस्तु किं तत्र ज्ञानत्वप्रवेशेनेति मयोच्यते । एवं च ज्ञानत्वमुपनायकतावच्छेदकमिति वदतापि उक्तातिप्रसङ्गवारणाय यावत् विवक्षणीयं तदन्तर्गतं स्वविषयकत्वमात्रमेव विशिष्टज्ञानत्वापेक्षया लघ्विति तदेव उपनायकतावच्छेदकमस्तु । यद्यप्रयत्नेऽप्यस्तीति तस्यापि उपनायकत्वोपपत्तिरिति वक्तव्यमित्यनन्तरं यत इति शेषपूरणात् न दोषः । वाच्यत्वादित्यर्थप्राप्तेः । ननु पुरुषान्तरीयस्वविषयविषयकत्वस्यापि उपनायकत्वापत्त्या समानाधिकरणस्यैव प्रयत्नस्य तत् वाच्यम् । तथा कालान्तरव्यावृत्तिश्च कार्येति स्वविषयविषयकत्वमात्रं उपनायकतावच्छेदकं न सम्भवतीति चेत् । मैवम् । उक्तातिप्रसङ्गवारणाय स्वविषयकज्ञाने सामानाधिकरण्यादिप्रवेशस्य वा आवश्यकतया त्वत्पक्षे लाघवाप्राप्त्या त्वदुक्तान्तर्गतस्यावच्छेदकत्वमङ्गीकुर्वतो मत्पक्ष एव लाघवात् । यदि च ज्ञानत्वं अवच्छेदकं शङ्कमानस्योक्तरीत्या कुसृष्टिभयात् तत्परित्यागः । तर्हि सविषयकत्वमेवावच्छेदकं तेनाप्यङ्गीकर्तव्यतया प्राप्तमिति, युक्तं प्रयत्नस्य ज्ञानप्रत्यासत्यन्तर्भूतत्वं इत्याशयेनोपक्रान्तसविषयत्वं निगमयति **तथा चेति** । सविषयकत्वे शङ्कितगौरवस्य ज्ञानत्वेऽपि साम्यं अपरिहार्यं इति ज्ञानापेक्षया एवशब्दः । ज्ञानस्येव प्रयत्नस्यापि सविषयत्वमङ्गीकृत्य उपनायकतावच्छेदकप्रविष्टज्ञानत्वाभावेन उपनायकत्वासम्भवं वदतो मतं निराकृत्य इदानीं ज्ञानस्यैव सविषयकत्वं न प्रयत्नस्यापि इति वदतो मतं निराकर्तुं तन्मतमपि उत्थापयति **ननु भवत्विति** । अत्र च सविषयकत्वस्यैवोपक्रमानुसारेण सविषयकत्वमिति पाठः । **स्वविषयकेति** । काचित्कपाठस्तु स्वविषयकत्वस्य पूर्वग्रन्थे प्रकृतत्वमनुसन्धाय लेखकेन कृतः । अत एव एतच्छङ्कापरिहारे प्रयत्नस्यापि सविषयकेत्येवंरूपेणैव बहुधा वक्ष्यतीति ज्ञेयम् । तस्य विषयकत्वादिति पाठः । आत्मतत्त्वविवेकः । कुसुमाञ्जलिः । तट्टीकावलोकनीयास्ति । सविषयकत्वव्यवहारोऽपि हि प्रमाणमित्युक्तमनेन । तथा च उपादानगोचरेत्यादि व्यवहाराणां बहूनां सत्त्वेन तद्बलात् प्रयत्नस्यापि सविषयकत्वसिद्धिः सम्भवत्येवेत्याह **प्रयत्नस्यापीति** । व्यवहारस्यौपचारिकत्वात् न तेन सविषयकत्वसिद्धिः इत्याशङ्कते **न चेति** ।

उपचारनिमित्तकथनं **सविषयकज्ञानजन्यत्वेनेति** । एतेनेत्यनेन स्वतः सविषयकत्वं नेति सङ्गृह्णाति **वैपरीत्यापत्तेरिति** । सविषयकव्यवहारजनकतया एव ज्ञाने सविषयकव्यवहार इति वैपरीत्यं स्यात् इत्यर्थः । तथा च ज्ञानेऽपि उपचार इति भावः । **न चोपेक्षेति** । तस्य व्यवहारजनकत्वाभावेन स्वविषयक-तज्जनकतया सविषयकत्वव्यवहारायोगेन तत्रापि तद्व्यवहारसिद्ध्यर्थं स्वाभाविकमेव सविषयकत्वं ज्ञानस्य वाच्यमित्यर्थः । तथा सतीश्वरप्रयत्ने सविषयकत्वव्यवहारकारणकत्वेन सविषयकज्ञानजन्यत्वाङ्गीकारायोगेन तदनुरोधात् प्रयत्नस्यापि स्वाभाविकसविषयत्वस्यैव वाच्यत्वमित्याह **ईश्वरीयेति** । अथवा वैपरीत्यापत्ते-रित्यादेः अयमर्थः । **वैपरीत्येति** । यदि सविषयकज्ञानजन्यतया प्रयत्नस्य सविषयकत्वमुच्यते सविषयक-प्रयत्नजनकतया ज्ञानेऽपि सविषयत्वं वक्तुं शक्यतया त्वदुक्त उपचारो विपरीतः स्यात् इत्यर्थः । प्रयत्नाजनकस्यापि उपेक्षाज्ञानस्य स्वविषयकत्वेन व्यवह्रियमाणत्वात् न तत्तजनकत्वप्रयुक्तं सविषयकत्वं ज्ञानेऽङ्गीकर्तुं शक्यमिति स्वाभाविकस्यैव तस्य ज्ञाने सिद्धिः इत्याशङ्कते **न चेति** । तथा सति ईश्वरप्रयत्नेऽपि सविषयकत्वव्यवहारानुरोधेन सविषयकज्ञानजन्यत्वेन तद्व्यवहाराश्रयणत्वायोगेन प्रयत्नस्यापि स्वाभाविकमेव सविषयत्वमाश्रयणीयं इत्याह **ईश्वरीयेतीति** । **यदि चेश्वरेच्छाया इति** । अत्र प्रयत्नस्य प्रकृतया परप्रयत्नस्य इति पठनीये ईश्वरेच्छाया इति प्रयत्ने लाक्षणिकपदप्रयोगस्तु ईश्वरेच्छामनङ्गीकुर्वतं प्रति प्रयत्नाङ्गीकारेण बुद्धिनिराकरणोपादानप्रकारेणैव प्रयत्नानङ्गीकारिणं प्रति इच्छामङ्गीकृत्य बुद्धिनिराकरणमपि उपपादनीयमिति सूचयितुमिति न कश्चिद्दोषः । ईश्वरप्रयत्नस्येति पाठस्तु स्वरस एवेति ज्ञेयम् । सङ्क्षेपो व्याख्येयोऽस्ति ।

स०व्र०— **बुद्धित्वादिनेति** । आदिपदेन प्रयत्नत्वपरिग्रहः । तथा च बुद्धिप्रयत्नयोः स्वतो विषयप्रवणत्वेऽपि बुद्धित्वप्रयत्नत्वरूपजातिभेदेन भेद इति भावः । **अन्यथेति** । परोपाधिकं विषयप्रवणत्वं ययोरिति सम्बन्धः ।

स०ना०— तस्मिन्नेव मूले **न तृतीय इति** । ईश्वरप्रयत्नस्य विषयो हि नेश्वरस्य ज्ञानाभावे विनिर्णेतुं शक्यते । यः प्रयत्नः यज्ज्ञानपूर्वकः तज्ज्ञानविषय एव प्रयत्नस्य विषयः । इति तद्विषयस्य निर्णेतव्यत्वात् तज्ज्ञानार्थमिति तृतीयः पक्षो नेत्यर्थः । **स्वरूपग्राहकेति** । ईश्वरप्रयत्नग्राहकागमेनैवेत्यर्थः । **बुद्धेरपीति** । अन्यथा यत्र ज्ञानजन्या ज्ञातता स एव ज्ञानस्य विषय इति विज्ञानविषयस्यापि निर्णेतव्यत्वप्रसङ्गेनेत्यर्थः ।

विठ्ठल०— **प्रयत्नवत एव वा कर्तृत्वं भविष्यतीति** । किं बुद्ध्येति शेषः । बुद्धिवत्स्वतो विषयप्रवणतोपपत्तेरित्यतः पूर्वमिच्छयैव प्रयत्नस्य विषयनियमोपपत्तिः । न च वाच्यं इच्छाया अपि विषयनियमार्थं बुद्धिरपेक्षणीयेति वाक्यद्वयमध्याहार्यं स्वरूपं राहकातिरिक्तप्रमाणग्राह्यत्वे बुद्धेरपि तथा स्यादित्याह **बुद्धेरपीति** ।

॥ इति इच्छेतरस्यापि निषेध्यत्वम् ॥

* * *

॥ अथ तद्दूषणोक्तेर्विवरणे महातात्पर्ययुक्तेश्चेत्युक्तार्थविवरणम् ॥

१३७ सु०— 'महातात्पर्ययुक्तेश्चेति यदुक्तं तदसत्, यदीश्वरो नेच्छावान् स्यात् तदा श्रुतिमहातात्पर्यविषयो न स्यादित्यत्र व्याप्त्यभावात्; इच्छारहितस्यापि धर्मादेस्तत्तच्छास्त्रमहातात्पर्यविषयत्वदर्शनात्; आपाद्यस्यानिष्टत्वाभावाच्च' इत्यत उक्तं विवृणोति **मोक्षार्था इति** ।

अनु०— मोक्षार्थाः श्रुतयो यस्मात्स च तस्य प्रसादतः ।
उन्निनीषतिवाक्याच्च लोकद(ष्ट्य)ष्टानुसारतः ।
इच्छानिमित्तको यस्मात्तदभावे कुतः श्रुतिः ।
महातात्पर्यरहिता प्रमाणत्वं गमिष्यति ।

यस्मात् कारणात् सर्वा अपि **श्रुतयो मोक्षार्थाः** मोक्षप्रयोजनाः तस्मात् **तदभावे** परमेश्वरस्येच्छाऽभावे तत एव मोक्षार्थताऽभावे **श्रुतिः** तत्र **महातात्पर्यरहिता** स्यात् । तथा च कथं **प्रमाणत्वं गमिष्यतीति** योजना ।

मोक्षार्थत्वे किमीश्वरस्येच्छयेत्यत उक्तम् **स चेति** । **स च** मोक्षः **तस्य** ईश्वरस्य **प्रसादतो यस्मात्** तस्मात् **तदभाव** इति सम्बन्धः ।

तथाऽपीश्वरस्य प्रसादेन भाव्यं किमिच्छयेत्यतः **प्रसादत** इत्येतद्व्याख्यातम् **इच्छानिमित्तक इति** ।

ईश्वरज्ञानादेव मोक्षसिद्धेः किं तत्प्रसादेनेत्यत उक्तम् **लोकेति** । विमतो बन्धमोक्षः प्रभुप्रसादसाध्यो मोक्षत्वात् शृङ्खलामोक्षवत् इत्यादिलोकदृष्टव्याप्त्युपेतानुमानानुसारतः इत्यर्थः ।

न केवलमनुमानात् किन्तु आगमादपीत्युक्तम् **उन्निनीषतीति** । 'एष ह्येव साधुकर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते' इति **वाक्याच्च** । अत्र **कर्म** इत्युपलक्षणम् । **उन्निनीषते** ऊर्ध्वं नेतुमिच्छति ।

यद्वा प्रसादशब्देनेच्छोच्यते इत्यत्र इदं वाक्यं (वाक्यमेतत्) ज्ञापकम् । लोकदृष्टा(ष्ट्य)नुसारत इत्येतदप्यस्यैव अर्थस्य ज्ञापकमुक्तम् ।

श्रुतय इत्युपक्रम्य श्रुतिरित्येकवचनं कैमुत्यार्थम्, 'एकमपि वाक्यं न तत्र महातात्पर्यवत्स्यात्, किमुत सर्वाः श्रुतय' इति ।

परि०— तत्तच्छास्त्रेति । धर्ममीमांसातात्पर्यविषयत्वं धर्मस्य, साङ्ख्यशास्त्र-तात्पर्य-विषयत्वं योगस्य व्याकरणतात्पर्यविषयत्वं शब्दस्येत्येवं दर्शनादित्यर्थः । बहुवचनलब्धार्थोक्तिः **सर्वा अपीति** । तदभाव इत्यत्र तत्पदं व्यस्तं समस्तं चेत्युपेत्य वा यत्तदोर्नित्यसम्बन्धाद्वाह **तस्मादिति** । तदभाव इत्यस्यार्थद्वयमाह **परमेत्यादि** । **कर्मेत्युपलक्षणमिति** । प्रबोधयतीति ज्ञानस्योपलक्षणमित्यर्थः । कर्मणो मुक्तिहेतुप्रसादाहेतुत्वादिति भावः । लक्षणादोषं मन्वान आह **यद्वेति** ।

गु०दी०— एष ह्येव साधुकर्म कारयति इति श्रुतेः यं येभ्यो लोकेभ्य उन्निनीषते तं साधुकर्म कारयतीति योजना ।

यादु०— कर्मेत्युपलक्षणमिति । ईश्वरज्ञानस्योपलक्षणमित्यर्थः । अन्ययोन्निनीषतिशब्दोक्तस्य मोक्षहेतुप्रसादस्य कर्मसाध्यत्वानुपपत्तिर्वक्ष्यमाणसम्बन्धानुपपत्तिश्चेति भावः । यद्यपि मूले श्रुतिप्रतीकग्रहणाय उन्निनीषत इति वाक्याच्चेति वक्तव्यम् । तथापि 'इक्श्तिपौ धातुनिर्देश' इति वचनात् धातुनिर्देशमात्रमेतत्र पदग्रहणमिति मन्तव्यम् ।

वं०प०— तत्तदिति । धर्मशास्त्रादीत्यर्थः । कर्मणो मोक्षाहेतुत्वात् 'यमूर्ध्वं नेतुमिच्छति तेन कर्म कारयती'ति कथमुच्यतेऽत आह **अत्रेति** । ज्ञानस्येति शेषः । तथा च तेन ज्ञानं सम्पादयतीत्यर्थः । यद्वेत्यनन्तरं तथाऽपीश्वरप्रसादेनैव भाव्यं किमिच्छयेत्याशङ्कानिरासायेति वाक्यशेषः । **ज्ञापकमिति** । यथा सतीत्यादिवक्ष्यमाणरीत्येत्याशयः । **अस्यैवेति** । ईश्वरप्रसादशब्देनेच्छोच्यत इत्यस्यैव । प्रसन्नोऽस्मीति प्रतीतौ परोपचिकीर्षाया एव प्रतीतेरित्यादिनेदं विवृतं भविष्यति । एकमपि वाक्यमित्यतः पूर्वमिच्छाऽभावे इति शेषः ।

कं०रा०— अत्रेति । 'एष ह्येव साधुकर्म कारयती'ति वाक्ये कर्मपदं ज्ञानादेरपि उपलक्षक-मित्यर्थः ।

श्रीनिधि०— इत्येव सम्बन्ध इति । यस्मात् श्रुतयो मोक्षार्थाः स च तस्य प्रसादतः तस्मात्तदभाव इति पूर्वेणैव सम्बन्धः । आकाङ्क्षानुसारेण तु पृथगवतारकृत इति भावः । **उन्निनीषतीत्यर्थतो**ऽनुवादः । अतो नात्मनेपदत्वविरोधः । सनन्तस्य **कर्मेत्युपलक्षणमिति** ज्ञानस्येति शेषः । श्तिपानिर्देश इति केचित् ।

शे०वा०— मोक्षार्था इत्युत्तरग्रन्थानर्थक्यमाशङ्क्य प्रागुक्तमहातात्पर्ययुक्तिरूप-विपक्षेबाधकतर्क-विवरणरूपत्वान्नानर्थक्यमित्यभिप्रेत्य तत्तर्कविवरणरूपतयोत्तरवाक्यं सङ्गमयितुं तदनुपपत्तिशङ्कामुत्थापयति **महातात्पर्ययुक्तेश्चेति** । **यदुक्तमिति** । **व्याप्त्यभावादिति** । विपक्षे बाधकाभावेनाप्रयोजकत्वान्न विशेष-व्याप्तिरित्यर्थः । अस्तु तर्हि सामान्यव्याप्तिरित्यत आह **इच्छेति** । अर्थशब्दस्य विषयापरपर्यायस्य बाधितत्वेन ग्रहणायोगात् प्रयोजनपरतया तं व्याचष्टे **मोक्षप्रयोजना इति** । उन्निनीषतिशब्दोक्तस्य मोक्षहेतुप्रसादस्य कर्मसाध्यत्वानुपपत्तेर्वक्ष्यमाणसम्बन्धानुपपत्तेश्चाह **अत्रेति** । **उपलक्षणमिति** । ईश्वरज्ञानस्येति शेषः । यद्यप्यत्र मूले श्रुतिप्रतीकग्रहणाय 'उन्निनीषत इति वाक्याच्चे'त्येवं वक्तव्यं तथाऽपि क्रियाफलस्यात्मगामितानिरासायो-न्निनीषतीति परगामित्वसूचनेनार्थतस्तदनुवादः कृत इति ध्येयम् । **यद्वेति** । इच्छानिमित्तक इत्यनेन प्रसादत इत्येतदिच्छयेति व्याख्यातम् । तत्र ज्ञापकमाह **लोकदृष्ट्यनुसारत इति** । उन्निमीषतिवाक्याच्चेति मूल-योजनामनेन सूचयति **अस्यैवार्थस्येति** । प्रसादशब्देनेच्छोच्यत इत्यस्यैवार्थस्येत्यर्थः । प्रसन्नोऽस्मीति प्रतीतौ परोपचिकीर्षया एवात्र प्रतीतेरिति भावः । उपक्रमोपसंहारयोरुभयत्रापि बहुवचनस्यैकवचनस्य वा प्रयोक्त-व्यत्वाद्वैचित्र्यानुपपत्तिप्रयुक्तं भाष्यकाराणामचातुर्यं प्रयोजनोक्त्या परिहरति **श्रुतय इत्युपक्रम्येति** । कैमुत्यमेव व्यनक्ति **एकमपीति** ।

वा०र०— यो नेत्युक्त्यनुसारेणावतारादेवोक्तमिति ज्ञेयम् । उपलक्षणं चेदम् । अभिधेयाद्यर्थस्येत्यपि द्रष्टव्यम् । **बाधितत्वादिति** । प्राधान्यतो भगवदर्थकत्वेन मुख्यतः तद्देवताद्यर्थकत्वेन मोक्षार्थं कृतायाः बाधादित्यर्थः । **प्रयोजनतयेति** । अर्थोऽभिधेयं इत्यभिधानस्य प्रयोजनेऽपि तुल्यत्वादिति भावः । **कर्म-साध्यत्वेति** । 'नान्यः पन्था' इति श्रुतेरिति भावः । **वक्ष्यमाणेति** । विषयप्रयोजनयोः सम्बन्धानुपपत्तेः निरसिष्यमाणतया वक्ष्यमाणता निरस्यत्वेन ज्ञेया । **क्रियाफलस्येति** । इषु धात्वर्थप्रसादरूपक्रिया-साध्यफलमोक्षस्येत्यर्थः । परोपचिकीर्षयाः एव प्रतीतेरिति भाव इति पाठः । अत्रेतिपदं लेखकागतम् । **उपक्रमेति** । उभयत्रेत्यस्य विवरणं **उपक्रमेत्यादि** । उपक्रमोपसंहाररूपस्थलद्वयेऽपीत्यर्थः । बहुवचनस्यैव वा एकवचनस्यैव वा इति योज्यम् । वक्तव्यत्वाद्या वैचित्र्यानुपपत्तिः उपक्रमे बहुवचनमुपसंहारे तु एकवचन-भेदानुपपत्तिर्निर्निमित्तं एकार्थप्रतिपादकस्थले वचनभेदायोगात् इत्यनुपपत्तिः तत्प्रयुक्तमिति योज्यम् ।

स०व्र०— व्याप्त्यभावादिति । विपक्षे बाधकशून्यत्वेनाप्रयोजकत्वेन विशेषव्याप्त्यभावादित्यर्थः । माऽस्तु विशेषव्याप्तिः । सामान्यव्याप्तिरेव किं न स्यादित्यत आह **इच्छेति** । **उपलक्षणमिति** । श्रवणादेरिति शेषः । उन्निनीषतीत्यनुव्याख्याने 'इक्श्तिपौ धातुनिर्देशे' इति समाधानम् । **उन्निनीषते इति** । 'नीङ् (णीञ्)

प्रापणे' इत्यस्य ङित्वादात्मनेपदित्वम् । सन्नन्तत्वेऽपि 'पूर्ववत्सन' इत्युक्तत्वादात्मनेपदमेव युक्तमित्यर्थः । **अस्यैवार्थस्येति** । प्रसादशब्देनेच्छोच्यते इत्यस्यार्थस्येत्यर्थः । प्रसन्नोऽस्मीति प्रतीतौ परोपचिकीर्षाया एव प्रतीतेरिति भावः ।

विठ्ठल०— कर्मेत्युपलक्षणमिति । ईशज्ञानस्येति शेषः ।

१३८ सु०— एतदुक्तं भवति । "शास्त्रं हि साध्यसाधनभाववद्विषयप्रयोजनवत्तया व्याप्तम् । तत्र श्रुतीनां मोक्ष एव प्रयोजनम्, 'तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तत' इति वचनात्, मोक्षादन्यत्रात्यन्तिकदुःखप्रहाणायोगात् । स्वर्गादिप्रयोजनं भवदप्यवान्तरमेव न प्रधानम् । विषयस्तु परमेश्वर एव, 'सर्वे वेदा यत्पदमामनन्ती'त्यादिवचनात् । धर्मादिकं त्ववान्तरप्रतिपाद्यम् । अभिप्रेतप्रयोजनसाधनं च विषयतामश्नुते । न च धर्मादिकं मोक्षसाधनम्, 'पुण्यचितो लोकः क्षीयत' इति श्रुतेः । अतो भगवत्येव मोक्षसाधनत्वात् सर्वश्रुतीनां महातात्पर्यम् ।

न चाव्यापृतात्साधनात्फलसिद्धिः । व्यापारश्च प्रसाद एव, न तु श्रुतिजनितं तज्ज्ञानं साक्षात्कारो वा, 'यस्य प्रसादादि'त्यादिवाक्यादुक्तानुमानाच्च । ज्ञानं तु प्रसाद-साधनमिति न सम्बन्धानुपपत्तिः । प्रसादो नामेच्छाविशेषः, तथा सति 'उन्निनीषते', 'तदिच्छया यतो ह्यस्य बन्धमोक्षौ प्रतिष्ठिताविं'त्यादिश्रुतिभिः 'यस्य प्रसादादि'ति श्रुतेरैकार्थ्यलाभात्, प्रसन्नोऽस्मीति प्रतीतौ परोपचिकीर्षाया एव स्फुरणात् ।

तथा च यदीश्वरो नेच्छावांस्तदा न प्रसीदेद्घटवत्, सामान्याभावे विशेषा-भावनियमात् । प्रसादरहितश्च न मोक्षसाधनं स्यात्, यद्यत्र विवक्षितावान्तरव्यापाररहितं न तत्तत्र साधनमिति व्याप्तेः । मोक्षं प्रत्यसाधनं च न मोक्षशास्त्रमहातात्पर्यविषयः स्यात् । तथा च मोक्षप्रयोजनता श्रुतीनां हीयेत । न च विषयान्तरं प्रयोजनान्तरं चास्तीति विषयप्रयोजनशून्यत्वादप्रामाण्यमेवापद्येत । न च तदपौरुषेयतयाऽनाशङ्कित-दोषस्य वाक्यस्योपपद्यते । अतोऽवश्यमुक्तेन क्रमेणेच्छावत्त्वं भगवतोऽङ्गीकरणीयम्" इति ।

परि०— साध्यसाधनेति । यथायोग्यमन्वयो न यथाक्रमम् । साधनसाध्यभाववती ये विषयप्रयोजने तद्वत्तयेत्यर्थः । तद्वत्त्वं च प्रयोजनसाधनं यो विषयस्तस्य सव्यापारीकारि(त्वेनेति)-

त्वमिति ज्ञेयम् । श्रुतौ मोक्षायेत्यश्रवणादाह **मोक्षादन्यत्रेति** । **विषयस्त्विति** । श्रुतीनामित्यनुषङ्गः । **अव्यापृतादिति** । व्यापाररहितादित्यर्थः । **उक्तेति** । विमतो बन्धमोक्ष इत्युक्तानुमानाच्चेत्यर्थः । एवं तर्हि श्रुतिरूपशास्त्रस्य साध्यं मोक्षरूपफलं प्रति साधनभावापन्नविषयेण सह कथं सम्बन्धः । तदनुत्पादकत्वात् प्रसादस्य । दृष्टहान्यदृष्टकल्पनापत्त्या श्रुत्यजन्यत्वेन सव्यापारीकारित्वस्याप्यभावादित्यतोऽस्ति ज्ञाप्यज्ञापकरूपसम्बन्ध इति भावेनाह **ज्ञानं त्विति** । श्रुतिजनितं विषयज्ञानं त्वित्यर्थः । तावता इच्छावत्त्वे किमायातमित्यत आह **प्रसादो नामेति** । **उन्निनीषत इति** । 'यमेभ्यो लोकेभ्य उन्निनीषत' इति प्रागुक्तश्रुतेः प्रतीकग्रहणम् । 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' इत्यत्र भाष्योक्तस्मृतिमाह **तदिच्छयेति** । आपाद्यापादकयोर्व्याप्तिं व्यनक्ति, **सामान्याभाव इति** । **अङ्गीकरणीयमिती**तिशब्दस्यैतदुक्तमिति पूर्वेणान्वयः ।

गु०दी०— उक्तानुमानाच्च इत्युपलक्षणम् । ज्ञानस्य चिरनष्टत्वेन आमोक्षं स्थायित्वायोगात् तज्जन्यस्तज्जन्यजनको हि व्यापारः इत्यपि द्रष्टव्यम् ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितायां गुर्वर्थदीपिकायां द्वितीयाध्यायस्य प्रथमः पादः ॥

वं०प०— साध्येत्यादि । साध्यसाधनभाववती ये विषयप्रयोजने तद्वत्तयेत्यर्थः । अत्र यथायोग्यं सम्बन्धो न यथाक्रमम् । अवान्तरप्रतिपाद्यत्वं विवृणोति **अभिप्रेतेति** । **मोक्षेति** । अभिप्रेतप्रयोजनरूपेत्यर्थः । येन तत्साधनत्वेन धर्मादिर्मुख्यविषयता स्यादित्यर्थः । भगवत्येव महातात्पर्यमिति सम्बन्धः । मोक्षसाधनत्वाद्भगवत इति शेषः । **चितः** प्राप्तः । **अव्यापृतादिति** । व्यापारशून्येश्वररूपसाधनादित्यर्थः । **व्यापारश्चेति** । मोक्षसाधनभूतस्य भगवतो मोक्षजनकत्वे इति शेषः । **ज्ञानं** परोक्षम् । **उक्तेति** । विमतो बन्धमोक्षः प्रभुप्रसादसाध्यः मोक्षत्वात् शृङ्खलामोक्षवदित्यनुमानादित्यर्थः । ननु ज्ञानस्य मोक्षसाधनत्वाभावे तद्वैयर्थ्यमेव स्यादित्यत आह **ज्ञानं त्विति** । परम्परया मोक्षे उपयोगोऽस्तीत्याशयः । मुखप्रसन्नतादिरूपप्रसादस्य ज्ञानासाध्यत्वादाह **प्रसादो नामेति** । प्रसादशब्देनेच्छोच्यत इत्यत्रापीदमेव ज्ञापकमित्युक्तं विवृणोति **तथा सतीति** । प्रसादस्येच्छाविषयत्वे सतीत्यर्थः । लोकदृष्ट्यनुसारत इत्येतदप्यस्यैवार्थस्य ज्ञापकमित्युक्तं विवृणोति **प्रसन्नोऽस्मीति** । **न प्रसीदेदिति** । परोपचिकीर्षावान्न स्यादित्यर्थः । अप्रयोजकतां परिहरति **सामान्येति** । इच्छासामान्यस्याभावे परोपचिकीर्षारूपप्रसादाख्येच्छाविशेषोऽपि न स्यादित्यर्थः । **यत्** कुठारादि । **यत्र** छिदादौ । **विवक्षितेति** । कुठारदारुसंयोगादिरूपेत्यर्थः ।

कं०रा०— शास्त्रं हीति । शास्त्रं साधनसाध्यभावापन्ने ये विषयप्रयोजने न तद्वत्तया व्याप्तं हीत्यर्थः । ननु 'तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तत' इति वचनेन श्रुतीनां जीवसम्बन्धिदुःखप्रहाणमेव

प्रयोजनत्वेनोच्यते न तु मोक्ष इत्यत आह **मोक्षादिति** । तेषां दुःखप्रहाणायेत्यत्र प्रशब्देनात्यन्तिकदुःखहानस्य प्रतीतेस्तस्य च मोक्षादन्यत्रायोगादनेन वाक्येन श्रुतीनां मोक्ष एव प्रयोजनत्वेनोच्यत इति भावः । **न चेति** । उद्यमननिपतनादिव्यापाररहितात् कुठारादेः छिदा निष्पत्तेरदर्शनादव्यापृतात्साधनात्फलसिद्धिर्नेति मोक्षसाधनस्य भगवतो व्यापारो वाच्यः । स च व्यापारः प्रसाद एव न तु श्रुतिजनितं भगवज्ज्ञानं तत्साक्षात्कारो वा यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणेत्यादिवाक्यात् विमतो बन्धमोक्षः प्रभुप्रसादसाध्यः मोक्षत्वात् शृङ्खलाबन्धमोक्षादिवेत्याद्यनुमानाच्चेत्यर्थः । ननु शास्त्रजनितभगवज्ज्ञानस्य व्यापारतया मोक्षसिद्धचनङ्गत्वे प्रयोजनयोः सम्बन्धानुपपत्तिरित्यत आह **ज्ञानं त्विति** । शास्त्रजनितभगवज्ज्ञानं तु मोचकप्रसादसाधनमिति प्रसादद्वारा शास्त्रजन्यज्ञानस्य मोक्षहेतुत्वान्न सम्बन्धानुपपत्तिरिति भावः ।

श्रीनिधि०— ननु शास्त्रस्य महातात्पर्यमेव मास्तु भावे वा भगवत्येवेति कुतः अन्यत्रापि किन्न स्यात् । प्रयोजनं च किमर्थं वाच्यं वाच्यत्वे वा मोक्षार्थत्वमेव कुतः । तदर्थत्वेऽपि भगवति महातात्पर्यं कुतः भगवदायत्तत्वेन तथात्वेऽपि तत्प्रसादः किमर्थमभ्युपगन्तव्यः तदावश्यकत्वेऽपि इच्छा किमर्थमङ्गी-करणीया तदभावे च महातात्पर्यं भगवति कथं न भवेत् इच्छारहितस्यापि धर्मादेः शास्त्रमहातात्पर्य-विषयत्वदर्शनादित्याशङ्कायां सर्वमुपपादयितुं प्रतिजानीते **एतदुक्तं भवतीत्यादिना** । तर्हि शास्त्रस्य प्रयोजनस्य च सम्बन्धो न स्यादित्यत आह **ज्ञानं त्विति** । शास्त्रजनितमिति भावः । अत्र धर्मादिकं तु अवा-न्तरप्रतिपाद्यमिति वदता इच्छारहितस्यापि धर्मादेस्तच्छास्त्रमहातात्पर्यविषयत्वदर्शनादिति शङ्का निरस्ता । मुख्यप्रतिपाद्यत्वस्य तदभावे सम्भवादिति भावात् । धर्मादीनां मुख्यतस्तदप्रतिपाद्यत्वं मुख्यप्रयोजनसाध्य-त्वादिति द्रष्टव्यम् । **मोक्षं प्रत्वसाधनं चेति** । अभिप्रयोजनसाधनस्यैव तत्साधनशास्त्रमहातात्पर्यविषय-त्वादिति भावः । **मोक्षप्रयोजनतत्युपलक्षणम्** । भगवद्विषयता चेति द्रष्टव्यम् । अत एवाह **न च विषयान्तरमित्यादिना** । **उक्तक्रमेणेति** । महातात्पर्यविषयत्वादिक्रमेणेत्यर्थः ।

शे०वा०— ननु 'तदभावे कुतः श्रुतिः । महातात्पर्यरहिता प्रमाणत्वं गमिष्यती'त्यनेन महा-तात्पर्ययुक्तिरूप-विपक्षेबाधकतर्कविवरणं क्रियत इत्युक्तम् । तदयुक्तम् । मोक्षसाधनत्ववर्णनस्यानर्थकत्वात् । न चाविषयत्वोपपादनार्थं तदिति वाच्यम् । विषयतायां मोक्षसाधनताया अप्रयोजकत्वेन तदभावस्य तदनापादकत्वात् । तत्प्रयोजनसाधनत्वस्य तद्विषयत्वप्रयोजनकत्वेऽपि वा तत्प्रयोजनासाधनत्वस्यैव तद-विषयतोपपादकत्वेन तस्यैवापादकतया वर्णनीयत्वेन् मोक्षासाधनत्वस्य तदनुपपत्तिरेव । न च मोक्षस्यैव श्रुत्यादिप्रयोजनत्वाद्युक्ता तदसाधनत्वस्यापादनतयोक्तिरिति वाच्यम् । प्रमाणाभावेन स्वर्गादिरूपप्रयोजनान्तर-बलेन श्रुत्यादेर्मोक्षप्रयोजनकत्वासिद्धेः । अस्तु वा कथञ्चित् तत्प्रयोजनत्वम् । तथाऽपि शास्त्रविषयस्यैव मोक्षसाधनत्वावश्यम्भावादविषयस्य भगवतस्तदनवश्यम्भावाद्भगवतस्तदसाधनत्ववर्णनासङ्गतिरेव । न च भगवत एव श्रुतिविषयत्वाभिप्रायेण तद्वर्णनमिति नासङ्गतिरिति वाच्यम् । प्रमाणाभावेन विषयान्तरसद्भावेन च

भगवतस्तद्विषयत्वायोगात् । अस्तु वा भगवत एव विषयत्वमपि । तथाऽपि तस्य मोक्षसाधनत्वासिद्धेर्न तेन श्रुतितात्पर्यविषयत्वापादनं सम्भवति । न चात एव तदापादकतया तदभाव इतीच्छावत्वाभाववर्णनमिति वाच्यम् । मोक्षसाधनतायामिच्छाया उपयोगाभावेन तदभावेन तदापादनायोगात् । न च प्रसादरूपभगवद्व्यापारसम्पादकतयाऽस्त्येवेच्छावत्वस्यापि मोक्षसाधनत्वे उपयोग इति वाच्यम् । अव्यापृतस्यापि भगवतः साधनत्वसम्भवेन तद्व्यापारस्यैवानपेक्षितत्वात् । व्यापृतस्यैव भगवतः साधनत्वावश्यम्भावेऽपि श्रुतिजनितविज्ञानस्यैव वा भगवत्साक्षात्कारस्यैव वा भगवद्व्यापारत्वसम्भवेन प्रसादस्यैव व्यापारत्वमित्यस्य निर्निबन्धनत्वाच्च । प्रसादस्य व्यापारत्वे शास्त्रस्य प्रयोजनसम्बन्धाभावापातेनानुपादेयत्वप्रसङ्गाच्च । कथञ्चित्सम्बन्धोपपादनेन प्रसादस्यैव व्यापारत्वाश्रयणेऽपि नेच्छासिद्धिः । इच्छारहितस्यापि भगवत उक्तयुक्तिसिद्धप्रसादरूपव्यापारमात्रेणैव मोक्षसाधनत्वनिर्वाहात् । न चेच्छारूपत्वात् प्रसादस्य तत्सिद्धाविच्छावत्त्वमेव सिद्ध्यतीति वाच्यम् । नियामकाभावेन प्रसादस्य तद्रूपत्वासम्भवात् । भावेऽपि वेच्छारहितस्य प्रसादराहित्यापादनानुपपत्तिरेव । प्रयोज्यप्रयोजकभावाप्रतीतेः । कथञ्चिदुपपत्तावपि भगवति महातात्पर्यरहितत्वेन प्रसादराहित्यापादनार्थं श्रुत्यप्रामाण्यापादनं निर्बीजमेव । विषयान्तरं प्रयोजनान्तरं वाऽऽदाय प्रामाण्यसम्भवात् । आपाद्यस्याप्रामाण्यस्येष्टत्वादिष्टापत्तिश्चेति कथमस्योक्ततर्कविवरणरूपत्वमित्यत उक्तसर्वाक्षेपपरिहारेण विवरणरूपतामुपपादयितुमाह **एतदुक्तं भवतीति** ।

तत्र तावन्मोक्षसाधनत्वेन महातात्पर्यविषयत्वापादनमुपपादयितुं विषयप्रयोजनयोः साध्यसाधनभावनियमं तावत्सूचयति **शास्त्रं हीति** । साध्यसाधनभाववती ये विषयप्रयोजने तद्वत्तयेत्यर्थः । यस्य शास्त्रस्य यत्प्रयोजनं तद्यज्ज्ञानाद्भवति स तस्य विषय इति नियमः । अन्यथा विषयप्रयोजनयोः सम्बन्धो न स्यात् । तथा च तत्र प्रेक्षावतां प्रवृत्तिर्न भवेदिति । श्रुतेर्मोक्षप्रयोजनकत्वाक्षेपं परिहरति **तत्रेति** । श्रुतिर्हि महाशास्त्रं 'वेदशास्त्रात्परं नास्तीति' वचनात् । तस्य च महापुरुषार्थेनैव प्रयोजनेन भवितुं युक्तम् । मोक्षश्च महापुरुषार्थः । 'धर्मार्थकामाः सर्वेऽपि न नित्या मोक्ष एव हि । मुख्यस्तस्मादि'ति श्रुतेः । अतः स एव तस्य प्रयोजनमिति भावः । न केवलं मोक्षस्य श्रुतिप्रयोजनत्वमुक्तरीत्या सम्भावितं किन्तु श्रुतमपीत्याह **तेषामिति** । नन्वेतच्छ्रुत्यनुरोधेन दुःखनिवृत्त्यर्थत्वप्राप्तावपि न मोक्षार्थत्वसिद्धिरिति नैतच्छ्रुत्युपन्यासः सङ्गत इत्यत आह **मोक्षादन्यत्रेति** । श्रुतौ यद्यप्यात्यन्तिकत्वं न श्रुतं तथाऽपि प्रशब्दप्रयोगलब्धस्यार्थस्यानुवादोऽयमिति द्रष्टव्यम् । भगवतो विषयत्वाक्षेपं परिहरति **विषयश्चेति** । तर्हि धर्मादिसाधकमानान्तराभावात् तदसिद्धिप्रसङ्ग इत्यत ईश्वरस्यैव महातात्पर्यविषयत्वेऽपि धर्मादिरवान्तरतात्पर्यविषयत्वमस्त्येवेति न तदसिद्धिप्रसङ्ग इत्याह **धर्मादिकमिति** । 'अवान्तरं तत्परत्वं तदन्यदि'ति श्रुतेरिति भावः । ईश्वरस्य श्रुत्यवष्टम्भेन श्रुतिविषयतामुपपाद्य युक्त्याऽप्युपपादयति **अभिप्रेतेति** । **मोक्षसाधनत्वादिति** । 'बन्धको भवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परम्ब्रह्म विष्णुरेव न संशयः' इति श्रुतेरिति भावः । अव्यापृतस्यैव साधनतोपपत्तेः किं व्यापारेणेत्याक्षेपं परिहरति **न चेति** । अयमर्थः । साधनं द्विविधं सिद्धमसिद्धं च ।

तत्रासिद्धमुत्पाद्यं फलकामेन, यथा यागादि । सिद्धं तु सव्यापारीकरणीयम्, यथा कुठारादि । सिद्धं च साधनं भगवानिति व्यापृतादेव तस्मात्फलसिद्धिर्नाव्यापृतादिति न केवलस्यं फलसाधनत्वमिति । व्यापारान्तरेण प्रसादस्यान्यथासिद्धिं परिहरति **व्यापारश्चेत्यादिना** । कुतः श्रुतिजनितभगवज्ज्ञानाद्यवधीरणेन प्रसादस्यैव व्यापारत्वाग्रह इत्यत आह **तस्येति** । **उक्तानुमानाच्चेति** । विमतो बन्धमोक्षः प्रभुप्रसादसाध्यो मोक्षत्वा-च्छृङ्खलामोक्षवदित्युक्तानुमानाच्चेत्यर्थः । नन्वेवं सति विषयप्रयोजनयोः सम्बन्धानुपपत्तिः प्रसज्यते । यस्य हि शास्त्रस्य यत्प्रयोजनं तद्यज्ज्ञानाद्भवति स एव तस्य विषय इत्यादिना शास्त्रप्रयोजनयोर्ज्ञानद्वारकसम्बन्धसिद्धेः । प्रकृते च प्रसादस्य शास्त्रप्रयोजनसाधनत्वेन भगवतो मोक्षसाधनज्ञानविषयत्वालाभादित्यत आह **ज्ञानं त्विति** । यद्वा ननु ज्ञानस्याव्यापारत्वं तमेवमिति वाक्योक्तमोक्षज्ञानस्य मोक्षसम्बन्धो न स्यात् । प्रसादस्यैव व्यापारत्वाभ्युपगमादित्यत आह **ज्ञानं त्विति** । सम्बन्धानुपपत्तिः ज्ञानस्य मोक्षसाधनत्वानुपपत्तिर्नेत्यर्थः । **प्रसादो नामेति** । तत्स्वरूपकथनेनेच्छामात्रस्यानादितया नित्यसिद्धत्वेऽपीच्छाविशेषस्यानभिव्यक्त्यादिसूचनेन ज्ञानप्रसादयोः साध्यसाधनभाव उपपादित इत्यवधेयम् । प्रसादस्येच्छारूपत्वे नियमाकाक्षेपं परिहरति **तथा सतीति** । एवमर्थापत्तिः प्रमाणत्वेनोक्ता । प्रसादस्येच्छारूपत्वे प्रत्यक्षमप्याह **प्रसन्नोऽस्मीति** । इच्छारहितत्वेन प्रसादराहित्यापादनस्य निर्बीजत्वेनानुत्थानं परिहरति **तथा चेति** । बीजमाह **सामान्याभाव इति** । एवं तदभावे तदभाव इति आवृत्त्याद्याश्रयणेन इच्छारहितत्वेन प्रसादरहितत्वापादनं मूलाभिप्रेतं समर्थितम् । इदानीं तदभावे प्रसादरहितत्वे तदभावो मोक्षसाधनं न स्यादित्यावृत्त्याद्याश्रयणेन मूलाभिप्रेतमापादनं तन्मूलभूतव्याप्तौ दृष्टान्ता-भावादयुक्तमित्याशङ्क्य दृष्टान्ताभावेन विशेषव्याप्तेरसम्भवेऽपि सामान्यव्याप्तेरविकलत्वान्न तन्मूलकापादना-नुपपत्तिरित्यभिप्रेत्य आपादनप्रकारप्रदर्शनपूर्वकं सामान्यव्याप्तिमुपपादयति **प्रसादरहितश्चेति** । तदभावे मोक्ष-साधनत्वाभावे श्रुतिर्महातात्पर्यरहिता स्यादित्यापादितां श्रुतितात्पर्यविषयत्वानुपपत्तिमापाद्य स्वरूपवर्णनपूर्वक-मनुवदति **मोक्षं प्रत्यसाधनं चेति** । अत्रापि यत् यं प्रत्यसाधनं तत् तत्फलकशास्त्रमहातात्पर्याविषय इति सामान्यव्याप्तिरनुसन्धेया । ननु मोक्षप्रयोजनकशास्त्रमहातात्पर्यविषयत्वाभावो नानिष्ट इति कथं तदापादनमित्यतः प्रमितस्य श्रुतीनां मोक्षप्रयोजनकत्वस्य हानिरूपानिष्टान्तरप्रसञ्जकत्वादनिष्टत्वमित्यभिप्रेत्य 'मोक्षार्थाः श्रुतयः' इति पूर्ववाक्यसूचितमनेन प्रसञ्जनीयमाह **तथा चेति** । ननु श्रुतीनां मोक्षप्रयोजनकत्वहानिरपि नानिष्टेत्यतः श्रुत्यप्रामाण्यप्रसङ्गरूपानिष्टान्तरप्रसञ्जकत्वादनिष्टत्वं तस्या इत्याशयेन 'तदभावे कथं प्रमाणत्वं गमिष्यती'ति भाष्यखण्डसूचितमनया प्रसञ्जनीयमापाद्यं दर्शयितुं, विषयप्रयोजनविशेषाभावेऽपि विषयान्तरस्य प्रयोजनान्तरस्य च सम्भवे निर्विषयत्वाद्यप्रसङ्गान्नाप्रामाण्यप्रसङ्ग इत्यतो न केवलं तदभाव इत्यनेनेश्वरविषयकत्वमोक्षप्रयो-जनकत्वाभावमात्रपरिग्रहः । किन्नाम विषयान्तरप्रयोजनान्तरयोरप्यभावपरिग्रहः । तथा च सर्वथा निर्विषयत्व-निष्प्रयोजनत्वसिद्ध्या युक्तमप्रामाण्यापादनमित्याशयवांस्तदभाव इत्येतत्सूचितविषयप्रयोजनान्तराभावमनुवद-न्नप्रामाण्यप्रसञ्जनमाह **न चेति** । ननु वेदस्याप्रामाण्यमस्त्येवेति नेदमप्यनिष्टमित्यत आह **न चेति** । कुतो नेत्यत उक्तम् **अपौरुषेयतयाऽनाशङ्कितदोषस्येति** । हेतुगर्भविशेषणम् । अप्रामाण्यस्य दोषजन्यत्वाद्वाक्ये च स्वाभाविकदोषाणामभावेन पुरुषदोषनिबन्धनानामेव तेषामवश्याश्रयणीयत्वात् । यत्र स्वतन्त्रो वक्ता पुरुषस्तिष्ठति

तत्र तद्दोषनिबन्धनानां दोषाणां सम्भवेऽपि वेदस्यापौरुषेयत्वेन तत्र पुरुषदोषनिबन्धनदोषाभावात् कारणाभावे च कार्यस्य शङ्कितुमशक्यत्वात् अप्रामाण्याभावनिश्चयान्नाप्रामाण्यं तस्य युक्तमङ्गीकर्तुमिति भावः ।

वा०र०— प्रमाणाभावेनेति । मोक्षप्रयोजकत्वासिद्धौ हेतुरयम् । तर्हि निष्प्रयोजनतया प्रामाण्यायोगः इत्यतः प्रयोजनान्तरसद्भावरूपहेत्वन्तरकथनं **स्वर्गादीति** । अत्र प्रयोजनान्तरत्वेन चेति चशब्दार्थान्तर्भाविन योज्यम् । तथा पाठस्तु स्वरस एव । अत एव विषयान्तरसद्भावेन च इत्युत्तरग्रन्थे चशब्दः । **तत्प्रयोजनत्वमिति** । तत्प्रयोजनकत्वमित्यर्थः । तत्त्वनिर्णयगीताभाष्यटीकानुसारेण उपपादयति **श्रुतिर्हीति** । जिज्ञासाधिकरणीयमूलानुसारेणाह । **अवधारणेनेति** । धृङ् अनादरे इत्यस्मात् अवधारणशब्दनिष्पत्तिः । शिष्टं नविलक्षणत्वाधिकरणे ज्ञेयम् । अनादरणेनेत्यर्थः । **तत्स्वरूपकथनेनेति** । तत्स्वरूपकथनेन जातं यदनभिव्यक्त्यादिसूचनम् । तेनेति सम्बन्धः । **नियामकाक्षेपं परिहरतीति** । उन्निनीषते इत्यादिश्रुतिषु क्वचित् इच्छायाः क्वचित् प्रसादस्य इत्येवं उभयोः मोक्षसाधनत्वप्रतिपादनेन विरोधापत्त्या तत्परिहाराय तदुभयान्यथानुपपत्तिरूपप्रमाणेन प्रसादस्य इच्छारूपत्वमिति प्रतिपादनात् उक्ताक्षेपनिराकरणसिद्धिरिति भावः । **तथा सतीति** । तथात्वेऽङ्गीकृते एव ऐकार्थ्यलाभादिति मूलार्थः ।

स०व्र०— शास्त्रमिति । साध्यसाधनभाववती ये विषयप्रयोजने तद्वत्तयेत्यर्थः । **उक्तानुमानादिति** । विमतो बन्धमोक्षः प्रभुप्रसादसाध्यः, मोक्षत्वात् शृङ्खलामोक्षवत् इत्यनुमानादित्यर्थः । ननु ज्ञानस्याव्यापारत्वे तमेवमित्यादिवाक्योक्तो ज्ञानस्य मोक्षसम्बन्धो न स्यात् । प्रसादस्यैव व्यापारत्वाभ्युपगमादित्यत आह **ज्ञानमिति** । **न सम्बन्धानुपपत्तिः** मोक्षसम्बन्धानुपपत्तिरित्यर्थः ।

विठ्ठल०— सम्बन्धशून्यविषयप्रयोजनवत्वमात्रस्याप्रयोजकत्वादित्यत उक्तं **साध्यसाधनभाववदिति** । ननु स्वर्गादिरपि प्रयोजनत्वस्य श्रुत्युक्तत्वात् कथं मोक्ष एव प्रयोजनमित्यत आह **स्वर्गादीति** । स च तस्य प्रसादत इत्यस्य तात्पर्यमाह **न चाव्यापृतादिति** । ननु शास्त्रजनितज्ञानस्याव्यापारता मोक्षसिद्ध्यनङ्गत्वे शास्त्रप्रयोजनयोः सम्बन्धानुपपत्तिरित्यत आह **ज्ञानं त्विति** । शास्त्रजनितं सम्यग्ज्ञानं तु मोचकभगवत्प्रसादसाधनमिति । तद्द्वारा मोक्षहेतुत्वान्न तस्य सम्बन्धानुपपत्तिरिति भावः । प्रसादत इत्युक्तं विवृणोति । इच्छानिमित्तकस्य विवरणं **प्रसादो नामेति** । आपाद्यस्यानिष्टत्वाभावादित्याशङ्कां परिहरति **तथा चेति** ।

॥ इति महातात्पर्ययुक्तेश्चेत्युक्तार्थविवरणम् ॥

॥ इति तद्भूषणोक्तेर्विवरणम् ॥

॥ इति 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरापव्याख्यानस्य निरासः ॥

॥ इति 'का स्पृहा' इति श्रुतेः इच्छालक्षणगुणनिषेधपरापव्याख्यानं तन्निरासश्च ॥

॥ इति उक्तार्थोदाहृतप्रमाणीयापव्याख्यानस्य दूषणम् ॥

॥ इति उक्तार्थसमर्थनार्थं उक्तार्थोदाहृतप्रमाणीयवाक्यव्याख्यानदूषणं तद्विवरणञ्च ॥

॥ इति भाष्योक्तैतदधिकरणीयप्रयोजने अव्याप्तिकाशङ्का,
तन्निरासः, तदुपपादनम्, तत्समर्थनञ्च ॥

* * *

॥ अथ एतदधिकरणीयशङ्कान्तरनिरासः ॥

॥ अथ तत्रादौ फलाभावस्याप्रामाण्यप्रयोजकत्वाभावशङ्कानिरासः ॥

१३९ सु०— "ननु विषयाभावे स्यादप्रामाण्यम्, फलाभावे तु कथमप्रामाण्यापादनम्। 'न हि फलवत्त्वं प्रामाण्यम्, किन्तु याथार्थ्यमेवे'त्युक्तम्। नापि प्रामाण्यस्य व्यापकम्। तृणादिदर्शनस्य प्रयोजनाभावेऽपि प्रामाण्याभ्युपगमात्" इत्यत आह **याथार्थ्यमेवेति**।

अनु०— याथार्थ्यमेव मानत्वमपि वाक्यं प्रयोजकम्। मानत्वमेति

यद्यपि याथार्थ्यमेव मानत्वं, न फलवत्त्वम्, नापि तेन व्याप्तम्। तथा **अपि वाक्यं प्रयोजकमेव मानत्वमेति** इति युक्तमापादनम्।

एतदुक्तं भवति। प्रामाण्यमात्रस्य प्रयोजनवत्त्वेन व्याप्त्यभावेऽपि तद्विशेषस्य वाक्यप्रामाण्यस्यास्त्येव; पदानामिष्टसाधन एव गृहीतसङ्गतिकत्वात्, पदसङ्गतिग्रहण-सव्यपेक्षस्यैव वाक्यस्य बोधकत्वात्, फलस्य विषयविशेषे वाक्यप्रामाण्यनिर्णयहेतुत्वाच्च। अतो व्यापकाभावे व्याप्यवाक्यप्रामाण्याभावापादनमुपपन्नमेवेति।

परि०— **अस्त्येवेति**। प्रयोजनवत्त्वेन व्याप्तिरित्यनुषङ्गः। **पदानामिष्टसाधन एवेति**। 'इष्टे व्युत्पत्तिरिष्यते। अत्यपूपांस्तव भ्रातेत्यादाववपातोऽपि चे'त्यादिव्याख्यावसरे जिज्ञासानय एव समर्थनादिति भावः। **फलस्येति**। प्रयोजनवदर्थप्रतिपादकत्वरूपफलस्येत्यर्थः। 'उपक्रमोपसंहारा-वभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये' इत्युक्तेरभेदपरतया प्रतीतवाक्याना-मभेदरूपविषयप्रमापकत्वं वा भगवद्गुणोत्कर्षप्रमापकत्वं वेति विचारे 'घातयन्ति हि राजानो राजाह-मिति वदन्तं, ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदत' इति सफलगुणोत्कर्षरूपविषयप्रमापकत्वस्य

तद्गुणसारत्वादित्यत्र निर्णयात् । 'असम्भवस्तु सतो अनुपपत्तेरि'त्यत्र असतः सदजायतेत्यादि-वाक्यस्य निष्फलभगवदुत्पत्तिरूपार्थपरित्यागेन सफलवायूत्पादकत्वरूपार्थप्रमापकत्वस्य निर्णयादिति भावः ।

यादु०— पदानामिष्टसाधन एवेति । प्रवर्तकवाक्यस्थपदानामित्यर्थः । प्रकृतं च श्रुतिवाक्यं प्रवर्तकमेवेति भावः । तेनेष्टासाधनानिष्टबोधकपदानामुदासीनानिष्टार्थेषु सङ्गतिग्रहाभावेऽबोधकत्वप्रसङ्ग इति शङ्कानवकाश इति ध्येयम् । **फलस्य विषयविशेष इति** । फलस्य तात्पर्यलिङ्गत्वादिति भावः ।

वं०प०— प्रयोजनशून्यत्वादप्रामाण्यमेवापाद्यत इत्यापादनं कुतो न कर्तुं शक्यत इत्यत आह **न हीति** । अस्त्येव प्रयोजनवत्त्वेन व्याप्तिरिति शेषः । **व्यापकेति** । प्रयोजनवत्त्वेत्यर्थः । व्याप्यभूतं यद्वाक्यप्रामाण्यम् । अत्र सर्वत्राप्यप्रामाण्यशब्दोऽनुपादेयत्वपरो मन्तव्यः ।

कं०रा०— तद्विशेषस्येति । प्रामाण्यविशेषरूपस्य वाक्यप्रामाण्यस्य प्रयोजनवत्त्वेन व्याप्ति-रस्त्येवेत्यर्थः । **फलस्येति** । फलस्य फलवत्यर्थे वाक्यतात्पर्यनिर्णायकत्वादित्यर्थः ।

श्रीनिधि०— प्रयोजकमेवेति । प्रयोजनवदेवेत्यर्थः । **प्रामाण्यमात्रस्येति** । प्रत्यक्षादिसाधारण-स्येत्यर्थः ।

शे०वा०— ननु याथार्थ्यमेवेत्युत्तरभाष्यमनर्थकम् । न च फलवत्त्वस्य वाक्यप्रामाण्यव्यापकतोप-दर्शनार्थं तदिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न च व्यापकाभावेन व्याप्यस्य प्रामाण्यस्या-भावव्युत्पादनार्थत्वान्न तदिति वाच्यम् । व्यापकाभावेन व्याप्याभावसाधनस्य प्रकृतोपयोगादर्शनादित्यतः प्रागुक्तस्य निष्प्रयोजनत्वेन वेदाप्रामाण्यस्य समर्थनार्थत्वान्नानुपपत्तिरित्यभिप्रेत्य तदनुपपत्तिशङ्कापरिहारक-तयोत्तरग्रन्थं योजयितुं निष्प्रयोजनत्वेनाप्रामाण्यापादनानुपपत्तिशङ्कामुत्थापयति **नन्विति** । **पदानामिति** । एतच्च प्राथमिकबालव्युत्पत्तिहेतुजिज्ञासोत्थापकतयेष्टसाधनत्वस्य तत्रोपयोगाभिप्रायेणोक्तं **पदसङ्गतिग्रहणसव्यपेक्ष-स्यैवेति** । अन्वयव्यतिरेकाभ्यां तथाऽवगमादिति भावः । **फलस्येति** । तात्पर्यलिङ्गत्वात् तस्येति भावः ।

वा०र०— अपौरुषेयत्वेन प्रामाण्योपपादनपरजिज्ञासाधिकरणीयमूलानुसारेणाह **अप्रामाण्यस्येति** । वाक्यप्रामाण्ये व्यापकत्वोपदर्शनार्थ इति पाठः । व्यापकत्वपदाभावे लेखकागतः । **प्रामाण्यस्येति** । वाक्यप्रामाण्यस्येत्यर्थः । लक्षणादिवाच्यवाचकभावसम्बन्धज्ञानरूपव्युत्पत्तेः । पश्चात्तनायाः इष्टसाधन एव सङ्गतिग्रहरूपत्वाभावात् आह **एतच्च प्राथमिकेति** ।

सं०र०— आकाङ्क्षाजिज्ञासयोरभावे शक्तिग्रहस्यैवासम्भवात् तयोश्च इष्टत्वेष्टसाधनत्वज्ञानाभावे असम्भवेन शक्तिग्रहणसव्यपेक्षस्य तज्ज्ञानस्यावश्यकत्वाभिप्रायेण इष्टसाधन एव इत्युक्तम् । न तु इष्टसाधनत्वस्य शक्यतावच्छेदकत्वाभिप्रायेण । तथात्वे घटादिपदश्रवणानन्तरम् इष्टसाधनत्वप्रकारकबोधापत्तेः । शक्यतावच्छेदकप्रकारकबोधस्यावश्यकत्वात् । तस्मात् योग्येतरान्वितत्वमेव शक्यतावच्छेदकमिति ध्येयम् । **इष्टसाधन एवेति** । न चैवमुदासीनेऽनिष्टसाधने वा सङ्गतिग्रहाभावात् उदासीनाद्यर्थप्रतिपादकवाक्यस्य अर्थबोधकत्वमेव न स्यादिति वाच्यम् । शास्त्रस्य प्रकृतत्वेन तस्य प्रवर्तकत्वात् तदभिप्रायेणैव तदभिधानाददोषः ।

विठ्ठल०— पदानामिष्टसाधन एवेति । प्रवर्तकवाक्यस्थपदानामित्यर्थः । प्रकृतं च सर्वं प्रवर्तकमेवेति भावः । तेन ज्ञातज्ञापकादिवाक्यस्याप्रवर्तकत्वेनाप्रामाण्यशङ्कानवकाश इति ज्ञेयम् । **फलस्य विषयविशेष इति** । फलवाक्यतात्पर्यनिर्णायकत्वादिति भावः ।

॥ इति फलाभावस्याप्रामाण्यप्रयोजकत्वाभावशङ्कानिरासः ॥

* * *

॥ अथ तत्र फलाभावस्य वाक्यविशेषाप्रामाण्यप्रयोजकत्वाङ्गीकारः ॥

१४० **सु०—** ननु च महातात्पर्यगोचरस्य विषयस्य परमप्रयोजनस्य चाभावेऽप्यवान्तरविषयेण धर्मादिनाऽप्रधानप्रयोजनेन च स्वर्गादिना विषयप्रयोजनवती श्रुतिः प्रमाणं भविष्यति इत्यत आह **तत्रापीति** ।

अनु०— तत्रापि यत्सम्पूर्णप्रयोजनम् ॥

वाक्ये **अपि** निर्धारणे सप्तमी । प्रयोजनवत्त्वे **अपि** इति वा । **यत्** वाक्यं **सम्पूर्णप्रयोजनं** महाप्रयोजनम् । उपलक्षणं चैतत्, प्रधानविषयं चेत्यपि द्रष्टव्यम् । **यत्** इति श्रवणात् तत् इति लभ्यते । **सम्पूर्णप्रयोजनम्** इति चावर्तनीयम् । 'मानत्वमेती'त्यनुवर्तनीयम् ।

तथा चायमर्थः । नावान्तरविषयप्रयोजनाभ्यां वाक्यस्य प्रामाण्यं सम्भवति, किन्नाम यद्वाक्यं यन्म(हा)हत्प्रयोजनमुद्दिश्य यं प्रधानं विषयं प्रतिपादयितुं प्रवृत्तं तत्ताभ्यां(एव)

प्रयोजनविषयाभ्यामुपेतं प्रामाण्यमश्नुते, तदभावेऽवान्तरप्रयोजनादेरप्यसिद्धेः, सिद्धौ वा तस्यैव प्राधान्यप्राप्तेः । वेदवाक्यं च मोक्षोद्देशेन परमेश्वरे महातात्पर्योपेतमित्युक्तम् । तत्तयोरेव विषयप्रयोजनयोरुपपत्तौ प्रमाणं स्यान्नान्यथेति ॥

परि०— पूर्वं वाक्यमिति प्रकृतत्वात् तत्रापीत्यस्य वाक्येऽपीत्येकवचनं युक्तम् । वाक्येष्वित्यर्थः । यतश्च निर्धारणमिति सूत्रे निर्धार्यमाणवस्त्वपेक्षया अवधिभूते सप्तमी षष्ठी वा भवति । गवां गोषु वा कृष्णा गौः बहुक्षीरेत्यादौ निर्धारणविधौ बहुवचनदर्शनादत एव प्रयोजनवत्त्वेऽपीति वेत्यर्थान्तरोक्तिः । इति चावर्तनीयमित्येतत् यत्तच्छब्दार्थाभ्यां अन्वयाय उपलक्षकस्यावृत्त्युक्त्याऽनुपलक्ष्यस्य प्रधानविषयं चेत्यस्याप्यावृत्तिरुक्तप्रायेति भावेन योजनामाह **यद्वाक्यमिति** । मानत्वमेतीत्यनुवृत्तस्यार्थः **प्रामाण्यमश्नुत इति** ।

यादु०— **सम्पूर्णप्रयोजनमिति चावर्तनीयमिति** । तेन वक्ष्यमाणोपनयलाभ इति भावः ।

वं०प०— **इति वेति** । वाक्यस्य प्रयोजनवत्त्वे सत्यपीत्यर्थः । **ताभ्यामेवेति** । तथा च यद्वाक्यं यत्सम्पूर्णप्रयोजनं महत्प्रयोजनमुद्दिश्य प्रवृत्तं तत्सम्पूर्णप्रयोजनमेव वाक्यं मानत्वमतीत्युपादेयं भवतीत्यावृत्तिः सूचिता । **तदभाव** महाप्रयोजनादेरभावे । **अवान्तरेति** । कस्मिंश्चिन्महाप्रयोजने सति तदपेक्षया किञ्चिदवान्तरप्रयोजनं स्यात् । महाप्रयोजनस्यैवाभावे तन्निरूपितावान्तरत्वमेव न युक्तमित्यर्थः । **सिद्धौ वेति** । महाप्रयोजनाभावेऽप्यवान्तरप्रयोजनस्य सिद्धावित्यर्थः । **तस्यैव** अवान्तरत्वेनोच्यमानस्यैव । तथा चावान्तर-त्वादिकमाभिमानिकं साङ्केतिकमेव, वस्तुतस्तदेव महद्भविष्यतीत्यर्थः । **तयोः** परमेश्वरमोक्षयोः ।

कं०रा०— **तदभाव इति** । महाप्रयोजनादेरभावेनान्तरप्रयोजनादेरप्यसिद्धेरवान्तरप्रयोजनादिमत्वेन वाक्यस्य प्रामाण्यं न सम्भवति । न हि महाप्रयोजनादिकं विना प्रयोजनादेरवान्तरत्वं युक्तमिति भावः ।

श्रीनिधि०— **निर्धारण इति** । परमप्रयोजनमहातात्पर्यगोचरविषयावान्तरप्रयोजनावान्तर-विषयाणां मध्य इति तदर्थः । **सम्पूर्णप्रयोजनमिति चावर्तनीयमिति** । यथा श्रुतेः कर्मधारयः । आवृत्तस्तु बहुव्रीहिः ।

शे०वा०— तत्रापीत्युत्तरभाष्यानर्थक्यमाशङ्क्य महाप्रयोजनस्य प्रधानविषयस्य च वाक्यस्य महाप्रयोजनसाधनविषयोपेतत्वेनैव प्रामाण्यमित्यर्थप्रतिपादनार्थत्वान्न तदिति भावेन किं तदर्थप्रतिपादनेनापी-त्यतोऽवान्तरप्रयोजनाप्रधानविषयाभ्यामेव प्रामाण्यसम्भवान्न मोक्षाद्यर्थत्वाभावेऽपि शास्त्राप्रामाण्यमित्याशङ्का-

परिहारार्थं तदिति भावेनोक्तशङ्कानिवर्तकतया मूलं योजयितुमवान्तरप्रयोजनादिना तत्प्रामाण्यशङ्कामुत्थापयति ननु चेति । सम्पूर्णप्रयोजनकवाक्यं प्रति वाक्यस्याधिकरणत्वाभावेन वाक्येऽपीति सप्तम्यनुपपत्तिमाशङ्क्य नेयमधिकरणसप्तमी किन्तु वाक्यानां मध्ये यत्सम्पूर्णप्रयोजनकं वाक्यमिति गोषु कृष्णा गौः सम्पन्न-क्षीरेत्यादिवन्निर्धारणसप्तमीति नानुपपत्तिरित्याह **निर्धारण इति** । अवान्तरविषयप्रयोजनाभ्यां वाक्यस्य प्रामाण्यशङ्कायां महाप्रयोजनविषयाभ्यामुपेतमेव वाक्यं प्रमाणमिति वक्तव्यम् । महाप्रयोजनस्येव महाविषय-स्यापि तत्प्रामाण्यनिर्वाहकस्य पूर्वं समर्थितत्वात् कथं महाप्रयोजनमित्येकदेशोक्तिरित्यत एकदेशप्रयोगेऽपि विशिष्टस्य ज्ञातुं शक्यत्वात् भाष्ये एकदेशोक्तिर्न तु तन्मात्रस्य प्रामाण्यनिर्वाहकत्वाभिप्रायेणेति नानुपपत्तिरिति भावेन भाष्यमुपलक्षणतया व्याचष्टे **उपलक्षणं चैतदिति** । **लभ्यत इति** । यत्तदोर्नित्यसम्बन्धादिति भावः । वक्ष्यमाणं वेदवाक्यं च मोक्षोद्देशेन परमेश्वरे तात्पर्यपितमित्युपनयस्यापि भाष्यारूढतालाभायाह **सम्पूर्ण-प्रयोजनमिति चावर्तनीयमिति** । अत्रापि पूर्ववदुपलक्षणत्वमनुसन्धेयम् । **अनुवर्तनीयमिति** । पूर्ववाक्यादिति शेषः । अन्यथा साकाङ्क्षतया वाक्याभासत्वप्रसक्तेरिति भावः । कथमेतावतोक्ताक्षेपपरिहार इत्यतः श्रुतोप-लक्षितलब्धावर्तितानुवर्तितपदानां सम्बन्धं प्रदर्शयन्नुक्ताक्षेपपरिहारमाह **ततश्चेति** । इतीत्यस्यायमर्थ इति पूर्वेणान्वयः ।

वा०र०— निर्धारणसप्तमीति । गुणक्रियाजातिभिः पृथक्करणरूपनिर्धारणे सप्तमीत्यर्थः । बहुस्थलेषु प्रतिपादितत्वात् अत्र विशेषोपपादनं टीकाकृता न कृतमिति ज्ञेयम् । **शक्यत्वात् भाष्य इति** । शक्यत्वाभिप्रायेणेत्यर्थः । अत एवाभिप्रायेणेति उत्तरत्रोक्तिः । **वक्ष्यमाणो यो वेदवाक्यं** चेत्यादिरूप उपन्यस्तस्यापीत्यर्थः । **श्रुतोपलक्षितेत्यादि** । श्रुतं च उपलक्षितं च इत्यादिरूपेण पञ्चपदानां द्वन्द्वानन्तरं अनुवर्तितानि च पदानि च इति कर्मधारयः । तेषु सम्पूर्णप्रयोजनमिति श्रुतपदं प्रधानविषयम् । इत्युपलक्षितं पदं तदिति लब्धं पदं सम्पूर्णप्रयोजनमत्यावर्तितं पदं मानत्वमेति इत्यनुवर्तितपदम् । पूर्वमूले स्पष्टम् ।

स०व्र०— निर्धारणे । गुणक्रियाजातिभिरेकदेशस्य पृथक्करणं निर्धारणम् । **ताभ्यामेव विषय-प्रयोजनाभ्यामुपेतम्** इत्यनेन सम्पूर्णप्रयोजनमित्यस्यानुवृत्तिरुपपादिता भवति । **तदभाव इति** । यागादेः स्वर्गरूपमहाप्रयोजनसाधनत्वसिद्धावेव अपूर्वरूपावान्तरप्रयोजनसिद्धिः । प्रकृते मोक्षरूपमहाप्रयोजनसाधनत्व-स्यैवासिद्ध्या स्वर्गादिरवान्तरप्रयोजनस्याप्यसिद्धेरित्यर्थः ।

विठ्ठल०— सम्पूर्णप्रयोजनमिति चावर्तनीयमिति । तेन वक्ष्यमाणोपनयलाभ इति भावः । **तदभाव इति** । महाप्रयोजनादेरभावे अवान्तरप्रयोजनादेरपि असिद्धेरवान्तरप्रयोजनादिमत्त्वेन वाक्यस्य प्रामाण्यं न सम्भवति । न हि महाप्रयोजनादिकं विना प्रयोजनादेरवान्तरत्वं युक्तमिति भावः । आवृत्तिलब्धमुपनयं

दर्शयति **वेदवाक्यं चेति** । निगमयति **तत्तयोरिति** । तथा चैवं मूलयोजना । यद्वाक्यं सम्पूर्णप्रयोजनं तत्तेन सम्पूर्णप्रयोजनत्वेनैव मानत्वं चेति सम्पूर्णप्रयोजनं च वेदवाक्ये तस्मान्मानत्वमेतीति ।

॥ इति फलाभावस्य वाक्यविशेषाप्रामाण्यप्रयोजकत्वाङ्गीकारः ॥

॥ इति एतदधिकरणीयशङ्कान्तरनिरासः ॥

॥ इति नप्रयोजनाधिकरणम् ॥

॥ २-१-९ ॥

* * *

॥ अथ वैषम्यनैर्घृण्याधिकरणम् ॥

॥ २-१-१० ॥

ब्र०सू०— ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ

॥ अथ वैषम्यनैर्घृण्ययोर्वेदाप्रामाण्यकारणत्वाभावः ॥

॥ अथ ततोऽन्ययोर्वैषम्यनैर्घृण्ययोर्दूषणत्वाभावः ॥

१४१ सु०— " 'प्राणिनां विविधान्देहेन्द्रिय(ादि)विषयांस्तत्फलं च सुखदुःख-लक्षणमुत्पादयन्नीश्वरः किं तदीयं धर्माधर्मरूपं कर्मापेक्षते न वा । आद्ये तस्य स्वातन्त्र्यप्रच्युतिः । द्वितीये निर्निमित्तं कांश्चित्सुखयन्विषमः स्यात्, कांश्चिद् दुःखय-न्निर्घृणः स्यात् । इत्युभयथा न तस्य सर्वकर्तृत्वमि'त्येव पूर्वपक्षोऽत्राधिकरणे निरा-क्रियते ।

तत्र तावदाद्येन सूत्रेण कर्मादिसापेक्षस्य कर्तृत्वमभ्युपेत्य वैषम्यनैर्घृण्ये परिहृते । अपेक्षणीयं कर्मादि ईश्वरायत्तं न वा । नेति पक्षे सर्वकारणत्वहानिः । आद्ये निर्निमित्तं विषमाणां कर्मणां कारयितुर्वैषम्यनैर्घृण्ये स्यातामित्याक्षिप्य कर्मादीनामनादिता(त्वा)-भ्युपगमेन समाधानमुक्तं न कर्माविभागादिति चेन्नानादित्वात् इति सूत्रेण ।

एवं तर्हि कर्मादिसापेक्षस्य स्वातन्त्र्यं न स्यादित्याशङ्क्योक्तम् उपपद्यते चेति । कर्माद्यपेक्षस्यापि तस्य स्वातन्त्र्यमुपपद्यते, कर्मादिसत्तादेरपि तदधीनत्वस्यारम्भणाधिकरणे समर्थितत्वात् । न हि स्वाधीनसत्तादिकमपेक्षमाणस्य स्वातन्त्र्यप्रच्युतिर्युक्तेति ।

एवं (च) तर्हि तदपेक्षा नामानपेक्षैव । तथा च पुनर्वैषम्याद्यापत्तिरित्याशङ्क्योक्तम् उपलभ्यते चेति । उपलभ्यते ही(चे)श्वरस्येदृशं वैषम्यं निर्घृणत्वं च प्रमाणैः, अतो नेदमनिष्टमिति ।"

तदिदमयुक्तम् । वैषम्यनैर्घृण्ये हि वस्तुतो दूषणे न वा । आद्ये कथमन्ततोऽप्यङ्गीक्रियेते । द्वितीये प्रथममेवाङ्गीकार्ये, किं सापेक्षतापक्षं कक्षीकृत्य तत्र दूषणपरिहारक्लेशेन । तथा च बकबन्ध(क)रीतिरित्यतोऽभिप्रायमाह **वैषम्यमिति** ।

अनु०— वैषम्यं चैव नैर्घृण्यं वेदाप्रामाण्यकारणम् ।
नाङ्गीकार्यमतोऽन्यत्तु न वैषम्यादिनामकम् ॥

द्विविधं खल्विदं वैषम्यं निर्घृणत्वं च । एकं (ध)कर्माद्यनपेक्षताप्रयुक्तम् । अपरं तु सापेक्षत्वेऽपि कर्मादिसत्तादेरपीश्वराधीनत्वप्रयुक्तम् ।

तत्राद्यं वेदाप्रामाण्यकारणत्वेन दूषणत्वात् नेश्वरस्याङ्गीकर्तुमुचितम् । वेदो हि धर्मं सुखसाधनमधर्मं च दुःखसाधनमाह, तत्र यदीश्वरो धर्माधर्मावनपेक्ष्य विषमो निर्घृणश्च स्यात् तदा वेदोदितं धर्माधर्मयोः सुखदुःखसाधनत्वमसत्स्यात्, तथा च तस्य कथं प्रामाण्यं स्यात् । अतः सूत्रकारेण कर्मादिसापेक्षतापक्षमुररीकृत्य तत्परिहृतम् ।

अतोऽन्यत्तु द्वितीयं वैषम्यं नैर्घृण्यं च न **वैषम्यादिनामकं** दूषणरूपं न भवतीति यावत् । तथा हि वैषम्यादिकं तावन्न स्वरूपेण दोषः किन्तु दोषहेतुतया । न चेदं वेदाप्रामाण्यकारणम्, कर्मादिसापेक्षत्वाङ्गीकारात् । नापि जीवानामिवेश्वरस्य प्रत्यवायहेतुः, तदभावात् ।

अतोऽदूषणत्वादङ्गीकृतं सूत्रकृतेति न कश्चिद्दोषः । तथा च भाष्यम् 'न च पुनर्वैषम्याद्यापातेन दोष' इति ॥

परि०— 'स्वयं कृतापि तद्व्याख्या क्रियते स्पष्टतार्थत' इति प्रतिज्ञामनुरुध्योपलभ्यते चेति चरमसूत्रखण्डस्य तात्पर्यस्पष्टीकरणे काऽनुपपत्तिरित्यतः तां वक्तुमधिकरणतात्पर्योक्तिपूर्वं सूत्रतात्पर्यार्थमाह **प्राणिनामित्यादिना** । **उभयथापीति** । आद्ये स्वातन्त्र्याभावात् द्वितीये दोषित्वादिति भावः । **इत्येव पूर्वपक्ष इति** । एतेन पूर्वोक्तप्रयोजनरूपफलविषये युक्तिविरोधोऽत्र निरस्यत इति पूर्वसङ्गतिः । पादान्तर्भावश्चोक्तो भवति । कर्मादीत्यादिपदेन तदीयप्रयत्नसंस्कारादिग्रहः ।

प्रमाणैरिति । 'एष ह्येव साधु कर्म कारयति' 'स कारयेत्पुण्यमथापि पापम्' इत्यादिप्रमाणैरित्यर्थः । वेदाप्रामाण्यकारणत्वेनेत्युक्तं व्यनक्ति **वेदो हीति** । **अन्यत्त्विति** अनुवादः **द्वितीयमिति** व्याख्या । **तदभावादिति** । विधिनिषेधातीतत्वादीश्वरस्येति भावः । एवं तर्हीत्यादिना स्वोक्तार्थं भाष्यारूढमिति दर्शयति **तथा च भाष्यमिति** । यद्वा दूषणरूपं न भवतीति यावदिति स्वोक्तार्थसंवादायाह **तथा च भाष्यमिति** । यद्वा एतदनुभाष्यं भाष्यस्यैतद्वाक्यविवरणमिति दर्शयति **तथा च भाष्यमिति** । यद्वा । वैषम्यादि न स्वयं दोषः किन्तु दोषहेतुरित्युक्तार्थे संवादायाह **तथा चेति** ।

यादु०— उभयथाऽपीति । आद्येऽस्वातन्त्र्यान्न सर्वकर्तृत्वं, द्वितीये दोषित्वप्राप्त्येति भावः । **आरम्भणाधिकरण इति** । तत्र 'द्रव्यं कर्म च कालश्चे'ति प्रमाणस्योदाहृतत्वादिति भावः । **प्रमाणैरिति** । 'स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशिताऽपीत्यादिप्रमाणैरित्यर्थः । आद्यस्य वेदाप्रामाण्यकारणत्वमुपपादयति **वेदो हीति** । दोषोऽपि किं वेदाप्रामाण्यरूप उत प्रत्यवायापरपर्याय इति विकल्पं मनसि निधायाद्यं दूषयति **न च वेदाप्रामाण्येति** । द्वितीयं दूषयति **नापि जीवानामिवेति** । ननु मूले 'अतोऽन्यत्तु न वैषम्यादिनामकमि'ति वैषम्यादिशब्दवाच्यमेव तत्र भवतीत्युक्तम् । एवं च दूषणं न भवतीति यावदिति व्याख्याने किं बीजमित्यत आह **तथा च भाष्यमिति** । भाष्ये दोषत्वमेवाशङ्क्य परिहृतमतोऽत्रापि तथैव व्याख्यातमिति भावः ।

वं०प०— उभयथेति । कर्मापेक्षायामनपेक्षायां चेत्यर्थः । **न सर्वकर्तृत्वमिति** । अस्मदादिवद्दोषित्वादिति भावः । **सत्तादिकम्** सत्तोपेतम् । **तदपेक्षेति** । तस्य स्वाधीनसत्तोपेतवस्तुनोऽपेक्षेत्यर्थः । **प्रथमे** आदौ प्राप्ते वैषम्यनैर्घृण्ये । **सापेक्षतापक्षमिति** । कर्मापेक्षते न वेत्यत्र कर्मसापेक्षत्वपक्षमित्यर्थः । **न स्वरूपेणेति** । स्वरूपेण दोषत्वेऽन्ततोऽप्यङ्गीकार्यत्वं न स्यादिति भावः । **न चेदमिति** । **इदम्** अतोऽन्यद् द्वितीयं वैषम्यं वेदाप्रामाण्यकारणं न भवति । येन वेदाप्रामाण्यरूपदोषोन्नायकतया दूषणं स्यादिति भावः । कुतो नेत्यत आह **कर्मादीति** । ननु द्वितीयवैषम्यादेर्वेदाप्रामाण्यहेतुत्वेनादोषत्वेऽपि जीवादौ यथा वैषम्यादेः प्रत्यवायहेतुत्वेन दोषत्वं दृष्टं तथेश्वरेऽपि प्रत्यवायहेतुत्वेन दोषत्वं किन्न स्यादित्याशङ्क्य निषेधति **नापीति** । **तदिति** । 'निरनिष्टो निरवद्य' इति श्रुतेरीश्वरस्य प्रत्यवायाभावादित्यर्थः । ननु कर्मसापेक्षत्वेऽपि कर्मादिसत्तादेरपीश्वराधीनत्वप्रयुक्तं द्वितीयवैषम्यं वैषम्यनामकमेव न भवतीति 'अतोऽन्यत्त्वि'ति मूले प्रतीयते । एवं च दूषणं न भवतीति यावदिति कथं व्याख्यायते । ज्ञापकाभावादित्यत आह **तथा च भाष्यमिति** । अत्र दोषशब्दोपरि भारो द्रष्टव्यः । **पुनर्वैषम्याद्यापातेन दोषः** तदङ्गीकार इति यावत्; वेदाप्रामाण्यरूपो, जीवादाविव प्रत्यवायरूपो वा न इति भाष्यार्थः ।

कं०रा०— अतोऽन्यदिति । कर्माद्यनपेक्षत्वप्रयुक्तवैषम्यादिकोऽन्यत्कर्मादिसत्तादेरीश्वराधीनत्वप्रयुक्तं द्वितीयवैषम्यादिकं तु न वैषम्यादिनामकमित्यर्थः । द्वितीयं **वैषम्यादिकं** वैषम्यादिकं नामकं नेत्येतद्व्याहतमित्यत आह **दूषणरूपमिति** । **इदमिति** । कर्मादिसत्तादेरीश्वराधीनत्वप्रयुक्तं वैषम्यादिकमित्यर्थः । **नापीति** । कर्मादिसत्तादेरपीश्वराधीनत्वप्रयुक्तं वैषम्यादिकमीश्वरस्य जीवानामिव प्रत्यवायहेतुतया न दोषः । ईश्वरस्य विधिनिषेधातीतत्वेन प्रत्यवायप्रसक्तेरेवाभावादित्यर्थः । एतच्चोपलक्षणं द्वितीयं वैषम्यादिकं समोहं सर्वभूतेष्वित्यादिशास्त्राप्रामाण्यापादकत्वादिनापि न दोषः । अनादिसिद्धयोग्यताद्यनुसारित्वस्यैव तत्र समशब्दार्थत्वादित्यादिकं च द्रष्टव्यम् ।

श्रीनिधि०— आवर्तनीय इत्युक्तं **कांश्चित्सुखयन्निति** । सुखदानात् केषाञ्चिद्दुःखवैषम्यं निर्घृणत्वं च तत्रापि केषाञ्चिदधिकं सुखदानात् केषाञ्चिदल्पसुखदानात् वैषम्यं दुःखदानेऽपि केषाञ्चिदल्पं केषाञ्चिदधिकमिति वैषम्यमधिकदुःखदानेन नैर्घृण्यमिति द्रष्टव्यम् । **तथा च न सर्वकर्तृत्वमिति** । विमतः सर्वकर्ता न वैषम्यादिदोषवत्वाद्यज्ञदत्तवदित्यनुमानविरोधादिति भावः । **तथा च कथं तस्य प्रामाण्यं स्यादिति** । तन्मास्त्वेवेति चेन्न । तथा सति सकलातीन्द्रियोच्छेदप्रसङ्गात् । अङ्गीकृतत्वेऽप्यदूषणत्वेनाङ्गीकार इति कथं ज्ञातव्यमित्यत आह **तथा चेति** ।

शे०वा०— ननूत्तरभाष्यस्य गतार्थतानिरासाय एतदधिकरणव्यावर्त्यपूर्वपक्षदर्शनेन अधिकरणारम्भसमर्थनार्थत्वाभावात् सूत्रव्याख्यानरूपत्वस्य वा अपव्याख्याननिरासपरत्वस्य वा अभावाच्च वैयर्थ्यमित्याशङ्क्य तदभावेऽप्यधिकरणशरीरे प्रसक्तानुपपत्तिपरिहारार्थत्वान्नानर्थक्यमिति भावेन अधिकरणशरीरे प्रसक्तानुपपत्तिपरिहारकतया तद्योजयितुं भाष्यानुसारेणैतद्व्यावर्त्यपूर्वपक्षप्रदर्शनपूर्वकमधिकरणस्वरूपं दर्शयति **प्राणिनामिति** । **उभयथेति** । आद्येऽस्वातन्त्र्याद्द्वितीये च वैषम्यादिदोषित्वादिति भावः । **आरम्भणाधिकरण इति** । 'द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया । इति श्रुतेरि'त्यादिनेति शेषः । अस्तु कर्मादीनां सत्त्वस्यापि भगवदधीनत्वम् । तथाऽपि तत्सापेक्षस्य भगवतो न स्वातन्त्र्यं, स्वतन्त्रश्च सापेक्षश्चेत्यस्य विप्रतिषिद्धत्वात्; इत्यतो भवेदेवं स्वातन्त्र्यप्रच्युतिर्यदि तदपेक्षा तेन विना करणे कुलालादेरिव शक्त्यभावनिबन्धना स्यात् । न चैवम् । किन्नाम स्वेच्छाधीनैवेति न स्वातन्त्र्यहानिरित्याह **न हीति** । **प्रमाणैरिति** । 'स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशिताऽपी'त्यादिप्रमाणैरित्यर्थः ।

एवमधिकरणशरीरं प्रदर्श्य तत्रानुपपत्तिमुद्भावयति **तदिदमयुक्तमिति** । **आद्य इति** । दुष्टापादनस्य पराजयहेतुत्वादिति भावः । **बकबन्धरीतिरिति** । बकबन्धसमानन्याय इत्यर्थः । **बकग्रहणे** क उपाय इति केनचित्पृष्टे खरतरदिनकरसम्पर्कद्रुततन्मस्तकनिहितनवनीतबिन्दुभिर्नयनयोः पूर्णतायां तद्ग्रहणं सुकरमिति कश्चित्प्रतिपादयति । न च तदुपपद्यते । बकग्रहणमन्तरेण तन्मस्तकनवनीतप्रतिक्षेपानुपपत्तेस्तस्मिन्गृहीते तु पुनस्तन्मस्तके नवनीतप्रक्षेपोऽपि मुधैवेति न्यायाभिप्रायः । आद्यस्य वेदाप्रामाण्यकारणत्वमुपपादयति **वेदो**

हीति । वैषम्यं नैर्घृण्यं च वैषम्यादिनामकं नेति विप्रतिषिद्धमित्यतो नात्र वैषम्यादेर्वैषम्यादिनामकत्वं नेति यथाश्रुतेऽर्थे तात्पर्यं येन विप्रतिषेधः स्यात् किन्तु दूषणं न भवतीत्यत्रैवेति नानुपपत्तिरित्याह **दूषणरूपं न भवतीति यद्वदिति । न स्वरूपेणेति** । अतिप्रसङ्गादिति भावः । तर्हि कथं तयोर्दोषत्वमिति पृच्छति **किन्त्विति** । उत्तरमाह **दोषहेतुतयेति** । दोषान्तरोन्नायकतयेत्यर्थः । अस्तु तर्हि प्रकृतेऽपि दोषान्तरोन्नायकतयैव दोषत्वमित्यतस्तदभावान्नेत्यभिप्रेत्यैतदुन्नेयदोषः किं वेदाप्रामाण्यरूपोऽभिमत उत प्रत्यवायापरपर्याय इति विकल्पौ हृदि निधायाद्यमनूद्य प्रतिषेधति **न चेति** । धर्माधर्मादिः सुखदुःखहेतुत्वप्रतिपादकवेदाप्रामाण्यं न चेत्यर्थः । न च 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादिशास्त्रस्याप्रामाण्याप्रसक्तेऽपि 'समोऽहं सर्वभूतेष्वि'-त्यादिशास्त्राप्रामाण्यापरिहारात् तदापादकतया दोषत्वं स्यादेवेति वाच्यम् । अनादिसिद्धयोग्यताद्यनुसारित्वस्यैव तत्र समशब्दार्थत्वादित्याशयात् । द्वितीयमनूद्य दूषयति **नापीति । तदभावादिति** । ईश्वरस्य विधि-निषेधातीतत्वादिति भावः । वैषम्यादेः स्वरूपेण न दोषत्वं किन्तु दोषान्तरोन्नायकतयैवेत्युक्तम् । तत्र भाष्यं प्रमाणयति **तथा चेति** । भाष्यमप्युक्ताभिप्रायमेव । स्वरूपेण दोषतायां 'न च पुनर्वैषम्याद्यापात' इत्येवा-वक्ष्यदिति भावः । यद्वा ननु मूले 'अतोऽन्यत्तु न वैषम्यादिनामकमि'ति वैषम्यादिशब्दवाच्यमेव तन्न भवती-त्युक्तम् । एवं च दूषणं न भवतीति व्याख्यानं निर्बीजमित्यतो भाष्ये दोषत्वमाशङ्क्य परिहारादत्रापि तथैव व्याख्यानं युक्तमित्याह **तथा चेति** ।

वृ०२०— गतार्थतानिरासायेति । एतदधिकरणस्य या पूर्वाधिकरणैः गतार्थताशङ्का तन्निरासोपयोगि एतदधिकरणव्यावर्त्यपूर्वपक्षप्रदर्शनं तेनेति योजना । **स्वरूपस्येति** । बुद्ध्या विविच्य भावात् इत्यनुवर्तते । आकृष्यते वा । **परत्वस्येति** । एतत्क्रमान्यतमस्य च तत्र तत्र प्रदर्शनादिति भावः । **मूले** वैषम्यनैर्घृण्ययोः विवेकेन प्रतिपादनं **कांश्चित् सुखयन् इति** । पूर्वेषु विद्वदविद्वत्साधारण्येन नार्थिषु समागतेषु विद्यादिकं निमित्तीकृत्य कांश्चिदेव सुखयतापि न वैषम्यमित्यत उक्तं **निर्निमित्तमिति** । सर्वेषु विचारवत्सु एतत्समागतेषु निमित्तान्तराभावस्थले कांश्चिदेव सुखयति वैषम्यस्य दोषत्वदर्शनादिति भावः । कांश्चित् दुःखयन् इति अत्रापि निर्निमित्तमिति वर्तते । अपराधि-अनपराधिसाधारण्येनागतेषु कांश्चिदेवाधानानुसारेण दुःखयतो निर्घृणत्वे-नाव्यवहारात् निर्निमित्तमित्युक्तम् । निमित्ताभावेऽपि कांश्चित् दुःखयति तु निर्घृणत्वं दोषत्वेन दृष्टमेवेति भावः । उभयथेत्यस्य कांश्चित् दुःखयन् कांश्चित् सुखयन् इत्युक्तपरत्वभ्रान्तिनिवारणाय तत् व्याचष्टे **आद्येऽस्वातन्त्र्यादिति । कर्मादिसापेक्षत्वस्येति** मूलम् । कर्मादिसापेक्षत्वस्य कर्तृत्वं इत्याद्यपक्षं अभ्यु-पेत्येत्यर्थः । **परिहृत इति** । कर्मादिसापेक्षत्वानङ्गीकारे शङ्किते ये वैषम्यनैर्घृण्ये ते सापेक्षताङ्गीकारेण परिहृते तयोस्तत्पक्षे प्रसराभावादिति भावः । **अपेक्षणीयमिति** । यद्यपि विचित्रफलदाननिमित्तवैषम्यादिनिरासः सापेक्षताश्रयणेन जातः । तथापि तैस्तैः विविधकर्मकरणस्यापि भगवन्निमित्तत्वात् विविधकर्मकारयितृत्व-प्रयुक्तस्य वैषम्यादेः निरासो नेत्याशयः । **सूत्रेणेति** । द्वितीयसूत्रेणेत्यर्थः । **तथा च** कर्मानपेक्षत्वे आशङ्कितवैषम्यादेः सापेक्षतापक्षमङ्गीकृत्य परिहारानन्तरं पुनः कर्मानुष्ठापनविषये प्राप्तवैषम्यादि द्वितीयसूत्रेण

परिहृतम् । अथ सापेक्षत्वपक्षे आशङ्कितस्वातन्त्र्यहानिदोषो दोषोद्धारप्रसक्तिरस्तीति तत्तद्दोषपरिहाराय तच्छङ्कामुत्थापयन् तद्व्यावर्तकतया उत्तरसूत्रखण्डं अवतारयति **एवं तर्हि इति** । **उपपद्यते चेतीति** । एतावान् सूत्रखण्डप्रवृत्तः इत्यर्थः । तं व्याचष्टे **कर्माद्यपेक्षस्यापीति** । इत्यादिनेति शेष इति टीका इत्यादिना व्याख्यातसत्त्वाद्यवरस्येति सूत्रेणेति शेषः इत्यर्थः । **एवं तर्हीति मूलम्** । कर्मानपेक्षायां वैषम्यादिदोषः स्यादिति शङ्किते स्वाधीनसत्तादिकं कर्मापेक्ष्यफलं ददातीत्युक्तेऽपि न वैषम्यादेः परिहारः । तदपेक्षया अनपेक्षापर्यवसानेन शङ्कितदोषस्य पुनरापत्तेरित्यर्थः । **चेतीति** । इत्ययं सूत्रखण्डः प्रवृत्त इत्यर्थः । तथा व्याचष्टे **उपलभ्यते हीति** । ईदृशं स्वाधीनकर्मादिकमपेक्ष्य फलदातृत्वमुक्तम् । निर्घृणत्वं च निर्घृणः स्यात् इत्यादौ निर्घृणशब्दो निर्गता घृणा यस्मादिति बहुव्रीहिः । घृणाशब्द निर्निमित्तपरापकारणेच्छापरः । तदिच्छायां घृ रक्षणेति धातोः औणादिके बाहुलके नकारप्रत्यये बाहुलकादेव सार्वधातुकार्धधातुकयोः इति गुणस्याभावे च निष्पन्नघृणशब्दस्य कृदन्ततया प्रातिपदिकसंज्ञायां स्त्रीत्वस्यापि च निष्पत्तिमाश्रित्योक्तेच्छायां घृणाशब्दस्य योगो वाऽभिन्नरूढिरेव वा । अत एव घृणिः गृणिः पार्ष्णिः भूतिरिति निपातनसूत्रेणावे घृणिः इत्यस्य निपातनं दशपाद्यामुक्तम् । तथा च निर्घृणशब्दे गुणप्रसक्त्यैव नैर्घृण्यशब्दे तदप्रसक्तेः नैर्घृण्य इति सूत्रप्रयोगेऽपि सूपपादः इति तत्सूत्रपाठे कथन्ताशङ्कावकाशः । यत्तु ष्यञ्पुरस्कारेण गुणशङ्कनं केषाञ्चित् तदन्येषां च ष्यञः सार्वधातुकत्वाद्यभावात् न सार्वधातुकेति सूत्रेण गुणप्रसक्तिरिति परिहरणं तदुभयं भ्रान्तप्रतारकयोः कथा तुल्यमिति स्पष्टम् । इगन्ताङ्गाभावादेव गुणशङ्कातत्परिहारयोः अविषयवृत्तित्वादिति ज्ञेयम् । **खरतरैरिति** । सन्ध्याकालेन सूर्यसम्बन्धेन प्राप्तयत्तन्मस्तके निहितं नवनीतं तद्बिन्दुभिरित्यर्थः । अनेन मस्तके प्रथमतो नवनीतं निधाय मध्याह्नार्कसम्बद्धं नवनीतस्य सम्पाद्य तत्सम्बद्धे नवनीतस्य द्रवत्वं यः प्रस्रवणेन तद्बिन्दुभिः नयनयोः पूर्णता भवति । यदा तदा स बको न पलायनं कर्तुमीष्टे तत् बद्धः तत्काले कर्तुं शक्यते कर्तुं इति क्रमः सूचितो भवतीति ज्ञेयम् । **मुधैवेति** । व्यर्थ एवेत्यर्थः । **अपरपर्याय इति** । उन्नेयो दोष इति वर्तते । इदमित्यस्य प्रकृतं वैषम्यादिकमित्यर्थं सिद्धवत्कृत्य वेदेत्यादि व्याख्याति **धर्माधर्मादिरिति** । प्रतिपादको यो वेदो ज्योतिष्टोमेनेत्यादिस्तदप्रामाण्यमित्यर्थः । चन्द्रिकानुसारेणाह **न चेति** । **यद्वेति** । पक्षान्तरम् । योजनाद्वयं मिलित्वादिविशिष्टार्थसमर्पकं भवतीति प्रयुक्तप्रमेयोपपादकतया उभयथापि योज्यमित्याशयेनेति ज्ञेयम् । अत्रायं वैषम्यनैर्घृण्ययोः परिहारसङ्ग्रहः । यदुक्तं प्राणिनां विविधनिर्निमित्तं कांश्चित् सुखयतः निर्घृणत्वं च इत्येवं सर्वकर्तृत्वं कर्मापेक्षानपेक्षापक्षयोः उभयोरपि दुर्घटमिति । अत्र ब्रूमः । अपेक्ष्यैव वैषम्यं कश्चित् निर्निमित्त-दुःखयतः देहेन्द्रियादिकं उत्पादयतो हरेः तदीयधर्माधर्मरूपं कर्माद्यपेक्षायां स्वातन्त्र्यप्रच्युतिः तदनपेक्षायां कर्मादिकं भगवान् विविधदेहाद्युत्पादक इति स्वीक्रियते इति न वैषम्यादिदोष आयाति । न च तत्कर्मादेः भगवदनधीनस्यापेक्षा इत्यङ्गीकारे भगवतः सर्वस्वातन्त्र्यहान्यापत्त्या तदधीनमेव तत् तेनापेक्ष्य इत्यङ्गीकार्यमिति तत्कर्मपुरस्कारेण वैषम्यनैर्घृण्ये स्याताम् । एवं निर्निमित्तं विषयाणि कर्माणि कारयितुः देहेन्द्रियादिविषय इव वैषम्यादेः परिहारोपायाभावादिति वाच्यम् । इदानीन्तनं विविधं कर्म कारयन् भगवान् पूर्वतनं प्राणिविविधं कर्मापित इत्यन्यानपेक्षस्य तत्कारयित्वानभ्युपगमेन वैषम्याद्यनापत्तेः । ननु पूर्वतनकर्मादेरपि भगवदनधीनत्वे

तस्य स्वातन्त्र्यभङ्गापत्त्या तदधीनत्वमेव द्रव्यं कर्म चेत्यादि प्रमाणानुसारेणाङ्गीकृत्य स्वाधीनसत्तादिक-पूर्वपूर्वतरादिकर्मापेक्षमाणस्य स्वातन्त्र्योपपत्तिरिति वक्तव्यम् । तथा च विविधदेहादिदानप्रयुक्ते ये वैषम्यनैर्घृण्ये प्रागाशङ्किते तयोर्न परिहारः सिद्ध्यति । पूर्वत्र कर्मापेक्ष्यमात्रोक्त्या आपाततः तत्परिहारप्रतीतावपि तेना-पेक्ष्यमाणकर्मणोऽपि तदधीनानादिकर्मपरम्पराप्राप्तत्वं स्वीकृत्य कर्मपुरस्कारेण प्राप्तवैषम्यपरिहाराङ्गीकारे फलतः कर्मानपेक्ष्यैव देहादिदातृत्वमिति स्वीकारस्य प्रकाशनेन प्रथमाशङ्कितवैषम्यादिपरिहाराप्रतीतेः इति चेत् न । तादृशकर्माद्यपेक्षफलदातृत्वाङ्गीकारे प्राप्तवैषम्यादि न दोषाय । विविधकर्मादिः कारयितुः 'स कारयेत् पुण्यमथापि पापं न तावता दोषवान् ईशितापि' इत्यादि श्रुत्यादिप्रमाणैः दोषाभावोक्त्या तादृशकर्माद्यपेक्षा विचित्रफल-दानस्यापि प्रमाणप्राप्ततया प्रमाणोपलब्धवैषम्यादेः दोषत्वाभावात् । अथ वैषम्यादेः वस्तुतो दूषणत्वाङ्गीकारे देहादिपुरस्कारेणेव कर्मादिपुरस्कारेण प्राप्तयोरपि तयोः अङ्गीकारायोगः । यदि च भगवति तयोः दोषत्वाभावः इति मतं तदा तयोः प्रथमत एव दोषत्वाभावेन समाधानं विहाय कर्माद्यपेक्षापेक्षं स्वीकृत्य प्रथमतः परिहारं कृत्वा पुनः वैषम्याद्यापत्तिनिरासायान्ते दोषत्वाभावसमाधानायोगः । इत्युभयथा दोष इति । मैवम् । अयमाशयः सूत्रकारस्य । तयोर्भगवति दूषणत्वं नेति द्वितीयमेवोररीकुर्मः । न चोक्तदोषः । प्रथमप्राप्तवैषम्यादेः दोषत्वाभावं अनभिधाय कर्मापेक्षया तत्परिहारं चाभिधाय पुनः तत्प्राप्तिशङ्कायां तद्दोषत्वाभाववचननिमित्त-सद्भावात् । तथा हि । द्विविधेऽस्मिन् वैषम्यादौ न सर्वं दोषो वदामः । किन्तु भगवान् कर्माद्यनपेक्ष्यैव फलद इत्यङ्गीकारे प्राप्तं यत् वैषम्यादिकं तद्दोष इत्यङ्गीकृत्य तदतिरिक्तं न दोषः इत्येवम् । अतः प्रथमप्राप्तस्य दोषत्वस्वीकारात् तद्दोषत्वाभावेन समाधानमयुक्तमिति । तथा समाधानं न कृतम् । न चात्र नियामकाभावः । कर्माद्यनपेक्ष्य फलदानप्रयुक्तवैषम्यादेः वेदाप्रामाण्यकारणतया दोषत्वसिद्धिसम्भवात् । न च तदपि कुत इति वाच्यम् । वेदो धर्मं सुखसाधनत्वेनाधर्मं दुःखसाधनत्वेन बोधयति । तदिदं धर्माधर्मयोः सुखदुःखसाधनत्वं तदा उपपद्यते । यदि भगवान् तावपेक्ष्य फलं ददातीत्यङ्गीकृतं स्यात् यदि तु तावनपेक्ष्य फलं ददाति इत्यङ्गीक्रियते तदा वेदोक्तस्यार्थस्यासत्त्वेनानुपपत्तिरेव । ततश्चासदर्थं प्रमाणं चेति व्याहतमिति वेदाप्रामाण्यस्यैव प्राप्तेः । विविधफलं दानोपयोगितया स्वीकृतकर्माद्यपेक्षापक्षे प्राप्तं वैषम्यादिकं यदन्ते प्राप्तं तत् वैषम्यादिकं दोषत्वाभावं अभ्युपगम्य समाधानं च युक्तम् । पूर्वप्राप्तवैषम्यादिवत् अस्य धर्माधर्मसुखदुःखसाधनताबोधकज्योति-ष्टोमेनेत्यादि वेदाप्रामाण्यकारणत्वाभावात् । वेदोक्तार्थानुसारेण एव भगवतः फलदातृतया तदुक्तार्थस्य सत्त्वेनासदर्थत्वयुक्ताप्रामाण्याप्राप्तेः । नापि अन्यस्य कस्यचिद्वेदस्याप्रामाण्यं अनेन आयातीति शङ्क्यम् । कर्माद्यनपेक्षफलदानेनापोद्यमानार्थकवेदस्याभावात् । तथा च वेदोक्तानुसारेण फलदानाङ्गीकारे प्राप्तवैषम्यादेः वेदाप्रामाण्यरूपदोषकारणत्वाभावात् विधिनिषेधातीततया प्रत्यवायशून्ये हरौ च प्रत्यवायरूपदोषकारणत्वा-भावात् । स्वरूपेण च दोषत्वाङ्गीकारस्यातिप्रसङ्गपराहतत्वात् दोषत्वं नास्तीति तदभ्युपगमो युक्तः । तस्मात् प्रथमप्राप्तं वैषम्यादि कर्मापेक्षाङ्गीकारेण परिहृत्य कर्मादिः स्वाधीनप्रयुक्तं यत् पुनः प्राप्तं वैषम्यादि तत्परिहारः सूत्रकृता वेदाप्रामाण्यकारणत्वाभावेन कृत इति स्वीकर्तुं युक्तमिति सकलमकलङ्कम् । फलमत उपपत्तेः इति भक्तिपादेऽपि कर्मपुरस्सरं विचारोऽस्ति । सोऽपि एवमेवोपपाद्यः ।

विठ्ठल०— प्रमाणैरिति । 'स कारयेत् पुण्यमथापि पापं न तावता शेषवानीशितापी'त्यादिभिः आद्ये वेदाप्रामाण्यकारणत्वमुपपादयति **वेदो हीति** । दोषहेतुत्वं वेदाप्रामाण्यकारणत्वेन उत प्रत्यवायहेतुत्वेनेति विकल्पं मनसि निधायाद्यं दूषयति **न चेदमिति** । द्वितीयं दूषयति **नापीति** । नन्वतोऽन्यत्तु न वैषम्यादिनामकमिति वैषम्यादिशब्दवाच्यमेव तन्न भवतीत्युक्तम् । एवं च दूषणं न भवतीति यावदिति व्याख्याने किं बीजमित्यत आह **तथा च भाष्यमिति** । भाष्ये दोषत्वमेवाशङ्क्य परिहृतम् । अतो अत्रापि तथैव व्याख्यातमिति भावः ।

॥ इति वैषम्यनैर्घृण्ययोर्वेदाप्रामाण्यकारणत्वाभावः ॥

॥ इति ततोऽन्ययोर्वैषम्यनैर्घृण्ययोर्दूषणत्वाभावः ॥

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥
॥ २-१-१० ॥

* * *

।। अथ सर्वधर्मोपपत्त्यधिकरणम् ।।

।। २-१-११ ।।

ब्र०सू०— ॐ सर्वधर्मोपपत्तेश्च ॐ ।।

।। अथ भाष्योक्ततदधिकरणीयार्थे अन्याधिकाशङ्का तन्निरासश्च ।।

१४२ सु०— 'सर्वे चेतना अपूर्णगुणा दोषिणश्च दृष्टाः, तद्दृष्टान्तेन चेतनत्वादीश्वरस्यापि समासव्यासाभ्यामपरिपूर्णगुणत्वं दोषित्वं च स्यादि'ति पूर्वपक्षोऽत्राधिकरणे निरस्यते । तदिदमस्पष्टं भाष्ये, चशब्दसमुच्चितायाः श्रुतेरेवोदाहृतत्वात्, युक्तेरव्युत्पादनात् । ततः स्पष्टं व्याचष्टे **यदधीना** इति ।

अनु०— यदधीना गुणाश्चैव दोषा अपि हि सर्वशः ।
गुणास्तस्य कथं न स्युः स्युर्दोषाश्च कथं पुनः ।

चापिशब्दावन्योन्यसमुच्चये । **एव**शब्दस्य यदधीना एवेत्यन्वयः । **हि**शब्दः सर्वस्य भगवदधीनतायां श्रुत्यादिप्रसिद्धिं द्योतयति । **कथम्** इत्याक्षेपे ।

द्वेधा हि वस्तु न प्राप्यते, तत्र स्वातन्त्र्याभावाद्वा प्रेप्साऽभावाद्वा । द्वेधा च न हीयते, स्वातन्त्र्याभावाद्वा जिहासाऽभावाद्वा । अस्ति तावदीश्वरस्य सर्वत्र स्वातन्त्र्यम्, अस्ति च मया सर्वदाऽऽनन्दादिगुणवता दुःखादिदोषवर्जितेन भाव्यमितीच्छा, प्रेक्षावत्त्वात् । अतः कथं तस्यानन्दादिगुणपूर्णत्वं दुःखादिसर्वदोषदूरत्वं न भवति ।

अत्रैते प्रयोगाः । ईश्वरः सकलगुणपूर्णः सर्वदोषदूरश्च, स्वतन्त्रत्वात्, व्यतिरेकेण यज्ञदत्तवत् । ईश्वरो विप्रतिपन्नगुणवान्, तत्र प्रेप्सावत्त्वे सति स्वतन्त्रत्वात्, यो यत्र प्रेप्सावत्वे सति स्वतन्त्रः स तद्वान् यथा सम्प्रतिपन्नः । ईश्वरो न विमतदोषवान्, तज्जिहासुत्वे सति स्वतन्त्रत्वात्, यो यत्र जिहासावत्त्वे सति स्वतन्त्रः स तदभाववान् यथा सम्मत इति ।

परि०— पूर्वसङ्गत्यन्तर्भावसङ्गत्योः द्योतनायाधिकरणार्थमाह **सर्व इति** । **समास-व्यासाभ्यां** सङ्क्षेपविस्तराभ्यामित्यर्थः । ईश्वरो न सर्वगुणः चेतनत्वात् चैत्रवत् । ईश्वरो न सर्व-दोषदूरः चेतनत्वात् चैत्रवत् इति सङ्कोचतः । ईश्वरो न विमतसम्पूर्णज्ञानवान्, न पूर्णानन्दवान्, न सर्वशक्तिमान् । ईशो न विमतनिश्शेषदुःखहीनो न निश्शेषश्रमहीनः चेतनत्वादित्यादिरूपेण विस्तरतः प्रयोजक्तव्यमित्यर्थः । **युक्तेरिति** । उपपत्तिपदोक्तयुक्तेरित्यर्थः । वक्ष्यमाणप्रयोगानुकूल-व्याप्तिं व्यनक्ति **द्वेधा हीति** । **तत्रेति** । वस्तुप्राप्तौ **स्वातन्त्र्याभावात्** शक्त्यभावादित्यर्थः । **प्रेप्सेति** । प्राप्तीच्छाभावादित्यर्थः । **न हीयत इति** । न त्यक्तो भवतीत्यर्थः । **जिहासाऽभावात्** त्यागेच्छाऽभावादित्यर्थः । **अस्ति च सर्वत्र स्वातन्त्र्यमिति** । आरम्भणाधिकरणे 'आत्मनि चैवं विचित्राश्च ही'त्यादौ समर्थनादिति भावः । समासेन पूर्वपक्षे अभिहितप्रयोगस्य प्रतिप्रयोगमाह **ईश्वरस्सकलगुणपरिपूर्ण इति** । व्यासेन पूर्वपक्षोक्तप्रयोगस्य प्रतिप्रयोगमाह **ईश्वरो विप्रति-पन्नगुणवानिति** । सम्पूर्णज्ञानवान् तादृशसुखवानित्यादिरादिपदार्थः । एवमग्रेतनप्रयोगेऽपि दुःख-रूपदोषवान् श्रमरूपदोषवानित्येवं ध्येयम् ।

यादु०— **युक्तेरिति** । उपपत्तिपदेनोक्ताया इति शेषः । **समासव्यासाभ्यामिति** । सङ्कोचविस्तरा-भ्यामित्यर्थः । तथा चेश्वरो न सर्वगुणपूर्ण इतीश्वरो दोषीति च सङ्क्षेपतः, ईश्वरो न ज्ञानवान् सुखवानीश्वरो दुःखवांश्चिन्तावानित्यादिविस्तरतश्च साधनीयमित्याशयः । अत एव सिद्धान्ते ईश्वरः सकलगुणपूर्णः सर्वदोष-विदूरश्चेति सङ्क्षेपेणेश्वरो विप्रतिपन्नगुणवानीश्वरो न विमतदोषवानिति विस्तरतश्च निराकरणमुपपद्यत इति ध्येयम् । यो यत्र स्वतन्त्रः स तद्वानित्येवोक्ते दुःखादौ स्वतन्त्रस्य तद्वत्त्वाभावेन व्यभिचारः स्यादतः सत्यन्तं विशेषणम् । एवं द्वितीयहेतावपि सुखादौ स्वतन्त्रस्य तदभावाभावेन व्यभिचारवारणाय सत्यन्तमित्यव-गन्तव्यम् ।

वं०प०— **आक्षेप इति** । गुणाः कथं न स्युः । स्युरेव । दोषाः कथं पुनः स्युः न स्युरेवेत्याक्षेप इत्यर्थः । **प्रेप्सा** अपेक्षा । **न हीयते** विद्यमानं हातुं न शक्यमित्यर्थः । **जिहासा** हातुमिच्छा ।

कं०रा०— **समासव्यासाभ्यामिति** । ईश्वरः अपूर्णगुणश्चेतनत्वात् देवदत्तादिवत् ईश्वरो दोषी तत एव तद्वदिति समासः । ईश्वरः अपरिपूर्णज्ञानवान् अपरिपूर्णानन्दवान् चेतनत्वात् यज्ञदत्तवदित्यादिः ईश्वरः अज्ञानवान् दुःखवान् अत एव तद्वदित्यादिश्च व्यास इति ध्येयम् । यद्वा ईश्वरो नेच्छावान् नानन्दवानित्यप्रयत्नमात्रेण निर्व्यूढकर्तृताकत्वादित्यादिर्गुणापूर्णतायां व्यासो द्रष्टव्यः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-सर्वतन्त्रस्वतन्त्र-श्रीमद्व्यासतीर्थमुनिवर्यपौत्र-श्रीपतितीर्थपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां द्वितीयाध्यायस्य प्रथमः पादः ॥

श्रीनिधि०— प्रेप्साऽभावादिति । सत्यपि स्वातन्त्र्य इति शेषः । अपेक्षाभावादित्यर्थः । **जिहासाभावादिति** । स्वातन्त्र्ये सत्यपीति शेषः । हातुमिच्छा जिहासा ।

शे०वा०— समासव्यासाभ्यामिति । ईश्वरो न सर्वगुणपूर्ण इतीश्वरो दोषीति च सङ्क्षेपः । ईश्वरो न ज्ञानवान्न सुखवानितीश्वरो दुःखवांश्चिन्तावानित्यादिविस्तरश्चेत्येवं सङ्क्षेपविस्तराभ्यामित्यर्थः । अत एव सिद्धान्ते ईश्वरः सकलगुणपूर्णः सर्वदोषविदूरश्चेति सामान्यतः, ईश्वरो विप्रतिपन्नगुणः ईश्वरो न विप्रतिपन्न-दोषवानिति विस्तरतश्च गुणसाधनदोषनिराकरणे वक्ष्यतीति द्रष्टव्यम् । **अन्योन्यसमुच्चय इति** । तथा च नान्यतरवैयर्थ्यमिति भावः । तर्हीतरव्यावृत्त्यर्थैवशब्दविरोध इत्यतस्तस्य भिन्नक्रमत्वान्न तद्विरोध इत्याह **एवशब्दस्येति** । **आक्षेप इति** । उत्तरत्र परिहाराभावेन प्रश्नार्थत्वायोगादिति भावः । आद्यहेतौ, यो यत्र स्वतन्त्रः स तद्वानित्येवोक्ते दोषे स्वतन्त्रस्य तद्वत्त्वाभावाद्व्यभिचारः स्यादित्यतः सत्यन्तं विशेषणम् । द्वितीयहेतावपि, गुणेषु स्वतन्त्रस्य तदभाववत्त्वाभावेन व्यभिचारः स्यादित्यतः सत्यन्तं विशेषणम् । जीवे व्यभिचारवारणायोभयत्र विशेष्यभागः । उभयत्र विशेषव्याप्तौ दृष्टान्ताभावेन तदसम्भवात् सामान्यव्याप्ति-प्रदर्शनमिति मन्तव्यम् ।

वा०र०— सामान्यत इति । गुणसाधनदोषनिराकरणे इत्युत्तरेण सम्बन्धः । अनेनैवात्र एते प्रयोगाः इत्युत्तरमूले स्वतन्त्रत्वाहेतुकं व्यतिरेकानुमानं सामान्यतः उक्तपूर्वपक्षस्य निराकरणरूपम् । उत्तरानुमानद्वयं तु विशेषतः उक्तपूर्वपक्षद्वयस्य निराकरणरूपमिति विवेकोऽपि दर्शितो भवति । तथा च नान्यतरेति एकस्यापरेण समुच्चयमात्रस्यान्यतरेण सिद्धावपि परस्परं समुच्चयस्य एकमात्रेण सिद्ध्यसम्भवात् तत्समुच्चयलाभार्थं उभयोरपि आवश्यकत्वात् नान्यतरवैय्यर्थ्यमित्यर्थः । **एवशब्दविरोध इति** । समुच्चयार्थक चापिशब्दयोरिति शेषः । विरोध उपपादयितुं उक्तं **इतरेति** । चापिशब्दयोः न केवलं गुणाः अपि तु दोषाश्चेति समुच्चयार्थत्वादेवकारस्य चावधारणार्थस्य गुणा एवेति तदन्यनिषेधपरत्वात् अर्थद्वारको विरोधः इत्यर्थः । **भिन्नक्रमत्वादिति** । भिन्नस्थले सम्बद्ध्यमानत्वादित्यर्थः । सामान्यपूर्वपक्षे अनुमाननिरासकस्वतन्त्रत्वमात्रहेतुकव्यतिरेक्यनुमाने पदकृत्यकथना-नवकाशात् विशेषपूर्वपक्षानुमाननिरासके विशेषणादिसाधकानुमानद्वये तत्कृत्यान्याह **आद्यहेतावित्यादिना** ।

स०व्र०— समासव्यासाभ्यामिति । यदा दोषाणामाधिक्यं तदा गुणानामल्पत्वम् । यदा गुणाना-माधिक्यं तदा दोषाणामल्पत्वमित्येवं सङ्क्षेपविस्तराभ्यामित्यर्थः । तथा लोके दर्शनादिति भावः ।

इति श्रीमद्विद्याधीशतीर्थपूज्यपादप्रशिष्येण श्रीवेदनिधितीर्थपूज्यपादशिष्येण
श्रीसत्यव्रततीर्थमुनिना विरचितायां श्रीमन्न्यायसुधाटिप्पणिकायां
द्वितीयाध्यायस्य प्रथमः पादः ॥

परि०— पूर्वसङ्गत्यन्तर्भावसङ्गत्योः द्योतनायाधिकरणार्थमाह **सर्व इति** । **समासव्यासाभ्यां** सङ्क्षेपविस्तराभ्यामित्यर्थः । ईश्वरो न सर्वगुणः चेतनत्वात् चैत्रवत् । ईश्वरो न सर्वदोषदूरः चेतनत्वात् चैत्रवत् इति सङ्कोचतः । ईश्वरो न विमतसम्पूर्णज्ञानवान्, न पूर्णानन्दवान्, न सर्वशक्तिमान् । ईशो न विमतनिश्शेषदुःखहीनो न निश्शेषश्रमहीनः चेतनत्वादित्यादिरूपेण विस्तरतः प्रयोजक्तव्यमित्यर्थः । **युक्तेरिति** । उपपत्तिपदोक्तयुक्तेरित्यर्थः । वक्ष्यमाणप्रयोगानुकूलव्याप्तिं व्यनक्ति **द्वेधा हीति** । **तत्रेति** । वस्तुप्राप्तौ **स्वातन्त्र्याभावात्** शक्त्यभावादित्यर्थः । **प्रेप्सेति** । प्राप्तीच्छाभावादित्यर्थः । **न हीयत इति** । न त्यक्तो भवतीत्यर्थः । **जिहासाऽभावात्** त्यागेच्छाऽभावादित्यर्थः । **अस्ति च सर्वत्र स्वातन्त्र्यमिति** । आरम्भणाधिकरणे 'आत्मनि चैवं विचित्राश्च ही'त्यादौ समर्थनादिति भावः । समासेन पूर्वपक्षे अभिहितप्रयोगस्य प्रतिप्रयोगमाह **ईश्वरस्सकलगुणपरिपूर्ण इति** । व्यासेन पूर्वपक्षोक्तप्रयोगस्य प्रतिप्रयोगमाह **ईश्वरो विप्रतिपन्नगुणवानिति** । सम्पूर्णज्ञानवान् तादृशसुखवानित्यादिरादिपदार्थः । एवमग्रेतनप्रयोगेऽपि दुःखरूपदोषवान् श्रमरूपदोषवानित्येवं ध्येयम् ।

यादु०— **युक्तेरिति** । उपपत्तिपदेनोक्ताया इति शेषः । **समासव्यासाभ्यामिति** । सङ्कोचविस्तराभ्यामित्यर्थः । तथा चेश्वरो न सर्वगुणपूर्ण इतीश्वरो दोषीति च सङ्क्षेपतः, ईश्वरो न ज्ञानवान् सुखवानीश्वरो दुःखवांश्चिन्तावानित्यादिविस्तरतश्च साधनीयमित्याशयः । अत एव सिद्धान्ते ईश्वरः सकलगुणपूर्णः सर्वदोषविदूरश्चेति सङ्क्षेपेणेश्वरो विप्रतिपन्नगुणवानीश्वरो न विमतदोषवानिति विस्तरतश्च निराकरणमुपपद्यत इति ध्येयम् । यो यत्र स्वतन्त्रः स तद्वानित्येवोक्ते दुःखादौ स्वतन्त्रस्य तद्वत्त्वाभावेन व्यभिचारः स्यादतः सत्यन्तं विशेषणम् । एवं द्वितीयहेतावपि सुखादौ स्वतन्त्रस्य तदभावाभावेन व्यभिचारवारणाय सत्यन्तमित्यवगन्तव्यम् ।

वं०प०— **आक्षेप इति** । गुणाः कथं न स्युः । स्युरेव । दोषाः कथं पुनः स्युः न स्युरेवेत्याक्षेप इत्यर्थः । **प्रेप्सा** अपेक्षा । **न हीयते** विद्यमानं हातुं न शक्यमित्यर्थः । **जिहासा** हातुमिच्छा ।

कं०रा०— **समासव्यासाभ्यामिति** । ईश्वरः अपूर्णगुणश्चेतनत्वात् देवदत्तादिवत् ईश्वरो दोषी तत एव तद्वदिति समासः । ईश्वरः अपरिपूर्णज्ञानवान् अपरिपूर्णानन्दवान् चेतनत्वात् यज्ञदत्तवदित्यादिः ईश्वरः अज्ञानवान् दुःखवान् अत एव तद्वदित्यादिश्च व्यास इति ध्येयम् । यद्वा ईश्वरो नेच्छावान् नानन्दवानित्यप्रयत्नमात्रेण निर्व्यूढकर्तृताकत्वादित्यादिर्गुणापूर्णतायां व्यासो द्रष्टव्यः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-सर्वतन्त्रस्वतन्त्र-श्रीमद्व्यासतीर्थमुनिवर्यपौत्र-श्रीपतितीर्थपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां द्वितीयाध्यायस्य प्रथमः पादः ॥

श्रीनिधि०— प्रेप्साऽभावादिति । सत्यपि स्वातन्त्र्य इति शेषः । अपेक्षाभावादित्यर्थः । **जिहासाभावादिति** । स्वातन्त्र्ये सत्यपीति शेषः । हातुमिच्छा जिहासा ।

शे०वा०— समासव्यासाभ्यामिति । ईश्वरो न सर्वगुणपूर्ण इतीश्वरो दोषीति च सङ्क्षेपः । ईश्वरो न ज्ञानवान्न सुखवानितीश्वरो दुःखवांश्चिन्तावानित्यादिविस्तरश्चेत्येवं सङ्क्षेपविस्तराभ्यामित्यर्थः । अत एव सिद्धान्ते ईश्वरः सकलगुणपूर्णः सर्वदोषविदूरश्चेति सामान्यतः, ईश्वरो विप्रतिपन्नगुणः ईश्वरो न विप्रतिपन्न-दोषवानिति विस्तरतश्च गुणसाधनदोषनिराकरणे वक्ष्यतीति द्रष्टव्यम् । **अन्योन्यसमुच्चय इति** । तथा च नान्यतरवैयर्थ्यमिति भावः । तर्हीतरव्यावृत्त्यर्थकैवशब्दविरोध इत्यतस्तस्य भिन्नक्रमत्वान्न तद्विरोध इत्याह **एवशब्दस्येति** । **आक्षेप इति** । उत्तरत्र परिहाराभावेन प्रश्नार्थत्वायोगादिति भावः । **आद्यहेतौ**, यो यत्र स्वतन्त्रः स तद्वानित्येवोक्ते दोषे स्वतन्त्रस्य तद्वत्त्वाभावाद्व्यभिचारः स्यादित्यतः सत्यन्तं विशेषणम् । द्वितीयहेतावपि, गुणेषु स्वतन्त्रस्य तदभाववत्त्वाभावेन व्यभिचारः स्यादित्यतः सत्यन्तं विशेषणम् । जीवे व्यभिचारवारणायोभयत्र विशेष्यभागः । उभयत्र विशेषव्याप्तौ दृष्टान्ताभावेन तदसम्भवात् सामान्यव्याप्ति-प्रदर्शनमिति मन्तव्यम् ।

वा०र०— सामान्यत इति । गुणसाधनदोषनिराकरणे इत्युत्तरेण सम्बन्धः । अनेनैवात्र एते प्रयोगाः इत्युत्तरमूले स्वतन्त्रत्वाहेतुकं व्यतिरेकानुमानं सामान्यतः उक्तपूर्वपक्षस्य निराकरणरूपम् । उत्तरानुमानद्वयं तु विशेषतः उक्तपूर्वपक्षद्वयस्य निराकरणरूपमिति विवेकोऽपि दर्शितो भवति । तथा च नान्यतरेति एकस्यापरेण समुच्चयमात्रस्यान्यतरेण सिद्धावपि परस्परं समुच्चयस्य एकमात्रेण सिद्ध्यसम्भवात् तत्समुच्चयलाभार्थं उभयोरपि आवश्यकत्वात् नान्यतरवैय्यर्थ्यमित्यर्थः । **एवशब्दविरोध इति** । समुच्चयार्थक चापिशब्दयोरिति शेषः । विरोध उपपादयितुं उक्तं **इतरेति** । चापिशब्दयोः न केवलं गुणाः अपि तु दोषाश्चेति समुच्चयार्थत्वादेवकारस्य चावधारणार्थस्य गुणा एवेति तदन्यनिषेधपरत्वात् अर्थद्वारको विरोधः इत्यर्थः । **भिन्नक्रमत्वादिति** । भिन्नस्थले सम्बद्ध्यमानत्वादित्यर्थः । सामान्यपूर्वपक्षे अनुमाननिरासकस्वतन्त्रत्वमात्रहेतुकव्यतिरेक्यनुमाने पदकृत्यकथना-नवकाशात् विशेषपूर्वपक्षानुमाननिरासके विशेषणादिसाधकानुमानद्वये तत्कृत्यान्याह **आद्यहेतावित्यादिना** ।

स०व्र०— समासव्यासाभ्यामिति । यदा दोषाणामाधिक्यं तदा गुणानामल्पत्वम् । यदा गुणाना-माधिक्यं तदा दोषाणामल्पत्वमित्येवं सङ्क्षेपविस्तराभ्यामित्यर्थः । तथा लोके दर्शनादिति भावः ।

इति श्रीमद्विद्याधीशतीर्थपूज्यपादप्रशिष्येण श्रीवेदनिधितीर्थपूज्यपादशिष्येण
श्रीसत्यव्रततीर्थमुनिना विरचितायां श्रीमन्न्यायसुधाटिप्पणिकायां
द्वितीयाध्यायस्य प्रथमः पादः ॥

स०ना०— यदधीना गुणाश्चेति मूलसम्बन्धसुधायां **समासव्यासाभ्यामपरिपूर्णगुणत्वं चेति** । अनन्तगुणानां समासेन सङ्कोचनेनापरिपूर्णगुणत्वं स्यात् । दोषाणां व्यासेन विस्तरेण दोषित्वं स्यात् । बहुदोषित्वमिति यावदिति बुद्ध्या विवेकेन सम्बन्धः ॥

इति श्रीमन्न्यायसुधाटिप्पण्यां द्वितीयाध्यायस्य प्रथमः पादः ॥

विट्ठल०— समासव्यासाभ्यामिति । तथा चेश्वरो न सर्वगुणः चेतनत्वादिति । ईश्वरो दोषी अत एवेति सङ्क्षेपेण ईश्वरो न दुःखी सुखीत्यादिविस्तरणे चेत्यर्थः । अत एव सिद्धान्ते ईश्वरः सकलगुणसम्पूर्ण इत्यादिना सङ्क्षेपविस्तराभ्यां निराकरणमुपपन्नमिति ध्येयम् । **युक्तेरिति** । उपपत्तिपदेनोक्ताया इति शेषः । नन्वथापि कथं गुणपूर्णत्वादिकमुपपादितं भवतीत्यतो मूलतात्पर्यप्रदर्शनेनोपपादयति **द्वेधा हीत्यादिना** । स्वतन्त्रत्वादित्येवोक्ते ईश्वरस्य दुःखादिविषये स्वातन्त्र्यस्य विद्यमानत्वेऽपि तद्वता भावेन तत्र व्यभिचारः स्यात् । अतः तत्र प्रेप्सावत्वे सतीत्युक्तम् । एवं द्वितीयहेतावपि सुखादेः स्वातन्त्र्यस्य तदभावाभावेन व्यभिचारवारणाय सत्यन्तं विशेषणं द्रष्टव्यम् ।

चषक— प्रेप्सावत्त्वे सतीति । प्रोपसृष्टादाप्नोतेः सन्नन्तादाकारप्रत्यये निष्पन्नः प्रेप्साशब्द इति प्रकृष्टाप्तिविषयकेच्छावत्त्वे सतीत्यर्थः ।

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणश्रीमत्सत्यप्रियतीर्थपूज्यपादतनूज-सर्वतन्त्रस्वतन्त्र-गालवपुरीश्रीनिवासार्यान्तेवास्यन्तेगणगणितेन कृष्णशर्मणा रचितायां चषकनाम्न्यां समासतः कतिपयसुधाफक्किकाव्याख्यायां द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ इति भाष्योक्तैतदधिकरणीयार्थे अभ्यधिकाशङ्का तन्निरासश्च ॥

* * *

॥ अथ पादार्थोपसंहारः ॥

१४३ **सु०—**

अनु०— सर्वधर्मोपपत्तेस्तद्वाक्यैरपि हि तादृशैः ।
निर्दोषाशेषगुणको निर्णीतो भगवान् हरिः ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य प्रथमः पादः ॥

तत् एवमुक्तप्रकारेण, **सर्वेषां धर्माणां** गुणानां दोषाभावानां च सम्बन्धिन्यास्तत्प्रतिपादिकाया उपपत्तेः, **तादृशैः** सर्वगुणपूर्त्यादिरूपपादकैः । **हि**शब्दस्तेषां 'गुणाः श्रुताः' इत्यादीनां प्रसिद्धतां सूचयति ।

तदनेन स्वपक्षे प्रमाणमभिदधतैव परकीययुक्तीनां कालात्ययापदिष्टत्वं स्वातन्त्र्याभावोपाधिदुष्टत्वं चोक्तं भवतीति ॥

परि०— मूलवाक्यशेषं योजयति **तदेवमिति** । षष्ठीतत्पुरुषे सति षष्ठ्यर्थमाह **सम्बन्धिन्या इति** । तेषामित्यस्य विवरणम् **गुणाः श्रुता इत्यादीनामिति** । भाष्योक्तानामित्यर्थः । **परकीययुक्तीनामिति** । पूर्वपक्षोक्तयुक्तीनामित्यर्थः ।

॥ इति श्रीमन्न्यायसुधापरिमळे सुधीन्द्रपादपूजकराघवेन्द्रयतिकृते
द्वितीयाध्यायस्य प्रथमः पादः ॥ २-१ ॥

यादु०— सूत्रे षष्ठीसमासो विवक्षित इत्यभिप्रेत्य विग्रहं दर्शयति **सर्वेषामित्यादिना** । सम्बन्धित्वमेव दर्शयति **तत्प्रतिपादिकाया इति** ॥

॥ इति श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना कृतायां सुधाटिप्पण्यां
द्वितीयाध्यायस्य प्रथमः पादः ॥

वं०प०— तदेवमित्यनेन तद्वाक्यैरित्यत्रत्यस्तच्छब्द उपसंहारपर इत्यभिप्रेत्य तदित्यनूद्य एवं प्रकारेणोक्तप्रकारेणेति व्याख्यायत इति ज्ञेयम् । **तत्प्रतिपादिकायाः** तत्साधिकायाः । तादृशैर्वाक्यैश्चेत्यर्थः । **तेषां** वाक्यानाम् । **अभिदधता** 'सर्वधर्मोपपत्तेश्चे'ति सूत्रेणोपपत्तिरूपं चशब्देनागमरूपं च प्रमाणं वदता सूत्रकारेणेत्यर्थः । **परकीययुक्तीनामिति** । ईश्वरोऽपूर्णगुणश्चेतनत्वाज्जीववत् । दोषी च तेनैव तद्वदेवेत्यादिपूर्वपक्षयुक्तीनामित्यर्थः । **स्वातन्त्र्येति** । स्वातन्त्र्याभावरूपो य उपाधिस्तेन च दुष्टत्वमुक्तं भवतीत्यर्थ इत्यशेषमतिमङ्गलम् ॥

॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽगृहीतसुधावाक्यार्थविवरणे
द्वितीयाध्यायस्य प्रथमः पादः ॥

श्रीनिधि०— तत्प्रतिपादिकाया इति । तद्विषयकज्ञानजनिताया इत्यर्थः ॥

शे०वा०— सूत्रभाष्ययोः षष्ठीसमासो विवक्षित इत्यभिप्रेत्य तथा विग्रहं दर्शयन् सर्वधर्मोपपत्तेरित्यादिभाष्यं योजयति **तदेवमित्यादिना** । सर्वधर्मोपपत्तेरित्यतः परस्य तदित्यस्यानुवादेन तेनेत्यर्थमभिप्रेत्यैवमुक्तप्रकारेणेति तात्पर्यार्थकथनम् । धर्माणामिति षष्ठी सम्बन्धमात्र इत्यभिप्रेत्योक्तं **सम्बन्धिन्या इति** । तस्यैव सम्बन्धस्य विशेषप्रदर्शनं **तत्प्रतिपादिकाया इति** । तादृशैरिति वाक्यविशेषणस्य वैयर्थ्यमाशङ्क्य प्रकृतोपयुक्तमर्थमाह **तादृशैरित्यादि** । **स्वातन्त्र्याभावेति** । न च चेतनत्वेनापरिपूर्णगुणत्वादेरिव स्वातन्त्र्याभावरूपोपाधेरपि पक्षे साधनसौलभ्येन साधनव्यापकत्वान्नायमुपाधिरिति वाच्यम् । अस्या अपि युक्तेः स्वातन्त्र्यबोधकश्रुतियुक्तिविरुद्धत्वेन कालात्ययापदिष्टत्वेन पक्षे साधनासम्भवादित्यत्र तात्पर्यात् ॥

सर्वाभीष्टप्रदं रामं सर्वानिष्टनिवारकम् ।
जानकीजानिमनिशं वन्दे मद्गुरुवन्दितम् ॥ १ ॥

विद्वन्मत्तेभकुम्भाद्रिविपाटनविचक्षणः ।
विद्याधीशनृसिंहो मे गुरुर्नित्यं भवेन्मुदे ॥ २ ॥

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ ३ ॥

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यपादानां निजशिष्यस्य केशवस्य कृतौ श्रीमद्गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यविवृतौ शेषवाक्यार्थचन्द्रिकायां द्वितीयाध्यायस्य प्रथमः पादः ॥

वा०र०— तदेवं उक्तप्रकारेण इत्युपसंहाररूपेण मूलकारवचनमिति भ्रान्तिवारणाय भाष्यव्याख्यानतां दर्शयति **सर्वधर्मोपपत्तेः इत्यत इति** । गुणाः श्रुता इति श्रुत्यर्थस्तु उपासनापादीयमूले व्यक्तः । तत्रोपयुक्तं एतदधिकरणीयतत्त्वप्रकाशिकाद्यविरोधेन वक्ष्यामः । इति सकलमतिमङ्गलम् ॥

श्रीमन्न्यायसुधागूढशेषवाक्यार्थचन्द्रिका ।
सुव्याख्याता युक्तिपादगता तत् प्रीयतां गुरुः ॥

आनन्दाब्धिप्रजातत्रिदशतरुगुरुश्रीनिवासानुजश्री-
विद्याधीशार्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
श्रीरुक्मिण्याख्यबाय्यस्य विबुधनृसिंहस्य गुर्वीयसौध-
व्याख्यापाठादिशोधात्मकविवृतिकृतावन्तगो युक्तिपादः ॥

श्रीमध्वान्तर्गतरामव्यासमध्वेशात्मकश्रीनृसिंहः प्रीयताम् ॥

इति श्रीमत्सकलविद्वद्वृन्दशिखामणि-श्रीपाण्डुरङ्गकेशवाचार्यवर्यनामक-श्रीगुरुराजवर्यरचित-श्रीमन्न्यायसुधाविषमपदवाक्यव्याख्यानरूपशेषवाक्यार्थचन्द्रिकायाः व्याख्यापाठादिशोधरूपविवृत्तौ वाक्यार्थरत्नमालाभिधायां गुरुराजपुत्रपाण्डुरङ्गनरसिंहसूरिविरचितायां युक्तिपादः समाप्तः ॥

३३४ **विठ्ठल०**— उपसंहारपरत्वेन सर्वधर्मोपपत्तेरित्येतत्पदं व्याख्याति **तदेवमिति** । सूत्रे सम्बन्धार्थे षष्ठीसमासो विवक्षित इति भावेनाह **सर्वेषामिति** । सम्बन्धित्वमेव दर्शयति **तत्प्रातिपादिकाया इति** ।

इति श्रीमन्न्यायसुधागूढवाक्यार्थविवृतौ विठलाचार्यतनूज-आनन्दतीर्थनामकेन सङ्गृहीतायां द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ इति पादार्थोपसंहारः ॥

* * *

॥ अथ पादान्त्यमङ्गलाचरणम् ॥

१४४ **सु०—**

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
द्वितीयाध्यायस्य प्रथमचरणः पर्यवसितः ॥

इति श्रीमन्न्यायसुधायां द्वितीयाध्यायस्य प्रथमचरणः समाप्तः ॥

॥ इति पादान्त्यमङ्गलाचरणम् ॥

॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥

* * *

परिशिष्टानि

पुटसंख्या

१) श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्
ब्रह्मसूत्रानुव्याख्यानम् ६३७३-६३९५

२) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका
श्रीपद्मनाभतीर्थविरचिता
सन्न्यायरत्नावली ६३९७-६४१०

३) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका
श्रीत्रैविक्रमार्यकृता
नयचन्द्रिका ६४११-६४१९

४) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका
श्रीशङ्करपण्डिताचार्यविरचिता
अनुव्याख्यानसम्बन्धदीपिका ६४२१-६४३२

।। श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ।।

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ब्रह्मसूत्रानुव्याख्यानम्

।। श्रीगुरुभ्यो नमः ।। हरिः ॐ ।।

द्वितीयाध्यायस्य प्रथमः पादः

अविरोधप्रतिपादनारम्भः

उक्तः समन्वयः साक्षात् अविरोधोऽत्र साध्यते ।

चतुर्विधविरोधाभावमध्ये युक्तिविरोधाभावः प्रथमपादे साध्यते

चतुर्विधस्य तस्यादौ यौक्तः

प्रथमाधिकरणे विरोधिचतुस्स्वरूपपाशुपतादिस्मृतिविरोधपरिहारः

तत्रापि च स्मृतेः ।। ४३३ ।।

चत्वारोऽपि पादाः पादचतुष्टयार्थवन्तः

तस्याश्चतुस्स्वरूपत्वात्

अध्याया अपि अध्यायचतुष्टयार्थवन्तः

प्रत्येकं चतुरात्मकाः ।

पादाः सर्वे

वासुदेवादिचतुर्मूर्तिप्रतिपादकत्वेनापि ब्रह्ममीमांसाशास्त्रस्य चतुरात्मकत्वम्

तदंशाश्च मूर्तीनां वर्णमागमात् ॥ ४३४ ॥

प्रथमपादीयाधिकरणपूर्वपक्षसिद्धान्तयुक्तयः

आप्तता समतादृष्टिश्रुतिसाम्यबलोद्भवाः ।
सर्वानुसारो लघुता विशेषादर्शनाफले ॥ ४३५ ॥

इष्टासिद्धिश्च नियमः पूर्वपक्षेषु युक्तयः ।
एता एव त्वतिबलाः सिद्धान्तस्य नियामिकाः ॥ ४३६ ॥

॥ स्मृत्यधिकरणम् ॥

ॐ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ ॥ २-१-१ ॥

पाशुपतादिस्मृतयः शिवाद्याप्तप्रत्यक्षमूलत्वात् प्रमाणमिति पूर्वपक्षोज्जीवनम्

आप्तैः प्रत्यक्षतो दृष्ट्वा प्रोक्तमर्थं कथं श्रुतिः ।
पिपीलिकालिपिनिभा वारयेत्सर्वगा हि ते ॥ ४३७ ॥

इति चेद्

पञ्चरात्रादिस्मृतिप्रणतॄणां हरिमन्वादीनामाप्तत्वात् सत्प्रतिपक्षः,
पञ्चरात्रादीनां समूलत्वात् प्रामाण्यम्

यद्यशेषज्ञा रुद्राद्या हरिपूर्वकाः ।
किन्नाशेषविदो मानं ह्युभयत्र समं भवेत् ॥ ४३८ ॥

ॐ इतरेषां चानुपलब्धेः ॐ ॥ २-१-२ ॥

ॐ एतेन योगः प्रत्युक्तः ॐ ॥ २-१-३ ॥

परस्परविरुद्धत्वात् पाशुपतादिस्मृतीनां न आप्तमूलत्वम्

न चाप्तिनिश्चयस्तत्र शक्यते व्यभिचारतः ।

पञ्चरात्रस्य निर्दोषवाक्यमूलत्वात् क्वचित् दृष्टार्थे फलव्यभिचारेऽपि न अप्रामाण्यम्

न चास्या व्यभिचारेऽपि हीयते मानता क्वचित् ॥ ४३९ ॥

निर्दोषवाक्यमूलत्वान्न च तद्युक्तिमूलता ।

वेदोक्ताधिकारपाशुपतादिस्मृत्युक्ताधिकारयोर्वैलक्षण्यम्

वेदोक्तस्याधिकारस्य दुर्निरूपत्वतः सदा ॥ ४४० ॥

नियमो व्यभिचारो वा नैव ज्ञातुं हि शक्यते ।
अधिकारो हि सुलभः कथितोऽन्यागमेष्वलम् ॥ ४४१ ॥

वेदोक्तो ह्यधिकारस्तु दुर्लभः सर्वमानुषैः ।
अन्यागमेषु विप्रत्वमपि चण्डालजन्मनाम् ॥ ४४२ ॥

मण्डलान्तःप्रवेशेन क्रमशः प्रतिपाद्यते ।

अधिकारादिषु परस्परविसंवादेन पाशुपतादीनामप्रामाण्यम्

अधिकारं दुरापाद्यमुक्त्वाऽतिसुलभं पुनः ॥ ४४३ ॥

अशक्यं साधनं चोक्त्वा सुशकं तत्फलाप्तये ।
उच्यतेऽतस्तदुक्तं हि व्यभिचारि फलेऽपि तु ॥ ४४४ ॥

कथं प्रमाणतां गच्छेत्—

॥ इति स्मृत्यधिकरणम् ॥ १ ॥

* * *

॥ नविलक्षणाधिकरणम् ॥

ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥ २-१-४ ॥

ॐ दृश्यते तु ॐ ॥ २-१-५ ॥

युक्तिविरोधपरिहारारम्भः

फलव्यभिचारित्वात् श्रुतेरप्रामाण्यमित्याक्षेपपरिहारः

नित्यत्वेन पुरुषदोषवर्जितत्वात् वेदानां प्रामाण्यम्

नित्यत्वात् पुरुषोद्भवैः ।
उज्झितं सर्वदोषैश्च कथं नो मानतां व्रजेत् ॥ ४४५ ॥

'विरूपनित्यया वाचा' 'नित्ययाऽनित्यया सदा' ।
इत्यादिश्रुतिभिर्वेदो नित्य इत्यवगम्यते ॥ ४४६ ॥

वेदानां पुरुषबुद्धिपूर्वकत्वाभावेऽपि प्रमाणाविरुद्धत्वात्
सम्यगनुभवसाधनत्वम्

पिपीलिकालिपिश्चापि प्रमाणमविरोधतः ।
यथा द्रौणेरुलूकेन कृतमप्यास बोधकम् ॥ ४४७ ॥

अविरुद्धं विरुद्धं तु विरोधादेव बाधितम् ।
विरोधादर्शनात् तस्माद्वेदप्रामाण्यमिष्यते ॥ ४४८ ॥

श्रुतिसंवादित्वात् पञ्चरात्रादिस्मृतीनां प्रामाण्यम्

तन्मूलत्वात् स्मृतीनां तु

उपजीव्यप्रत्यक्षागमविरोधाभावे प्रामाण्यम्

विरोधो यत्र न क्वचित् ।

विरोधोऽपि स एवोक्तः प्रत्यक्षेणागमेन वा ॥ ४४९ ॥

आगमस्य आगमान्तरेण विरोधे युक्त्या अर्थनिर्णयः

आगमेनागमस्यैव विरोधे युक्तिरिष्यते ।

उपजीव्यप्रत्यक्षागमविरोधे प्रतीतार्थप्रच्यावनमात्रम्

उपजीव्यविरोधे तु वेदस्यान्यार्थकल्पना ॥ ४५० ॥

प्रत्यक्षागमयुक्तीनां उपजीव्यत्वव्यवस्था

प्रत्यक्षमुपजीव्यं स्यात् प्रायो युक्तिरपि क्वचित् ।
आगमैकप्रमाणेषु तस्यैव ह्युपजीव्यता ॥ ४५१ ॥

युक्तोऽयुक्तश्च यद्यर्थ आगमस्य प्रतीयते ।
स्यात्तत्र युक्त एवार्थः

युक्तेः त्रैविध्यम्

युक्तिश्च त्रिविधा मता ॥ ४५२ ॥

व्याप्तिः प्रत्यक्षगा यस्या युक्तिरागमगा तथा ।
प्रत्यक्षागममूला तु युक्तिस्तत्र बलीयसी ॥ ४५३ ॥

प्रमाणसामान्यलक्षणम्,
तत्र ज्ञाने मुख्यं, करणेषु शब्दे मुख्यं, प्रत्यक्षानुमानयोः अमुख्यम्

याथार्थ्यमेव मानत्वं तन्मुख्यं ज्ञानशब्दयोः ।
अर्थत्वमर्यतैव स्यात् न क्रियार्थेषु सा मता ॥ ४५४ ॥

ज्ञानार्थे ज्ञेयता मुख्या शब्दार्थे तदनन्तरम् ।
यथार्थज्ञानजनका यथार्था युक्तयः स्मृताः ॥ ४५५ ॥

यथार्थज्ञानं केवलप्रमाणम्, प्रत्यक्षानुमानागमाः अनुप्रमाणम्

अनुप्रमाणमेतानि ह्यक्षयुक्तिवचांस्यतः ।

स्मृत्यनुवादयोरपि प्रामाण्यम्

प्रामाण्यं नानुवादस्य स्मृतेरपि विहीयते ॥ ४५६ ॥

याथार्थ्यमेव प्रामाण्यशब्दार्थो यद्विवक्षितः ।
अङ्गीकृतं चेत् प्रामाण्यं स्मृत्यादेः का विरुद्धता ॥ ४५७ ॥

न चाफलत्वं वक्तव्यं सर्वस्मृत्यनुवादयोः ।
फलवत्त्वं न चास्माभिः प्रामाण्यं च (हि) विवक्षितम् ॥ ४५८ ॥

तृणादिदर्शने किञ्च फलवत्त्वं निगद्यते ।
सुखदुःखादिकं किञ्चित्स्मृतावपि हि दृश्यते ॥ ४५९ ॥

न परिच्छेदकार्येव प्रमाणमिति च प्रमा ।

प्रत्यलक्षणं, तद्विभागाः

निर्दोषाक्षोद्भवं ह्यत्र प्रत्यक्षमिति गीयते ॥ ४६० ॥

प्राकृतं शुद्धचैतन्यमक्षं तु द्विविधं मतम् ।
शुद्धमीशरमामुक्तेष्वन्यत्र प्राकृतैर्युतम् ॥ ४६१ ॥

निर्दोषमेव चैतन्यमन्यत्रोभयमिष्यते ।
सुखदुःखादिविषयं शुद्धं संसारगेष्वपि ॥ ४६२ ॥

निर्दोषत्वातिनियमात्तद्बलिष्ठतमं मतम् ।
पञ्चेन्द्रियमनोभेदात् प्राकृतं षड्विधं स्मृतम् ॥ ४६३ ॥

अनुमास्वरूपं, परोक्तपञ्चावयवनियमनिरासः

अनुमा युक्तिरेवोक्ता व्याप्तिरेव तु सा स्मृता ।
प्रतिज्ञातार्थसिद्ध्यर्थं व्याप्तिरेव यदोदिता ॥ ४६४ ॥

अवशिष्टं किमत्रास्ति लिङ्गं तत्र विजानतः ।
यदि लिङ्गमसिद्धं स्यात् कुत एवास्य मानता ॥ ४६५ ॥

यदि स्मारकमात्रं स्यात् स्मर्तुर्नात्र प्रयोजनम् ।
न पञ्चावयवोक्तौ च विवादावसितिर्भवेत् ॥ ४६६ ॥

दृष्टान्तादिषु चैवं स्यात्साधनं पुनरेव तु ।
लिङ्गोक्तावपि चैवं स्यादनुमावसितिर्ध्रुवा ॥ ४६७ ॥

विरोधः असङ्गतिश्चेति द्वे अनुमानस्य दूषणे

विरोधोऽसङ्गतिश्चैव साक्षाद्युक्तेस्तु दूषणम् ।
प्रतिज्ञायामसम्बन्धो युक्तेरुक्ता ह्यसङ्गतिः ॥ ४६८ ॥

त्रिविधो विरोधः

विरोधोऽपि त्रिधैव स्यात् प्रतिज्ञार्थविरुद्धता ।
लिङ्गराहित्यमव्याप्तिर्न्यूनाधिक्ये तु वाचिके ॥ ४६९ ॥

साध्यव्यापकवैलोम्यमव्याप्तिः साधनस्य च ।
दुर्बलेन विरोधेऽपि न प्रमाणमसाधकम् ॥ ४७० ॥

स्ववाक्येन विरोधेऽपि नैव साधकतां व्रजेत् ।

परनिरूपिताशेषनिग्रहस्थानानामत्रैवान्तर्भावः

संवादानुक्तिसंयुक्ता एत एव तु निग्रहाः ॥ ४७१ ॥

वादजल्पवितण्डाभेदेन कथायाः त्रैविध्यम्,
तत्स्वरूपं, तत्फलञ्च

वादो जल्पो वितण्डेति कथास्तिस्रो विजानताम् ।
स्वार्थं परार्थमपि वा तत्त्वनिर्णयसाधिनी ॥ ४७२ ॥

केवलं तु कथा वादो जल्पोऽर्थादिव्यपेक्षया ।
सतामेव कथा ज्ञेया वितण्डा त्वसतां सताम् ॥ ४७३ ॥

अप्रकाश्य स्वसिद्धान्तमसतां पक्षदूषणम् ।
उक्ते तैः प्रथमं माने वक्तव्यं तस्य दूषणम् ॥ ४७४ ॥

विद्या परीक्षापूर्वैव वितण्डा जल्प एव च ।
उच्चनीचत्वनिर्णीतिर्यतो जयपराजयौ ॥ ४७५ ॥

विनैव तत्त्वनिर्णीतिं न हि जल्पादिना क्वचित् ।
उच्चनीचत्वविज्ञानमिति विद्यापरीक्षणम् ॥ ४७६ ॥

वादेन चोच्चनीचत्वविज्ञानं भवति स्फुटम् ।
इति वादस्य पूर्वत्वं तत्सिद्धौ व्यर्थताऽन्ययोः ॥ ४७७ ॥

बहुविद्यत्वसिद्धौ तु नैव वादोऽपि कारणम् ।
सभासभापप्राश्नीकपूर्वस्तु स्पर्धिनामपि ॥ ४७८ ॥

वाद एवोभयार्थः स्यान्निर्णीतिजयकारकः ।
तत्त्वाप्रकाश एवैको वितण्डाजल्पयोः फलम् ॥ ४७९ ॥

विना वादेन विद्याया यदि शक्यं परीक्षणम् ।
स्याज्जल्पादिरपि क्वापि वाद एवान्यथा भवेत् ॥ ४८० ॥

जल्प इत्यपि नाम स्याद्वादस्यैतादृशस्य तु ।
प्रतिज्ञामात्रसाध्यत्वमपि स्याद्याज्ञवल्क्यवत् ॥ ४८१ ॥

संवादे वादिनोः क्वापि विवादे हेतुरिष्यते ।

सभ्य-सभापति-प्राश्निकानां स्वरूपम्

सभा सभापतिश्चैव प्राश्निकाश्चैव वैष्णवाः ॥ ४८२ ॥

रागद्वेषविहीनाश्च स्युः सभ्याः सर्ववेदिनः ।
प्राश्निकाश्चैतदज्ञाने सभ्याश्चैषां च दूरगाः ॥ ४८३ ॥

प्रमाणं निर्णयाय स्युः पक्षपातविवर्जिताः ।

वादजल्पाभ्यां वितण्डायाः वैलक्षण्यम्

उभाभ्यां साधनं चैव दूषणं वादजल्पयोः ॥ ४८४ ॥

वादजल्पयोः प्रमाणोपन्यासप्रकारः

सद्भिरागम एवैकः प्रयोज्योऽभीष्टसाधकः ।
स्वसिद्धान्तानुसारेण ह्यसद्भिरनुमोच्यते ॥ ४८५ ॥

प्रत्यक्षागमवैरूप्यमाश्रित्यान्यार्थतैव तु ।
आगमे दर्शनीयाऽत्र दोषो लिङ्गविलोमता ॥ ४८६ ॥

लिङ्गानुकूल्यं स्वार्थस्य श्रुत्यादीनामनुग्रहः ।

त्रिपञ्चावयवादिनियमकल्पकाभावात् व्याप्तिरेवानुमा

त्रिपञ्चावयवामेव युग्मावयविनीमपि ॥ ४८७ ॥

नियमाद्योऽनुमां ब्रूयात् तं ब्रूयाद्यदि तादृशी ।
नानुमेति तदा केन साध्यावयवकल्पना ॥ ४८८ ॥

नियतावयवासिद्धौ व्याप्तिमात्रेण साधनम् ।
कर्तव्यमेव तेन स्यात् तस्मात् सैवानुमा मता ॥ ४८९ ॥

प्राभाकरोक्तप्रमाणसामान्यलक्षणस्य स्मृतौ अव्याप्तिः

अनुभूतिः प्रमाणं चेत्केन स्मृतिरपोद्यते।
पूर्वानुभूते किं मानमित्युक्ते स्यात्किमुत्तरम् ॥ ४९० ॥

स्मृतेः मानसप्रत्यक्षत्वम्, संस्कारः सन्निकर्षस्थानीयः

मानसं तद्धि विज्ञानं तच्च साक्षिप्रमाणकम्।
अतीतानागतं यद्वद्योगिभिर्दृश्यतेऽञ्जसा ॥ ४९१ ॥

एवं पूर्वानुभूतं च मनसैवावगम्यते।
विज्ञातं मनसा पूर्वं मयैतत्कृतमित्यपि ॥ ४९२ ॥

साक्षादनुभवात्सिद्धं कथमेव ह्यपोद्यते।

ब्रह्मादिवस्तुषु वेद एव प्रमाणं, न युक्त्यादिः

एवंलक्षणके मानत्रये ब्रह्मादिवस्तुषु ॥ ४९३ ॥

प्रमाणं वेद एवैकस्तत्प्रामाण्यं च साधितम् ॥

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

* * *

॥ अभिमान्यधिकरणम् ॥

ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॐ ॥ २-१-६ ॥

मृदब्रवीदित्यादिश्रुतिः युक्तिविरुद्धेत्यभ्यधिकाशङ्कया पूर्वपक्षः

तथाऽपि मृज्जलादीनां बुद्धिवागादिवाचकः ॥ ४९४ ॥

दृष्टव्याप्तिविरुद्धत्वात् तत्र मानं कथं भवेत्।

मृदादिशब्दानामभिमानिवाचकत्वेन न युक्तिविरोधः

ततस्तन्नामकः कश्चित्पुमानन्यो भवेदिति ॥ ४९५ ॥

युक्त्यागमविरोधेन प्राप्तमत्राभिधीयते ।
बालरूढिं विनैवापि विद्वद्रूढिसमाश्रयात् ॥ ४९६ ॥

तत्तन्नामान एवैते तत्तद्वस्त्वभिमानिनः ।
सन्ति

पृथिव्याद्यभिमानिन्यो व्याप्ताः शक्तिविशेषवत्यश्च

तेषां विशेषेण शक्तिरन्येभ्य उच्यते ॥ ४९७ ॥

व्याप्तिश्चोक्तानुसारेण

ॐ दृश्यते तु ॐ ॥ २-१-७ ॥

योगिभिः पृथिव्याद्यभिमानिन्यः दृश्यन्ते

दृश्यन्ते चाधिकारिभिः ।

शास्त्रैकसमधिगम्यवस्तुनो व्युत्पत्तिः शास्त्रलिङ्गगम्या, सा च बलवती

शास्त्रोक्तवस्तुनश्चैव व्युत्पत्तिः शास्त्रलिङ्गतः ॥ ४९८ ॥

व्युत्पत्तिः सा बलवती मूर्खव्युत्पत्तितो हि यत् ।

एतदधिकरणन्यायनिरूपणम्

दृढयुक्तिविरोधे तु सर्वत्र न्याय ईदृशः ॥ ४९९ ॥

॥ इति अभिमान्यधिकरणम् ॥ ३ ॥

* * *

।। असदधिकरणम् ।।

।। ॐ असदिति चेन्न प्रतिषेधमात्रत्वात् ॐ ।।
।। २-१-८ ।।

पूर्वपक्ष्युत्प्रेक्षितयुक्त्यागमापेक्षया प्रबलयुक्त्यागमाभ्यामत्राधिकरणे वस्तुनिर्णयः

अल्पवाक्ययुता युक्तिर्बहुलैव विरोधिनी ।
यत्र तत्र कथं वस्तुनिर्णयः स्यादितीरिते ।। ५०० ।।

विरोधियुक्तिबाहुल्यादिति न्यायो विनिश्चितः ।
युक्तेस्तु युक्तिबाहुल्यमागमादागमस्य च ।। ५०१ ।।

कथं न निर्णयं कुर्यादिति

क्वापि अनुपलब्धं अभावस्य कर्तृत्वं श्रुत्यर्थो न भवितुमर्हति

असत्कारणं न हि ।
श्रुत्यर्थो भवति क्वापि

चतुर्थपादादस्याधिकरणस्य वैलक्षण्यम्

श्रुतिप्रायोपपत्तिभिः ।। ५०२ ।।

अविरोधश्चतुर्थे तु पादे सम्यक् समर्थ्यते ।

निषेधैकस्वरूपत्वादभावस्य न कर्तृत्वम्

असत्कार्यं यथा दृष्टं वस्तुत्वात् कारणं तथा ।। ५०३ ।।

इति चेन्न निषेधैकस्वरूपस्य न कर्तृता ।
बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वमिति निश्चितम् ।। ५०४ ।।

सूत्रस्थमात्रपदप्रयोजनं, तदर्थश्च

प्रतिषेधात्मकत्वं तु भावस्याभावधर्मतः ।
धर्मधर्म्यैक्यतश्चैव न तु तन्मात्रता भवेत् ॥ ५०५ ॥

अभावस्य च भावोऽपि धर्मोऽथापि हि धर्मिणः ।
तादृत्त्वं मात्रतेहोक्ता बुद्धिराहित्यमेव तत् ॥ ५०६ ॥

धर्मधर्मिस्वरूपनिरूपणं, भावाभावस्वरूपनिरूपणं च

विशेष्यतैव धर्मित्वं प्रथमप्रतिपत्तिषु ।
निषेधविधिरूपत्वं भावाभावत्वमत्र हि ॥ ५०७ ॥

ॐ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॐ ॥ २-१-९ ॥

ॐ न तु दृष्टान्तभावात् ॐ ॥ २-१-१० ॥

ॐ स्वपक्षदोषाच्च ॐ ॥ २-१-११ ॥

महाप्रलयरूपनाशे कस्यचित्पुरुषस्यावशिष्टत्वमवश्यमङ्गीकर्तव्यम्

सर्वनाशेष्वपि सदा शिष्टत्वाद्यस्य कस्य नुः ।
नाशोऽयं विमतोऽपि स्यान्नाशत्वात्कर्तृशेषवान् ॥ ५०८ ॥

न चाशेषनृनाशस्तु दृष्टो दृश्योऽस्ति वा क्वचित् ।

प्रलयकाले धर्माधर्माश्रयत्वेन जीवः, धर्माधर्माधिष्ठातृत्वेन च परमात्मा अङ्गीकार्यः

धर्माधर्माश्रयत्वेन स्वीकार्योऽपि नरो लये ॥ ५०९ ॥

प्रलयकाले धर्माधर्मसंज्ञितमदृष्टमेव नास्तीति न वक्तुं शक्यते

अनादित्वं विनाऽदृष्टं कथं स्यात्कारणं क्वचित् ।
पूर्वदृष्टात्परादृष्टं यदि नैवोत्तरं कुतः ॥ ५१० ॥

अदृष्टं कारणं नो चेल्लये मानं च किं भवेत् ।

जगतः चेतनकर्तृकत्वे अनुमानम्

उत्पत्तिनाशकारी च बुद्धिमान् दृश्यते क्वचित् ॥ ५११ ॥

तद्दृष्टान्तेन सर्वत्र कर्ता किं नानुमीयते ।

आगमानुगृहीतानुमानस्य प्रमाणत्वम्

आगमानुगृहीता तु मानमेषानुमापि तु ॥ ५१२ ॥

ॐ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॐ ॥ ॥ २-१-१२ ॥

प्रत्यक्षागमानुग्रहाभाव एव तर्कस्याप्रतिष्ठितत्वम्

आगमानुग्रहाभावे न तर्कः स्यात् प्रतिष्ठितः ।
अक्षजागममूलस्य स्यादेवास्य प्रतिष्ठितिः ॥ ५१३ ॥

अन्यथाऽस्याप्रतिष्ठा च स्ववाचा व्याहतैव हि ।

ॐ एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः ॐ ॥ २-१-१३ ॥

अत्र सूत्रे न वैशेषिकादिमतनिरासः,
किन्तु जीवप्रधानासत्कालादीनां जगत्कारणत्वनिरासः

न च शिष्टागृहीतत्वं निरीशादीशवादिनः ॥ ५१४ ॥

अतोऽवशिष्टजीवादिकर्तृताऽत्र निषिध्यते ।

पूर्वमसतः अभावस्य जगत्कारणत्वं निराकृतम्
इदानीं असतः शून्यस्येति न पौनरुक्त्यम्

तन्मनोऽकुरुतेत्यादेरसतो मनसो जनिः ॥ ५१५ ॥

निवारिता तु पूर्वत्र ह्यकस्मादिति तद्विना ।
असतो विश्वजननमाशङ्क्यात्र निषिद्ध्यते ॥ ५१६ ॥

अत्र श्रुत्यनुगृहीतयुक्तिप्राप्तप्रधानादिकारणत्वनिरासः,
द्वितीयपादे साङ्ख्यादिसमयप्राप्तप्रधानादिकारणत्वनिरासः

प्रापकं वाक्यमात्रं तु परिहारोऽविशेषितः ।

जीवकर्तृत्वस्य युक्तिविरुद्धत्वप्रदर्शनम्

क्वचिज्जीवाकृतं दृष्ट्वाऽचेतनादेव चाकृतम् ॥ ५१७ ॥

तद्वदेवानुमाऽन्यत्र वस्तुत्वात्क्रियते श्रुतेः ।

॥ इति असदधिकरणम् ॥ ४ ॥

* * *

॥ भोक्त्रधिकरणम् ॥

ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ २-१-१४ ॥

जीवस्य मोक्षे न ब्रह्मत्वापत्तिः, ऐक्यश्रुतिस्तु लोकवत् स्थानमत्यैक्यादिनिबन्धना

नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथञ्चन ॥ ५१८ ॥

अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचन ।
क्वचिद्भिन्नतया दृष्टं तदभिन्नतया कथम् ॥ ५१९ ॥

दृश्येन्नो दृष्टपूर्वं हि तादृशं न च दृश्यते ।

अत्र सूत्रे भोक्त्रापत्तिर्नाम न भोक्तृत्वापत्तिः

भोक्तृत्वापत्तित इति यन्मतं तत्कुतो हरिः ॥ ५२० ॥

भोक्त्रापत्तेरिति प्राह

॥ इति भोक्त्रधिकरणम् ॥ ५ ॥

* * *

॥ आरम्भणाधिकरणम् ॥

ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥

॥ २-१-१५ ॥

ॐ भावे चोपलब्धेः ॐ ॥

॥ २-१-१६ ॥

ब्रह्मपरिणामित्वात् ब्रह्मविवर्तत्वाद्वा जगतः ब्रह्मानन्यत्वमत्र सूत्रे न प्रतिपादितम्, किन्तु ब्रह्मान्यस्वतन्त्रकारणाभावः प्रतिपादितः

कथं च तदनन्यता ।
जगतस्त्वविका(रि)रत्वे उक्तन्यायेन साधिते ॥ ५२१ ॥

स्वतन्त्रकारणान्यत्वं तेन ह्यत्र निषिद्ध्यते ।

ॐ सत्त्वाच्चावरस्य ॐ ॥

॥ २-१-१७ ॥

ब्रह्माधीनस्य प्रकृत्यादेः कारणस्य सत्त्वम्

"द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः ॥ ५२२ ॥

यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ॥"
इति श्रुतेः

ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥
॥ २-१-१८ ॥

नासदासीदित्यत्र स्वातन्त्र्यलक्षणधर्मविशेषाभिप्रायेण असत्त्वव्यपदेशः

तद्वशस्य भावो 'न पर' इत्यतः ॥ ५२३ ॥

ॐ युक्तेः शब्दान्तराच्च ॐ ॥ २-१-१९ ॥

ॐ पटवच्च ॐ ॥ २-१-२० ॥

ॐ यथा प्राणादिः ॐ ॥ २-१-२१ ॥

कारणैर्विना कर्तुं शक्तोऽपि हरिः स्वेच्छया नियतैः कारणैः जगत् सृजति

शक्तोऽपि ह्यन्यथा कर्तुं स्वेच्छानियमतो हरिः ।
कारणैर्नियतैरेव करोतीदं जगत्सदा ॥ ५२४ ॥

कार्यस्य निमित्तकारणेन नियमेन भेदः, उपादानकारणेन तु भेदाभेदौ

नित्यभेदो निमित्तेन ह्युपादानेन तु द्वयम् ।

सदसत्कार्यवादः

असद्यत्कार्यरूपेण कारणात्मतयाऽस्ति हि ॥ ५२५ ॥
अनवस्थाऽन्यथा हि स्यात् सर्वत्रोत्पत्तिनाशयोः ।

शक्तोऽपीत्याद्युक्तार्थे श्रुतिः

"शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा ॥ ५२६ ॥
स्वभिन्नं कारणाभिन्न(न्नं)भिन्नं विश्वं करोत्यजः ।"
इति श्रुतेरवसित उक्तोऽर्थोऽयमशेषतः ॥ ५२७ ॥

॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

॥ इतरव्यपदेशाधिकरणम् ॥

ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॐ ॥ २-१-२२ ॥

ॐ अधिकं तु भेदनिर्देशात् ॐ ॥ २-१-२३ ॥

ॐ अश्मादिवच्च तदनुपपत्तिः ॐ ॥ २-१-२४ ॥

ॐ उपसंहारदर्शनान्नेति चेत्क्षीरवद्धि ॐ ॥ २-१-२५ ॥

ॐ देवादिवदपि लोके ॐ ॥ २-१-२६ ॥

ॐ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॐ ॥ २-१-२७ ॥

अनंशस्यापि जीवस्य परमेश्वराचिन्त्यशक्तिवशेन
कार्यानुरूपसामर्थ्यप्रयोगसम्भवान्न कृत्स्नप्रसक्तिः

अनंशस्यापि जीवस्य किञ्चित्सामर्थ्ययोजनाम् ।
कार्येषु यः करोत्यद्धा नमस्तस्मै स्वयम्भुवे ॥ ५२८ ॥

यदि भागेन कार्येषु जीवशक्तिं न योजयेत् ।
हरिस्तदा हि सर्वत्र कृत्स्नयत्नोऽशितापि वा ॥ ५२९ ॥

पटाद्याः परस्परं भिन्नैः अंशिना भिन्नाभिन्नैः अंशैः अंशिनः,
चेतनास्तु परस्परमंशिना च अत्यन्ताभिन्नैः अंशैः अंशिनः,
अतः चेतनेषु अनंशिन इति श्रुतिः

अंशिनो हि पटाद्या ये भिन्नैरेव परस्परम् ।
अंशैरंशिन उच्यन्ते नैवमेव हि चेतनाः ॥ ५३० ॥

अतोऽनंशिन इत्येव श्रुतिरेतेषु वर्तते ।

विशेषबलादनेकत्वमंशित्वं च

अप्यनेकस्वरूपेषु विशेषादेव केवलम् ॥ ५३१ ॥
बहुस्वरूपताख्या तु तेष्वस्त्येव हि सांशता ।

जीवस्य परमेश्वरानपेक्षकर्तृत्वे न कृत्स्नप्रसक्त्यादिदोषपरिहारः

बहुत्वेनाविनाभावाद्भिन्नता नियमाद्भवेत् ॥ ५३२ ॥

यदि नैवं नियमकृद्भगवान् पुरुषोत्तमः ।

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

* * *

॥ श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥

ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥ २-१-२८ ॥

ॐ आत्मनि चैवं विचित्राश्च हि ॐ ॥ २-१-२९ ॥

ॐ स्वपक्षदोषाच्च ॐ ॥ २-१-३० ॥

ॐ सर्वोपेता च तद्दर्शनात् ॐ ॥ २-१-३१ ॥

ईश्वरस्य विचित्राशेषशक्तित्वात् न कृत्स्नप्रसक्त्यादिदोषः

तस्य त्वशेषशक्तित्वाद्युज्यते सर्वमेव हि (च) ॥ ५३३ ॥

ब्रह्मणः सर्वस्मात् वैलक्षण्ये अत्यन्तव्यावृत्तत्वे युक्त्यादिविरोधनिरासः
द्वितीयाध्यायार्थः

विरोधः सर्ववैशिष्ट्ये यो द्वितीये निरस्यते ।
नारायणस्य त्वध्याये तदन्ये तत्र तत्रगाः ॥ ५३४ ॥

सृष्टिसंहारवाक्यानां जीवरूपाभिधायिनाम् ।
अप्यन्योन्याविरोधस्तु द्वितीयाध्यायगोचरः ॥ ५३५ ॥

ॐ विकरणत्वान्नेति चेत्तदुक्तम् ॐ ॥
॥ २-१-३२ ॥

अत्र सूत्रे प्रमेयैक्येऽपि प्रमाणभेदसत्त्वात् न पुनरुक्तिः

मानमेयविशेषेण पुनरुक्तिर्न जायते ॥

॥ इति श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥ ८ ॥

* * *

॥ नप्रयोजनाधिकरणम् ॥

ॐ न प्रयोजनवत्त्वात् ॐ ॥ २-१-३३ ॥

ॐ लोकवत्तु लीलाकैवल्यम् ॐ ॥ २-१-३४ ॥

ईश्वरस्य सृष्ट्यादौ प्रयोजनेन विना प्रवृत्तिः

सदा प्रवृत्तिरीशस्य स्वभावादेव केवलम् ॥ ५३६ ॥

अङ्गचेष्टा यथा पुंसः काश्चिदुद्देशवर्जिताः ।
'देवस्यैष स्वभावोऽयमि'त्याह श्रुतिरञ्जसा ॥ ५३७ ॥

क्रीडा प्रयोजनमिति व्याख्यानं श्रुतिविरुद्धं सूत्राक्षराननुगुणं च

क्रीडां प्रयोजनं कृत्वा सृष्टिः श्रुतिविरोधिनी ।
इति केवललीलैव निर्णीता प्रभुणा स्वयम् ॥ ५३८ ॥

भगवतः स्वप्रयोजनाभावेऽपि परप्रयोजनोद्देशिता अङ्गीक्रियते

आत्मप्रयोजनार्थाय स्पृहां श्रुतिरवारयत् ।
न प्रयोजनवत्त्वेनेत्यत आह जगद्गुरुः ॥ ५३९ ॥

"का स्पृहे"ति श्रुतिः इच्छालक्षणं गुणमेव न निषेधति,
किन्तु प्रयोजनेच्छामात्रनिषेधपरा

'इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः' ॥
इति प्रशंसया कामश्रुतिभ्यश्चैव युक्तितः ॥ ५४० ॥

महातात्पर्ययुक्तेश्च नेच्छामात्रं निषिद्ध्यते ।

ईश्वरप्रसादान्मोक्षः, प्रसादो नाम इच्छाविशेषः

मोक्षार्थाः श्रुतयो यस्मात्स च तस्य प्रसादतः ॥ ५४१ ॥
उन्निनीषतिवाक्याच्च लोकदृ(ष्ट्य)ष्टानुसारतः ।

इच्छानिमित्तको यस्मात्तदभावे कुतः श्रुतिः ॥ ५४२ ॥
महातात्पर्यरहिता प्रमाणत्वं गमिष्यति ।

वाक्यस्य प्रयोजनवत्त्वेनैव प्रामाण्यम्

याथार्थ्यमेव मानत्वमपि वाक्यं प्रयोजकम् ॥ ५४३ ॥

मानत्वमेति तत्रापि यत्सम्पूर्णप्रयोजनम् ।

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

* * *

॥ वैषम्यनैर्घृण्याधिकरणम् ॥

ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥
॥ २-१-३५ ॥

ॐ न कर्माविभागादिति चेन्नानादित्वात् ॐ ॥
॥ २-१-३६ ॥

ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥
॥ २-१-३७ ॥

कर्माद्यनपेक्षवैषम्यनैर्घृण्ये एव दूषणे, न तु ईश्वराधीनकर्मसापेक्षे

वैषम्यं चैव नैर्घृण्यं वेदाप्रामाण्यकारणम् ॥ ५४४ ॥

नाड्गीकार्यमतोऽन्यत्तु न वैषम्यादिनामकम् ।

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

* * *

॥ सर्वधर्मोपपत्त्यधिकरणम् ॥

ॐ सर्वधर्मोपपत्तेश्च ॐ ॥
॥ २-१-३८ ॥

स्वतन्त्रस्य भगवतः सर्वगुणपूर्णत्वम्, सर्वदोषविदूरत्वं च

यदधीना गुणाश्चैव दोषा अपि हि सर्वशः ॥ ५४५ ॥

गुणास्तस्य कथं न स्युः स्युर्दोषाश्च कथं पुनः ।
सर्वधर्मोपपत्तेस्तद्वाक्यैरपि हि तादृशैः ॥ ५४६ ॥

निर्दोषाशेषगुणको निर्णीतो भगवान् हरिः ॥

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य प्रथमः पादः ॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका

श्रीपद्मनाभतीर्थविरचिता

सन्न्यायरत्नावली

द्वितीयाध्यायस्य प्रथमः पादः

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

४३३ जगत्कारणे विष्णौ मुख्यया वृत्त्या निखिलवेदानां समन्वयोऽभिहितः प्रथमेऽध्याये । द्वितीयेऽविरोधश्चिन्त्यते । समन्वयहेतुत्वेनाविरोधस्य प्रथमद्वितीयाध्याययोर्हेतुहेतुमद्भावसङ्गतिरवगन्तव्या । न ह्यनुपन्यस्तसमन्वये विरोधः स्फुरति । विरोधश्चतुर्विधश्चतुर्षु पादेषु परिह्रियते । तत्र परोद्भावितत‍र्काविरोधः प्रथमपादे साध्यते । प्रथमाधिकरणे तु प्रधानमल्लकनिबर्हणन्यायेन शैवादिस्मृत्या विरोधः परिह्रियते । तस्या युक्तिसमन्वयश्रुतिन्यायोपेतश्रुत्यात्मकत्वाद्विरोधस्य चतुर्धोदयात् । बलवद्युक्त्यादिभिस्तत्परिहारोऽपि चतुर्विधः । एवं सर्वाधिकरणेषु सर्वपादेषु सर्वाध्यायेष्वपि समन्वयाविरोधसाधनफलानामुद्भावयितुं शक्यत्वाच्चातुर्विध्यं वासुदेवादिचतुर्मूर्तीनां प्रतिपाद्यत्वेन चातुर्विध्यमेकवर्णमारभ्य कृत्स्नशास्त्रपर्यन्तं शब्दमात्रस्य यथायोग्यमवगन्तव्यम् । तदेतदाह **उक्त इति** ।

४३४ **वर्णमागमात्** । आगमादिवर्णमित्यर्थः ।

४३५ अधुनैतत्पादाधिकरणेषु क्रमेण पूर्वपक्षसिद्धान्तयुक्तीरेकीकृत्याह **आप्ततेति** ।

॥ स्मृत्यधिकरणम् ॥

४३७ तत्र तावदाप्तत्वयुक्तिं पूर्वपक्षेऽव्युत्पाद्यतामेव बलीयस्त्वेन सिद्धान्ते व्युत्पादयति **आप्तैरित्यादिना** । जगत्कारणे विष्णौ प्रागुक्तश्रुतिसमन्वयो न युज्यते । रुद्रादीनां जगत्कारणत्वप्रतिपादकपाशुपतादिस्मृतिविरोधात् ।

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम् ।

न च पिपीलिकालिपिवद्बुद्धिपूर्वकत्वेनाप्रणीता श्रुतिः सर्वज्ञानां रुद्रादीनामाप्तानां प्रत्यक्षमूलां पाशुपतादिस्मृतिं बाधितुं शक्नोति । आप्तवाक्यस्याप्तवाक्यबाधकत्वादर्शनात् । न च वाच्यं श्रुतिस्मृत्योर्विरोधे श्रुत्या स्मृतेरेव बाधो युक्तः श्रुतिसापेक्षत्वात्स्मृतेरिति । रुद्रादिप्रत्यक्षमूलस्मृतेः श्रुतिसापेक्षत्वाभावेन बाधायोगात् । न चात्र श्रुतिस्मृत्योर्विकल्पेन व्यवस्था शङ्क्या । व्रीहियवश्रुत्योरिव वस्तुनि विकल्पासम्भवात् । न ह्यग्निरुष्णो वाऽनुष्णो वेति भवति । विष्ण्वादिभिरतिशयेन सर्वज्ञैर्जगद्धितोपदेष्टृभिः प्रणीतपञ्चरात्रादिस्मृतिभिर्हरेरेव जगत्कारणत्वप्रतिपादिकाभिर्बाधितत्वान्न पाशुपतादिस्मृतिः श्रुतिबाधिका । न च पाशुपतपञ्चरात्रस्मृत्योस्तुल्यबलवत्त्वेन बाध्यबाधकभावो नास्तीति वाच्यम् । श्रुतिमूलत्वेन बलवत्त्वात् पञ्चरात्रस्मृतेः । न च रुद्रादिप्रत्यक्षं मूलं पाशुपतादिस्मृतेः । तत्र प्रमाणाभावात् । न चानेनैव न्यायेनाप्रामाण्यं पञ्चरात्रादिस्मृतेः । वेदमूलत्वेन वेदस्येव प्रामाण्योपपत्तेः । न हि कारीरियागानुष्ठानेऽपि वृष्टिः कस्यचित्कदाचिन्न भवतीत्येतावता कारीर्या यजेत वृष्टिकाम इति वेदवाक्यस्याप्रामाण्यम् । अपौरुषेयत्वेनाप्रामाण्यकारणाभावात् । वृष्टिस्तु कर्मकर्तृवैगुण्यात् प्रतिबन्धकर्मणो वा न भवतीति कल्प्यते । न च वाच्यं पाशुपताद्युक्तफलाभावेऽप्यधिकारवैगुण्यं कल्प्यत इति । अनाप्तोक्तत्वकल्पनेनापि फलाभावस्योपपत्तेः । न चाधिकारसाद्गुण्यफलसद्भावयोः सहभावनियमः प्रत्यक्षेणोपलभ्यते । वैदिकाधिकारस्य विशुद्धमातापितृजन्यत्वादिलक्षणस्य प्रत्यक्षेण ज्ञातुमशक्यत्वात् । तद्वैगुण्येन च कर्मणः फलव्यभिचारोऽपि ज्ञातुं न शक्यते । पाशुपताद्यागमोक्ताधिकारस्य तु शूद्रादिभिरपि लक्ष्यत्वेनापि सुलभत्वात् तद्वैगुण्यासम्भवेन कर्मणः फलव्यभिचारो न स्यात् । अतः पाशुपताद्यागमस्य विप्रलम्भादिमूलत्वमेव न युक्त्या आभासमूलत्वमवगन्तुं शक्यम् । तदुक्तानुष्ठानस्य फलव्यभिचारात् । अतो जगत्कारणविष्णुप्रतिपादकश्रुतिसन्दोहबाधिता रुद्रादिस्मृतिः ॥ १ ॥

॥ इति स्मृत्यधिकरणम् ॥ १ ॥

* * *

॥ नविलक्षणाधिकरणम् ॥

४४५ न च तद्वदप्रामाण्यं शङ्कितुं शक्यं वेदस्येत्याह **नित्यत्वादिति** ।

४४६ वेदनित्यत्वं च श्रुतिसिद्धमित्याह **विरूपेति** । 'तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिमि'ति श्रुतेरयमर्थः । भो विरूप नित्यया वाचा वेदेन तस्मै अभिद्यवे अभितो द्योतमानाय वृष्णे मनोरथवर्षित्रे नूनं निश्चितं सुस्तुतिं चोदयस्व प्रेरय । गमयेति यावत् ।

४४७ 'नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदमि'ति श्रुतिः 'वाव नित्याऽनित्या वाव स्मृतयो याश्चान्या वाच' इति पैङ्गिश्रुतिः । श्रुतिः 'पिपीलिकानिभे'ति यदुक्तं तत्राह **पिपीलिकेति** । यथा रात्रावुलूकेनैकेन

कृतन्यग्रोधशाखोपशाखानिविष्टबहुतरकाकविनाशवन्मयैकेन बहुतरपाण्डवसैन्यं हन्तुं शक्यमित्यश्वत्थाम्नो निश्चयो भारतोक्तः समर्थश्च जात एवमाप्तप्रणीतादपि घुणादिलिखिताच्छब्दाद्ययथार्थप्रतिपत्तिर्युक्ता ।

४४९ यस्तु तत्रानन्वितः प्रमाणविरुद्धश्चाक्षरसमूहो दृश्यते सः अप्रमाणं भवतु । एवं वेदतन्मूलस्मृत्योरप्यविरुद्धार्थे प्रामाण्यमागमेन च विरोद्धुं प्रत्यक्षमागमान्तरं वा शक्नोति नान्यदित्याह **विरोधोऽपीति** ।

४५० **युक्तिरिष्यते** निर्णयहेतुत्वेनेति शेषः । सावकाशनिरवकाशत्वादिन्यायेन हि विरुद्धवाक्ययोर्निर्णयो धर्मिग्राहकप्रमाणविरोधे वेदस्यान्यार्थत्वमपेक्षत इत्याह **उपजीव्यविरोध इति** ।

४५२ प्रत्यक्षादिसिद्धवस्त्वन्यथाभिधायकश्रुतेरन्यार्थत्वं वर्णनीयम् । आगमसिद्धभगवदवतारादेरन्यथात्वग्राहकप्रत्यक्षादिकमयथार्थमवगन्तव्यम् । श्रुतेः श्रुत्यन्तराविरुद्धतया युक्त एवार्थः स्वीकार्यो नायुक्तः । तद्यथा 'अन्धो मणिमविन्ददि'त्यादिश्रुतेः प्रातीतिकार्थोऽयुक्तः परित्याज्यः । प्राकृतचक्षुरादिरहितस्य चिन्मयचक्षुरादिः तर्हि तस्य हरेर्मणिदर्शनादिरूपो युक्तोऽर्थः स्वीकार्यः ।

४५३ युक्तिस्तु प्रत्यक्षागमयोरन्यतरगृहीतव्याप्तिका बलीयसी । युक्तिमूलयुक्तेः सावकाशत्वात् साऽपि परम्परया प्रत्यक्षागमयोरन्यतरमूला । एवं त्रीण्येव प्रमाणानि ।

४५४ एषां लक्षणमाह **याथार्थ्यमिति** । ननु गमनादिकर्मणाऽपि ग्रामादिविषयस्य यथार्थत्वादतिव्यापकमेतल्लक्षणमित्याह **अर्थत्वमिति** । अर्यते ज्ञायत इति व्युत्पत्त्या अर्थशब्देनात्र ज्ञेयं विवक्षितम् ।

४५५ अतश्च यथार्थत्वं नाम ज्ञेयप्रतियोगित्वम् । न तद्गमनादिषु गतम् । ग्रामस्य हि गम्यप्रतियोगित्वम् । न तु ज्ञेयप्रतियोगित्वम् । अयथार्थादप्रमाणादपि व्यावृत्तं यथार्थत्वं प्रमाणस्यैव लक्षणं भवितुमर्हति । नैतल्लक्षणं शब्दादिष्वव्यापकम् । तेषामपि ज्ञानद्वारा यथार्थत्वात् । तदेतदभिप्रेत्याह **ज्ञानार्थ इति** । ज्ञानस्य मुख्यतो ज्ञेयविषयत्वम् । तच्च ज्ञानम् अन्तर्भाव्यशब्दानां भवति । अत एव तेषाम् अनुप्रमाणत्वम् । व्याप्त्याद्यनुसन्धानसापेक्षत्वेन विलम्बार्थत्वेन अर्थप्रतिपत्तिकारणत्वाच्छब्दानन्तरत्वं च हेतावगन्तव्यम् । सम्यग्ज्ञानसाधनस्यैव प्रमाणत्वे ज्ञानस्याप्रामाण्यं स्यात् । न यथार्थत्वस्य प्रमाणलक्षणादेव ।

४५६ 'अग्निर्हिमस्य भेषजमि'त्यादेः मानान्तरसिद्धानुवादस्य 'स घट' इत्याद्यनुभूतस्मृतेरपि प्रामाण्यं न विहितमित्याह **प्रामाण्यमिति** ।

४६० नन्वनधिगतार्थगन्तृत्वाभावात् कथं स्मृत्यादेः प्रामाण्यमित्याशङ्क्याह **न परिच्छेदेति** । यदि अज्ञातपरिच्छेदकं प्रमाणं तर्हि घटोऽयमिति गृहीतस्य पुनर्घटोऽयमिति ग्रहणमप्रमाणं स्यात् । इदानीं तु सर्वविशिष्टघटविषयतयोत्तरज्ञानस्य न गृहीतग्राहित्वमिति चेत् । तुल्यं स्मृत्यादावपि । तर्ह्यतीतत्वाकारविशिष्टघटविषयिणी

स्मृतिर्गृहीतग्राहिणीति वक्तुं शक्यते । किञ्च कालस्याप्रत्यक्षत्वं वदद्भिर्वर्तमानसत्त्वविशिष्टवस्तुत्वं प्रत्यक्षस्य चिन्त्यम् ।

४६२ एवं प्रमाणस्य लक्षणमभिधाय अधुना तद्विशेषरूपप्रत्यक्षलक्षणं तावदाह **निर्दोषेति** । **अक्षोद्भवम्** इत्यनेन अनुमानादिकं व्यावर्तयति । निर्दोषमित्यनेन काममलादिदोषयुक्तमक्षं व्यावर्तयति । यदन्यत्रोभयं प्रकृतियुक्ताक्षजं कदाचित्सदोषं कदाचिन्निर्दोषम् । तच्च षड्विधम् । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमनोभेदात् ।

४६४ अधुना अनुमानस्वरूपं निर्धारयति **अनुमेति** । साध्येन साधनस्याविनाभावो व्याप्तिः । सैवाभिधातव्या ।

४६५ परप्रतिपत्त्यर्थं न लिङ्गम् । तस्य दृश्यमानत्वेनाभिधानवैय्यर्थ्यात् । न हि पक्षेऽनुपलभ्यमानं लिङ्गं तत्र लिङ्गिनं ज्ञापयति । न हि व्याप्तिवचनस्येव लिङ्गवचनस्यापि स्मारकत्वेनोपयोगः । व्याप्तिवचनादेव साधकत्वं लिङ्गस्यावगम्यते । न हि 'धूमवानसावग्निमानि'त्युक्ते धूमवतः पक्षस्य अग्निमत्त्वं न ज्ञायते ।

४६६ ननु विप्रतिपत्तिनिवृत्तिः प्रतिज्ञाहेतूदाहरणोपनयनिगमनाभिधानमन्तरेण व्याप्त्यैव कथमित्यत आह **न पञ्चेति** । दृष्टान्तादिष्वपि विप्रतिपत्तौ हेत्वन्तरेण तत्साधनस्यावश्यम्भावित्वात् पञ्चावयवनियमभङ्गः । पर्वतस्याग्निमत्त्वे किं मानमिति पृष्टे धूमवत्त्वमिति लिङ्गाभिधानादेव क्वचिदनुमित्युत्पत्तेश्च । उपनयनिगमनयोः प्रतिज्ञाहेतुपौनरुक्त्याच्च ।

४६८ एवं युक्तिस्वरूपमभिधाय अधुना तद्दूषणं निरूपयति **विरोध इति** । न्यूनाधिक्यादिकं वचनद्वारा युक्तेर्दूषणम् । विरोधासङ्गती त्वाहत्यदूषणम् । असङ्गतिलक्षणमाह **प्रतिज्ञायामिति** ।

४६९ यथा 'पर्वतोऽग्निमान्', 'वृक्षः शाखी'ति । अधुना विरोधं विभज्य दर्शयति **विरोधोऽपीति** । प्रतिज्ञार्थविरुद्धता यथा 'अग्निरनुष्ण' इति । लिङ्गराहित्यं यथा 'नित्यः शब्दश्चाक्षुषत्वादि'त्यादि । अव्याप्तिर्यथा 'नित्यः शब्दः कृतकत्वाच्छब्दत्वात्प्रमेयत्वादि'ति । न्यूनं यथा 'पर्वतो धूमवत्वादि'ति । अधिकं यथा 'वृक्षादिमान् पर्वतः अग्निमानि'ति । एतद्द्वयं वचनस्यैव दूषणं न त्वर्थस्य ।

४७० अधुनोपाधेर्विरोधान्तर्भूतिं निरूपयति **साध्येति** । परस्परं व्याप्तिशून्यौ यौ तयोर्मध्ये साध्यव्यापकादुपाधेर्वैलोम्यम् । साधनस्य विरोध इति यावत् । साध्यं व्यापकं यस्येति साध्यव्यापकः साध्यस्य व्यापक इति वा । उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः । यथा स श्यामो मैत्रेयीतनयत्वात् सम्मतवदित्यस्य शाकाद्याहारपरिणतिपूर्वकत्वं प्रयोजकमिति । तदुक्तम् । एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः ।

साध्याभावाविनाभावी स उपाधिर्यदत्यय इति । समविरोधश्चायमुपाधिः । प्रतिज्ञातार्थस्याचार्याभिप्रेतो व्यापकानुपलब्धिलिङ्गकानुमानत्वे प्रतिपक्षरूपत्वात् प्रतिपक्षो ह्यनुमानस्य समविरोधः । यथा वायुर्बाह्येन्द्रियग्राह्यः प्रत्यक्षस्पर्शत्वादित्यस्य प्रतिसाधनं वायुर्बाह्येन्द्रियप्रत्यक्षो न भवति । अरूपवद्द्रव्यत्वात् सम्मतवदिति । प्रबलानुमानस्य दुर्बलानुमानविरोधोऽकिञ्चित्कर इत्याह दुर्बलेनेति । यथा 'पर्वतोऽग्निमान्धूमवत्त्वान्महानसवत्' इत्यस्य पर्वतोऽग्निमान्न भवति । पक्षसपक्षयोरन्यतरत्वाद् ह्रदवदिति विरोधः ।

४७१ स्ववाक्यविरोधोऽपि प्रतिज्ञाविरोधेऽन्तर्भूतः । तद्यथा 'यावज्जीवमहं मौनी'ति । शब्दोऽनित्यः कृतकत्वादित्युक्तेऽस्त्वेवमिति संवादः । तूष्णींभावोऽनुक्तिः । विरोधासङ्गतिन्यूनाधिक्यसंवादानुक्तयः षण्णिग्रहस्थानानि ।

४७२ एवं कथोपयुक्तमनुमानतद्दूषणमभिधाय अधुना कथां विभागलक्षणाभ्यां निरूपयति वाद इति । वादिनोस्तत्त्वनिर्णयार्थैव कथावादः । लाभार्थं सभासभापत्यनेकाङ्गो जल्पः । तत्र वादे शिष्यादिरपि गुर्वादिभिः सह अधिकृतः तत्त्वनिर्णयार्थी । जल्पवितण्डाधिकारस्तु सम्भावितसमानविद्ययोरेव । 'ययोरेव समं वित्तं ययोरेव समं श्रुतम् । तयोर्विवाहो वादश्च नोत्तमाधमयोः क्वचिदि'ति वचनात् । वादिप्रतिवादिनोर्विद्ययोच्चनीचतानिश्चयौ तु जयपराजयशब्दवाच्यौ वादेनैव परीक्षितुं शक्यौ । न जल्पादिना । तत्र हि तत्त्वानिर्णयानुपयुक्तपुनरुक्त्यादिमात्रेण पराजय आपद्यते । मुख्यतस्तु प्रमाणतर्कैस्तत्त्वं निर्णेतुमसमर्थस्य पराजयः समर्थस्य हि जयः । अतो विवदमानयोर्विद्यापरीक्षार्थः । विप्रतिपन्ने वस्तुनि सभ्यैः प्रथमतो वादकथा देया । तथैव जयपराजयावगतौ सत्यामलं जल्पवितण्डाभ्याम् । बहुविद्यत्वेन प्रख्यातस्याल्पविद्येन सह वादोऽपि न देयो विद्यापरीक्षणाय ।

४७३ ननु विजिगीषुभिरपि यदा वाद एव कार्यस्तदा कीदृशः कार्य इत्यपेक्षित आह सतेति ।

४७९ प्राश्निकोऽनुवादकः । ननु जयलाभादेर्वादतः सिद्धौ किं जल्पादिनेत्यत आह तत्त्वेति ।

४८० जल्पादेरवसरः कदेत्यपेक्षित आह विनेति । विद्यायाः पुराणन्यायमीमांसादिरूपाया वादिनोरिति शेषः । यदि शक्यं परीक्षणं सभ्यैरिति शेषः ।

४८१ एतादृशस्य सता वादिपूर्वस्य एवमुक्तलक्षणे वादे वादिनाऽर्थः कथं साधनीय इत्यपेक्षायामाह प्रतिज्ञेति । यथा कत्येव देवा याज्ञवल्क्येति श्रुत्या शाकल्येन विजिगीषुकथायां पृष्टो याज्ञवल्क्यस्त्रिंशदिति प्रतिज्ञामेव चकार । ओमिति होवाचेति शाकल्यश्चाभ्युपगतवान् । तथा वादिना प्रतिज्ञातार्थं प्रतिवादी चेदङ्गीकरोति तदा न हेतुरभिधेयः । नाङ्गीकरोति चेदभिधेयः ।

४८२ अधुना सभादीनां लक्षणमाह **सभासभापतिश्चेति**। यदा कथञ्चिद्वादिना चोक्तं सूक्ष्मप्रमेयं सम्यगिति वा असम्यगिति वा ज्ञातुं प्राश्निका न शक्नुवन्ति तदा सभ्या एव निर्णायकाः स्युः। यदि तेऽपि तथा देशान्तरस्थाः सर्वे सिद्धान्तवेदिनो निर्णायकाः स्युः।

४८४ अधुना वादजल्पौ वितण्डां च परस्परं विवेचयति **उभाभ्यामित्यादिना**। वादजल्पौ सतामेव परस्परं योग्यौ।

४८५ तत्र वादिना स्वपक्षस्थापनं कर्तव्यम्। प्रतिपक्षदूषणं च। प्रतिवादिनाऽपि स्वपक्षदूषणोद्धारणं साधनं च परपक्षदूषणं च कर्तव्यम्। वादिनाऽपि स्वपक्षदूषणोद्धारणं कर्तव्यम्। नैतादृशी वितण्डा। तस्याः स्वपक्षसाधनरहितपरपक्षदूषणमात्ररूपत्वात्। एषा तु वैतण्डिका नाम सद्भिः सह योग्या। तत्र ह्यसद्वाद्युक्त-दूषणस्य सद्वादिभिर्दूष्यमाणत्वात्।

४८७ अवैदिकैश्च स्वसिद्धान्तमनुसृत्य अनुमानमेवोपन्यस्यते। वैदिकैस्तु वैदिकान्प्रति आगम एव प्रयोक्तव्यः स्वसिद्धान्तस्थापनाय। तत्र प्रतिवादिभिर्वाद्युपन्यस्तागमस्य प्रत्यक्षविरोधमागमान्तरविरोधं चोद्भाव्य अन्यार्थत्वं दर्शनीयम्। वाद्युक्तार्थे उपक्रमादितात्पर्यलिङ्गैर्विरोधश्च दर्शयितव्यः। स्वार्थस्य तदानुकूल्यं श्रुतिलिङ्गादि-निर्णायकप्रमाणानुकूल्यं च दर्शनीयम्। एवं श्रुत्यधिकृता वादरीतिः। तत्र श्रुतिसहायत्वेन प्रयुज्यमानानुमानस्य पञ्चावयवादिनियमानुक्तौ न न्यूनतादिदूषणमुद्भावनीयम्। तन्नियमे प्रमाणाभावादित्याह **त्रिपत्रेति**।

४८८ प्रतिज्ञाहेतुदृष्टान्तास्त्रीनवयवाननुमानस्य केचिद्वदन्ति। व्याप्तिः पक्षधर्मता चेति द्वाववयवौ केचित्। तदेवं प्रष्टव्यम्। अनुमा त्र्यवयवेत्यादिनियमे किं प्रमाणमिति। न चात्र प्रत्यक्षादिमानान्तरं वक्तुं शक्यते। न चानुमानत्र्यवयवत्वे त्र्यवयवमनुमानं मानमिति वक्तुं शक्यम्। तस्य प्रतिवाद्यसिद्धत्वेनासाधकत्वात्। यदि तत्रोभयसिद्धत्वेन व्याप्तिरेव प्रमाणमुच्यते तर्हि सैवानुमानमस्तु। किमन्येनावयवेन।

४९० एवं सामान्यविशेषलक्षणाभ्यां प्रत्यक्षादिप्रमाणत्रयं परीक्ष्य अधुना अनुभूतिः प्रमाणमिति परोक्तं प्रमाणलक्षणं विघटयति **अनुभूतिरिति**। न चानुभूतिरेव प्रमाणम्। तथा सति स्मृत्यादेरप्रामाण्यप्रसङ्गात्। न च स्मृतिरप्रमाणम्। बाधकाभावात्। इतोऽपि स्मृतिः प्रमाणमित्याह **पूर्वेति**। न च स्मृतिलक्षणकार्येण वस्तुविषयानुभवः पूर्वोऽनुमीयत इति वाच्यम्। व्याप्त्याद्यनुसन्धानाभावात्। अन्यथा घटज्ञानेन कार्येण कारण-तया घटोऽप्यनुमेयः स्यात्। तथा च प्रत्यक्षज्ञानाभावप्रसङ्गः।

४९१ मानसप्रत्यक्षमेव स्मरणमप्यर्थापत्त्यादिकमनुमानान्तर्गतम्। तत्रार्थस्तु कश्चित्प्रत्यक्षोऽपि।

४९२ उक्तार्थमुपसंहरति **एवमिति** ॥ २ ॥

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

* * *

॥ अभिमान्यधिकरणम् ॥

४९४ एवं '**न विलक्षणत्वादस्य तथात्वं च शब्दात्**' इत्यधिकरणं व्युत्पाद्य अधुना '**अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्**' इत्यधिकरणार्थं व्युत्पादयति **तथाऽपीत्यादिना** । 'मृदब्रवीदापोऽब्रुवन् ता आप ऐक्षन्ते'त्यादिवेदैकदेशस्य यन्मृदादिकं तत्र ब्रवीतीति प्रत्यक्षसिद्धव्याप्तिविरुद्धत्वेनाप्रामाण्यात् ।

कृत्स्नवेदस्य स्थालीपुलकन्यायेन अप्रामाण्यं स्यादिति चेत् । मैवम् । तत्र मृदादिशब्दस्य मृदादिदेवताविषयत्वाङ्गीकारेण श्रुत्यनुमानविरोधपरिहारात् । मृदादिशब्दस्य अविद्वद्रूढ्या मृत्तिकावाचित्वेऽपि विद्वद्रूढ्या मृत्तिकादिदेवतावाचित्वं युक्तमेव । अत एव मृदादिषु व्याप्य-तद्रूपेणापि वक्तृत्वादिसामर्थ्यं देवतादिवाचित्वं युक्तमेव । अत एव मृदादिषु व्याप्यता अवगम्यते । न चैवंविधाया देवतायां अनुपलम्भेन बाधः । योगिप्रत्यक्षेणोपलम्भात् । अतीन्द्रियास्वपि देवतासु मृदबादिशब्दव्युत्पत्तिः पादहस्तत्वादि-तत्तदुपाधिना घटते । यथा सास्नादिना गवादिशब्दस्य गवादिषु शास्त्रीयत्वात् बरुणादिष्वेव बल्वत्यन्नादिशब्दानां न तदुदकादिषु मुख्यतः । एवं श्रुत्युक्तो विरोधो यत्र तत्र व्यवस्थैवमेव कार्या ।

ननु श्रुत्युक्त्योर्विरोधेष्वसतः कारणत्वं निराकृत्य श्रुतिसङ्कोचः कस्माद्दुर्बलत्वाद्युक्तेर्बाधः किं न स्यादिति चेत् । मैवम् । श्रुतिमुख्यार्थसम्भवे वृथा दृढयुक्तिबाधस्यायुक्तत्वात् ॥ ३ ॥

॥ इति अभिमान्यधिकरणम् ॥ ३ ॥

* * *

॥ असदधिकरणम् ॥

५०० एवं युक्तिविरोधं परिहृत्येदानीमुक्तसमन्वयस्य विरोधान्तरमुद्भाव्य परिहरति **अल्पेत्यादिना** ।

असदिति चेन्न प्रतिषेधमात्रत्वात् । 'देवानां पूर्वे युगेऽसतः सदजायत । तदसदेव सन्मनोऽकुरुते'ति श्रुतिसहितबहुयुक्तिविरोधाद्ब्रह्म न जगत्कारणं किन्त्वसतः कारणाज्जगदुत्पत्तिरिति चेत् । मैवम् ।

अतिबहुतरयुक्तिविरोधेन पूर्वपक्षयुक्तीनां बाधितत्वात् । 'सदेव सौम्येदमग्र आसीदि'त्यादिबहुश्रुतिविरोधेन असत्कारणत्ववचनस्य नासज्जगत्कारणत्वमित्यर्थः । किन्तु न विद्यते सदुत्तमं यस्मात्तदसद्ब्रह्मैव जगत्कारणमित्यर्थः ।

५०३ न चायं किञ्चिच्छ्रुतिसहितबहुयुक्तिविरोधपरिहारश्चतुर्थे पादे सङ्गत इति वाच्यम् । तत्र श्रुतिबहुलयुक्तिविरोधस्य परिह्रियमाणत्वात् । अतोऽसदिति सूत्रव्याख्यानमुखेन पूर्वपक्षयुक्तिमुपन्यस्य तद्बाधकत्वेन सिद्धान्तयुक्तीर्दर्शयति **असत्कार्यमिति** । विमतं कारणं प्रलये कालेऽसद्भवेत् । भावत्वाद्यदित्थं तत्तथा यथा कार्यमित्यतोऽसतः कारणाज्जगदुत्पत्तिरिति चेत् । मैवम् । अभावैकस्वरूपस्य पदार्थस्य कर्तृत्वप्रतिज्ञायाः स्वव्याहतत्वात् ।

५०४ **बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वम्** । न ह्यसतो बुद्ध्यादि सम्भवति ।

५०५ ननु निषेधत्वादित्येतावताऽलं किमर्थं सूत्रे प्रतिषेधमात्रत्वादिति पदं प्रतिक्षिप्तमित्याशङ्क्याह **प्रतिषेधेति** । प्रतिषेधत्वं नामाभावत्वम् । तच्चेदमिदं न भवतीति सतोऽपि वस्तुनोऽन्याभाववद्धर्मकत्वेन प्रतीयमानत्वादस्त्येव धर्मधर्म्यैक्याभ्युपगमात् । अतः प्रतिषेधत्वहेतुनाऽसतोऽपि जगत्कारणत्वनिराकरणं मा भूदिति प्रतिषेधमात्रत्वादित्युक्तम् ।

५०६ न च स्वरूपेणासतोऽपि प्रमेयत्वपदार्थत्वादिवज्जगत्कारणत्वमपि भवत्विति वाच्यम् । सर्वधर्मरहितत्वस्यासतोऽसद्वादिनाऽभ्युपगमात् । सिद्धान्तिनाऽद्यापि प्रमेयत्वादिकमभ्युपगतमसतस्तथाऽपि जडत्वेन बुद्ध्यादिराहित्यान्न कर्तृत्वमुपपद्यते । न चाभावस्य प्रमेयत्वादिभावरूपधर्मवत्त्वं नास्तीति वाच्यम् । अभावः प्रमेयमिति विशिष्टप्रतीतेः । इदमेव हि धर्मित्वं यद्धर्मान्तरेण विशेष्यमाणत्वम् । यथा शुक्लो घट इति ।

५०७ ननु यदि भावस्याभावरूपो धर्मोऽस्त्यभावस्यापि भावरूपो धर्मस्तर्हि भावाभावव्यवस्था न स्यादित्याशङ्क्याह **प्रथमेति** । प्रथमाक्षसन्निपातानन्तरं नास्तीति प्रतीयमानोऽभावः । भावत्वेन प्रतीतस्याप्यन्यनिषेधधर्मत्वेनाभावत्वेन प्रतीतस्यापि प्रमेयत्वादिधर्मवत्त्वेन च प्रतीतिस्त्वनन्तरं जायते ।

५०८ यदुक्तमनुमानमसतो जगत्कारणत्वे तस्य प्रतिपक्षानुमानमाह **सर्वेति** । जगन्नाशः केनचित्पुरुषेण कृतो नाशत्वात् बहुपुरुषनाशवत् । यो जगन्नाशे पुरुषः स तत्कर्तेश्वर इति सिद्ध्यति ।

५०९ न च कुत्रचिद्युगे निःशेषपुरुषनाशो न कस्यापि पुरुषस्यावशेषो नास्तीत्यशेषनृनाशः केनचिद्दृष्ट इति वक्तुं शक्यते । नाशद्रष्टुरनाशादेव । अतो नाशत्वहेतोर्न विपक्षे गतिः । इतोऽपि कारणादशेषजगन्नाशो न युज्यते ।

५१० तदेवोपपादयति **अनादित्वमिति** । न च विचित्रजगत्सृष्टिर्विचित्रादृष्टमन्तरेण घटते । अदृष्टवैचित्र्यं च न पूर्वविचित्रादृष्टमन्तरेण सम्भवति । न हि सम्भवः । अतोऽदृष्टपरम्पराश्रयस्यानादेर्जीवस्य प्रलयेऽप्यव-स्थानमङ्गीकर्तव्यम् ।

५११ यदि जगदुत्पत्तिकारणस्यादृष्टस्य प्रत्यक्षेणादर्शनादभावः प्रलयोऽप्यप्रामाणिकत्वान्न स्यात् । स यदि-त्युक्त्यागमेन सिद्धिः तर्हि तथैवादृष्टमप्यभ्युपगम्यतामविशेषात् । अपि च जगदुत्पत्तिनाशौ केनचित्कृतौ उत्पत्तिनाशत्वात् सम्मतवदित्यनुमानाज्जगदीश्वरादेव प्रणीयते नासतः ।

५१२ ननु जगत्कर्तर्यनुमानप्रमाणं कथमुच्यते । प्रत्यनुमानादिपराहतत्वादित्यत आह **आगमेति** । न च वाच्यं जगत् स कर्तृ मानत्वाद् असत्कर्तृत्वानुमानवदिति । स्वव्याहतत्वात् । अस्याप्यनुमानत्वात् । अत्र यत्परै-रुक्तम् । 'न विलक्षणत्वादि'त्यादिना कृतमशिष्टसम्मतं साङ्ख्यनिराकरणम् ।

५१४ 'एतेन शिष्टापरिग्रहा अपि व्याख्याता' इति सूत्रेण वैशेषिकादिषु शिष्टापरिगृहीतेष्वतिदिश्यत इति तद्दूषयति **न चेति** । न हि निरीश्वरात्साङ्ख्याद्वैशेषिकादिष्वतिशयेन शिष्टापरिगृहीतत्वं युक्तम्, अतः सदैवा हि लोके सज्जनसम्मता भवन्ति न तु निर्दैवाः ॥ ४ ॥

॥ **इति असदधिकरणम्** ॥ ४ ॥

* * *

॥ भोक्त्रधिकरणम् ॥

५१४ नन्वेवं सत्येतेनेति सूत्रस्य कोऽर्थ इत्यपेक्षित इत्याह **अत इत्यादिना** । पूर्वं विश्वस्यासत्त्वव-त्कारणत्ववादे निराकृते सत्पुर्वीरिताकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृकत्ववादाः । अकस्माद्धीदमाविरासीत् । प्रधानादिदमुत्पन्नम् । जीवाद्भवन्ति भूतानीत्यादिश्रुतिप्राप्ता एतेन गताधिकरणन्यायेन व्याख्याताः प्रत्याख्याता इत्यर्थः ।

५१५ ननु गताधिकरणे असतो जगदुत्पत्तिर्निराकृतैव, अत्र पुनः किमित्याशङ्क्य निराक्रियत इत्याशङ्कित इत्याह **तन्मन इति** । इदं वा अग्रे नैव किञ्चन आसीत्तदसदेव सन्मनोऽकुरुत स्यादित्यादिना असतो मनोपूर्वकजगत्सृष्टिः प्राप्ता निरस्ता असता बुद्ध्यसम्भवहेतुना पूर्वत्र । अत्र त्वकस्माद्धीदमिति मनोरहितादसतो विश्वजननमाशङ्क्य निषिध्यत इत्यपुनरुक्तम् । अत एवेदमतिदेशाधिकरणम् । वाक्यान्तरादिना पूर्वपक्षे सति पूर्वोक्त्यागमबाहुल्यन्यायेन परिहारात् ।

५१७ युक्तिबाहुल्यं दर्शयति **कचिदिति** । जगज्जीवाकृतं प्रधानाकृतं महदकृतं च वस्तुत्वाज्जीववत् । प्रधानवदसद्वदित्याद्यनुमानमूहनीयम् । श्रुत्यनुसारित्वादस्य नातिप्रसङ्गादिदूषणमुद्रहन्ति । प्रमाणाविरुद्धस्यानुमानस्यातिप्रसङ्गादिदूषणोद्भावनेऽनुमानमात्रभङ्गप्रसङ्गश्च । अकस्माद्बीदमित्यादिश्रुतिस्तु विष्णुविषयत्वेनोपपन्नम् । पूर्वाध्याये निखिलश्रुतीनां विष्णुपरत्वेऽभिहितेऽपि तत्रैव वाक्यान्वयादिनाऽर्थान्तरस्याप्यमुख्यस्याङ्गीकृतत्वात् श्रुतिभिर्जगतो जीवादिकर्तृकत्वमाशङ्क्य परिहृतमित्यदोषः । अत्र कश्चिदाह ।

५१८ ननु जगत्कर्तृत्वादिकं वास्तवं न सम्भवति ईश्वरस्यासर्वज्ञेनासर्वकर्त्रा मुक्तौ जीवेनैकीभावश्रवणात् । 'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ती'ति श्रुतावित्यत आह **नान्यदिति** । क्षीरनीरयोरिव भगवता युक्तानामेकीभावव्यपदेशः संश्लेषविषयः । न हि पूर्वमविद्यमान एकीभावः पदार्थयोः पश्चाद्भवति । क्षीरस्यापि नीरेण सम्मिश्रीभाव एव । परिमाणाधिक्यदर्शनात् भेद एव युक्तः ।

५२१ एतद्वेवोक्तं 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदि'ति । अस्य सूत्रस्य परेण यदन्यथाव्याख्यानं कृतं तदनूद्य दूषयति **भोक्त्रेति** । यदि भोक्तृभोग्ययोर्ब्रह्माभेदस्तर्हि भोक्तृभोग्यविभागो न स्यात् । भोग्यस्य जडस्य भोक्तृत्वापत्तेरित्यर्थः पूर्वपक्षो यदि सूत्राभिमतस्तर्हि भोक्तृत्वापत्तेरिति सूत्रपाठः स्यात्, न तु भोक्त्रापत्तेरिति ॥ ५ ॥

॥ इति भोक्त्राधिकरणम् ॥ ५ ॥

* * *

॥ आरम्भणाधिकरणम् ॥

५२१ अधुना तदनन्यत्वमारम्भणशब्दादिभ्य इत्यस्याधिकरणस्य परोक्तार्थं विघटयति **कथमिति** । न च ब्रह्मानन्यत्वमत्र प्रतिपादयितुं शक्यते । जगतो ब्रह्मविकारत्वस्य प्रतिपादितत्वात् । अतो जगदुत्पत्तौ ब्रह्मणोऽन्यत्स्वतन्त्रं कारणं नास्तीति निषिद्ध्यते **तदनन्यतेति** । तथा हि श्रुतिः 'किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीदि'ति । आरभ्यतेऽनेनेत्यारम्भणं कारणं न किमपि साधनं कथमप्यासीदित्यर्थः ।

५२२ यदेतत्प्रधानादिसाधनजातमभ्युपगतं तस्य सत्तादिकमपि पराधीनमिति तत्र प्रमाणमाह **द्रव्यमिति** । द्रव्यं प्रधानादि तस्य परिणामादिति भावः । अतः कुलालादेरिव स्वेनापादितशक्त्यादिमत्साधनापेक्षत्वसाधनमीश्वरस्य श्रुतिविरुद्धं न कर्तृत्वाविशेषात् कुलालादेरिव दण्डादिसापेक्षत्ववत् साधनम् ईश्वरस्यानादेरापादयितुं शक्यते । न च 'नासदासीन्नोऽसदासीत्तदानीं नासीद्रजो नो व्योमापरो यदि'ति श्रुत्या प्रलयदशायां प्रकृत्यादि-

साधनजातस्य असत्त्वमेवोच्यत इति वाच्यम् । तस्यां ह्यसदादिशब्दवाक्याव्यक्तादिवस्तुनोऽव्यक्तत्वपरतन्त्रत्व-विकृतरूपनाशादिविषयत्वात् । लोकेऽपि कार्याक्षमे परतन्त्रे वस्तुन्यसन्नेवेति प्रयोगात् तदानीं सदसतोर्युगप-न्निषेधस्य व्याहतत्वात् सदसच्छब्दयोरत्राव्यक्तव्यक्तपरत्वमेव युक्तम् । 'तम आसीत्तमसा गूळ्हमग्रे प्रकेतं सलीलं सर्वमा इदमि'ति वाक्यशेषे जडप्रकृत्यादिसद्भावावगमाच्च । गूढमाच्छादितमित्यर्थः ।

५२३ पृथिव्यादिकार्यविलयश्च प्रकृतिविशेष एव युक्तो यथा घटादिलयः । अपि च । यदि 'नासदासीदि'-त्यादिना ब्रह्मव्यतिरिक्तवस्तुस्वरूपमेव निषिद्धं तर्हि 'आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्च नासे'ति वाक्यशेषे भगवदन्यानुवादेन परत्वनिषेधोऽनर्थकः स्यात् । अन्यन्नासेत्येतावदेव स्यात् । एतदेवोक्तं तद्वशस्येति ।

५२४ कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य हरेः प्रकृतिमुपादानीकृत्य कालकर्मादिकं निमित्तीकृत्यैव जगदुत्पादनं स्वेच्छानियमकृतमित्याह शक्तोऽपीति । यस्मादत्यन्तभिन्नं कार्यमुत्पद्यते तन्निमित्तकारणम् । यस्माद्भिन्नाभिन्नं कार्यमुत्पद्यते तदुपादानकारणम् । कारणरूपेण सत्कार्यरूपेण प्रागसिद्धं घटादिकं जायते । न ह्यन्ततो भिन्नस्य कार्यस्योत्पत्तिर्घटते । न चाभिव्यक्तिरिति वाच्यम् । तस्यामपि पूर्वविद्यमानायां पश्चादभिव्यक्तिः साऽपि तथेत्यनवस्थाप्रसङ्गात् । यद्यभिव्यक्तिः पूर्वमसती जायते तर्हि तथैव घटादिकार्यं जायत इत्यभ्युपगम्यता-मविशेषात् । एवं कार्यस्य नाशोऽनभिव्यक्तिश्चेत् तस्या अपि पूर्वं विद्यमानायाः पश्चादभिव्यक्तिः सापि तथेत्यनवस्थाप्रसङ्गः । यद्यविद्यमानैवानभिव्यक्तिर्मुद्गरादिना घटस्य जायत इत्युच्यते तर्ह्यसत्कार्यप्रसङ्गः ।

५२५ यदि कारणात्कार्यमत्यन्तं भिन्नं तर्हि मृद्घट इत्यभेदप्रतीतिर्न स्यात् । यदि पूर्वमत्यन्तमसन्नेव घटो जायत इति प्रयोगः तर्हि न स्यादत्यन्तासतो जनिक्रिया कर्तृत्वाभावात् । तस्मात् सदसत्कार्यवाद एव श्रेयान् । तदेतदाह नित्यभेद इति ।

५२६ उक्तमेवार्थं श्रुत्या द्रढयति शक्तोऽपीति ॥ ६ ॥

॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

* * *

॥ इतरव्यपदेशाधिकरणम् ॥

५२८ अतो महदादि कार्यस्योपादानकारणेन प्रधानेन भेदाभेदौ । स्वतन्त्रकारणाद्भगवतो भेद इति सिद्धम् । ननु जीवानामेव कर्मद्वारा कर्तृत्वोपपत्तौ किं भगवतेत्यत आह अनंशस्येति ।

ईश्वरनिरपेक्षेण जीवेन कर्मण एवानिष्पत्तेः सुतरां तद्वारा जगतो निष्पत्तिः । तथा हि । यदि कर्म कुर्वन्तं जीवं कारयन् हरिः महदल्पकार्यापेक्षया जीवस्य स्वरूपभूतां शक्तिं विभज्य नोद्यमेत् तर्हि अल्पकार्यमपि स्वशक्त्या कुर्यात् । शक्त्यैकदेशेन करोति चेज्जीवः सांशः स्यात् । तथा सत्यथ यः स जीवः स नित्यो निरवयव इत्यादि-श्रुतिविरोधः स्यात् । औपाधिकांशभेदस्तु निरवयवस्य न सम्भवत्येव । तत्रांशेनोपाधिना सम्बन्धायोगात् । कात्स्न्येन सम्बद्ध्यमान उपाधिर्नांशभेदकः । न चाविद्यकत्वेनांशभेदो दुर्घटो जीवस्येति कल्पनीयम् । अप्रमाण-कत्वात् यद्धि युक्त्या विरुद्ध्येत तदीशकृतमेव हीति गत्यन्तरवचनाच्च ।

५३० एतदेवोक्तं 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण । ननु सर्वथा न जीवो निरवयवः तत्कथं तस्य निरवयवत्वशब्द इत्यत आह **अंशिन इति** ॥ ७ ॥

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

* * *

॥ श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥

५३३ यदेतच्चिद्रूपांशबाहुल्यं सौभर्यादिषु स्वगतभेदरहितं दृश्यते तदपीशायत्तत्वम् । यदि तत्र स्वगतभेद-व्याघातकत्वेनांशबाहुल्यं हरिर्नियमयेत् तर्हि पटांशभूततन्तूनामिव परस्परं भेदः स्याज्जीवांशानाम् । ननूक्तविरोधो भगवत्यपि किं न स्यादित्यत आह **तस्येति** । 'विचित्रशक्तिः पुरुषः पुराण' इत्याद्यागमसिद्धाचिन्त्यशक्तिके हरौ न किञ्चिदसम्भावितमित्यभिप्रेत्य सूत्रकृदप्याह **आत्मनि चैवं विचित्राश्च हीति** ।

५३४ नन्वचिन्त्यशक्तित्वादेवाप्रच्युतस्वरूपस्य ब्रह्मणो जगदाकारेण परिणामोऽपि स्यादिति चेत् । मैवम् । श्रुतिसिद्धसर्वोत्तमत्वविरोधात् । न हि सर्वात्मकस्य सर्वोत्तमत्वं सम्भवति । हरेः सर्वोत्कृष्टत्वे यो विरोधः स ह्यस्मिन्नध्याये निरसनीयः । जगत्स्रष्टृत्वेन हरेरुत्तमत्वसिद्ध्यर्थं ये जगत्सृष्ट्यादिषु वाक्यानां परस्पराविरोधाश्च अतः प्रतिपाद्यन्ते अध्यायान्तरेष्वपि विरोधा एव निरस्यन्ते तत्र तत्र प्राप्ताः तदेतदाह **विरोध इति** ॥ ८ ॥

५३६ ननु **'सर्वोपेता च तद्दर्शनात्'** इत्यत्र सर्वानुपपत्तिपरिहाराय सर्वशक्तिमत्त्वमभिहितं हरेः । अनेनैव तस्य लौकिककर्तृत्ववच्चक्षुरादिकरणरहितस्यापि जगदुत्पादनादनुपपत्तिरपि परिहृता । **अतो 'विकरणत्वान्नेति चेत्तदुक्तम्'** इति सूत्रं पुनरुक्तमिति चेत्, मैवम् । 'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स श्रृणोत्यकर्ण' इत्यादि-प्रमाणविरोधश्च स्यात् । अतः प्राकृतपाण्यादिभी रहितस्य चिद्रूपपाण्यादिमतो हरेरत्र विवक्षितत्वात् साधनोपा-दानदर्शनादिकं युक्तमेव । अन्यथाऽपाणिपादजवनादिपदानां परस्परविरोधः स्यात् । अतः सामान्येन परिहृतो

विरोधो विशेषेण परिह्रियत इत्यदोषः । पुनरुक्तिपरिहारश्च सर्वत्र प्रमेयैक्यप्रमाणभेदात् । प्रमाणैक्ये प्रमेयविशेषव्युत्पादनादवगतव्यः । तदेतदाह **मानेति** ॥ ७ ॥

॥ इति श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥ ८ ॥

* * *

॥ न प्रयोजनाधिकरणम् ॥

५३६ ननु 'प्रयोजनमनुद्दिश्य न मन्दोऽपि क्वचित्करोती'ति तत्कथं पूर्णकामस्य विष्णोः प्रयोजनमनुद्दिश्य जगत्सृष्टौ प्रवृत्तिरित्यत आह **सदेति** । यथाऽग्निः स्वभावादेव काष्ठं दहत्येवं हरिरपि स्रष्टृत्वस्वभावादेव जगत्सृजति । ननु प्रयोजनमनुद्दिश्य बुद्धिमत्प्रवृत्तिर्नास्तीति वाच्यम् । व्याख्यानादौ बुद्धिमतोऽपि प्रयोजनरहितस्खलनादिव्यापारदर्शनात् । आनन्दोद्रेकादेव मत्तस्य नृत्तगानादिदर्शनाच्च । उक्तार्थे प्रमाणमाह **देवस्येति** ।

५३९ 'भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे'ति पूर्णकामस्य हरेः स्वप्रयोजनेच्छैव निषिध्यते । परप्रयोजनेच्छया जगत्स्रष्टृत्वात् सूत्रकृदप्येतदेवाह **न प्रयोजनवत्त्वेनेति** ।

५४० ननु का स्पृहा न काऽपीतीच्छामात्रनिषेधः किं न स्यादित्यत आह **इच्छेति** । यदि तत्रेच्छामात्रं निषिद्धं तर्हि 'इच्छामात्रं प्रभोः सृष्टिरि'ति सृष्टौ विनिश्चिता इत्यधस्तनवाक्ये हरीच्छायत्तत्वं जगत्स्रष्टृत्वं वदतां सुनिश्चयवत्त्वेन प्रशंसनमयुक्तं स्यात् । 'सोऽकामयत', 'कामस्तदग्रे समवर्तता धीः' इत्यादिविरोधश्च स्यात् । 'हरिरिच्छावांश्चेतनत्वाद्यज्ञदत्तवदि'ति युक्तिविरोधश्च स्यात् । महातात्पर्ययुक्तिविरोधश्च स्यात् । कथमिति चेत् । उच्यते । श्रुतिभिर्हि मोक्षं तत्साधनं च बोधनीयम् । मोक्षसाधनं च हरिप्रसाद एव प्रसिद्धः । 'एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत' इति श्रुतावूर्ध्वगतेर्हरीच्छाधीनत्वश्रवणात् । इतोऽपि संसारमोक्षस्य हरीच्छानिमित्तकत्वं लोकदृष्ट्यनुसारात् । लोके निगडमोक्षस्य राजप्रसादनिमित्तकत्वदर्शनात् । 'यदि हरीच्छा न स्यात्तर्ह्यतिबहुकालमुपासितोऽपि न मोक्षं दातुमिच्छती'ति तदुपास्त्यादिविधायकवेदस्याफलत्वेनाप्रामाण्यं स्यात् ।

५४३ ननु यथार्थं प्रमाणं न फलवदर्थबोधकं तत् । कथं फलवदर्थबोधकत्वाभावे वेदस्याप्रामाण्यमापाद्यत इत्याशङ्क्याह **याथार्थ्यमिति** ।

५४४ सत्यं **यथार्थबोधकत्वं मानत्वमिति** तदेव न निर्धार्यते वाक्यस्य यावदिष्टसाधनबोधकत्वं नावगतम् । इष्टसाधन एव शब्दव्युत्पत्तेः । तत्रापि यदतिशायितेष्टसाधनं बोधयति वाक्यं तदतिशयेन प्रमाणं भवितुमर्हति । सम्पूर्णं प्रयोजनं यस्मिन्वाक्ये तत्सम्पूर्णप्रयोजनमित्यर्थः ॥ ९ ॥

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

* * *

॥ वैषम्यनैर्घृण्याधिकरणम् ॥

५४४ अधुना 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्' इत्यधिकरणतात्पर्यमाह **वैषम्यमिति** । अधर्मकर्तारं प्रतीष्टदातृत्वं वैषम्यम्, धर्मकर्तारं प्रत्यनिष्टदातृत्वं नैर्घृण्यं, वेदाप्रामाण्यकारि हरेर्नाङ्गीकार्यम् । तद्विपरीतं तु वैषम्यादिनामकमेव न भवतीत्यङ्गीकार्यमेव । न हि दण्ड्यान् दण्डयन्नदण्ड्याननुगृह्णन् राजा निर्घृणोऽपि विषम इत्युच्यते लोके विवेकिभिः ॥ १० ॥

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

* * *

॥ सर्वधर्मोपपत्त्यधिकरणम् ॥

५४५ अधुना सर्वशङ्कोद्धारात्मकं 'सर्वधर्मोपपत्तेरि'ति सूत्रं व्याचष्टे **यदधीना इति** । 'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपी'त्यादिवाक्यैः स्वतन्त्रत्वोपपत्त्या च हरेर्निर्दोषाशेषगुणवत्त्वं सिद्धम् ॥ ११ ॥

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमदनुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां द्वितीयाध्यायस्य प्रथमः पादः ॥ २-१ ॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीत्रैविक्रमार्यकृता

नयचन्द्रिका

द्वितीयाध्यायस्य प्रथमः पादः

॥ नविलक्षणाधिकरणम् ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

४६४ पूर्वाध्यायेऽनुमानस्वरूपमाह **अनुमेति**। साध्येन साधनस्याविनाभावो व्याप्तिः। कथमत्र व्याप्तिमात्रमनुमानमित्यत आह **प्रतिज्ञेति**। विजानतः पश्यतः। अर्थं प्रतिज्ञाय 'यो धूमवान् सोऽग्निमानि'त्युक्ते धूमवतः पक्षस्याग्निमत्त्वं ज्ञायते हि। लिङ्गवचनमपि स्मारकमात्रत्वेनोपयोगि स्यादिति चेल्लिङ्गादिति चेत्। लिङ्गस्यात्रासिद्धत्वे तत्स्मर्तुं नात्र प्रयोजनं स्यात्।

४६६ ननु पञ्चावयवोक्तावेव विवादावसितिर्भवेन्न व्याप्तिमात्रोक्तावपीत्यत आह **पञ्चेति**।

४६८ एवमुक्तेऽपि दृष्टान्ते हेतौ वा विप्रतिपत्तौ सहजातायां पुनरपि हेत्वन्तरेण पुनरपि साधनः स्यादेव हि। कुतः पर्वतस्याग्निमत्त्वमिति प्रश्नेन प्रतिज्ञायाः सिद्धत्वे धूमवत्त्वादिति लिङ्गोक्तौ चशब्दादुपनयाद्युक्तौ चानुमानदोषानाह **विरोध इति**। असङ्गतिलक्षणमाह **प्रतिज्ञायामिति**। यथा 'कथायां जगन्मिथ्यात्वं साधयामी'ति प्रतिज्ञाय पर्वतोऽग्निमान् धूमवत्त्वादिति।

४६९ विरोधे भेदानाह **विरोधोऽपीति**। प्रतिज्ञातार्थविरुद्धचता प्रमाणान्तरैः यथाऽग्निरनुष्ण इत्यादिलिङ्गराहित्यम्। यथा 'शब्दो नित्यश्चाक्षुत्वादि'त्याद्यव्याप्तिशब्देनातिव्याप्तिरुच्यते। तस्याश्च विवक्षितव्याप्तेरितर-

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम्।

त्वात् । अनित्यः शब्दः प्रमेयत्वादिति श्रावणत्वादित्यतिव्याप्तिः । एवमनुमानस्याधिक्यदूषणे उक्तावचनप्राप्ते आह **न्यूनेति** । यथा पर्वतो धूमवत्त्वादिति न्यूनम् । गगनत्वादिमान्न गोऽग्निमानित्याधिक्यम् ।

४७० उपाधिविरोधस्याव्याप्तावन्तर्भावमाह **साध्येति** । साध्यव्यापकेनोपाधिना वैलोम्यं विरोधश्च साधनस्याव्याप्तिः । साध्यं व्याप्नोतीति साध्यव्यापकः । साध्यव्यापकत्वे सति साधनाव्यापको ह्युपाधिः । यथा 'विमतं लोहभेद्यं पार्थिवत्वात् कदलीकाण्डवदि'त्यत्र शिथिलावयवारब्धत्वं प्रयोजनमिति । न मेयं मानापेक्षेत्यादि स्वस्य वाक्यविरोधोऽपि जात्यपरपर्यायप्रतिज्ञाविरोधेऽन्तर्भूतः । निरीश्वरवादमभ्युपगतवतः कस्यचिदर्थस्यानुपपत्तौ परेणोद्भावितायां सत्यामीश्वरशक्त्या युतं स्यादिति स्वानां वाक्यविरोधोऽपसिद्धान्तापरपर्यायोऽप्येवमेव ।

४७१ परेण स्वानभीष्टे साधिते स्यादेवं तथाऽस्तीति संवादः । तूष्णींभावोऽनुक्तिः । प्रतिज्ञाहान्यादीनां परपरिकल्पितानां द्वाविंशतिनिग्रहस्थानानामेतेषु षट्स्वेवान्तर्भावमभिप्रेत्याह **एत एव तु निग्रहा इति** ।

४७२ एवं प्रमाणानि विचार्य तदुपयोगि स्थानं कथां विशेषतो लक्षयति **वाद इति** । असतां सतां वेदबाह्यानां वेदवादिनां च परस्परं तु वादो वितण्डा वा स्यादसतां पक्षदूषणरूपम् । जल्पादौ पुनरुक्त्यादिना विजयपराजयप्राप्तौ न हि जल्पादिना क्वाचिदुच्चनीचत्वज्ञानम् । तस्माद्वादरूपविद्यापरीक्षणं कार्यम् । वादे तु पुनरुक्त्यादीनामनुद्भाव्यत्वाद्धेत्वाभासादीनामुद्भाव्यत्वाच्च तेनोच्चनीचत्वज्ञानं भवति । तत्सिद्धौ व्यर्थताऽन्ययोस्तत्रैव जयपराजयसिद्धौ वितण्डाजल्पयोर्व्यर्थता । उभाभ्यामपि साधनमात्रे वा कृते समत्वेन जयपराजयसिद्धौ जल्पवितण्डयोरवकाशो नैव । वादेऽपि कारणमुच्चनीचत्वज्ञानस्येति शेषः ।

४७८ विजिगीषूणां वादस्य विशेषमाह **सभेति** ।

४७९ ननु वादेनैव जयलाभादिसिद्धौ किं जल्पादिनेत्यत आह **तत्त्वेति** ।

४८० **विद्यायाः** वेदवेदाङ्गरूपायाः ।

४८१ अत्र साधनप्रकारमाह **प्रतिज्ञेति** । यथा कत्येव देवा याज्ञवल्क्येति शाकल्येन पृष्टो याज्ञवल्क्यस्त्रयस्त्रिंशदिति प्रतिजज्ञे । परमोमिति होवाचेति शाकल्यस्य संवादात्तथाऽत्रापि प्रतिज्ञामात्रेणास्य साध्यत्वम् ।

४८२ सभादीनां लक्षणमाह **सभेति** । सभ्याः सभायां साधवः सर्वविदिनश्च स्युः । न सभादिवदुक्तलक्षणमात्रवन्तः प्रश्निकाश्चैवमेव । एतदज्ञाने एतेषां प्राश्निकानां वादिप्रतिवादिव्यवहारगुणदोषाज्ञाने सभ्याश्च निर्णयाय प्रमाणं स्युः । एतेषां चाज्ञाने दूरगा विद्वांसः ।

४८४ वादजल्पौ वितण्डाया विवेचयति **उभाभ्यामिति** । स्वपक्षस्य साधनं परपक्षदूषणम् । प्रत्येकेत्यादेरयमर्थः । वादिना प्रयुक्ते आगमे प्रत्यक्षविरोधमागमान्तरविरोधं वा तद्विवक्षितार्थस्योद्भाव्य अन्यार्थतैव दर्शनीया । प्रतिवादिनाऽत्र विवक्षितार्थे उपक्रमादिलिङ्गविरोधता च प्रदर्शनीया ।

४८७ अत्र कथायां प्रयुज्यमानायाः श्रुत्याद्यननुगृहीताया अनुमायाः पराभिमतमवयवनियममनूद्य दूषयति **पञ्चेति** । कश्चिदनुमां प्रतिज्ञाहेतूदाहरणाख्यत्र्यवयविनीं नियमाद् ब्रवीति । अन्यः प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्यपञ्चावयवम् । अपरस्तु दृष्टान्तोपनयाख्ययुग्मावयविनीम् । तादृशी नियतावयवा केन साध्याऽवयवकल्पना । नियतावयवेन चेत् । तदवयवनियमकल्पनार्थमन्यनियतावयवकल्पनमित्यनवस्था । एवं नियतावयवासिद्धौ न केनचिद्व्याप्तिमात्रेण नियमसाधनं कर्तव्यमेव स्यात् तेन वादिना । तस्मात् सा व्याप्तिरेवानुमा मता ।

४९० अनुभूतिः प्रमाणमिति परोक्तप्रमाणलक्षणं स्मृतिप्रामाण्याङ्गीकारादेव अव्याप्तिरभिहितेत्यभिप्रायेणाह **अनुभूतिरिति** । केन निमित्तेनानुभूतावन्तर्भूता स्मृतिरपोद्यते । इतोऽपि स्मृतिः प्रमाणमित्याह **पूर्वेति** ।

४९१ न च स्मृतिलिङ्गकं पूर्वानुभूतज्ञानमिति वाच्यम् । तत्र धर्मिग्राहकप्रमाणाभावात् । स्मृतेः स्वरूपमाह **मानसमिति** । इदं मानसप्रत्यक्षं चेत्कथं देशकालप्रकृष्टार्थग्राहकम् । न हि चक्षुरादिप्रत्यक्षस्य तथात्वमित्यत आह **अतीतेति** ।

४९२ स्मृतेः क्रियाविषयत्वं च साक्षिसिद्धमित्याह **विज्ञातमिति** । पूर्वं मयैतत्कृतमित्यपि मनसा विज्ञातम् ।

४९३ उक्तार्थमुपसंहरति **एवमिति** ॥ २ ॥

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

*** * ***

॥ अभिमान्यधिकरणम् ॥

४९४ 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' इत्यधिकरणाभिप्रायमाह **तथापीति** । 'मृदब्रवीत् ता आप ऐक्षन्त । बहुस्यां प्रजायेयेति । ता अन्नमसृजन्ते'ति बुद्धिवागादिवाचको वेदो यज्जडं तद्वागादिरहितमिति दृष्टप्रत्यक्षसिद्धव्याप्तिः । लोके मृदादिशब्दानां मृदादिमात्र एव रूढिर्न तु देवतास्वित्यत आह **वाचकेति** ।

४९८ बालेति अनुपलभ्यमानत्वात् तासामभाव इत्यत आह **दृश्यन्त इति** । शास्त्रोक्तवस्तुनः शास्त्रोक्त-लक्षणानुकूल्येनैव व्युत्पत्तिः शास्त्रस्यैव तत्रोपजीव्यत्वात् । तस्या अनादित्वेन बलवत्त्वाच्चेदृशो न्यायः श्रुते-रर्थान्तरकल्पना ॥ ३ ॥

॥ इति अभिमान्यधिकरणम् ॥ ३ ॥

* * *

॥ असदधिकरणम् ॥

५०० 'असदिति चेन्न प्रतिषेधमात्रत्वात्' इत्यादि विवृण्वन् श्रुतिगुणयुक्तिविरोधं परिहरति **अल्पेति** । अस-त्कारणं श्रुत्यर्थो भवति । क्वाप्यसत्कारणत्वेन 'असतः सदजायते'त्यादिश्रुत्यर्थो न भवति हि किन्तु ब्रह्मैव । तद्वा 'एतदसदाहुर्न ह्यासादयति कश्चने'त्यादेः ।

५०२ ननु युक्तिसहितश्रुतिविरोधश्चतुर्थपादे परिह्रियते हि । तस्मात् कथमपुनरुक्तिरित्यत आह **श्रुति-प्रायेति** । श्रुतिप्रायाः श्रुतिप्रचुराः स्वयमल्पाश्च ।

५०३ सूत्रव्याख्यानरूपेण पूर्वपक्षयुक्तिमुक्त्या परिहरति **असदिति** । प्रलये तावत् सर्वस्यासत्त्वं कल्प्यते तस्मादसतः किञ्चित् प्रधानादिकं जगत्कारणादिकमुच्यते च । यथा मृदो घटः कृतककारणमपि प्रलये सद्भवितुमर्हति । अयं च प्रयोगः । विमतं कारणं देशान्तरे कालान्तरे वा सद्वस्तुत्वात् यथा कार्यं घटा-दिकमिति ।

५०४ **बुद्धिपूर्वप्रवृत्तिर्हि कर्तृत्वम्** । न चासतः सा कर्तृता बुद्ध्यादेरेवादृष्टत्वात् । तस्मात् सूत्रपदं प्रतिषेध-मात्रत्वादिति ।

५०५ मात्रपदाभावे व्यभिचार इत्यत आह **प्रतिषेधेति** । अयमर्थः । अभावरूपस्य धर्मिण ईशादे-रप्यदुःखत्वाद्यभावधर्मत्वात् प्रतिषेधात्मकत्वमस्त्येव न तु प्रतिषेधमात्रता । अभावे धर्मिणोऽभावत्वादभावस्य खपुष्पादेरपि प्रमेयत्वादिको भावधर्मः स्यात् । तस्मादिह तस्य भावधर्मव्यवच्छेदो न कृतः किन्तु प्रतिषेध-मात्रता नाम धर्मिणोऽभावरूपत्वमेव तद्बुद्धिराहित्यमेव न तु बुद्धिराहित्यं विशेष्यतैव धर्मित्वम् । यथा शुक्लः पट इत्यादि ।

५०९ न चैतावना घटादिशब्दवन्नाशवत् कुत्रचिद्युगादौ शापादिना निःशेषविनाशेन कर्तृशेषत्वम् । अतोऽनैकान्तिकत्वं नाशत्वहेतोरित्यत आह **न चेति** । न चाशेषनृनाशो दृष्टः । तत्रापि शापादिकर्तृणामवशिष्टत्वात् । अत एव इतःपरं च न दृश्यः । अत एव नास्ति च । इतोऽपि प्रलये सर्वासत्त्वं न दृश्यत इत्याह **धर्मेति** ।

५१० प्रलये सर्वादृष्टस्यापि नाशे किं नश्छिन्नमित्यत आह **अनादित्वमिति** । अदृष्टमदृष्टपरम्परा कथमनादित्वं विना कस्याप्यर्थस्य कारणं स्यात् स्वरूपाभावप्रसङ्गात् । यदि प्रलयकालात्पूर्वादृष्टात् ततःपरादृष्टमिति नियमो नाङ्गीक्रियते । तर्ह्युत्तरकालादृष्टं तस्मात्पूर्वनिमित्तमित्युच्यते । अदृष्टं कस्याप्यर्थस्य कारणं नो चेत् सर्वस्यासत्त्वधर्मिणि लये मानं च किं भवेत् ।

५११ न ह्याकस्मिके कार्ये किञ्चित्प्रमाणम् । अपि च विमतावुत्पत्तिविनाशौ बुद्धिमत्कर्तृकौ उत्पत्तिविनाशत्वात् सम्मतवत् । तदाह **उत्पत्तीति** ।

५१२ श्रुत्यवसिते कर्तरि किमनुमानेनेत्याशङ्कां निरस्यन् 'तर्काप्रतिष्ठाने'त्यादि सूचयति **आगमेति** । अन्यथा सर्वस्तर्कोऽप्यप्रतिष्ठितः तर्कत्वात् सम्मतवदित्यस्य तर्कस्य पक्षेऽन्तर्भूतत्वादनगाऽस्य वाचा एतत्सिषाधयिषिता तर्कस्याप्रतिष्ठा व्याहता ।

५१४ यत्तु परैरुच्यते 'न विलक्षणत्वादि'त्यादिना किञ्चिच्छिष्टजनपरिगृहीताः साङ्ख्या निराकृता 'एतेन शिष्टा अपरिगृहा अपि व्याख्याता' इत्यत्र वैशेषिकादयः शिष्टा अपरिगृहीता निराकृता इति तन्निराकृत्य सूत्रार्थमाह **न चेति** । जीवादिकृतित्यादिशब्देनाकर्तृकत्वचेतनकर्तृकत्वाचेतनकर्तृकत्वेन ।

५१७ नन्वसतः कारणत्वमसदिति चेत्यादिना निराकृतं किमित्यत्र पुनर्निराक्रियत इत्यत आह 'इदं वा अग्रेनैव किञ्चनासीत्तदेव सन्मनोऽकुरुत बहुस्यामि'ति श्रुतिः । 'अकस्माद्धीदमाविरासीदि'ति च । परिहारो विशेषतोऽत्र परिहारस्त्वसत इति शेषः । अत एवेदमतिदेशाधिकरणम् । वाक्यान्तरेण पूर्वपक्षे प्राप्ते सति पूर्वोक्तयुक्तिबाहुल्यन्यायेन परिहारात् । युक्तिबाहुल्यं दर्शयति **क्वचिदिति** । विमतं जीवाकृतमचेतनाकृतमसदकृतं वस्तुत्वाज्जीववदचेतनवदसद्वदित्यनुमीयते । श्रुतेः श्रुत्यानुकूल्यात् तस्मादतिप्रसङ्गादिदोषाणामत्रानवकाशः ॥ ४ ॥

॥ इति असदधिकरणम् ॥ ४ ॥

* * *

॥ भोक्त्रधिकरणम् ॥

५१८ 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदि'ति सूत्रं व्याख्याति **नान्यदिति** । तदेवोपपादयति **कथं दृश्यत्** एष्यत्काले ।

५२० अस्य सूत्रस्य परयोजनां दूषयति **भोक्तृत्वेति** । यदि भोक्तृभोग्ययोर्ब्रह्माभेदस्तर्हि भोग्यस्य जडस्य भोक्तृत्वापत्तेस्तयोरविभागः स्यादिति पूर्वपक्षीकरणं यदि मतं तर्हि भोक्त्रापत्तेरिति त्वप्रत्ययं विना कुतः प्राह ॥ ५ ॥

॥ इति भोक्त्राधिकरणम् ॥ ५ ॥

* * *

॥ आरम्भणाधिकरणम् ॥

५२१ 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्र परयोजनां निरस्य स्वयं योजयति **कथमिति** । अतीतपादे ब्रह्माविकारित्वं साधितं हि । द्रव्यं प्रधानादिः । तस्य स्वभावादिः परिणामादिः । चेतना चित् । जीव इति यावत् ।

५२३ 'सत्त्वाच्चावरस्ये'ति व्याख्याति **तद्ब्रह्मस्येति** । 'तस्माद्धान्यं न परः किञ्चनासे'त्यादिश्रुतेरपि ततोऽन्यत्किञ्चन विशिष्टं नास तदेव विशिष्टमित्यर्थः । अन्यथा पुनरुक्तिप्रसङ्गात् ।

५२५ ननु कारणाद् ब्रह्मणः कथं कार्यस्य जगतोऽनन्यत्वं स्यात् मृद इव घटस्येत्यत आह **नित्येति** । द्वयं भेदाभेदाख्यम् । तत्र युक्तिमाह **असदिति** । यत्प्रासङ्गिकं घटादिकं तदपि मृदादिकारणरूपेण तदाऽप्यस्त्येव हि ।

५२६ ननु नैव भेदः कार्यकारणयोर्न हि प्रागसिद्धस्य घटस्योत्पत्तिः किन्तु व्यक्तिरेवेत्यत आह **अनवस्थेति** । घटस्य व्यक्तिश्चेत् व्यक्तेः किमुत्पत्तिराहोस्विद्व्यक्तिः । उत्पत्तिश्चेद् घटस्यैव सा स्यात् । किमिति प्रथमा व्यक्तिः कल्प्यते । व्यक्तिश्चेत्तस्याश्चेद्व्यक्तिस्तस्याश्चेत्यनवस्था । कार्यस्य नाशोऽव्यक्तिरेव चेत् तस्या अपि पूर्वं विद्यमानायाः पश्चाद्व्यक्तिस्तस्याश्च तथेत्यत्राप्यनवस्था । अत्र प्रमाणमाह **शक्तोऽपीति** ॥ ६ ॥

॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

* * *

॥ इतरव्यपदेशाधिकरणम् ॥

५२८ 'कृत्स्नप्रसक्तिर्निरवयत्वशब्दकोपो वे'ति सूत्रं व्याख्याति **अनंशस्येति** ।

५३० नन्वीश्वरांशगृहीतत्वेऽपि जीवस्य सांशत्वं प्राप्तम् । अथ 'यः स जीवः स नित्यो निरवयव' इत्यादिश्रुतेः का गतिरित्यत आह **अंशिन इति** । विशेषादेवानेकरूपेषु न तु भेदात् ।

५३२ **अस्त्येव हीति** । हिशब्देन सौभर्यादिप्रसिद्धिं द्योतयति । ननु विमता विभिन्ना बहुत्वाच्चैत्रमैत्रादिवदित्यत्र अनुसन्धानवत्त्वेन भगवदनियतत्वमुपाधिः । तदेतदाह **बहुत्वेनेति** । यथा योगिरूपाणां परस्परानुसन्धानेन **नियमकृन्नैव नियमकृद्भगवांश्चैव चैत्रादीनाम्** । अथवा भिन्नं कृत्वा नियमकृन्न भगवान् योगिरूपाणाम् । तथा चानुमानस्य कालात्ययापदिष्टत्वं सूचितं स्यात् । 'अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः । आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदे'त्यागमविरुद्धत्वात् ॥ ७ ॥

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

* * *

॥ श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥

५३३ 'आत्मनि चैवं विचित्राश्च ही'ति सूत्रं योजयंस्तत्र युक्तिमाह **तस्येति** ।

५३४ ननु 'जन्माद्यस्य यतः', 'सर्वत्र प्रसिद्धोपदेशादि'त्यादौ सर्वजन्मादिकारणत्वसर्वगतत्वसर्वात्तृत्वपातृत्वादृश्यत्वादिगुणकत्वे सर्ववैशिष्ट्यं प्रतिपादितं हि । अत्र च तदनन्यत्वाधिकत्वविचित्रशक्तित्वसर्वोपेतत्वसर्वधर्मोप-पत्तिवचनेन तदेव प्रतिपाद्यते । अतः कथं पुनरुक्तिर्न स्यादित्याशङ्कायामाह **विरोध इति** । यो नारायणस्य सर्ववैशिष्ट्ये विरोधः स निरस्यते द्वितीयेऽध्याये प्रथमे तु तत्तच्छ्रुतिसमन्वयमुखेन सर्ववैशिष्ट्यं प्रतिपाद्यते । तदन्ये तत्र तत्रगाः तत्र अध्यायान्तरगाः । विरोधानिरासादसमन्वयादिप्रसङ्गप्राप्त्या महाविरोधपरिहारादन्ये ।

५३६ ननु 'सर्वोपेता च तद्दर्शनादि'त्यत्र विकरणस्येश्वरस्य सृष्ट्यनुपपत्तिरपि परिहृता सर्वशक्तित्ववचनात् । अथ कथं 'विकरणत्वान्नेति चेन्न तदुक्तमि'ति पुनरुक्तं-न स्यादित्यत आह **मानमेयेति** । प्रमाणैक्ये सत्यपि प्रमेयविशेषेण पुनरुक्तिर्न जायते । 'अपाणिपादो जवनो गृहीते'ति विद्यते तत्र प्रमाणविशेषविशेषः ॥ ८ ॥

॥ इति श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥ ८ ॥

॥ न प्रयोजनाधिकरणम् ॥

५३६ ननु प्रयोजनार्थनामुचिता प्रवृत्तिः कथं पूर्णकामस्येश्वरस्येत्यत आह **सदेति** । 'भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे'ति श्रुतावन्यमिति निरस्यपक्षमुक्त्वा देवस्येति स्वसिद्धान्तो ह्युच्यते । एष स्वभाव इच्छारूपः । स्वभाव इत्यनन्यनिष्ठः परावश इत्यर्थः । मत्तनृत्तवत्केवललीलेति निर्णीता '**लोकवत्तु लीलाकैवल्यमि**'ति सूत्रेण ।

५३९ का स्पृहेत्युक्तत्वादीश्वरेच्छैव नास्तीति न मन्तव्य इत्याह **आत्मेति** ।

५४० भगवानप्यात्मप्रयोजनविवक्षया प्रयोजनवत्त्वादित्याह **इच्छामात्रमिति** । **इति प्रशंसया** सृष्टेरिच्छा-मात्रकारणत्ववादिनां निश्चितत्वविशेषेण प्रशंसया । 'सोऽकामयत', 'कामस्तदग्रे समवर्तता धी'त्यादि**काम-श्रुतिभ्यः** ।

५४१ 'विमत इच्छावान् चेतनत्वाच्चैत्रादिवदि'ति युक्तितो महातात्पर्ययुक्तिं स्वयमेवाह **मोक्षार्था इति** । **प्रसादतः** इच्छानिमित्ततः ।

५४३ 'एष ह्येव साधुकर्म कारयति । तं यमेभ्यो लोकेभ्य उन्निनीषती'ति वाक्यात् । प्रसन्नस्य राज्ञ इच्छया निगडबन्धस्य मोक्षो लोके दृष्टः । यथार्थं प्रमाणं न तु घटवदिति नियमः तस्मात् कथं फलवत्त्वाभावे वेदस्य प्रामाण्यमित्यत आह **याथार्थ्यमिति** । तथाऽपि प्रयोजकं वाक्यमुच्यमानत्वमेति इष्टसाधन एव शब्दव्युत्पत्तेः तत्र हि वाक्यानां महातात्पर्यम् । तत्रापि यन्मोक्षाख्यं सम्पूर्णं प्रयोजनं वाक्यं तत्परमुच्यमानत्वमेति ॥ ९ ॥

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

* * *

॥ वैषम्यनैर्घृण्याधिकरणम् ॥

५४४ 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयती'त्यस्यार्थमाह **वैषम्यमिति** । 'अधर्मकृतः सुखकृत्त्वं वैषम्यं धर्मकृतो दुःखकृत्त्वं नैर्घृण्यं च । वेदप्रामाण्यकारणं धर्मी स्वर्गं विधर्मी निरयमि'ति हि श्रुतिः ॥ १० ॥

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

* * *

॥ सर्वधर्मोपपत्त्यधिकरणम् ॥

'१४५ सर्वाशङ्कापरिहारात्मकं 'सर्वधर्मोपपत्तेश्चे'ति सूत्रं व्याख्याति **यदधीना इति** । 'तत्तस्मात्सर्वधर्मोपपत्तेश्च', 'गुणाः श्रुता सुविरुद्धाश्च देव' इत्यादीनि वाक्यानि ॥ ११ ॥

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यविरचितायां नयचन्द्रिकायां द्वितीयाध्यायस्य प्रथमः पादः ॥ २-१ ॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीशङ्करपण्डिताचार्यविरचिता

अनुव्याख्यानसम्बन्धदीपिका

द्वितीयाध्यायस्य प्रथमः पादः

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

४३३ प्रोक्तसमन्वयस्य प्रतीतविरोधत्वाद्दौर्बल्यमित्याशङ्कापरिहाराय प्रथमद्वितीयाध्याययोर्हेतुहेतुमद्भाव-सम्बन्धमाह उक्त इति ।

४३४ तस्याश्चतुःस्वरूपत्वात् स्मृतेश्चतुःस्वरूपत्वादित्यर्थः ।

४३५ पूर्वपक्षसिद्धान्तयुक्तीः दर्शयति आप्तेति ।

॥ स्मृत्यधिकरणम् ॥

४३९ स्मृतिविरोधस्य प्रबलत्वात् तदविरोधसाधनं दुःशकमित्याशङ्कामुद्भाव्य परिहरति । 'स्मृत्यनवकाश-दोषप्रसङ्ग' इत्यादि सूत्रार्थं विवृण्वन् आप्तैरिति विपक्षन्यायमाश्रित्य विचार्यमाणे सति विपक्षिणां पक्षस्यापि दोषो न दृष्टः । अथ पक्षन्यायमाश्रित्य विचार्यमाणे सति विपक्षे दोषोऽपि दृश्यत इत्यत आह न चेति ।

४३९ तस्मिन्निति विवदमानत्वे विष्ण्वादिस्मृतिव्यभिचारो हेतुरपि न स्यादित्याह न चेति ।

४४० आप्तमूलत्वं विघटितं चेत्तत्स्मृतेर्युक्तिमूलत्वं स्यादित्यत आह न चेति ।

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम् ।

४४० वेदस्य च व्यभिचारो दृश्यते इति शङ्कां परिहरति **वेदेति** ।

४४१ तत्पक्षेऽप्यधिकारो न ज्ञातुं शक्यते इत्यत आह **अधिकार इति** ।

४४२ अन्यागमेषु कथमधिकारसौलभ्यमित्यत आह **अन्येति** ।

४४३ न चाप्तिनिश्चयस्तत्र शक्यते व्यभिचार इत्युक्तं व्यभिचारं प्रकटयित्वा तदप्रामाण्यं निगमयति **अधिकारमिति**।

॥ इति स्मृत्यधिकरणम् ॥ १ ॥

* * *

॥ नविलक्षणाधिकरणम् ॥

४४४ निर्दोषवाक्यं मूलत्वादित्युक्तं वेदनिर्दोषत्वं स्पष्टीकृत्य तन्मानत्वं निगमयति **नित्यत्वादिति** । वेदनिरपेक्षरुद्रादिस्मृतेः प्रोक्तफलादर्शने प्रामाण्यं कल्प्यम् । अधिकारसौलभ्यात् । नित्यवाक्यस्य तदनुसारिषु पुराणादेस्तत्प्रोक्तफलदर्शने सति अधिकारस्य विशुद्धमातापितृजन्यत्वादिलक्ष्यस्य दुर्ज्ञेयत्वात् तद्वैगुण्यसम्भवेन नाप्रामाण्यं कारणं किमपि निरूपणीयं भवतीति यावत् । न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विनेति वेदनित्यत्वं सर्ववादिन उद्दिश्य साधितम् । अतो नित्यत्वादिति वेदस्य निर्दोषत्वे हेतुरुक्तः निर्दोषत्वादवैदिकान् प्रति च वेदस्य प्रामाण्यं साधितम् ।

४४६ अथ वैदिका अपि ये देवा नित्यत्वमङ्गीकुर्वन्ति तानुद्दिश्य ये वेदेनापि तन्नित्यत्वं बोधयन्ति **विरूपेति**।

४४७ वेदस्य नित्यत्वे सत्यबुद्धिपूर्वकत्वात्पिपीलिकालिपिवदमानत्वं स्यादित्यत आह **पिपीलिकेति** ।

४४७ अबुद्धिपूर्वकत्वमप्यविरुद्धं प्रमाणं भवतीत्यत्र दृष्टान्तमाह **यथेति** ।

४४८ विरोधादर्शनादिति प्रस्तुतस्य विरोधस्य स्वरूपमाह **विरोध इति** ।

४५० आगमविरोधः प्रामाण्यविघातक इत्युक्तम् । वेदप्रामाण्यमिष्यत इति चोक्तम् । अथ उभयोरागमयोः विरोधे कथमर्थनिर्णय इति चेद्युक्त्यनुकुलार्थो ग्राह्य इत्याह **आगमेनेति** ।

४५० आगमस्य मानान्तरविरोधपरिहारप्रकारमाह **उपजीव्येति** ।

४५२ प्रत्यक्षानुमानयोर्मानान्तरविरोधेन प्रामाण्यमागमस्य । प्रामाण्यमेव मानान्तरविरोधेऽप्यर्थान्तरविषयत्वेनेत्यभिप्रायः । उभयोर्वाक्ययोर्विरोधप्रतीतौ ग्राह्यार्थविशेष उक्तः । अथैकस्यैव वाक्यस्य अन्धो मणिमविन्ददित्यादेरर्थद्वयप्रतीतौ ग्राह्यार्थविशेषमाह **युक्त इति** ।

४५२ युक्तित्रैविध्यमाह **युक्तिरिति** ।

४५३ व्याप्तित्रैविध्यमाह **व्याप्तिरिति** । प्रत्यक्षागममूला युक्तिस्तत्र बलीयसी, युक्तिमूलयुक्तेरित्यर्थः ।

४५४ प्रत्यक्षादिप्रमाणप्रस्तावे प्रमाणसामान्यलक्षणमाह **याथार्थ्यमिति** ।

४५४ मानलक्षणस्य क्रियाविषयेति व्याख्याशङ्कां नुदति **अर्थत्वमिति** ।

४५५ शब्दस्य ज्ञानद्वारा ज्ञेयविषयत्वमुक्तं **ज्ञानार्थ इति** ।

४५५ अथ युक्तेस्तथात्वोक्त्या प्रत्यक्षस्यापि तथात्वमुपलक्षयति **यथार्थेति** ।

४५६ ज्ञानद्वारा ज्ञेयविषयत्वादेव अज्ञादीनां अनुप्रमाणत्वमाह **अनुप्रमाणत्वमिति** ।

४५८ तर्हि मानलक्षणस्य स्मृत्यादावतिव्याप्तिरिति शङ्कां नुदति, निष्फलत्वात्स्मृत्यादेः प्रामाण्यं नास्तीत्यत आह **न चेति** ।

४५८ तर्ह्यधिगतार्थः गन्तृत्वाभावात् स्मृत्यादेरप्रामाण्यमित्यत आह **नेति** ।

४५९ निष्फलत्वादनुमानं चेत् तृणादिप्रत्यक्षस्यामानत्वं स्यादित्याह **तृणेति** ।

४५९ तथापि क्वचित्प्रत्यक्षे फलवत्वं दृष्टान्तम् । अतो न दोष इति चेत् तत्स्मृत्यादावपि सममित्याह **सुखेति** ।

४६० अथ मानविशेषलक्षणमाह **निर्दोषेति** ।

४६४ अथ युक्तिस्वरूपमाह **अनुमेति** ।

४६४ तदेव प्रतिपादयति **प्रतिज्ञातेति** ।

४६५ धूमं पश्यतो यो धूमवान् सोऽग्निमानिति व्याप्तिकथनेनैव साध्यसिद्धिरित्यर्थः । लिङ्गस्यासिद्धौ तद्वचनेनैवानुमानस्य मानमित्यत आह **यदीति** ।

४६६ सिद्धस्यापि लिङ्गस्य वचनेन स्मृतिः प्रयोजनमित्यत आह **यदीति** ।

४६६ दृश्यमानस्य लिङ्गस्य स्मरणेन प्रयोजनं नास्ति । दृष्टलिङ्गस्य तु यो धूमवान् सोऽग्निमानिति व्याप्तिकथनेन तत्स्मृत्या अग्निज्ञानं प्रयोजनमस्ति वेत्यभिप्रायः । विप्रतिपत्त्यवसानाय पञ्चावयववचनमेव कर्तव्यमित्यत आह **न पञ्चेति** ।

४६७ कुत इत्यत आह **दृष्टान्तादिष्विति** ।

४६८ यथा दृष्टान्तादिषु विप्रतिपत्तौ हेतुमात्रासम्प्रतिपत्तिर्दृष्टा । एवं कुतोऽग्निमानित्युक्ते धूमवत्त्वादिति लिङ्गवचनमात्रादपि क्वचित्साध्यसिद्धिरवगम्यते । तस्मान्न नित्यतावयवमेवानुमानं मानमिति । नियमार्थ इत्यर्थः । एवं युक्तिस्वरूपमभिधाय अधुना तद्दूषणं निरूपयति **विरोध इति** ।

४६८ विरोधस्तु प्रमाणप्रातिकूल्यमित्युक्तम् । विरोधोऽपि स एवेत्यत्राया सन्ततिस्वरूपमाह **प्रतिज्ञायामिति** ।

४६९ विरोधः कतिधेत्यत आह **विरोध इति** ।

४७० विरुद्धानैकान्तिकानवध्यसितत्वमव्याप्तिरिति सिद्धवत्कृतम् । अथोपाधिदोषोऽप्यव्याप्तिरित्याह **साध्येति** ।

४७० अनुमानस्योपाधिविरोधः समविरोधश्चेति आचार्याभिप्रायः । वायुः बाह्येन्द्रियप्रत्यक्षः प्रत्यक्षस्पर्शत्वात् घटवदित्यस्य वायुर्बाह्येन्द्रियप्रत्यक्षो न भवति । अरूपवद्द्रव्यत्वात् गगनवदिति । तदुपाधेरपि स्वव्यावृत्तिलिङ्गेन पक्षात्साध्यव्यावृत्तिबोधकत्वादिति यावत् । एवं चेत्सर्वानुमानवद्विरुद्धत्वादुत्तरस्याप्यसाधकत्वमिति न मन्तव्यम् । पर्वतोऽग्निमान् धूमवत्त्वादिति तत्प्रबलवत्त्वात् । न हि पर्वतोऽग्निमान्न भवति पक्षसपक्षयोरन्यतरत्वादित्यनेन तस्य साधकत्वमित्यभिप्रैति **दुर्बलेनेति** ।

४७१ युक्तिशेषो द्वावित्युक्तम् । निग्रहांश्च षडेवेत्याह **संवादेति** ।

४७२ एकैवं कथा उपयुक्तानुमानतद्दूषणलक्षणमभिधाय अधुना कथां लक्षणविभागाभ्यां निरूपयति **वाद इति** ।

४७४ सिद्धान्तमप्रकाश्य **कथमसत्पक्षदूषणम्** । असद्भिः **पृष्टे** अतिस्वसिद्धस्यापि वक्तव्यत्वादित्याशङ्कां नुदति **उक्त इति** ।

४७५ अहंकृतिभेदेपि कथाकारत्वावितण्डाजल्पयोर्विद्यां परीक्ष्य समाभ्यामेव वादिप्रतिवादिभ्यां कर्तव्यमित्याह **विद्येति** ।

४७६ विद्या अपरीक्ष्य च जन्मादिनोच्चनीचत्वज्ञानं स्यादिति शङ्कां नुदति **विनेति** ।

४७७ जन्यादौ तत्त्वनिर्णयस्यासन्दिग्धत्वादुच्चनीचत्वविज्ञानाय विद्यापरीक्षणत्वेव कार्यमित्यर्थः । विद्या-परीक्षादिभ्योऽपि स्फुटमुच्चनीचत्वविज्ञानं वादे न भवतीति वाद एव विजिगीषुभ्यां मध्यस्थैर्देय इत्याह **वादेनेति** । तत्सिद्धौ वादेनोच्चनीचत्वविज्ञाने सतीत्यर्थः ।

४७८ प्रसिद्धविद्या-उच्चत्वज्ञाने वादः कारणं नेत्याह **बहिरिति** ।

४७८ यदा विजिगीषुरपि वादमिच्छति तदा कथं कार्य इत्यत आह **सभेति** ।

४७८ वादेन जयलाभासिद्धौ जल्पादेप्रयोजकत्वानुदय इत्यत आह **स्पर्धीति इति** ।

४८० वादस्य प्राथम्यमुक्त्वा तत्सिद्धौ जल्पादेर्वैयर्थ्यमुक्तम् । अतः कथं जल्पादि स्यादित्यत आह **विनेति** ।

४८१ विजिगीष्वधिकृतत्वे जल्पत्वमेवास्य न वादत्वमिति न मन्तव्यम् । उभयलक्षणयुक्तत्वादुभयथा वास्य व्यवहारः सम्भवतीत्यत आह **जल्प इति** ।

४८१ कथायां मानेन साधनं प्रस्तुतमुक्ते तैरिति तस्य प्रायिकत्वमभिप्रेत्याह **प्रतिज्ञामात्रेति** ।

४८२ सभादीनां प्रस्तुतानां लक्षणमाह **सभेति** ।

४८४ वितण्डावादजल्पौ च परस्परं विवेचयति **उभाभ्यामिति** ।

४८५ केन मानेन साधनं कार्यं इत्यत आह **सद्भिरिति** ।

४८६ प्रतिवादिना किं कार्यमित्यत आह **प्रत्यक्षेति** ।

४८७ उपक्रमादिलिङ्गानामनुमानत्वमभिप्रेतम् । तत्रावयवनियमो प्रयोजक इत्याह स्वसिद्धान्तमप्रकाश्य कथ-मसत्पक्षदूषणमसद्भिः पृष्टे सति स्वसिद्धस्यापि वाक्यत्वादित्याशङ्कां नुदति **त्रिपत्रेति** ।

४८७ सिद्धान्ते प्रमाणसाम्यविशेषलक्षणमभिधाय पराभिमतमानलक्षणं निरस्यति **अनुभूतिरिति** ।

४९० अनुभूतिरेव प्रमाणमिति चेत् स्मृतेरप्रामाण्यप्रसङ्ग इत्यर्थः । स्मृतिप्रामाण्यानङ्गीकारे पूर्वानुभूते मानाभावः स्यादित्याह **पूर्वेति** ।

४९१ यतः पूर्वानुभूतेर्वर्तमानं सविज्ञानं तत्साक्षिणावगतप्रामाण्यान्मानं हीत्याह **मानसमिति** ।

४९१ स्मृतेर्मानत्वं दृष्टान्ततो बोधयति **अतीतेति** ।

४९२ इदानीमिमं घटं पश्यामीति चाक्षुषप्रत्यक्षवत् तदानीं स्वस्य गोदृष्ट इत्यादि स्मरणं मानसप्रत्यक्षम् । न त्वनुमानं व्याख्यानुसन्धानाभावात् । तथाप्यनुभूतघटेऽनुमानमेव मानमिति चेदनुभूयमानघटेऽप्यनुमानमेव मानमेव मानमिति प्रत्यक्षाभावप्रसङ्ग इत्यर्थः । न विलक्षणत्वादित्यधिकरणार्थप्रतिपादितमुपसंहरति **एवमिति** ।

४९२ स्मृतेः प्रामाण्यस्य साक्षिणावगतत्वं स्पष्टयित्वाङ्गीकार्यत्वमाह **विज्ञातमिति** ।

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

* * *

॥ अभिमान्यधिकरणम् ॥

४९४ प्रतिपादितार्थम् 'अभिमानिव्यपदेश' इत्यादि सूत्रेण सङ्गमयित्वा तद्व्याख्याति **तथापीत्यादिना** ।

४९६ मृदादिशब्दानां देवतासु प्रसिद्ध्यभावात् कथं तदङ्गीकार इत्यत आह **बालेति** ।

४९८ न चानुपलब्धेर्मृदादिदेवताभावो वाच्य इत्यत आह **उक्तेति** ।

४९८ मृदादि गिरां कुतो लक्षणा देवतासु व्युत्पत्तिरित्यत आह **शास्त्रेति** ।

४९९ मृदादिमात्रारूढमूर्खव्युत्पत्तेस्तद्देवतारूढविद्वद्व्युत्पत्तेः प्रबलत्वात् तद्देवतास्वेव मृदादिशब्दो मुख्य इत्यभिप्रैति **व्युत्पत्तिरिति** ।

॥ इति अभिमान्यधिकरणम् ॥ ३ ॥

* * *

॥ असदधिकरणम् ॥

५०० ईदृशो न्यायस्त्वर्थान्तरन्यायग्रहणन्यायः । युक्तिविरोधं परिहृत्य श्रुतिगुणयुक्तिविरोधमुद्भाव्य परिहरति असावित्यादिसूत्रं विवृण्वन् **अल्पेति** ।

५०१ तमेव न्यायं स्पष्टयति **युक्तेरिति** ।

५०२ कश्चिच्छ्रुतिरहितयुक्तिविरोधपरिहारश्चतुर्थपाद एव सङ्गतः, किमित्यत्र क्रियत इत्यत आह **श्रुतीति** ।

५०३ अल्पवाक्ययुतां युक्तिरिति प्रस्तुतां पूर्वमतयुक्तिमुद्भाव्य परिहरति **असदिति** ।

५०४ बुद्ध्यभावादसतः कर्तृत्वं नास्तीत्यभिप्रैति **बुद्धिपूर्वेति** ।

५०५ प्रतिषेधमात्रत्वादिति मात्रतः कृत्यमाह **प्रतिषेधेति** ।

५०७ प्रस्तुतधर्म्यादिस्वरूपमाह **विशेष्यतेति** ।

५०८ युक्तेस्तु युक्तिबाहुल्यमिति प्रस्तुतयुक्तिबाहुल्यं दर्शयति **सर्वेति** ।

५०९ सर्वनाशेष्वपि कस्यचिच्छिष्टत्वमेवेत्यवधारयति **न चेति** ।

५०९ इतोऽपि सर्वनाशो न युज्यत इत्यत आह **धर्मेति** ।

५१० एतदेव प्रतिपादयति **अनादित्वमिति** ।

५१० अनादित्वं स्पष्टयति **पूर्वेति** । जगत्सृष्टिकारणाद् दृष्टं पूर्वादृष्टञ्च चेत् कारणाभावात् तच्च तदुत्तरं च कथं भवेत् । सृष्टिकारणाद् दृष्टिमनुपलभ्यमानत्वान्नास्ति चेल्लयोऽप्यनुपलभ्यमानत्वान्न स्यात् । लयेऽनुमादिकं मानमिति दृष्टादौ जगत्कर्तरि च तदेव मानं स्यादित्यर्थः ।

५११ इतोऽप्यसत्कारणं नेत्याह **उत्पत्तीति** ।

५१२ जगत्कर्त्रनुमानस्य प्रत्यनुमानबाधं परिहरति **आगमेति** ।

५१४ ये तु 'एतेन शिष्टा परिग्रहा' इत्यत्र नविलक्षणत्वादिति सूत्रितेन किञ्चिच्छिष्टं सम्मतनिरीश्वरसाङ्ख्य-निराकरणन्यायेन शिष्टापरिगृहीतत्वे वैशेषिकादयो निरस्ता इति योजयन्ति । तद्दूषयति **न चेति** ।

५१५ अभिप्रेतार्थं निगमयति **अत इति** ।

५१५ असदितीत्यत्र निराकृतमसत्कारणत्वमेतेनेत्यत्रापि किमिति निराक्रियत इत्यत आह **तदिति** ।

५१७ पुनरसत्कारणत्वनिषेधे किं प्रापकमित्यत आह **प्रापकमिति** ।

५१७ उत्पत्तिनाशकरीत्यात्रासत्कारणत्वनिषेधेऽनुमानमुक्तम् । जीवप्रधानयोः कर्तृत्वनिषेधे चानुमानं द्योतयति **क्वचिदिति** ।

॥ इति असदधिकरणम् ॥ ४ ॥

* * *

॥ भोक्त्रधिकरणम् ॥

५१८ ईश्वरस्य कर्तृत्वं परेऽव्यये सर्व एकीभवन्तीति श्रुतेरशक्तजीवैक्यादवास्तवमित्याशङ्कां परिहरति 'भोक्त्रापत्तेरि'त्यादि सूत्रव्याख्यानेन **नान्यदिति** ।

५२० पराभिमतं सूत्रव्याख्यानं नुदति **भोक्तृत्वेति** ।

॥ इति भोक्त्राधिकरणम् ॥ ५ ॥

* * *

॥ आरम्भणाधिकरणम् ॥

५२१ तदन्यत्वमित्यादिसूत्रस्य पराभिमतार्थं निरस्यति **कथमिति** ।

५२२ जगतो ब्रह्मत्वं निषिद्धं चेत्किं निषिध्यत इत्यत आह **स्वतन्त्रेति** ।

५२२ परतन्त्रकारणसद्भावे मानमाह **द्रव्यमिति** ।

५२३ 'तस्माद्धान्यं न पर' इति श्रुतेरन्यस्य परत्वमात्रनिषेधोऽन्यथानुपपत्त्यापि भगवद्वशं कारणमस्तीत्याह **न पर इति** ।

५२४ स्वतन्त्रश्चेत्किमित्युपादानमपेक्षत इत्यत आह **शक्त इति** ।

५२५ निमित्तकारणत्वाच्च ब्रह्मणो जगतोऽन्यत्वमित्याह **नित्येति** ।

५२५ उपादानेन द्वयमित्येतत्प्रतिपादयति **असदिति** ।

५२६ जीवस्यैव पूर्वकर्मणा जगत्कर्तृत्वोपपत्तेः किमीश्वरेणेत्याशङ्कापरिहाराय कृत्स्नप्रसक्तिरित्यादिसूत्रं व्याख्याति **अनंशस्येति** ।

५२६ उक्तार्थे मानमाह **शक्त इति** ।

॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

* * *

॥ इतरव्यपदेशाधिकरणम् ॥

५२९ ईश्वरसामर्थ्यादिकदेशो क्रियानङ्गीकारे दोषमाह **यदीति** ।

५३० यद्येकस्यैकदेशप्रवृत्तिरभ्रान्तिकल्पिता तर्हि कुतोऽनंशित्वश्रुतिरित्यत आह **अंशिन इति** ।

५३२ भेदमन्तरेणाविशेषादेव सांशत्वं सौभर्यादौ सिद्धमित्याह **बहिति** ।

५३२ बहुत्वे सति तत एव भिन्नत्वं स्यादिति चेत् सत्यमित्याह **बहुत्वेनेति** ।

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

* * *

॥ श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥

५३३ उक्तविरोधो भगवत्यपि किं न स्यादित्याशङ्कापरिहाराय श्रुतेस्त्वित्यादिसूत्रं व्याख्याति **तस्येति** ।

५३४ अशेषशक्तित्वात् तस्य सर्वात्मत्वं च युज्यत इति न मन्तव्यम् । सर्वोत्तमत्वविरोधात् । सापि स्यादिति चेत् स निरस्यत इत्याह **विरोध इति** ।

५३४ तर्हीतराध्यायाधिकरणपरिहृतविरोधानां को विशेष इत्यत आह **तदन्य इति** ।

५३६ सृष्ट्यादिवाक्ये परस्परविरोधोऽपि विष्णोः सर्वोत्तमत्वविरोधपरिहाराङ्गत्वेनेत्यभिप्रायः । सर्वोपेतेति भगवतः कर्तृत्वविरोधानां सर्वेषां परिहृतत्वात् पुनरपि विकरणत्वादित्यादि सूत्रे कर्तृत्वविरोधः परिह्रियते चेत् पुनरुक्तिरित्यत आह **मानेति** ।

॥ इति श्रुतेस्तुशब्दमूलत्वाधिकरणम् ॥ ८ ॥

* * *

॥ नप्रयोजनाधिकरणम् ॥

५३६ बुद्धिमतः प्रयोजनमन्तरेण व्यापारासम्भवादीश्वरस्य सृष्ट्यादिकर्तृत्वादप्राप्तप्रयोजनत्वेन न्यूनतेति न मन्तव्यम् । बुद्धिमतोऽपि व्याख्यातुः प्रयोगमन्तरेण करचलनादिव्यापारदर्शनादित्यभिप्रायेण नप्रयोजनत्वादित्यादिसूत्रं व्याख्याति **सदेति** ।

५३७ तत्त्वमानमाह **देवस्येति** ।

५३८ क्रीडाप्रयोजनाय सृष्ट्यङ्गीकारे श्रुतिविरोधोऽस्तीत्याह **क्रीडामिति** ।

५३९ इच्छयैव लीला इच्छा च का स्पृहेति निषिध्यते । अतः कथं लीलेति चेत् स्वप्रयोजनेच्छाभावेऽपि परप्रयोजनेच्छया लीलेत्यभिप्रैति **आत्मेति** ।

५४० का स्पृहेतीच्छामात्रनिषेध इत्यत आह **इच्छामात्रमिति** ।

५४१ महातात्पर्यं दर्शयति **मोक्षेति** ।

५४३ मोक्षाख्यफलवदर्थबोधकतयैव मानत्वमिति । कुत एतद्वाक्यस्य यथार्थेनैव मानत्वोपपत्तेरित्यत आह **याथार्थ्यमिति** ।

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

* * *

॥ वैषम्यनैर्घृण्याधिकरणम् ॥

५४४ सत्यं याथार्थ्यं मानत्वमिति तदेव न निर्धार्यते । धर्मादिविषयवाक्यस्य यावदिष्टसाधनबोधकत्वं नावगतं इष्टसाधन एव शब्दव्युत्पत्तेरित्याद्यभिप्रायः । सर्वकर्तृत्वे वैषम्यादिदोषः स्यादित्याशङ्कापरिहाराय वैषम्येत्यादिसूत्रं व्याख्याति **वैषम्यमिति** ।

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

* * *

॥ सर्वधर्मोपपत्त्यधिकरणम् ॥

५४५ शिष्टरक्षणं दुष्टशासनं वेदानुसारि राजादाविव ईश्वरेऽपि दूषणं नेत्यर्थ उपपद्यत इत्यादि सूत्रार्थमाह **यदधीना इति** ।

५४६ सर्वधर्मोपपत्तेश्चेति सूत्रं प्रतिपदार्थेन सङ्गमयित्वा व्याख्याति **सर्वेति** ।

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां
शङ्करपण्डिताचार्यविरचितायां संबन्धदीपिकायां
द्वितीयाध्यायस्य प्रथमः पादः ॥ २-१ ॥

* * *